श्रीबलभद्रत्रिपाठिविरचितः

॥ काशिकावृत्तिसारः ॥

उत्तरार्द्धभागः

श्रीबलभद्रत्रिपाठिविरचितः

काशिकावृत्तिसारः

समीक्षात्मकदृशा सुसंपाद्य 'सुधा'ख्यटीकया सनाथितः

त्रिपाठ्युपाह्वेन श्रीचन्द्रभानुना

॥ उत्तरार्द्धभागः ॥

श्रीगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

प्रयागः

१९९५ ई०

Rashtriya Sanskrit Sansthan

(Under the auspices of the Ministry of Human Resources Development, Govt. of India)

New Delhi

●

Ganganatha Jha Kendriya Sanskrit Vidyapitha TEXT SERIES

●

General Editor

Dr. G. C. Tripathi

●

No. 32

KĀŚIKĀVṚTTISĀRA

(Part II)

by

Pt. Balabhadra Tripathi

Critically edited and embellished with a Sanskrit Commentary called 'Sudhā'

by

Dr. Chandrabhanu Tripathi

ALLAHABAD

1995

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)
देहली

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला

प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी

—•—

द्वात्रिंशं प्रसूनम्

श्रीबलभद्रत्रिपाठिविरचितः

काशिकावृत्तिसारः

सुधाख्यटीकासंवलितः
(उत्तरार्द्धभागः)

—•—

सम्पादकः सुधाटीकाकारश्च
डॉ० चन्द्रभानु त्रिपाठी

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आजाद पार्क
प्रयागः
१९९५ ई०

प्रकाशकः
डॉ० गयाचरण त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
इलाहाबाद-२

●

●

मूल्यम्

●

मुद्रकः
शाकुन्तल मुद्रणालयः
३४, बलरामपुर हाउस
इलाहाबाद-२

FOREWORD

It is indeed a moment of great satisfaction and contentment for both the author and the publisher when a voluminous work like the present one ultimately comes out of press braving all hazards and overcoming all possible (and impossible) impediments that usually thwart such pious endeavours. As such, we really feel happy to place this second (and the final) volume of the *Kāśikā-vṛttisāra* of Pt. Balabhadra Tripathi in the hands of the scholars of Sanskrit grammar, especially those who still attach great importance to the classical tradition of '*prācīna*' Vyākaraṇa.

This volume represents the latter half of the *Aṣṭādhyāyi* i.e. Adhyāyas V to VIII and contains, as per plan of the first volume : the *Sūtras* of Pāṇini, the *Vṛtti Kāśikāsāra* of Balbhadra, the commentary called *Sudhā* by Dr. C. B. Tripathi on the Vṛtti and several useful appendices (like the *Vārttikas* and the *Gaṇapāṭha* etc.) pertaining to this portion of the Aṣṭādhyāyī. There is also a valuable introduction to this part by Dr. C. B Tripathi which covers and deals with certian novel points not touched in his introduction to the first volume.

It may perhaps also be recorded in passing here that over the previous years I have found myself drifting more and more towards an earlier date of the composition of the *Kāśikāvṛttisāra* than the one noted in the introduction of the First volume (*i.e.* V.S. 1774, cf. p. 6) and now hold—despite certain apparent difficulties in interpreting वेदर्षिराजर्षि.... etc.—that the date of the composition of this work must have been Vikrama Saṁ 1747 (i.e. 1690 A. D.) which would also bring him closer to Trivikrama, his maternal uncle and Guru, who composed his *Rāma-kīrtikumudamāḷā* in 1731 V.S. . I have found many exam-

ples recently in the Manuscripts in which the authors (especially of later medieval period) have split up the dates mentioned by them in the groups of two digits each. Within the groups the digits follow the order in which they are written (i.e, first tens then ones) whereas the groups themselves are arranged according to the maxim of अङ्कानां वामतो गतिः । Thus वेदर्षि would indicate 47 and राजर्षि 17 (राजा = 1) and when arranged in वामतो गतिः-order, this will yield the year as 1747 V.S.

I personally consider this work as a most simple introduction to the sūtras of Pāṇini in the order in which they were compoed (and actually meant to be learnt !) and recommend this book highly to the students of Sanskirt who embark upon their first encounter with Pāṇini.

I earnestly thank Prof. Chandrabhanu Tripathi for the arduous task that he has undertaken and successfully accomplished in this advanced age by toiling for a number of years on it, but I think that it has also given him two-fold satisfaction, first of bringing to light an unpublished work and second of proving himself to be a worthy successor of a great Pandit who happens to be the last scion of a family having great tradition of Sanskrit learning.

Shri Upendra Tripathi of Shakuntal Mudranalaya deserves all praise for his perseverence and patient labour for full five years which he has dedicated in bringing out these two volumes.

I hope that the work shall be well received by the Sanskrit scholars.

G. N. Jha K. S. Vidyapeeth
Allahabad
Dīpāvali, V. S. 2052
Oct, 23rd, 1995 A D.

Gaya Charan Tripathi
Principal

काशिकावृत्तिसारः

॥ श्रीः ॥

आत्मनीनम्

शब्दब्रह्म यदेकं यच्चैतन्यञ्च सर्वभूतानाम् ।
यत्परिणामस्त्रिभुवनम् अखिलमिदं जयति सा वाणी ॥१॥

(अथर्ववेदभाष्यभूमिकायां सायणाचार्यः)

नमः पाणिनये तस्मै यस्मादाविरभूदिह ।
आदौ व्याकरणं काव्यमनु जाम्बवतीजयम् ॥२॥

(राजशेखरः)

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ॥३॥

(पदमञ्जरीकारो हरदत्तमिश्रः)

शब्दार्थरूपिणौ शुद्धौ सम्पृक्तौ परमेश्वरौ ।
गुरून् विद्याप्रदान् सर्वान् पितरौ नौमि च स्वकौ ॥४॥

कथं मेऽष्टाध्याय्या जटिलतमसूत्रैः परिचयः
प्रयोगाः सिद्धान्ताः कथमवगताः शब्दसुविदाम् ।
महाभाष्यागाधोदधिरपि कथं गाढ इति च
प्रसादं मन्येऽहं गुरुकृतमिमं नात्मसुकृतम् ॥५॥

विद्यावन्तो विद्यार्थिनश्च !

विदितमेव भवतां यदिह शब्दनामकं ज्योतिर्विश्वं व्याप्य स्थितमस्ति । तदाह भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।

विद्यानां प्रदीपभूतं व्याकरणशास्त्रं वर्तते । पदमञ्जरीकारो हरदत्तमिश्रो व्याकरणाध्ययनसंस्कृतमुखान् नरान् देवान् मन्यते । अस्य प्रधानस्य वेदाङ्गस्य व्याकरणस्याध्ययनाय बहुभिराचार्यैः प्रकल्पिता विभिन्ना मार्गाः स्व-स्वप्रतिभाभास्वराः सन्ति । तेषु प्रकृति-प्रत्ययविभागद्वारा शब्दानुशासनपरो मार्गः सरलः समः सन्निकृष्टः सध्रीचीनश्च सम्मतः । एतन्मार्गप्रकाशकं व्याकरणशास्त्रम् पाणिन्यष्टकमेव सम्मतम् । अस्य पाणिन्यष्टकस्य व्याख्यानभूतं पातञ्जलमहाभाष्यं विवृण्वाना आचार्यवामन-जयादित्यकृता काशिकावृत्तिः विप्रकीर्णतन्त्रजालसाररूपा महदुपकरोति दृढा नौरिव व्याकरणाम्भोधिमवगाहमानान् । तस्याश्च सारस्वरूपोऽन्वर्थनामा **श्रीबलभद्राचार्यकृतः काशिकावृत्तिसारग्रन्थः** सेतुरिव शब्दसमुद्रपारं गमयति सन्तरणानभिज्ञमध्येतृजनम् । एतयोः काशिकावृत्ति-तत्सारग्रन्थयोस्तत्कर्त्रोश्च विषये ग्रन्थस्य पूर्वार्द्धे निबद्धं तत एवावगन्तव्यम् ।

अस्मिन्नुत्तरार्द्धे पूर्वार्द्धापेक्षया किञ्चिदुत्तरम् उत्कृष्टं विव्रियते । अयमाचार्यो बलभद्रः यथा पाणिन्यष्टकव्याख्याभूतायां काशिकावृत्तौ तथैव एतदालम्ब्य विरचितायां वैयाकरणसिद्धान्तकौमुद्यामपि कृतभूरिपरिश्रमोऽभूत् तथा तदुत्तरमपि स्वमतिप्रकर्षमतानीत् । तेन यत्र कुत्रचित् ताभ्यां पृथक्त्वं दृश्यते । तत्प्रदर्शनाय **पञ्चैवो**दाहरणान्यत्र प्रस्तूयन्ते यथा —

(१) कौमुद्याम् (३३०१) **अध्यायन्यायोद्यावसंहाराश्च** इत्येतावदन्तं सूत्रम्, वार्तिकञ्च **अवहाराधाराबायानामुपसंख्यानम्** । वृत्तिसनुसरति वृत्तिसारग्रन्थे च **अध्यायन्यायोद्यावसंहाराधारादायाश्च** (३।३।१२२) इति सूत्रम् उदाहरणेषु च **अवहारः** अपि वर्तते । अनेन कौमुद्याः पक्षेऽपि सम्मतिर्दर्शिता ।

(२) कौमुद्याम् (४७०) **टिड्ढाणञ्** ......इति सूत्रं **क्वरप्**-अन्तं विद्यते, **नञ्स्नञीकक्ख्युंस्तरुण** ...... । इति वार्तिके च तरुणात् प्राक् **ख्युन्** प्रश्लिष्टः । काशिकावृत्तिसारे तु **टिड्ढाणञ्** ......**क्वरप्ख्युनाम्** (४।१।१५) इति ख्युनन्तं सूत्रम्, वार्तिके च **ख्युन्** नास्ति ।

(३) काशिकावृत्तिसारे **यजध्वैनमिति च** (७।१।४३) सूत्रम् । 'यजध्वमेनम' इत्यस्य स्थाने वेदे वकारस्य यकारः, मकारस्य लोपश्च निपातितः इति **यजध्यैनम्** इति सूत्रम् लिखितम् । वृत्तौ 'मलोपो निपात्यते, वकारस्य च यकारः छन्दसि विषये इत्युक्त्वाऽपि मकारस्य लोप एव निपातितः न वकारस्य यकारः तत्र यजध्वैनम् इत्युदाहृतम् । कौमुद्यामपि तदेवोदाहृत्य वृत्तिकारोक्तिः प्रामादिकी मता । सुबोधिनी-टीकाकारेणापि **यजध्वैन**मित्येव पाठो वेदभाष्यानुसारी मतः । अत्र प्रमादः प्रतिलिपिकारस्य, ग्रन्थकारस्य वेति सुधियो निर्णयन्तु ।

(४) काशिकावृत्तौ भवतेरः (७।४।७३) इति सूत्रस्य वृत्तौ (वाराणसेय ताराप्रकाशनग्रन्थे) 'भवतेः' इति धातुनिर्देशादिहापि भवति **अनुबभूवे कम्बलो देवदत्तेन** । काशिकावृत्तिसारसम्मतौ 'भवतेः' इति कर्तृनिर्देशात् भावकर्मणोर्न अत्वम् **अनुबभुवे कम्बलो मैत्रेण** । काशिकावृत्तावपि (हैदराबादस्थ उस्मानिया विश्वविद्यालय-संस्कृत अकादमी संस्करणे) अत्र सूत्र-प्रवृत्तिः न स्वीकृता 'भवतेः' इति कृतविकरणनिर्देशात् । सिद्धान्तकौमुद्या-ष्टीकाकारेणात्र भावकर्मणोरपि सूत्रस्य प्रवृत्तिः स्वीकृता उदाहरणद्वयम-प्युल्लिखितम्—**तस्यातपत्रं विभराम्बभूवे** । तथा **विभावरीभिर्बिभरां-बभूविरे** ।

(५) काशिकावृत्तौ **अभिनिसस्तनः शब्दसंज्ञायाम्** (८।३।८६) इति सूत्रस्योदाहरणम् **अभिनिष्टानो** वर्णः / **अभिनिस्तानो** वर्णः ।अत्र विकल्पेन सकारस्य मूर्धन्यादेशः, सलोपश्च । कौमुद्यां वृत्तिसारे च एकषकारकमेकमेव रूपम् **अभिनिष्टानो** वर्णः । तत्र पूर्वसूत्रात् 'अन्यतरस्याम्' इति नानुवृत्तम् ।

सुधायामेतत् सर्वम् अन्यच्च सर्वमप्यन्तरं यथास्थानं विवृतम् । अस्मिन्नुत्तरार्द्धभागे चतुर्थपरिशिष्टे ग्रन्थान्तर्गतवार्तिकादीनामुल्लेखोऽपि कृतः । काशिकावृत्तिसारे व्याख्यातानाम् अष्टाध्यायीसूत्राणां संख्या पञ्चाशीत्यधिकनवशतोत्तरसहस्रत्रयात्मिका (**३९८५**) अस्ति । विस्तृतं विवरणमनुपदमेव वर्तते ।

पाणिनीयं सूत्राष्टकम्

(अष्टाध्यायी-सूत्र-संख्या-समाख्या)

पाणिनिना प्रोक्तम् पाणिनीयम् । 'तेन प्रोक्तम्' इति सूत्रेण प्रोक्तार्थे 'पाणिनि' शब्दात् 'छ' प्रत्ययः । **प्रोक्तम्** = स्वयम् अन्येन वा कृतम् व्याकरणम् अध्यापनेन अर्थव्याख्यानेन वा प्रकाशितम् ।

महावैयाकरणो भर्तृहरिः व्याकरणम् एवं प्रशंसति —

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ॥

अत्रापि देशकालव्यवस्थाऽनुसारेण पाणिनीयं व्याकरणं सर्वोपरि वरीवर्ति तदाह—

पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

अस्मिन् पाणिनीय-सूत्राष्टके आचार्येण पाणिनिना स्वाष्टाध्याय्याम् बहूनां पूर्ववर्तिनां शब्दशास्त्रपारङ्गतानाम् आचार्याणाम् ससम्मानं नामग्रहणमकारि । तेऽत्र क्रमेणोल्लिख्यन्ते—

१. सम्बुद्धौ शाकल्यस्य १।१।१६
२. इञः प्राचाम् २।४।६०
३. उदीचां माङो व्यतीहारे ३।४।१९
४. लङः शाकटायनस्यैव ३।४।१११
५. प्राचां ष्फ तद्धितः ४।१।१७
६. शोणात्प्राचाम् ४।१।४३
७. आरगुदीचाम् ४।१।१३०
८. उदीचामिञ् ४।१।१५३
९. उदीचां वृद्धादगोत्रात् ४।१।१५७
१०. प्राचामवृद्धात् फिन् बहुलम् ४।१।१६०
११. प्राचामुपादेरडज्वुचौ च ५।३।८०
१२. एकाच्च प्राचाम् ५।३।९४
१३. गिरेश्च सेनकस्य ५।४।११२
१४. वा सुप्यापिशलेः ६।१।९२
१५. अवङ् स्फोटायनस्य ६।१।१२३
१६. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६।१।१२७
१७. ई३ चाक्रवर्मणस्य ६।१।१३०
१८. मातरपितरावुदीचाम् ६।३।३२

१९. इको ह्रस्वोऽङ्यो गालवस्य ६।३।६१

२०. पृषोदरादीनि यथोपदिष्टम् ६।३।१०९

२१. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ७।१।७४

२२ ऋतो भारद्वाजस्य ७।२।६३

२३. उदीचामातः स्थाने यक्पूर्वायाः ७।३।४६

२४. आदाचार्याणाम् ७।३।४९

२५. अड् गार्ग्य-गालवयोः ७।३।९९

२६. अदः सर्वेषाम् ७।३।१००

२७. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८।२।८६

२८. व्योर्लघुप्रयत्नतरः शाकटायनस्य ८।३।१८

२९. लोपः शाकल्यस्य ८।३।१९

३०. ओतो गार्ग्यस्य ८।३।२०

३१. हलि सर्वेषाम् ८।३।२२

३२. त्रिप्रभृतिषु शाकटायनस्य ८।४।५०

३३. सर्वत्र शाकल्यस्य ८।४।५१

३४. दीर्घादाचार्याणाम् ८।४।५२

३५. नोदात्तस्वरितोदयमगार्ग्य-काश्यप-गालवानाम् ८।४।६७

अस्मिन् सूत्राष्टके **प्राचाम्**, **उदीचाम** इति पदद्वयं देशवाचकम्, आचार्यवाचकम् च। क्वचिद् गोत्रवाचकमपि यथा इञः प्राचाम् इत्यत्र प्राचां गोत्रे इत्यर्थो भवति, तत्राप्याचार्यत्वमस्ति ।

आचार्य पदेन (७।३।४९, ८।४।५२)। नित्यत्वऽरूपोर्थो लभ्यते। इदं सूत्रद्वयं विकल्पं मन्यमानानाम् 'आचार्याणामनन्तरमेव वर्तते। पूर्वत्र आचार्यपदेन ये नोदञ्चः आचार्याः तेषां मते, उत्तरत्र च ये शाकल्य-शाकटायनाभ्यां भिन्नास्तेषां मते इत्येकोऽर्थो लभ्यते। पदमञ्जरीकारस्यायमभिप्रायः–आचार्यस्य पाणिनेर्य आचार्यः स इह आचार्यः। गुरुत्वाद् बहुवचनम्।'

हलि सर्वेषाम् (८।३।२२) इत्यत्र सर्वेषाम् = आचार्याणाम् मतस्योल्लेखः शाकटायन-शाकल्ययोर्मतसंग्रहार्थम् । तयोरपि लोपोऽत्र सम्मतः इत्यर्थः। पृषोदरादीनि यथोपदिष्टम् (६।३।१०९) इत्यत्र **शिष्टाः** = विश्रुताः आचार्याः अध्याहृताः । तेन **शिष्टैरुपदिष्टानि** इत्यर्थलाभः। अत्र बोधसौ-

कर्यायेदं परिगणनम् उचितं प्रतिभाति । **प्राचाम्** मतम् षट्सु सूत्रेषु, **उदीचाम्** अपि षट्सु सूत्रेषु, **शाकल्यस्य** सूत्रचतुष्टये, **शाकटायनस्य** सूत्रत्रये, **सेनक-आपिशलि-स्फोटायन-चाक्रवर्मण-भारद्वाज-काश्यपानां** प्रत्येकस्य एकैकस्मिन् सूत्रे, **गालवस्य** सूत्रचतुष्टये, **गार्ग्यस्य** सूत्रत्रये उद्धृतं वर्तते । **सर्वेषाम्** (आचार्याणाम् सूत्रद्वये, **आचार्याणाम्** (गुरूणाम्) अपि सूत्रद्वये, उल्लेखः, **शिष्टानाञ्चैकस्मिन्** सूत्रेऽध्याहारो दृश्यते । काशिकावृत्तिसारे 'खयो द्वितीया शरि पौष्करसादेः, इति वार्तिकं सूत्रत्वेनाङ्गीकृतम् इति **पौष्करसादिरपि** सम्मानितः ।

चतुर्णां सूत्राणां भाष्ये योगविभागो जातः ।

१. उञः ऊँ उञः, ऊँ (१।१।१७-१८)

२. प्रादय उपसर्गाः क्रियायोगे प्रादयः, उपसर्गाः क्रियायोगे (१।४।५८-५९)

३. विभाषाऽपपरिबहिरञ्चवः पञ्चम्याः विभाषा, अपपरि० (२।१।११।१२)

४. ह्वः सम्प्रसारणमभ्यस्तस्य च ह्वः सम्प्रसारणम्, अभ्यस्तस्य च (६।१।३२-३३)

सूत्रद्वये भाष्ये पाठभेदः ।

१. प्रकृत्यान्तःपादम्० भाष्ये नान्तःपादम्० (६।१।११५)

२. सम्पर्युपेभ्यः० भाष्ये सम्परिभ्याम्० (६।१।१३७)

त्रिषु स्थलेषु भाष्ये पाठक्रमभेदः ।

१. विष्वग्देवयोश्च (६।३।९२) समः समि (९३), सहस्य सध्रिः (९५), नहिवृतिवृषि० (११६) इति सूत्राणां भाष्यक्रमः—समः समि-नहिवृति०-विष्वग्देवयो.-सहस्य सध्रिः ।

२. ङ्णोः कुक्टुक्शरि (८।३।२८) इति सूत्रम् भाष्ये शि तुक् ८।३।३१) इत्यस्योत्तरं वर्तते ।

(३) अभ्यासे चर्च (८।४ ५४) इति सूत्रम् भाष्ये शश्छोऽटि (८।४।६१) इत्यस्यानन्तरं वर्तते ।

एकत्र स्थले भाष्ये अनन्तरयोः सूत्रयोः पाठभेदः

नामन्त्रिते समानाधिकरणे सामान्यवचनम् (८।१।७३), विभाषितं

विशेषवचने बहुवचनम् (८।१।७४) इति सूत्रयोः स्थाने भाष्ये नामन्त्रिते समानाधिकरणे इति प्रथमम् सामान्यवचनं विभाषितं विशेषवचने इति द्वितीयं सूत्रं पठितं वर्तते । 'बहुवचनम्' प्रक्षिप्तम् इति प्रतीयते ।

यथाकालमिमानि दश वार्तिकानि सूत्राष्टके प्रविष्टानि ।

१.	वृद्धस्य च पूजायाम्	(४।१।१६६)
२.	यूनश्च कुत्सायाम्	(४।१।१६७)
३.	कलेर्ढक्	(४।२।८)
४.	कौपिञ्जलहास्तिपदादण्	(४।३।१३२)
५.	आथर्वणिकस्येकलोपश्च	(४।३।१३३)
६.	द्वित्रिपूर्वादण्	(५।१।३६)
७.	नित्यमाम्रेडिते	(५।४।५७)
८.	अचि शीर्षः	(६।१।६२)
९.	नित्यमाम्रेडिते डाचि	(६।१।१००)
१०.	अडभ्यासव्यवायेऽपि	(६।१।१३६)

इमानि त्रयोदश वार्तिकानि अंशतः सूत्रेषु प्रविष्टानि ।

अनु०	अष्टाध्यायी क्रमः	सूत्रम्	वार्तिकांशः
१	१।३।२९	समो गम्यृच्छिभ्याम्	प्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ।
२	३।१।९५	कृत्याः	प्राङ्ण्वुलः ।
३	३।१।११८	प्रत्यपिभ्यां ग्रहेः	छन्दसि वा ।
४	३।१ १२६	आसुयुवपिरपि (लपि) त्रपिचमश्च	लपि प्रक्षिप्तम् ।
५	३।३।१२२	अध्यायन्यायोद्यावसंहारा (धारावाया) श्च	धारावाया प्रक्षिप्तम् ।
६	४।२।२	लाक्षारोचना (शकलकर्दमा) टठक्	शकलकर्दमौ प्रक्षिप्तौ ।
७	४।२।२१	साऽस्मिन् पौर्णमासीति (संज्ञायाम्)	संज्ञायाम् ।
८	४।२।४३	ग्रामजनबन्धु (सहाये) भ्यस्तल्	सहायः ।

९	४।४।१७	विभाषा विवध (वीवधात्)	वीवध शब्दः।
१०	५।४।५०	(अभूततद्भावे) कृभ्वस्तियोगे०	अभूततद्भावे।
११	६।३।६	आत्मनश्च (पूरणे)	पूरणे।
१२	६।३।४०	स्वांगाच्चेतो (ऽमानिनि)	अमानिनि।
१३	६।३।८३	प्रकृत्याऽऽशिषि (अगोवत्सहलेषु)	अगोवत्सहलेषु।

श्री नागेशभट्टादय 'आत्मनश्च पूरणे' इत्येतत् समग्रमेव वार्तिकं स्वीकुर्वन्ति। श्री भट्टोजिदीक्षितप्रभृतीनां व्याख्यानानुसारेण 'पूरणे' इत्येवांशं प्रक्षिप्तं मत्वाऽत्र परिगणनं कृतम्।

सूत्रविदामाचार्याणां व्याख्यानात् इमानि त्रीणि गणसूत्राण्यपि सूत्रकोटौ प्रविष्टानि।

१. कारस्करो वृक्षः (६।१।१५६)
२. एति संज्ञायामगात् (८।३।९९)
३. नक्षत्राद्वा (८।३।१००)

अस्मिन् पाणिनीयसूत्राष्टके काशिकावृत्तिग्रन्थनिर्माणात् (सप्तमशताब्दीतः) प्राक् एतान्येव परिष्करणान्यभूवन्। तदनन्तरम् केषाञ्चिद् गणसूत्राणाम् प्रवेशो जातः येन काशिकावृत्ति-सिद्धान्तकौमुदी-काशिकावृत्तिसारग्रन्थानां सूत्रसंख्यासु न्यूनतमो भेदो जातः। काशिकाग्रन्थसारस्य रचना कौमुद्याः पश्चादभवदिति तत्र प्रक्षेपकृता सूत्रसंख्या ततोऽधिकतरा वर्तते। अस्मिन् रेखाचित्रे त्रयाणामपि ग्रन्थानां सूत्रसंख्या प्रदर्श्यते।

अध्यायः	पादः	काशिकावृत्तिः	कौमुदी	काशिकावृत्तिसारः
प्रथमः	प्रथमः	७५	७५	७५
,,	द्वितीयः	७३	७३	७३
,,	तृतीयः	९३	९३	९३
,,	चतुर्थः	११०	११०	११०
		योगः = ३५१	योगः = ३५१	योगः = ३५१
द्वितीयः	प्रथमः	७२	७२	७२
,,	द्वितीयः	३८	३८	३८
,,	तृतीयः	७३	७३	७३
,,	चतुर्थः	८५	८५	८५
		योगः = २६८	योगः = २६८	योगः = २६८

तृतीयः	प्रथमः	१५०	१५०	१५०
,,	द्वितीयः	१८८	१८८	१८८
,,	तृतीयः	१७६	१७६	१७६
,,	चतुर्थः	११७	११७	११७
		योगः=६३१	योगः=६३१	योगः=६३१
चतुर्थः	प्रथमः	१७८	१७८	१७८
,,	द्वितीयः	१४५	१४५	१४५
,,	तृतीयः	१६८	१६८	१६८
,,	चतुर्थः	१४४	१४४	१४४
		योगः=६३५	योगः=६३५	योगः=६३५
पञ्चमः	प्रथमः	१३६	१३६	१३६
,,	द्वितीयः	१४०	१४०	१४०
,,	तृतीयः	११९	११९	११९
,,	चतुर्थः	१६०	१६०	१६०
		योगः=५५५	योगः=५५५	योगः=५५५
षष्ठः	प्रथमः	२२३	२२३	२२३
,,	द्वितीयः	१९९	१९९	२००
,,	तृतीयः	१३९	१३९	१३९
,,	चतुर्थः	१७५	१७५	१७५
		योगः=७३६	योगः=७३६	योगः=७३७
सप्तमः	प्रथमः	१०३	१०३	१०३
,,	द्वितीयः	११८	११८	११८
,,	तृतीयः	१२०	१२०	१२०
,,	चतुर्थः	९७	९७	९७
		योगः=४३८	योगः=४३८	योगः=४३८
अष्टमः	प्रथमः	७४	७४	७४
,,	द्वितीयः	१०८	१०८	१०८
,,	तृतीयः	११७	११९	११९
,,	चतुर्थः	६८	६८	६९
		योगः=३६७	योगः=३६९	योगः=३७०
	योगः	३९८१	३९८३	३९८५

यद्यपि कौमुद्याः निर्णयसागरसंस्कणे सूत्रसंख्या ३९७८, चौरबम्बा-संस्करणे मूलमात्रे च ३९७५ विद्यते। उभयत्र हेतुर्गवेषणीयः।

उपर्युक्त विवरणेन सुस्पष्टं भवति यदयं प्रक्षेपक्रमः मन्दगत्यैवाभूत्। अन्तरं विशेषेणोल्लिख्यते।

षष्ठाध्यायस्य द्वितीये पादे काशिकावृत्तिसारे **'राजाह्नोश्छन्दसि'** इति गणसूत्रं प्रक्षिप्तम्।

अष्टमाध्यायस्य तृतीये पादे कौमुद्याम् काशिकावृत्तिसारे च **एति संज्ञायामगात्'** तथा **'नक्षत्राद्वा'** इति गणसूत्र द्वयं प्रक्षिप्तम्।

अष्टमाध्यायस्य चतुर्थे पादे काशिकावृत्तिसारे **'खयो द्वितीया शरि पौस्करसादेः'** इति वार्तिकम् प्रक्षिप्तम् 'चयः' स्थाने 'खयः' इति पाठान्तरञ्च जातम्।

अतएव काशिकावृत्तिग्रन्थापेक्षया कौमुद्यां सूत्रद्वयम्, काशिकावृत्तिसारे च सूत्रचतुष्टयम् अधिकं वर्तते।

अयमाचार्यो बलभद्रो यथा शब्दशास्त्रज्ञः तथैव काव्यतत्त्ववेत्ताप्यासीत्। श्रीमत्त्रिपाठिरामकृष्णतनूजन्मनोऽस्य सारस्वतं महः प्रावर्धयदस्य राम-कृष्णाख्यां प्राप्तवति भगवति, गुरौ पितरि च स्वाभाविकी भक्तिः। सा ग्रन्थान्ते एनेन निर्मितेषु श्लोकेषु प्रस्फुटिता जाता। एकनवति-पर्णात्मिकायां पाण्डुलिपौ यत्रापि आदावन्ते वा किञ्चित् स्थानं लेखविरामे दृष्टम् तदनेन परमवैष्णवेन शब्दकाव्यशास्त्राचार्येण भगवन्नामलेखेन पूरितम्। पाण्डुलिपावस्याः पद्धतेरारम्भः षोडशात्पर्णाद् दृश्यते। पर्णारम्भे समाप्तौ वा **श्रीकृष्णोजयति**। इति त्रिंशद्वारम् उल्लिखितं वर्तते। द्वादशवारं भगवते रामचन्द्राय नतिर्विहिता। अत्र त्रीणि काव्यरूपाणि वाक्यान्युद्ध्रियन्ते—

(१) **श्रीजानकीवक्षोमहानीलमणये रघुवंशभूषणाय रामाय नमः।**
(पाण्डु० पृ० २३)

(२) **श्रीदशरथकुलकुमुदशारदपरिणतचन्द्राय रामचन्द्राय नमः।**
(पाण्डु० पृ० ३२)

(३) **श्रीवशास्यदमनाय जानकीरमणाय राघवेन्द्राय रामाय बहुशो नतिततयः। श्रीजानक्यै नमः॥** (पाण्डु० पृ० ८१)

वाक्यद्वयेनायं गुरुस्मरणं कृतवान् तत्रैकमुद्दिश्यते—

श्रीधरणीधरचरणाभिजातजलजातयुगलभजनप्रसक्तचित्तोऽहम् ।
(पाण्डु० पृ० ३७)

एकत्रायं स्वपितुर्भक्तिं प्रादर्शयत् –

श्रीत्रिपाठिरामकृष्णचरणयुगलशारदारविन्दमकरन्दमधुपोऽहम् ।
(पाण्डु० पृ० ७५)

अवहितमनसा मया यथागति **सुधया** टीकिते सम्पादिते च **बलभद्रीयकाशिकासारा**ख्येऽस्मिन् ग्रन्थे मदज्ञानादिकारणनिवहजनितत्रुटि-बाहुल्यं सम्भाव्यमेव । महाभारतीयोऽयं श्लोकः '**सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः** ।' साम्प्रतमपि जागर्ति, त्रायते चास्मद्विधान् मन्दमतीन् परिवादात् । कृतेऽपि विहङ्गमावलोकने, दृष्टाशुद्धिपत्रयोजने च विनयामि सतो दृग्गोचरा अपि ता अनादृत्य स्वेप्सितमुपासितुम् ।

ग्रन्थस्यास्य पूर्वप्रकाशिते पूर्वार्द्धभागे वैखर्या वन्दितान् अभ्यर्हितान् सादरं संस्मृतांश्च सर्वानेव परमात्मनोंऽशभूतान् मान्यान् गुरून् पुनरपि प्रणामाभिनन्दनपूर्वकं मनसाऽसकृत् स्तौमि, मानयामि, स्मरामि च । नव-दिल्लीनगरस्थराष्ट्रियसंस्कृतसंस्थानस्य निदेशकप्रभृतीनामधिकारिणाम्, प्रयागस्थश्रीगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठप्राचार्यस्य **डॉ० गयाचरण-त्रिपाठिमहाभागस्य** च सौजन्यं समाद्रिये, सौमनस्यञ्च कामये । ग्रन्थस्य निर्विघ्नपूर्त्यै देवाराधनपरां स्वां धर्मपत्नीं श्रीमतीं **शकुन्तलां** प्रकृष्ट-प्रकाशनाय शाकुन्तलमुद्रणाधिपतिम् **उपेन्द्रं** स्वाशीर्भिः संवर्द्धये चेति शम् ।

गुरुपूर्णिमा संवत् २०५२ — **सतामाश्रवः**
१२ जुलाई १९९५ — **चन्द्रभानुः**

सुधेयं स्वदतां सदा

संविन्मूलालवाला त्रिवलयकलिता बीजशक्त्यात्मगर्भा,
या सा सौदामिनीव स्फुरति परशिवज्योतिरङ्कूररूपा ।
सैषा शाखोपशाखोदितकुसुमफलव्याप्तविश्वावकाशा,
धी-श्रीविश्रान्तिभूमिः शरणमुपगतां कल्पनाकल्पवल्ली ।।१।।

(रहस्यपञ्चदशिका श्लोक ३३)

सर्गे या ब्रह्मशक्तिः स्वरचितजगतः पालने विष्णुमाया,
संहारे चास्य रौद्री त्रिविधधृततनुर्या परा चित्स्वरूपा ।
पश्यन्ती मध्यमा च स्फुटितनिजवपुर्वैखरी वर्णदेहा,
याऽनुच्चार्या विशेषादवकलितसुधीसंविदे ते नमोऽस्तु ।।२।।

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
काशिकावृत्तिसारीया सुधेयं स्वदतां सदा ।।३।।

श्रीबलभद्रत्रिपाठिविरचितः

काशिकावृत्तिसारः

॥ उत्तरार्द्धभागः ॥

विषयानुक्रमणिका

पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।।

विषयवस्तु-विवरणम् पृष्ठानि

परिमाणे वतुप्-डट्-तयप्→(अयच्) प्रत्ययाः। तदस्मिन्नधिकम् इत्यर्थे ड प्रत्ययः। निमाने निमेये च मयट् प्रत्ययः। पूरणार्थे डट्-मट्-थट्-तीय प्रत्ययाः थुक्-तिथुक्-इथुक्-तमड् आगमाः। मत्वर्थे छ-अन्-वुन् प्रत्ययाः छ-लुक् च। कुशलार्थे वुन्-कन् हारिणि, अचिरापहृते, कारिणि चार्थे कन्। कामे, प्रसिते परिजाते ब्राह्मणकादयो निपाताः। 'अन्विच्छति' इत्याद्यर्थे कन्-ठक् ठञ् प्रत्ययाः। 'श्रोत्रिय' निपातः। भुक्तार्थे इनि-ठनौ। क्षेत्रिय इन्द्रियादयो निपाताः। 'तदस्यास्ति अस्मिन्' इत्यर्थे मतुप्-लच्-इलच्-श-न-ण-विनि-इनि-अण्--उरच्-र-म-व-ईरन्-ईरच्-वलच्-ठन्-ठञ्-यप्-आरकन् इनच्-आलु-एलु-युस्-ग्मिनि-आलच्-आटच्-अच्-इनि ब-भ-युस्-ति-तु-त-यस्-भ प्रत्ययाः।

पञ्चमाध्यायस्य तृतीयः पादः ८३—११६

प्राग्दिशीय प्रत्ययानां 'विभक्ति' संज्ञा। किम्-इत्यादिभ्यः प्राग्दिशीयाः प्रत्ययाः। इदमः इश्-एत-इत् आदेशाः। एतदः अश् आदेशः। सर्वस्य 'स' आदेशः। तसिल्-त्रल्-ह-अत्-दा-र्हिल् धुना-दानीम् प्रत्ययाः। सद्यः आदीनां निपातनम्। थाल्-थमु अस्तातिः-अतसुच् प्रत्ययाः। पश्चात् आदि निपातनम्। आति-एनप्-आच्-आहि प्रत्ययाः। पूर्व-अधर-अवराणाम् पुर्-अध्-अव् आदेशाः। धा (ध्यमुञ्-धमुञ्-एधाच् आदेशाश्च) पाशप्-अन्-ञ-कन् (लुक् च)-आकिनिच्-चरट्-रूप्य प्रत्ययाः। अतिशायनेऽर्थे तमप्-इष्ठन्-तरप्-ईयसुन् प्रत्ययाः प्रशस्य श्र-ज्य (वृद्धस्य च) आदेशौ। अन्तिक-बाढयोः नेदसादौ आदेशौ। युवाल्पयोः कन् आदेशः। विन्-मतुपोः लुक्। प्रशंसायां रूपप्। ईषदसमाप्तौ कल्पप्-देश्य-देशीयर्-बहुच् प्रत्ययाः। प्रकारार्थे जातीयर्। प्राक् इवार्थे स्वार्थे, अज्ञाते, कुत्सिते, संज्ञायाम्, अनुकम्पायां नीतौ गम्यमानायाम्, अल्पे, ह्रस्वे, तनुत्वे चार्थे क ('द' आदेशश्च)-अकच्-कन् घन्-इलच् अडच्-वुच् र-डुपच्-ष्टरच् प्रत्ययाः। प्रकृतिभूतशब्दानाम् उत्तरपदादेः लोपश्च। निर्धारणेऽर्थे डतरच्-डतमच् प्रत्ययौ। अवक्षेपणे, इवे प्रतिकृतौ, संज्ञायाम्, मनुष्ये, जीविकार्थे, अर्चाद्यर्थे कन्-ढञ्-ढ-यत्-छ-अण्-ठक्-ठच्- ईकक्-थाल् प्रत्ययाः। स्वार्थे ञ्य-ञ्यट्-टचेण्यण्-छ-अण्-अञ्--यञ् प्रत्ययाः, एषां 'तद्राज' संज्ञा च।

विषयवस्तु-विवरणम्　　　　　　　　　　　　　　　　　　　पृष्ठानि

विषयवस्तु-विवरणम् पृष्ठानि

ह्रस्वः। बहुलं ह्रस्वः। मुम् आदि आगमाः। निपाताः, नञो नलोपः। प्रकृतिभावः, विकल्पश्च। सहस्य स प्रकृति-विधि-विकल्पाः। इदं-किमोः ईश्-की। सर्वनाम्नः आकारः। विष्कक् आदेः अद्रि आदयः। अप ईत् ऊत्। अन्य-दुगागमः। कोः कत्-का-कव विधि-विकल्पौ। पृषोदरादीनि ......। अह्न-अहन्। सहिवहोः अवर्णस्य ओकारः। निपाताः।

षष्ठाध्यायस्य चतुर्थः पादः ३३१-३८२

अङ्गाधिकारः। अङ्गस्य उपधायाश्च दीर्घः विकल्पश्च। छ्वोः श्-ऊठ् लोपश्च। ज्वरादीनाम् ऊठ्। नलोप-प्रतिषेधविकल्पाः। आकार-विधिविकल्पौ। आर्धधातुकाधिकारे भ्रस्जो रम्। अतो लोपः। यस्य लोपः। विभाषा च। णेः लोपः। णेः अय् आदेशः। ल्यपि दीर्घः / विभाषा च। चिण्वत्कार्यविकल्पः। युट्-आगमः। आतो लोपः / प्रतिषेधश्च। आकारान्तस्याङ्गस्य ईकार-एकारादेशः विकल्पः। मयतेः इकारादेशविकल्पः। अट्-आट् आगमौ। माङ्योगे निषेधः। छन्दसि बहुलम्। इरयो रे। इयङ्-उबङ् आदेशौ विकल्पश्च। इणोऽङ्गस्य यण्। यणादेश-निषेधः. छन्दसि विकल्पः। भुवो वक्। गोहः ऊकारः / विकल्पश्च। मितां ह्रस्वः। चिण्णमुलोः दीर्घश्च। उपधाया ह्रस्वः। उपधाया लोपः। हेः धिः आदेशः। चिणः, हेः √कृ धातोः लुक्। म्वोः विकल्पः। सार्वधातुके अतः उकारः। श्नसोः अकारलोपः। श्ना-अभ्यस्तयोः आकारलोपः, ईकारादेशश्च। √हा धातोः इकारादेशः / विकल्पः। यकारादौ प्रत्यये लोपश्च। 'घु' संज्ञकानाम् अस्तेश्च 'हि' आदेशः। लिटि एकारादेशः, विकल्पश्च। अर्वन् मघवन् शब्दयोः आदेशो विकल्पश्च। 'भ' संज्ञाधिकारे पादः पत् आदेशः। सम्प्रसारणम्। अन्-अकारलोपः। निषेधः / विकल्पश्च। √अञ्च धातोः अकारलोपः। ईकारश्च। धातूनाम् आतो लोपः। आत्मन्-आकारलोपः। विंशतेः 'ति' लोपः। टेः लोपः। उवर्णान्तस्य गुणः। इकाराकारयोर्लोपः। यकारस्य लोपः बिल्वकादिभ्यः छस्य लोपः। 'तृ' शब्दस्य लोपः। स्थूलादीनां यणादिपरस्य लोपः। प्रियादीनां 'प्र' आदयः आदेशाः। बहोः 'भू' आदेशः। ईयसः आकारादेशः। ऋकारस्य 'र' आदेशः। एकाच् शब्दानां गाथि-आदीनां च प्रकृतिभावः। ब्राह्मादीनां निपातनम्।

———

卐 ॐ 卐

।। श्रीगणेशाय नमः ।।

।। अथ काशिकावृत्तिसारः ।।

उत्तरार्धम्

अथ पञ्चमाध्याये प्रथमः पादः

प्राक् क्रीताच्छः ।।१।।

प्रागेतस्मात् क्रीतसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामश्छ प्रत्ययस्तेष्वधिष्ठितो वेदितव्यः । वक्ष्यति 'तस्मै हितम्' इति वत्सेभ्यो हितो वत्सीयो गोधुक् ।

।। काशिकावृत्तिसारसुधा ।।

अर्धमात्रा स्थिता नित्या याऽनुच्चार्या विशेषतः ।
पराख्या सा जयेद् दुर्गा देवी शब्दस्वरूपिणी ।।१।।
तां ध्यात्वाऽथ गुरून् नत्वा कृतिना चन्द्रभानुना ।
काशिकावृत्तिसारस्योत्तरार्धे तन्यते सुधा ।।२।।

अत्र 'प्राक्' इत्यस्यावधिरर्थो गृह्यते न प्रत्ययः । 'तेन क्रीतम्' इत्यस्मात् प्राक् ये अर्थास्तेषु 'छ' प्रत्ययो भवतीत्यर्थः । वत्सीयः– वत्स + छ तस्य 'ईय' आदेशः ।

उगवादिभ्यो यत् ॥२॥

उवर्णान्ताद् गवादिभ्यश्च यत्प्रत्ययो भवति प्राक्क्रीतीयेष्वर्थेषु । शंकव्यं दारु। कमण्डलव्या मृत्तिका । गव्यं हविः । सनंगुर्नाम चर्मविकारः सनंगव्यं चर्म । चरव्यास्तण्डुलाः ।

शंकव्यम्—शंकु + यत् गुणोऽवादेशश्च । सनंगुः—अस्माद् 'यत्' सनंगव्यम् भवति । गव्यम्-गो + यत् ओकारस्य 'अव्' आदेशः। एवं हविष्यम् । बर्हिष्यम् आदि ।

कंबलाच्च संज्ञायाम् ॥३॥

कंबलशब्दात् प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति संज्ञायाम् । कंबल्यमूर्णाशतम् ।

कंबल्यम्—कंबल + यत् । ऊर्णाशतम्-ऊर्णापलशतम् इति पाठो वृत्तौ । कंबल्यम् परिमाणविशेषः ।

विभाषा हविरपूपादिभ्यः ॥४॥

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु विभाषा यत्प्रत्ययो भवति । पक्षे छः । आमिक्ष्यं दधि / आमिक्षीयम् । अपूप्यम् / अपूपीयम् । तण्डुल्यम् / तण्डुलीयम् इत्यादि ।

हविर्विशेषवाचिनो ये पदार्थास्तेभ्यो यत् । हविष् शब्दस्य तु गवादिषु पाठात् तस्मान्नित्यं यत् ।

तस्मै हितम् ॥५॥

चतुर्थीसमर्थाद्धितार्थे यथाविहितं प्रत्ययः । वत्सेभ्यो हितो गोधुक् वत्सीयः ।

तस्मै–हितयोगे चतुर्थी भवतीत्यस्यायं प्रयोग एव ज्ञापकः। एवम् गव्यम् इत्यादीनि पूर्वोदाहरणानि हितार्थेऽपि बोध्यानि ।

शरीरावयवाद्यत् ॥६॥

शरीरं प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद्यत् तस्मै हितम् इत्यर्थे । दन्त्यम् । कण्ठ्यम् ।

प्राणिकायः—अत्रास्मिन्नर्थे शरीरशब्दस्य रूढिर्ज्ञेया । दन्त्यम्—दन्त + यत् टेरकारस्य लोपः । 'नाभि नभं च' इत्यनेन नाभेर्नभ आदेशः नभ्यम् । दन्तेभ्यो हितम् इत्यादीनि विग्रहवाक्यानि ।

खलयवमाषतिलवृषब्रह्मणश्च ॥७॥

खलादिभ्यो यदुक्तेऽर्थे । खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति न छः 'ब्रह्मन्' शब्दस्यैवाभिधानात् चकारोऽनुक्तसमुच्चये । रथाय हिता रथ्या ।

खल्यम्—खलाय हितम् । एवं सर्वत्र ज्ञेयम् । वाक्यमेव—अत्र 'छ' प्रत्ययोऽपि न अनभिधानात् । रथ्या—रथ्य + टाप् ।

अजाविभ्यां थ्यन् ॥८॥

अज—अवि, आभ्यां थ्यन् उक्तेऽर्थे । अजथ्या । अविथ्या ।

अज पुलिङ्ग एवोपात्तः सूत्रे तेन 'अजाद्यदन्तम्' इत्यनेन 'अज' इत्यस्य पूर्वनिपातः कृतः । अजथ्या—अजथ्य + टाप् ।

आत्मन्विश्वजनभोगोत्तरपदात्खः ॥९॥

आत्मन्, विश्वजन; आभ्यां भोगोत्तरपदाच्च प्रातिपदिकात् ख. उक्तेऽर्थे । आत्मन्निति नलोपो न कृतः प्रकृतिपरिमाणज्ञापनार्थः । तेनोत्तरपदग्रहणं भोगशब्देनैव सम्बद्धयते । न तु प्रत्येकम् । आत्मने हितम् आत्मनीनम् 'आत्माध्वानौ खे' इति प्रकृतिभावः । विश्वजनेभ्यो हितं विश्वजनीनम् । कर्मधारयादिष्यते । षष्ठीसमासाद् बहुव्रीहेश्च 'छ' एव भवति विश्वजनीयम् । राजभोगीनः ।

ज्ञापनार्थः-'आत्मान्' इत्येव प्रकृतिर्भवति इति ज्ञापनार्थम् । इष्यते-तथैवाचार्यप्रवृत्तिरस्ति । आत्मनीनम्—आत्मन् + ख तस्य 'ईन' आदेशः ।

सर्वपुरुषाभ्यां णढञौ ।।१०।।

सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः । तस्मै हितम्' एतस्मिन् विषये । छस्यापवादः ।

*(वा०) सर्वस्य वा वचनम् । सार्वम्/सर्वीयम् ।

*(वा०) पुरुषाद् वध-विकार-समूह-तेन कृतेष्विति वाच्यम् । पौरुषेयो वधः विकारः समूहो वा । पौरुषेयो ग्रन्थः ।

सार्वम्-सर्व + ण णित्त्वाद् आदेरचो वृद्धिः । पौरुषेयः-पुरुष + ढञ् ढस्य 'एय' आदेशः । टिलोपः, ञित्त्वाद् वृद्धिः पौरुषेयो ग्रन्थः-पुरुषेण कृतः ।

माणवचरकाभ्यां खञ् ।।११।।

आभ्यां खञ् उक्तेऽर्थे । माणवीनम् । चारकीणम् ।

उक्तेऽर्थे-'तस्मै हितम्' इत्येतस्मिन् विषये । माणवीनम्-माणवाय हितम् माणव + खञ् खस्य 'ईन' आदेशः टिलोपः । चारकीणम्-ञित्त्वात् चरक शब्दस्यादेरचो वृद्धिः । रपरत्वात् नकारस्य णत्वम् ।

तदर्थं विकृतेः प्रकृतौ ।।१२।।

प्रकृतिः उपादानकारणम् तस्यैवोत्तरमवस्थान्तरं विकृतिः । विकृतिवाचिनः प्रातिपदिकात् प्रकृतावभिधेयायां यथास्वं प्रत्ययः । तदर्थम् इति प्रत्ययार्थविशेषणम् । तदिति सर्वनाम्ना विकृतिः परामृश्यते । विकृत्यर्थायां प्रकृतौ प्रत्ययः । तदर्थग्रहणेन प्रकृतेरनन्यार्थताऽऽख्यायते । न प्रकृतिविकारसम्भवमात्रे प्रत्ययः, अपितु प्रकृतेरनन्यार्थत्वे विवक्षिते । प्रत्ययार्थस्य च तदर्थत्वे सति सामर्थ्याल्लभ्या चतुर्थी । अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । प्राकारीयाः इष्टकाः । तदर्थं किम् ? यवानां धानाः । प्रकृत्यन्तरनिवृत्तिरत्र विवक्षिता न तादर्थ्यम् । यवानां धानाः न गोधूमानाम् इति ।

तदर्थम्—तस्मै इदम् 'चतुर्थी तदर्थ....' इत्यनेन समासः । उपादीयते अस्मात् कार्यमित्युपादानं यथा वस्त्रस्य तन्तवः । अवस्थान्तरम्—रूपान्तरं यथा मृत्तिकायाः घटः । सूत्रस्थ तदर्थं पदे सप्तम्याः स्थाने प्रथमा स्त्रीलिङ्ग-स्थाने नपुंसकत्वं व्यत्ययेनेति सूचयति वृत्तिकारः—विकृत्यर्थायां प्रकृतौ ।

छदिरुपधिबलेर्ढञ् ॥१३॥

छदिरादिभ्यो ढञ् तदर्थं विकृतेः प्रकृतावेतस्मिन् विषये । छादिषेयाणि तृणानि । औपधेयं दारु । बालेयास्तण्डुलाः ।

छाद्यते अनेनेति छदिः । छदिषे एतानि छदिष् + ढञ् । ढकारस्य 'एय' आदेशः ञित्वाद् वृद्धिः । उपधिः रथाङ्गम् । अत्र स्वार्थे प्रत्ययः ।

ऋषभोपानहोर्ञ्यः ॥१४॥

आभ्यां ञ्यः उक्तेऽर्थे । आर्षभ्यो वत्सः । औपानह्यो मुञ्जः ।

ऋषभ–उपानह् इत्याभ्याम् । आर्षभ्यः- ऋषभ + ञ्यः । ऋषभाव-स्थागमनाय पोष्यमाणः इत्यर्थः । औपानह्यः–उपानत् अस्य निर्मीयमाणा वर्त्तते ।

चर्मणोऽञ् ॥१५॥

चर्मण इति षष्ठी । चर्मणो या विकृतिः तद्वाचिनोऽञ् उक्तेऽर्थे । वाध्रं चर्म । वारत्रं चर्म ।

षष्ठी–अतएव चर्मणो या विकृतिरित्यर्थलाभः । वार्ध्रम्–वध्रं + अञ् । वारत्रम् –वरत्रा + अञ् । ञित्वाद्वृद्धिः ।

तदस्य तदस्मिन् स्यादिति ॥१६॥

प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथास्वं प्रत्यय । यत्तत्प्रथमासमर्थं स्याच्चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा ।

प्राकार आसामिष्टकानां स्यात् प्राकारीयाः इष्टकाः । सप्तम्यर्थे खल्वपि । प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः । सम्भावनायां लिङ् ।

सूत्रार्थः–अस्य तत् स्यात् अस्मिन् तत्स्यादिति अर्थद्वये प्रत्ययो भवति विधानानुसारमिति सूत्रार्थः । स्यात्–अत्र 'सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे' इत्यनेन लिङ् ।

परिखाया ढञ् ॥१७॥

परिखाशब्दात् ढञ् उक्तेऽर्थे । पारिखेयी भूमिः । छयतोः पूर्णोऽवाधः । अथान्यः प्रत्ययो विधीयते ।

पारिखेयी—परिखा अस्यां स्यादिति परिखा + ढञ् । ञित्त्वाद् वृद्धिः । अन्यः–ठञ् आदिः ।

प्राग्वतेष्ठञ् ॥१८॥

तेन तुल्यमतः प्राग्यान् इत ऊर्ध्वमनुक्रमिष्यामष्ठञ् प्रत्ययस्तेषु ज्ञेयः । वक्ष्यति-पारायणेत्यादि । पारायणिकः ।

'तेन तुल्यं क्रिया चेद्वतिः' इतिसूत्रात् प्राक् । पारायणिकः–पारायणं वर्त्तयति पारायण + ठञ् ।

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥१९॥

तदर्हतीति । 'आ' एतस्माद् यानित ऊर्ध्वम् अनुक्रमिष्यामष्ठक् तेषु ज्ञेयः, गोपुच्छादीन् वर्जयित्वा । अभिविधौ वा आङ् । वक्ष्यति 'तेन क्रीतम्' । नैष्किकम् ।

आ + अर्हात् इतिच्छेदः । 'तदर्हति' इति सूत्रम् अर्हशब्दः परामृशति । अभिविधिः—तेन सहेति व्याख्यानम् । तथा च 'ठञ्' विधौ 'ठक्' विधीयते । तेन अर्हत्यर्थेऽपि 'ठक्' । नैष्किकम्–निष्केण क्रीतम् इति निष्क + ठक् । संख्या–भेदगणनम् एकः, द्वौ । परिमाणम्—आरोहपरिणाहमानम् प्रस्थादि । आरोहः–उच्छ्रायः, परिणाहः—विस्तारः । उन्मानम्–

गुरुत्वमानम् पलादि । प्रमाणम्—आयाममानम् वितस्त्यादि । कारिकाऽत्र विषये विद्यते ।

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः ।

असमासे निष्कादिभ्यः ॥२०॥

आर्हादित्येव । निष्कादिभ्योऽसमासे ठक् आर्हीयेष्वर्थेषु । नैष्किकम् । पाणिकम् । असमासे किम् ? परमनैष्किकम् ।

पाणिकम्–पण + ठक ठकारस्य 'इक' आदेशः । परमनैष्किकम्–'परिमाणान्तस्य' इत्युत्तरपदवृद्धिः । ठक्–ठञोः स्वरे भेदः ।

शताच्च ठन्यतावशते ॥२१॥

आर्हादित्येव । अस्मादेतौ अशते वाच्ये । शतेन क्रीतं शत्यम् / शतिकम् । अशते किम् ? शतं परिमाणमस्य शतकं निदानम् । शतमेव वस्तुतः ।

अस्मात्–शतशब्दात् । एतौ–ठन्-यत् प्रत्ययौ । अशते–शतनामसंख्याभिन्ने । शत्यम्—शत + यत् । शतिकम्–शत + ठन् ञित्त्वाभावान्न वृद्धिः । शतकम्–शतम् अध्यायानां परिमाणम् अस्य शत + कन् 'संख्यायाः…' इति सूत्रेण । निदानम्–निदानग्रन्थः । वस्तुतः–अत्र प्रत्ययान्तार्थेन प्रकृत्यर्थो न भिद्यते ।

संख्याया अतिशदन्तायाः कन् ॥२२॥

संख्यायाः अत्यन्तायाः अशदन्तायाश्च कन् उक्तेष्वर्थेषु । पञ्चभिः क्रीतः पञ्चकः । नेह–साप्ततिकः । चात्वारिंशत्कः ।

पञ्चकः–पटः इति शेषः । साप्ततिकः–सप्तत्या क्रीतः सप्तति + ठञ् । 'प्राग्वतेष्ठञ्' ठस्य 'इक' आदेशः, आदेरचो वृद्धिश्च । चात्वारिंशत्कः–क्रीतार्थे चत्वारिंशत् + ठञ् ठकारस्य 'क' इत्यादेशः 'इसुसुक्तान्तात्कः' इति सूत्रेण । अत्र 'ति' शब्दोऽर्थवान् गृह्यते नानर्थकः तेन डत्यन्तात् 'कन्' एव तत्र 'ति' शब्दस्यानर्थकत्वेन पर्युदासाभावात् ।

वतोरिड्वा ॥२३॥

वत्वन्तसंख्यायाः परस्य कनो वा इडागमः । तावतिकः/त्कः ।

पूर्वसूत्रात् कन् भवति, तस्य अनेन इडागमो विधीयते ।

पूर्वसूत्रात् 'कन्' इत्यनुवर्त्तते । 'वतोः' इति पञ्चमी, सा 'तस्मात् परस्य कनः' इत्यर्थे प्रथमां षष्ठीत्वेन परिकल्पयति । तावतिकः–तावत् + कन् इडभावे त्कः—तावत्कः इति भवति । एवं यावतिकः / यावत्कः । यावत्-तावत् शब्दयोः यत्-तत् शब्दाभ्यां वतुप् । वत्वन्तत्वात् एतयोः 'बहुगण-वतुडतिसंख्या' इति सूत्रेण संख्यासंज्ञाविधानम् ।

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥२४॥

आभ्यां ड्वुन् असंज्ञायाम् । विंशकः । 'ति विंशतेर्डिति' इति टिलोपः । त्रिंशकः ।

ड्वुन्—डकारस्येत्त्वम् । वुकारस्य 'अक' आदेशः । 'असिद्धवदत्राभात्' इति टिलोपस्यासिद्धतया नाकारलोपः । 'अतो गुणे' इति पररूपम् । त्रिंशकः—अत्र डित्वात् टेः 'अत्' इत्यस्य लोपः ।

कंसाट्टिठन् ॥२५॥

अस्मात् टिठन् आर्हीयेष्वर्थेषु । कंसिकः । कंसिकी ।

टिठन्—इकार उच्चारणार्थः । टकारस्य इत्संज्ञा, तेन 'ङीप्' । ठकारस्य 'इक' आदेशः । कंसशब्दोऽयं परिमाणवाची ।

शूर्पादञन्यतरस्याम् ॥२६॥

शूर्पशब्दादन्यतरस्याम् अञ् प्रत्ययो भवत्यार्हीयेष्वर्थेषु । पक्षे ठञ् । शूर्पेण क्रीतं शौर्पम् / शौर्पिकम् ।

शौर्पम् / शौर्पिकम्–ञित्त्वात् आदेरचो वृद्धिः ।

शतमानविंशतिकसहस्रवसनादण् ॥२७॥

शतमानादिभ्यः शब्देभ्योऽण् प्रत्ययो भवत्यार्हीयेष्वर्थेषु । ठक्-ठञोरपवादः । शतमानेन क्रीतं शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ।

शतमानं परिमाणम्—अस्मात् परिमाणार्थक विंशतिक शब्दात्, सहस्र शब्दाच्च 'ठञ्' अपरिमाणार्थात् विंशतिक शब्दात् वसन शब्दाच्च ठक् प्राप्तः । ञित्त्वात् शातमानादिषु आद्यचो वृद्धिः ।

अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥२८॥

आर्हादित्येव । अध्यर्धशब्दः पूर्वो यस्मात्तस्मात् प्रातिपदिकात् द्विगोश्च परस्यार्हीय प्रत्ययस्य लुग्भवति, असंज्ञायां विषये । अध्यर्ध-शूर्पम् । द्विशूर्पम् । असंज्ञायां किम् ? पाञ्चलौहितिकम् । लोहिनी-शब्दस्य 'भस्याऽढे तद्धिते' इति पुंवद्भावः ।

वृत्तिग्रन्थे 'अध्यर्धशब्दः पूर्वो यस्मिन्नि' ति विग्रहः । अध्यर्धपूर्वश्च द्विगुश्चेति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् । अध्यर्धशूर्पम् – अञ्–तस्य लुक् एवम् अध्यर्धकंसम् अत्र 'टिठन्' प्रत्ययस्य लुक् । एवं द्विगोरुदाहरणम् द्विशूर्पम्–द्वाभ्यां शूर्पाभ्यां क्रीतम् । पूर्वं द्विगुः, ततः जातस्य 'अञ्' प्रत्ययस्य लुक् । पाञ्चलौहितिकम्–पञ्च लोहिन्यः परिमाणम् अस्य । तद्धितार्थे समासे कृते 'तदस्य परिमाणम्' इति ठञ् । पुंवद्भावः—तेन ङीपः ईकारस्य नकारस्य च निवृत्तिः ।

विभाषा कार्षापणसहस्राभ्याम् ॥२९॥

अध्यर्धपूर्वाद् द्विगोः कार्षापण सहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति । पूर्वेण नित्ये लुकि प्राप्ते विकल्पः । अध्यर्ध-कार्षापणम् / अध्यर्धकार्षापणिकम् ।

षोडशपणसमुदायः कार्षापणः । 'कार्षापणाट्टिठन् वक्तव्यः' इति वार्तिकेन 'टिठन्' । सूत्रकारमते तु औपसंख्यानिकः टिठन् । तस्य विभाषा

लुक् । तेन रूपद्वयं भवति । द्विगोरुदाहरणम्—द्विकार्षापणम् आदि । सहस्र-शब्दस्योदाहरणम्—अध्यर्धसहस्रम् / अध्यर्धसाहस्रम् । द्विसहस्रम् / द्विसाहस्रम् अत्र 'शतमान.....' सूत्रेण विहितस्य अणो लुक् । अलुक् पक्षे 'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः ।

द्वित्रिपूर्वान्निष्कान्तात् ॥३०॥

द्वित्रिपूर्वान्निष्कान्तात् परस्यार्हीयप्रत्ययस्य विभाषा लुक् । द्विनिष्कम् / द्विनैष्किकम् । त्रिनिष्कम् / त्रिनैष्किकम् ।

*(वा०) बहुनिष्काच्चेति वक्तव्यम् । बहुनिष्कम् / बहु-नैष्किकम् ।

द्विनिष्कम्—'प्राग्वतेष्ठञ्' इति कृतस्य ठञो लुक् । द्विनैष्किकम्-'परिमाणान्तस्य' इत्युत्तरपदवृद्धिः । एवं त्रिनैष्किकादिषु ज्ञेयम् ।

बिस्ताच्च ॥३१॥

द्वित्रिपूर्वाद् बिस्तान्ताद् द्विगोः परस्यार्हीय प्रत्ययस्य विभाषा लुक् । द्विबिस्तम् / द्विबैस्तिकम् । त्रिबिस्तम् / त्रिबैस्तिकम् । प्राग्वत् बहुबिस्तम् / बहुबैस्तिकम् ।

बिस्त शब्दः परिमाणवाची विस्तः इति नामान्तरम् अशीतिरत्तिका-परिमितं स्वर्णं बिस्तम् । तेन निर्मितोऽक्षः विस्त इति । द्विबैस्तिकम् इत्यादिषु 'परिमाणान्तस्य' इत्यनेन उत्तरपदवृद्धिः । प्राग्वत्—बहुपूर्वाच्चेति वार्तिकम् अत्राप्यनुवर्तते ।

विंशतिकात्खः ॥३२॥

अध्यर्धपूर्वात् प्रातिपदिकात् द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ख प्रत्ययो भवति ।

अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् ।

'ख' इत्यस्य 'ईन' आदेशः । 'ख' विधानेन 'अध्यर्ध पूर्व.....' इत्यनेन लुक् न ।

खार्या ईकन् ॥३३॥

अध्यर्धपूर्वाद् द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् । अध्यर्धखारीकम् । द्विखारीकम् ।

*(वा०) केवलाच्च । खारीकम् ।

*(वा०) काकिण्याश्च । अध्यर्धकाकिणीकम् इत्यादि ।

खारी—परिमाणविशेषः । सार्धसूर्पो भवेत्खारी इति अमरकोशटीकायाम् । काकिणी—पणचतुर्थांशः । लीलावत्यां तल्लक्षणम्–वराटकानां दशकद्वयं यत् सा काकिणी ।

पणपादमाषशताद्यत् ॥३४॥

अध्यर्धपूर्वाद् द्विगोश्च पणादिशब्दान्तादार्हीयेष्वर्थेषु यत् । अध्यर्धपण्यम् । द्विपण्यम् । पद्भावोऽत्र न प्राण्यङ्गाभावात् । द्विपाद्यम् इत्यादि ।

द्विपण्यम्—'भ' संज्ञकत्वात् टेः अकारस्य लोपः । द्विपाद्यम्–पणादिभिः परिमाणवाचिभिः साहचर्यात् पादशब्दोऽपि तादृश एव गृह्यते । 'पादस्य पत् …' इत्यत्र तु प्राण्यङ्गस्यैव पादस्य ग्रहणम् ।

शाणाद्वा ॥३५॥

प्राग्वत् । ठञोऽपवादः । पक्षे सोऽपि तस्य च लुक् । अध्यर्धशाण्यम् / अध्यर्धशाणम् इत्यादि ।

शाणस्य परिमाणवाचित्वादत्र ठञ् एव भवति । माषैश्चतुर्भिः शाणः स्यात् (भावप्रकाशः) भाषायां 'चार मासा' इति कथ्यते ।

* (वा०) शताच्चेति वक्तव्यम् । अध्यर्धशत्यम् / अध्यर्धशतम् इत्यादि । यत्प्रत्ययस्याभावे 'संख्यायाः·····' इति सूत्रेण 'कन्' तस्य लुक् ।

द्वित्रिपूर्वादण् च ॥३६॥

शाणाद्वा इत्येव । चाद् यच्च वा । तेन त्रैरूप्यम् । द्वैशाणम् / द्विशाण्यम् / द्विशाणम् ।

त्रैरूप्यम्—क्रमशः 'अण्, यत्, ठञ्' इति त्रयः प्रत्ययाः ठञो लुक् च भवति । तेन द्वैशाणम् अणि । द्विशाण्यम् यति । द्विशाणम् ठञो लुकि ।

तेन क्रीतम् ॥३७॥

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः । तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते । 'तेन' इति तृतीयासमर्थात् क्रीतार्थे यथास्वं प्रत्ययाः । सप्तत्या क्रीतं साप्ततिकम् । आशीतिकम् । नैष्किकम् । पाणिकम् । शत्यं / शतिकम् । द्विकम् । त्रिकम् ।

त्रयोदश—'प्राग्वतेष्ठञ्' इत्यारभ्य 'द्वित्रिपूर्वादण् च' इति यावत् 'ठञ्–ठक्–ठन्–यत्–कन्–डवुन्–टिठन्–अञ्–अण्–ख–ईकन्–यत्–अण् ।' एषु 'यत्–अण्' इत्यनयोरावृत्तिरपि गणिता प्रकृतिभेदात् । एतेषु यथाविहितं प्रत्ययाः 'तेन क्रीतम्' इत्यर्थे भवन्ति । 'तेन' इति मूल्यात् करणे तृतीया । अतः देवदत्तेन क्रीतम् इत्यर्थे प्रत्ययो न भवति । साप्ततिकम्– अत्र 'प्राग्वतेष्ठञ्' इति ठञ् । एवम् आशीतिकम् । नैष्किकम्–निष्क + ठक् । एवं पाणिकम् । शत्यम् / शतिकम्–शतशब्दात् क्रमशः 'ठन्–यत्' च । द्विकम्, त्रिकम्–अत्र 'कन्' प्रत्ययः ।

तस्य निमित्तं संयोगोत्पातौ ॥३८॥

तस्येति षष्ठीसमर्थान्निमित्तार्थे यथास्वम् । यत्तन्निमित्तं संयोगश्चेत् स भवति उत्पातो वा । शतस्य निमित्तं धनपतिना संबन्धः शत्यः / शतिकः । उत्पातः खल्वपि शतस्य निमित्तम् उत्पातो दक्षिणाक्षिस्पन्दनं शत्यं / शतिकम् ।

*(वा०) तस्य निमित्तप्रकरणे वातादिभ्यः शमनकोपनयोरुपसंख्यानम् । वातिकम् । पैत्तिकम् । श्लैष्मिकम् । सान्निपातिकम् ।

संयोगः— प्राणिनां शुभाशुभसूचकः सम्बन्धः । उत्पातः—महाभूतानां पृथिव्यादीनां परिणामः । शत्यः—शत + यत् । शतिकः—शत + ठन् । एवं साहस्रम्—सहस्र + अण् । वातिकम्—वातस्य शमनं कोपनं वा वात + ठञ् एवं श्लैष्मिकम्—श्लेष्म + ठञ् । सान्निपातिकम्—सन्निपातः = वातादीनां युगपदुद्भवः । तस्मात् 'ठञ्' ।

गोद्वयचोऽसंख्यापरिमाणाश्वादेर्यत् ॥३९॥

गोशब्दात् द्वयचश्च प्रातिपदिकात् संख्यादिवर्जिताद्यत् उक्तेऽर्थे । गोर्निमित्तं संयोग उत्पातो वा गव्यः । धन्यम् । स्वर्ग्यम् । यशस्यम् । आयुष्यम् । नेह—पञ्चकम् । प्रास्थिकम् । आश्विकम् ।

उक्तेऽर्थे—'तस्य निमित्तं संयोगोत्पातौ' इत्यस्मिन्नर्थे । द्वयचः उदाहरणानि धन्यादीनि ।

संख्यावाचिभ्यः, परिमाणवाचिभ्यः, अश्वादिभ्यश्च यत् न । पञ्चकम्—पञ्च + कन् । प्रास्थिकम्—प्रस्थ + ठञ् । आश्विकम्—अश्व + ठञ् ।

पुत्राच्छ च ॥४०॥

चाद् यच्च । उक्तेऽर्थे । पुत्रीयम् / पुत्र्यम् ।

उक्ते—तस्य निमित्तं संयोग उत्पातो वेत्यस्मिन् । पुत्रीयम्—पुत्रस्य निमित्तं संयोग उत्पातो वा ।

सर्वभूमिपृथिवीभ्यामणञौ ॥४१॥

आभ्यां क्रमादण्—अञौ उक्तेऽर्थे । सार्वभौमः । पार्थिवः ।

सार्वभौमः—सर्वभूमेर्निमित्तं संयोग उत्पातो वा । सार्वभौमः—सर्वभूमि +अण् । 'अनुशतिकादिगणे' पाठात् उभयपदवृद्धिः । पार्थिवः—पृथिवी + अञ् । आदेरचो वृद्धिः ।

तस्येश्वरः ॥४२॥

षष्ठीसमर्थाभ्यामाभ्याम् ईश्वरार्थे क्रमादणञौ । सार्वभौमः । पार्थिवः ।

सर्वभूमेः ईश्वरः, पृथिव्याः ईश्वरः इति च विग्रहः ।

तत्र विदित इति च ॥४३॥

तत्र इति सप्तमीसमर्थाविभक्तिः । विदितार्थे अणञौ । सार्वभौमः । पार्थिवः ।

विदितः—ज्ञातः । सर्वभूमौ विदितः । पार्थिवः पृथिव्यां विदितः ।

लोकसर्वलोकाट्ठञ् ॥४४॥

प्राग्वत् । लौकिकः । सार्वलौकिकः ।

प्राग्वत्—'विदितः' इत्यस्मिन्नर्थे । लौकिकः—लोके विदितः । सार्वलौकिकः—सर्वलोकेषु विदितः । 'अनुशतिकादित्वाद्' उभयपदवृद्धिः ।

तस्य वापः ॥४५॥

उप्यतेऽस्मिन् वापः—क्षेत्रम् । प्रस्थस्य वापः—क्षेत्रम् प्रास्थिकम् ।

वापः—अधिकरणार्थे घञ् । तस्येत्यत्र कर्मणि षष्ठी तेन देवदत्तस्य वापः इत्यस्मिन्नर्थे न भवति प्रास्थिकम्—प्रस्थ + ठञ् ।

पात्रात्ष्ठन् ॥४६॥

उक्तेऽर्थे । पात्रं परिमाणभेदः । पात्रिकम् । पात्रिकी ।

उक्तेऽर्थे—तस्य वापः इत्यस्मिन् अर्थे । पात्रिकम्—पात्रस्य वापः—क्षेत्रम् । पात्रिकी क्षेत्रभक्तिः । पात्रिक + ङीष् 'षिद्गौरादिभ्यश्च' इति सूत्रेण ।

तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ॥४७॥

प्रथमासमर्थात् सप्तम्यर्थे यथास्वम् । यत्तत् प्रथमासमर्थं वृद्ध्यादि चेत्तद् दीयते । अधमर्णेनोत्तमर्णाय धनातिरिक्तं देयं वृद्धिः । स्वामिग्राह्यो भाग आयः । पटादीनां मूलादतिरिक्तं द्रव्यं लाभ । रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच उपदा ।

पञ्चास्मिन् वृद्ध्यादिर्दीयते पञ्चको देवदत्तः ।

धनातिरिक्तम् --उत्तमर्णेन यत् पूर्वं दत्तं तत् धनं मूलधनम् इति कथ्यते तदतिरिक्तम् । रक्षानिर्वेशः-वणिजां रक्षाकारी राज्ञो भागः । वृद्ध्यादिः-वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा इत्यस्मिन्नर्थे । पञ्चकः- पञ्च + कन् ।

पूरणार्धाट्ठन् ॥४८॥

पूरणवाचिनोऽर्धाच्च ठन् उक्तेऽर्थे । द्वितीयो वृद्ध्यादिरस्मिन् दीयते इति द्वितीयिकः । अर्धिकः । अर्धशब्दो रूपकार्धस्य रूढिः ।

पूर्यते येनार्थेन स पूरणः । तेन पूरणार्थस्य द्वितीयादेर्ग्रहणम् । अर्धिकः—अर्धो वृद्ध्यादिरस्मिन् दीयते । रूपकम्-कार्षापणम् ।

भागाद्यच्च ॥४९॥

चात् ठंश्च । भागो वृद्ध्यादिरत्र दीयते इति भाग्यम् / भागिकम् ।

ठंश्च—ठन् च । भागिकम्-भाग + ठन् । शतम् इतिशेषः । एवं भाग्या, भागिका वा विंशतिः । भागशब्दोऽपि रूपकार्धस्य वाचकः ।

तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ॥५०॥

द्वितीयासमर्थाद् हरत्यादिष्वर्थेषु यथास्वम् वंशादिभ्यः परो यो भारशब्दस्तदन्तादिति । वंशभारं हरति वांशभारिकः । बाल्वज-

भारिकः । हरति-चोरयति । वहति–उत्क्षिप्य धारयति । आवहति–उत्पादयति ।

वंशादिभ्यः—परार्थे पञ्चमी । तेन वंशाद्यतिरिक्तेभ्यः परस्मात् 'व्रीहिभार' इत्यादेर्न भवति । अत्र वंशादयः अर्थेन भारस्य विशेषणानि भवन्ति । वांशभारिकः–वंशभार+ठक् । उभयपदवृद्धिः । वाल्वजभारिकः–वल्वे — तन्नामके पर्वते जातः तृणविशेषः वाल्वजः तेषां भारम् वहति इति ।

वस्नद्रव्याभ्यां ठन्कनौ ॥५१॥

उक्तेऽर्थे । वस्नं-मूल्यम् । वस्निकः । द्रव्यकः ।

वस्निकः –वस्नं हरति, वहति, आवहति वा वस्न + ठन् । द्रव्यकः–द्रव्यं हरति, वहति, आवहति वा द्रव्य + कन् ।

सम्भवत्यवहरति पचति ॥५२॥

आधेयस्य प्रमाणानतिरेकः सम्भवः । उपसंहरणम् अवहारः । विक्लेदनं पाकः । प्रास्थिकः ।

प्रास्थिकः — प्रस्थं सम्भवति, अवहरति, पचति वा प्रस्थ + ठञ् ।

आढकाचितपात्रात्खोऽन्यतरस्याम् ॥५३॥

उक्तेऽर्थे । पक्षे ठञ् । आढकीना / आढकिकी । इत्यादि ।

आढकीना—आढकं सम्भवति, अवहरति, पचति आढक + ख स्त्रियां टाप् । आढकिकी–आढक + ठञ् स्त्रियां ङीप् । एवम् आचितीना / आचितिकी / पात्रीणा / पात्रिकी ।

द्विगोष्ठंश्च ॥५४॥

आढकाचितपात्रान्ताद् द्विगोः सम्भवत्यादिष्वर्थेषु विभाषा

ष्ठन् । चात्खः । विधानसामर्थ्यादनयोर्लुङ् न । ठञस्तु 'अध्यर्ध·····' इति लुग् भवत्येव ।

द्व्याढकिकी / द्व्याढकीना / द्व्याढकी । द्व्याचितिकी / द्व्याचितीना / द्व्याचिता । 'अपरिमाणविस्ताचित···' इति ङीपः प्रतिषेधः ।

विभाषा—तेन ष्ठन्, ख, ठञ् इति त्रयः प्रत्ययाः त्रीणि रूपाणि च भवन्ति । 'ष्ठन्' इत्यत्र षकारः इत् तेन 'ङीष्' भवति द्व्याढकिकी । द्व्याढकी—ठञो लुकि 'द्विगोः' इति ङीप् । द्विपात्रिकी / द्विपात्रीणा । द्विपात्री इत्यप्युदाहरणत्रयम् ।

कुलिजाल्लुक्खौ च ॥५५॥

कुलिजशब्दान्ताद् द्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ भवतः । चकारात् ष्ठन् । वाऽनुवृत्त्या लुगपि विकल्प्यते । ठञः पक्षे श्रवणं भवति । तेन चातूरूप्यं भवति । द्वे कुलिजे सम्भवत्यवहरति पचति वा द्विकुलिजिकी / दिकुलिजीना / द्विकुलिजा / द्वैकुलिजिकी ।

द्विकुलिजिकी प्रभृतीनि चत्वारि रूपाणि क्रमशः 'ष्ठन्, ख, ठञो लुक्, ठञ्' प्रत्ययान्तानि ज्ञेयानि ।

सोऽस्यांशवस्नभृतयः ॥५६॥

प्रथमासमर्थात् षष्ठ्यंशे यथास्वम् । यत्तत् प्रथमासमर्थमंशवस्नभृतयश्चेत्ता भवन्ति । अंशो भागः । वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशादिरस्य पञ्चकः । सप्तकः ।

पञ्चकः—पञ्च + कन् ।

तदस्य परिमाणम् ॥५७॥

प्रथमासमर्थात् षष्ठ्यर्थे यथास्वम् । यत् प्रथमासमर्थं परिमाणमस्य प्रास्थिको राशिः ।

प्रास्थिकः—प्रस्थ + ठञ् ।

संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ॥५८॥

संख्यावाचिनः प्रातिपदिकात् परिमाणोपाधिकात् प्रथमासमर्था-दस्येत्यर्थे यथास्वम्, संज्ञेत्यादि प्रत्ययार्थविशेषणम् । तत्र संज्ञायां स्वार्थे प्रत्ययः । पञ्चैव पञ्चकाः शकुनयः । संङ्घे—पञ्च परिमाण-मस्य पञ्चकः सङ्घः ।

सूत्रम्—अष्टावध्यायाः परिमाणमस्य सूत्रस्याष्टकं पाणिनीयं सूत्रम् । दशकं वैयाघ्रपदम् । त्रिकं काशकृत्स्नम् ।

अध्ययनम्—पञ्चकोऽधीतः । सप्तकः । पञ्चावृत्तिरूपाण्यस्याध्ययनस्य पञ्चकमध्ययनम् ।

अत्र परिमाण शब्दः परिमीयते अनेनेति विग्रहात् क्रियार्थको यौगिकः । संख्ययाऽपि परिमीयते इति साप्यत्र परिमाणान्तर्गता ।

दशकम्—दशाध्यायाः परिमाणमस्य । एवं त्रिकम्—त्रयोऽध्यायाः परिमाणमस्य ।

पञ्चकोऽधीतः—पञ्चपरिमाणमस्येति पञ्चकः । अध्ययनमस्या-स्तीति अधीतः ।

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीति-नवतिशतम् ॥५९॥

पङ्क्त्यादयः शब्दाः निपात्यन्ते । यल्लक्षणेनानुपपन्नं तन्नि-पातनात् सिद्धम् । पञ्चानां 'टि' लोपः तिश्च प्रत्ययः । पञ्च पदानि परिमाणमस्य पङ्क्तिश्छन्दः ।

विंशतिः—द्वयोर्दशतोर्विन् भावः शतिश्च प्रत्ययः । द्वौ दशतौ परिमाणमस्य सङ्घस्य ।

त्रिंशत्—त्रयाणां दशतां त्रिन् भावः शच्च प्रत्ययः ।

चत्वारिंशत्—चतुर्णां दशतां चत्वारिन् भावः शच्च प्रत्ययः ।

पञ्चाशत्—पञ्चा भावः तिः प्रत्ययः ।

षष्टिः—षड् भावः तिः प्रत्ययः ।

सप्ततिः—सप्तभावः तिः प्रत्ययः ।

अशीतिः—अशी भावः तिः प्रत्ययः ।

नवतिः—नव भावः तिः प्रत्ययः ।

शतम्—श भावः तश्च प्रत्ययः ।

त्रिंशत्—त्रयो दशतः परिमाणमस्य । एवं चत्वारः, पञ्च, षड् सप्त, अष्टौ, नव, दश इति क्रमशो ज्ञेयानि । वस्तुतो नैतेषु कश्चिदवयवार्थोऽस्ति । एवं सहस्रादयोऽपि ज्ञेयाः ।

पञ्चद्दशतौ वर्गे वा ॥६०॥

एतौ निपात्यौ वा वर्गेऽभिधेये । पञ्च परिमाणमस्य पञ्चद्-वर्गः । दशद्वर्गः ।

पक्षे कन् पञ्चको वर्गः । दशको वर्गः । अत्र पञ्च-दश इति शब्दाभ्यां 'डति' प्रत्ययो निपात्यते ।

सप्तनोऽञ् छन्दसि ॥६१॥

सप्तन् शब्दात् छन्दसि विषये अञ् वर्गेऽभिधेये सप्त साप्तान्यसृजत् ।

साप्तानि—सप्त परिमाणमस्य (वर्गस्य) इति सप्तन् + अञ् । आदेरचो वृद्धिः । साप्तम् । वर्गबहुवचने साप्तानि ।

त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥६२॥

आभ्यां संज्ञायां डण् उक्तेऽर्थे ब्राह्मणेऽभिधेये । अभिधेये सप्तम्येषा न विषयसप्तमी । तेन मन्त्रभाषयोरपि भवति । त्रिंशद-ध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि ।

त्रैंशानि—त्रिंशत् + डण् टिलोपः, पूर्वाचो वृद्धिश्च । एवं चात्वारिंशानि ब्राह्मणानि ।

तदर्हति ॥६३॥

द्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः । वास्त्रयुग्मिकः ।

वास्त्रयुग्मिकः—वस्त्रयुग्ममर्हति । उभयत्र ठक् ।

छेदादिभ्यो नित्यम् ॥६४॥

नित्यग्रहणं प्रत्ययार्थविशेषणम् । छेदं नित्यमर्हति छैदिकः ।

नित्यमर्हतीत्यर्थे यथाविहितं प्रत्ययो भवति । छैदिकः-छेद + ठक् । एवं भैदिकः ।

शीर्षच्छेदाद्यच्च ॥६५॥

चाट्ठक् । शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः / शैर्षच्छेदिकः ।

प्रत्यये सति शिरसः 'शीर्ष' इति निपात्यते । विग्रहवाक्ये तु 'शिरः' इत्येव भवति ।

दण्डादिभ्यो यः ॥६६॥

नित्यमिति निवृत्तम् । दण्डमर्हति दण्ड्यः । मुसल्यः ।

दण्डः-उपायविशेषः । साम-दाम-दण्ड-भेदाः इति ।

छन्दसि च ॥६७॥

प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्येतस्मिन्नर्थे यत्प्रत्ययः । उदक्या वृत्तयः । यूप्यः पलाशः ।

अत्र 'यत्' इत्यनुवर्तते न यः, तथैव विधानात् । उदक्याः—उदकम् अर्हन्ति । यूप्यः—यूपम् अर्हति ।

पात्राद् घँश्च ॥६८॥

अस्माद् घन्, यच्च । पात्रं परिमाणम् । तदर्हति पात्रियः / पात्र्यः ।

पात्रं परिमाणम् । भाजनमप्यर्थः प्रसिद्धः । पात्रियः—पात्रपरिमित-तण्डुलादिधारणक्षमः स्थाल्यादिः । अथवा येन भुक्ते पुनः संस्कारेण भाजनं न शुद्धयति स चाण्डालादिः । पात्र + घन् । 'नकारः' इत्, घस्य 'इय' आदेशः ।

कडङ्गरदक्षिणाच्छ च ॥६९॥

आभ्यां छः, यच्च उक्तेऽर्थे । कडङ्गरीयो गौः । दक्षिणीयो भिक्षुः । कडङ्गर्यः । दक्षिण्यः ।

कडङ्गरमर्हति, दक्षिणामर्हति । कडङ्गर + छ तस्य 'ईय' आदेशः । 'कडङ्कर' इति पाठान्तरमपि । तेन कडङ्करीयः / कडङ्कर्यः इत्युदाहरणद्वयमपि भवति । माषमुद्गादि काष्ठं कडङ्गरं, कडङ्करं वोच्यते । दक्षिण्यः—दक्षिणीयश्च ।

स्थालीबिलात् ॥७०॥

स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः / स्थालीबिल्याः । पाकयोग्याः इत्यर्थः ।

छ–यतावनुवर्त्तेते । स्थालीबिलम्–पाकपात्रस्याभ्यन्तरभागः । पाक-योग्याः–त्रिफलीकृता इति यावत् ।

यज्ञर्त्विग्भ्यां घखञौ ॥७१॥

आभ्यां यथासंख्यं घ-खञौ प्रत्ययौ भवतः उक्तेऽर्थे । यज्ञियो विप्रः । आर्त्विजीनं विप्रकुलम् । आर्हीयानां ठगादीनां पूर्णोऽवधिः । अथ प्राग्वतीयष्ठञ् एव भवति ।

यज्ञियः–यज्ञ + घः यज्ञकर्माहं इत्यर्थः । आर्त्विजीनम्–ऋत्विग् भवितुमर्हति ।

तथा च—* (वा०) यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् । अथ–अतः परम् इति तात्पर्यम् ।

पारायणतुरायणचान्द्रायणं वर्तयति ॥७२॥

पारायणादिभ्यो द्वितीयासमर्थेभ्यो वर्तयतीत्यस्मिन्नर्थे ठञ् । पारायणं वर्तयति अधीते पारायणिकः छात्रः । तौरायणिकः । चान्द्रायणिकः तपस्वी ।

पारायणम्–आदितः अन्तं यावदविच्छेदेन वेदाध्ययनम् । **तुरायणम्**–संवत्सरसाध्यो यज्ञविशेषः । **चान्द्रायणम्**–तपोविशेषः । **वर्तयति**–निष्पादयति । **छात्रः**—गुरोरपि निष्पादने योगात् प्रत्ययः छात्रे एव । **तौरायणिकः**–यजमानः ।

संशयमापन्नः ॥७३॥

संशयशब्दाद् द्वितीयासमर्थादापन्नार्थे ठञ् । संशयमापन्नः सांशयिकः ।

सांशयिकः–स्थाणुरितिशेषः । यद्विषयकः संशयस्तत्रैव प्रत्ययो भवति । अत्र स्थाणुर्वा पुरुषो वेति संशयविषयः स्थाणुरस्ति ।

योजनं गच्छति ॥७४॥

योजनशब्दाद् द्वितीयासमर्थाद् गच्छतीत्येतस्मिन्नर्थे ठञ् । योजनं गच्छति यौजनिकः ।

* (वा०) क्रोशशतयोजनशतयोरुपसंख्यानम् । क्रोशशतं गच्छति क्रौशशतिकः भिक्षुः । यौजनशतिक आचार्यः ।

क्रौशशतिको भिक्षुः–अत्रायं विशेषः–क्रोशशतादभिगमनमर्हतीत्यर्थेऽयं प्रयोगः । एवं यौजनशतिकोऽपि । तथा च वार्तिकम्–ततोऽभिगमनमर्हतीति क्रोशशतयोजनशतयोरुपसंख्यानम् ।

पथः ष्कन् ॥७५॥

पथिन् शब्दाद् द्वितीयासमर्थाद् गच्छतीत्येतस्मिन्नर्थे ष्कन् प्रत्ययो भवति । पन्थानं गच्छति पथिकः । पथिकी ।

पथिकी—षित्वान्ङीष् ।

पन्थो ण नित्यम् ॥७६॥

नित्यमिति प्रत्ययार्थविशेषणम् । 'पथः' इत्यनुवर्तते । पथः पन्थ इत्ययमादेशो भवति णश्च प्रत्ययः । नित्यं गच्छतीत्येतस्मिन् विषये । पन्थानं नित्यं गच्छति पान्थो भिक्षां याचते । नित्यमिति किम् ? पथिकः । (श्रीजानकीवक्षोमहानीलमणये रामाय नमः ।)

अत्र आभीक्ष्ण्यम्–नित्यम् परित्यागाभावो वा । तथा चोदाहरणेनैव स्पष्टम् । अयं भिक्षुः पुनः पुनः निरन्तरं वा गच्छति भिक्षां च याचते । 'श्रीजानकी···नमः' इति लेखो रिक्तं पर्णमपरित्यजतः काशिकासारकारस्य रामभक्तिं द्रढयति ।

उत्तरपथेनाहृतं च ॥७७॥

उत्तरपथशब्दात् तृतीयासमर्थाद् 'आहृतम्' इति विषये ठञ् । उत्तरपथेनाहृतम् औत्तरपथिकम् । चकाराद् गच्छतीत्यर्थेऽपि । उत्तर-पथेन गच्छति औत्तरपथिकः ।

उत्तरः पन्थाः इत्युत्तरपथम् । अत्र वार्तिकानि–(१) आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम् । वारिपथेनाहृतं वारि-पथिकम् । वारिपथेन गच्छति वारिपथिकः इत्यादि ।

(२) अजपथशङ्कुपथाभ्यां चोपसंख्यानम् । आजपथिकः ।

(३) मधुकमरिचयोरण् स्थलात् । स्थालपथं मधुकम्, मरिचं च ।

कालात् ॥७८॥

यदित ऊर्ध्वमनुक्रमिष्यामो व्युष्टादीति यावत् कालादित्येव

तद् वेदितव्यम् । वक्ष्यति-तेन निर्वृत्तम् । मासेन निर्वृत्तम् मासिकम् ।

मासिकम्—मास + ठञ् ।

तेन निर्वृत्तम् ॥७९॥

तृतीयासमर्थात् कालवाचिनो निर्वृत्तार्थे ठञ् । आह्निकम् ।

'कालात्' इत्यनुवर्तते । आह्निकम्—अह्ना निर्वृत्तम्—निष्पादितम् इति अहन् + ठञ् । अल्लोपोऽनः इत्यकारलोपः । एवम् आर्द्धमासिकम् । पाक्षिकम् । वार्षिकम् । सर्वत्र ञकारः इति ठस्य 'इक' आदेशः, पूर्वस्याचो वृद्धिश्च ।

तमधीष्टो भृतो भूतो भावी ॥८०॥

द्वितीयासमर्थात् कालवाचिनः अधीष्टो भृतो भूतो भावीत्यर्थे यथास्वम् । अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः—स्वसत्तया व्याप्तकालः । भावी—तादृश एवानागतः । मासमधीष्टो मासिकः । क्रमेणाध्यापककर्मकरव्याध्युत्सवादयो यथासंख्यमूह्याः । ननु चाध्येषणं भरणं च मुहुर्त्तं क्रियते 'कालाध्वनोरत्यन्तसंयोगे' इत्युक्तं तेन कथं मासो व्याप्यते ? सत्यम्—अध्येषणभरणे क्रियार्थे । तत्र फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्यते ।

ऊह्याः—क्रमशः अधीष्टोऽध्यापकः । भृतः कर्मकरः । भूतो व्याधिः । भावी उत्सवः ।

मासाद्वयसि यत्खञौ ॥८१॥

मासशब्दाद्वयस्यभिधेये यत्खञौ भवतः । सामर्थ्याद् भूतार्थे एव ज्ञेयः । मासं भूतः मास्यः / मासीनः ।

मास्यः—अस्य जातस्य मासो गत इत्यर्थः ।

द्विगोर्यप् ॥८२॥

मासान्ताद् द्विगोर्यप् वयसि । द्विमास्यः ।

द्वौ मासौ भूतः इति द्विमास + यप् । पित्करणम् अनुदात्तत्वार्थम् ।

षण्मासाण्ण्यच्च ॥८३॥

अस्माद् वयस्यभिधेये ण्यत् । चाद्यप् । ठञपीष्यते । षाण्मास्यः / षण्मास्यः / षाण्मासिकः ।

क्रमशः ण्यत्-यप्-ठञ् प्रत्ययाः भवन्ति ।

अवयसि ठंश्च ॥८४॥

अस्माट्ठन् अवयसि । ण्यच्च । षण्मासिको रोगः / षाण्मास्यः ।

चकारात् 'ण्यत्' इत्यस्य समुच्चयः ।

समायाः खः ॥८५॥

समाशब्दाद् द्वितीयासमर्थादधीष्टादिष्वर्थेषु ख प्रत्ययः । समामधीष्टो भृतो भूतो भावी समीनः ।

केचिदाचार्याः 'तेन निर्वृत्तम्' इत्यनुवर्त्तयन्ति । तेषां मतेन समया निर्वृत्तः समीनः इत्यपि । समा—वत्सरपर्यायः । मा निषाद प्रतिष्ठां त्वमगमःशाश्वतीः समाः इत्यादिकविः ।

द्विगोर्वा ॥८६॥

समाशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु पञ्चसु वा खः । 'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि ।' इति प्राप्तिरस्त्येव । पक्षे ठञपि । द्विसमीनः / द्वैसमिकः ।

पञ्चसु—'तेन निर्वृत्तम्, तमधीष्टो भृतो भूतो भावीति पञ्च अर्थाः'

तेषु । द्वयोः समयोः समाहारः इति **द्विसमम्** तेन निर्वृत्तः, तदधीष्टः इत्याद्यर्थो ज्ञेयः ।

रात्र्यहस्संवत्सराच्च ॥८७॥

एतदन्ताद् द्विगोरुक्तेष्वर्थेषु वा खः । पक्षे ठञ् । द्विरात्रीणः / द्वैरात्रिकः । द्व्यहीनः / द्वैयह्निकः । द्विसंवत्सरीणः / द्वैसंवत्सरिकः । 'संख्यायाः संवत्सर-संख्यस्य च' इत्युत्तरपदवृद्धिः ।

द्व्यहीनः—'अह्नष्टखोरेव' इति 'टि' लोपः । समासान्तविधेरनित्यत्वान्न 'टच्' । द्वैयह्निकः—समासान्तष्टच् । 'अह्नोऽह्नादेशः । 'नय्वाभ्यां पदान्ताभ्याम् ' इत्यनेन 'ऐच् आगमः' वृद्धिनिषेधश्च ।

वर्षाल्लुक् च ॥८८॥

वर्षान्ताद् द्विगोरुक्तेष्वर्थेषु वा खः पक्षे ठञ् । तयोश्च वा लुक् त्रैरूप्यम् । द्विवर्षीणो व्याधिः / द्विवार्षिकः / द्विवर्षः । 'वर्षस्याभविष्यति' इत्युत्तरपदवृद्धिः ।

त्रैरुप्यम्—ख-ठञोर्लुकि रूपं समानमेव द्विवर्षः इति । उत्तरपदवृद्धिः—द्विवार्षिकः इत्यत्रेति शेषः । भाविनि—भविष्यति तु पूर्वपदस्यादेरच एव वृद्धिः द्वैवर्षिकः ।

चित्तवति नित्यम् ॥८९॥

चित्तवति प्रत्ययार्थेऽभिधेये वर्षान्ताद्द्विगोरुक्तेष्वर्थेषु उत्पन्नप्रत्ययस्य नित्यं लुक् । द्विवर्षो दारकः ।

अत्रेदं बोध्यम्—'भूते' एव नित्यं लुग् भवति—तेनाधीष्टभृतयोः द्विवार्षिकः इत्येव भवति । चित्तम्—अन्तःकरणवृत्तिः, सा अस्ति अस्मिन्निति चित्तवान् तस्मिन् । तेन द्विवर्षीणो व्याधिः इत्यत्र न लुक् ।

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥९०॥

षष्टिकशब्दो निपात्यते । बहुवचनमतन्त्रम् । षष्टिरात्रिशब्दात्

तृतीयासमर्थात् 'कन्' प्रत्ययो निपात्यते 'पच्यन्ते' एतस्मिन्नर्थे । रात्रि-शब्दस्य च लोपः । षष्टिरात्रेण पच्यन्ते षष्टिकाः । धान्यभेदः ।

अतन्त्रम्–अप्रधानम् = अविवक्षितमित्यर्थः । 'षष्टिकाः' इति बहु-वान्तोपदेशो यद्यपि कृतस्तथाप्येकवचनान्तोऽपि भवतोति भावः । तथा च वार्तिकम्–षष्टिके संज्ञाग्रहणं कर्त्तव्यम् । षष्टिकाः इति धान्यविशेषस्य संज्ञा ।

वत्सरान्ताच्छश्छन्दसि ॥९१॥

वत्सरान्तादुक्तार्थेषु छः छन्दसि । इद्वत्सरीयः ।

इद्वत्सर शब्दः पञ्चवर्षात्मके युगे तृतीयवत्सरः । स एव इडावत्सर नाम्नाप्यभिधीयते । (देवीपुराणे कालव्यवस्थानामकाध्याये, विष्णुधर्मोत्तरे च ।) इद्वत्सरेण निर्वृत्तः, इद्वत्सरमधीष्टः इत्यादि ।

सम्परिपूर्वात्ख च ॥९२॥

चात् छश्च । उक्तेऽर्थे प्राग्वत् । संवत्सरीणः / यः । परि-वत्सरीणः / यः ।

यः—संवत्सरीयः इति भावः । एवम् यः–परिवत्सरीयः । संवत्सरः पूर्वोक्ते पञ्चवर्षात्मके युगे प्रथमः, परिवत्सरश्च द्वितीयः । संवत्सरेण निर्वृत्तः संवत्सरमधीष्टो वा ।

तेन परिजय्यलभ्यकार्यसुकरम् ॥९३॥

तृतीयासमर्थात् कालवाचिनः प्रातिपदिकात् परिजय्यलभ्य-कार्य-सुकर एष्वर्थेषु ठञ् । मासेन परिजय्य-शक्यते परिजेतुं मासिको व्याधिः इत्यादि ।

एवं मासेन लभ्यः–मासिकः पटः । मासेन कार्यम्–मासिकं चान्द्रायणं व्रतम् । मासेन सुकरः–मासिकः प्रासादः ।

तदस्य ब्रह्मचर्यम् ॥६४॥

द्वितीयासमर्थात् कालवाचिनः षष्ठ्यर्थे ठक् । ब्रह्मचर्यं चेद् गम्यते । मासं ब्रह्मचर्यम् अस्य मासिकः ब्रह्मचारी । अपरा वृत्तिः—

तदिति प्रथमासमर्थात् षष्ठ्यर्थे ठक् । यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेद्भवति । मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम् । पूर्वत्र ब्रह्मचारी प्रत्ययार्थः, उत्तरत्र ब्रह्मचर्यम् । उभयं प्रमाणम् । उभयथा प्रणयनात् ।

अपरा वृत्तिः सूत्रे 'तत्' इति पदं द्वितीयान्तं, प्रथमान्तञ्च प्रथमे मासिकः ब्रह्मचारी द्वितीये मासिकं ब्रह्मचर्यमिति विशेषः । प्रणयनात्--सूत्रकारेणेति शेषः ।

ब्रह्मचर्यार्थकानि वार्तिकानि—

❀(वा० १) महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम्—माहानामिकम् । गौदानिकम् । महत् नाम यासां ताः माहानाम्न्यः तासां ब्रह्मचर्यमस्य ।

❀(वा० २) तच्चरति—महानाम्नीश्चरति माहानामिकः ।

❀(वा० ३) चातुर्मास्याण्यो यज्ञे तत्र भवे । चतुर्षु मासेषु भवानि चातुर्मास्यानि ।

❀(वा० ४) संज्ञायामण् वक्तव्यः । चतुर्षु मासेषु भवा चातुर्मासी पौर्णमासी ।

तस्य च दक्षिणा यज्ञाख्येभ्यः ॥६५॥

षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यो दक्षिणेत्यर्थे ठञ् । अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । वाजपेयिकी ।

वाजपेयिकी -वाजपेयस्य दक्षिणा । एवम् राजसूयिकी । यज्ञाख्येभ्यः—यज्ञवाचिभ्यः सर्वेभ्यः विशेषयज्ञेभ्यः ।

तत्र च दीयते कार्यं भववत् ॥६६॥

सप्तमीसमर्थात् कालवाचिनः दीयते-कार्यम् एतयोरर्थयोः

भववत् प्रत्ययो भवति । मासे दीयते मासिकम् । कार्यं वा । कालाधिकारस्य पूर्णोऽवधिः ।

भववत्–यथा भवार्थे प्रत्ययो भवति तद्वत् मासिकम्–मास + ठञ् । एवं पूर्वसूत्रे योगविभागात् यज्ञाख्येभ्योऽपि अग्निष्टोमे दीयते आग्निष्टोमिकं भक्तम् । **पूर्णोऽवधिः**--अग्रे सामान्येन प्रत्ययाः वक्ष्यन्ते ।

व्युष्टादिभ्योऽण् ।।९७।।

सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो उक्तार्थयोरण् । व्युष्टे दीयते कार्यं वा वैयुष्टम् ।

व्युष्टम्—प्रभातम् । 'नय्वाभ्याम्.....' इत्यादिना 'ऐच्' ।

तेन यथाकथाचहस्ताभ्यां णयतौ ।।९८।।

तेनेति तृतीयासमर्थाभ्यामाभ्यां क्रमेण ण-यत् एतौ स्तः उक्तयोरर्थयोः । यथाकथाचशब्दोऽव्ययसमुदायोऽनादरे । तृतीयार्थ-मात्रमत्र सम्भवति । यथाकथाच दीयते कार्यं वा याथाकथाचम् । हस्त्यम् ।

याथाकथाचम्–यथाकथाच + ण अनादरेण दत्तमित्यर्थः–**हस्त्यम्**–हस्तेन दीयते कार्यं वा हस्त + यत् ।

सम्पादिनि ।।९९।।

तृतीयासमर्थात् सम्पादिन्यर्थे ठञ् । गुणोत्कर्षः सम्पत्तिः । आवश्यके णिनिः । कर्णवेष्टकाभ्यां सम्पादि मुखम् कार्णवेष्टकिकम् ।

गुणोत्कर्षः—पूर्वावस्थाया गुणातिरेकः । अवश्यं सम्पद्यते इति सम्पादि । 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनिः । **कर्णवेष्टकम्**–कर्णाभरणम् ।

कर्मवेषाद्यत् ॥१००॥

आभ्यां यत् उक्ते । कर्मणा सम्पद्यते कर्मण्यं शरीरम् । वेष्यो नटः ।

सम्पद्यते–विशेषतः शोभते । वेष्यः–वेषेण सम्पद्यते ।

तस्मै प्रभवति सन्तापादिभ्यः ॥१०१॥

चतुर्थीसमर्थेभ्यः सन्तापादिभ्यः प्रभवतीत्यर्थे ठञ् । समर्थः प्रभुः । सन्तापाय प्रभवति सान्तापिकः । सान्नाहिकः इत्यादि ।

सन्तापाय–अलमर्थे चतुर्थी । सान्तापिकः ज्वरादि । सान्नाहिकः—संनाहाय प्रभवति । संनाहः=कवचम् ।

योगाद्यच्च ॥१०२॥

उक्तेऽर्थे । ठञ् च । योगाय प्रभवति योग्यः / यौगिकः ।

उक्तेऽर्थे–तस्मै प्रभवति इत्येतस्मिन् विषये । योग्यः–योग + यत् । यौगिकः–योग + ठञ् ।

कर्मण उकञ् ॥१०३॥

उक्तेऽर्थे । कर्मणे प्रभवति कार्मुकं धनुः । धनुषोऽन्यत्र न, अनभिधानात् ।

कार्मुकम्–कर्मन् + उकञ् । ञित्वादादेरचो वृद्धिः ।

समयस्तदस्य प्राप्तम् ॥१०४॥

समयशब्दात् प्रथमासमर्थादस्येतिषष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं प्राप्तं चेत्तद्भवति । समयः प्राप्तोऽस्येति सामयिकं कार्यम् । उपनतकालमित्यर्थः ।

सामयिकम्–समय + ठञ् । यस्य समयः–अनुकूलकालः प्राप्तः तत्कार्यमित्यर्थः ।

ऋतोरण् ॥१०५॥

ऋतुशब्दात् प्रथमासमर्थात् षष्ठ्यर्थेऽण् । ऋतुः प्राप्तोऽस्य इति आर्तवम् । भत्वात् 'ओर्गुणः' इति गुणः ।

❀ (वा०) तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् । उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् ।

तदस्य प्राप्तमित्यनुवर्तते । तेन तस्मिन्नेव विषयेऽण् । आर्तवम्–ऋतूद्भवं पुष्पं फलं स्त्रीरजश्च । उपवस्ता–उपवासस्य कर्ता उपवस्तृशब्दो मौलिकः । प्राशिता–प्रकर्षेण भक्षकः (होमकर्मणि भागगृहीता) प्राशित्रम्–ब्रह्मभागः ।

छन्दसि घस् ॥१०६॥

ऋतोश्छन्दसि विषये घस् उक्तेर्थे । अयं ते योनिर्ऋत्वियः ।

ऋत्वियः–ऋतु + घस् । सकारः इत् । 'सिति च' इति 'पद' संज्ञायां 'भ संज्ञायाः अभावात् 'ओर्गुणः' इति गुणो न भवति । घकारस्य 'इय' यण् सन्धिश्च ।

कालाद्यत् ॥१०७॥

कालशब्दाद्यत्प्रत्ययो भवत्युक्तेऽर्थे । कालः प्राप्तोऽस्येति काल्यस्तापः । काल्यं शीतम् ।

उक्तेऽर्थे–तदस्य प्राप्तमित्यर्थे । शीतम्–गोतमिति पाठान्तरम् ।

प्रकृष्टे ठञ् ॥१०८॥

कालादित्येव । तदस्येति च । प्राप्तमितिनिवृत्तम् । प्रकर्षेण कालो विशेष्यते । प्रकृष्टे=प्रकर्षे वर्तमानात्कालात् प्रथमासमर्थात्

षष्ठ्यर्थे ठञ् । प्रकृष्टो दीर्घः कालोऽस्य कालिकम् ऋणम् । ठञ् ग्रहणं विस्पष्टार्थम् ।

प्रकृष्टो–दीर्घः । कालस्य दीर्घतैव प्रकृष्टता । कालिकम्–काल + ठञ् । एवं कालिकं वैरम् ।

प्रयोजनम् ॥१०९॥

प्रथमासमर्थात् षष्ठ्यर्थे ठञ् । यत्तत्प्रथमासमर्थं प्रयोजनं चेत् । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । गाङ्गामहिकम् ।

इन्द्रमहः–इन्द्रोत्सवः । प्रयोजयतीति प्रयोजनम् अथवा प्रयुज्यतेऽनेनेति **प्रयोजनम्** ।

विशाखाषाढादण् मन्थदण्डयोः ॥११०॥

आभ्यामण् उक्तेऽर्थे क्रमेण दण्डमन्थयोरभिधेययोः । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः ।

मन्थः–विलोडनदण्डः दण्डस्याधारः काष्ठविशेषो वा । आषाढः–ब्रह्मचारिणां दण्डः । एतौ शब्दौ क्रमशः मन्थदण्डयोर्वर्तेते । व्युत्पत्तिरेवैतयोः कथञ्चित् कृता ।

❀ (वा०) चूडादिभ्य उपसंख्यानम् । चूडा प्रयोजनमस्य **चौडम्** । श्रद्धा प्रयोजनमस्य श्राद्धम् ।

अनुप्रवचनादिभ्यश्छः ॥१११॥

एभ्यश्छः उक्तेऽर्थे । अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयः । उत्थापनीयम् ।

उत्थापनीयम्–उत्थापनं प्रयोजनमस्य ।

❀(वा०) स्वर्गादिभ्यो यद्वक्तव्यः । स्वर्गः प्रयोजनमस्य स्वर्ग्यम् । **यशस्यम् । आयुष्यम् । काम्यम् । धन्यम् ।**

※ (वा०) पुण्याहवाचनादिभ्यो लुग्वक्तव्यः । पुण्याहवाचनं प्रयोजनमस्य 'प्रयोजनम्' इति सूत्रेण विहितस्य ठञो लुक् । एवं स्वस्तिवाचनम् । शान्तिवाचनम् ।

समापनात् सपूर्वपदात् ॥११२॥

अस्मात् विद्यमानपूर्वपदाच्छः उक्तेऽर्थे । छन्दःसमापनं प्रयोजनमस्य छन्दःसमापनीयम् ।

छन्दःसमापन + छ तस्य 'ईय' आदेशः । एवं व्याकरणसमापनीयम् ।

ऐकागारिकट् चौरे ॥११३॥

ऐकागारिक इति निपात्यते चौरेऽभिधेये उक्तार्थे । एकागारं प्रयोजनमस्य ऐकागारिकः चौरः । नियमार्थं वचनम् । टकारो ङीबर्थः ।

एकम्-असहायम् आगारमस्य चौरस्य प्रयोजनम् भवति तत्रैव तत्कार्यस्य सुकरत्वात् । नियमार्थम्-एकागारात् चौरे ठञ् एव । केचन आचार्याः ऐकागारिक शब्दम् एकागारात् इकट् प्रत्ययं वृद्धिं च निपात्य साधयन्ति । ङीबर्थः-ऐकागारिकी इत्यत्र ।

आकालिकडाद्यन्तवचने ॥११४॥

आकालिक इति निपात्यते, आद्यन्तवचने । समानकालशब्दस्य 'आकाल' इत्यादेशः । आद्यन्तयोश्चैतद्विशेषणम् । इकट् प्रत्ययश्च निपात्यते । समानकालावाद्यन्तावस्य आकालिकः स्तनयित्नुः । आकालिकी विद्युत् । जन्मना तुल्यकालविनाशः । उत्पत्तेरनन्तरं विनाशीत्यर्थः । ठञः पूर्णोऽवधिः ।

आदिः—जन्म, अन्तः-विनाशः तयोर्वचनं तस्मिन् आद्यन्तवचने अर्थात् यस्य जन्मकालेन समानः—निरन्तरः विनाशकालः । समानकालौ इत्यस्यार्थः

जन्मविनाशकालयोरव्यवहितकालत्वम् । जन्मना…… विनाशीत्यर्थः–स्तन-यित्नुरिति शेषः । स्तनयित्नुः—मेघः, मेघध्वनिर्वा ।

※ (वा०) आकालाट्ठंश्च । आकालिका विद्युत् । ठञि कृते ञित्वाद् ङीप् ।

केचित् आचार्याः वर्णयन्ति–प्रथमे दिवसे प्रातः, मध्याह्ने वा वर्षा-दीनामुत्पत्तिः द्वितीयदिवसे तस्मिन्नेव काले विनाशः तानि वर्षादीनि आकालिकानि । परन्तु मेघस्वने, विद्युति च वाच्ये नैष विग्रहः सम्भवति तयोः क्षणिकत्वात् ।

तेन तुल्यं क्रिया चेद्वतिः ॥११५॥

तृतीयासमर्थात्तुल्यार्थे वति प्रत्ययः । यत्तुल्यं क्रिया चेत् सा भवति । ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत् । क्रिया किम् ? गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।

सूत्रस्थं 'तुल्यम्' इति पदं क्रियाविशेषणम् । तेनास्य कर्मत्वम् । वर्त्तते–अत्र वर्त्तनम् अध्ययनयागादिक्रियानुष्ठानम् । पदमञ्जरीकारस्तु तुल्यमिति पदं प्रथमान्तं मत्वा 'हितं भक्षाः' इतिवत् नपुंसक-निर्देशमाह ।

तत्र तस्येव ॥११६॥

सप्तमीसमर्थात् षष्ठीसमर्थाच्च इवार्थे वतिः । मधुरायामिव मधुरावत् स्नुघ्ने प्राकारः । चैत्रस्येव चैत्रवत् मैत्रस्य गावः ।

प्राकारः—प्रासादः इति पाठान्तरम् ।

तदर्हम् ॥११७॥

द्वितीयासमर्थादर्हमित्यर्थे वतिः । राजानमर्हति राजवत् ।

'तेन तुल्यम् क्रिया……' इत्यतः क्रियाग्रहणमनुवर्तते । तेन यत्तदर्हं क्रिया चेत् सा भवतीत्यर्थो लभ्यते । राजवत्—पालनमितिशेषः । ब्राह्मण-मर्हति ब्राह्मणवदध्ययनम् ।

उपसर्गाच्छन्दसि धात्वर्थे ॥११८॥

उपसर्गात् ससाधने धात्वर्थे वर्तमानाद्वतिप्रत्ययो भवति छन्दसि । यदुद्वतो निवतो यासि बप्सद् । उद्गतानि निगतानि च ।

उद्वतः, निवतः—उत्, नि शब्दाभ्याम् ससाधने धात्वर्थे वतिः । ससाधनम्–साधनं शक्तिमद् द्रव्यम् तेन सहितम् ।

तस्य भावस्त्वतलौ ॥११९॥

षष्ठीसमर्थाद्भावेऽर्थे त्वतलौ भवतः । भवतोऽस्मादभिधान-प्रत्ययाविति भावः । शब्दप्रवृत्तिनिमित्तं भावशब्देनोच्यते । अश्वत्वम् । अश्वता ।

भावः—तथा चोक्तम्–यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः, तदभिधाने त्वतलौ । अश्वत्वम्, अश्वता–त्वप्रत्ययान्तं नपुंसकं तल्प्रत्ययान्तं च स्त्रीलिङ्गं भवति ।

आ च त्वात् ॥१२०॥

'ब्रह्मणस्त्वः' इति वक्ष्यति । आ-एतस्मात्त्वसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामस्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ । वक्ष्यति-'पृथ्वादिति····' पृथुत्वम् । पृथुता । प्रथिमा ।

अधिकृतौ वेदितव्यौ — उत्तरप्रत्ययैः सह उत्सर्गभूतौ त्वतलौ प्रत्ययावपि भवतः इत्यर्थः । प्रथिमा— पृथु शब्दात् 'पृथ्वादिभ्यः इमनिज् वा' इति सूत्रेण 'इमनिच्' प्रत्ययः पृथु + इमनिच् 'तुरिष्ठेमेयस्सु' इत्यनेन टेः उकारस्य लोपः । 'र ऋतो हलादेर्लघोः' इति ऋकारस्य 'र' आदेशः एवं पार्थिवम्–पृथु + अण् 'इगन्ताच्च लघुपूर्वात्' इति सूत्रेण ।

न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटबुधकतरसलसेभ्यः ॥१२१॥

इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवन्ति । चतुरादीन् विना । वक्ष्यति–'पत्यन्त····' इत्यादि अपतित्वम् । अप-तिता । नञ्पूर्वात्किम् ? वार्हस्पत्यम् । तत्पुरुषात्किम् ? नास्य पटवः

सन्तीत्यपटुः' तस्य भाव आपटवम् । अचतुरादिभ्य इति किम् ? आचतुर्यमित्यादि ।

इत्यादि—आदिपदेन आसङ्गत्यम् । आलवण्यम् । आवटचम् । आबुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् । नञ् पूर्वेभ्यः चतुरादिभ्यः ब्राह्मणादित्वात् ष्यञ् ।

पृथ्वादिभ्य इमनिज्वा ॥१२२॥

एभ्य इमनिच् वा उक्तेऽर्थे । वावचनमणादिसंनिवेशार्थम् । पृथोर्भावः प्रथिमा । 'र ऋत' इति रत्वम् । पार्थिवः । त्वतलौ भवत एव । पृथुत्वम् । पृथुता । म्रदिमा । मार्दवम् । मृदुत्वम् । मृदुता इत्यादि ।

त्वतलौ—'आ च त्वात्' इत्येव सिद्धौ । मार्दवम्—मृदु + अण् । एवम् चण्डशब्दात् चण्डिमा / चाण्डचम् गुणवचनत्वात् चण्ड + ष्यञ् । चण्डत्वम्। चण्डता ।

वर्णदृढादिभ्यः ष्यञ्च ॥१२३॥

वर्णविशेषवाचिभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति । चादिमनिच् उक्तेऽर्थे । शुक्लस्य भावः शौक्ल्यम् । शुक्लिमा । शुक्लत्वम् । शुक्लता । दार्ढ्यम् । द्रढिमा । दृढत्वम् । दृढता । षो ङीबर्थः औचिती । बार्ढ्यम् । ब्रढिमा । बृढत्वम् । बृढता ।

शौक्ल्यम्—उकारस्य वृद्धिरौकारः । औचिती—उचित भावः उचित + ष्यञ् = औचित्य + ङीष् । 'हलस्तद्धितस्य' इति यकारलोपः । बार्ढ्यम्—वृत्तौ 'परिवृढ' पाठः ।

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥१२४॥

गुणमुक्तवन्तो गुणवचनाः । गुणवचनेभ्यो ब्राह्मणादिभ्यश्च षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ् । कर्म—क्रिया । जडस्य भावः कर्म जाड्यम् । ब्राह्मण्यम् इत्यादि । आपादसमाप्तेर्भावकर्माधिकारः ।

※ (वा०) चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानम् । चातुर्वर्ण्यम् । त्रैलोक्यम् । सौख्यम् ।

※ (वा०) सर्ववेदादिभ्यः स्वार्थे, चतुर्वेदस्योभयपदवृद्धिश्च । सार्ववैद्यम् । चातुर्वैद्यम् ।

स्तेनाद्यन्नलोपश्च ॥१२५॥

स्तेनशब्दात्षष्ठीसमर्थाद् भावकर्मणोर्यत् न लोपश्च । स्तेयम् ।

स्तेयम्—स्तेनस्य भावः कर्म वा स्तेन + यत् । केचित् अत्र 'ष्यञ्' प्रत्ययमपीच्छन्ति, स्तैन्यम् ।

सख्युर्यः ॥१२६॥

सखिशब्दाद्यः । सख्यम् ।

सख्यम्—सख्युर्भावः कर्म वा ।

※(वा०) दूतवणिग्भ्यां च । दूत्यम् । वाणिज्यम् (वणिज् + ष्यञ्) ।

कपिज्ञात्योर्ढक् ॥१२७॥

कपेर्भावः कर्म वा कापेयम् । ज्ञातेयम् ।

कपि + ढक्, ढकारस्य 'एय' आदेशः । पूर्वस्याचो वृद्धिः । ज्ञातेयम्—ज्ञातेर्भावः कर्म वा ज्ञाति + ढक् । कित्त्वाद् वृद्धिः ।

पत्यन्तपुरोहितादिभ्यो यक् ॥१२८॥

सैनापत्यम् । गार्हपत्यम् । पौरोहित्यम् । राज्यम् ।

सैनापत्यम्—सेनापतेर्भावः कर्म वा । एवं गार्हपत्यादिष्वपि बोध्यम् ।

※(वा०) राजासे । राजशब्दात् असे—असमासे यक् । समासे तु ष्यञ् आधिराज्यम् । यकि कित्त्वादादेरचो वृद्धिः ।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥१२९॥

प्राणभृज्जातिवाचिभ्यः, वयोवचनेभ्य उद्गात्रादिभ्यश्च अञ् प्रत्ययः भावकर्मणोः । अश्वस्य भावः कर्म वा आश्वम् । गार्दभम् । वयोवचनेभ्यः--कौमारम् । कैशोरम् । उदगात्रादिभ्यः--औद्गात्रम् । औन्नेत्रम् । श्रीदशास्यप्राणहरणाय नमः ।

प्राणभृतो जातिवाचिनः--अश्वादयः । आश्वम् + अश्व + अञ् । औद्गात्रम्--उद्गातुर्भावः कर्म वा उद्गातृ + अञ् । औन्नेत्रम्--उन्नेतृ + अञ् । श्रीदशास्य......इष्टदेवं नमस्करोति ।

❀ (वा०) सुभग मन्त्रे । महते सौभगाय । छन्दसि बाहुलकात् क्वचिदञ् न । सौभाग्यमस्यै दत्त्वा....' इत्यादि ।

हायनान्तयुवादिभ्योऽण् ॥१३०॥

हायनान्तेभ्यः प्रातिपदिकेभ्यो युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः । द्विहायनस्य भावः कर्म वा द्वैहायनम् । यौवनम् ।

यौवनम्--यूनः भावः कर्म वा युवन् + अण् । 'अन्' इति प्रकृतिभावः ।

❀ (वा०) पुरुषादसे--पुरुषादसमासे अण् । पौरुषम् । समासे तु राजपुरुषत्वम् ।

❀ (वा०) हृदयादसे । हार्दम् । हृदयस्य 'हृल्लेखयदणलासेषु' इति सूत्रेण हृदयस्य 'हृद्' आदेशः । समासे तु परमहृदयत्वम् ।

इगन्ताच्च लघुपूर्वात् ॥१३१॥

इगन्ताल्लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः । लघुपूर्व-ग्रहणेन पादिपदिकसमुदायो विशेष्यते । लघुः पूर्वोऽवयवोऽस्येति लघु-पूर्वः । इक्संनिधादिक इति विज्ञायते । लघुपूर्वो यस्मादिकः तदन्तात्प्रातिपदिकादित्ययमर्थो विवक्षितः । शुचेर्भावः कर्म वा शौचम् । नागरम् । हारीतकम् । पाटवम् ।

इगन्तात्–'इक्' अन्तो यस्य तस्मात् । यत् प्रातिपदिकं लघुपूर्वम् इगन्तं तस्मादित्यर्थो लभ्यते । अतिरिच्यते–स्वतः सिद्ध एव तदन्तविधिरिति भावः । नागरम्–नगर्याः भावः कर्म वा । हारीतकम्–हरीतक्याः भावः कर्म वा ।

योपधाद् गुरूपोत्तमाद् वुञ् ॥१३२॥

त्रिप्रभृतीनामन्त्यम् उत्तमम् तस्य समीपमुपोत्तमम् । गुरु उपोत्तमं यस्य । तस्माद् यकारोपधाद् गुरूपोत्तमाद् वुञ् प्रत्ययो भवति, भावकर्मणोरर्थयोः । रामणीयकम् । वासनीयकम् ।

*(वा०) सहायाद्वेति वाच्यम् । साहायकम् / साहाय्यम् ।

उत्तमम्—न तु 'तमप्' प्रत्ययान्तम् अपि तु रूढं प्रातिपदिकम् । रामणीयकम्—रमणीय + वुञ् 'वु' इत्यस्य 'अक' आदेशः ञित्वाद्वृद्धिः । साहाय्यम्–सहाय + ष्यञ् ।

द्वन्द्वमनोज्ञादिभ्यश्च ॥१३३॥

द्वन्द्वसंज्ञेभ्यो मनोज्ञादिभ्यश्च वुञ् भावकर्मणोरर्थयोः । गोपाल-पशुपालानां भावः कर्म वा गौपालपशुपालिका । मानोज्ञकम् । काल्याणकम् ।

गौपालपशुपालिका–वुञि कृते तस्य 'अक' आदेशे आदेरचो वृद्धौ स्त्रीत्वविवक्षायां टाप् । मनोज्ञादिषु अमुष्यपुत्रशब्दस्यापि पाठः । 'तस्य भावः कर्म वा आमुष्यपुत्रकम् ।

गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥१३४॥

गोत्रवाचिनश्चरणवाचिनश्च 'वुञ्' उक्तार्थयोः । श्लाघा-अत्याकार-तदवेतेष्वर्थेषु विषयभूतेषु । श्लाघा=विकत्थनम् । अत्या-कारः=विक्षेपः । तदवेतः=तत्प्राप्तः तज्ज्ञो वा । श्लाघायाम्–गार्गिकया श्लाघते । काठिकया श्लाघते । गार्ग्यत्वेन कठत्वेन विकत्थते इत्यर्थः । अत्याकारे—गार्गिकयाऽत्याकुरुते । गार्ग्यत्वेनाधिक्षिपतीत्यर्थः । तदवेतः—गार्गिकामवेतः । काठिकामवेतः । गार्ग्यत्वं प्राप्त इत्यर्थः । तद्वाऽवगतवानिति ।

गोत्रवाचिनः — अपत्यप्रत्ययान्तादित्यर्थः । चरणवाचिनः—चरण-शब्दोऽत्र वेदशाखाध्यायिषु पुरुषेषु रूढः । गार्गिकया—गार्ग्यस्य भावः कर्म वा गार्ग्य + वुञ्, 'आपत्यस्य च तद्धितेऽनाति' इति यलोपः । तदनन्तरं स्त्रियां 'टाप्' । विक्षेपः—वृत्तौ पराधिक्षेपः इति पाठः । अस्यार्थः परावमानः निन्दा वा । तदवेतः—अवेतः = अव √ इण् (गतौ) + क्त । अस्यार्थः ज्ञानम्, प्राप्तिश्च ।

होत्राभ्यश्छः ॥१३५॥

होत्राशब्द ऋत्विग्विशेषवचनः । होत्राभ्य ऋत्विग्विशेष-वाचिभ्यश्छ प्रत्ययो भवति भावकर्मणोः । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मित्रावरुणीयम् ।

होत्रा-√ हु + त्रन् + टाप् स्वभावतोऽयं स्त्रीलिङ्गः । अस्यार्थः ऋत्विजां वाचकः । अच्छावाकीयम्—अच्छा = विष्णुः । मित्रावरुणीयम्—मित्रावरुणयोर्भावः कर्म वा ।

ब्रह्मणस्त्वः ॥१३६॥

ब्रह्मशब्दाद् होत्रावाचिनस्त्व प्रत्ययो भवति भावकर्मणोः । ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् । नञ्स्नञोरधिकारः समाप्तः ।

प्राक्क्रीताच्छताच्च सर्वभूमि सप्तनो मासात्तस्मै प्रभवति न नञ्पूर्वात्षोडश (१३६) ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
पञ्चमाध्यायस्यप्रथमः पादः ।

होत्राभ्य इत्यनुवर्तते । 'त्व' विधानेनात्र न तल् ।

पञ्चमाध्यायस्यास्मिन् प्रथमे पादे प्राक्क्रीताच्छः, शताच्च ठन्यतावशते, सर्वभूमिपृथिवीभ्याम्…., सप्तनोऽञ् छन्दसि मासाद्वयसि, तस्मै प्रभवति, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा न नञ्पूर्वात् इत्यत आरभ्य षोडश सूत्राणीति संकलनेन षट्त्रिंशदुत्तरशतं (१३६) सूत्राणि सन्ति ।

इति काशिकावृत्तिसारसुधायां पञ्चमाध्यायस्य प्रथमः पादः ।

●

अथ पञ्चमाध्याये द्वितीयः पादः

धान्यानां भवने क्षेत्रे खञ् ॥१॥

धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवने वाच्ये खञ् । तच्चेद् भवनं क्षेत्रम् । भवन्त्यत्र भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् । बहुवचनं स्वरूपविधिनिरासार्थम् ।

भवन्ति = जायन्ते धान्यानीति भवनम् — अधिकरणे ल्युट् । मौद्गीनम् — मुद्ग + खञ्, खस्य 'ईन' आदेशः । ञित्वात् आदेरचो वृद्धिः ।

व्रीहिशाल्योर्ढक् ॥२॥

आभ्यां ढक् भवनेऽभिधेये । व्रीहीणां भवनं क्षेत्रं व्रैहेयम् । शालेयम् ।

धान्यानामिति निर्देशात् व्रीहिशाल्योः षष्ठी समर्थ-विभक्तिः । व्रैहेयम्— व्रीहि + ढक्, ढस्य 'एय' आदेशः । कित्वाद् वृद्धिः ।

यवयवकषष्टिकाद्यत् ॥३॥

यवादिभ्यो यत्प्रत्यो भवति । खञोऽपवादः । यव्यम् । यवक्यम् । षष्टिक्यम् ।

यव्यम्—यवानां भवनं क्षेत्रम् । यवकोऽपि यवप्रकारः । षष्टिकाः षष्टिरात्रेण पच्यन्ते इति धान्यविशेषाः ।

फा० —६

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥४॥

तिलादिभ्यो वा यत् । पक्षे खञ् । तिल्यम् / तैलीनम् इत्यादि ।

तिल्यम्—तिलानां भवनं क्षेत्रम् इति । एवम् माषाणां भवनं क्षेत्रम् **माष्यम् / माषीणम्** । उमा = अतसी । भङ्गा = विजया, शणाख्यं धान्यञ्च । अणुः–सूक्ष्मधान्यम् 'चीना' इति भाषायाम् ।

सर्वचर्मणः कृतः खखञौ ॥५॥

सर्वचर्मन् शब्दात् तृतीयासमर्थात् कृत एतस्मिन्नर्थे ख-खञौ प्रत्ययौ भवतः । सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन सम्बध्यते न चर्मणा । तत्रायमसमर्थसमासो द्रष्टव्यः । सर्वश्चर्मणा कृत एतस्मिन् वाक्यार्थे वृत्तिः । सर्वचर्मीणः / सार्वचर्मीणः ।

सर्वचर्मीणः–अस्मात्तद्धितपदात् अयं सर्वोऽपि पदार्थः चर्मणा कृत इत्यर्थोऽभिव्यज्यते । अर्थात् कृतस्यात्र सर्वत्वमभीष्टम् न तु चर्मणः । चर्मणा सामर्थ्याभावेऽपि समासः कृतः । खञ् प्रत्यये वृद्धिरिति विशेषः ।

यथामुखसम्मुखस्य दर्शनः खः ॥६॥

यथामुख-सम्मुख इत्याभ्यां षष्ठीसमर्थाभ्यां दर्शन एतस्मिन्नर्थे 'ख' प्रत्ययः । दर्शन आदर्शादिः । यथामुखस्य दर्शनः यथामुखीनः । सम्मुखीनः ।

आदर्शादिः–आदि शब्देन जलपात्रादि प्रतिबिम्बाश्रयो गृह्यते । **यथामुखस्य**–वृत्तौ यथामुखम् इति पाठः 'यथामुख' शब्दे कृद्योगलक्षणा षष्ठी भवति । **सम्मुखीनः**–समं = सर्वं मुखम्–सम्मुखम् तस्य दर्शनः ।

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥७॥

व्याप्नोतीति प्रत्ययार्थः । परिशिष्टं प्रकृतिविशेषणम् । सर्वादेः

प्रातिपदिकात् पथ्याद्यन्ताद् द्वितीयासमर्थाद् व्याप्नोतीत्येतस्मिन्नर्थे ख प्रत्ययः । सर्वपथीनः ।

'तत्' द्वितीया समर्थविभक्तिः । पथ्याद्यन्ताद्–पथिन्, अङ्ग, कर्मन्, पत्त्र, पात्र इत्येवमन्तात् । सर्वपथीनः–सर्वश्चासौ पन्थाः इति सर्वपथम् व्याप्नोति इति । रथः इति शेषः । एवं सर्वाङ्गीणस्तापः । सर्वकर्मीणः पुरुषः । पत्त्रं वाहनम् सर्वपत्त्रीणः सारथिः । सर्वपात्रीणः ओदनः ।

आप्रपदं प्राप्नोति ॥८॥

आप्रपदशब्दाद्द्वितीयासमर्थादुक्तार्थे खः । आप्रपदीनः पटः ।

उक्तार्थे—'प्राप्नोति' इत्यर्थे । व्याप्तिः—साकल्येन सम्बन्धः । प्राप्तिस्तु सम्बन्धमात्रमिति द्वयोर्विशेषः । आप्रपदम्—पदाग्रान्तम् प्रपदम्—पादस्याग्रम् 'आङ्' मर्यादायाम्, अव्ययीभावः । यथा च हर्षचरिते-आप्रपदीनां कण्ठे यमदोलामिव गुणकुसुममालामाबध्नाम् ।

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥९॥

अनुपदादिशब्देभ्यो द्वितीयासमर्थेभ्यो यथासंख्यं बद्धा, भक्षयति, नेय एतेष्वर्थेषु 'ख' प्रत्ययः । अनुरायामे सादृश्ये वा । अनुपदं बद्धा अनुपदीना उपानत् । पदप्रमाणेत्यर्थः । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयः—प्रदक्षिणम् । अनयः—प्रसव्यम् । अयानयं नेय इति अयानयीनः शारः । फलकशिरसि स्थित इत्यर्थः ।

द्यूते आत्मीयशाराणां पदानि परकीयैः शारैः यस्मिन् गतिविशेषे नाक्रम्यन्ते सोऽनयानयः ।

परोवरपरम्परपुत्रपौत्रमनुभवति ॥१०॥

श्रीकृष्णो जयति । परोवर, परम्पर, पुत्रपौत्र एभ्यो द्वितीया-समर्थेभ्योऽनुभवतीत्येतस्मिन्नर्थे 'ख' प्रत्ययो भवति । 'परोवर' इति परस्योत्ववचनम् । परांश्चावरांश्चानुभवति परोवरीणः । परपरतराणां

च परम्परभावो निपात्यते । परांश्च परतरांश्चानुभवति परम्परीणः । पुत्रपौत्रीणः ।

जयति—पृष्ठस्यादौ मङ्गलाचरणम् । परस्य-परशब्दस्य अवरस्यादेः उत्वं पर + उवर । 'आद्गुणः' इति गुणे 'परोवर' इति । पुत्रपौत्रीणः- पुत्रपौत्रान् अनुभवति । 'परम्परा' इति तु अव्युत्पन्नं प्रातिपदिकम् ।

अवारपारात्यन्तानुकामं गामी ॥११॥

अवारपार, अत्यन्त, अनुकाम एभ्यो द्वितीयासमर्थेभ्यो गामीत्यर्थे खः । गमिष्यति गामी । भविष्यति गम्यादयः । 'अकेनोर्भविष्यती' ति षष्ठीनिषेधः । अवारपारीणः ।

* (वा०) संहताद्व्यस्ताद्विपर्यस्तादपीष्यते । अवारीणः । पारीणः । पारावारीणः । अत्यन्तीनः । अनुकामं गामी अनुकामीनः । यथेष्टं गन्तेत्यर्थः ।

गामी—'आवश्यकाधमर्ण्ययोर्णिनिः' इति 'णिनिः' भविष्यदर्थे । षष्ठीनिषेधः—तेन 'द्वितीयासमर्थेभ्यः' इत्याह । अवारपारम्-अवारस्य पारम् इति षष्ठीसमासः । अवारञ्च पारञ्चेति अवारपारम् द्वन्द्वो वा । अवारं पूर्वतटम् पारम् उत्तरतटम् (आरपार इति भाषायाम्) विभाषया पारस्यापि पूर्वनिपातः 'पारावार' मिति । नद्यादिपारगतपुरुषं अवारपारीणमाहुः । अत्यन्तीनः—अन्तस्याभावोऽत्यन्तम् । अत्यन्तंगामी, भृशं गन्तेत्यर्थः । अनुकामम्—कामः = इच्छा तस्य सदृशम् कामानुरूपम् इत्यर्थः ।

समांसमां विजायते ॥१२॥

समांसमामिति वीप्सा । सुबन्तसमुदायः प्रकृतिः । 'विजायते' इति प्रत्ययार्थः । विजायते-गर्भं धारयतीत्यर्थः । गर्भधारणेन सकलापि समा व्याप्यत इति अत्यन्तसंयोगे द्वितीया । समांसमां विजायते समांसमीना गौः ।

वीप्सा—'नित्यवीप्सयोः' इति वीप्सायां द्विर्वचनम् । वि √ जन गर्भधारणेऽपि वर्तते धातूनामनेकार्थत्वात् । समाम् इति द्वितीयान्तं पदम्

द्वित्वेन समांसमाम् इति भवति । द्वितीया — 'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन ।

अद्यश्वीनावष्टब्धे ॥१३॥

'अद्यश्वीन' इति निपात्यते अवष्टब्धे-आसन्नेऽभिधेये । 'विजायते' इति प्रत्ययार्थः । अद्य वा श्वो वा विजायते अद्यश्वीना गौः । केचित्तु 'विजायते' इति नानुवर्त्तयन्ति । अद्यश्वीनं मरणम् ।

अभिधेये–'प्रसवे' इति तात्पर्यम् । अद्यश्वीना–अद्य वा श्वो वा विजायते इति जननमासन्नम् । मरणम्–अद्य वा श्वो वेत्यर्थः ।

आगवीनः ॥१४॥

इति निपात्यते । गोराङ्पूर्वात् आ तस्य गोः प्रतिदानात् कर्मकारिणि 'ख' प्रत्ययो निपात्यते । आगवीनः कर्मकरः । गवा भृतः कर्म करोति आ तस्य गोः प्रत्यर्पणात् ।

प्रतिदानम्—प्रत्यर्पणम् । वृत्तौ 'प्रतिपादनात्' इति पाठः मुद्रण-त्रुटिः । 'आ गोः' इत्यव्ययीभावः । आगव शब्दात् 'ख' प्रत्ययः भृतः—वेतनोपजीवी ।

अनुग्वलङ्गामी ॥१५॥

गोः पश्चादनुगु । अनुगुशब्दादलङ्गाम्यर्थे खः । अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालः ।

अनुगु–पश्चादर्थे अव्ययीभावः । अलमिति पर्याप्तार्थकम् । एतत् क्रियाविशेषणम् ।

अध्वनो यत्खौ ॥१६॥

अध्वनो द्वितीयासमर्थादलङ्गाम्यर्थे यत्खौ । अध्वानम् अलङ्गामी अध्वन्यः / अध्वनीनः । 'आत्माध्वानौ खे' इति प्रकृतिः ।

प्रकृतिः–प्रकृतिभावः तेन 'नस्तद्धिते' इत्यनेन 'न' लोपो न भवति । अध्वन्यः–अत्रापि 'ये चाभावकर्मणोः' इति प्रकृतिभावः ।

अभ्यमित्राच्छ च ॥१७॥

अभ्यमित्रशब्दाद् द्वितीयासमर्थादलङ्गाम्यर्थे छः । चात् यत्खौ च । अभ्यमित्रम् अलङ्गामी अभ्यमित्रीयः / अभ्यमित्र्यः / अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ।

अभ्यमित्रम्—अमित्रस्याभिमुखम् अभ्यमित्रम् 'लक्षणेनाभिमुख्ये' इत्यव्ययीभावः । क्रियाविशेषणमेतत् ।

गोष्ठात् खञ् भूतपूर्वे ॥१८॥

गोः स्थानं गोष्ठम् । गोष्ठशब्दाद् भूतपूर्वोपाधिकात् स्वार्थे । खञ् । गौष्ठीनो देशः ।

गौष्ठीनः—भूतपूर्वो गोष्ठ इत्यर्थः । वृत्तौ 'ख' प्रत्ययः, 'गोष्ठीनो देशः' इति च मुद्रणदोष एव ।

अश्वस्यैकाहगमः ॥१९॥

अश्वशब्दात् षष्ठीसमर्थात् एकाहगम एतदर्थे खञ् । अश्वस्यैकाहगमोऽध्वा आश्वीनः ।

एकम् अहः एकाहः । एकाहेन गम्यते, इति एकाहगमः । गम् + अप् । आश्वीनः—एतावान् अध्वा अश्वस्य एकाहगमोऽस्तीत्यर्थः ।

शालीनकौपीने अधृष्टाकार्ययोः ॥२०॥

शालीन-कौपीनशब्दौ निपात्येते । यथासंख्यम् अधृष्टे, अकार्ये चाभिधेये । शालाप्रवेशम् अर्हति । खञ् प्रत्ययः, उत्तरपदलोपश्च निपात्यते । कूपावतारमर्हति कौपीनं पापम् ।

उत्तरपदलोपः—शालाप्रवेशे प्रवेशस्य, कूपावतारे अवतारस्य लोपो ज्ञेयः । शालीनो जडः—यः आद्रियमाणो जनैस्तत्र स्थातुं न शक्तः सन् शालां प्रविशति । अप्रगल्भः इत्यर्थः । कौपीनम्=पापम्—अकार्यं गुप्तं पुरुषलिङ्गमपि । तदाच्छादनवस्त्रमपि कौपीनं कथ्यते ।

व्रातेन जीवति ॥२१॥

व्रातशब्दात्तृतीयासमर्थात् 'जीवति' इत्यर्थे खञ् । नाना-जातीयाः सङ्घाः व्राताः । तेन जीवति व्रातीनः ।

नाना" व्राताः—अनियतवृत्तयः उत्सेधजीविनः इति शेषः । उत्सेधः= शरीरम् तदायासेन ये जीवन्ति ते । यथा भाषायां कुली, रिक्शाचालक, मिल मज़दूर एषां सङ्घाः भवन्ति । एतेषु सङ्घेषु सर्वजातीयाः ब्राह्मणादयः सम्मिलिता भवन्ति । व्रातानां कर्म व्रातम् भारवहनादि । व्रातीनः—कुलीसंघ या ठेलाचालक संघ का सदस्य कुली ।

साप्तपदीनं सख्यम् ॥२२॥

साप्तपदीनम् इति निपात्यते सख्यं चेत् । सप्तभिः पदैरवाप्यते साप्तपदीनम् सख्यम् ।

साप्तपदीनम्—सप्तपद + खञ् । सख्यं जनाः साप्तपदीनमाहुः । कुमारसम्भवेऽपि ।

प्रयुक्तसत्कारविशेषमात्मना न मां परं सम्प्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रिसङ्गतम् मनीषिभिः साप्तपदीनमुच्यते ॥ (५/३९)

हैयङ्गवीनं संज्ञायाम् ॥२३॥

'हैयङ्गवीनम्' इति निपात्यते संज्ञायाम् । ह्यो गोदोहस्य 'हियङ्गु' आदेशः । तस्य विकारे खञ् । ह्यो गोदोहस्य विकारः हैयङ्गवीनम् । घृतसंज्ञा ।

दुह्यते इति दोहः = क्षीरम् गोः दोहः गोदोहः । ह्यः पूर्वदिने यो गोदोहः स ह्योगोदोहः 'सुप्सुपा' इति समासः । हियङ्गु—हियम् + गु इति अनुस्वारपरसवर्णसन्धिं कृत्वा निर्देशः । हैयङ्गवीनम्—हियङ्गु + खञ्—पूर्वाचो वृद्धिः, उकारस्य गुणोऽवादेशश्च । 'हैयङ्गवीनम्' वस्तुतो घृतस्य पूर्वरूपं 'नवनीतम्' इति कथ्यते ।

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥२४॥

षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाक-

मूलयोरर्थयोः 'कुणप्, जाहच्' एतौ स्तः । पीलूनां पाकः पीलुकुणः । कर्कन्धूकुणः । कर्णस्य मूलम् कर्णजाहः । अक्षिजाहः ।

षष्ठीसमर्थेभ्यः—षष्ठयन्तेभ्यः इत्यर्थः । **पीलुकुणः**—पक्वं पीलुफलम् ।

पक्षात्तिः ॥२५॥

तस्येति षष्ठीसमर्थात् पक्षात् मूले वाच्ये तिः प्रत्ययः । मूलग्रहणमनुवर्तते न पाकग्रहणम् । एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते । पक्षतिः प्रतिपत् ।

न पाकग्रहणम्—मूले एव स्वरितत्वप्रतिपादनात् । **पक्षतिः**—पक्षस्य मूलम् । **प्रतिपत्**—एषा तिथिः पक्षस्य मूले भवति । पक्षिणश्च पक्षमूलेऽपि पक्षतिर्भवति ।

तेन वित्तश्चुञ्चुप्चणपौ ॥२६॥

तेनेति तृतीयासमर्थाद् वित्तार्थे एतौ । विद्याचुञ्चुः । विद्याचणः ।

एतौ—चुञ्चुप्, चणप् प्रत्ययौ । **वित्तः**—प्रतीतः ज्ञात इत्यर्थः । विद्यया वित्तः इति विग्रहः ।

विनञ्भ्यां नानाञौ नसह ॥२७॥

वि, नञ् । आभ्यां यथासंख्यं ना, नाञ् एतौ स्तः असहार्थे पृथग्भावे वर्तमानाभ्यां वि-नञ्भ्यां स्वार्थे एतौ । विना । नाना ।

नसह इति प्रकृतेः वि, नञ् इत्यनयोः विशेषणम् । **नाना**—नञ् + नाञ् । ञित्वाद्वृद्धिः ञित्स्वरश्च ।

वेः शालच्छङ्कटचौ ॥२८॥

विशब्दादेतौ । ससाधनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययौ । विगते शृङ्गे विशाले । विशङ्कटे । तद्योगाद्गौरपि ।

गौरपि–विशालः, विशङ्कटः इति शेषः । तद्योगात्—विशाल-शृङ्गयोगात् । वस्तुतस्तु गुणशब्दानामेषां व्युत्पत्तिमात्रमेतत् । न प्रकृतिप्रत्ययार्थयोराग्रहः ।

संप्रोदश्च कटच् ॥२९॥

चाद्वेश्च । सङ्कटम् । प्रकटम् । उत्कटम् । विकटम् ।

सम्–प्र–उद्–वि, इत्येतेभ्यः कटच् । अत्र स्थले वृत्तौ वार्तिकैः बहवः शब्दाः व्युत्पादिताः तेषु कतिपये प्रसिद्धाः उद्धृयन्ते (प्रकृतिप्रत्ययनिर्देशोऽपि कृतः) । रजसि कटच्–अलाबूनां रजः अलाबूकटम् । एवं तिलकटम् । संघाते कटच्—अवीनां संघातः अविकटम् । गोष्ठम्—गवां स्थानं गोगोष्ठम् ।

विस्तारे पटच्–अवीनां विस्तारः अविपटम् । द्वित्वे गोयुगच्–द्वौ उष्ट्रौ इति उष्ट्रगोयुगम् । विकारे स्नेहे तैलच्–एरण्डस्य विकारः एरण्डतैलम् । भवने क्षेत्रे शाकटशाकिनौ—इक्षूणां भवनं क्षेत्रम् इक्षुशाकटम् । इक्षुशाकिनम् ।

अवात्कुटारच्च ॥३०॥

चात्कटच् । अवकुटारम् । अवकटम् ।

अव = अवाचीनम्—अप्रसिद्धमित्यर्थः ।

नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥३१॥

अवादित्येव । नासिकासम्बन्धिनि नतेऽभिधेये टीटच्, नाटच्, भ्रटच् एते प्रत्यया भवन्ति संज्ञायां विषये । नासिकाया नतम् अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगात्पुरुषोऽपि ।

नतम्—नमनम् । पुरुषोऽपि–अवटीटः । अवनाटः । अवभ्रटः इत्यर्थः । यस्य नासिका नता स पुरुष इति भावः ।

नेर्बिडज्बिरीसचौ ॥३२॥

'नते नासिकायाः' इत्यादि सर्वं वर्तते । निबिडम् । निबिरीसम् । तद्योगात् पुरुषोऽपि ।

निबिडम्-घनमित्यर्थः। पुरुषोऽपि-निबिडः, निबिरीसः। निबिडाः केशाः, निबिडं वस्त्रम् इति नासिकया तुल्यत्वात् ज्ञेयम्।

इनच्पिटच्चिकचि च ॥३३॥

निशब्दान्नासिकाया नतेऽभिधेये इनच्-पिटच् एतौ स्तः। तद्योगे च नि शब्दस्य यथासंख्यं चिक, चि एतावादेशौ स्तः। चिकिनः। चिपिटः।

* (वा०) क प्रत्ययश्चिक् च प्रकृत्यादेशो वाच्यः। चिक्कः।

* (वा०) क्लिन्नस्य चिल्ल-पिल्ल लश्चास्य चक्षुषी। क्लिन्नस्य चिल्ल, पिल्ल एतावादेशौ स्तः लश्च प्रत्ययः अस्य चक्षुषी एतस्मिन्नर्थे। चिल्लः। पिल्लः।

* (वा०) चुलादेशश्च। चुल्लः। चक्षुषोरेवाभिधाने प्रत्यय इष्यते। तद्योगात्तु पुरुषस्तथोच्यते।

चिकिनः—नासिकायाः नतम् नासिका + इनच् (चिक + इन) अकारलोपे सति चिकिनः। चिपिटः—चि + पिटच्। तद्योगात् पुरुषोऽपि चिकिनः, चिपिटश्च। चिल्ल, पिल्ल—वृत्तौ 'चिल्, पिल्' इति पाठः स एव साधुः।

उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥३४॥

आभ्यां क्रमेणासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन्। संज्ञाधिकारात् पर्वतस्यैवेष्यते। उपत्यका। अधित्यका। प्रत्ययस्थात्कादितीत्वं न संज्ञाधिकारादेव।

'उप' इत्यस्यासन्नमर्थः 'अधि' इत्यस्यारूढमिति। संज्ञा ·· इष्यते —'नते नासिकायाः ····' इति सूत्रात् संज्ञाग्रहणमनुवर्त्तते, तेन पर्वतविषयमेवासन्नारूढं गृह्यते। उपत्यका—पर्वतस्यासन्नम् उप + त्यकन् (नलोपः) + टाप्। अधित्यका—पर्वतस्यारूढम् अधि + त्यकन् + टाप्। संज्ञाधिकारादेव—उपत्यका, अधित्यका इति संज्ञाऽस्ति। इत्वे कृते सा न प्रतीयते इति भावः।

कर्मणि घटोऽठच् ॥३५॥

सप्तमीसमर्थात् कर्मणः 'घटते' इत्यर्थे अठच् । घटते इति घटः । कर्मणि घटते कर्मठः ।

घटः — √ घट् + अच् । कर्मठः - कर्मन् + अठच् । पुरुषः इति भावः ।

तदस्य सञ्जातं तारकादिभ्य इतच् ॥३६॥

प्रथमासमर्थेभ्यः तारकादिभ्यः षष्ठ्यर्थे इतच् प्रत्ययः । सञ्जातमिति प्रकृतिविशेषणम् । तारकितं नभः । पुष्पितो वृक्षः ।

तारकितम्-तारकाः सञ्जाता अस्य नभसः इति । प्रकृतेः—नभसः विशेषणत्वात् नपुंसकत्वम् । पुष्पितः—पुष्पाणि सञ्जातान्यस्य वृक्षस्य ।
❀ (वा०) गर्भादप्राणिनि । गर्भिताः शालयः । प्राणिवाचके तु गर्भिणी गौः । तारकादिराकृतिगणः । 'सञ्जातम्' इत्यत्र भूतकालो न विवक्षितः, तेन वर्त्तमाने भवति ।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥३७॥

प्रथमासमर्थात् षष्ठ्यर्थे द्वयसच्, दघ्नच्, मात्रच् एते भवन्ति । यत्तत्प्रथमासमर्थं प्रमाणं चेत्तद् भवति । उरुद्वयसम् । उरुदघ्नम् । उरुमात्रम् ।

प्रथमश्च द्वितीयश्च उर्ध्वमाने मतौ मम ।
मात्रच् अविशेषेण प्रस्थमात्रमित्यपि भवति ।

❀(वा०) प्रमाणे लुग्वाच्यः । प्रमाणशब्दा ये प्रसिद्धास्तेभ्य उत्पन्नस्य प्रत्ययस्य लुग्भवति । दिष्टिः । वितस्तिः ।

❀(वा०) द्विगोर्नित्यम् । द्विवितस्तिः ।

उरुद्वयसम्-उरुः प्रमाणमस्येति विग्रहः । एवम् उरुदघ्नम् । उरुमात्रम् इत्यपि । प्रथमश्च द्वितीयश्च—द्वयसच् दघ्नच् इत्येतौ । लुक्—वृत्तौ 'ल' इति पाठः । दिष्टिः—अत्र जातस्य मात्रचो लुक् । एवं वितस्तिरपि । द्विवितस्तिः—द्वे वितस्ती प्रमाणमस्य । अत्रेमानि वार्तिकान्यपि सन्ति—

(१) डट् स्तोमे वक्तव्यः । पञ्चदश मन्त्राः परिमाणमस्येति पञ्चदशः स्तोमः ।

(२) प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः । शमं स्याद्वा न वा शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् ।

(३) वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् । तावदेव तावद्द्वयसम् तावन्मात्रम् ।

पुरुषहस्तिभ्यामण् च ॥३८॥

पुरुषहस्तिभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिभ्यां षष्ठ्यर्थेऽण् । चात्तेऽपि । पौरुषम् । पुरुषद्वयसमित्यादि । हास्तिनमित्यादि । द्विगोर्नित्यं लुक् । द्विपुरुषमुदकम् । त्रिहस्ति ।

इत्यादि—पुरुषदघ्नम् / पुरुषमात्रम् । हस्तिद्वयसम् / हस्तिदघ्नम् / हस्तिमात्रम् ।

यत्तदेतेभ्यः परिमाणे वतुप् ॥३९॥

एभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिकेभ्यः षष्ठ्यर्थे वतुप् । यत्परिमाणमस्येति यावान् । तावान् । एतावान् । प्रमाण इति वर्तमाने परिमाणग्रहणं तयोर्भेदात् ।

डावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते ।
मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः ॥

*(वा०) वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् । न त्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।

डावता··· डावतोः । अयमर्थः—आयामस्तु प्रमाणं स्यात् परिमाणं तु सर्वतः' इति वचनात् भिन्नार्थयोः प्रमाणपरिमाणशब्दयोः सत्त्वात् तयोः पृथक् निर्देशः कृतः । तेन मात्रच् इत्यादीनां प्रत्ययानां बाधा न भवति । यावान्—यावान् अध्वा तावती रज्जुः इति प्रमाणे भवति । एवं यावान् कालः, यावदन्नमित्यादि प्रयोगाः परिमाणेऽपि । न त्वा··· जनिष्यते—एतदग्रे

त्वावतः पुरुवसो, यज्ञं विप्रस्य मावतः । त्वावतः, मावतः इति त्वावान् (त्वावत्) मावान् (मावत्) इत्यनयोः षष्ठ्यन्तं रूपम् । त्वत्सदृशस्य, मत्सदृशस्येत्यर्थः ।

किमिदम्भ्यां वो घः ॥४०॥

आभ्यां परस्य वतुपो घ आदेशो भवति । योगविभागाद् वतुपं विधाय पश्चाद् वो घो विधीयते । कियान् । इयान् ।

वतुपः—'वः' इति शेषः । तेन वकारमात्रस्य घादेशे घकारस्य च 'इय' आदेशे 'इदंकिमोरीश्की' इति 'किम्' इत्यस्य 'की' 'इदम्' इत्यस्य च 'ईश्' आदेशः, 'यस्येति च' इति सूत्रेण ईकारलोपः । कियत् इति इयत् इति च भवति । प्रथमैकवचने कियान् । इयान् इति ।

किमः संख्यापरिमाणे डति च ॥४१॥

संख्यापरिच्छेदे वर्तमानात्प्रथमासमर्थात् किमः षष्ठ्यर्थे डति प्रत्ययः । चाद्वतुप्, वस्य च घत्वम् । का संख्या एषां विप्राणां कति । कियन्तः ।

परिमाणं परिमितिः संख्यापरिच्छेदः संख्यायाः सीमेत्यर्थः । कति—किम् + डति । कियन्तः—किम् + वतुप् । संख्याप्रश्ने बहुवचनमेव प्रयुज्यते इति तथोदाहृतम् ।

संख्याया अवयवे तयप् ॥४२॥

संख्याया अवयवे वर्तमानायाः षष्ठ्यर्थे तयप् । अवयवी प्रत्ययार्थः । पञ्च अवयवा अस्येति पञ्चतयम् । चतुष्टयी रज्जुः ।

प्रत्ययार्थः—अवयवानां सम्बन्धात् सामर्थ्यात् स एव भवितुमर्हति । चतुष्टयी—चत्वारोऽवयवा अस्या इति चतुर + तयप् । रकारस्य विसर्गः → सकारः → षकारः, तकारस्य च ष्टुत्वेन टकारः । स्त्रियां 'टिड्ढाण्.... तयप्....' इत्यादिना ङीप् ।

द्वित्रिभ्यां तयस्यायज्वा ॥४३॥

पूर्वेण विहितस्य तयस्य आभ्यां परस्य वा अयजादेशः । द्वावयवावस्य द्वयम् / द्वितयम् । तयग्रहणं स्थानि-निर्देशार्थम् । अन्यथा प्रत्ययान्तरमयज् विज्ञायेत । तत्र को दोषः ? द्वयी गतिरिति तयप्-निबन्धन ईकारो न स्यात् । जसि, प्रथमचरम' इतिविधिर्न स्यात् । द्वये / द्वयाः ।

द्वयम्—द्वौ अवयवौ अस्य । द्वि + ततप् → अयच् । ईकारः—ङीप् प्रत्ययः तयपः आदेशे तु 'टिड्ढाण्…' इत्यादिना 'ङीप्' भवति । द्वये, द्वयाः—विकल्पेन जसः शी ।

उभादुदात्तो नित्यम् ॥४४॥

उभशब्दात्परस्य तयस्य नित्यम् अयजादेशः । स स चोदात्तः । उभशब्दो यदि लौकिकी संख्या, ततः पूर्वेणैव तयप आदेशविधानार्थं वचनम् । अथ न संख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते । उभयो मणिः । उभये देवमनुष्याः ।

लौकिकी संख्या—द्वि-त्रि इत्यादिवत् । उभयो मणिः—उभौ पीतलोहितौ अवयवौ अस्येति विग्रहः । उभये देवमनुष्याः—उभौ देवराशिः, मनुष्यराशिश्चेति अवयवौ येषामिति विग्रहः तेनात्र बहुवचनम् ।

तस्मिन्नधिकमिति दशान्ताड्डः ॥४५॥

प्रथमासमर्थात् सप्तम्यर्थे दशान्तात्प्रातिपदिकात् ड प्रत्ययः, यत्तत्प्रथमासमर्थमधिकं चेद्भवति । इतिकरणस्ततश्चेद् विवक्षा । एकादश अधिका अस्मिन् शते एकादशं शतम् । प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे प्रत्यय इष्यते । एकादश कार्षापणा अधिका अस्मिन् कार्षापणशते एकादशं कार्षापणशतमिति । नेह-एकादश माषा अधिका अस्मिन् कार्षापणशते इति ।

एकादशम्—एकश्च दश चेति एकादशन् + ड ।

इष्यते — प्रत्ययार्थयोस्तुल्यजातीत्वमित्यर्थः । नेह ...... इति—अत्र कार्षापणशतं प्रत्ययार्थः । प्रकृत्यर्थस्तु एकादश माषाः ।

एकादशं शतसहस्रम्—अस्यार्थः एकादश शतान्यधिकान्यस्मिन्निति, एकादश सहस्राण्यधिकान्यस्मिन्निति वा प्रकरणवशादुन्नेयम् । तदुक्तम् —

अधिके समानजाताविष्टं शतसहस्रयोः ।
यस्य संख्या तदाधिक्ये डः कर्तव्यो मतो मम ॥

शदन्तविंशतेश्च ॥४६॥

शदन्ताद् विंशतेश्च डः उक्तेऽर्थे । त्रिंशदधिका अस्मिन् शते त्रिंशं शतम् । विंशं शतम् ।

त्रिंशम्–त्रिंशत् + ड । डित्वाट्टिलोपः । विंशम्–विंशति + 'ड' ति इत्यस्य लोपः । एवम् एकत्रिंशम् । एकविंशम् च ।

संख्याया गुणस्य निमाने मयट् ॥४७॥

प्रथमासमर्थात् संख्यावाचिनः षष्ठ्यर्थे मयट् । यत्तत्प्रथमासमर्थं गुणस्य निमाने वर्तते । गुणो भागः । निमानं मूल्यम् । गुणो येन निमीयते मूल्यभूतेन सोऽपि भाग एव । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । त्रिमयम् ।

गुणस्येति कर्मणि षष्ठी । भाग एव–सामर्थ्यादिति शेषः । उदश्वित्–अर्धजलयुक्तघालम् । अर्धोदकमुदश्वित् स्यात् इत्यमरः । द्विमयम्...यवानाम्–अस्य उदश्वितो द्वौ भागौ यवौ मूल्यमित्यर्थः । यदि कश्चिदेकभागम् उदश्वित् क्रीणाति तदा तेन तस्य द्वौ भागौ यवौ विक्रेत्रे देये । तेन सामानाधिकरण्यं भवति द्विमयमुदश्वित् । इह न भवति–द्वौ भागौ यवानां त्रय उदश्वित इति । प्रत्ययार्थात् प्रकृत्यर्थस्याधिक्यं विवक्षितम् ।

ॐ (वा०) निमेये चापि दृश्यते । यथा उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्येति द्विमया यवा उदश्वितः ।

तस्य पूरणे डट् ॥४८॥

षष्ठीसमर्थात् संख्यावाचिनः पूरणार्थे डट् । पूर्यतेऽनेनेति पूरणः ।

एकादशानां पूरणः एकादशः । यस्मिन्नुपसञ्जाते अन्या संख्या सम्पद्यते स प्रत्ययार्थः । इह न–पञ्चानां मुष्टिकानां पूरणो घट इति ।

पूरणः–येन संख्या पूर्यते स तस्याः पूरणः । एकादशः–गणनायां येन एकादश संख्या पूर्यते सः (ग्यारहवाँ इति भाषायाम् ।) उपसञ्जाते– विहिते इत्यर्थः ।

नान्तादसंख्यादेर्मट् ॥४९॥

नान्तात् संख्यावाचिनोऽसंख्यादेः परस्य डटो मडागमः । पञ्चानाम् पूरणः पञ्चमः ।

डटः–'डट्' इत्यस्य षष्ठ्यन्तं रूपम् । 'मट्' डटः प्राग् भवति । तेन पञ्च + मट् + डट्, अनुबन्धलोपे टिलोपे च पञ्चमः ।

थट् च छन्दसि ॥५०॥

प्राग्वत् छन्दसि । पञ्चथः ।

चकारात् 'मट्' इत्यपि । उदाहरणम् — पञ्चथमिन्द्रियं– स्यापाक्रामत् ।

षट्कतिकतिपयचतुरां थुक् ॥५१॥

षडादीनां डटि परतस्थुगागमः । कतिपयशब्दो न संख्या । ज्ञापकात् डट् । षण्णां पूरणः षष्ठः । कतिथः । कतिपयथः । चतुर्थः ।

*(वा०) चतुरश्छयतावाद्यक्षरलोपश्च । तुरीयः / तुर्यः ।

षडादीनाम्–षड्, कति, कतिपय, चतुर् इत्येतेषाम् । 'डट्' इत्यनुवर्तते, तस्मिन् परतः एषां थुक् । षष्ठः–षष् + थुक् + डट्–ष्टुत्वे सति षष्ठः । तुरीयः, तुर्यः—चकारस्य लोपः ।

बहुपूगगणसङ्घस्य तिथुक् ॥५२॥

एषां डटि परतस्तिथुगागमः । पूगसङ्घयोरसंख्यावाचित्वात्

इदमेव ज्ञापकं डटो भावस्य । बहुतिथः । पूगतिथः । गणतिथः । सङ्घतिथः ।

बहुतिथः–बहु + तियुक् + डट् ।

वतोरिथुक् ॥५३॥

वतोर्डटि परत इथुगागमो भवति । यावतां पूरणः यावतिथः । तावतिथः । एतावतिथः ।

यावतिथः—'आ सर्वनाम्नः' इत्यनेन आत्वम् । एवं सर्वत्र ।

द्वेस्तीयः ॥५४॥

द्वेस्तीयः स्यात्तस्य पूरण एतस्मिन् विषये । द्वयोः पूरणं द्वितीयम् ।

तीयः—प्रत्ययो भवति नतु 'डट्' इत्यस्यादेशः तेन द्वितीया इत्यत्र स्त्रियां 'टाप्' भवति । अन्यथा टित्वात् 'ङीप्' स्यात् ।

त्रेः सम्प्रसारणं च ॥५५॥

त्रेः तीयः प्रत्ययः उक्तेऽर्थे । तद्योगे च त्रेः सम्प्रसारणं भवति । त्रयाणां पूरणः तृतीयः । 'हलः' इति दीर्घत्वं न 'अणः' इति तत्रानुवर्तते 'ढ्लोपे....' इत्यतः, पूर्वेण णकारेण अण् ग्रहणम् ।

तृतीयः–रकारस्य सम्प्रसारणम् ऋकारः । दीर्घत्वं न–सम्प्रसारणस्य ऋकारस्येति शेषः । पूर्वेण—'अ इ उ ण्' इत्यत्र वर्तिना । न तत्र ऋकारस्य प्रवेशः इति भावः ।

विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥५६॥

विंशत्यादिभ्यः परस्य डटस्तमडागमोऽन्यतरस्यां भवति ।

विंशतितमः / विंशः । एकविंशतितमः / एकविंशः । विंशत्यादयो लौकिकाः संख्याशब्दाः गृह्यन्ते, न पंक्त्यादिसूत्रसन्निविष्टाः ।

पूरणाधिकारात् पूरणार्थे यो 'डट्' प्रत्ययः तस्य तमट् टित्त्वात् आदौ भवति । लौकिकाः—'विंशति' शब्दः, विंशतिश्च येषु व्याप्तस्ते एकविंशति-प्रभृतयः संख्यावाचिनः शब्दास्तेन एकविंशतितमः / एकविंशः इत्यादयः सिद्धयन्ति ।

नित्यं शतादिमासार्धमाससंवत्सराच्च ।।५७।।

शतादिभ्यो मासार्धमाससंवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमो भवति । मासादिभ्योऽस्मादेव ज्ञापकात् डट् । शतस्य पूरणः शततमः । सहस्रतमः इत्यादि । मासतमो दिवसः । अर्धमास-तमः । संवत्सरतमः । षष्ट्यादेरिति सिद्धे शतादिग्रहणं संख्याद्यर्थम् । एकशततमः । द्विशततमः ।

मासतमः—मासस्य पूरणः पौर्णमासी तिथिरित्यर्थस्तेनैव मासस्य पूरणात् ।

षष्ट्यादेश्चासंख्यादेः ।।५८।।

षष्ट्यादेः संख्याशब्दादसंख्यादेः परस्य डटो नित्यं तमडागमः । षष्टेः पूरणः षष्टितमः । सप्ततितमः ।

संख्यादेस्तु विकल्पेन तमट् भवति एकषष्टः / एकषष्टितमः ।

मतौ छः सूक्तसाम्नोः ।।५९।।

'मतौ' इति मत्वर्थ उच्यते । प्रातिपदिकान्मत्वर्थे 'छ' प्रत्ययः सूक्ते सामनि चाभिधेये । मत्वर्थग्रहणेन समर्थविभक्तिः । अच्छावाक शब्दोऽस्मिन्निति अच्छावाकीयम् । यज्ञायज्ञीयं । मित्रावरुणीयम् ।

अच्छावाकीयम्, मित्रावरुणीयम्—इत्युभयं सूक्तम् । यज्ञायज्ञीयम् इति साम । छस्य 'ईय' आदेशः ।

अध्यायानुवाकयोर्लुक् ॥६०॥

मत्वर्थ उत्पन्नस्य छस्य लुग् भवति अध्यायानुवाकयोरभिधेययोः । इदमेव लुग्वचनं ज्ञापकं प्रत्ययविधानस्य गर्दभाण्डशब्दोऽस्मिन्निति गर्दभाण्डोऽध्यायः । गर्दभाण्डीयः अनुवाको वा ।

'विकल्पेन लुगयमिष्यते' इति वचनात् गर्दभाण्डः / गर्दभाण्डीयः इत्युभयमपि भवति । एवं दीर्घजीवितः / दीर्घजीवितीयः इत्यादि ।

विमुक्तादिभ्योऽण् ॥६१॥

विमुक्तादिभ्योऽण् प्रत्ययः मत्वर्थे अध्यायानुवाकयोरभिधेययोः । वैमुक्तोऽध्यायः, अनुवाको वा । दैवासुरः इत्यादि ।

पूर्वसूत्रेण 'छ' प्रत्यये तस्य च विकल्पेन लुकि प्राप्ते सूत्रमिदम् 'अण्' विधानार्थम् । वैमुक्तः — विमुक्तशब्दोऽस्त्यस्मिन्निति । दैवासुरः–देवासुर शब्दोऽस्त्यस्मिन्निति ।

गोषदादिभ्यो वुन् ॥६२॥

गोषदादिभ्यो वुन् प्रत्ययः मत्वर्थे अध्यायानुवाकयोः । गोषदकः अध्यायोऽनुवाको वा । इषेत्वकः ।

गोषदकः—गोषदशब्दोऽस्मिन्नस्तीति गोषद + वुन् । 'वुन्' 'वु' इत्यस्य 'अक' आदेशः ।

तत्र कुशलः पथः ॥६३॥

सप्तमीसमर्थात् पथिन् शब्दात् कुशलार्थे वुन् । पथि कुशलः पथकः ।

पथकः—पथिन् + वुन् → अक टिलोपः ।

आकर्षादिभ्यः कन् ॥६४॥

आकर्षादिभ्यः सप्तमीसमर्थेभ्यः कुशलार्थे कन् । आकर्षे कुशलः आकर्षकः । त्सरुकः ।

त्सरुः–खड्गमुष्टिः । पदमञ्जरीकारस्तु आकषादिभ्यः इति रेफ-विहीनम् आकषं मत्वा 'आकषकः' इत्युदाहरति ।

धनहिरण्यात् कामे ॥६५॥

आभ्यां सप्तमीसमर्थाभ्यां कामे कन् । धने कामो धनको देवदत्तस्य । हिरण्यकः ।

कामः–इच्छा । धनविषये इच्छा इत्यर्थः ।

स्वाङ्गेभ्यः प्रसिते ॥६६॥

स्वाङ्गशब्देभ्यः सप्तमीसमर्थेभ्यः प्रसितार्थे कन् । प्रसितः प्रसक्तस्तत्पर इत्यर्थः । केशेषु प्रसितः केशकः । केशादिरचनायां प्रसक्त एवमुच्यते । केशनखकः ।

स्वाङ्गसमुदायस्योदाहरणं केशनखकः । एवं दन्तोष्ठकः इत्यपि । केशनखरचनायां, दन्तोष्ठशोभायां वा प्रसक्तः । प्रसितयोगे 'प्रसितोत्सुकाभ्यां तृतीया च' इति सप्तमी । अत्र केशशब्देन तत्स्थानीया रचनाक्रियोच्यते ।

उदराट्टगाद्यूने ॥६७॥

अस्मात्प्रसितार्थे टक् । आद्यून इति प्रत्ययार्थविशेषणम् । उदरेऽविजिगीषुर्भण्यते । यो बुभुक्षया बुसादीन् भक्षयति । उदरे प्रसित औदरिकः आद्यूनः ।

आद्यूनः—आ √ दिव् (अविजिगीषायाम्) + क्त । औदरिकः—उदर + ठक् ठस्य 'इक' आदेरचो वृद्धिश्च । बुभुक्षया अत्यन्तं पीडित इत्यर्थः । यश्च उदरपरिमार्जने प्रसितः स उदरकः उदर + कन् ।

सस्येन परिजातः ॥६८॥

कन् स्वर्यते न ठक् । सस्यशब्दात्तृतीयासमर्थात् परिजातार्थे कन् । सस्यशब्दोऽयं गुणवाची, परिः सर्वतोभावे वर्तते। यो गुणे सम्बद्धो, यस्य किञ्चिद् वैगुण्यं नास्ति तदभिधानम् । सस्येन परिजातः सस्यको मधुः । सस्यको मणिः । आकरशुद्ध इत्यर्थः ।

गुणवाची–न यवादिधान्यवाचीति तात्पर्यम् । **गुणे**–वृत्तौ 'गुणैः' इति पाठः । **सस्यकः**-सस्य + कन् । **मधुः**–वृत्तौ 'सीधुः' इति पठितः ।

अंशं हारी ॥६९॥

अंशाद् द्वितीयासमर्थाद् हारीत्यर्थे कन् । अंशं हारी अंशको मैत्रः । हारीत्यावश्यके णिनिः । तेन षष्ठीप्रतिषेधाद् द्वितीयैव ।

अंशको मैत्रः--दायादः पुत्रादिरिति शेषः ।

तन्त्रादचिरापहृते ॥७०॥

तन्त्रात् पञ्चमीसमर्थादचिरापहृतार्थे कन् । तन्त्रादचिरात्कालादपहृतस्तन्त्रकः पटः । प्रत्यग्रो नव उच्यते ।

तन्त्रम् तन्तुवायशलाका । तस्मात् **अचिरापहृतः**—अल्पकाले एव पृथग्भूतः । (साँचे से अभी ही उतारा हुआ इति भाषायाम्) ।

ब्राह्मणकोष्णिके संज्ञायाम् ॥७१॥

एतौ निपात्येते कन्प्रत्ययान्तौ । ब्राह्मणको देशः । आयुधजीविब्राह्मणयुक्तः । उष्णिका यवागूः । अल्पान्ना यवागूः उष्णिका इत्युच्यते ।

एतौ–ब्राह्मणक–उष्णिक इति शब्दौ । **उष्णिका**--उष्णिक+टाप् । अत्र 'ब्राह्मण' शब्दः आयुधजीविब्राह्मणार्थकः । 'उष्ण' शब्दश्च अल्पान्नपरः ।

शीतोष्णाभ्यां कारिणि ॥७२॥

आभ्यां कारिण्यर्थे कन् । क्रियाविशेषणाद् द्वितीयासमर्थात् प्रत्ययः । शीतं करोति शीतको जड उच्यते । उष्णकः शीघ्रकारी ।

अत्र शीतोष्णौ क्रमशः मान्द्ये, शैघ्र्ये च वर्तमानौ स्तः । शीते सति मन्दता उष्णतायां च शीघ्रता भवति । शीतकः–अलसः । उष्णकः–दक्षः इत्यर्थः ।

अधिकम् ॥७३॥

अध्यारूढस्योत्तरपदलोपः कंश्च । अधिकम् इति निपात्यते । अधिको द्रोणः ।

अधिकम्—अध्यारूढ शब्दे द्वे पदे अधि आरूढ इति च । तत्रोत्तर-पदस्य आरूढस्य लोपो भवति 'कन्' प्रत्ययश्च । अधिको द्रोणः–खारीमिति शेषः । अत्र कर्तरि 'क्त' प्रत्यये सिद्धस्य अध्यारूढ शब्दस्य निपातनं वर्तते । अधिका खारी द्रोणेन इति प्रयोगे तु अध्यारूढ पदे कर्मणि 'क्त' प्रत्ययः तेन द्रोणेन इत्यत्र 'तृतीया' भवति ।

अनुकाभिकाभीकः कमिता ॥७४॥

एते शब्दाः कन्नन्ताः निपात्यन्ते 'कमिता' इत्येतस्मिन्नर्थे । अनु-कामयते अनुकः । अभिकः । अभीकः ।

अनुकः—अनु + क । अभिकः–अभिकामयते । अभीकः–'अभि' इत्यस्य पक्षे दीर्घत्वं निपात्यते ।

पार्श्वेनान्विच्छति ॥७५॥

अस्मात्तृतीयासमर्थादन्विच्छतीत्यर्थे कन् । अनृजुरुपायः पार्श्वम् । तेनात्मा अर्थानन्विच्छति पार्श्वकः । कौसृतिको जालिक उच्यते ।

अनृजुः ''''''तिर्यक् स्थित्या पार्श्वम् अनृजु । तद्वत् पार्श्वकः–मायावी । कौसृतिकः–कुत्सितो मार्गः कुसृतिः । अत्रादेरचो वृद्धिर्भवति ।

अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥७६॥

आभ्यां तृतीयासमर्थाभ्याम् अन्विच्छतीत्यर्थे ठक्-ठञौ । तीक्ष्ण उपायोऽयःशूलम् । तेनान्विच्छति आयःशूलिकः । साहसिक इत्यर्थः । दम्भो दण्डाजिनम् । दाण्डाजिनिकः दाम्भिकः ।

तीक्ष्ण उपायः–अयसः = लोहस्य शूलमिव तीक्ष्णत्वात् । दम्भा-जिनम्–दम्भसाधनत्वाद्दम्भः । प्रायः दाम्भिको जनः दण्डम् अजिनं च धारयति ।

तावतिथं ग्रहणमिति लुग्वा ॥७७॥

तावतां पूरणः तावतिथः । गृह्यतेऽनेनेति ग्रहणम् । प्रकृति-विशेषणं चैतत् । पूरणप्रत्ययान्तात्प्रातिपदिकाद् ग्रहणोपाधिकात् स्वार्थे कन् । पूरणप्रत्ययस्य वा लुक् । द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम् । द्वितीयकम् ।

तावतिथं ग्रहणम्–पूरणप्रत्ययान्तानां सामान्यनिर्देशोऽयम् । द्विकम्–द्वितीय + कन् तीयस्य लोपः । लोपाभावे द्वितीयकम् । एवं त्रिकम् । तृतीयकम् ।

☸(वा०) तावतिथेन गृह्णातीति कन् वक्तव्यः पूरणप्रत्ययस्य च नित्यं लुक् । षष्ठेन रूपेण ग्रन्थं गृह्णाति षट्को देवदत्तः ।

स एषां ग्रामीणः ॥७८॥

प्रथमासमर्थात् षष्ठ्यर्थे कन् । यत्तत्प्रथमासमर्थं ग्रामणीश्चेत्स भवति । ग्रामणीर्मुख्यः । ग्रामणीरेषां देवदत्त इति देवदत्तकाः देशाः ।

मुख्यः–प्रधानः । नीतेर्व्यवहारं देवदत्त एव करोतीत्यर्थः ।

शृङ्खलमस्य बन्धनं करभे ॥७९॥

शृङ्खलशब्दात् प्रथमासमर्थात् षष्ठ्यर्थे कन् । यत्तत्प्रथमासमर्थं

बन्धनं चेत्तद् भवति । यदस्येति निर्दिष्टं करभश्चेत् स भवति । शृङ्खलमस्य बन्धनं करभस्य शृङ्खलकः । करभ उष्ट्रशिशुः । तेषां यत्काष्ठमयः पाशः पादे व्यतिषज्यते तच्छृङ्खलमुच्यते ।

शृङ्खलं करभस्यास्वतन्त्रीकरणे साधनं भवतीति शृङ्खलं बन्धनं भवत्येव । शृङ्खलकः इत्युदाहरणम् ।

उत्क उन्मनाः ॥८०॥

उत्क इति निपात्यते उन्मनाश्चेत् स भवति । उद्गतं मनो यस्य स उन्मनाः ।

उत्कः–उत् + कन् । उन्मनाः–उत्सुकः–उत्कण्ठितः इत्यर्थः ।

कालप्रयोजनाद्रोगे ॥८१॥

कालप्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद्रोगेऽभिधेये कन् प्रत्ययः । द्वितीयेऽह्नि भवो द्वितीयको रोगः । तृतीयकः । प्रयोजनात्–विषपुष्पैर्जनितो विषपुष्पको रोगः ।

कालः–दिवसादिः । प्रयोजनम्–कारणं रोगस्य फलं वा । तृतीयकः–तृतीयेऽह्नि भवः । कारणस्योदाहरणं विषपुष्पकः / कार्यस्य–उष्णं कार्यमस्य उष्णकः । शीतं कार्यमस्य शीतको ज्वरः ।

तदस्मिन्नन्नं प्राये संज्ञायाम् ॥८२॥

प्रथमासमर्थात् सप्तम्यर्थे कन् । यत्तत्प्रथमासमर्थम् अन्नं चेत्प्राय-विषयं भवति । प्रायो बाहुल्यम् । गुडापूपाः प्रायेणान्नमस्यां पौर्ण-मास्यां गुडापूपिका ।

※(वा०) वटकेभ्य इनिर्वाच्यः । वटकिनी पौर्णमासी । वटकिनी–वटकिन् + ङीप् ।

गुडापूपाः–गुडेन मिश्राः अपूपाः । 'गुडधानाः' इतिवत् तृतीया-तत्पुरुषः । गुडापूपिका–गुडापूप + कन् + टाप् 'प्रत्ययस्थात् कात्' इति पकाराकारस्य इत्वम् ।

कुल्माषादञ् ॥८३॥

अस्मादञ् उक्तेऽर्थे । कुल्माषाः प्रायेणान्नमस्यां कौल्माषी पौर्णमासी ।

कुल्माषाः–मुद्गविशेषाः । **कौल्माषी**–कुल्माष + अञ् ञित्त्वादादेरचो वृद्धिः कौल्माष + ङीप् ।

श्रोत्रियँश्छन्दोऽधीते ॥८४॥

श्रोत्रियमिति निपात्यते । छन्दोऽधीत एतस्मिन्नर्थे । नकारः स्वरार्थः । छन्दोऽधीत इति वाक्यार्थवचनम् । छन्दसो वा श्रोत्रभावः घँश्च ।

श्रोत्रियम्–'श्रोत्रियन्' इति युक्तः पाठः मूले मकारान्तः लिपिकारदोषात् । नकारस्य रुत्वे अनुनासिकागमः । छन्दोऽधीते इति विग्रहे 'तदधीते' इति 'घन्' प्रत्ययः छन्दसः 'श्रोत्र' इत्यादेशः । पक्षे अणि प्रत्यये छान्दसः ।

श्राद्धमनेन भुक्तमिनिठनौ ॥८५॥

श्राद्धशब्दाद् भुक्तोपाधिकात् अनेनेत्यस्मिन्नर्थे इनिठनौ प्रत्ययौ भवतः । श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये च वर्तित्वा प्रत्ययमुत्पादयति । श्राद्धं भुक्तमनेन श्राद्धी / श्राद्धिकः ।

इनि-ठनोः समानकालग्रहणम् । अद्य भुक्ते श्राद्धे श्वः श्राद्धिक इति प्रयोगो मा भूत् ।

श्रद्धया निष्पाद्यते यत् पितृसम्बन्धि कर्म तत् **श्राद्धम्** । तस्य भोजनासम्भवात् श्राद्धशब्दोऽत्र श्राद्धे द्रव्ये पायसादावन्ने वर्तते । एवं यस्मिन्नहनि स श्राद्धं भुङ्क्ते तस्मिन्नेव दिने **श्राद्धी** / **श्राद्धिकः** इति प्रयोगौ भवतः ।

पूर्वादिनिः ॥८६॥

अनेनेति प्रत्ययार्थः कर्ताऽनुवर्तते । न च क्रियामन्तरेण कर्ता

सम्भवति । यां काञ्चित् क्रियामध्याहृत्य प्रत्ययो विधेयः । पूर्व-शब्दादनेनेत्यस्मिन्नर्थे इनि प्रत्ययो भवति । पूर्वं गतमनेन पीतं भुक्तं वा पूर्वी । पूर्विणौ । पूर्विणः ।

पूर्वी—पूर्वशब्दोऽत्र क्रिया-विशेषणम् कर्मेति द्वितीयासमर्थात् 'इनि' प्रत्ययः । येन पूर्वं गतम्, पीतं वा भुक्तम् स पूर्वी भवति ।

सपूर्वाच्च ॥८७॥

विद्यमानपूर्वात् प्रातिपदिकात् पूर्वशब्दान्तादनेनेत्यर्थे इनि प्रत्ययो भवति । पूर्वं कृतमनेन कृतपूर्वी कटम् । 'सुप्सुपा' इति समासं कृत्वा तद्धित उत्पाद्यते । पूर्वादिनिः, सपूर्वाच्चेति योगद्वयेन चानेन परिभाषाद्वयं ज्ञाप्यते—

(१) व्यपदेशिवद्भावो न प्रादिपदिकेन ।

(२) ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥

'सपूर्वाच्च' इति सूत्रे 'स' इत्यस्य विद्यमान इत्यर्थः । कृतपूर्वी—कृतपूर्व + इनि । भावो न प्रातिपदिकेन–वृत्तौ तु 'भावोऽप्रातिपदिकेन' इति पाठः ।

इष्टादिभ्यश्च ॥८८॥

एभ्योऽनेनेत्यर्थे इनिः । इष्टमनेन इष्टी यज्ञे । पूर्त्ती श्राद्धे ।

यज्ञे—क्तस्येन्विषयस्य कर्मणि इति सप्तमी । पूर्त्ती—पूर्त्तमनेनेति विग्रहः । एवम् अधीती व्याकरणे इत्यादि ।

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥८९॥

परिपन्थिन्, परिपरिन् । एतौ छन्दसि निपात्यौ । पर्यवस्थाता अरिः तस्मिन् वाच्ये । मा त्वा परिपन्थिनो विदन् । मा त्वा परिपरिणो विदन् ।

अत्र पर्यवस्थातृ शब्दात् 'इनि' प्रत्ययः अवस्थातृ शब्दस्य च पन्थ, पर इत्येतावादेशौ निपात्येते। परिपन्थिनः, परिपरिण इत्युभयं प्रथमा-बहुवचनान्तम्। तेन भाषायां परिपन्थि शब्दस्य प्रयोगः प्रामादिकः।

अनुपद्यन्वेष्टा ॥६०॥

'अनुपदी' इति निपात्यते अन्वेष्टा चेत्स भवति।

पदस्य पश्चात् अनुपदम् पश्चादर्थेऽव्ययीभावः। अनुपदी–अनुपद + इनि गवाम् इति शेषः। गवामन्वेष्टा इत्यर्थः।

साक्षाद् द्रष्टरि संज्ञायाम् ॥६१॥

'साक्षात्' इत्यव्ययम्। तस्मादिनिः द्रष्टरि। संज्ञाग्रहणमभि-धेयनियमार्थम्। साक्षाद् द्रष्टा साक्षी।

साक्षी—साक्षात् + इनि। 'अव्ययानां भमात्रे टिलोपः' इति 'आत्' इत्यस्य लोपः। संज्ञावाच्ये यः पश्यति तस्यैव 'साक्षी' इति संज्ञा न दातुः ग्रहीतुर्वा।

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥६२॥

'क्षेत्रियच्' इति निपात्यते परक्षेत्रे चिकित्स्य एतस्मिन्नर्थे। परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः। क्षेत्रियं कुष्ठम्। परक्षेत्रम्-जन्मान्तरशरीरम्। तत्र चिकित्स्यः—असाध्यः—अप्रत्याख्येयो व्याधि-रुच्यते। नामृतस्य निवर्तत इत्यर्थः।

अथवा क्षेत्रियम्–यत् परशरीरे सङ्क्रम्य चिकित्स्यते। तृणानि वा—यानि सस्यार्थे जनितानि नाशनीयानि। पारदारिको वा–परदाराः परक्षेत्रम् तत्र निग्राह्यः। सर्वं प्रमाणम्।

क्षेत्रियः—परक्षेत्र + घच् परशब्दस्य लोपः, घकारस्य 'इय' आदेशश्च। क्षेत्रियम्–विषम् इति शेषः। अत्र परस्य क्षेत्रम् इति षष्ठी समासः। एवमग्रेऽपि। व्याध्यर्थे तु परं क्षेत्रमिति कर्मधारयः। सस्यार्थे–

संस्कृते क्षेत्रे। **परक्षेत्रम्**—√ क्षि + ष्ट्रन् 'दाराः' गन्तव्यतया क्षेत्रम् इति कथ्यते। **प्रमाणम्**—आचार्यैः स्वीकारात्।

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रदत्तमिति वा ॥९३॥

इन्द्रियमिति रूढिरेषा चक्षुरादिकरणानाम्। इन्द्रशब्दात् षष्ठीसमर्थाल्लिङ्गमित्यर्थे घच्। इन्द्र आत्मा। इन्द्रस्य लिङ्गम् ज्ञापकम् इन्द्रियम्। अन्यत्र तृतीयासमर्थविभक्तिः। इन्द्रेण दृष्टम्, इन्द्रेण सृष्टम्। आत्मकृतेन कर्मणोत्पन्नम्। जुष्टम् सेवितम् तद्द्वारा ज्ञानोत्पादनात्। इन्द्रेण दत्तं विषयेभ्यो यथायथं ग्रहणाय। वा शब्दः प्रत्येकमभिसम्बध्यमानो विकल्पानां स्वातन्त्र्यमाह।

रूढिः—तेन व्युत्पत्तौ न कश्चन नियमः। तदेव विशदीकरोति—**इन्द्रशब्दात्……ग्रहणाय**। **यथायथम्**—यो यस्य विषयो रूपादिस्तस्य **ग्रहणार्थम्**—तथा च विषयानुसारेण इन्द्रियभेदः चक्षुः—श्रोत्रम्—वाक्—नासिका—त्वक् चेति। **स्वातन्त्र्यमाह**—तेन इन्द्रलिङ्गादयः सर्वे स्वतन्त्राः सन्तोऽर्थ-बोधकाः सन्ति।

तदस्यास्त्यस्मिन्निति मतुप् ॥९४॥

प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे वा मतुप्। यत्तत्प्रथमा-समर्थमस्ति चेत्तद् भवति। गोमान् मैत्रः, देशो वा।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

क्रमः—गोमान्। कुष्ठी। रूपवती। क्षीरी वृक्षः। उदरिणी। दण्डी। अस्तिमान्।

❀(वा०) गुणवचनेभ्योऽस्य लुक्। शुक्लः पटः।

अस्ति चेत्तद् भवति—वर्त्तमानसत्ताविशिष्टं यदि तत्र भवति। **गोमान्**—गावः सन्ति अस्य इति गोमान् मैत्रः। गावः सन्ति अस्मिन्निति गोमान् देशः। **क्रमः**—भूमा बहूनां भावः भूमा तस्मिन्नर्थे बहवो गावः सन्ति अस्येति गोमान् देवदत्तः। निन्दायाम् **कुष्ठी**—कुष्ठम् अस्ति अस्येति कुष्ठ

+ इनि (मतुबर्थे) प्रशंसायाम्–रूपवती प्रशस्तं रूपमस्याः इति रूपवती कन्या–रूप + मतुप् 'मादुपधायाश्च मतोर्वः......' इत्यनेन मकारस्य वकारः ङीप् च। क्षीरी–नित्ययोगे क्षीरमस्यास्तीति क्षीरी पिप्पलः, पनसः इत्यादि। (नित्यः क्षीरसम्बन्धो गम्यते।) क्षीर + इनि। अतिशायने– उदरिणी अतिशयेनोदरमस्ति अस्याः इति उदर + इनि उदरिन् + ङीप्। संसर्गे – दण्डी – दण्डः दण्ड-संसर्गः अस्ति अस्य दण्ड + इनि अस्ति विवक्षायाम्–अस्तिमान् अस्ति शब्दः कर्तृविशिष्टसत्तावाचको निपातः। वृत्तिविषये कर्तृविशेषे धनेऽस्ति शब्दो वर्त्तते। शुक्लः–शुक्लो गुणोऽस्यातीति शुक्ल + मतुप् तस्य लुक्। एवं कृष्णः। श्वेतः इत्यादि।

रसादिभ्यश्च ॥९५॥

प्राग्वत्। रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम्। रसवान्। रूपवान् इत्यादि।

प्राग्वत्–रसादिभ्यो मतुप् तदस्यास्त्यस्मिन् इत्येतस्मिन् विषये। अन्यनिवृत्त्यर्थम्–अन्ये मत्वर्थीयाः 'इनि' इत्यादयो मा भूवन्। परन्तु क्वचन इनिः दृश्यते यथा रूपिणी कन्या। उर्वशी वै रूपिण्यप्सरसाम् इति भाष्ये।

प्राणिस्थादातो लजन्यतरस्याम् ॥९६॥

प्राणिस्थादाकारान्तात् लच् वा मत्वर्थे। चूडालः।

चूडा अस्ति अस्येति चूडालः पक्षे चूडावान् बालः। चूडा = शिखा। एवं कर्णिकालः। कर्णिका = प्राण्यङ्गविशेषः (मध्यमाङ्गुलिः)।

सिध्मादिभ्यश्च ॥९७॥

लच् वा मत्वर्थे। सिध्मलः / सिध्मवान्। गडुलः / गडुमान् इत्यादि।

※(वा०) वातदन्तबलललाटानामूङ् च। वातादिभ्यो लच् अन्त्यस्य च ऊङ् आदेशः।

वातूलः। दन्तूलः। बलूलः। ललाटूलः।

वत्सांसाभ्यां कामबले ॥९८॥

वत्स–अंस इत्याभ्यां लच् स्याद्यथासंख्यं कामवति बलवति चार्थे । वत्सलः । अंसलः ।

वत्सलः–स्नेहवान् पिता । स्नेहः = कामः । अंसलः--उपचितमांसो बलवान् । अंसः = स्कन्धप्रदेशः ।

फेनादिलच्च ॥९९॥

मत्वर्थे अन्यतरस्याम् । चात् लच् । फेनिलः / फेनलः / फेनवान् ।

फेनवान्–पक्षे मतुप् ।

लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥१००॥

एभ्यः क्रमेण श । न । इलच् वा मत्वर्थे । लोमशः । पामनः । पिच्छिलः । पक्षे लोमवान् इत्यादि ।

एभ्यः क्रमेण–लोमादिभ्यः श । पामादिभ्यो न । पिच्छादिभ्यः इलच् इत्येते प्रत्यया भवन्ति । पक्षे सर्वेभ्यो मतुप् ।

❀(वा०) अङ्गात्कल्याणे । कल्याणान्यङ्गानि अस्याः सन्तीति अङ्ग + न + टाप अङ्गना ।

❀(वा०) शाकीपलालीदद्र्वां ह्रस्वत्वं च । अनेकेषां शाकानां समाहारः शाकी । शाकिनः–शाकी + न ह्रस्वत्वम् । पलाली + न = पलालिनम् । दद्रू + न = दद्रुणः । दद्रूनामको रोगः ।

❀ (वा०) विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः । विषु = नाना अञ्चन्तीति विष्वञ्चि तान्यस्य सन्तीति विषुणः विष्वक् + न 'अक्' इत्यस्य लोपः, नकारस्य णत्वं च ।

❀(वा०) लक्ष्म्या अच्च । लक्ष्मणः । लक्ष्मीरस्ति अस्येति लक्ष्मी + न इकारस्य अकारः नकारस्य णत्वञ्च ।

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥१०१॥

एभ्यो ण मत्वर्थे। मतुप् सर्वत्र समुच्चीयते। प्राज्ञः / प्रज्ञावान्। श्राद्धः / श्रद्धावान्। आर्चः / अर्चावान्। वार्त्तः / वृत्तिमान्।

ण–णित्त्वाद् वृद्धिः। समुच्चीयते–तेन रूपद्वयं भवति। 'प्रज्ञादिभ्यश्च' इत्यणि कृते प्राज्ञः इत्यस्य सिद्धावपि 'प्राज्ञा' इत्यस्य सिद्ध्यर्थं 'ण' विधानमावश्यकम् अणि तु 'ङीप्' भवति प्राज्ञी। णे तु टाप् प्राज्ञा।

तपःसहस्राभ्यां विनीनी ॥१०२॥

आभ्यां विनि, इनि एतौ मत्वर्थे। प्रत्ययार्थयोस्तु यथासंख्यं नेष्यते। तपस्वी। सहस्री।

तपस्वी — तपः अस्त्यस्येति तपस् + विनि। सहस्री–सहस्रम् अस्त्यस्येति सहस्र + इनि।

अण् च ॥१०३॥

आभ्याम् अण् च। योग विभाग उत्तरार्थो यथासंख्यार्थश्च। तापसः। साहस्रः।

※ (वा०) ज्योत्स्नादिभ्य उपसंख्यानम्। ज्यौत्स्नः। तामिस्रः।

ज्यौत्स्नः—ज्योत्स्ना अस्मिन् विद्यते इति।

सिकताशर्कराभ्यां च ॥१०४॥

आभ्यामण्। सैकतो घटः। शार्करं मधु।

शार्करम्–शर्करा = मधुरता अस्त्यस्य।

देशे लुबिलचौ च ॥१०५॥

आभ्यां देशे वाच्ये लुबिलचौ भवतः। चादण् च। कस्य

पुनरयं लुप् ? मतुबादीनामन्यतमस्य । सिकताः सन्त्यस्मिन् सिकता देशः । सिकतिलः / सैकतः / सिकतावान् । एवं शर्करा देश इत्यादि ।

लुबिलचौ—लुप्' इलच् प्रत्ययः । च-मतुप् इत्यादि संगृह्यते । सिकता देशः–सिकता + अण् तस्य लुप् । सिकतिलः—सिकता–इलच् । इत्यादि—शर्करिलः / शार्करः / शर्करावान् इत्युदाहरणानि ।

दन्त उन्नत उरच् ॥१०६॥

दन्तशब्दादुन्नतोपाधिकादुरच् । दन्तुरः ।

दन्तुरः—उन्नताः दन्ताः अस्येति विग्रहः ।

ऊषसुषिमुष्कमधो रः ॥१०७॥

एभ्यो रः मत्वर्थे । ऊषरं क्षेत्रम् । सुषिरं काष्ठम् । मुष्करः पशुः । मधुरो गुडः । इतिकरणो विवक्षार्थः । सर्वत्राभिधेयनियमं करोति ।

* (वा०) खमुखकुञ्जेभ्य उपसंख्यानम् । खमस्यास्तीति कण्ठविवरं महत् खरः । मुखमस्यास्तीति सर्वस्मिन् वक्तव्ये मुखरः । कुञ्जावस्य स्तः कुञ्जरः । कुञ्जौ हस्तिहनू ।

* (वा) नगपांशुपाण्डुभ्यश्चोपसंख्यानम् । कच्छ्वा ह्रस्वश्च । नगरम् । पांशुरम् । पाण्डुरम् । कच्छुरम् ।

सुषिरम् — छिद्रयुक्तम् । सुषिः = छिद्रम् । मुष्कौ = अण्डौ । पाण्डुरम्—शुक्लवर्णम् । कच्छुरम्–कच्छूः—खूजली नामको रोगः सोऽस्यास्तीति तम् । 'कच्छुरः' इति पाठान्तरम् ।

द्युद्रुभ्यां मः ॥१०८॥

आभ्यां मो मत्वर्थे । द्युमः । द्रुमः । रूढिशब्दावेतौ ।

रूढिशब्दौ–तेनाभ्यां मतुप् न ।

केशाद्वोऽन्यतरस्याम् ॥१०९॥

ननु च प्रकृतमन्यतरस्यां ग्रहणमनुवर्तत एव । मतुप्समुच्चयार्थं तदित्युक्तम् । अनेन त्विन्-ठनौ प्राप्येते । ततश्चातूरूप्यं भवति । केशवः / केशी / केशिकः / केशवान् ।

❀ (वा०) अन्येभ्यश्चोपसंख्यानम् । मणिवः । हिरण्यवः कुञ्जरवः । राजीवम् ।

❀(वा०) अर्णसो लोपश्च । अर्णवः ।

❀(वा०) छन्दसीवनिपौ च वाच्यौ । वश्च मतुप् च । र॒थीर॑भू॒न्मुद्ग॒ला॒नी गवि॑ष्ठौ । सु॒म॒ङ्ग॒लीरि॒यं व॒धूः । वनिप्—म॒घवा॒नमी॑महे । व, मतुप्—उद्वा चा उद्वती च ।

❀(वा०) मेधारथाभ्यामिरन्निरचौ । मेधिरः । रथिरः ।

चातूरूप्यम्–व–इन्–ठन्–मतुप् प्रत्ययान्ताः शब्दाः ।

कुञ्जरवः–काशिकायां नैतदुदाहरणम् । पदमञ्जर्यां हिरण्यवः एव कुञ्जरविशेष इत्युक्तम् ।

राजीवम्—राजी + व । अर्णवः–अर्णस् + व ।

रथीः–रथ + ई । उद्वा–उद् + व + टाप् ।

उद्वती–उद् + मतुप् + ङीप् ।

गाण्ड्यजगात्संज्ञायाम् ॥११०॥

गाण्डीवम् धनुः । अजगवम् धनुः । ह्रस्वादपि गाण्डिवम् । तुल्या हि संहिता दीर्घह्रस्वयोः । उभयथा प्रणीतं सूत्रम् ।

अजगवम्–पिनाकम् । 'गाण्डीवी कनकशिलानिभं भुजाभ्याम् । अधिरोहति गाण्डिवं महेषी ।' इत्युभयमपि प्रयुज्यते ।

काण्डाण्डादीरन्नीरचौ ॥१११॥

आभ्यां यथासंख्यमीरन्नीरचौ मत्वर्थे । काण्डीरः । अण्डीरः ।

काण्डीरः–धनुर्धरः, अपामार्गो वा । अण्डीरः–बलवान् ।

रजःकृष्यासुतिपरिषदो वलच् ॥११२॥

एभ्यो वलच् मत्वर्थे । रजस्वला । कृषीवलः । आसुतीवलः शौण्डिकः । 'वलः' इति दीर्घः । परिषद्वलो राजा ।

✻ (वा०) अन्येभ्योऽपि दृश्यते । भ्रातृवलः । पुत्रवलः । उत्साहवलः ।

रजस्वला–रजः अस्त्यस्यामिति रजस् + वलच् + टाप् । कृषीवलः गृहस्थः । पुत्रवलः–'वलः' इत्यत्र 'संज्ञायाम्' इत्यनुवृत्तेर्नात्र दीर्घत्वम् ।

दन्तशिखात्संज्ञायाम् ॥११३॥

आभ्यां मत्वर्थे वलच् संज्ञायाम् । दन्तावलो हस्ती । शिखावलो मयूरः ।

दन्तावलः–'वलः' इति दीर्घः ।

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ॥११४॥

एते मत्वर्थे निपात्यन्ते । ज्योतिष उपधालोपो नश्च प्रत्ययः ज्योत्स्ना चन्द्रप्रभा । तमस उपधाया इकारो रश्च तमिस्रा रात्रिः । स्त्रीत्वमतन्त्रम् । शृङ्गादिनच् प्रत्ययः शृङ्गिणः । ऊर्जोऽसुगागमो विनिवलचौ च ऊर्जस्वी । ऊर्जस्वलः । गोर्मिनिः गोमी । मलादिनजीमसचौ प्रत्ययौ मलिनः । मलीमसः ।

अतन्त्रम्–अविवक्षितम् । तेन तमिस्रं नभः इत्यपि । इनजीमसचौ–इनच्–ईमसच् तौ ।

अत इनिठनौ ॥११५॥

अकारान्तात्प्रातिपदिकादिनिठनौ । दण्डी / दण्डिकः । अन्यतरस्यामित्यधिकारान्मतुबपि दण्डवान् । तपरं किम् ? खट्वावान् ।

एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ ।
एकाक्षरात्—स्ववान् । खवान् ।

कृतः—कारकवान् । जातेः—व्याघ्रवान् । सप्तम्याम्—दण्डाः सन्त्यस्याम् इति दण्डवती शाला ।

अतः—ह्रस्वाकारान्तादित्यर्थः । स्ववान्—स्व-ख इत्येतावेकाक्षरौ । 'कारक' इति कृदन्तशब्दः । व्याघ्रो जातिः । तौ—इनि-ठनौ न स्मृतौ—न भवतः । तेनात्र मतुप् एव । 'तदस्यास्त्यस्मिन्निति मतुप (६४) इति सूत्रे इनि शब्द प्रयोगो विवक्षार्थः । तेन क्वचिदेभ्योऽपि इनि-ठनौ भवतः । यथा कृदन्तात् इनिः कार्यो । जातेः इनिठनौ—तण्डुली / तण्डुलिकः ।

व्रीह्यादिभ्यश्च ॥११६॥

एभ्य इनिठनौ मत्वर्थे । मतुप् पक्षे भवत्येव । व्रीही / व्रीहिकः / व्रीहिमान् । मायी / मायिकः / मायावान् ।

नहि व्रीह्यादिभ्यः सर्वेभ्यः प्रत्ययद्वयमिष्यते ।
शिखादिभ्यः इनिर्वाच्यः इकन् यवखदादिषु ।

व्रीही—व्रीहि + इनि 'भ' संज्ञकत्वादिकारलोपः । प्रथमैकवचने दीर्घः व्रीही, व्रीहिणौ । प्रत्ययद्वयम्—इनिठनौ । इकन्—ठन्नित्यर्थः । अत्रादेशस्य ग्रहणम् । शिखादयः, यवखदादयश्च गणे पठिताः । एभ्योऽवशिष्टेभ्यो व्रीह्यादिभ्य उभयं भवति ।

※ (वा०) शीर्षान्नञः । नञ् समासे शिरसः शीर्षादेशः इनिठनौ च । अशीर्षी / अशीर्षिकः ।

तुन्दादिभ्य इलच्च ॥११७॥

एभ्य इलच् मत्वर्थे । चादिनिठनौ मतुप् च । तुन्दिलः /

तुन्दी / तुन्दिकः / तुन्दवान् । उदरिलः / उदरी / उदरिकः / उदरवान् । पिचण्डिल इत्यादि ।

इत्यादि–पिचण्डी / पिचण्डिकः / पिचण्डवान् ।

*(वा०) स्वाङ्गाद्विवृद्धौ च । वृद्धौ महान्तौ कर्णौ अस्य कर्णिलः / कर्णिकः / कर्णी / कर्णवान् ।

एकगोपूर्वाट्ठञ् नित्यम् ॥११८॥

एकपूर्वाद् गोपूर्वाच्च प्रातिपदिकान्नित्यं ठञ् मत्वर्थे । ऐकशतिकः । गौशतिकः ।

एकञ्च तच्छतम् इति एकशतम् तदस्यास्तीति । पूर्वपदवृद्धिः । नित्यग्रहणादत्र 'मतुप्' न ।

शतसहस्रान्ताच्च निष्कात् ॥११९॥

एतदन्ताट्ठञ् मत्वर्थे तौ चेन्निष्कात्परौ भवतः । निष्कशतम् अस्यास्ति नैष्कशतिकः । नैष्कसहस्रिकः ।

तौ–शत सहस्रशब्दौ ।

रूपादाहतप्रशंसयोर्यप् ॥१२०॥

आहतप्रशंसाविशिष्टार्थे वर्तमानाद्रूपशब्दाद्यप् मत्वर्थे । आहतं रूपमस्य रूप्यः । प्रशस्तं वा पुमान् । ताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते ।

रूप्यो दीनारः । प्रशस्तं रूपमस्य रूप्यः पुमान् ।

* (वा०) यप्प्रकरणेऽन्येभ्योऽपि दृश्यते । हिम्याः पर्वताः । गुण्याः ब्राह्मणाः ।

अस्मायामेधास्रजो विनिः ॥१२१॥

असन्तात् माया–मेधा–स्रज् एभ्यश्च विनिर्मत्वर्थे । पयस्वी ।

मायावी । मेधावी । स्रग्वी । मायायाः व्रीह्यादित्वादिनिठनावपि । मायी / मायिकः ।

एवं तपस्वी । यशस्वी । अत्र 'मतुप्' इत्यपि भवति । तथा च भाष्येऽप्युदाहृतम् पयस्वान् । यशस्वान् ।

बहुलं छन्दसि ॥१२२॥

छन्दसि विषये बहुलं विनि प्रत्ययो भवति । अग्ने तेजस्विन् । न भवति सूर्यो वर्चस्वान् ।

❀(वा०) सर्वत्रामयस्योपसंख्यानम् । भाषायां छन्दसि च आमयावी ।

❀(वा०) शृङ्गवृन्दाभ्यामारकन् । शृङ्गारकः । वृन्दारकः ।

❀(वा०) फलबर्हाभ्यामिनच् । फलिनः । बर्हिणः ।

❀(वा०) हृदयादालुज्वा । हृदयालुः / हृदयी / हृदयिकः ।

❀(वा०) शीतोष्णतृषहिमेभ्यस्तन्न सहते इत्यालुज्वक्तव्यः । शीतं न सहते शीतालुः । उष्णालुः । तृषालुः । हिमालुः ।

❀(वा०) हिमाच्चेलुः । हिमेलुः ।

❀(वा०) वातात्समूहे च । वातानां समूहः वातं न सहते इति वातूलः ।

❀(वा०) पर्वमरुद्भ्यां तन् वक्तव्यः । पर्वतः । मरुत्तः ।

❀(वा०) अर्थात्तदभावे इनिर्वक्तव्यः । अर्थी ।

एतत्सर्वं बहुलग्रहणात्सिद्ध्यति । 'तृष' इत्यस्य स्थाने वृत्तौ 'तृप्र' इति पाठः तदग्रे 'हिम' इति नास्ति । तिग्मालुः इत्यपि पाठः ।

ऊर्णाया युस् ॥१२३॥

ऊर्णाशब्दाद्युस् । सः पदसंज्ञार्थः । ऊर्णायुः । केचिच्छन्दसीत्यनुवर्तयन्ति ।

पदसंज्ञार्थः—पदत्वेन भसंज्ञायाः अभावाद् 'यस्येति च' लोपो न भवति ।

वाचो ग्मिनिः ॥१२४॥

अस्माद् ग्मिनिर्मत्वर्थे । वाग्ग्मी ।

वाग्ग्मी—वाच् + ग्मिन् चकारस्य जश्त्वेन जकारस्तस्य च कुत्वेन गकारः । द्विगकारोऽयं शब्दः तेन 'प्रत्यये भाषायां नित्यम्' इत्यनुनासिको न भवति ।

आलजाटचौ बहुभाषिणि ॥१२५॥

वाक्शब्दात्प्रथमासमर्थादितौ मत्वर्थे बहुभाषिण्यर्थे ।

❀(वा०) कुत्सित इति वाच्यम् । वाचालः । वाचाटः ।

यः कुत्सितं बहुभाषते स वाचालः, वाचाटो वा कथ्यते । यश्च सम्यग्बहु भाषते स वाग्ग्मी इति विशेषः ।

स्वामिन्नैश्वर्ये ॥१२६॥

स्वामिन्निति निपात्यते ऐश्वर्ये । स्वशब्दादैश्वर्यवाचिनो मत्वर्थे आमिनि प्रत्ययः । स्वमस्यास्ति स्वामी । नेह—स्ववान् अत्र धनवाची स्वशब्दः ।

आमिति—वृत्तौ 'आमिन्' पदमञ्जर्याम् 'आमिनच्' इति पाठः । तत्र नान्तपाठो न सम्मतस्तस्य लोपप्रसङ्गात् ।

अर्श आदिभ्योऽच् ॥१२७॥

एवमादिभ्योऽच् मत्वर्थः । अर्शांसि सन्त्यस्य अर्शसः । उरसः ।

आकृतिगणोऽयम् । यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत्सर्वमिह द्रष्टव्यम् ।

❀ (वा०) स्वाङ्गाद्धीनात् । हीनस्वाङ्गवाचिनोऽच् । खञ्जः पादोऽस्येति खञ्जः । काणं चक्षुरस्येति काणः इत्यादि ।

द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ॥१२८॥

द्वन्द्वः समासः । उपतापो रोगः । गर्ह्यम् निन्द्यम् । तद्विषयेभ्यः प्राणिस्थार्थवाचिभ्यः प्रातिपदिकेभ्य इनिः मत्वर्थे । द्वन्द्वात्—कटकवलयिनी । उपतापात्—कुष्ठी । किलासी । गर्ह्यात्—ककुदावर्तिनी । काकतालुकी ।

❀(वा०) प्राण्यङ्गान्नेष्यते । पाणिपादवती ।

कटकवलयिनी–कटकवलयौ अस्याः स्तः इति कटकवलय + इनि =कटकवलयिन् + ङीप् ।

कुष्ठी–कुष्ठ + इनि = कुष्ठिन् प्रथमैकवचने 'कुष्ठी' इति ।

वातातिसाराभ्यां कुक् च ॥१२९॥

आभ्याम् इनिः । तद्योगे च तयोः कुगागमः । पुनर्वचनं कुगर्थम् । वातकी । अतिसारकी ।

❀(वा०) पिशाचाच्चेति वाच्यम् । पिशाचकी कुबेरः । रोगे चायमिष्यते । नेह–वातवती ।

वातकी–वात + कुक् + इनि । 'कुक्' कित्त्वात् अन्ते भवति वातवती–अत्र वातशब्दो वायुवाचकः । वातवती गुहा ।

वयसि पूरणात् ॥१३०॥

पूरणप्रत्ययान्ताद्वयसि इनिर्मत्वर्थे । पञ्चमोऽस्ति मासः संवत्सरो वाऽस्य पञ्चमी मैत्रः ।

पञ्चमी-अत्र 'पञ्चम' शब्दः पञ्चमे मासे संवत्सरे वा वर्तते। पञ्चन् + मयट् प्रत्ययस्तदन्तः पञ्चमशब्दः । अत्र 'इनिः' एव भवति न 'ठन्' ।

सुखादिभ्यश्च ॥१३१॥

एवमादिभ्यः प्रातिपदिकेभ्य इनिः मत्वर्थे । सुखी । दुःखी ।

*(वा०) माला क्षेपे । व्रीह्यादिषु माला शब्दोऽस्ति तदिह क्षेपे मतुपो बाधनार्थम् ।

बाधनार्थम्-तेन क्षेपे = निन्दायाम् माली इत्येकमेव रूपं भवति ।

धर्मशीलवर्णान्ताच्च ॥१३२॥

धर्माद्यन्तादिनिः इति नियम्यते । ब्राह्मणधर्मोऽस्यास्तीति ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी ।

नियम्यते-तेनान्यः प्रत्ययो न भवति । ब्राह्मणानां धर्मः, शीलम्, वर्णो वेति ब्राह्मणधर्मः, ब्राह्मणशीलम्, ब्राह्मणवर्णः इति त्रयो वर्णान्ताः ।

हस्ताज्जातौ ॥१३३॥

हस्तादिनिर्जाताविति नियम्यते मत्वर्थे समुदायेन चेज्जातिरुच्यते । हस्ती । समुदायेन—प्रकृतिप्रत्यययुक्तेन पदेन ।

हस्तोऽस्यास्तीति हस्ती । हस्ती जातिविशेषः ।

वर्णाद् ब्रह्मचारिणि ॥१३४॥

वर्णादिनिर्नियम्यते मत्वर्थे समुदायेन ब्रह्मचारी चेदुच्यते । ब्रह्मचारी त्रैवर्गिकोऽभिप्रेतः । स हि विद्यार्थमुपनीतो ब्रह्म चरति नियममासेवते इत्यर्थः । वर्णी ।

त्रैवर्गिकः-त्रिषु वर्गेषु ब्राह्मण-क्षत्रिय-वैश्येषु भवः । वृत्तौ त्रैवर्णिकः इति पाठः । ब्रह्मचारी-'व्रते' इति सूत्रेण 'णिनि' । अत्र 'ब्रह्म' शब्दः वेदे, तदध्ययनार्थं नियमविशेषे च वर्तते ।

पुष्करादिभ्यो देशे ॥१३५॥

पुष्करादिभ्य इनिर्नियम्यते समुदायेन चेद्देशोऽभिधीयते । पुष्करिणी । पद्मिनी । बिसिनी । मृणालिनी ।

देशः—स्थानम् । पुष्करिणी–पुष्करयुक्तस्तडागः ।

❀ (वा०) इनि —प्रकरणे बलाद्बाहूरुपूर्वादुपसंख्यानम् । बाहुबली । उरुबली ।

❀ (वा०) अर्थाच्चासन्निहिते । अर्थी । धनाभावे तदभिलाषीत्यर्थः ।

❀ (वा०) तदन्ताच्चेति वाच्यम् । धान्यार्थी ।

बलादिभ्यो मतुबन्यतरस्याम् ॥१३६॥

बलादिभ्यो मतुप्प्रत्ययो भवत्यन्यतरस्याम् । पक्षे इनिः । बलवान् / बली । उत्साहवान् / उत्साही इत्यादि ।

बलादिभ्यः 'मतुप्' पक्षे इनिः इत्येव भवति न 'ठन्' ।

संज्ञायां मन्माभ्याम् ॥१३७॥

मन्नन्तात्प्रातिपदिकात् 'म' शब्दान्ताच्च इनिर्मत्वर्थे । समुदायेन चेत्संज्ञा गम्यते । प्रथिमिनी । दामिनी । मशब्दान्तात्-होमिनी । सोमिनी ।

प्रथिमिनी—'प्रथिमन्' शब्दो मान्तः एवं 'दामन्' इत्यपि । आभ्यामिनिः । प्रथिमन् + इन् नस्तद्धिते इति टिलोपः 'ऋन्नेभ्यो ङीप्' इति ङीप् । होम सोमौ मान्तौ ।

कंशंभ्यां बभयुस्तितुतयसः ॥१३८॥

कम्, शम् इति मान्तौ । क्रमशो जलसुखयोर्वाचकौ । ताभ्यां ब, भ, युस्, ति, तु, त, यस् एते प्रत्ययाः मत्वर्थे । कम्बः, शम्बः । कम्भः, शम्भः । कंयुः, शंयुः । कन्तिः, शन्तिः । कन्तुः, शन्तुः । कन्तः, शन्तः । कंयः, शंयः । सकारः पदसंज्ञार्थः । तेनानुस्वारपरसवर्णौ सिद्धौ भवतः ।

अनुस्वारः–कंयुः, शंयुः इत्यादिषु 'मोऽनुस्वारः' इत्यनेन पदत्वादनुस्वारो भवति। कम्बः, कन्तुः इत्यादिषु च 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णः सिद्धयति।

तुन्दिबलिवटेर्भः ॥१३९॥

एभ्यो 'भ' प्रत्ययो मत्वर्थे। तुन्दिवृंद्धा नाभिः साऽस्यास्तीति तुन्दिभः। बलिभः। वटिभः। वलिशब्दः पामादिषु पठ्यते तेन वलिनोऽपि।

वलिनः—वलि + न।

अहंशुभमोर्युस् ॥१४०॥

अहम् इत्यहङ्कारे। शुभम् इत्यव्ययं शुभपर्यायः। मान्तौ। ताभ्यां युस् मत्वर्थे। सः पदसंज्ञार्थः। अहंयुः अहङ्कारवान्। शुभंयुः शुभान्वितः।

धान्यानांव्रातेनकिमोविमुक्तादिभ्यःकालप्रयोजनात्प्रज्ञाश्रद्धास्मायामेधा विंशतिः ॥१४०॥

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे पञ्चमाध्यायस्य द्वितीयः पादः।

मान्तौ—अहम्, शुभम् इत्येतौ। अहङ्कारवाचकोऽहमिति शब्दः अव्युत्पन्नः प्रसिद्धादस्मदादेशात् 'अहम्' इत्यस्माद् भिन्नः।

पदसंज्ञार्थः—तेन मकारस्यानुस्वारः।

द्वितीयाध्यायस्यास्मिन् पादे धान्यानां भवने ··, व्रातेन जीवति, किमः संख्या···, विमुक्तादिभ्योऽण्, कालप्रयोजनाद्रोगे, प्रज्ञाश्रद्धार्चाभ्यो णः, अस्मायामेधास्रजो विनिः इत्येतेभ्य आरभ्य विंशतिः सूत्राणीति संकलनेन चत्वारिंशदुत्तरशतं (१४०) सूत्राणि सन्ति।

इति काशिकावृत्तिसार-सुधायां पञ्चमाध्यायस्य द्वितीयः पादः।

पञ्चमाध्याये तृतीयः पादः

प्राग्दिशो विभक्तिः ॥१॥

दिक्शब्देभ्य इति वक्ष्यति। प्रागेतस्माद्यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते ज्ञेयाः। वक्ष्यति–'पञ्चम्यास्तसिल्' यतः। ततः। वानुवृत्तः तस्मात्।

विभक्ति संज्ञाः—विभक्तिः संज्ञा येषां ते। तत्फलम् यतः, ततः—'न विभक्तौ तुस्माः' इति सकारस्य न इत्संज्ञा। वानुवृत्तेः–तसिल्' प्रत्ययो विकल्पेन भवति तेन तस्मात् इत्यपि।

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥२॥

किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशीयाः प्रत्ययाः वेदितव्याः द्व्यादीन् वर्जयित्वा। कुतः। कुत्र। यतः। यत्र। बहुतः। बहुत्र।

अद्व्यादिभ्यः किम् ? द्वाभ्याम्। द्वयोः।

प्रकृतिपरिसंख्यानं किम् ? वृक्षात्। वृक्षे।

सर्वनामत्वादेव सिद्धे किमो ग्रहणं द्व्यादिपर्युदासात्।

❀ (वा०) बहुग्रहणे संख्याग्रहणम्। तेनेह न—बहोः सूपात्।

द्व्यादीन् वर्जयित्वा—द्वि-युष्मद्-अस्मद्-भवतु इति शब्दभ्यो न भवन्ति प्रत्ययाः। परिसंख्यानम्–परिगणनम्। प्रकृतीनाम्-किम्-सर्वनाम-बहूनाम् इत्यर्थः। संख्याग्रहणम्–'बहुगणवतुडति संख्या' इति सूत्रेण यस्य 'संख्या' संज्ञा विहिता तस्यैव ग्रहणम् न तु वैपुल्यवाचिनः। तस्य संख्या संज्ञायाः अविधानात्।

इदम इश् ॥३॥

इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु । शकारः सर्वादेशार्थः । इतः । इह ।

सर्वादेशार्थः–'अनेकाल्शित् सर्वस्य' इत्यनेन 'शित्' आदेशः सर्वस्य भवति । इतः–इदम् + तसिल् । इह–'अस्मिन्' इत्यर्थे इदम् + ह ।

एतेतौ रथोः ॥४॥

रादौ थादौ च प्रत्यये इदमो यथासंख्यम् एत-इत् एतावादेशौ प्राग्दिशीयेषु । रेफे अकार उच्चारणार्थः । 'इदमो र्हिल्' एतर्हि । 'इदमस्थमुः' इत्थम् ।

उच्चारणार्थः-अन्यथा 'र्हिल्' प्रत्यये 'एत' आदेशो न स्यात् रादित्वाभावात् । र्हिल्-थमु इति प्रत्ययौ पूर्वत्र लकारः, परत्र उकारश्च इतौ ।

एतदोऽश् ॥५॥

प्राग्दिशीयेषु एतदः 'अश्' इत्ययमादेशो भवति । अतः । अत्र । 'एतद्' इति योगविभागः कर्त्तव्यः । एतदो रथोः परतः एत-इत् एतौ आदेशौ भवतः । एतर्हि । इत्थम् । रेफादिः 'अनद्यतने र्हिल्............' इत्यादि वर्तत एव । 'थमु' प्रत्ययः पुनरेतद उपसंख्येयः ।

अश् इत्यपि शित्त्वात् सर्वादेशः । उपसंख्येयः–प्रतिपाद्यः । इदम् शब्दात 'थमु' प्रत्ययो भवति थकारादिः स एव 'एतत्' शब्दादपि भवत्विति ज्ञापनम् ।

सर्वस्य सोऽन्यतरस्यां दि ॥६॥

सर्वस्य 'स' इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये अन्यतरस्याम् । 'सर्वैकान्येति' सर्वदा / सदा ।

द्वि—दकारादौ प्रत्यये । 'सर्वैकान्येनि……' इदं काले वाच्ये दा प्रत्यय-विधायकं सूत्रम् । सर्वदा-सर्वस्मिन् काले इत्यर्थः । सर्वं ददाति या सा सर्वदा इत्यत्र तु न भवति प्राग्दिशीयत्वाभावात् ।

पञ्चम्यास्तसिल् ॥७॥

पञ्चम्यन्तेभ्यः किं सर्वनाम बहुभ्यः तसिल् । कुतः । यतः । बहुतः ।

कुतः—'किम्' इत्यस्य 'कु' आदेशः । कस्मादित्यर्थः ।

तसेश्च ॥८॥

'प्रति योगे·····' इत्यादि, 'अपादाने चाही' त्यादि वक्ष्यति । तस्य तसेः किमादिभ्यः परस्य तसिल् आदेशः । कुत आगतः । यतः । ततः । तसिल्त्वं स्वरार्थं विभक्त्यर्थं च ।

तसिल्त्वम् – तसेः तसिल् आदेशविधानम् । स्वरार्थम् – लिति प्रत्ययात्पूर्वमुदात्तं भवति । विभक्त्यर्थम् = विभक्ति संज्ञार्थम्–यतः, ततः इत्यत्र 'त्यदादीनामः' इत्यकारः ।

पर्यभिभ्यां च ॥९॥

आभ्यां तसिल् प्रत्ययः । सर्वोभयार्थे वर्तमानाभ्यां प्रत्यय इष्यते । परितः । सर्वतः । अभितः उभयतः इत्यर्थः ।

परितः = सर्वतः । सर्वार्थकः परिशब्दः । अभितः = उभयतः । उभयार्थकः अभिशब्दः ।

सप्तम्यास्त्रल् ॥१०॥

किमादिभ्यः सप्तम्यन्तेभ्यस्त्रल् । कुत्र । यत्र । बहुत्र ।

कुत्र–कस्मिन् इत्यर्थः ।

इदमो हः ॥११॥

इदमः सप्तम्यन्ताद् 'ह' प्रत्ययः । इह ।

'इदम्' शब्दात् 'त्रल्' न, तं बाधित्वा ह भवति ।

किमोऽत् ॥१२॥

किमः सप्तम्यन्तात् 'अत्' प्रत्ययः । क्व भोक्ष्यसे । क्वलमपीच्छन्ति । कुत्र ।

क्व–'क्वाति' सूत्रेण किमः 'क्व' अकारस्य लोपः ।

वा ह च च्छन्दसि ॥१३॥

किमः सप्तम्यन्ताद्वा 'ह' प्रत्ययो भवति छन्दसि । यथाप्राप्तं च । क्व / कुह / कुत्र ।

यथाप्राप्तम्–अत्, त्रल् इति ।

इतराभ्योऽपि दृश्यन्ते ॥१४॥

सप्तमीपञ्चम्यपेक्षमितरत्वम् । इतराभ्योऽपि विभक्तिभ्यः तसिलादयो दृश्यन्ते । दृशिग्रहणं प्रायिकविध्यर्थम् । तेन भवदादिभिर्योगे एवैतद्विधानम् । के पुनर्भवदादयः ? भवान्–दीर्घायुरायुष्मान्–देवानाम्प्रिय इति । स भवान् / ततो भवान् / तत्र भवान् । तं भवन्तम् / ततो भवन्तम् / तत्र भवन्तम् इत्यादि सर्वविभक्तिषूदाहार्यम् ।

प्रायिकविध्यर्थम्—यत्र पञ्चमी-सप्तमीभ्यामितराभ्यो विभक्तिभ्यः शिष्टप्रयोगाः दृश्यन्ते तत्रैव 'तसिल्' आदयो भवन्ति । अयं भवान् / इह भवान् । को भवान् / क्व भवान् इति ह, अत् आदयः । इत्यादि–तेन भवता / तत्र भवता / ततो भवता । तस्मै भवते ' तत्र भवते / ततो भवते । तस्माद् भवतः / तत्र भवतः / ततो भवतः । तस्य भवतः / तत्र भवतः / ततो

भवतः । तस्मिन् भवति / तत्र भवति / ततो भवति । एवं दीर्घायुर्योगे स दीर्घायुः / तत्र दीर्घायुः / ततो दीर्घायुः । स आयुष्मान् / तत्र आयुष्मान् / तत आयुष्मान् । स देवानाम्प्रियः / तत्र देवानाम्प्रियः / ततो देवानाम्प्रियः । इत्यादीन्युदाहरणानि सर्वविभक्तिषु ज्ञेयानि ।

सर्वैकान्यकिंयत्तदः काले दा ॥१५॥

सप्तम्या इति वर्तते । सर्वादिभ्यः प्रातिपदिकेभ्यो 'दा' प्रत्ययः । सर्वस्मिन् काले सर्वदा । एकदा । अन्यदा । यदा । तदा ।

सर्वदा—एतानि अव्ययानि भवन्ति । तेन एभ्यः सुपो लुक् ।

इदमो र्हिल् ॥१६॥

इदमः सप्तम्यन्तात् काले वर्तमानात् र्हिल् प्रत्ययः । अस्मिन् काले एतर्हि ।

एतर्हि—'एतेतौ रथोः' इदम् शब्दस्य 'एत' आदेशः । ह्रस्यापवादः । काल एव । अत्र न भवति—इह देशे ।

अधुना ॥१७॥

अधुना इति निपात्यते । इदमोऽश् भावः, धुना च प्रत्ययः ।

अधुना—'अस्मिन् काले' इत्यर्थः ।

दानीं च ॥१८॥

इदमः सप्तम्यन्तात् काले वर्तमानाद् 'दानीम्' प्रत्ययः । इदानीम् ।

इदानीम्—'अस्मिन् काले' इत्यर्थः । 'इदम इश्' इति इदमः 'इश्' आदेशः ।

तदो दा च ॥१९॥

तदः सप्तम्यन्तात् काले वर्तमानाद् दा प्रत्ययः । चाद् दानीम् च । तस्मिन् काले तदा / तदानीम् । तदो दावचनमनर्थकम्, विहितत्वात् ।

विहितत्वात् –'सर्वैकान्यकियत्तदः काले दा' इत्यनेन सूत्रेण ।

तयोर्दार्हिलौ चच्छन्दसि ॥२०॥

तयोरिदमस्तदश्च दा-र्हिलौ भवतश्छन्दसि । चाद्यथा-प्राप्तञ्च । इदावत्सरीयः । इयं तर्हि / इदानीम् / तदानीम् ।

इदा—इदम् + दा । इयम्–वृत्तौ 'इदम्' इति पाठः ।

अनद्यतने र्हिलन्यतरस्याम् ॥२१॥

'छन्दसि' इति न स्वर्यते । सामान्यविधिः । किम्—सर्वनाम–बहुभ्यः सप्तम्यन्तेभ्योऽनद्यतने कालविशेषे वर्तमानेभ्यः र्हिल् प्रत्ययो भवत्यन्यतरस्याम् । कर्हि / कदा । यर्हि / यदा । तर्हि / तदा ।

सामान्यविधिः—लोके वेदे च संस्कृतवाङ्मये । अन्यतरस्याम्–पक्षे 'दा' प्रत्ययः ।

सद्यः परुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युर-परेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥२२॥

'सप्तम्याः, काले' इति वर्तते । सद्यः प्रभृतयो निपात्यन्ते । प्रकृति-प्रत्यय-आदेशाः, कालविशेष इति सर्वमेतन्निपातनाल्लभ्यते । समानस्य सः द्यश्च प्रत्ययः अहन्यभिधेये । समानेऽह्नि सद्यः । पूर्वं-पूर्वतरयोः परभावः उदारी च प्रत्ययौ संवत्सरे वाच्ये । पूर्वस्मिन् वर्षे परुत् । पूर्वतरे वर्षे वाच्ये परारि । इदम इश् समसण् प्रत्ययः वर्षे वाच्ये । ऐषमः इत्यस्मिन् वर्षे । परस्मादेद्यवि, अहनि । परस्मिन्नहनि

परेद्यवि । इदमोऽश्भावो द्यश्च अहनि । अस्मिन्नहनि अद्य । पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्यः एद्युस् अहनि वाच्ये । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः । अपरेद्युः । अधरेद्युः । उभयेद्युः । उत्तरेद्युः ।

* (वा०) द्युश्चोभयशब्दात् । उभयद्युः ।

सद्यः-समानेऽह्नि=कारणकार्ययोः समाने-एकस्मिन् अह्नि-दिने । यथा सद्यः बलकरं पयः । यस्मिन्नहनि पयः पानं तस्मिन्नेव दिने बलवृद्धिः ।

उदारी — उत् + आरिः । परुत्-पूर्व + उत् । परारि — पूर्वतर + आरि ।

ऐषमः-इदम् + समसण् । इदद इश् । इकारस्य वृद्धिरैकारः । पूर्वसकारस्य षत्वम् द्वितीयस्य सत्वविसर्गौ । एते सर्वेऽव्ययशब्दाः ।

प्रकारवचने थाल् ॥२३॥

'सप्तम्याः, काले' इति निवृत्तम् । सामान्यस्य भेदको विशेषः प्रकारः । प्रकृत्यर्थविशेषणं चैतत् । प्रकारवृत्तिभ्यः किमादिभ्यः स्वार्थे थाल् । तेन प्रकारेण तथा । सर्वथा । जातीयरोऽपीदृशमेव लक्षणम् । स स्वभावात् प्रकारवति वर्तते । थाल् प्रकारमात्रे ।

प्रकारः-यथा 'मनुष्य.' इति सामान्यम् । तस्य विशेषाः ब्राह्मणादयः । स्वार्थे—प्रकारार्थे । अत्र सादृश्यवाची प्रकारो न गृह्यते भेदवाची प्रकारो गृह्यते इति भावः । लक्षणम्-'प्रकारवचने जातीयर्' इति सूत्रम् । प्रकारवति-विशेष्ये ।

इदमस्थमुः ॥२४॥

अस्मात् प्रकारे थमुः प्रत्ययः । थालोऽपवादः । इत्थम् । उकारग्रहणेन 'न विभक्तौ तुस्माः' इत्यस्यानित्यत्वं सूचितम् ।

इत्थम्-अनेन प्रकारेण इदम् + थमुः । 'एतेतौ रथोः' इति 'इदम्' इत्यस्य 'इत्' आदेशः । सूचितम्-अन्यथा मकारस्येत्संज्ञाया निषेधे, उकारोच्चारणम् तदर्थं व्यर्थम् ।

किमश्च ॥२५॥

अस्मात् प्रकारवचने थमुः । कथम् ।

कथम्–केन प्रकारेण, किम् + थमु । किमः 'क' आदेशः ।

था हेतौ चच्छन्दसि ॥२६॥

किम्–शब्दाद् हेतौ वर्त्तमानात् 'था' प्रत्ययश्छन्दसि । चात् प्रकारवचने । हेतौ-कथा कं ग्रामं नु पृच्छसि । केन हेतुना पृच्छसीत्यर्थः । प्रकारे—कथा देवा आसन् पुराविदः । विभक्तिसंज्ञाया पूर्णोऽवधिः ।

कथा–किम् + था । कथा (देवाः)–केन प्रकारेण । कथा……… पृच्छसि-वृत्तौ 'कथा ग्रामं न पृच्छसि ।' इत्युदाहृतम् ।

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥२७॥

दिशां शब्दाः दिक्शब्दाः । तेभ्यो दिगादिषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्योऽस्ताति प्रत्ययः । यथासंख्यमत्र नेष्यते । पुरस्तात् वसति । पुरस्तात् आगतः । पुरस्तात् रमणीयम् । एवम् अधस्तात् । दिक्शब्देभ्यः किम् ? ऐन्द्र्यां दिशि वसति ।

दिक् शब्दाः = दिशां वाचकाः–वाचकरूपेण दृष्टाः ये शब्दाः । पुरस्तात्–पूर्व + अस्ताति । पूर्वस्य 'पुर्' आदेशः ।

दक्षिणोत्तराभ्यामतसुच् ॥२८॥

आभ्यां दिगादिषु वर्तमानाभ्यां सप्तम्यन्ताभ्याम् अतसुच् । अस्तातेरपवादः । दक्षिणशब्दः काले न सम्भवति इति दिग्देशवृत्तिः परिगृह्यते । दक्षिणतो वसति । आगतः । रमणीयम् । एवमुत्तरतः । अकारः षष्ठ्यतसर्थे विशेषणार्थः ।

दिगादिषु–दिग्देशकालेषु । उत्तरतो वसति । उत्तरत आगतः । उत्तरतो रमणीयम् इत्युदाहरणानि । विशेषणार्थः––'षष्ठ्यतसर्थप्रत्ययेन'

इति सूत्रे। तत्र 'षष्ठी तसर्थ......' इति न्यासे तु 'तसि' इत्यस्यापि ग्रहणं स्यात्तद्वारणाय अकारविधानं सार्थकम् ।

विभाषा परावराभ्याम् ॥२६॥

आभ्यां विभाषा अतसुच् । परतो वसति । आगतः । रमणीयम् । पक्षे परस्तात् । एवम् अवरत इत्यादि ।

अवरतो वसति । अवरत आगतः । अवरतो रमणीयम् ।

अञ्चेर्लुक् ॥३०॥

अञ्चन्त्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातेर्लुक् । प्राच्यां वसति । 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययो निवर्तते । प्राग्वसति । प्रागागतः । प्राग् रमणीयम् ।

प्राच्यां—प्राच्यां दिशि । एवं प्राच्या आगतः । प्राक् (काले) रमणीयम् ।

उपर्युपरिष्टात् ॥३१॥

एतौ निपात्यौ अस्तात्यर्थे । ऊर्ध्वस्य 'उप' भावः रिल्-रिष्टातिलौ च प्रत्ययौ । ऊर्ध्वायां दिशि वसति—उपरि वसति । आगतः । रमणीयम् । एवम् उपरिष्टात् ।

उपरि वसति । उपर्यागतः । उपरि रमणीयम् । उपरिष्टाद् वसति । उपरिष्टादागतः । उपरिष्टाद्रमणीयम् ।

पश्चात् ॥३२॥

'पश्चात्' अयं निपात्यते । अपरस्य पश्चभावः, 'आति' प्रत्ययः अस्तात्यर्थे । अपरस्यां दिशि वसति-पश्चाद् वसति । आगतः । रमणीयम् ।

*** (वा०) अर्धोत्तरपदस्य च पश्चभावो वाच्यः । पश्चार्धः ।**

वार्तिकस्योदाहरणं दक्षिणपश्चार्धः दक्षिणस्याः अपरस्याश्च दिशः अर्धः। 'पश्चार्धः' इत्युदाहरणं 'विनापि 'पूर्व' पदेन 'पश्च' भावो वक्तव्यः।' इति द्वितीयवार्तिकस्यास्ति।

पश्च पश्चा चच्छन्दसि ॥३३॥

पश्च-पश्चा शब्दौ निपात्येते छन्दसि विषये अस्तातेरर्थे। चात्पश्चादपि। प्राग्वत् अकाराकारौ च। परो व्याघ्रो जायते पश्च सिंहः / पश्चा सिंहः / पश्चात् सिंहः।

प्राग्वत्—अपरस्य 'पश्च' इत्यादेशः। अकार + आकार प्रथमा ए० व०। व्याघ्रः—वृत्तौ 'व्याप्तः' इति पाठः।

उत्तराधरदक्षिणादातिः ॥३४॥

एभ्य आतिः अस्तात्यर्थे। उत्तराद्वसति। आगतः। रमणीयम्। एवम् अधरादित्यादि।

उत्तराद्वसति—उत्तरस्यां दिशि वसति। एवम् अधरस्यां दिशि वसति, दक्षिणस्यां दिशि वसति इति विग्रहः। अधराद्वसति। दक्षिणाद्वसति इत्याद्युदाहरणानि।

एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥३५॥

एभ्य एनप् अन्यतरस्यां भवत्यस्तात्यर्थे। अदूरे चेदवधिमानवधेर्भवति। नतु पञ्चम्यर्थे। उत्तरेण वसति / उत्तरात् / उत्तरतः / उत्तरेण रमणीयम्। एवम् अधरेणेत्यादि। अदूरे किम्? उत्तराद्वसति। अपञ्चम्याः किम्? उत्तरादागतः।

अदूरे……भवति—दिक्शब्दाः अवधिसापेक्षा भवन्ति। अवधिश्चावधिमन्तम् अपेक्षते, अत एवायमर्थो लभ्यते। 'अन्यतरस्याम् इति' कथनात् पक्षे आतिः तसिश्च तेन रूपत्रयं भवति। उत्तराद्वसति–अत्रावधि–अवधिमतोर्दूरता दृश्यते।

दक्षिणादाच् ॥३६॥

'अदूरे' इति न स्वर्यते। 'अपञ्चम्याः' इति वर्तते। अस्मादाच् अस्तात्यर्थे। दक्षिणा वसति। रमणीयम्।

पञ्चम्यास्तु तसिः दक्षिणत आगतः।

आहि च दूरे ॥३७॥

दक्षिणशब्दादाहि प्रत्ययः। चादाच्। दूरे चेदवधिमानवधेः। दक्षिणाहि / दक्षिणा वसन्ति। रमणीयम्।

वसन्ति—वृत्तौ 'वसति' इति पाठः।

उत्तराच्च ॥३८॥

आजाही स्तः अस्तात्यर्थे। दूरे चेदवधिमानवधेर्भवति। उत्तरा / उत्तराहि वसन्ति। रमणीयम्।

आजाही—आच्—आहि एतौ प्रत्ययौ।

पूर्वाधरावराणामसिपुरधवश्चैषाम् ॥३९॥

'अपञ्चम्याः' इति निवृत्तम्। तिसृणामपि ग्रहणम्। एभ्यः 'असि' प्रत्ययः। यथासंख्यमेषां पुर्, अध् अव् एते आदेशा भवन्ति। पुरो वसति। आगतः। रमणीयम्। एवम् अधः। अवः।

तिसृणाम्—सप्तमी—पञ्चमी—प्रथमानाम्। पुरो वसति। पुर आगतः। पुरो रमणीयम् इति क्रमश उदाहरणानि।

अस्ताति च ॥४०॥

सप्तम्यन्तमेतत्। अस्ताति प्रत्यये परे पूर्वादीनां यथासंख्यं पुरादय आदेशाः। इदमेव ज्ञापकम् अस्तातिर्भवति। असिप्रत्ययेन न बाध्यते। पुरस्ताद्वसति। आगतः रमणीयम्। एवमधस्तात्।

अधस्तात्-वसति । आगतः । रमणीयम् ।

विभाषाऽवरस्य ॥४१॥

अवरस्यास्तातौ परतः विभाषा 'अव्' इत्ययमादेशः । अवस्तात् / अवरस्तात् । वसत्यागतो रमणीयम् ।

सप्तम्यादितिसृणामपि ग्रहणम् पूर्ववत् ।

संख्याया विधार्थे धा ॥४२॥

स्वार्थे । विधा=प्रकारः । स च क्रियाविषय एव । एकधा भुङ्क्ते ।

एकधा-एकेन = अद्वितीयेन प्रकारेण । अयमव्ययशब्दः । द्विधा गच्छति-एकस्या एव क्रियायाः द्वौ प्रकारौ ज्ञेयौ ।

अधिकरणविचाले च ॥४३॥

अधिकरणस्य = द्रव्यस्य विचाले = संख्यान्तरापादने गम्ये संख्यायाः स्वार्थे धा । एकं पञ्चधा भुङ्क्ते । पञ्च एकधा ।

एकं पञ्चधा = पञ्च भागान् कृत्वा ।

एकाद्धो ध्यमुञन्यतरस्याम् ॥४४॥

एकशब्दात्परस्य 'धा' इत्यस्य 'ध्यमुञ्' अन्यतरस्याम् । एकधा / ऐकध्यं कुरुते ।

ऐकध्यम्—ञित्त्वात् पूर्वस्याचो वृद्धिः ।

द्वित्र्योश्च धमुञ् ॥४५॥

अनयोः सम्बन्धिनोः 'धा' इत्यस्य 'धमुञ्' वा । द्विधा / द्वैधम् । त्रिधा / त्रैधम् ।

द्वैधम् । त्रैधम्—त्रित्वादादेरचो वृद्धिः ।

❀ (वा०) धमुञन्तात्स्वार्थे डदर्शनम् । मतिद्वैधानि संश्रयन्ते । मतित्रैधानि । स्वार्थे 'ड' विधानात् अत्र लिङ्गसंख्यायोगः ।

एधाच्च ॥४६॥

अनयोः सम्बन्धिनो 'धा' प्रत्ययस्य 'एधाच्' आदेशो भवत्यन्यतरस्याम् । द्विधा / द्वेधा / द्वैधम् इत्यादि ।

द्वेधा–द्वि + धा → एधाच् । भत्वादिकारलोपः । द्वैधम्—चकारात् पक्षे धमुञ् ।

याप्ये पाशप् ॥४७॥

कुत्सितार्थे वर्तमानात् शब्दात्पाशप् । याप्यो वैयाकरणो वैयाकरणपाशः ।

कुत्सितार्थ—याप्यः = कुत्सितः तदर्थे । याप्यन्ते–अपनीयन्ते गुणाः अस्मादित्यपादाने णिजन्ताद् √ या इत्यस्मात् ण्यत् ।

पूरणाद्भागे तीयादन् ॥४८॥

पूरणप्रत्ययो यस्तीयस्तदन्तात् प्रातिपदिकाद् भागे वर्त्तमानात्स्वार्थे 'अन्' । स्वरार्थं वचनम् । द्वितीयो भागः । तृतीयो भागः । पूरणग्रहणमुत्तरार्थम् न ह्यपूरणस्तीयोऽस्ति । मुखतीयादिरनर्थकः ।

स्वरार्थम्—नित्स्वरेणाद्युदात्तत्वार्थम् । भागः–अंशः । अनर्थकः–तीयशब्दः इति शेषः ।

प्रागेकादशभ्योऽच्छन्दसि ॥४९॥

प्रागेकादशभ्यः संख्यावाचिभ्यः पूरणप्रत्ययान्तेभ्यो भागे

वर्तमानेभ्यः स्वार्थे 'अन्' प्रत्ययः । अच्छन्दसि विषये । पञ्चमः । सप्तमः । नवमः । दशमः ।

प्रागेकादशभ्यः—'एकादश' संख्या शब्दात् प्राक् ये संख्या शब्दाः तेभ्यः । इदमपि सूत्रं नित्स्वरार्थम् ।

षष्ठाष्टमाभ्यां ञ च ॥५०॥

आभ्यां भागेऽभिधेयेऽच्छन्दसि विषये 'ञ्' प्रत्ययः चादन् । षष्ठो भागः षाष्ठः / षष्ठः । अष्टमो भागः आष्टमः / अष्टमः ।

षाष्ठः—ञित्त्वाद् वृद्धिः एवम् आष्टमः इत्यत्रापि ।

मानपश्वङ्गयोः कन् लुकौ च ॥५१॥

आभ्यां यथासंख्यं कन्-लुकौ च भवतः मानपश्वङ्गयोरभिधेययो । षष्ठको भागः, मानं चेत् । अष्टमो भागः पश्वङ्गं चेत् ।

मानम्—व्रीहि परिमितं सुवर्णम् । चकाराद् यथाप्राप्तमपि षाष्ठः । आष्टमः । अत्र 'ञ' प्रत्ययः ।

एकादाकिनिच्चासहाये ॥५२॥

अस्मादसहायवाचिनः स्वार्थे आकिनिच् प्रत्ययः । चात्कन् लुकौ च । एकाकी / एककः / एकः । असहायग्रहणं संख्याशब्दनिरासार्थम् । तदुपादाने हि द्विबह्वोर्न स्यात् । एकाकिनौ । एकाकिनः ।

कन् लुकौ—आकिनिचः 'कन्' आदेशः तथा पक्षे तस्य लुक् च । असहायता = परस्परव्यतिरिक्तसहायाभावः । सा द्वयोः बहूनाञ्च भवति ।

भूतपूर्वे चरट् ॥५३॥

भूतः पूर्वमिति विगृह्य 'सुप्सुपा' इति समासः । भूतपूर्वशब्दोऽतिक्रान्तकालवचनः । एतदर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे चरट् । भूतपूर्व आढ्यः आढ्यचरः । आढ्यचरी ।

'भूत' शब्दो वर्तमानेऽप्यर्थे वर्तते। 'पूर्व' शब्दो दिग्देशवाची। तेन 'भूतपूर्व' शब्दस्यार्थः व्यतीतः कालः। आढ्यचरः—आढ्य + चरट् टकारः इत्संज्ञकः। तस्य लोपः। 'चुटू' इत्यनेन च लोपविधेरनित्वान्न चकारलोपः। टित्त्वस्य फलम् स्त्रियां ङीप् आढ्यचरी। भूतपूर्वा आढ्या = समृद्धिशालिनी इत्यर्थः।

षष्ठ्या रूप्य च ॥५४॥

षष्ठ्यन्ताद् रूप्यः। चाच्चरट्। अत्र भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणम् देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः। देवदत्तचरः।

प्रत्ययार्थस्य—षष्ठ्यन्तस्य यः प्रतियोगी 'गौः' स प्रत्ययार्थो ज्ञेयः। देवदत्तरूप्यः गौर्न देवदत्तः।

अतिशायने तमबिष्ठनौ ॥५५॥

अतिशयनम्—अतिशायनम् = प्रकर्षः। निपातनाद्दीर्घः। प्रकृत्यर्थ-विशेषणं चैतत्। अतिशायनविशिष्टेऽर्थे वर्त्तमानात् प्रातिपदिकात् स्वार्थे एतौ। प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति। अयम् एषाम् अतिशयेन आढ्यः, आढ्यतमः। पटिष्ठः। यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदाऽपरः प्रत्ययः। देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। युधिष्ठिरः श्रेष्ठतमः कुरूणाम्।

अतिशयनम्—अति √ शी + ल्युट् (भावे) अति √ शी इत्यस्य प्रकर्षे वृत्तिः। द्रव्यस्य प्रकर्षः गुणद्वारेण न स्वतः। यथा शुक्लः पटः अत्र शुक्लत्वस्य प्रकर्षवशात् शुक्लतमः पटः इति भवति। पटिष्ठः—अयम् एषामतिशयेन पटुः इति पटु + इष्ठन् 'तुरिष्ठेमेयस्सु' इति टिलोपः।

अपरः—अतिशायने 'इष्ठन्' प्रत्ययः पूर्वं विहितः तस्मादपरः 'तमप्' इत्यर्थः। श्रेष्ठतमाय—अयम् एषामतिशयेन प्रशस्यः इति श्रेष्ठः। अयम् एषामतिशयेन श्रेष्ठः इति श्रेष्ठतमः।

तिङश्च ॥५६॥

अस्मादतिशायने तमप्। 'ङ्याप्प्रातिपदिका' धिकारात् न प्राप्नोतीति इदं वचनम्। अयमेषामतिशयेन पचति पचतितमाम्।

प्रचतितमाम् — पचति + तमप् अस्मात् 'किमेत्तिङव्यय-घादाम्वद्रव्यप्रकर्षे' इत्याम् । 'इष्ठन्' गुणवचने एव भवति न तिङन्तात् ।

द्विवचनविभज्योपपदे तरबीयसुनौ ।।५७।।

द्वयर्थे विभज्ये चोपपदे ङ्याप्प्रातिपदिकात् तिङन्ताच्च तरबीयसुनौ भवतः । यथासंख्यमत्र नेष्यते । अयमनयोरतिशयेनाढ्य आढ्यतरः । पचतितराम् । पटीयान् । विभज्ये—माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ।

द्वयोरर्थयोर्वचनम् द्विवचनम् । विभज्यः—पृथक् कर्त्तव्यः । यो गुणः अतिशयिता तस्मात्प्रत्ययो भवति । पटीयान्—अयम् अनयोरतिशयेन पटुः इति पटु + ईयसुन् । पाटलिपुत्रकेभ्यः—'पञ्चमी विभक्ते' इति पञ्चमी / एवं माथुराः पाटलिपुत्रकेभ्यः पटीयांसः ।

अजादी गुणवचनादेव ।।५८।।

इष्ठन्-ईयसुनी गुणवचनादेव भवतः । पटीयान् । पटिष्ठः । नेह—पाचकतरः ।

अयं प्रत्ययनियमः । प्रकृतेः पटुप्रभृतेः तरप्तमपावपि । पटुतरः । पटुतमः ।

तुश्छन्दसि ।।५९।।

तृन्-तृचोर्ग्रहणम् । त्रन्ताच्छन्दसि अजादी प्रत्ययौ । अगुणवचनादपि ज्ञायते । आसुतिं करिष्ठः । दोहीयसी धेनुः । 'भस्याढे……' पुंवत् । 'तुरिष्ठे…… ……' इति तृचो निवृत्तिः ।

करिष्ठः—अयमेषामतिशयेन कर्ता इति कर्तृ + इष्ठन् । दोहीयसी—इयमासामतिशयेन दोग्ध्री इति दोग्ध्री + ईयसुन् । 'भस्याढे तद्धिते' इति पुंवद्भावः—दोग्धृ 'तुरिष्ठेमेयस्सु' इति टेः तृचो लोपः । लोपे सति गकारस्य पूर्ववत् हकारः । दोहीयस् + ङीप् ।

प्रशस्यस्य श्रः ॥६०॥

अस्य 'श्र' आदेशः । विधानसामर्थ्यादगुणवचनेऽपि प्रशस्ये नियमो न प्रवर्त्तते । अयमेषामतिशयेन प्रशस्यः श्रेष्ठः । श्रेयान् ।

न प्रवर्त्तते—अगुणवचनात् प्रशस्यशब्दात् अजादि-प्रत्यययोः इष्ठन्-ईयसुनोः प्रसङ्गाभाव तसूत्रमेव व्यर्थं सत् अत्र एतौ प्रत्ययौ ज्ञापयति । श्रेष्ठः-प्रशस्य + इष्ठन् । श्रेयान्-अयम् अनयोरतिशयेन प्रशस्यः इति प्रशस्य + ईयसुन् । 'प्रकृत्यैकाच्' इति 'श्र' शब्दस्य प्रकृतिभावाप्रादनान्नात्र टिलोपः तेन 'आद्गुणः' इति गुणः ।

ज्य च ॥६१॥

प्रशस्यस्य 'ज्य' आदेशः अजाद्योः । ज्येष्ठः / ज्यायान् ।

ज्यायान् — प्रशस्य + ईयसुन् । 'ज्यादादीयसः' इति ईयसुनः ईकारस्य आकारः ।

वृद्धस्य च ॥६२॥

'ज्य' आदेशः । ज्येष्ठः / ज्यायान् । 'प्रियस्थिर……' इति वचनसामर्थ्यात् वर्षिष्ठः / वर्षीयान् ।

ज्येष्ठः—अयमेषामतिशयेन वृद्धः इति वृद्ध + इष्ठन् । वर्षिष्ठः-वृद्ध + इष्ठन् 'प्रियस्थिर…' इति सूत्रेण वृद्धस्य 'वर्ष' आदेशः । अत्र वर्षस्य टिलोपः । ज्यायान्—अयमनयोरतिशयेन वृद्धः ।

अन्तिकबाढयोर्नेदसाधौ ॥६३॥

अनयोर्यथासंख्यं नेद-साध' एतावादेशौ अजाद्योः । नेदिष्ठम् / नेदीयः । साधिष्ठम् / साधीयः ।

नेदिष्ठम्—इदमेषाम् अतिशयेनान्तिकम् अन्तिक + इष्ठन् । नेदीयः-इदमनयोः अतिशयेनान्तिकम् । साधिष्ठम् –अयमेषाम् अतिशयेन बाढम् अधीते इति बाढ + इष्ठन् । साधीयः—अयम् अनयोरतिशयेन बाढम् अधीते इति बाढ + ईयसुन् । पुरुषविशेषणे तु साधिष्ठः / साधीयान् ।

युवाल्पयोः कनन्यतरस्याम् ॥६४॥

अनयोर्वा कन् अजाद्योः । अयमेषामनयोर्वा अतिशयेन युवा अल्पो वा कनिष्ठः / कनीयान् । यविष्ठः । अल्पिष्ठः इत्यादि ।

कनिष्ठः—अयमेषामतिशयेन युवा-युवन् + इष्ठन् पक्षे **यविष्ठः** । **कनीयान्**–अयमनयोरतिशयेन युवा युवन् + ईयसुन् पक्षे **यवीयान्** । इत्यादि-अल्पीयान् ।

विन्मतोर्लुक् ॥६५॥

अनयोर्लुगजाद्योः । इदमेवाजादिसद्भावस्य ज्ञापकम् । स्रजिष्ठः / स्रजीयान् ।

ज्ञापकम्–एतत्सूत्रस्य सार्थकत्वायैव इष्ठन्-ईय नौ भवतः । स्रजिष्ठः–अयमेषामतिशयेन स्रग्वी–स्रग्विन् + इष्ठन् 'विन्' प्रत्ययस्य लोपः । 'मतुप्' इत्यस्योदाहरणम्–अयमेषाम् अतिशयेन त्वग्वान् इति त्वग्वत् + इष्ठन् = त्वचिष्ठः । अयमनयोरतिशयेन त्वग्वान् इति त्वचीयान् — त्वग्वत् + ईयसुन् । मतुपो लुक्, लुकि सति ककारस्य पूर्वभावः चकारः ।

प्रशंसायां रूपप् ॥६६॥

प्रशंसार्थे वर्तमानात्स्वार्थे रूपप् । वैयाकरणरूपः ।

प्रशंसा = स्तुतिः । प्रशस्तो वैयाकरण इति 'प्रकृत्यर्थस्य वैशिष्ट्यं' प्रशंसा भवति । वृषलरूपः । चोररूपः । दस्युरूपः । 'तिङश्च' इत्यनुवर्तनात् तिङन्तादपि–प्रशस्तं पचति इति पचतिरूपम् । प्रशस्तं पचतः पचतोरूपम् ।

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥६७॥

स्तोकेनापूर्णता पदार्थानामीषदसमाप्तिः । प्रकृतिविशेषणम् । तस्मात्स्वार्थे कल्पप्-देश्य-देशीयर् एते भवन्ति । ईषदसमाप्तः पटुः– पटुकल्पः / पटुदेश्यः / पटुदेशीयः ।

यत्र धातुव्यापारः ईषदसमाप्तः, तस्मिन्नुदाहरणे ईषदसमाप्तिः स्पष्टं लक्ष्यते यथा–ईषदसमाप्तं कृतम् कृतकल्पम् / कृतदेश्यम् / कृतदेशीयम् । तिङन्तादपि–पचतिकल्पम् ।

विभाषा सुपो बहुच् पुरस्तात्तु ॥६८॥

उक्तेऽर्थे वर्तमानात्सुबन्ताद् बहुच् प्रत्ययः । स च पुरस्तादेव न परतः । चित्करणमन्तोदात्तार्थम् । ईषदसमाप्तः पटुः बहुपटुः । पक्षे कल्पबादयोऽपि ।

उक्ते—ईषदसमाप्ते । अन्ये प्रयोगाः–बहुगुडो द्राक्षा । लघुर्बहुतृणं नरः । अत्र प्रकृतिवल्लिङ्गं भवति ।

प्रकारवचने जातीयर् ॥६९॥

सामान्यस्य भेदको विशेषः प्रकारः । तद्वचने स्वार्थे जातीयर् । प्रकारवति चायम् । थाल् पुनः प्रकारमात्रे । पटुप्रकारः पटुजातीयः । मृदुजातीयः ।

तद्वचने—तस्य द्योतने । उभयोः जातीयर्–थाल् इत्येतयोर्भेदे स्वभाव एव हेतुः ।

प्रागिवात्कः ॥७०॥

'इवे प्रतिकृतौ' इति वक्ष्यति । प्रागेतस्माद् यानित ऊर्ध्वमनुक्रमिष्यामः 'क' प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति—'अज्ञाते' इति । तिङन्तादयं नेष्यते । 'तिङश्च' इत्यनुवृत्तिरुत्तरसूत्रे एव ।

तिङन्तात्……एव—अयम्भावः प्रयोगदर्शनात् तिङन्तान्न 'कः' अपि तु 'अकच्' । 'तिङश्च' इत्यस्यानुवृत्तिर्नात्र, अपि तु 'अव्ययसर्वनाम्नाम् ……' इति सूत्रे एव भवति । अश्वकः — अज्ञातः अश्वः इत्यर्थे अश्व + क ।

अव्ययसर्वनाम्नामकच् प्राक् टेः ॥७१॥

अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेषु अकच् स च प्राक् टेः, न परतः। कापवादः। उच्चकैः। नीचकैः। सर्वनाम्नां खल्वपि— सर्वकः। विश्वकः। उभयके। 'प्रातिपदिकात्, सुपः' इति द्वयमिहानुवर्तते। तत्राभिधानतो व्यवस्था। क्वचित्प्रातिपदिकस्य प्राक् टेः प्रत्ययः, क्वचित् सुबन्तस्य। युष्मकाभिः। युष्मकासु। अत्र प्रातिपदिकस्य। त्वयका। त्वयकि। अत्र सुबन्तस्य।

*(वा०) तूष्णीमः काम् वाच्यः। तूष्णीकाम् आस्ते।

* (वा०) शीले कः मलोपश्च। तूष्णींशीलः तूष्णीकः। तिङोऽत्रानुवृत्तिः। पचतकि।

अभिधानतो व्यवस्था—'प्रकारवचने जातीयर्' इत्यस्मात् वचनम् अनुवर्तते तच्च व्यवस्थार्थम्। तेन यत्र प्रातिपदिकादर्थद्योतनं भवति, तत्र तस्मात् अन्यत्र सुबन्तात् 'अकच्' इति बोध्यम्। तूष्णीकः—यः स्वभावतः नियमतश्च तूष्णीम् आस्ते सः। पचतकि—पचति + अकच्।

कस्य च दः ॥७२॥

कान्तस्य प्रातिपदिकस्य अकच्-संयोगे दकारादेशः। सामर्थ्याच्चाव्ययग्रहणमनुवर्तते। न सर्वनाम्नः। धिक्-धकित्। पृथकत्।

अनुवर्तते—न सर्वनामग्रहणम्, ककारान्तस्य सर्वनाम्नोऽसम्भवात्। एव 'तिङन्तम्' इत्यपि न। पृथकत्-पृथक् + अकच्। सूत्रे चकारस्यैतत् प्रयोजनम्—अकच्-सन्नियोगे एव ककारस्य दकारः स्यान्नान्यत्र।

अज्ञाते ॥७३॥

अज्ञातत्वोपाधिके वर्तमानात् प्रातिपदिकात्तिङश्च स्वार्थे यथास्वम्। स्वेन रूपेण ज्ञाते विशेषेणाज्ञाते विधानमेतत्। 'कस्यायमश्वः' इति स्वामिसम्बन्धेनाज्ञातेऽश्वे प्रत्ययः। अश्वकः। पचतकि।

अज्ञातः--अज्ञातो विशेषो यस्य सः इति अज्ञातविशेषार्थकोऽत्र लक्षणया कृतोऽर्थः । न हि सर्वथाऽज्ञातोऽर्थः प्रयोगमर्हति, अतः यस्य वैशिष्ट्यमज्ञातं सोऽज्ञात इति विवक्षितः । अश्वकः--अश्व + क । पचतकि-कर्तृविशेषाज्ञानेऽयं प्रयोगः । एवम् उच्चकैः सर्वके इत्यादि । एषु अकच् ।

कुत्सिते ॥७४॥

कुत्सितो गर्हितः । प्रकृत्यर्थविशेषणम् । कुत्सितत्वोपाधिके वर्तमानात् स्वार्थे यथाविहितं प्रत्ययः ।

अश्वकः--अश्व + क । अयमश्वः स्वक्रियां न सम्यगनुतिष्ठति इति कुत्सा ।

संज्ञायां कन् ॥७५॥

कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् कन् । प्रत्ययान्तेन संज्ञा गम्यते चेत् । शूद्रकः । धारकः ।

शूद्रकः--शूद्र + कन् । नित्त्वादाद्युदात्तः । शूद्राचारं न आचरतीति कुत्सा ।

अनुकम्पायाम् ॥७६॥

कारुण्ये गम्ये सुबन्तात्तिङन्ताच्च यथास्वम् । पुत्रकः । वत्सकः । स्वपितकि ।

अनुकम्पा--कारुण्येन परस्यानुग्रहः । पुत्रकः, वत्सकः--अत्र कन् । अनुकम्पितः पुत्र इत्यर्थः । स्वपितकि--स्वपिति + अकच् ।

नीतौ च तद्युक्तात् ॥७७॥

सामादिर्नीतिः, तस्यां गम्यायां तद्युक्तात्--अनुकम्पायुक्तात् यथास्वम् । हन्त, ते धानकाः । हन्त, ते तिलकाः । एहकि । अद्धकि । अनुकम्प्यमानो दानेनाराधयति ।

धानकाः—धाना + क । 'केऽणः' इति ह्रस्वत्वम् आकारस्य । एहकि–एहि + अकच् । अद्धकि–अद्धि + अकच् । अनुकम्प्यमानः—देवदत्तादिः । अनेन सूत्रेण व्यवहितेभ्योऽपि 'धाना' इत्यादिभ्यः प्रत्ययो भवति ।

बह्वचो मनुष्यनाम्नष्ठज्वा ।।७८।।

बह्वचः प्रातिपदिकात् मनुष्यनामधेयाद्वा ठच् प्रत्ययो भवति अनुकम्पायां चान्नीतौ । देविकः । देवदत्तकः ।

देविकः–देवदत्त + ठच्, । ठस्य 'इक' 'ठाजादावूर्ध्वं द्वितीयादचः' इति दत्तशब्दस्य लोपे कृते 'यस्येति च' इत्यकारलोपः । पक्षे कन् । अनुकम्पितः, आराधितो वा देवदत्त इत्यर्थः ।

घनिलचौ च ।।७९।।

पूर्वेण विकल्पे प्राप्ते वचनम्। बह्वचो मनुष्यनाम्नो घन्-इलच्, चाद्यथाप्राप्तम् । अनुकम्पायां नीतौ च । देवियः / देविलः / देविकः / देवदत्तकः ।

देवियः–देवदत्त + घन् घकारस्य इय । 'ठाजादावूर्ध्वम् ......' इति 'दत्त' इत्यस्य लोपे 'यस्येति च' इत्यकारलोपः । एवं देविलः ।

प्राचामुपादेरडज्वुचौ च ।।८०।।

पूर्ववत्सर्वमनुवर्तते । 'उप' आदिर्यस्य तस्माद् बह्वचो मनुष्यनाम्नः अडच्—वुच् एतौ भवतः । चाद् घन्-इलचौ, ठच् वा । उपडः / उपकः / उपियः / उपिलः / उपिकः / उपेन्द्रदत्तकः । प्राचां ग्रहणं पूजार्थम् ।

उपडः—उपेन्द्रदत्त + अडच् । 'ठाजादावूर्ध्वम्.......' इति इन्द्रदत्तस्य लोपः । 'यस्येति च' इत्यकार लोपः । उपकः—उपेन्द्रदत्त + वुच् वुकारस्य अक । शेषं पूर्ववत् । अनुकम्प्यमानः उपेन्द्रदत्तः इत्यर्थः ।

जातिनाम्नः कन् ॥८१॥

"बह्वचः इति नानुवर्त्तते । जातिशब्दो यो मनुष्यनामा व्याघ्रादिः, तस्मादनुकम्पायां नीतौ च कन् । व्याघ्रकः । सिंहकः ।

जातिनाम्नः—जातिरेव नाम तस्मात् । ये शब्दाः जात्यन्तरे प्रसिद्धाः, नामत्वेन मनुष्येण गृहीताः इत्यर्थः । व्याघ्रकः—व्याघ्र + कन् । 'वा' इत्यनुवृत्तेः 'इलच्' अपि दृश्यते—व्याघ्रिलः ।

अजिनान्तस्योत्तरपदलोपश्च ॥८२॥

अजिनान्तात् मनुष्यनाम्नः अनुकम्पायां कन्, तस्य चोत्तरपदलोपश्च । व्याघ्राजिनो नाम मनुष्यः सोऽनुकम्पितः व्याघ्रकः ।

व्याघ्राजिनः—व्याघ्रस्याजिनम् व्याघ्राजिनम् । व्याघ्राजिनम् इव अजिनमस्य इति बहुव्रीहौ, उपमानभूतस्य पूर्वस्य अजिनस्य लोपः । व्याघ्रकः—व्याघ्राजिन + कन् उत्तरपदस्य अजिनस्य लोपः ।

ठाजादावूर्ध्वं द्वितीयादचः ॥८३॥

'लोपः' इत्यनुवर्तते । अत्र प्रकरणे यः ठः अजादिश्च प्रत्ययः, तस्मिन् परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपः । अनुकम्पितो देवदत्तः—देविकः / देवियः / देविलः ।

❀(वा०) अनजादौ वा लोपः । देवकः / देवदत्तकः ।

देवकः—अत्र कन् प्रत्ययः ।

❀(वा०) चतुर्थादच ऊर्ध्वस्य लोपः । अनुकम्पितो बृहस्पतिदत्तः इति बृहस्पतिकः इत्यादि ।

❀(वा०) लोपः पूर्वपदस्य च । अनुकम्पितो देवदत्तः इति दत्तिकः / दत्तिलः इत्यादिः ।

❀(वा०) विनापि प्रत्ययेन । देवदत्तः / देवः / दत्तः ।

❀(वा०) उवर्णाल्ल इलस्य च । भानुदत्तः / भानुलः । तदाह श्लोकरूपेण—

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ।।

❀(वा०) एकाक्षरपूर्वपदानामुत्तरपदलोपः । वागाशीः / वाचिकः ।

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ।।८४।।

शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये तृतीयादच ऊर्ध्वं परस्य लोपः । अनुकम्पितः शेवलदत्तः शेवलिकः / शेवलियः / शेवलिलः । एवं सुपरिक इत्यादिः ।

❀(वा०) शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धीनामिति वक्तव्यम् । अनुकम्पितः शेवलेन्द्रदत्तः शेवलिकः । अत्र शेवल + इन्द्रदत्तः इति दशायामेव 'इन्द्रदत्त' इत्यस्य लोपः । एवम् अनुकम्पितः सुपर्याशीर्दत्तः सुपरिकः । अत्रापि यण् सन्धेः प्रागेव आशीर्दत्तस्य लोपः । एवं विशालिकः । वरुणिकः । अर्यमिकः ।

अल्पे ।।८५।।

परिमाणापचये वर्तमानात् प्रातिपदिकाद्यथास्वम् । अल्पं तैलं तैलकम् । पचतकि ।

अल्पः=परिणामापचयः । पचतकि—अल्पं पचति । 'तिङश्च' इत्यनुवर्तते ।

ह्रस्वे ।।८६।।

ह्रस्वेऽर्थे वर्तमानात्प्रातिपदिकाद्यथाविहितं प्रत्ययः । दीर्घप्रतियोगी ह्रस्वः । वृक्षकः ।

वृक्षकः—ह्रस्वो वृक्षः ।

संज्ञायां कन् ॥८७॥

ह्रस्वत्वहेतुका या संज्ञा तस्यां कन् प्रत्ययः। वंशकः। दण्डकः।

ह्रस्वो वंशः। ह्रस्वो दण्डः।

कुटीशमीशुण्डाभ्यो रः ॥८८॥

संज्ञा नानुवर्तते। एभ्यो ह्रस्वार्थे र प्रत्ययः। ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः। स्वार्थिकत्वेऽपि पुंस्त्वम्, लोकाश्रयत्वाल्लिङ्गस्य।

पुंस्त्वम्—तेन कुटयादिगतं स्त्रीत्वं निवर्तते।

कुत्वा डुपच् ॥८९॥

कुतू शब्दाद् ह्रस्वत्वे द्योत्ये डुपच् प्रत्ययः। ह्रस्वा कुतूः कुतुपः। चर्ममयं स्नेहभाजनमुच्यते।

कुतूः—आवपनम्। वृत्तौ 'कुतुपम्' इति नपुंसकम् लिखितम्।

कासूगोणीभ्यां ष्टरच् ॥९०॥

आभ्यां ह्रस्वत्वे द्योत्ये ष्टरच्। षो ङीबर्थः। ह्रस्वा कासूः कासूतरी। गोणीतरी। कासूरायुधविशेषः, शक्तिरिति।

कासूतरी—कासू + ष्टरच् = कासूतर + ङीष्। ष्टरच् इत्यत्र षकारलोपे टकारस्य तकारः।

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥९१॥

'ह्रस्वे' इति निवृत्तम्। वत्स, उक्षन्, ऋषभ, अश्व एभ्यस्तनुत्वे वर्तमानेभ्यः ष्टरच्। यस्य गुणस्य प्रभावाद् द्रव्ये शब्दनिवेशस्तस्य तनुत्वे प्रत्ययः। वत्सतरः इत्यादि। प्रथमवया वत्सः। तस्य तनुत्वं

द्वितीयवयसः प्राप्तिः । तरुण उक्षा तस्य तनुत्वं तृतीयवयःप्राप्तिः । अश्वेनाश्वायामुत्पन्नोऽश्वः । तस्य तनुत्वमन्यपितृकता । अनड्वान् ऋषभस्तस्य तनुत्वं भारोद्वहने मन्दशक्तिता ।

वत्सतरः—एवम् उक्षतरः । । अश्वतरः । ऋषभतरः ।

किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ॥९२॥

किमादिभ्यो द्वयोरेकस्य निर्धारणे डतरच् । निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः । कतरः भवतोः कारकः । पटुः । देवदत्तो वा । यतरः । ततरः । क्रियया गुणेन संज्ञया वा समुदायादेकस्य पृथक्करणं निर्धारणम् ।

कतरः—किम् + डतरच् । यतरः—यत् + डतरच् । ततरः—तत् + डतरच् । सर्वत्र डित्वाट्टिलोपः । द्वयोरेकः निर्धार्यमाणः ।

वा बहूनां जातिपरिप्रश्ने डतमच् ॥९३॥

बहूनामेकस्य निर्धारणे गम्ये जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो वा डतमच् । कतमो भवतां कठः ? ततम आगच्छतु । वा वचनमकजर्थम् । यको भवतां कठः सक आगच्छतु । महाविभाषाऽनुवर्तते । को भवतां कठः ? जाति-परिप्रश्ने किम् ? को भवतां चैत्रः ?

कठः–'गोत्रञ्च चरणैः सह' इति कठस्य जातित्वम् । महाविभाषा–तेन प्रत्यये विकल्पिते पक्षे वाक्यमपि । परिप्रश्न इति किम एव विशेषणम् । जातिस्तु सर्वस्यैव । केचिदाचार्याः 'डतरच्' इत्यपीच्छन्ति कतरो भवतां कठः । तदुक्तम्–कतरकतमौ जातिपरिप्रश्ने ।

एकाच्च प्राचाम् ॥९४॥

एकशब्दात्प्राचां मते एतौ स्वस्मिन् विषये । चकारः स्वविषयार्थः । द्वयोर्निर्धारणे डतरच् । जातिर्नानुवर्तते । एकतरो भवतोर्देवदत्तः । एकतमो भवतां । 'प्राचाम्' ग्रहणं पूजार्थम् ।

स्वविषयार्थः—स्वः = आत्मीयः । 'इतरच्' इत्यस्यानुकर्षणार्थश्च । पूजार्थम्—विकल्पार्थं न 'वा' इत्यस्यानुवर्तनात् ।

अवक्षेपणे कन् ॥९५॥

अवक्षिप्यतेऽनेन तदवक्षेपणम् । तस्मिन् वर्तमानात्प्रातिपदिकात् कन् । व्याकरणकेन नाम त्वं गर्वितोऽसि । प्रागिवीयस्य पूर्णोऽवधिः ।

अवक्षेपणम् = निन्दा । व्याकरणं यस्यावलेपम् आवहति तस्यावक्षेपणं भवत्येव । एवं याज्ञिक्यकेन नाम गर्वितः । परस्य निन्दायामिदमुदाहरणम् । कुत्सितः देवदत्तः इति देवदत्तकः । अत्र 'कुत्सिते' इत्यनेन कन् ।

इवे प्रतिकृतौ ॥९६॥

इवार्थे यत्प्रातिपदिकं तस्मात् कन् । इवार्थः सादृश्यम् । तस्य विशेषणं प्रतिकृतिग्रहणम् । प्रतिकृतिः = प्रतिरूपकम्, प्रतिच्छन्दकम् । अश्व इवायम् अश्वप्रतिकृतिः अश्वकः । उष्ट्रकः । प्रतिकृताविति किम् ? गौरिव गवयः ।

प्रतिच्छन्दकम्—तृणचर्मकाष्ठादिनिर्मितम् । गवयो गोः सदृशः परं न गोः प्रतिकृतिः ।

संज्ञायां च ॥९७॥

इवेत्यनुवर्तते । इवार्थे गम्ये समुदायेन चेत्संज्ञा गम्यते । अप्रकृत्यर्थ आरम्भः । अश्वसदृशस्य संज्ञा अश्वकः । गर्दभकः ।

अश्वकः—अश्वभिन्नोऽश्वसदृशसंज्ञकः ।

लुम्मनुष्ये ॥९८॥

संज्ञायां विहितस्य कनो मनुष्येऽभिधेये लुब् भवति । चञ्चेव

मनुष्यः चञ्चा । वध्रिका । दासी । देवपथादेराकृतिगणत्वात्तस्यैवायं प्रपञ्चः ।

चञ्चा–तृणपुरुषः । चञ्चेव–चञ्चासदृशः । 'लुपि युक्तवद् व्यक्तिवचने' इति स्त्रीत्वम् । वध्रिका—चर्मपट्टिका ।

जीविकार्थे चापण्ये ॥९९॥

जीविकार्थं यदपण्यं तस्मिन् वाच्ये कनो लुप् । विक्रीयते यत्तत्पण्यम् । वासुदेवः । राघवः । स्कन्दः । आदित्यः । देवलकानां जीविकार्था देवप्रतिकृतयः उच्यन्ते । देवपथादेरेवायं प्रपञ्चः ।

वासुदेवः—देवपूजकः याः प्रतिमाः प्रतिगृह्य गृहाद् गृहं भिक्षमाणा अटन्ति ताः जीविकार्थाः भवन्ति । तत्र जातस्य 'कन्' प्रत्ययस्य लुक् ।

देवपथादिभ्यश्च ॥१००॥

इवे प्रतिकृतौ संज्ञायां च विहितस्य कनो देवपथादिभ्य उत्तरस्य लुप् । देवपथः । हंसपथः ।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥

अर्चासु—शिवः । विष्णुः । चित्रकर्मणि—अर्जुनः । दुर्योधनः । ध्वजेषु—कपिः । गरुडः इत्यादि ।

देवपथः—देवानां पन्थाः = देवपथम् तस्य प्रतिकृतिः देवपथ + कन् तस्य लुप् । अर्चासु = प्रतिमासु अर्थात् गृहेषु मन्दिरेषु च याः पूज्यन्ते तासु । सर्वत्र प्रतिकृतयः एव लक्ष्यन्ते ।

वस्तेर्ढञ् ॥१०१॥

प्रतिकृतौ वाऽप्रतिकृतौ वा वस्ति शब्दाद् ढञ् इवार्थे । वस्तिरिव वास्तेयः ।

वस्तिः—दृतिविकारः । स्त्रियां ङीप् वास्तेयी ।

शिलाया ढः ॥१०२॥

शिलाशब्दादिवार्थे द्योत्ये ढः । शिलेव दधि शिलेयम् । केचित् ढञमपीच्छन्ति शैलेयम् ।

शिलेयम्–शिला + ढ । शैलेयम्–ञित्त्वाद् वृद्धिः ।

शाखादिभ्यो यः ॥१०३॥

एवमादिभ्यो यः इवार्थे । शाख्यः । मुख्यः । जघन्यः ।

शाख्यः—शाखेव=शाखासदृशः । वृत्तौ 'यः' इत्यस्य स्थाने 'यत्' इति पाठः ।

द्रव्यं च भव्ये ॥१०४॥

द्रव्यं निपात्यते भव्येऽर्थे । द्रुशब्दादिवार्थे 'य' प्रत्ययो निपात्यते । द्रव्यम् = भव्यः, आत्मवान् । अभिप्रेतानामर्थानां पात्र-भूत उच्यते ।

द्रव्यो राजपुत्रः । द्रव्यो माणवकः इति चोदाहरणम् अत्र बोध्यम् । द्रु + य उकारस्य गुणोऽवादेशश्च । अत्रापि वृत्तौ 'यत्' इत्युक्तम् ।

कुशाग्राच्छः ॥१०५॥

अस्मादिवार्थे छः । कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः ।

कुशाग्रसदृशी सूक्ष्मा बुद्धिरित्यर्थः ।

समासाच्च तद्विषयात् ॥१०६॥

इवार्थ विषयात्समासार्थादपरस्मिन्निवार्थे एव छः । काकता-लीयम् । अजाकृपाणीयम् । अतर्कितोपनतं चित्रीकरणमुच्यते तत्कथम्

काकस्यागमनं यादृच्छिकम्, तालस्य च पातः । तेन च पतता काको हतः । एवं मैत्रस्य तत्रागमनम् चौरस्य चोपनिपातः तेन च तस्य वधः कृतः । तत्र यो मैत्रस्य चौरस्य च सङ्गमः स काकतालसम इत्येक उपमार्थः । यश्च मैत्रस्य वधः स काकसम इव इति द्वितीय उपमार्थः । तत्र प्रथमे समासः, द्वितीये प्रत्ययः सुप्सुपेति समासः ।

अतर्कितोपनतम् = अचिन्तितमुपस्थितम् । चित्रीकरणम्—आश्चर्यकरम् । अत्रोदाहरणेषु समासार्थादपर इवार्थो विद्यते ।

शर्करादिभ्योऽण् ।।१०७।।

इवार्थे । शर्करेव शार्करम् । कापालिकम् ।

शार्करम्—शर्करा + अण् । नपुंसकत्वमभिधानात् । कापालिकम्—कपालिका इव ।

अङ्गुल्यादिभ्यष्ठक् ।।१०८।।

इवार्थे । अङ्गुलीव आङ्गुलिकः । शाष्कुलिकम् ।

शाष्कुलिकम्—शष्कुलमिव शष्कुल + ठक् ।

एकशालायाष्ठजन्यतरस्याम् ।।१०९।।

एकशालाशब्दादिवार्थेऽन्यतरस्यां ठच् । पक्षेऽनन्तरष्ठक् । एकशालेव एकशालिकः / ऐकशालिकः ।

ऐकशालिकः—एकशाला + ठक् कित्त्वादादेरचो वृद्धिः ।

कर्कलोहितादीकक् ।।११०।।

आभ्यामिवार्थे ईकक् । शुक्लोऽश्वः कर्कः । कार्कीकः । लौहितीकः । स्वयमलोहितोऽप्युपाश्रयवशात्तथा प्रतीयते ।

उपाश्रयः = उपादानभूतो लाक्षादिः ।

प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ॥१११॥

प्रत्न, पूर्व, विश्व, इम एभ्य इवार्थे 'थाल्' छन्दसि । तं प्र॒त्नथा॑ वि॒श्वथे॑मथा॑ ।

विश्वथेमथा—विश्वथा + इमथा । 'इम' इति इदमः समानार्थः शब्दः छन्दसि प्रसिद्धः ।

पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥११२॥

अधर्मार्थप्रधाना अनियतवृत्तयः संघाः पूगाः । पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात् स्वार्थे ञ्यः । लौहध्वज्यः पुमान् । लोहध्वजाः । शैब्यः । शिबयः ।

लौहध्वज्यः—लोहध्वज + ञ्यः । लोहध्वजाः—'ञ्यादयस्तद्राजाः' इति तद्राज' संज्ञा तेन बहुवचने 'ञ्य' इत्यस्य लुक् । एवं शिबयः । अधर्मार्थप्रधानाः–वृत्तौ तु 'अर्थकामप्रधानाः' इत्युल्लिखितम् । अनियतवृत्तयः--न नियता वृत्तिः = जीविका येषां ते ।

व्रातच्फञोरस्त्रियाम् ॥११३॥

नानाजातीया अनियतवृत्तयः संघाः व्राताः । तेभ्यः च्फञन्तेभ्यश्च स्वार्थे ञ्यः । कापोतपाक्यः । कापोतपाक्यौ । कपोतपाकाः । च्फञः—कौञ्जायन्यः । कौञ्जायन्यौ । कौञ्जायनाः । अस्त्रियां किम् ? कपोतपाकी ।

कपोतपाकाः—बहुवचने 'ञ्य' प्रत्ययस्य लुक् । कौञ्जायन्यः–कुञ्जस्य गोत्रापत्यमित्यर्थे कुञ्ज + च्फञ् = कौञ्जायनः । स एव कौञ्जायन + ञ्य ।

आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात् ॥११४॥

आयुधजीविनां सङ्घः स वाहीकैर्विशेष्यते । वाहीकेषु य

आयुधजीविसङ्घः, तद्वाचिनः प्रातिपदिकाद् ब्राह्मणराजन्यवर्जितात्स्वार्थे 'ञ्यट्' प्रत्ययो भवति । ब्राह्मणे विशेषग्रहणम् । राजन्ये स्वरूपमेव । टो ङीबर्थः, तेन 'अस्त्रियाम्' इति न वर्तते । कौण्डीवृस्यः । कौण्डीवृस्यौ । कौण्डीवृसाः । मालव्यः । मालव्यौ । मालवाः ।

सूत्रे वाहीकेषु इति निर्धारणे सप्तमी । निर्धारणं च समानजातीयस्यैव । अथवा अधिकरणे सप्तमी वाहीकदेशे य आयुधजीविसङ्घः । ब्राह्मणे विशेषग्रहणं न भवति । ब्राह्मणनामकस्यायुधजीविसंघस्य वाहीकेष्वभावात् । स्त्रियाम् कौण्डीवृस्य + (टित्वात्) ङीप् । 'हलस्तद्धितस्य' इति यकारलोपः =कौण्डीवृसी ।

वृकाट्टेण्यण् ॥११५॥

अस्मादायुधजीविनः स्वार्थे टेण्यण् प्रत्ययः । वार्केण्यः । वार्केण्यौ । वृकाः ।

टेण्यण्—टकारो ङीवर्थः, णकारो वृद्ध्यर्थश्च । स्त्रियां वार्केणी ।

अत्र आयुधजीविसङ्घग्रहणं तेन जातिवाचाकान्न भवति—

कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ।

दामन्यादित्रिगर्तषष्ठाच्छः ॥११६॥

दामन्यादिभ्यः प्रातिपदिकेभ्यः त्रिगर्तषष्ठेभ्यश्च आयुधजीविसंघवाचिभ्यः स्वार्थे छः । येषामायुधजीविनां संघानां षडन्तवर्गाः, तत्र च त्रिगर्तः षष्ठो येषां ते त्रिगर्तषष्ठा उच्यन्ते । तेषु चेयं स्मृतिः—

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
कौष्टकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जानकिः ॥

दामन्यादिभ्यः—दामनीयः । दामनीयौ । दामनयः । औलपीयः । त्रिगर्तषष्ठेभ्यः कौण्डोपरथीयः । दाण्डकीयः । क्रौष्टकीयः । जालमानीयः । ब्रह्मगुप्तीयः । जानकीयः ।

अन्तर्वर्गाः = अन्तर्गणाः । त्रिगर्तषष्ठाः–आयुधजीविनां सङ्घाः । अस्मिन् संघे जानकिः त्रिगर्तवर्गः स एव श्लोके षष्ठः परिगणितः । दामनयः– बहुवचने लुक् ।

पर्श्वादियौधेयादिभ्यामणञौ ॥११७॥

पर्श्वादिभ्यो यौधेयादिभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थेऽणञौ । पार्शवः । पार्शवौ । पर्शवः । आसुरः । आसुरौ । असुराः । योधेयः । शौक्रेयः इत्यादि ।

पर्शवः–बहुवचने जातस्याण् प्रत्ययस्य तद्राजत्वात् लुक् । अण्-अञोः स्वरे भेदः ।

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥११८॥

आयुधजीविसंघादिति निवृत्तम् । अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे अञ् । अभिजितोऽपत्येऽण् तदन्ताद्यञ् । आभिजित्यः । आभि-जित्यौ । आभिजिताः । वैदभृत्यः । वैदभृताः । शालावत्यः । शाला-वताः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः ।

आभिजित्यः–अभिजयति इति अभिजित् । अभिजितोऽपत्यम् अभि-जित् + अण् = आभिजितः स एव आभिजित + यञ् । आभिजिताः– बहुवचने यञो लुक् । विदभृत्–विदं बिभर्ति विदभृत् । शालावत् इत्यादयो-मतुबन्ताः ।

※ (वा०) गोत्र प्रत्ययस्याणो ग्रहणमिष्यते । अत्र न भवति–आभिजितो मुहूर्त्तः ।

ञ्यादयस्तद्राजाः ॥११९॥

पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतः प्रभृति ये प्रत्ययास्ते तद्राज-संज्ञाः भवन्ति । तद्राजप्रदेशाः 'तद्राजस्य बहुषु' इत्येवमादयः ।

प्राग्दिशोऽनद्यतने विभाषा ज्य च जाति नाम्नो वस्तेरेकोनविंशतिः (११९)

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
पञ्चमाध्यायस्य तृतीयः पादः ।

तद्राजसंज्ञाकरणाद् बहुवचने लुक् । पर्शवः । आभिजिताः इत्यादि ।

पञ्चमाध्यायस्यास्मिन् तृतीये पादे प्राग्दिशो विभक्तिः, अनद्यतने र्हिलन्यतरस्याम्, विभाषाऽवरस्य, ज्य च, जातिनाम्नः कन् इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा वस्तेर्ढञ् इत्यत आरभ्य एकोनविंशतिः सूत्राणीति संकलनेन एकोनविंशत्युत्तरशतं (११९) सूत्राणि सन्ति ।

इति काशिकावृत्तिसारसुधायां
पञ्चमाध्यायस्य तृतीयः पादः ।

अथ पञ्चमाध्याये चतुर्थः पादः

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ॥१॥

पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययः । तत्संनियोगे चान्त्यस्य लोपः । यस्येति लोपनैव सिद्धे पुनर्वचनमनैमित्तिकार्थम् । यस्येति लोपः परनिमित्तकः । तस्य स्थानिवद्भावात् 'पादः पत्' इति पत् न स्यात् । अस्य त्वनैमित्तिकत्वान्न स्थानिवत्त्वम् । द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति । द्वे द्वे शते ददाति द्विशतिकां ददाति ।

संख्यादेः—आदिशब्दोऽवयवार्थः । **परनिमित्तकः**–ईति तद्धिते चानेन लोपकरणात् । **द्वौ द्वौ**–वीप्सायां द्वित्वम् । **द्विपदिका**—द्विपाद + वुन् पादस्याकारलोपः 'पत्' इत्यादेशश्च वुकारस्य अक = द्विपदक + स्त्रियां टाप् ककारात् पूर्वस्याकारस्य इकारश्च । स्त्रीत्वं लोकात् ।

अन्यत्रापि भवति–द्विमोदिकां ददाति ।

दण्डव्यवसर्गयोश्च ॥२॥

दमनं दण्डः । दानं व्यवसर्गः । अनयोर्गम्यमयोः पादशतान्तस्य संख्यादेर्वुन् प्रत्ययः, अन्त्यलोपश्च । अवीप्सार्थोऽयमारम्भः । द्वौ पादौ दण्डितः द्विपादिकां दण्डितः । त्रिपादिकाम् । द्विशतिकाम् । द्वौ पादौ व्यवसृजति द्विपादिकां व्यवसृजति । द्विशतिकाम् ।

दण्डमात्रे, दानमात्रे चानेन वुन् भवतीति पूर्वसूत्राद्विशेषः ।

स्थूलादिभ्यः प्रकारवचने कन् ॥३॥

जातीयरोऽपवादः । स्थूलप्रकारः स्थूलकः । अणुकः । माषकः ।

* (वा०) चञ्चद्बृहतोरुपसंख्यानम् । चञ्चत्प्रकारः चञ्चत्कः । बृहत्कः ।

प्रकारः = विशेषः । अर्थाद् भेदः सादृश्यं च । स्थूलकः–एतेऽपि प्रकारे कन्प्रत्ययान्ताः प्रयोगाः दृश्यन्ते–कृष्णकाः तिलाः । यवकाः व्रीहयः । गोमूत्रकम् = गोमूत्रवर्णम् आच्छादनम् । जीर्णकाः शालयः ।

अनत्यन्तगतौ क्तात् ॥४॥

अत्यन्तगतिः = अशेषेण सम्बन्धः । तदभावोऽनत्यन्तगतिः । तस्यां गम्यायां क्तान्तात् कन् । भिन्नकः । छिन्नकः ।

अशेषेण — व्याप्तिरूपेण । भिन्नकः — भिन्नप्रकारः ईषद्भिन्नः इत्यर्थः ।

न सामिवचने ॥५॥

सामिवचने उपपदे क्तान्तात् कन् प्रत्ययो न भवति । सामिकृतम् । सामिभुक्तम् । वचनग्रहणं पर्यायार्थम् । अर्धकृतम् । नेमकृतम् । सामिवचने प्रतिषेधानर्थक्यम्, प्रकृत्याभिहितत्वात् । एवं तर्हि नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः । किं तर्हि, स्वार्थिकस्य । केन पुनः स्वार्थिकः कन् विहितः ? एतदेव ज्ञापकं भवति स्वार्थे कन् इति । तत्र यदेतदुच्यते–'एवं सूत्रमभिन्नतरकं भवति । एतर्हि बहुतरकं व्याप्यते ।' इत्येवमादि तदुपपन्नं भवति ।

'सामि' उच्यते येन तत् सामिवचनम् । अर्धकृतम्–अर्धं कृतम् इति कर्मधारयः एवं नेमं कृतम् इत्यपि । अभिन्नतरकम्, बहुतरकम्–एतौ भाष्यकारप्रयोगौ । अत्र स्वार्थे कन् ।

बृहत्या आच्छादने ॥६॥

'कन्' अनुवर्तते न प्रतिषेधः । बृहतीशब्दादाच्छादने वर्तमानात् स्वार्थे कन् । बृहतिका । नेह बृहती छन्दः ।

बृहतिका = प्रावारः । बृहती + कन् + टाप् 'केऽणः' इति ह्रस्वः ।

अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः ॥७॥

अषडक्ष, आशितङ्गु, अलंकर्म, अलम्पुरुष एभ्योऽध्युत्तरपदाच्च स्वार्थे ख प्रत्ययः । अविद्यमानानि षडक्षीण्यस्येति बहुव्रीहिः । समासान्तः षच् ततः खः अषडक्षीणो मन्त्रः । यौ द्वाभ्यामेव क्रियते न बहुभिः । आशिता गावोऽस्मिन् वने आशितङ्गवीनम् । निपातनात् पूर्वपदस्य 'मुम्' आगमः । अलं कर्मणे अलङ्कर्मीणः । एवम् अलम्पुरुषीणः । अध्युत्तरपदस्तत्पुरुषः । अधिशब्दः शौण्डादिषु । राजाधीनः ।

अलंकर्मीणः—'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति समासः एवं 'अलम्पुरुषीणः' इत्यपि । अलम् पुरुषाय इति विग्रहः । राजाधीनः— राजन्यधि इति विग्रहे 'सप्तमी शौण्डैः' इति समासः ।

विभाषाञ्चेरदिक्स्त्रियाम् ॥८॥

अञ्चत्यन्तात्प्रातिपदिकाददिक् स्त्रियां वर्तमानात्स्वार्थे विभाषा 'ख' प्रत्ययः । प्राक्–प्राचीनम् । प्रत्यक्—प्रतीचीनम् । अदिक् स्त्रियां किम् ? प्राची दिक् ।

दिग्भिन्ने स्त्रीत्वे भवति–प्राचीना ब्राह्मणी । स्त्रीलिङ्गातिरिक्ते दिग्वाचिन्यपि भवति–प्राचीनं दिग्रमणीयम् । अत्र 'तद्धितश्चासर्वविभक्तिः' इति स्त्रीत्वाभावः ।

जात्यन्ताच्छ बन्धुनि ॥९॥

जात्यन्ताद् बन्धुनि वर्त्तमानात्स्वार्थे छः । बध्यतेऽस्मिन्निति बन्धुशब्देन द्रव्यमुच्यते । ब्राह्मणजातिर्येन बध्यते तद् बन्धु द्रव्यम् । ब्राह्मणजातीयः इति ब्राह्मणादिरेवोच्यते । नेह—ब्राह्मणजातिः शोभना ।

बध्यते = नियम्यते—अस्वतन्त्रीक्रियते । क्रियाशब्दोऽयमित्यर्थः । आप्तवाचको बन्धुः पुंल्लिङ्गः । येन बध्यते—वृत्तौ 'बध्यते' इत्यस्य स्थाने 'व्यज्यते' इति पाठः । ब्राह्मणजातीयः—'ब्राह्मणः' जातिर्यस्य स ब्राह्मण-जातिः + छ । स्वार्थे एवायं प्रत्ययः । ब्राह्मणजातिः शोभना—ब्राह्मणजातौ षष्ठीतत्पुरुषः ।

स्थानान्ताद्विभाषा सस्थानेनेति चेत् ॥१०॥

स्थानान्ताद्विभाषा छः सस्थानेनेति चेत् । स्थानान्तमर्थवद् भवति । सस्थान इति तुल्य उच्यते समानं स्थानः । सस्थानेनेति किम् ? गोस्थानम् ।

सस्थानेन—समानं स्थानं यस्य सः सस्थानः । अस्मात् करणे तृतीया सस्थानशब्दवाच्येनार्थेनेत्यर्थः । पितृस्थानीयः—पितुरिव स्थानमस्येति पितृ-स्थानः अस्मात् स्वार्थे छः । गोस्थानम्—अत्र स्थानं देशः ।

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥११॥

किम एकारान्तात्तिङन्तादव्ययेभ्यश्च यो विहितो घः स किमेत्तिङव्ययघः तदन्तात्प्रातिपदिकादद्रव्यप्रकर्षे आमु प्रत्ययः । क्रिया-गुणयोरेवायं प्रत्ययः । किंतराम् । पूर्वाह्णेतराम् । पचतितराम् । उच्चैस्तराम् । अद्रव्यप्रकर्षे किम् ? उच्चैस्तरस्तरुः ।

घः—'तरप्तमपौ घः' इति सूत्रेण तरप्-तमप्' इत्यनयोः 'घ' संज्ञा विहिता । किंतराम्—इदं किम्, इदं किम् ? इदमनयोरतिशयेन किम् इति प्रकृष्टप्रश्ने । एकारान्तस्योदाहरणम्—प्राह्णेतराम् । तिङः—पचतितराम् । अव्ययात्—उच्चैस्तराम् । तमपः उदाहरणम् किंतमाम् इत्यादि ।

अमु चच्छन्दसि ॥१२॥

किमेत्तिङव्ययघादद्रव्यप्रकर्षे अमु प्रत्ययः छन्दसि। चादामुश्च। प्रतरं न आयुः। प्रतरां नय।

प्रतरम्–प्र + तरप्। प्रकृष्टतरम् इत्यर्थः

अनुगादिनष्ठक् ॥१३॥

अनुगादिनः ठक् स्वार्थे। आनुगादिकः।

अनुगदति इति अनुगादी तस्मात् ठक्। 'अनुगादिन्' इति प्रकृतिमात्रम् न प्रयोगार्हः, ठको नित्यत्वात्।

णचः स्त्रियामञ् ॥१४॥

कर्मव्यतिहारे णच् विहितः तदन्तात्स्वार्थे अञ् स्त्रियाम्। व्यावक्रोशी। व्यावहासी।

स्त्रीग्रहणं किमर्थम्, यावता णच् स्त्रियामेव विहितः। ततः स्वार्थिकस्तत्रैव भविष्यति। एवं तर्ह्येतद् ज्ञापयति—

स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपीति। तेन गुडकल्पा द्राक्षा एवमादिरुपपन्नो भवति।

व्यावक्रोशी–वि, अव + √ क्रुश (आह्वाने) + णच् + स्वार्थे अञ् स्त्रियां ङीप्। अतिवर्त्तन्तेऽपि–सवत्रानुवर्त्तन्ते परन्तु क्वचिद् व्यभिचरन्त्यपि। तेन देव एव देवता स्वार्थे तल् स्त्रियामेवेत्यपि बोध्यम्।

अणिनुणः ॥१५॥

अभिविधौ भाव इनुण् विहितः तदन्तात्स्वार्थे अण्। सांराविणं वर्तते। सांकूटिनम्।

सांराविणम्--सम् √ रु (शब्दे) + इनुण् = संराविन् + अण् । सांकूटिनम्-अत्र √ कूट् (दाहे) वर्त्तते ।

विसारिणो मत्स्ये ॥१६॥

विसरति विसारी ततः स्वार्थेऽण् वैसारिणो मत्स्यः ।

वैसारिणः—वि √ सृ (गतौ) + णिनि = विसारिन् + अण् ।

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥१७॥

संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्त्तमानेभ्यः स्वार्थे कृत्वसुच् । पौनःपुन्यमभ्यावृत्तिः । एककर्तृकाणां सजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनम् । पञ्च वारान् भुङ्क्ते पञ्चकृत्वः । यावताऽभ्यावृत्तिः क्रियाया एव संभवति न द्रव्यगुणयोः । उत्तरार्थं क्रियाग्रहणम् । 'एकस्य सकृच्च' इत्यत्र क्रियैव गण्यते, नाभ्यावृत्तिः, असम्भवात् ।

पौनःपुन्यम् = पुनःपुनर्भवनम् । जन्मसंख्यानम्—उत्पत्तिगणना । पञ्चकृत्वः—पञ्च + कृत्वसुच् । अव्ययमेतत् । सूत्रे 'गणन' इति शब्दस्य पाठात् शतं वारान् भुङ्क्ते, इत्यत्र संख्येय वाचिनिशतशब्दे, वाराणां शतं भुङ्क्ते इत्यत्र संख्यावाचिनि शत शब्दे; उभयत्र प्रत्ययो भवति ।

द्वित्रिचतुर्भ्यः सुच् ॥१८॥

एभ्य उक्तेऽर्थे वर्तमानेभ्यः स्वार्थे सुच् । पूर्वापवादः । द्विर्भुङ्क्ते । त्रिर्भुङ्क्ते । चतुर्भुङ्क्ते ।

चतुर्भुङ्क्ते—चतुर् + सुच् । 'रात्सस्य' इति सलोपः । रकारस्य विसर्गः । सुच्—चकारः स्वरार्थः ।

एकस्य सकृच्च ॥१९॥

अस्य 'सकृत्' आदेशः, सुच् च क्रियागणने । सकृद्भुङ्क्ते । एकः पाकः—अत्र न, अनभिधानात् ।

सकृत्–एक + सुच् 'संयोगान्तस्य......' इति प्रत्यय-सकारस्य लोपः।

विभाषा बहोर्धाऽविप्रकृष्टकाले ॥२०॥

बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्तमानाद्विभाषा 'धा' प्रत्ययः। पक्षे कृत्वसुच् । क्रियाभ्यावृत्तयश्चेदासन्नकालाः भवन्ति। बहुधा दिवसस्य भुङ्क्ते / बहुकृत्वः। अविप्रकृष्टकाल इति किम् ? बहुकृत्वो मासस्य भुङ्क्ते।

बहुकृत्वो मासस्य—अत्र भोजन-क्रियायाः अभ्यावृत्तयः, रोगाद् दारिद्रयाद्वा विप्रकृष्टकालाः सन्ति। तेनात्र 'धा' प्रत्ययो न, 'कृत्वसुच्' त्वस्माद् भवत्येव।

तत्प्रकृतवचने मयट् ॥२१॥

प्रथमासमर्थात्प्रकृतोपाधिकेऽर्थे वर्तमानात्स्वार्थे मयट्। अन्नं प्रकृतम् अन्नमयम्। अपरे पुनरेवं सूत्रार्थमाहुः—'प्रकृत' इत्युच्यतेऽस्मिन्निति प्रकृतवचनम्। शेषं प्राग्वत्। अन्नं प्रकृतमस्मिन्निति अन्नमयो यज्ञः। द्वयं प्रमाणम् उभयथा प्रणयनात्।

प्रकृतम् = प्राचुर्येण प्रस्तुतम्। अन्नमयम्–अन्नमत्र प्रचुरं विद्यते। प्राग्वत्—प्रथमासमर्थात् प्रकृतवचनेऽभिधेये मयट्। प्रणयनात्–सूत्रस्येति शेषः।

समूहवच्च बहुषु ॥२२॥

बहुषु प्रकृतेषूदीर्यमाणेषु समूहवत् प्रत्यया भवन्ति। चान्मयट्। मोदकाः प्रकृताः=प्राचुर्येण प्रस्तुताः मौदकिकम्। शाष्कुलिकम्। मोदकमयम्। शष्कुलीमयम्। द्वितीयेऽर्थे मौदकिको यज्ञो वा।

मौदकिकम्—मोदक+ठक्। शाष्कुलिकम्–शष्कुली + ठक्।

शष्कुलीमयम्—अत्र 'अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि।' इति नपुंसकत्वम्।

अनन्तावसथेतिहभेषजाञ्ञ्यः ॥२३॥

अनन्तादिभ्यः स्वार्थे ञ्यः। अनन्त एव आनन्त्यम्। आवसथ एव आवसथ्यम्। इति ह एव ऐतिह्यम्। उपदेशपारम्पर्ये निपातसमुदायः। भेषजमेव भैषज्यम्।

निपातसमुदायः—इति + ह इति यथा इति ह स्मोपाध्यायाः कथयन्ति।

देवतान्तात्तादर्थ्ये यत् ॥२४॥

देवतान्तात् प्रातिपदिकात् चतुर्थीसमर्थात्तादर्थ्ये यत्। अग्निदेवतायै इदम् अग्निदेवत्यम्।

अग्निश्चासौ देवता अग्निदेवता। एवं पितृदेवत्यम्।

पादार्घाभ्यां च ॥२५॥

आभ्यां तादर्थ्ये यत्। पादार्थमुदकं पाद्यम्। अर्घ्यम्। अनुक्तसमुच्चयश्चकारः। एष वै सप्तदशाक्षरश्छन्दस्यः।

अर्घ्यम् = गन्धोदकपुष्पादिसमुदायोऽर्घः तदर्थमुदकम्। **छन्दस्यः**—अत्र स्वार्थे यत्, व्यत्ययेन च पुंस्त्वम्। अत्र प्रकरणे यत्प्रत्ययान्ताः कतिपये प्रयोगाः उल्लिख्यन्ते—वर्चस्यः (वर्चस् + यत्) एवं उक्थ्यम्। नव्यम्। सूर्यः। मर्त्यः। निपातनात् षष्ठ्या अलुक्। अमुष्य पुत्रः आमुष्यायणः। अमुष्यपुत्रिका।

❀ (वा०) नवस्य नू आदेशः त्नप्तनप्खाश्च प्रत्ययाः। नव + त्नप् = नूत्नम्। तनप् = नूतनम्। ख = नवीनम्।

❀ (वा०) नश्च पुराणे प्रात्। प्रणम्। प्रत्नम्। प्रतनम्। प्रीणम्। क्रमशः प्र शब्दात् न, त्नप्, तनप्, ख प्रत्ययाः।

❀ (वा०) भागरूपनामभ्यो धेयः । भागधेयम् । रूपधेयम् । नामधेयम् ।

अतिथेर्ण्यः ॥२६॥

अतिथिशब्दाच्चतुर्थीसमर्थात्तादर्थ्ये ण्यः । अतिथ्यर्थम् आतिथ्यम् ।

ण्यः—वृत्तौ 'ञ्यः' इति पाठः ।

देवात्तल् ॥२७॥

तादर्थ्यं निवृत्तम् । देवशब्दात् स्वार्थे तल् । देव एव देवता ।

देवता—स्त्रीत्वं लोकात् ।

अवेः कः ॥२८॥

अविः एव अविकः ।

अविः = पुमान् अविः ।

यावादिभ्यः कन् ॥२९॥

एवमादिभ्यः स्वार्थे कन् । याव एव यावकः । मणिकः ।

❀ (वा०) ऋतावुष्णशीते । उष्णकः ऋतुः । शीतकः ऋतुः ।

❀ (वा०) अणु निपुणे । अणुको निपुणः ।

❀ (वा०) पुत्र कृत्रिमे । कृत्रिमः पुत्रः पुत्रकः ।

❀ (वा०) स्नात वेदसमाप्तौ । वेदसमाप्तौ स्नानाय प्रेरितः स्नातकः ।

❀ (वा०) शून्य रिक्ते । शून्यः = उदकेन रिक्तो घटः = शून्यकः ।

❀ (वा०) तनु सूत्रे । तनुकं सूत्रम् = सूक्ष्मतन्तुः ।

❀ (वा०) ईयसश्च । श्रेयस्कः (श्रेयः एव) ।

❀ (वा०) कुमारीक्रीडनकानि-कन्दु एव कन्दुकम् ।

लोहितान्मणौ ॥३०॥

अस्मान्मणौ वर्त्तमानात् स्वार्थे कन् । लोहितो मणिः लोहितकः ।

लोहितो रक्तवर्णः ।

वर्णे चानित्ये ॥३१॥

अनित्ये वर्णे वर्त्तमानाल्लोहितशब्दात् स्वार्थे कन् । लोहितकः कोपेन पीडनेन वा । अनित्य इति किम् ? लोहितो गौः । लोहितं रुधिरम् ।

❀ (वा०) लोहिताल्लिगबाधनं वा । लोहितिका कोपेन / लोहिनिका ।

लोहितशब्दवाच्यो वर्णः (रक्तवर्णः) कोपे सति भवति कोपविगमे च निवर्तते । यद्यपि तदाश्रयो देवदत्तः स्थित एव इत्यनित्यत्वं लोहितस्य । लिङ्गबाधनम्—'वर्णादनुदात्तात्तोपधातो नः' इत्यनेन यो ङीप्' तस्य विकल्पेन बाधनं भवति । लोहिनिका—लोहित + ङीप्, तकारस्य नकारः = लोहिनी ततः कन् ।

रक्ते ॥३२॥

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् । लोहितकः कंबलः । लोहितकः पटः ।

अत्रापि लिङ्गबाधनं वा—लोहितिका / लोहिनिका वा शाटी ।

कालाच्च ॥३३॥

'वर्णे चानित्ये' 'रक्ते' इति द्वयमप्यनुवर्तते । कालशब्दादनित्ये

वर्तमानाद् रक्ते च कन् प्रत्ययः । कालकं मुखं वैलक्षण्येन । रक्ते-कालकः पटः । कालिका शाटी ।

वैलक्षण्यम्-विलक्षणस्य भावः लज्जा । **कालकः पटः**—नील्यादिना कालतामापादितः ।

विनयादिभ्यष्ठक् ॥३४॥

एभ्यः स्वार्थे ठक् । विनय एव वैनयिकः । सामयिकः । औपयिकः इत्यादि ।

❀ (वा०) उपायाद्ध्रस्वत्वं च । उपाय + ठक् = औपयिकः एवम् अकस्मात् + ठक् = आकस्मिकः । व्यवहार + ठक् = व्यावहारिकः इत्यादि ।

वाचो व्याहृतार्थायाम् ॥३५॥

व्याहृतः अर्थो यस्यास्तस्यां वाचि वर्त्तमानाद् वाक् शब्दात्स्वार्थे ठक् । पूर्वमन्येनोक्तार्थत्वात् सन्देशवाक् व्याहृतार्थेत्युच्यते । वाचिकं कथयति ।

व्याहृतः = उक्तः, प्रकाशित इत्यर्थः । वाचिकम्-वाच् + ठक् । वाचिकं श्रद्धे इत्यपि ।

तद्युक्तात्कर्मणोऽण् ॥३६॥

व्याहृतार्थया वाचा यत्कर्म युक्तं तदभिधायिनः कर्मशब्दात् स्वार्थेऽण् । कर्मैव कार्मणम् । वाचिकं श्रुत्वा यत्कर्म क्रियते तत्कार्मणम् ।

कार्मणम्—कर्मन् + अण् । 'अन्' इति प्रकृतिभावः ।

❀ (वा०) अण् प्रकरणे कुलालगरुडनिषादकर्मारचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम् । कुलाल एव कौलालः । एवं गारुडः । वृत्तौ 'वरुड' इति पाठात् वारुडः नैषादः । कार्मारः । चाण्डालः । मैत्रः । आमित्रः ।

ओषधेरजातौ ॥३७॥

अस्मादजातौ वर्तमानात् स्वार्थेऽण् । औषधं पिबति । अजाताविति किम् । ओषधयः क्षेत्रे गूढा भवन्ति ।

औषधम्—ओषधि + अण् । अत्र हरीतकी-शुंठी-सैन्धवादीनां कल्के प्रयुक्तः औषधशब्दः स च न जातिवाचिकः । ओषधयस्तु फलपाकावसानाः । गूढाः–वृत्तौ 'रूढाः' इति पाठः ।

प्रज्ञादिभ्यश्च ॥३८॥

प्रज्ञ एवमादिभ्यः स्वार्थेऽण् । प्रज्ञ एव प्राज्ञः । यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा । मन एव मानसम् । चौरः । शात्रवः । मारुतः । राक्षसः ।

प्राज्ञः—स्त्रियां ङीप् प्राज्ञी । प्राज्ञा–प्रज्ञा + अण् = प्राज्ञः 'प्रज्ञाश्रद्धाऽर्चावृत्तिभ्योऽणः इति सूत्रेण, ततष्टाप् ।

मृदस्तिकन् ॥३९॥

मृच्छब्दात् स्वार्थे तिकन् । विकल्पस्तत्रानुवर्तते । मृदेव मृत्तिका ।

मृत्तिका—मृद् + तिकन् = मृत्तिक + टाप् ।

सस्नौ प्रशंसायाम् ॥४०॥

प्रशंसोपाधिके वर्तमानात् मृच्छब्दात् स-स्न एतौ । रूपपोऽपवादः । प्रशस्ता मृत् मृत्सा / मृत्स्ना । नित्यश्चायं प्रत्ययः, उत्तरसूत्रेऽन्यतरस्यां ग्रहणात् ।

उत्तरसूत्रे—'बह्वल्पार्थाच्छस्.......' इत्यत्र ।

वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि ॥४१॥

आभ्यामुक्तेऽर्थे वर्तमानाभ्यां यथासंख्यं तिल्-तातिल् एतौ भवतः । वृकतिः । ज्येष्ठतातिः ।

एतौ भवतः—छन्दसि विषये इति शेषः । वृकतिः—प्रशस्तो वृकः । ज्येष्ठतातिः—प्रशस्तो ज्येष्ठः ।

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥४२॥

बह्वल्पार्थाच्च कारकाभिधायिनः शब्दात् शस् प्रत्ययः अन्यतरस्याम् । विशेषानभिधानाच्च सर्वकर्मादि कारकं गृह्यते । बहूनि ददाति / बहुशो ददाति । अल्पशः । बहुभिरिति बहुशः । अल्पशः इत्यादि । नेह-बहूनां स्वामी । अर्थग्रहणात् पर्यायेभ्यो भवति । भूरिशो ददाति । स्तोकशः ।

* (वा०) बह्वल्पार्थान्मङ्गलंवचनम् । यत्र मङ्गलं गम्यते तत्रायं प्रत्ययः । बहुशो ददातीत्याभ्युदयिकेषु कर्मसु । अल्पश इत्यनिर्दिष्टार्थेषु कर्मसु ।

वृत्तौ तु मङ्गलामङ्गलवचनम् इति पाठः । मङ्गलं यत्र गम्यते तत्र बहुपर्यायेभ्यः, अमङ्गलं यत्र गम्यते तत्राल्पार्थकेभ्यः 'शस्' इत्यर्थः । अनिर्दिष्टार्थेषु-वृत्तौ 'अनिष्टेषु' इति पाठः ।

संख्यैकवचनाच्च वीप्सायाम् ॥४३॥

संख्यावाचिभ्यः प्रातिपदिकेभ्यः एकवचनाच्च वीप्सायां द्योत्यायां शस् प्रत्ययः अन्यतरस्याम् । द्वौ द्वौ (मोदकौ) ददाति द्विशः । त्रिशः । एकवचनात्खल्वपि—माषं माषं ददाति माषशः । एकोऽर्थ उच्यते येन तदेकवचनम् । कार्षापणादयश्च परिमाणशब्दा वृत्तावेकार्था एव भवन्ति । एकवचनादिति किम् ? घटं घटौ ददाति ।

वृत्तौ—न तु वाक्ये इत्यर्थः । अर्थात् वाक्ये कार्षापणौ, कार्षापणाः

इत्यनेकार्थप्रतीतिर्भवति । वृत्तौ तु विभक्तेरेकशेषस्य चाभावादेकार्थतैव । घटं घटौ-वृत्तौ घटं घटम् इत्युक्तम् ।

प्रतियोगे पञ्चम्यास्तसिः ॥४४॥

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः । प्रद्युम्नो वासुदेवतः प्रति ।

* (वा०) तसि प्रकरणे आद्यादिभ्य उपसंख्यानम् । आदितः । मध्यतः । पृष्ठतः । पार्श्वतः ।

वासुदेवतः—'वा' इत्यस्यानुवृत्तेः पक्षे 'वासुदेवात्' इत्यपि भवति । **आदितः**–'आदौ' इत्यर्थे आदि + तसि ।

अपादाने चाहीयरुहोः ॥४५॥

अपादाने या पञ्चमी, तस्याः वा तसिः । तच्चेदपादानं हीयरुहोः सम्बन्धि न भवति । ग्रामत आगच्छति / ग्रामात् । चोरतो बिभेति / चोरात् । अहीयरुहोः किम् ? सार्थाद्धीयते । पर्वतादवरोहति ।

कथं तर्हि 'मन्त्रो हीनः स्वरतो वर्णतो वा' । नेयं पञ्चमी किं तु तृतीया स्वरेण वर्णेनेत्यर्थः ।

स्वरतः—'हेतौ करणे' वा तृतीया, तदन्ताच्च 'हीयमानपापयोगाच्च' इति तसिः ।

अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥४६॥

अतिक्रमेण ग्रहः अतिग्रहः । अचलनमव्यथनम् । क्षेपो निन्दा । अतिग्रहादिविषये या तृतीया तदन्तात्तसिः वा, सा चेत् कर्तरि न । वृत्तेनातिगृह्यते / वृत्ततः । सुष्ठु वृत्तवान् अन्याननतिक्रम्य वृत्तेन गृह्यत इत्यर्थः ।

चरित्रेण न व्यथते / चरित्रतः । वृत्तेन चलतीत्यर्थः । वृत्तेन क्षिप्तः / वृत्ततः । वृत्तेन निन्दित इत्यर्थः ।

अतिक्रमेण—वृत्तौ 'अतिक्रम्य' इति पाठः । चरित्रेण-वृत्तौ 'चारित्रेण' इति पाठः । अतिशब्दोऽतिक्रमार्थकः । वृत्तेनातिगृह्यते-बहूनां मध्ये अन्यानतिक्रम्य इति विज्ञायते ।

हीयमानपापयोगाच्च ॥४७॥

हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात् परा तृतीया, तदन्ताद्वा तसि प्रत्ययः । वृत्तेन हीयते / वृत्ततो हीयते / वृत्तेन पापः / वृत्ततः पापः ।

वृत्तेन—हेतौ करणे वा तृतीया ।

षष्ठ्या व्याश्रये ॥४८॥

नानापक्षसमाश्रयो व्याश्रयः । तस्मिन् षष्ठ्यन्ताद्वा तसिः । देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन् । षष्ठी चात्र पक्षापेक्षैव । अर्जुनस्य पक्षे इत्यर्थः ।

व्याश्रये गम्यमाने एव तसि प्रत्ययो भवति । अर्जुनतोऽभवन्—अर्जुनस्य पक्षेऽभवन् ।

रोगाच्चापनयने ॥४९॥

रोगो व्याधिः । तद्वाचिनः शब्दाद्या षष्ठी तदन्ताद्वा तसिः । अपनयने-अपनयनं चिकित्सा । ज्वरतः कुरु ।

ज्वरतः कुरु—ज्वरस्यापनयनम्-चिकित्सां कुरु ।

अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ॥५०॥

कारणस्य विकाररूपेणाभूतस्य तदात्मनाभावोऽभूततद्भावः । सम्पद्यतेः कर्तरि वर्तमानात्प्रातिपदिकादभूततद्भावे गम्ये कृ-भू-

अस्तिभिर्धातुभिर्योगे च्विः । अशुक्लः शुक्लः सम्पद्यते तं करोति शुक्लीकरोति । शुक्लीभवति । शुक्ली स्यात् ।

अशुक्लः—मलिनः । शुक्लीभवति—'अस्य च्वौ' इति शुक्ल-अकारस्य ईत्वम् ।

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥५१॥

अरुःप्रभृतीनामन्तस्य लोपो भवति च्विश्च ।

सर्वविशेषेण सिद्धत्वात्पूर्वेणैव प्रत्ययः सिद्धः । लोपमात्रार्थ आरम्भः । अनरुः अरुः सम्पद्यते तं करोति अरूकरोति । उन्मनी-करोति । उच्चक्षूकरोति । विचेतीस्यात् । विरहीकरोति ।

सर्वविशेषेण — अभूततद्भाव – कृभ्वस्तियोगसम्पद्यकर्ता इति विशेषणैः । रजस्—विरजीकरोति ।

विभाषा साति कार्त्स्न्ये ॥५२॥

'अभूततद्भावे, कृभ्वस्तियोगे, सम्पद्यकर्तरि' इति सर्वमनुवर्तते । अस्मिन् विभाषा साति प्रत्ययो भवति कार्त्स्न्ये गम्यमाने । यदि प्रकृतिः कृत्स्नां विकारात्मकतामापद्यत इत्यर्थः । अग्निसाद्भवति शस्त्रम् / अग्नीभवति । उदकसाद्भवति लवणम् / उदकी भवति ।

अग्नीभवति, उदकीभवति–पक्षे च्विः । पूर्णं शस्त्रमग्निर्भवति । पूर्णं लवणमुदकं भवति ।

अभिविधौ सम्पदा च ॥५३॥

अभिविधौ गम्यमाने 'च्वि' विषये 'साति' प्रत्ययः सम्पदा योगे । चात्कृभ्वस्तिभिर्योगे । वाऽनुवृत्तेश्च्विरपि । स तु न सम्पदा योगे । अग्निसात् सम्पद्यते । अग्निसाद् भवति । यत्रैकदेशेनापि

सर्वा प्रकृतिर्विकारमापद्यते सोऽभिविधिः । यथा वर्षासु सर्वं लवण-मुदकसाद् भवति । कात्स्न्यं तु सर्वात्मना द्रव्यस्य विकार-रूपापत्तौ ।

अभिविधिकात्स्न्र्ययोर्भेदः कथ्यते–यत्रैक·····अग्निसाद् भवति–अग्नी भवति । इति पक्षे च्विः ।

तदधीनवचने ॥५४॥

'अभूततद्भावे' इति निवृत्तम्, अर्थान्तरोपादानात् । 'कृभ्व-स्तियोगे' 'सम्पदा च' इति वर्तते । तदधीनम्—तदायत्तम् तत्स्वा-मिकम् इति । स्वामिविशेषवाचिनः ईशितव्येऽभिधेये साति प्रत्ययः । राजसात् करोति ।

एवम् राजसाद् भवति / राजसात् स्यात् / राजसात्सम्पद्यते इत्य-प्युदाहरणानि ।

देये त्रा च ॥५५॥

तदधीने देये त्रा प्रत्ययः । चात्सातिः कृभ्वस्तिसम्पदायोगे । ब्राह्मणेभ्यो देयमिति यद्विज्ञातं तद्यदा तेषां समर्पणेन तदधीनं क्रियते तदा 'त्रा' प्रत्ययः । ब्राह्मणाधीनं देयं करोति / ब्राह्मणत्रा करोति / ब्राह्मणसात् करोति । ब्राह्मणत्रा भवति ।

देयम्—दातव्यम् । ब्राह्मणत्रा स्यात् । ब्राह्मणत्रा सम्पद्यते इत्यप्युदाहरणद्वयम् ।

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥५६॥

सातिर्निवृत्तः । 'त्रा' वर्तते । देवादिभ्यो द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो बहुलम् । कृभ्वस्तिभिरिति नात्र सम्बध्यते । देवान् गच्छति / देवत्रा गच्छति । देवेषु वसति / देवत्रा वसति इत्यादि । बहुलग्रहणादन्यत्रापि । बहुत्रा जीवतो मनः ।

इत्यादि—मनुष्यत्रा गच्छति। पुरुषत्रा गच्छति। पुरुत्रा गच्छति। मर्त्यत्रा वसति। पक्षे मनुष्यान् इत्यादि। 'वसति' इत्यनेनापि सह 'त्रा' ज्ञेयः मनुष्यत्रा वसति इत्यादि।

अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच् ॥५७॥

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः। तस्यानुकरणमव्यक्तानुकरणम्। द्व्यच् अवरार्द्धं यस्य तद् द्व्यजवरार्द्धम्। अवरशब्दोऽपकर्षे। यस्यापकर्षे सुष्ठु न्यूनमर्द्धं द्व्यच्कं सम्पद्यते, तस्मादव्यक्तानुकरणादनितिपरात् 'डाच्' प्रत्ययः भवति कृभ्वस्तियोगे। यस्य द्विर्वचने कृते द्व्यजवरार्द्धम् ततः प्रत्ययः।

'डाचि बहुलं द्वे भवतः' इति विषयसप्तमी। डाचि विवक्षिते द्विर्वचनमेव पूर्वं क्रियते पश्चात्प्रत्ययः। पटपटा करोति इत्यादि।

द्व्यजवरेति किम्? श्रत्करोति। अवरग्रहणं किम्? खरटखरटा करोति। अनिताविति किम्? पटिति करोति।

पटपटाकरोति—एवं पटपटाभवति। पटपटास्यात्। पटिति—पटत् + इति 'अव्यक्तानुकरणस्यात इतौ' इति 'अत्' इत्यस्य पररूपम्।

कृञो द्वितीयतृतीयशम्बबीजात्कृषौ ॥५८॥

द्वितीयादिभ्यः कृषौ वाच्यायां डाच् कृञो योगे। नान्यत्र। द्वितीयाकरोति। द्वितीयं कर्षणं=विलेखनं करोतीत्यर्थः। शम्बाकरोति। अनुलोमकृष्टं पुनः प्रतिलोमं कर्षतीत्यर्थः। बीजाकरोति। सह बीजेन कर्षति।

नान्यत्र—तेन भू—अस्ति योगे न। शम्बाकरोति—शम्बशब्दस्य प्रातिलोम्यमर्थः। कर्षति—वृत्तौ 'कृषति' इति पाठः।

संख्यायाश्च गुणान्तायाः ॥५९॥

संख्यावाचिनः शब्दस्य गुणशब्दः समीपे यत्र सा संख्या

गुणान्ता । तादृशात्कृषौ वाच्यायां डाच् कृञो योगे । द्विगुणं कर्षति क्षेत्रं द्विगुणाकरोति ।

एवं त्रिगुणाकरोति । क्षेत्रम्-वृत्तौ 'क्षेत्रस्य' इति पठितः ।

समयाच्च यापनायाम् ॥६०॥

कर्त्तव्यस्यावसरः समयः । तस्माद्यापनायां डाच् । समयाकरोति । कालक्षेपं करोतीत्यर्थः ।

यापना—समयस्यातिक्रमणम् ।

सपत्रनिष्पत्रादतिव्यथने ॥६१॥

आभ्यामतिव्यथने डाच् । सपत्राकरोति मृगं व्याधः । सपत्रं शरमस्य काये प्रवेशयति । निष्पत्रा करोति । अपरपार्श्वे निष्क्रामयति ।

अतिव्यथनम्—अतिपीडनम् । निष्पत्राकरोति—यथाऽस्य शरीरे पुङ्खप्रदेशोऽपि न लगति तथा शरं शरीरान्निष्क्रामयति ।

निष्कुलान्निष्कोषणे ॥६२॥

अस्मान्निष्कोषणे डाच् । निष्कोषणमन्तरवयवानां बहिर्निष्काशनम् । निष्कुलाकरोति शवं काकः ।

निष्कुलाकरोति—निष्कोषितं कुलमन्तरवयवानामस्मादिति बहुव्रीहौ डाच् ।

सुखप्रियादानुलोम्ये ॥६३॥

आभ्यामानुलोम्ये—अनुकूलतायां डाच् ।

सुखाकरोति स्वामिनम् इत्यादि ।

अनुकूलता-आराध्यचित्तानुवर्तनम् । एवं प्रियाकरोति ।

दुःखात्प्रातिलोम्ये ॥६४॥

दुःखाकरोति ।

डाच् प्रत्ययः । प्रातिलोम्यम् = प्रतिकूलता ।

शूलात्पाके ॥६५॥

अस्मात् पाकविषये डाच् । शूले पचति मांसं शूलाकरोति ।

शूलापच—शूले पचति ।

सत्यादशपथे ॥६६॥

डाच् । अनृतप्रतिपक्षः सत्यम् । सत्याकरोति वणिक् भाण्डम् । मयैतत्क्रेतव्यमिति तथ्यं करोति ।

भाण्डम् = रत्नादिद्रव्यराशिः । शपथे तु सत्यं करोति ब्राह्मणः ।

मद्रात्परिवापणे ॥६७॥

मद्रान्मुण्डने डाच् कृञो योगे । मद्रशब्दो मंगलार्थः । मद्राकरोति ।

* (वा०) भद्राच्च । भद्राकरोति ।

परिवापणम् = मुण्डनम् ।

समासान्ताः ॥६८॥

अधिकारः । आपादसमाप्तेर्ये प्रत्ययास्ते समासान्तावयवा एकदेशाः भवन्ति = तद्ग्रहणेन गृह्यन्त इति वेदितव्यम् । वक्ष्यति ऋक्पूरित्यादि । राजपुरम् ।

प्रयोजनम् अस्य समास-तद्विशेषाव्ययीभावद्वन्द्वप्रभृतिसंज्ञाः । राजपुरम्–ऋक्पूः....' इत्यादिना 'अ' प्रत्ययः ।

न पूजनात् ॥६९॥

यान् शब्दानुपादाय समासान्ता विधीयन्ते, ते यदा पूजनार्थात् परे भवन्ति तदा न समासान्ताः ।

❀ (वा०) स्वतिभ्यामेव । सुराजा । अतिराजा ।

इह च भवति समासान्तः–परमराजः ।

❀ (वा०) प्राग्बहुव्रीहिग्रहणं च कर्त्तव्यम् । सुसक्थः । अतिसक्थः । अत्र षच्समासान्तो भवति ।

किमः क्षेपे ॥७०॥

क्षेपार्थात् किमः परस्य समासान्तो न । किंराजा । किं–सखा ।

- निषेधादत्र टच् न भवति ।

नञस्तत्पुरुषात् ॥७१॥

नञः परे वक्ष्यमाणा ये राजादयस्तदन्तात्तत्पुरुषात्समासान्तो न भवति । अराजा । असखा । तत्पुरुषात् किम् ? अनृचो माणवकः ।

अनृचः—बहुव्रीहौ ऋक्पूरिति 'अ' प्रत्ययः ।

पथो विभाषा ॥७२॥

नञः परो यः पथिन् शब्दस्तदन्तात्तत्पुरुषात् समासान्तो विभाषा न । नित्यनिषेधे विकल्पः । अपथम् / अपन्थाः ।

अपथम्—समासान्तोऽकारः । 'अपथं नपुंसकम्' इति नपुंसकत्वम् ।

बहुव्रीहौ संख्येये डजबहुगणात् ॥७३॥

संख्येये यो बहुव्रीहिर्वर्तते, तस्मादबहुगणान्ताड्डच् । 'संख्याव्ययासन्न……' इत्यस्य ग्रहणम् । उपदशाः । उपविंशाः । आसन्नदशाः । अदूरदशाः । अधिकदशाः । द्वित्राः । पञ्चषाः । नेह—उपबहवः । उपगणाः । अत्र स्वरे भेदः ।

❀ (वा०) अत्र प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानम् । निस्त्रिंशः खड्गः । निस्त्रिंशानि वर्षाणि मैत्रस्य ।

उपदशाः—दशानां समीपे । द्वित्राः—द्वौ वा त्रयो वा । निस्त्रिंशानि—निर्गतानि त्रिंशतः ।

ऋक्पूरब्धूःपथामानक्षे ॥७४॥

बहुव्रीहाविति न स्वर्यते । सामान्यविधिः । ऋक्, पुर्, अप्, धुर्, पथिन्, एवमन्तानां समासानामकारप्रत्ययः अनक्षे । सामर्थ्याद्धुरो विशेषणम् । अनृचः । बह्वृचः । ऋचः अध्येतर्येव । नेह-अनृक् साम । ललाटपुरम् । नन्दिपुरम् । द्वीपम् । अन्तरीपम् । समीपम् । राजधुरा । महाधुरः । जलपथः ।

अक्षे तु न—अक्षधूः ।

अच् प्रत्यन्ववपूर्वात्सामलोम्नः ॥७५॥

प्रत्यन्ववपूर्वात् सामान्ताल्लोमान्ताच्च समासादच् । प्रतिसामम् । अनुसामम् । अवसामम् । एवं प्रतिलोममित्यादि ।

❀ (वा०) कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि ॥

❀ (वा०) भूमेरपि संख्यापूर्वाया अजिष्यते । द्विभूमः प्रासादः ।

❀(वा०) अन्यत्रापि दृश्यते । पद्मनाभः । दीर्घरात्रः । तदेतत्सर्वं योगविभागेन साधयन्ति ।

कृष्णोदक् इत्यस्योदाहरणानि – कृष्णभूमः । उदग्भूमः । पञ्चगोदावरम् । पञ्चनदम् ।

अक्ष्णोऽदर्शनात् ॥७६॥

दर्शनादन्यत्र योऽक्षिशब्दस्तदन्तादच् । लवणाक्षम् । पुष्कराक्षम् । इह अक्षि शब्दः प्राण्यङ्गवचनः । तेन गवाक्षम्, कबराक्षम् । अश्वादीनां मुखप्रच्छादनार्थमिदमुच्यते । दर्शनवाचिनोऽप्यनयोरच्, अप्राण्यङ्गत्वात् । अत्र 'दर्शन' शब्दः चक्षुः पर्यायः ।

लवणाक्षम्— लवणमक्षीव' उपमितसमासः ।

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥७७॥

अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते । समासव्यवस्था निपातनादेव प्रतिपत्तव्या ।

आद्यास्त्रयो बहुव्रीहयः । अदृश्यानि = अविद्यमानानि चत्वारि यस्य सोऽचतुरः । विचतुरः । सुचतुरः ।

ततः परे एकादश द्वन्द्वाः । स्त्री च पुमांश्च स्त्रीपुंसौ । नेह- स्त्रियाः पुमान् स्त्रीपुमान् । धेन्वनुडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिभ्रुवम् । दारगवम् । उरू च अष्ठीवन्तौ च टिलोपो निपात्यते । उर्वष्ठीवम् । पादौ च अष्ठीवन्तौ च पदष्ठीवम् । पादस्य पद्भावो निपात्यते । नक्तं च दिवा च नक्तन्दिवम् । अहनि च दिवा च अहर्दिवम् । ननु च पर्यायावेतौ कथमनयोर्द्वन्द्वः । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः ।

एकोऽव्ययीभावः साकल्ये । रजसा सह सकलमत्ति सरजसम् ।

ततस्तत्पुरुषः । निश्चितं श्रेयो निःश्रेयसम् / निश्श्रेयसम् । पुरुषस्यायुः पुरुषायुषम् ।

ततो द्वौ द्विगू । द्वे आयुषी समाहृते द्वयायुषम् । त्र्यायुषम् ।

ततो द्वन्द्वः । ऋक् च यजुश्च ऋग्यजुषम् ।

जातादिपूर्वपदा उक्षान्तास्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः ।

ततोऽव्ययीभावः । शुनः समीपम् उपशुनम् । टिलोपाभावः, सम्प्रसारणं च निपातनादेव ।

ततः सप्तमीतत्पुरुषः । गोष्ठे श्वा गोष्ठश्वः ।

❀ (वा०) त्र्युपाभ्यां चतुर उपसंख्यानम् । त्रिचतुराः । उपचतुराः ।

समासव्यवस्था—समासस्य नियमः । यस्मिन् समासे निपातनमिष्टं तस्मिन्नेव भवति न तु तदितरत्र । रात्रौ च दिवा च रात्रिन्दिवम् । अत्र रात्रेर्मान्तत्वम् अनुस्वार-परसवर्णौ च ।

ब्रह्महस्तिभ्यां वर्चसः ॥७८॥

आभ्यां परो यो वर्चः शब्दस्तदन्तात्समासादच् । ब्रह्म-वर्चसम् । हस्तिवर्चसम् ।

❀ (वा०) पल्यराजभ्यां च । पल्यवर्चसम् । राजवर्चसम् ।

वर्चः = दीप्तिः । सर्वत्र षष्ठीतत्पुरुषः ।

अवसमन्धेभ्यस्तमसः ॥७९॥

अव, सम्, अन्ध एभ्यः परात्तमसोऽच् समासान्तः । अव-तमसम् । सन्तमसम् । अन्धतमसम् ।

अवतमसम् अवहीनं तमसा । अन्धतमसम्–अन्धञ्च तत्तमः । यत्तमः अन्धं करोति ।

श्वसो वसीयःश्रेयसः ॥८०॥

श्वसः परौ यौ वसीयः-श्रेयः शब्दौ तदन्तात्समासादच् । श्वोवसीयसम् । श्वःश्रेयसम् । मयूरव्यंसकादित्वात्समासः । स्वभावाच्चेह श्वःशब्द उत्तरपदार्थस्य प्रशंसामाशीर्विषयामाचष्टे । श्वःश्रेयसं ते भूयात् । एवं श्वोवसीयसम् ।

स्वभावात्-श्वःश्रेयसशब्दस्येति शेषः ।

अन्ववतप्ताद्रहसः ॥८१॥

एतदन्ताद्रहसोऽच् एमासान्तः । अनुरहसम् । अवरहसम् । तप्तरहसम् ।

रहः—अप्रकाशः । तप्तरहसम्—तप्तश्च तद्रहः । यदुत्पन्नं रहो लोके न केनचिदवगम्यते ।

प्रतेरुरसः सप्तमीस्थात् ॥८२॥

प्रतेः परो य उरःशब्दस्तदन्तात्समासादच् । स चेदुरःशब्दः सप्तमीस्थो भवति । सप्तम्यर्थे वर्तते इत्यर्थः । उरसि वर्तते, विभक्त्यर्थेऽव्ययीभावः । प्रत्युरसम् ।

सप्तमीस्थः — सप्तम्यर्थे तिष्ठति = वर्तते इति सप्तमी √ स्था + क । प्रतिगतम् उरः प्रत्युरः ।

अनुगवमायामे ॥८३॥

अनुगवमित्यच् प्रत्ययान्तं निपात्यते आयामेऽभिधेये । अनुगवं यानम् । यस्य चायामः' इति समासः ।

आयामः = दीर्घता । यानम् = आयामः । गावो यथा तथा यानम् आयातम् इत्यर्थः ।

द्विस्तावा त्रिस्तावा वेदिः ॥८४॥

द्विस्तावा, त्रिस्तावा इति निपात्येते वेदिश्चेद् वाच्या । यावती

प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा कस्याञ्चिद् विकृतौ तत्रायं निपातः ।

द्विस्तावा—द्विः + तावती । समासः, अच् प्रत्ययः टिलोपश्च निपात्यते ।

उपसर्गादध्वनः ॥८५॥

उपसर्गात्परादध्वनोऽच् समासान्तः । प्रगतोऽध्वानं प्राध्वो रथः ।

प्राध्वः—'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः ।

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥८६॥

अङ्गुल्यन्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । 'तद्धितार्थे...' इति समासः । 'प्रमाणे लुग् द्विगोर्नित्यम्' इति मात्रचो लोपः । निर्गतमङ्गुलिभ्यो निरङ्गुलम् । तत्पुरुषाधिकारश्च 'द्वन्द्वाच्चुदषहान्तात्' इति यावत् ।

द्व्यङ्गुलम्—प्रमाणार्थे 'मात्रच्' तस्य लोपः ।

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥८७॥

अहरादिभ्यः परस्य रात्रिशब्दस्याच् । चात् संख्ययादेरव्यादेश्च । अहर्ग्रहणं द्वन्द्वार्थम् । अहोरात्रः । सर्वरात्रः । एकदेशे पूर्वरात्रः । 'पूर्वापराधर...' इति समासः । संख्याता रात्रिः संख्यातरात्रः । पुण्या रात्रिः पुण्यरात्रः । संख्याव्ययादेरपि । द्विरात्रः । अतिरात्रः ।

अहोरात्रः—अहश्च रात्रिश्च । 'रात्राह्नाहाः पुंसि' इति सर्वत्र पुंल्लिगता ।

अह्नोऽह्न एतेभ्यः ॥८८॥

'राजाह...' इति वक्ष्यति । तस्मिन् परभूते 'अहन्' इत्येतस्य

'अह्न' इत्ययमादेशः एतेभ्य उत्तरस्य । संख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्ययवमृश्यन्ते । सामर्थ्याच्चाहःशब्दः पूर्वं इत्यनेन नाश्रीयते । परिशिष्टानां ग्रहणम् । नह्यहः शब्दात्परोऽहःशब्दः सम्भवति । संख्यायास्तावत् द्व्यह्नः । सर्वाह्णः । पूर्वाह्णः । संख्याताह्नः । पुण्यशब्दान्निषेधं वक्ष्यति ।

सर्वाह्णः—नकारस्य णकारः । एवं पूर्वाह्णः ।

न संख्यादेः समाहारे ॥८९॥

संख्यादेस्तत्पुरुषस्य समाहारे वर्तमानस्याहः शब्दस्याह्नादेशो न । द्वे अहनी समाहृते द्व्यहः ।

द्व्यहः—द्वि + अहन् + टच् । 'अह्नष्टखोरेव' इति टिलोपः ।

उत्तमैकाभ्यां च ॥९०॥

आभ्यां परस्याह्नोऽह्नादेशो न । उत्तमशब्दोऽन्त्यवचनः पुण्यमाचष्टे । पुण्यग्रहणं किं न कृतम्, विचित्रा हि सूत्रस्य कृतिः पाणिनेः । पुण्याहः । एकाहः ।

अन्त्यवचनः—'अहः सर्व............पुण्याच्च..........' इति सूत्रे पुण्यशब्दोऽन्त्यस्तदर्थकः ।

राजाहःसखिभ्यष्टच् ॥९१॥

एवमन्तात् प्रातिपदिकाट्टच् । महाराजः । पुण्याहः । राजसखः ।

महाराजः—महांश्चासौ राजा इति कर्मधारये, 'आन्महतः..........' इत्यनेन महत् शब्दस्याकारान्तादेशे महाराजन् + टच् । राजसखः—राज्ञः सखा इति षष्ठीतत्पुरुषः ।

गोरतद्धितलुकि ॥९२॥

गोशब्दान्तात्तत्पुरुषात् टच् समासान्तः । सचेत्तत्पुरुषः

तद्धितलुग्विषयो न । परमगवः । पञ्चगवम् । अतद्धितलुकीति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः ।

पञ्चगवम्—पञ्चानां गवां समाहारः । पञ्च गो + टच्, ओकारस्य 'अव्' आदेशः । पञ्चगुः–अत्र 'तेन क्रीतम्' इति 'ठक्' तस्य लुक् ।

अग्राख्यायामुरसः ॥६३॥

उरःशब्दान्तात्तत्पुरुषात् टच् । स चेदुरःशब्दोऽग्राख्यायां भवति । अग्रम् = प्रधानम् । यथाऽङ्गानामुरः । अश्वोरसम् ।

अश्वानाम् उरः इति अश्वोरस् + टच् ।

अनोऽश्मायःसरसां जातिसंज्ञयोः ॥६४॥

एतदन्तात्तत्पुरुषात् टच् जातौ संज्ञायां च । उपानसं जातिः । महानसं संज्ञा । एवं क्रमो ज्ञेयः । अमृताश्मः । पिण्डाश्मः । कालायसम् । मण्डूकसरसम् । राजसरसम् ।

उपानसम्—उपगतम् अनः प्रादिसमासः उपानस् + टच् ।

ग्रामकौटाभ्यां च तक्ष्णः ॥६५॥

आभ्यां तक्ष्णः टच् समासान्तः जातौ संज्ञायां च । ग्रामस्य तक्षा ग्रामतक्षः । कुट्यां भवः कौटः तस्य तक्षा कौटतक्षः ।

ग्रामतक्षः—बहुसाधारणः । कौटतक्षः—स्वतन्त्रः कर्मजीवी ।

अतेः शुनः ॥६६॥

अतेः परात् शुनः टच् समासान्तः । अतिक्रान्तः श्वानम् अतिश्वो वराहः भृत्यो वा ।

अतिश्वो वराहः—वेगवान् इत्यर्थः । भृत्यः–स्वामिभक्तः । अतिश्वी सेवा–अतिनीचा ।

उपमानादप्राणिषु ॥९७॥

उपमानवाची यः श्वन् शब्दोऽप्राणिषु, तदन्तात् टच् । आकर्षः श्वेव आकर्षश्वः ।

आकर्षश्वः–अत्र 'श्वा' उपमानम् ।

उत्तरमृगपूर्वाच्च सक्थ्नः ॥९८॥

एतेभ्यः परो यः सक्थिशब्दस्तदन्तात् टच् समासान्तः । उत्तरसक्थम् । मृगसक्थम् । चादुपमानात् फलकसक्थम् ।

उत्तरं सक्थि इति कर्मधारयः । मृगस्य सक्थि इति षष्ठी-तत्पुरुषः ।

नावो द्विगोः ॥९९॥

नौशब्दान्ताद् द्विगोः टच् । द्विनावम् । त्रिनावम् ।

द्वयोः नावोः समाहारः । द्विनौ + टच् । एवं द्वे नावौ धनं यस्य सः द्विनावधनः ।

अर्द्धाच्च ॥१००॥

अर्द्धशब्दात्परो यो नौशब्दस्तदन्तात् तत्पुरुषात् टच् । अर्द्धं नावः अर्द्धनावम् ।

अर्द्धनावम्––'अर्द्धं नपुंसकम्' इति समासः ।

खार्याः प्राचाम् ॥१०१॥

द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात् टच् प्राचामा-चार्याणां मतेन । द्विखारम् / द्विखारी । अर्द्धखारम् / अर्धखारी ।

द्विखारी, अर्धखारी––उपसर्जनह्रस्वे कृते द्विखारि + ङीष् । वृत्तौ तु द्विखारि, अर्धखारि इति पठितम् ।

द्वित्रिभ्यामञ्जलेः ॥१०२॥

आभ्यां परो योऽञ्जलिशब्दस्तदन्तात्तत्पुरुषात् टच् । द्वौ अञ्जली समाहृतौ द्व्यञ्जलम् । त्र्यञ्जलम् ।

द्विगोरेव भवति । तत्पुरुषे द्वयोरञ्जलिः द्व्यञ्जलिः ।

अनसन्तान्नपुंसकाच्छन्दसि ॥१०३॥

अन्नन्तात् असन्ताच्च नपुंसकात् टच् छन्दसि विषये । हस्तिचर्मे जुहोति । हस्तिचर्मेऽभिषिञ्चति । देवच्छन्दसानि । मनुष्यच्छन्दसानि ।

हस्तिनः चर्म षष्ठी समासः । देवानां छन्दांसि ।

❀ (वा०) अनसन्तान्नपुंसकाच्छन्दसि वा वचनम् । ब्रह्मसाम / ब्रह्मसामम् । देवच्छन्दः / देवच्छन्दसम् ।

ब्रह्मणो जानपदाख्यायाम् ॥१०४॥

ब्रह्मन्नन्तात्तत्पुरुषात् टच् । समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते । जनपदेषु भवो जानपदः । यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मात्प्रत्ययविधानम् । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः ।

अनेनैव योगविभागात्समासः । ब्रह्मण आवृत्त्या एकेन समासो विधीयते, अपरेण जानपदत्वम् ।

कुमहद्भ्यामन्यतरस्याम् ॥१०५॥

कु–महद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् अन्यतरस्याम् । कुब्रह्मा / कुब्रह्मः । महाब्रह्मः / महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः । पूर्णस्तत्पुरुषाधिकारः ।

कुब्रह्मः—कुत्सितो ब्रह्मा । महाब्रह्मः—महांश्चासौ ब्रह्मा ।

द्वन्द्वाच्चुदषहान्तात्समाहारे ॥१०६॥

द्वन्द्वाच्चवर्ग-द-ष-हान्तात् टच् स चेत्समाहारे, नेतरेतरयोगे । वाक् च त्वक् च वाक्त्वचम् । श्रीस्रजम् । समिद्दृषदम् । वाग्विप्रुषम् । छत्रोपानहम् ।

सर्वत्र समाहारद्वन्द्वः ।

अव्ययीभावे शरत्प्रभृतिभ्यः ॥१०७॥

शरदादिभ्यः प्रातिपदिकेभ्यष्टच् अव्ययीभावे । शरदः समीपम् उपशरदम् । उपविपाशम् इत्यादि ।

❀ (वा०) प्रतिपरसमनुभ्योऽक्ष्णः । प्रत्यक्षम् । परोक्षम् । समक्षम् । अन्वक्षम् ।

अनश्च ॥१०८॥

अन्नन्तादव्ययीभावात् टच् । उपराजम् । अध्यात्मम् ।

आत्मनि इति अध्यात्मम् ।

नपुंसकादन्यतरस्याम् ॥१०९॥

अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावात् टच् । पूर्वेण नित्ये विकल्पः । प्रतिचर्मम् / प्रतिचर्म ।

चर्मणोऽभिमुखम् इति विग्रहः ।

नदीपौर्णमास्याग्रहायणीभ्यः ॥११०॥

इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् । नद्याः समीपम् उपनदम् / उपनदि । उपपौर्णमासम् / उपपौर्णमासि । उपाग्रहायणम् / उपाग्रहायणि ।

अत्र 'नदी' इति स्वरूपस्य ग्रहणं नतु नदी–संज्ञायाः । उपनदि—टच् समासान्ताभावे प्रातिपदिकस्य ह्रस्वत्वम् ।

झयः ॥१११॥

झयन्तादव्ययीभावादन्यतरस्यां टच् । उपसमिधम् / उपसमित् ।

'झयः' इति प्रत्याहारग्रहणम् । समिधः समीपम् इति विग्रहः ।

गिरेश्च सेनकस्य ॥११२॥

गिरिशब्दान्तादव्ययीभावात् टच् अन्यतरस्याम् । सेनकग्रहणं पूजार्थम् । अन्तर्गिरम् / अन्तर्गिरि ।

गिरेरन्तः इति विभक्त्यर्थेऽव्ययीभावः । पूजार्थम् — विकल्पस्यानुवर्तनात् ।

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥११३॥

स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद्बहुव्रीहेः षच् । अयमर्थोऽभिप्रेतः । सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि । दीर्घं सक्थि यस्य स दीर्घसक्थः । कल्याणाक्षः । बहुव्रीहाविति किम् ? परमसक्थि । आपादसमाप्तेर्बहुव्रीहिग्रहणम् ।

दुःश्लिष्टविभक्तीनि—दुःखेन श्लिष्टाः विभक्तयो येषु । बहुव्रीहौ—सप्तम्यन्तम् । सक्थ्यक्ष्णोः—षष्ठ्यन्तं सप्तम्यन्तं वा । स्वाङ्गात्—पञ्चम्यन्तम् । एवं नान्वयः स्यात् अतः विभक्तिविपरिणामेनोक्तार्थः कर्त्तव्यः । 'षच्' षित्त्वात् स्त्रियां ङीष् दीर्घसक्थी स्त्री ।

अङ्गुलेर्दारुणि ॥११४॥

अङ्गुल्यन्ताद् बहुव्रीहेः षच् समासान्तः दारुणि समासार्थे । द्व्यङ्गुलं दारु । त्र्यंगुलम् । पञ्चाङ्गुलम् । अंगुलिसदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते ।

द्वे अंगुली यस्य तत् । अङ्गुलिशब्दः सामर्थ्याद् दारुणोऽवयवेषु वर्तमानः । अन्यत्र पञ्चाङ्गुलिर्हस्तः ।

द्वित्रिभ्यां ष मूर्ध्नः ॥११५॥

आभ्यां परो यो मूर्द्धन् शब्दस्तदन्ताद्बहुव्रीहेः 'ष' प्रत्ययः । द्विमूर्द्धः । त्रिमूर्द्धः ।

अयं 'ष' समासान्तो विकल्पेन भवति तेन पक्षे द्विमूर्द्धा, त्रिमूर्द्धा इत्यपि भवतः ।

अप् पूरणीप्रमाण्योः ॥११६॥

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते । प्रमाणीति स्वरूपग्रहणम् । पूरण्यन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप् समासान्तः । कल्याणी पञ्चमी आसां रात्रीणां ताः कल्याणीपंचमाः रात्रयः । स्त्री प्रमाणी एषां स्त्रीप्रमाणा गृहिणः ।

❀ (वा०) प्रधानपूरणीग्रहणं कर्त्तव्यम् । यत्रान्यपदार्थं पूरण्यनुप्रविशति न केवलं वर्तिपदार्थं एव तत्र पूरण्याः प्राधान्यम् । नेह—कल्याणी पञ्चमी अस्मिन् पक्षे कल्याणपञ्चमीकः पक्षः ।

❀ (वा०) नेतुर्नक्षत्र उपसंख्यानम् । मृगो नेता आसां मृगनेत्राः रात्रयः ।

पूरणप्रत्ययः अन्ते येषां ते पूरणप्रत्ययान्ताः । वर्तिपदार्थः—समासावयवभूतः ।

अन्तर्बहिर्भ्याञ्च लोम्नः ॥११७॥

आभ्यां परो यो लोमन् शब्दस्तदन्ताद्बहुव्रीहेरप् । अन्तर्लोमः प्रावारः । बहिर्लोमः पटः ।

अन्तर्गतानि लोमान्यस्य । एवं बहिर्गतानि लोमान्यस्य इति विग्रहः ।

अच् नासिकायाः संज्ञायां नसं चास्थूलात् ॥११८॥

नासिकान्ताद्बहुव्रीहेरच् । नासिका च 'नस्'—आदेशमापद्यते ।

न चेत्स्थूलशब्दात् परा नासिका भवति । 'संज्ञायाम्' इति समुदायोपाधि । द्रुः इव नासिकाऽस्य द्रुणसः । वाध्रीणसः ।

❀ (वा०) खुरखराभ्यां नस् वक्तव्यः । खुरणाः । खरणाः । पक्षेऽच् खुरणसः । खरणसः ।

शितिनाः । अहिनाः इति निगम इष्यते ।

वाध्रो—वार्ध्री इत्यपि पाठान्तरम् । वार्ध्रीणसः = लम्बकर्णोऽजः । निगमे = वेदे ।

उपसर्गाच्च ॥११९॥

उपसर्गात् परो यो नासिकाशब्दस्तदन्ताद् बहुव्रीहेरच् । असंज्ञार्थं वचनम् । उन्नसः । प्रणसः । उपसर्गाद् बहुलम् इति णत्वम् ।

❀ (वा०) वेर्ग्रो वक्तव्यः । विग्रः ।

विग्रः—विगता नासिका अस्य ।

सुप्रातसुश्वसुदिवशारिकुक्षचतुरस्रैणीपदाजपदप्रोष्ठपदाः ॥१२०॥

सुप्रातादयो बहुव्रीहिसमासा अच् प्रत्ययान्ताः निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातरस्य सुप्रातो दिवसः । शोभनं श्वः अस्य सुश्वः । सुदिवः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रः अस्रयोऽस्य चतुरस्रः । एण्या इव पादावस्य एणीपदः । अजस्येव पादावस्य अजपदः । प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः ।

चतुरस्रः—सूत्रे वृत्तौ कौमुद्याञ्च चतस्रः, अश्रयः इति चतुरश्र इति पाठः । एणीपदः–अत्र पादः 'पद्' आदेशः । एवमुत्तरत्रापि ।

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥१२१॥

एभ्यः परौ यौ हलि-सक्थिशब्दौ तदन्ताद् बहुव्रीहेरच् प्रत्ययो

भवत्यन्यतरस्यां समासान्तः । अविद्यमाना हलिरस्त अहलः / अहलिः । दुर्हलः / दुर्हलिः । सुहलः / सुहलिः । एवम् असक्थिः / असक्थः ।

एभ्यः = नञ्-दुः-सुभ्यः । हलिः = महद्धलम् । असक्थः— अविद्यमानं सक्थि अस्य । 'हलिशक्त्योः' इति केचित् पठन्ति तेषां मते अशक्तिः / अशक्तः । एषः शक्तिशब्दोऽस्थिपर्यायः ।

नित्यमसिच् प्रजामेधयोः ॥१२२॥

नञादिभ्यः परयोरनयोः नित्यमसिच् बहुव्रीहौ समासान्तः । अप्रजाः । दुष्प्रजाः । सुप्रजाः । एवम् अमेधाः इत्यादि । नित्यग्रहणादन्यत्रापि ।

श्रोत्रियस्येव ते राजन् । मन्दकस्याल्पमेधसः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥

श्लोके अल्पमेधसः इत्युदाहरण् । अल्पा मेधा यस्य सः इति बहुव्रीहेरसिच् ।

बहुप्रजाश्छन्दसि ॥१२३॥

'बहुप्रजाः' इति निपात्यते छन्दसि । बहुप्रजा निर्ऋतिमाविवेश । छन्दसि किम् ? बहुप्रजो विप्रः ।

निपात्यते—असिच्प्रत्ययान्त इति शेषः । बह्वचः प्रजाः यस्य सः इति बहुव्रीहिः ।

धर्मादनिच् केवलात् ॥१२४॥

केवलात् पदाद् यो धर्मशब्दस्तदन्ताद् बहुव्रीहेः समासान्तोऽनिच् प्रत्ययः । केवलात् किम् ? परमः स्वधर्मोऽस्य परमस्वधर्मः । यद्येवं त्रिपदे बहुव्रीहौ प्राप्नोति–परमः स्वो धर्मोऽस्य । एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते । केवलात्पदाद्यो धर्मशब्दो न पदसमुदायात् ।

केवलात् = असहायादित्यर्थः । एकं किमपि पूर्वपदम् धर्मशब्दश्चोत्तरपदम् इति तात्पर्यम् ।

जम्भा सुहरिततृणसोमेभ्यः ॥१२५॥

बहुव्रीहौ स्वादिभ्यः परं 'जम्भा' इति कृतसमासान्तमुत्तरपदं निपात्यते । जम्भशब्दोऽभ्यवहार्यवाची दन्तविशेषवाची च । शोभनो जम्भोऽस्य सुजम्भा मैत्रः । शोभनाभ्यवहार्यः सुदर्शनो वा । एवं हरितजम्भा । तृणजम्भा । सोमजम्भा । दन्तवचने तृणमिव, सोम इव जम्भोऽस्य ।

जम्भा—अनिच् प्रत्ययान्तो निपात्यते । तेन द्विवचनादिषु सुजम्भानौ, सुजम्भानः इत्यादि रूपाणि भवन्ति ।

दक्षिणेर्मा लुब्धयोगे ॥१२६॥

अयं निपात्यते बहुव्रीहौ । दक्षिणम् ईर्मं यस्य स दक्षिणेर्मा मृगः । ईर्मम् = व्रणम् । दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः ।

लुब्धयोगे—लुब्धः = व्याधः तस्य योगे ।

इच् कर्मव्यतिहारे ॥१२७॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मात् 'इच्' । 'तत्र तेनेदमिति' अयं बहुव्रीहिर्गृह्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । मुशलैश्च मुशलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुशलामुशलि । तिष्ठद्गु प्रभृतिषु अयम् इच् प्रत्ययः पठ्यते ।

केशाकेशि—'अन्येषामपि दृश्यते' इति दीर्घः । इच् प्रत्ययः पठ्यते–तेनाव्ययीभावसंज्ञा, अव्ययत्वात् सुपो लुक् ।

द्विदण्ड्यादिभ्यश्च ॥१२८॥

'द्विदण्डि' इत्यादयः शब्दा इच् प्रत्ययान्ताः साधवो भवन्ति ।

'द्विदण्ड्यादयः इति तादर्थ्ये चतुर्थी न पञ्चमी । द्विदण्ड्याद्यर्थमिच् प्रत्ययो भवति । तथा भवति यथा द्विदण्ड्यादयः सिद्ध्यन्तीत्यर्थः । द्विदण्डि प्रहरति । द्विमुसलि । निकुच्यकर्णि धावति ।

द्विदण्डि—द्वौ दण्डौ यस्मिन् प्रहरणे । निकुच्यकर्णि–निकुच्य कर्णौ इति विग्रहः । मयूरव्यंसकादित्वात्समासः ।

प्रसंभ्यां जानुनोर्ज्ञुः ॥१२९॥

आभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति बहुव्रीहौ । प्रज्ञुः । संज्ञुः ।

जानुनोः—षष्ठीद्विवचने रूपम् । प्रज्ञुः–प्रकृष्टे जानुनी अस्य । संज्ञुः–संहते जानुनी यस्य ।

ऊर्ध्वाद्विभाषा ॥१३०॥

ऊर्ध्वशब्दात्परस्य जानुशब्दस्य विभाषा ज्ञुः । ऊर्ध्वज्ञुः / ऊर्ध्वजानुः ।

ऊर्ध्वे जानुनी अस्य ।

ऊधसोऽनङ् ॥१३१॥

ऊधः शब्दान्तस्य बहुव्रीहेः अनङ् आदेशः । कुण्डोघ्नी ।

* (वा०) 'ऊधसोऽनङ्' अत्र स्त्रीग्रहणं कर्त्तव्यम् । इह मा भूत्–महोधा गोगणः ।

कुण्डोघ्नी—कुण्डम् इव ऊधः अस्याः । कुण्डोधन् + ङीष् । 'अल्लोपोऽनः' इत्यकारलोपः ।

धनुषश्च ॥१३२॥

धनुरन्ताद् बहुव्रीहेः 'अनङ्' आदेशः । शार्ङ्गधन्वा । गाण्डीवधन्वा ।

शार्ङ्गधन्वा = शार्ङ्गं धनुः अस्य । एवं पुष्पधन्वा । अधिज्यधन्वा ।

वा संज्ञायाम् ॥१३३॥

धनुरन्ताद् वा 'अनङ्' संज्ञायाम् । शतधन्वा शतधनुः ।

शतधन्वा–एतन्नामको यादववीरः ।

जायाया निङ् ॥१३४॥

जायान्तस्य बहुव्रीहेर्निङ् आदेशः । युवजानिः । जानकी-जानिः ।

युवजानिः–युवतिर्जाया अस्य । जानकीजानिः—जानकी जाया अस्य = भगवान् रामः ।

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥१३५॥

एभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति बहुव्रीहौ समा-सान्तः । तकारो मुखसुखार्थः । उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः ।

मुखसुखार्थः—'इत्' इत्यत्र तकारकरणेनोच्चारणे सुखम् । उद्-गन्धिः–उद्गतो गन्धो यस्य । अत्र गुणवाचिनो गन्धशब्दस्य ग्रहणं न द्रव्यवाचिनः । तेन शोभनो गन्धः = गन्धद्रव्यम् अस्य इति सुगन्धः आपणिकः भवति ।

अल्पाख्यायाम् ॥१३६॥

अल्पाख्यायां गन्धशब्दस्येकारादेशः समासान्तो बहुव्रीहौ । अल्पोऽत्र सूपः सूपगन्धि भोजनम् । अल्पपर्यायोऽयं गन्धशब्दः ।

सूपगन्धि—सूपस्य गन्धः = लेशोऽस्मिन्निति विग्रहः ।

उपमानाच्च ॥१३७॥

उपमानात् परो यो गन्धशब्दस्तस्येकारादेशः । पद्मस्येव गन्धोऽस्य पद्मगन्धिः ।

बहुव्रीहौ समासेऽयं समासान्तो भवति ।

पादस्य लोपोऽहस्त्यादिभ्यः ॥१३८॥

उपमानाद् हस्त्यादिवर्जितात् परस्य पादशब्दस्य लोपः समासान्तो बहुव्रीहौ । स्थानिद्वारेण लोपस्य समासान्तता । व्याघ्रपात् । नेह–हस्तिपादः । कुसूलपादः ।

स्थानिद्वारेण—स्थानी पादस्य 'अकारः' समासान्तः इति तस्य लोपोऽपि समासान्त एव । नेह—'हस्ति' आदिभ्यः परस्य न ।

कुम्भपदीषु च ॥१३९॥

कुम्भपदीप्रभृतयः कृतपादान्तलोपाः ङीप्-प्रत्ययान्ताः पठ्यन्ते । तत्रैवं ज्ञेयम्—पादस्य लोपो भवति कुम्भपद्यादिविषये । कुम्भपदी । शतपदी इत्यादि ।

कुम्भपदी—कुम्भाविव पादावस्याः । स्त्रियां ङीप् । 'पादः पत्' इत्यनेन 'पद्' आदेशः ।

संख्यासुपूर्वस्य ॥१४०॥

एतत्पूर्वस्य बहुव्रीहेः पादशब्दान्तस्य लोपो भवति । द्वौ पादावस्य द्विपात् । सुपात् ।

सुपात्—शोभनौ पादावस्य ।

वयसि दन्तस्य दतृ ॥११४॥

एतत्पूर्वस्य दन्तशब्दस्य 'दतृ' आदेशः समासान्तो वयसि गम्ये । द्विदन् । सुदन् कुमारः ।

एतत्पूर्वस्य—संख्या-सुपूर्वस्य । **द्विदन्**—द्वौ दन्तावस्य । प्रथमैकवचने रूपम् ।

छन्दसि च ॥१४२॥

दन्तस्य 'दतृ' आदेशः समासान्तः । पत्वद्दतमालभेत । उभयतोदतमालभेत ।

उभयतोदतम्--उभयतो दन्ता अस्य तम् ।

स्त्रियां संज्ञायाम् ॥१४३॥

स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तस्य 'दतृ' । अयोदती । फालदती ।

अय एव दन्ता अस्याः ।

विभाषा श्यावारोकाभ्याम् ॥१४४॥

श्याव-अरोक, आभ्यां परस्य दन्तशब्दस्य 'दतृ' इत्ययम् आदेशो भवति । श्यावदन् / श्यावदन्तः । अरोकदन् / अरोकदन्तः । अरोकः = निदीप्तिः । संज्ञायामित्येव नेह—श्यावदन्तः । अरोकदन्तः ।

निर्दीप्तिः = दीप्तेरभावः । श्यावः = धूम्रवर्णः ।

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यः ॥१४५॥

संज्ञायाम्' इति निवृत्तम् । अग्रान्ताच्छब्दात् शुद्ध-शुभ्र-वृष-वराहेभ्यश्च परस्य दन्तशब्दस्य विभाषा 'दतृ' इत्ययमादेशः समासान्तो बहुव्रीहौ । कुड्मलाग्रदन् / कुड्मलाग्रदन्तः । शुद्धदन् / शुद्धदन्तः । अनुक्तसमुच्चयार्थश्चकारः । अहिदन् / अहिदन्तः । मूषकदन् / मूषकन्तः इत्यादि ।

कुड्मलाग्रदन्—कुड्मलाग्राणि इव दन्ताः अस्य ।

ककुदस्यावस्थायां लोपः ॥१४६॥

ककुदशब्दस्यान्तलोपो भवति बहुव्रीहौ समासान्तः अवस्थायां

गम्यायाम् । असञ्जातं ककुदम् अस्य असञ्जातककुद् । बालः इत्यर्थः । पूर्णककुद् । मध्यमवया इत्यर्थः इत्यादि ।

अवस्था = कालेन आहारपरिणामेन च कृताः वयःप्रभृतयः । आदिना उन्नतककुद् । वृद्धवया इत्यर्थः ।

त्रिककुत् पर्वते ॥१४७॥

त्रिककुत् इति बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वतेऽभिधेये । त्रिककुत् पर्वतः । ककुदाकारं शृङ्गं ककुदमुच्यते ।

त्रीणि ककुदान्यस्येति विग्रहः ।

उद्विभ्यां काकुदस्य ॥१४८॥

आभ्यां परस्य काकुदशब्दस्य लोपो भवति समासान्तः बहुव्रीहौ । उद्गतं काकुदमस्य उत्काकुत् । काकुदं तालु ।

एवं विकाकुत् ।

पूर्णाद्विभाषा ॥१४९॥

पूर्णशब्दात्परस्य काकुदशब्दस्य विभाषा लोपः । पूर्णकाकुत् / पूर्णकाकुदः ।

पूर्णं काकुदम् अस्येति विग्रहः ।

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥१५०॥

एतौ निपात्येते यथासंख्यं मित्रामित्रयोर्वाच्ययोः । सु-दुःशब्दयोः परस्य हृदयस्य हृद्भावो निपात्यते बहुव्रीहौ । शोभनं हृदयमस्य सुहृत् मित्रम् । दुर्हृद् अमित्रः । नेह—सुहृदयः कारुणिकः ।

दुष्टं हृदयम् अस्य दुर्हृत् ।

उरःप्रभृतिभ्यः कप् ॥१५१॥

उर.प्रभृत्यन्ताद् बहुव्रीहेः कप् समासान्तः । व्यूढमुरो यस्य व्यूढोरस्कः । प्रियसर्पिष्कः । । सोपानत्कः इत्यादि ।

सोपानत्कः– उपानद्भ्यां सह वर्तते इति विग्रहः ।

❀ (वा०) अर्थान्नञः । नास्ति अर्थः अस्य अनर्थकः ।

इनः स्त्रियाम् ॥१५२॥

इन्नन्ताद् बहुव्रीहेः कप् स्त्रियां विषये । बहुदण्डिका नगरी । बहुवाग्मिका सभा ।

बहवः दण्डिनः अस्यामिति बहुदण्डिन् + कप् + टाप् । स्त्रिया अन्यत्र विकल्पेन कप् बहुदण्डी / बहुदण्डिकः राजा ।

नद्यृतश्च ॥१५३॥

नद्यन्ताद् ऋदन्ताच्च बहुव्रीहेः कप् । बह्व्यः कुमार्योऽस्मिन् बहुकुमारिको ग्राम. । बहुकर्तृकः । तकारो मुखसुखार्थः ।

बहुकुमारिकः-–'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः ।

शेषाद्विभाषा ॥१५४॥

यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेषः । तस्माद्विभाषा कप् वक्तव्यः । बह्व्यः खट्वा अस्मिन् बहुखट्वकः / बहुखट्वः । बहुमालकः / बहुमालः ।

बहुखट्वकः––'आपोऽन्यतरस्याम्' इति ह्रस्वः ।

न संज्ञायाम् ॥१५५॥

संज्ञायां विषये बहुव्रीहौ कप् न । पूर्वेण प्राप्तः प्रतिषिध्यते । विश्वे देवा अस्य विश्वदेवः ।

विश्वदेवः – देवानां संज्ञा ।

ईयसश्च ॥१५६॥

ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति । सर्वा प्राप्तिर्निषि-ध्यते । बहवः श्रेयांसोऽस्य बहुश्रेयान् । 'शेषाद्विभाषे' त्यस्य प्रतिषेधः । बह्व्यः श्रेयस्योऽस्य बहुश्रेयसीः । 'नद्यृतश्च' इत्यस्य प्रतिषेधः । ह्रस्वत्वमपि न 'ईयसो बहुव्रीहौ पुंवत्' इति वचनात् ।

श्रेयस् शब्दः 'ईयसुन्' प्रत्ययान्तः ।

वन्दिते भ्रातुः ॥१५७॥

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद्बहुव्रीहेः कप् न । वन्दितो भ्राता सुभ्राता । नेह-मूर्खभ्रातृकः ।

वन्दितः = पूजितः । सुभ्राता–शोभनो भ्राता अस्य ।

ऋतश्छन्दसि ॥१५८॥

ऋवर्णान्ताच्छन्दसि विषये कप् न । हता माता अस्य हतमाता । हतपिता । हतस्वसा ।

'नद्यृतश्च' इत्यनेन कप् प्राप्तः ।

नाडीतन्त्र्योः स्वाङ्गे ॥१५९॥

स्वाङ्गे यौ नाडी·तन्त्रीशब्दौ तदन्ताद्बहुव्रीहेर्न कप् । बह्व्यो नाड्योऽस्य बहुनाडिः कायः । बहुतन्त्री ग्रीवा । धमनिवचन-स्तन्त्रीशब्दः ।

बहुनाडिः—उपसर्जनह्रस्वत्वम् । बहुतन्त्री–'कृत्स्त्रियाः प्रतिषेधः' इति ह्रस्वत्वस्य प्रतिषेधः ।

निष्प्रवाणिश्च ॥१६०॥

'निष्प्रवाणिः' इति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते ।

प्रोयतेऽस्यामिति प्रवाणी = तन्तुवायशलाका । निर्गता प्रवाणी अस्मात् निष्प्रवाणिः पटः = अपनीतशलाकः ।

प्रवाणी—प्र √ वेञ् + ल्युट् → अन + ङीप् ।

पादशतस्यतत्प्रकृतवृकज्येष्ठाभ्यांसपत्रान्ववतप्तात्खार्य्यानञ्सुभ्यो वयसि विंशतिः (१७०) ।

इतिश्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन
सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण
आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
पञ्चमाध्यायस्य चतुर्थः पादः ।

पञ्चमाध्यायस्यास्मिन् चतुर्थे पादे पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च, तत्प्रकृततवचने मयट्, वृकज्येष्ठाभ्यां तिल्तातिलौ चच्छन्दसि, सपत्र-निष्पत्रादतिव्यथने, अन्ववतप्ताद्रहसः, खार्याः प्राचाम्, नञ्दुःसुभ्यो हलि-सक्थ्योरन्यतरस्याम्, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा वयसि दन्तस्य दतृ इत्यत आरभ्य विंशतिः सूत्राणोति संकलनेन षष्ट्युत्तरशतसंख्याकानि (१६०) सूत्राणि सन्ति ।

इति सामवेदि-विप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन
शिवादेवी-गर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना
विरचितायां काशिकावृत्तिसार-सुधायां
पञ्चमाध्यायस्य चतुर्थः पादः ।

समाप्तोऽयं पञ्चमाध्यायः ।

अथ षष्ठाध्याये प्रथमः पादः

एकाचो द्वे प्रथमस्य ॥१॥

इत ऊर्ध्वं यद्वक्ष्यामः प्राक् सम्प्रसारणविधानात् तत्र एकाचो प्रथमस्य द्वे भवतः इत्येवं तद् वेद्यम् । 'एकाचः' इति च 'द्वे' इति च 'प्रथमस्य' इति च त्रयमधिक्रियते । वक्ष्यति 'लिटि धातोः......' इत्यादि जजागार । पपाच ।

एकाचः—एकोऽच् यस्मिन् इति एकाच् तस्य । जजागार—अत्र √ जागृ इत्यस्यावयवस्य 'जा' इत्यस्य दीर्घः ।

अजादेर्द्वितीयस्य ॥२॥

प्रथमद्विर्वचनापवादः । अजादेर्धातोः द्वितीयावयवस्यैकाचो द्वे भवतः । अटिटिषति । अशिशिषति ।

अटिटिषति—अट् + सन् अत्र 'टिष्' इत्यस्य द्वित्वम् । अटितुम् इच्छति इति विग्रहः ।

न न्द्राः संयोगादयः ॥३॥

नकार-दकार-रेफा द्वितीयस्यैकाचोऽवयवभूता द्विर्नोच्यन्ते । √उन्दी क्लेदने—उन्दिदिषति । केचिदजादेरिति पञ्चम्यन्तं कर्मधारयमनुवर्तयन्ति । तस्य प्रयोजनं इन्द्रिद्रीयिषति । अजादेरनन्तर-

त्वान्नकारो न द्विरुच्यते दकारो द्विरुच्यते । इन्द्रमिच्छतीति क्यच् तदन्तादिन्द्रीयितुमिच्छतीति सन् ।

❀ (वा०) बकारस्याप्ययं निषेधः । यदा बोपध उब्जिरुपदिश्यते तदा निषेधः । दोपधोपदेशे तु न । उब्जिजिषति ।

❀ (वा०) यपरस्य रेफस्य न निषेधः । अरार्य्यते ।

❀ (वा०) ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वाच्यम् । केचिदाहुस्तृतीयस्य हलः । अन्ये तृतीयस्यैकाच इति ।

❀ (वा०) कण्ड्वादीनां तृतीयस्यैकाचः । कण्डूयियिषति ।

❀ (वा०) यथेष्टं नामधातूनाम् । पुपुत्रीयिषति इत्याद्युन्नेयम् ।

उन्दिदिषति—अत्र नकारस्य न द्वित्वम् । अड्डिडिषति– √ अड्ड (अभियोगे) + सन् । अत्र संयोगादेर्दकारस्य द्वित्वं न । 'ष्टुना ष्टुः' इत्यनेन दकारस्य डकारः ।

अर्चिचिषति—√ अर्च (पूजायाम्) + सन् । अत्र संयोगादेः रकारस्य न द्वित्वम् । अरार्य्यते–र्अति + यङ् ।

ईर्ष्यतेः—हल्पक्षे ईर्ष्यियिषति । अच्पक्षे ईर्ष्यिषिषति । पुपुत्रीयिषति–पुत्रम् आत्मनः इच्छति पुत्र + क्यच् + सन् अत्र 'पु' मात्रस्य द्वित्वम् । 'त्र' इत्यस्य द्वित्वे पुतित्रीयिषति । यकारमात्र द्वित्वे पुत्रीयियिषति । 'पुत्रीय' इत्यस्य द्वित्वे पुपुतित्रीयियिषति । 'स' मात्रस्य द्वित्वे पुत्रीयिषिषति ।

पूर्वोऽभ्यासः ॥४॥

अत्र प्रकरणे ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः । पपाच । पिपक्षति । पापच्यते । जुहोति ।

अभ्याससंज्ञायाः फलम् 'अत्र लोपोऽभ्यासस्य' इत्यादिसूत्राणां प्रवृत्तिः ।

उभे अभ्यस्तम् ॥५॥

अत्र प्रकरणे ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तसंज्ञे

भवतः । ददति । उभे किम् ? नेनिजति इत्यत्र 'अभ्यस्तानामादिः' इति समुदाये उदात्तत्वं यथा स्यात् । प्रत्येकं पर्यायेण वा मा भूत् ।

ददति— अत्र 'अदभ्यस्तात्' इति झेः अत् ।

जक्षित्यादयः षट् ॥६॥

√ जक्ष् इत्ययं धातुः । इत्यादयश्च षड् धातवः अभ्यस्त संज्ञाः । सेयं सप्तानां धातूनां संज्ञा । जक्षति । जाग्रति । दरिद्रति । चकासति । शासति । नुम्-प्रतिषेधः फलम् । दीध्यत् । वेव्यत् । शतरि व्यत्ययेन सम्पादिते नाभ्यस्तादिति नुम् प्रतिषेधः ।

सप्तानाम्—यथा परिगणिताः कारिकायाम् ।

√ जक्षि- √जागृ-दरिद्राणां √ चकासेः √ शास एव च ।
√ दीधी — वेव्योश्च √ सप्तानां जक्षित्यादावुपग्रहः ॥

व्यत्ययेन—दीधीङ्-वेवीङ् एतौ ङितौ धातू स्तः । तयोः व्यत्ययेन परस्मैपदम् । तेन शतृ ।

तुजादीनां (रुजादीनां) दीर्घोऽभ्यासस्य ॥७॥

प्रकारे आदिशब्दः । स कः ? रुजेर्दीर्घत्वम् अभ्यासस्य न विहितं प्रयोगे च दृश्यते, एवं ये तथाभूतास्ते रुजादयः । तेषामभ्यासस्य दीर्घत्वं साधु भवति । रूरुजानः । मामहानः । दीर्घश्चैषां छन्दसि दृश्यते ।

तुजादीनाम् — अयं पाठः वृत्तेरनुसारम् । काशिकासारे तु 'रुजादीनाम्' इत्येष पाठः । उदाहरणान्तराणि—तूतुजानः । अनड्वान् दाधार ।

लिटि धातोरनभ्यासस्य ॥८॥

लिटि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचोऽजादेर्द्वितीयस्य वा यथायोगं द्वे भवतः । पपाच । प्रोर्णुनाव ।

पपाच—√ पच् इत्यस्य द्वित्वम् । प्रोर्णुनाव—√ उर्णुञ् (आच्छादने) 'नु' इत्यस्य द्वित्वम् ।

❀ (वा०) द्विर्वचनप्रकरणे छन्दसि वा । यो जागार । दाति प्रियाणि ।

सन्यङोः ॥९॥

सन्नन्तस्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । पिपक्षति । अटिटिषति । पापच्यते । अरार्यते ।

'सन्यङोः' इति षष्ठीद्विवचनान्तं पदम् ।

श्लौ ॥१०॥

श्लौ सति द्वे भवतः प्राग्वत् । जुहोति ।

सति—'परतः' इत्यर्थः । लोपेऽपि बुद्धिपरिकल्पितं पौर्वापर्यम् ।

चङि ॥११॥

चङि परतो द्वे भवतः प्राग्वत् । अपीपचत् । आटिटत् । √ पच् आदीनां ण्यन्तानां चङि विहिते णिलोप उपधाह्रस्वत्वं द्वित्वम् एष क्रमः ।

अपीपचत्—√ पच् + णिच् + लुङ् (प्र० पु० एकव०) आटिटत्—'टि' इत्यस्य द्वित्वम् ।

दाश्वान् साह्वान् मीढ्वांश्च ॥१२॥

एते छन्दसि भाषायां सामान्येन निपात्यन्ते । √ दाशृ दाने । दाश्वांसो दाशुषः सुतम् इति । √ षह् मर्षणे । साह्वान् बलाहकः । मीढ्वस्तोकाय तनयाय ।

❀ (वा०) √चर आदीनामच्प्रत्यये द्वित्वं भवति, अभ्यासस्य च आगागमः । विधिबलाद् हलादिशेषो न । चराचरः । चलाचलः । पतापतः । वदावदः ।

❀ (वा०) वेति केचित् ।

❀ (वा०) हन्तेर्घत्वं च । घनाघनः ।

मीढ्वः—√ मिह् + क्वसु । दाश्वान्—इत्यादिषु क्वसु, द्वित्वस्य 'इट्' आगमस्य चाभावो निपात्यते आगागमः—आङ् + आगमः । वेति—तेन चरः पुरुषः । वदः पुरुषः इत्यादि ।

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥१३॥

अनयोः परयोः ष्यङन्तस्य सम्प्रसारणं तत्पुरुषे । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः ।

कारीषगन्धीपुत्रः—करीषस्येव गन्धोऽस्य करीषगन्धिः । तस्य गोत्रापत्यं स्त्री करीषगन्धि + अण् + ष्यङ् + चाप् = कारीषगन्ध्या तस्याः पुत्रः । यकारस्य सम्प्रसारणम् इकारः ततः आकारस्यैकादेशो दीर्घत्वञ्च ।

बन्धुनि बहुव्रीहौ ॥१४॥

बन्धुशब्दे परे बहुव्रीहौ ष्यङः सम्प्रसारणम् । कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः ।

❀ (वा०) मातचमातृकमातृषु । विभाषया ष्यङः सम्प्रसारणं भवति । कारीषगन्धीमातः / कारीषगन्ध्यामातः । मातृशब्दस्य 'मातच्' आदेशः । एवं कारीषगन्धीमातृकः / कारीषगन्ध्यामातृकः । कारीषगन्धीमाता / कारीषगन्ध्यामाता । बन्धुनि—शब्दरूपं मत्वा क्लीबत्वम् ।

वचिस्वपियजादीनां किति ॥१५॥

वचि-स्वप्योः यज् आदीनाञ्चाभ्यासस्य सम्प्रसारणं किति । उक्तः । सुप्तः । इष्टः ।

उक्तः—√ वच् + क्त । सुप्तः—√ ञिष्वप् + क्त । इष्टः—√ यज् + क्त जकारस्य षत्वं ष्टुत्वञ्च ।

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥१६॥

एषां धातूनां ङिति चात् किति सम्प्रसारणम् । √ग्रह—गृहीतवान् । ङिति—जरीगृह्यते √ ज्या- जीनः । जेजीयते । √ वेञ्—ऊयतुः । √ व्यध- विद्धः । विध्यति । √ वश—उशितः । उशन्ति । √ व्यच्—विचितवान् । विचति ।

❋ (वा०) विचेः कुटादित्वमनसि वाच्यम् । तेनाञ्णिति सर्वत्र सम्प्रसारणम् । उद्विचिता । √ व्रश्च—वृक्णः । वृक्णवान् । वृश्चति । √ प्रच्छ—पृष्टः । पृच्छति । √ भ्रस्ज—भृष्टः । भृज्जति ।

जरीगृह्यते—√ ग्रह + यङ् । जीनः—√ ज्या + क्त । ऊयतुः—√ वेञ् + लिट्, लिटि √ वेञ् इत्यस्य 'वयि' आदेशः । 'असंयोगाल्लिट् कित्' इत्यनेनास्य कित्त्वम् । उद्विचिता—उद् √ विच् + तृच् । वृक्णः—√ व्रश्च + क्त । सम्प्रसारण—'गाङ्कुटादिभ्यः……' इत्यनेन ।

लिट्यभ्यासस्योभयेषाम् ॥१७॥

उभयेषाम् = वच्यादीनां ग्रहादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति । उवाच । सुष्वाप । इयाज । ग्रहेरविशेषः—जग्राह । जिज्यौ । उवाय । विव्याध । व्रश्चेः रेफस्य सम्प्रसारणं कृत्वा उरदत्वं रपरत्वं च । तस्य स्थानिवत्त्वात् न 'सम्प्रसारणे……' इति प्रतिषेधो भवतीत्यस्ति विशेषः । वव्रश्च ।

पृच्छति-भृज्जत्योरविशेषः ।

अविशेषः—असम्प्रसारणेऽपि हलादिशेषेण 'जग्राह' इत्येव भवति । तथैव सर्वत्र ज्ञेयम् । अस्ति विशेषः—वकारस्य सम्प्रसारणे 'उव्रश्च' इत्यनिष्टं रूपं स्यात् ।

स्वापेश्चङि ॥१८॥

ण्यन्तस्य ग्रहणम् । तस्य चङि परे सम्प्रसारणम् । असूषुपत् ।

द्विर्वचनात् पूर्वमत्र सम्प्रसारणम् । तत्र कृते लघूपधगुणः । तस्य च णौ चङीति ह्रस्वः । ततो द्विर्वचनम् । 'दीर्घो लघोः' इति दीर्घः । 'ङिति इति केवलमिहानुवर्तते' इत्येतद् दुर्विज्ञानम् ।

स्वापेः—√ स्वप् + णिच् । चङीति– चङ्यु पधायाः' इत्यनेन । असूषुपत्—√ स्वप् + णिच् + लुङ् ।

स्वपिस्यमिव्येञां यङि ॥१९॥

एषां यङि परतः सम्प्रसारणं भवति । सोषुप्यते । सेसिम्यते । वेवीयते । यङि किम् ? स्वप्नक् ।

एषाम्– √ स्वप् शयने, √ स्यम् शब्दे, √ व्येञ् संवरणे इति धातूनाम् ।

न वशः । २०॥

वशेर्यङि न सम्प्रसारणम् । वावश्यते ।

√ वश् + यङ् + लट् → त ।

चायः की ॥२१॥

अस्य धातोर्यङि 'की' इत्यादेशः । चेकीयते । दीर्घोच्चारणं यङ्लुगर्थम् ।

यङ्लुगर्थम्—अस्मादेव दीर्घोच्चारणात् √चाय् इत्यस्माद्यङ्लुक् भवति । चेकीतः ।

स्फायः स्फी निष्ठायाम् ॥२२॥

स्फीतः । स्फीतवान् । 'लिङ्यङोश्च' इति प्रागतो 'निष्ठायाम्' इत्यधिक्रियते ।

स्फायः—√ स्फायी वृद्धौ इत्यस्य । 'स्फातीभवति' इति रूपं 'क्तिन्' प्रत्ययान्तात् 'च्वि' प्रत्यये भवति नतु निष्ठान्तस्येदं रूपम् । निष्ठा—क्त-क्तवतू प्रत्ययौ ।

स्त्यः प्रपूर्वस्य ॥२३॥

√ ष्टचै, √ स्त्यै एतयोः प्रपूर्वयोर्निष्ठायां परतः सम्प्रसारणम् । प्रस्तीतः । प्रस्तीतवान् । प्रस्तीमः । प्रस्तीमवान् । 'प्रस्त्य' इति वाच्ये पूर्वग्रहणम् इहापि यथा स्यात् । प्रसंस्तीतः ।

√ ष्टचै, √ स्त्यै इत्येतौ शब्दसंघातयोः । प्रस्तीमः—'प्रस्त्योऽन्यतरस्याम्' इति पक्षे मकारः ।

द्रवमूर्तिस्पर्शयोः श्यः ॥२४॥

द्रवमूर्तिः = द्रवकाठिन्यं तत्र स्पर्शे च वर्तमानस्य श्यैङो निष्ठायां सम्प्रसारणम् । √ श्यैङ् गतौ शीनं घृतम् । 'श्योऽस्पर्शे' इति तकारस्य नत्वम् । स्पर्शे च शीतो वायुः ।

शीनं घृतम्—द्रवरूपं घृतं कठिनं जातम् । शीतो वायुः—शीतगुणवान् वायुरित्यर्थः ।

प्रतेश्च ॥२५॥

प्राग्वत् । प्रतिशीनः । प्रतिशीनवान् । द्रवमूर्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादित्यारम्भः ।

प्रतिशीनः—प्रति √ श्यै + क्त ।

विभाषाऽभ्यवपूर्वस्य ॥२६॥

प्राग्वत् । द्रवमूर्ति-स्पर्शविवक्षायामप्येतत्पूर्वस्य वा शीभावः । अभिशीनम् / अभिश्यानं घृतम् इत्यादि ।

इत्यादि—अवशीनम् / अवश्यानम् । अभिशीतो वायुः / अभिश्यानः । पूर्वग्रहणात् अभिसंशीनम् । अभिसंश्यानम् इति विभाषा भवति ।

शृतं पाके ॥२७॥

√ श्रा पाके इत्यस्य धातोर्ण्यन्तस्य चाण्यन्तस्य पाकेऽभिधेये

वा 'शृ' भावो निपात्यते। शृतं हविः क्षीरं वा। व्यवस्थितविभाषा तेन क्षीर-हविषोर्नित्यम्। अन्यत्र न श्राणा / श्रपिता यवागूरिति विकल्पः।

ण्यन्तस्य चाण्यन्तस्य—तथा च वार्तिकम्—
श्राश्रप्योः 'शृ' भावो निपात्यते

प्यायः पी ॥२८॥

अस्य धातोर्वा 'पी' इत्ययमादेशः निष्ठायाम्। पीनं मुखम्। व्यवस्थितविकल्पत्वात्सोपसर्गस्य न—प्रप्यानः। आङ्पूर्वस्यान्धूधसोर्भवत्येव। आपीनोऽन्धुः। आपीनमूधः।

अस्य—√ प्यायी वृद्धौ इत्यस्य। आपीनः—अन्धु–ऊधः इत्यनयोरर्थयोः 'पी' आदेशो नित्यम् अन्यत्र न। आप्यानः चन्द्रमाः।

लिड्यङोश्च ॥२९॥

'निष्ठायां विभाषा' इति निवृत्तम्। लिटि यङि च प्यायः 'पी' इत्ययमादेशः। आपिप्ये। परत्वात् 'पी' भावे पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम्। आपेपीयते।

आपेपीयते—√ आ √ प्यायी + यङ् लट् → त।

विभाषा श्वेः ॥३०॥

लिटि यङि च परतः श्वयतेर्धातोः विभाषा सम्प्रसारणम्। शुशाव / शिश्वाय। यङि शोशूयते। लिटि यजादित्वान्नित्यं प्राप्तम्, यङि त्वप्राप्तम् तदुभयत्र विकल्पेन भवति।

श्वेः—√श्वि इत्यस्य। शोशूयते—पक्षे शेश्वीयते।

णौ च संश्चङोः ॥३१॥

सन्परे चङ्परे च णौ परे श्वयतेर्वा सम्प्रसारणम्।

शुशावयिषति / शिश्वाययिषति । अशूशवत् / अशिश्वयत् । सम्प्रसारणं तदाश्रयं च बलीयः इति वचनादन्तरङ्गमपि वृद्ध्यादि सम्प्रसारणेन बाध्यते। कृते च तस्मिन् वृद्ध्यावादेशौ । तत्र 'ओः पुयण्जिषु' वचनं ज्ञापकं णौ स्थानिवद्भावस्येति स्थानिवत्त्वात् 'शु'शब्दो द्विरुच्यते ।

शुशावयिषति--√ शिव + णिच् + सन् ।

ह्वः सम्प्रसारणम् ॥३२॥

सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं भवति । जुहावयिषति । अजूहवत् । सम्प्रसारणस्य बलवत्त्वात् 'शाच्छासाह्वा......' इति युक् न । पुनः सम्प्रसारणग्रहणं विभाषानिवृत्त्यर्थम् ।

ह्वः – √ ह्वेञ् इत्यस्य । जुहावयिषति -- √ ह्वेञ् + णिच् + सन् ।

अभ्यस्तस्य च ॥३३॥

अभ्यस्तकारणस्य ह्वयतेर्द्विर्वचनात् प्रागेव सम्प्रसारणम् । जुहाव । जोहूयते ।

पृथग्योगकरणमनभ्यस्तनिमित्तप्रत्ययव्यवाये सम्प्रसारणाभाव-ज्ञापनार्थम् । ह्वायकमिच्छति ह्वायकीयति ततः सन्--जिह्वाय-कीयिषति ।

अनभ्यस्त – यः प्रत्ययोऽभ्यस्तस्य निमित्तं न भवति । जिह्वाय-कीयिषति---अत्र ण्वुल्-क्यच् प्रत्यययोर्व्यवधानेन न सम्प्रसारणम् ।

बहुलं छन्दसि ॥३४॥

अस्य बहुलं सम्प्रसारणं छन्दसि । इन्द्राग्नी हुवे । ह्वयामि मरुतः शिवान् ।

हुवे— √ह्वेञ् + लट् । आत्मनेपदोत्तमैकवचने शपो लुक्, सम्प्रसारणम्, उवङ् आदेशश्च । ह्वयामि–अत्र न सम्प्रसारणम् ।

चायः की ॥३५॥

चायतेः छन्दसि बहुलं 'की' इत्यादेशः । विधुना निचिक्युः । अ॒ग्निर्ज्यो॑तिर्नि॒चाय्य ।

निचिक्युः— नि √ चायृ + लिट् → उसि रूपम् । निचाय्य– ल्यपि रूपम् । अत्र न 'की' आदेशः ।

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ॥३६॥

अप॑स्पृधेथाम् । आनृचुः । आनृहुः । चिच्युषे । ति॒त्याज॑ । श्राताः । श्रितम् । आशीः । आशी॑र्ताः एते छन्दसि निपात्यन्ते ।

अपस्पृधेथाम् — अप √स्पर्ध + लङ् → आथाम् । धातोः रकारस्य सम्प्रसारणम् अकारलोपश्च । आनृचुः, आनृहुः — √ अर्च, √ अर्ह (पूजायाम्) + लिट् → उस् । उभयत्र सम्प्रसारणम् अकारलोपश्च । चिच्युषे– √ च्युङ् + लिट् → से । तित्याज-त्यज् + लिट् । उभयत्र सम्प्रसारणम् । श्राताः— √ श्रीञ् + क्त धातोः 'श्रा' आदेशः । श्रितम्–'श्री' इत्यस्य ह्रस्वत्वम् । आशीः — आ √ श्रीञ् + क्विप् धातोः, शीर्' आदेशः । आशीर्ताः–आ √ श्रीञ् + क्त, तस्य नत्वाभावः ।

न सम्प्रसारणे सम्प्रसारणम् ॥३७॥

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न । √ व्यध्— विद्धः । √ व्यच्—विचितः । अतएव ज्ञापकादन्त्यस्य यणः सम्प्रसारणम् ।

विद्धः, विचितः—उभयत्रापि यकारस्य सम्प्रसारणम् इकारः ।

❀ (वा०) ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि । तिस्रः ऋचः यस्मिन् तत् तृचं सूक्तम् । अत्र त्रेः रकारस्य सम्प्रसारणम् ऋकारः, ऋचः ऋकारस्य लोपश्च ।

लिटि वयो यः ॥३८॥

लिटि परतो वयो यकारस्य सम्प्रसारणं न। उवाय। ऊयतुः। ऊयुः। 'लिटि' ग्रहणम् उत्तरार्थम्।

उवाय—अत्र वकारस्य सम्प्रसारणं भवति।

वश्चान्यतरस्यां किति ॥३९॥

अस्य वयो यकारस्य किति लिटि वा वकारादेशः। ऊवतुः / ऊयतुः।

ऊवतुः—अत्रापि वकारस्य सम्प्रसारणम्।

वेञः ॥४०॥

√ वेञ् इत्यस्य न सम्प्रसारणम् लिटि। ववौ। किति यजादित्वात् प्राप्तम्, अकिति लिट्यभ्यासस्येत्युभयं प्रतिषिध्यते।

ववौ—किति उदाहरणं ववतुः।

ल्यपि च ॥४१॥

वेञो न सम्प्रसारणं ल्यपि। प्रवाय। उपवाय।

पृथक् सूत्रम् उत्तरत्रानुवृत्तये।

ज्यश्च ॥४२॥

ज्याधातोर्ल्यपि न सम्प्रसारणम्। प्रज्याय।

√ ज्या वयोहानौ।

व्यश्च ॥४३॥

व्येञ् धातोर्ल्यपि न सम्प्रसारणम्। प्रव्याय।

√ व्येञ् संवरणे। योगविभागः उत्तरार्थः।

विभाषा परेः ॥४४॥

परेः परस्य वेञो वा न सम्प्रसारणम् । परिवीय / परिव्याय । 'हलः' इति दीर्घत्वेन परत्वात् 'तुक्' बाध्यते ।

न सम्प्रसारणम्––'ल्यपि' इति शेषः ।

आदेच उपदेशेऽशिति ॥४५॥

एजन्तो यो धातुरुपदेशे, तस्य आकारादेशो न तु शिति प्रत्यये । ग्लाता । ग्लातव्यम् । 'श' एव इत् स शित् । 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति शिदादौ प्रतिषेधः । तेन जग्ले, मम्ले इत्यादौ न ।

जग्ले — √ ग्लै + लिट् → त, तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एश् । अयं न शिदादिः, अपि तु शिदन्तः इति हेतोरत्र 'अशिति' इति प्रतिषेधो न । प्रतिषेधः शिदादावेव भवति ।

न व्यो लिटि ॥४६॥

व्येञो लिटि न सम्प्रसारणम्, आकारादेशः । संविव्याय । संविव्ययिथ ।

संविव्याय––सम्, वि √ व्येञ् + लिट् → णल् । 'लिटचभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणम् । संविव्ययिथ––थलि रूपम् । 'इडत्यर्तिव्ययतीनाम्' इति इट् ।

स्फुरतिस्फुलत्योर्घञि ॥४७॥

अनयोरचः स्थाने घञि परत आकारादेशः । विस्फारः / विष्फारः । विस्फालः / विष्फालः ।

विस्फारः –– √ स्फुर (चलने) + घञ् । गुणे कृते ओकारस्य आकारादेशः । 'स्फुरति-स्फुलत्योर्निर्निविभ्यः' इति वा षत्वम् । एवं √ स्फुल चलने इत्यपि ।

क्रीङ्जीनां णौ ॥४८॥

√क्री- √इङ्- √जि—एषां णौ परत एचः स्थाने आकारादेशो भवति । क्रापयति । अध्यापयति । जापयति ।

क्रापयति— √क्रीञ् (द्रव्यविनिमये) + णिच् + लट् । आत्त्वे कृते 'अर्तिह्री........' इत्यनेन पुक् । एवम् उभयोरपि ज्ञेयम् ।

सिध्यतेरपारलौकिके ॥४९॥

अस्य धातोरपारलौकिकेऽर्थे वर्तमानस्य एचः स्थाने आकारादेशो भवति । अन्नं साधयति । अपारलौकिके किम् ? तपस्तापसं सेधयति । अत्र उभयत्रापि √सिध् परलोकार्थे ज्ञानविशेषे वर्तते । तापसः सिध्यति = ज्ञानविशेषम् आसादयति तं तपः प्रयुङ्क्ते । स च ज्ञानविशेष उत्पन्नः सन् परलोके फलमुपसंहरन् परलोकप्रयोजनो भवति ।

इह कस्मान्न ? अन्नं साधयति विप्रेभ्यो दास्यामि । सिद्धेरत्रार्थो निष्पत्तिः तस्य प्रयोजनमन्नम् तस्य यद्दानं तत् पारलौकिकम्, न पुनः सिद्धिरेव । साक्षात् परलोकप्रयोजने सिद्ध्यर्थे सावकाशं वचनम् ।

अपारलौकिकम्—परलोकः प्रयोजनमस्य तत् पारलौकिकम् न पारलौकिकम् इति । **अन्नं साधयति—**अन्नं निष्पादयति ।

मीनातिमिनोतिदीङां ल्यपि च ॥५०॥

एषां ल्यपि विषये 'च' शब्दादेचश्च विषये उपदेश एव प्राक् प्रत्ययोत्पत्तेरलोऽन्त्यस्थाने आकारादेशः । प्रमातुम् । प्रमाय । उपदातुम् । उपदाय ।

एषाम् — √मीञ् — √मिञ् — √दीङ् धातूनाम् । **एचश्च विषये —** यस्मिन् प्रत्यये 'एच्' भावी तस्मिन् बुद्धिस्थे । **ल्यपि —** अत्रापि विषयसप्तमी । **प्रमातुम् —** प्र √मीञ् + तुमुन् ।

विभाषा लीयतेः ॥५१॥

लीनातेर्लीयतेश्च ल्यपि चेचश्च विषये उपदेशेऽलोऽन्त्यस्य स्थाने विभाषा आकारादेशः । विलाता / विलेता । विलाय / विलीय ।

√लीङ् श्लेषणे (दिवादिः) √लि श्लेषणे (क्र्यादिः) इत्युभयोर्ग्रहणम् ।

व्यवस्थित विभाषाश्रयणात् खल्–अचोर्न । ईषत्प्रलयः । निलयः । विलयः । णिचि च नित्यमात्त्वम्–कस्त्वाम् उल्लापयते ।

खिदेश्छन्दसि ॥५२॥

अस्य धातोश्छन्दसि वा आकारादेशः । चित्तं चिखाद / चिखेद ।

चिखाद––एचः स्थाने आकारादेशः । पक्षे चिखेद ।

अपगुरो णमुलि ॥५३॥

'√ गुरी उद्यमने' इत्यस्य धातोरपपूर्वस्य णमुलि परत एचः स्थाने वा आकारादेशः अपगोरम्अपगोरम् / अपगारम्अपगारम् आभीक्ष्ण्ये णमुल् ।

'आभीक्ष्ण्ये द्वे भवतः' इति द्वित्वम् ।

चिरस्फुरोर्णौ ॥५४॥

एतयोरेचः स्थाने वा आकारादेशो णौ । चापयति / चाययति । स्फारयति / स्फोरयति ।

एतयोः— √ चिञ् – √ स्फुर् धात्वोः । चापयति – √ चि + णिच् + लट् । वृद्धौ सत्याम् ऐकारस्याकारः 'अर्तिह्री.......' इत्यनेन पुक् । स्फारयति–ओकारस्याकारः ।

प्रजने वीयतेः ॥५५॥

√ वी गतिप्रजनकान्ति-असनखादनेषु । प्रजने वर्त्तमानस्यास्य णौ वा आकारादेशः । पुरोवातो गाः प्रवापयति / प्रवाययति । गर्भं ग्राहयतीत्यर्थः ।

प्रजनः—जन्मन उपक्रमः गर्भग्रहणमित्यर्थः ।

बिभीतेर्हेतुभये ॥५६॥

हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकः । ततो यद्भयं तद्धेतुभयम् । स यस्य साक्षाद्धेतुस्तत्र वर्त्तमानस्य √ भी धातोर्वा आकारादेशः । मुण्डो भापयते / भीषयते । जटिलो भापयते / भीषयते । 'भीस्म्योर्हेतुभये' इत्यात्मनेपदम् । 'भियो हेतुभये षुक्' इति षुक् । स चात्त्वपक्षे न 'लीभियोरी'कारप्रश्लेष-निर्देशादीकारान्तस्य भियः षुक् विधीयते ।

हेतुभये किम् ? कुञ्चिकयैनं भाययति । अत्र कुञ्चिकातो भयं करणान्न हेतोर्देवदत्तात् ।

हेतुभये—हेतोर्भयं तस्मिन् । मुण्डजटिलौ भयस्य हेतू, कुञ्चिका तु करणम् । प्रश्लेषः — √ ली + ई, √ भी + ई इति प्रश्लेषः ।

नित्यं स्मयतेः ॥५७॥

स्मयतेर्धातोर्हेतुभये णौ परतो नित्यमाकारादेशः । मुण्डो विस्मापयते ।

√ स्मिङ् ईषद्धसने । अस्य भयमर्थो यद्यपि नास्ति तथापि चित्त-विकाररूपार्थसाम्यादयमर्थो गौणत्वेन लभ्यते ।

सृजिदृशोर्झल्यमकिति ॥५८॥

अनयोर्झलादावकिति अमागमः । स्रष्टा । स्रष्टुम् । स्रष्टव्यम् । द्रष्टा । द्रष्टुम् । द्रष्टव्यम् । अस्राक्षीत् । अद्राक्षीत् ।

स्रष्टा — √सृज् (विसर्गे) + तृच् अमागमे सृ + अ + ज् + तृ व्रश्चभ्रस्ज ...... ' इत्यनेन जकारस्य षत्वं तकारस्य टकारश्च । द्रष्टुम्— √ दृश् (प्रेक्षणे) + तुमुन् ।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ।।५९।।

उपदेशे अनुदात्तस्य धातोः ऋकारोपधस्य झलादावकिति प्रत्यये परतोऽन्यतरस्याममागमो भवति । त्रप्ता / तर्पिता / तर्प्ता ।

त्रप्ता — √ तृप् (प्रीणने) + तृच् अमागमे तृ + अ = त्र । 'रधादिभ्यश्च' इति विकल्पेन इटि तर्पिता तदभावे । तर्प्ता इति रूपत्रयम् । एवं द्रप्ता इत्यादि बोद्धव्यम् ।

शीर्षंश्छन्दसि ।।६०।।

'शीर्षन्' इति छन्दसि निपात्यते । शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति ।

समानार्थत्वात् शिरसः स्थाने 'शीर्षन्' इति प्रयुज्यते ।

ये च तद्धिते ।।६१।।

यादौ तद्धिते परतः शिरः शब्दस्य 'शीर्षन्' आदेशः । शीर्षण्यो मुख्यः स्वरो वा । 'ये चाभावकर्मणोः' इति प्रकृतिभावः ।

शीर्षण्यः—शिरसि भवः इत्यर्थे 'शरीरावयवाच्च' इति शिरस् + यत् । 'शीर्षन्' आदेशे कृते नकारस्य णकारः ।

❀ (वा०) वा केशेषु । शीर्षण्याः / शिरस्याः वा केशाः ।

अचि शीर्षः ।।६२।।

अजादौ प्रत्यये तद्धिते परतः शिरसः 'शीर्ष' आदेशः । हस्तिशिरसोऽपत्यं हास्तिशीर्षिः । 'बाह्वादिभ्यश्च' इति 'इञ्' ।

हस्तिशीर्षिः—हस्तिनः शिर इव शिरो यस्य स हस्तिशिराः (बहु०) हस्तिशिरस् + इञ् ।

पद्दन्नोमासूहृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥६३॥

पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आसन—एषां शसादिषु प्रत्ययेषु परतः पत्, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन् एते यथासंख्यमादेशाः भवन्ति । केचिदत्र 'छन्दसि' इत्यनुवर्त्तयन्ति । अन्ये त्वविशेषेणेच्छन्ति । भाषायामपि प्रायः पद् आदयः दृश्यन्ते । पदः । पदा इत्यादि ।

❀ (वा०) अत्र प्रकरणे मांसपृतनासानूनां मांस्पृतस्नवो वाच्याः शसादौ वा । मांसः । मांसा । प्रभृतिग्रहणात् क्वचित्तद्धितेऽपि । नस्यम् । नस्तः ।

इत्यादि—दन्तादीनां क्रमशः शसादिषु उदाहरणानि–दत्—या दतो (शस्) धावति तस्यै श्यावदन् । नस्—सूकरस्त्वारवन्नसा (टा) मास्—मासि (ङि) त्वा पश्यामि । हृद्–हृदा (टा) पूतेन मनसा । निश्-अमावस्यायां निशि (ङि) यजेत । असन्—आसिक्तोऽस्नाऽ (टा) वरोहति । यूषन्—या पात्राणि यूष्णः । (ङस्) दोषन्—यत्ते दोष्णः (ङस्) । यकन्–यक्नोऽ (ङस्) वद्यति । शकन्—शक्नोऽ (ङस्) वद्यति । उदन्–उद्नो (ङस्) दिव्यस्य । आसन्–आसनि (ङि) किं लभे मधूनि ।

भाष्ये छन्दस्येवेदं सूत्रं प्रवर्त्तते इत्युक्तम् । लोकेऽपि 'पद्भ्यामुद्वर्तितस्य च' इत्यादयः प्रयोगाः दृश्यन्ते । शसादौ वा–वृत्तौ त्विदं नास्ति पृतना पृत्सु मर्त्यम् । सानु—अधिस्नुषु । प्रभृतिग्रहणात्–प्रभृतिशब्दोऽत्र प्रकारार्थः । नस्तः–'अपादाने चाहीयरुहोः' इति नासिका + तसि ।

धात्वादेः षः सः ॥६४॥

धातोरादेः षकारस्य सकारादेशो भवति । √ षह्—सहते । √ षिच्—सिञ्चति ।

अजदन्त्यपराः सादयः षोपदेशाः स्मिङ्स्विदिस्वदिस्वञ्जिस्वपितयश्च । सृपिसृजिस्तृस्त्यासेक्सृवर्जम् ।

❀ (वा०) सुब्धातुष्ठिवुष्वष्कतीनां सत्वनिषेधः ।

अजदन्त्य……—के धातवः षकारादयः इति जिज्ञासायाम् इदं वचनम् । **सुब्धातुः**—क्यच्-प्रत्ययाद्यन्तः—षोडीयति । √ ष्ठिवु (निरसने) ष्ठीवति । √ ष्वष्क (गतौ) ष्वष्कते ।

णो नः ॥६५॥

धात्वादेर्णकारस्य नकारादेशः । √णीञ्-नयति ।

❀ (वा०) सुब्धातोर्नेति वाच्यम् । णकारीयति ।

सर्वे णादयो णोपदेशाः नृतीनन्दिनर्दिनक्कनाटिनाथ्नाधृवर्जम् ।

णकारीयति—णकारमिच्छति णकार + क्यच् + लट् ।

लोपो व्योर्वलि ॥६६॥

धातोरिति यत्प्रकृतं तद्धात्वादेरित्युक्तेर्निवृत्तम् । तेन धातोरधातोर्यंवयोर्लोपो वलि परे । दिदिवान् √ऊयी-ऊतम् । गौधेरः । पचेरन् ।

दिदिवान्— √ दिव् + क्वसु । **गौधेरः**—गोधा + ढ्रक् ढकारस्य 'एय्' यकारस्य लोपः । **पचेरन्** — √ पच् + विधिलिङ् सोयुडागमे यकारस्य लोपः ।

वेरपृक्तस्य ॥६७॥

अपृक्तस्य वेर्लोपो भवति । ब्रह्महा । भ्रूणहा ।

ब्रह्महा—ब्रह्म √ हन् + क्विप् । क-पयोरित्संज्ञायाम्, इकारस्योच्चारणार्थत्वे 'व्' इत्यस्यानेन लोपः । एवं घृत √ स्पृश् + क्विन् = घृतस्पृक् । 'अपृक्त एकाल् प्रत्ययः' इत्यनेन 'व्' इत्यस्य अपृक्तसंज्ञा ।

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥६८॥

हलन्तात्, ङ्यन्तात्, आबन्ताद् दीर्घात् 'सु, ति, सि' इत्येतस्यापृक्तं हल् स्-त्-स् लुप्यते । राजा । गौरी । खट्वा ।

हलन्तादेव 'ति' (त्) लोपः, 'सि' (स्) लोपश्च । अबिभर्भवान् । अभिनस्त्वम् ।

दीर्घादिति ङ्यापोर्विशेषणम्, तत्रैव सम्भवात् । नेह–निष्कौशाम्बिः तिपा सहचरितस्य सिपो ग्रहणात् सिचो ग्रहणं न–अभैत्सीत् ।

संयोगान्तस्य लोपे हि, नलोपादिर्न सिद्धयति ।
रात्तु तेनैव लोपः स्याद्, हलस्तस्माद्विधीयते ॥

राजा—राजन् + सु । गौरी—गौरी + सु खट्वा—खट्वा + सु । हल्–ङीष्–टाप् इत्येतदन्तानाम् उदाहरणानि । ङी—ङीप्–ङीष्–ङीन् इति सर्वेषां ग्रहणम् । आप्–टाप्–डाप् इत्युभयोर्ग्रहणम् । अबिभः– √भृञ् + लङ् → तिप् । अभिनः– √ भिद् + लङ् > सिच् ।

सङ्ग्रहश्लोकस्य भावः–संयोगान्तस्य लोपः इत्यनेन न लोपादिर्न भवति । अबिभर्भवान् इत्यत्र 'रात्सस्य' इति नियमात् ति (त्) लोपो न स्यात् ।

एङ्ह्रस्वात्सम्बुद्धेः ॥६९॥

एङन्तात् ह्रस्वान्ताच्च हल् लुप्यते स चेत् सम्बुद्धेर्भवति । अग्ने । वायो । राम । नदि । ज्ञान ।

सम्बुद्धेः = सम्बोधनस्यावयवः । अग्ने––सर्वाणि सम्बोधन–पदानि सन्ति । ज्ञान—ज्ञानम् इतिदशायां हल्मात्रस्य मकारस्य लोपः ।

शेश्छन्दसि बहुलम् ॥७०॥

'शि' इत्येतस्य छन्दसि विषये बहुलं लोपः या क्षेत्रा॑ / यानि॒ क्षेत्रा॑णि । या वना॑ / यानि॒ वना॑नि ।

या क्षेत्रा — यत् + जस् → शि तस्य लोपः । प्रत्ययलक्षणेन नुम्, तस्य लोपः यकाराकारस्य दीर्घश्च । एवं सर्वत्र । पक्षे 'यानि क्षेत्राणि' इत्यपि ।

ह्रस्वस्य पिति कृति तुक् ॥७१॥

पिति कृति ह्रस्वस्य तुगागमः । सोमसुत् । ग्रामणि कुलम् । अत्र ह्रस्वस्य बहिरङ्गत्वान्न तुक् ।

सोमसुत् — सोम √ सुञ् + क्विप् । ग्रामणि — ग्राम √ नी + क्विप् । नपुंसकलिङ्गे ह्रस्वे कृते 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया तस्यासिद्धत्वम् । नपुंसकार्थमपेक्षमाणं ह्रस्वत्वं बहिरङ्गम् । वर्णमात्रापेक्षमन्तरङ्गं तुक् ।

संहितायाम् ॥७२॥

'अनुदात्तं पदमेकवर्जम्' इतः प्राक् 'संहितायाम्' इत्यधिक्रियते । वक्ष्यति 'इको यणचि' दध्यत्र ।

संहितायाम्—विषय सप्तमी । संहितायां विषय एव वक्ष्यमाणं कार्यं भवति नान्यथा ।

छे च ॥७३॥

छे परतो ह्रस्वस्य तुक् संहितायाम् । इच्छति ।

इच्छति—तुक् कित्त्वात् इकारानन्तरं भवति तस्य श्चुत्वेन चकारः । एवं चिच्छिदतुः ।

आङ्माङोश्च ॥७४॥

आङो ङितः, माङश्च छे परतः 'पदान्ताद्वा' इति विकल्पे प्राप्तो नित्यं तुगागमः । आच्छाया । माच्छैत्सीत् ।

ङितः—ईषदर्थे, क्रियायोगे, मर्यादायाम्, अभिविधौ च 'अ ङ्' = 'ङित् आ' प्रयुज्यते । आच्छाया—आ + छाया ईषदर्थे आङ् । माच्छैत्सीत्—मा + छैत्सीत् ।

दीर्घात् ॥७५॥

दीर्घात्परो यश्छकारस्तस्मिन् तस्यैव दीर्घस्य तुक् । ह्रीच्छति ।

ह्रीच्छति— √ ह्रीच्छ लज्जायाम् इति तुग्विशिष्टस्यैव धातुत्वम् ।

पदान्ताद्वा ॥७६॥

प्राग्वत् । कुटीच्छाया / कुटीछाया ।

प्राग्वत् — पदान्ताद् दीर्घात् परतश्छकारे तस्य वा तुक् । तुक् पदान्तविधिर्न पदविधिस्तेन तिष्ठतु कुमारीच्छत्रं हर देवदत्त इत्यत्रापि सामर्थ्याभावेऽपि भवति ।

इको यणचि ॥७७॥

अचि परतः 'इको यण्' आदेशो भवति । दध्यत्र । मध्वत्र । कर्त्रर्थः । लाकृतिः । 'अचि' इति चायमधिकारो यावत् 'सम्प्रसाणाच्च' ।

इको यण्—यथासंख्यम् इकारस्य स्थाने यकारः, उकारस्य वकारः, ऋकारस्य रकारः तथा लृकारस्य लकारो भवति । क्रमशः दध्यत्र इत्यादीनि उदाहरणानि । दधि + अत्र, मधु + अत्र, कर्तृ + अर्थः, लृ + आकृतिः इति पदच्छेदाः ।

एचोऽयवायावः ॥७८॥

अचि परतः एचः स्थाने अय्, अव्, आय्, आव् एते आदेशाः भवन्ति यथासंख्यम् । नयनम् । लवनम् । नायकः । लावकः ।

एचः—ए, ओ, ऐ, औ इत्येतेषाम् । ने + अनम्, लो + अनम्, नै + अकः, पौ + अकः इति पदच्छेदाः ।

वान्तो यि प्रत्यये ॥७९॥

योऽयमेचः स्थाने वान्तादेशः, स यादौ प्रत्यये परतो भवति । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । नाव्यो ह्रदः ।

❀ (वा०) गोर्यूतौ छन्दसि । अवादेशः । आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।

❀ (वा०) अध्वनः परिमाणे च गोर्यूतावबादेशो वाच्यः । गव्यूतिमात्रमध्वानं गतः ।

वान्तादेशः—ओकारस्य 'अव्' । बाभ्रव्यः–बभ्रु + यञ् = बाभ्रो + यः । नाव्यः–नौ + यः । गव्यूतिः = क्रोशयुगम् ।

धातोस्तन्निमित्तस्यैव ॥८०॥

धातोर्य एच् यकारादिप्रत्ययनिमित्तस्तस्य यादौ प्रत्यये परतो वान्तादेशो भवति । लव्यम् । पाव्यम् । अवश्यलाव्यम् ।

धातोः किम् ? प्रातिपदिकस्य मा भूत् । 'बाभ्रव्यः' इत्यत्रैव स्यात्, इह तु नैव स्यात्--गव्यम्, नाव्यमिति ।

एवकारः किम् ? धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूत् । तन्निमित्तस्य धातोरधातोश्च भवति–बाभ्रव्यः । लव्यम् । पाव्यम् ।

तन्निमित्तस्यैव = तच्छब्देन यकारादि प्रत्ययो गृह्यते स निमित्तं यस्य । नैव स्यात्–गव्यम्, नाव्यम् इत्यनयोः गो-नौ शब्दौ न यादिप्रत्ययनिमित्तौ ।

क्षय्यजय्यौ शक्यार्थे ॥८१॥

√ क्षि-- √जि एतयोर्धात्वोर्यति प्रत्यये परतः शक्यार्थे गम्ये 'क्षेय--जेय' एतयोरेकारस्य 'अय्' आदेशो निपात्यते । क्षेतुं शक्यः क्षय्यः । जय्यः । शक्यार्थे किम् ? क्षेयं पापम् । जेयो वृषलः ।

शक्यार्थे -- अर्थवचनात् कर्मण्यपि एतत्प्रवर्तते । अन्यथा √ शक् इत्यस्याकर्मकत्वात् भावे एव स्यात्–क्षय्यं देवदत्तेन ।
अर्थग्रहणादत्रापि-क्षय्यो व्याधिः ।

क्रय्यस्तदर्थे ॥८२॥

क्रीणातेर्धातोस्तदर्थे यत्तस्मिन्नभिधेये यति प्रत्यये परतः 'अय्'

आदेशो निपात्यते । क्रय्यो गौः । क्रयार्थं प्रसारितः स उच्यते । नेह-क्रेयं नो धान्यम् । नचेहास्ति क्रय्यम् ।

तदर्थे—क्रयार्थे । क्रयः = विनिमयः ।

भय्यप्रवय्ये चच्छन्दसि ॥८३॥

बिभेतेः प्रपूर्वकवीयतेश्च यत्प्रत्ययान्तावेतौ छन्दसि निपात्यौ । भय्यः । 'कृत्यल्युटो बहुलम्' इत्यपादाने यत् । प्रवय्या वत्सतरी । स्त्रियामेव निपातनम् ।

वीयतेः— √ वी गत्यादिषु अजेर्वी इत्यादेशस्य च ग्रहणम् ।

※ (वा०) ह्रदय्या आप उपसंख्यानम् । ह्रदे भवाः इति ह्रद + यत्, दकाराकास्य अय् आदेशः ।

एकः पूर्वपरयोः ॥८४॥

'ख्यत्यात्परस्य' इति यावत् इत ऊर्ध्वं यद्वक्ष्यामः तत्र पूर्वस्य परस्य च द्वयोरपि स्थाने एकः आदेशो भवतीत्येव वेदितव्यम् । वक्ष्यति—'आद्गुणः'—उपेन्द्रः ।

पूर्वपरग्रहणं द्वयोरपि युगपदादेशार्थम् । एकग्रहणं पृथगादेशनिवृत्त्यर्थम् । अन्यथा द्वावादेशौ स्याताम् ।

अन्तादिवच्च ॥८५॥

योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद् भवति, परस्यादिवद् भवति । ब्रह्मबन्धूरित्यत्र 'ब्रह्मबन्धु' इति प्रातिपदिकम्, 'ऊङ्' इति अप्रातिपदिकम् । तयोर्य एकादेशः स प्रातिपदिकस्यान्तवद् भवति । यथा शक्यते वक्तुम्—'ङ्याप् प्रातिपदिकात्' इति स्वादिविधिः । 'वृक्षौ' इति सुप् औकारः, असुप् अकारः । तयोर्य एकादेशः स सुप आदिवद् भवति । यथा शक्यते वक्तुम्—सुबन्तं पदमिति ।

❀ (वा०) वर्णाश्रयविधावयमन्तवद्भावो नेष्यते । 'खट्वाभिः' इत्यत्रान्तवद्भावात् 'अतो भिस ऐस्' न । 'एङः पदान्तादति' इत्यत्र विधौ आदिवत्त्वं न । पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते । तत्रावयवयोरानुमानिकं स्थानित्वमिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तम् इत्यन्तादिवद्भावो विधीयते ।

अयम्भावः—अन्त-आदिशब्दौ अवयवविशेषवाचिनौ । एकादेशे कृते अन्तावयवः, आद्यवयवो वा तद्ग्रहणेन गृह्यते ।

षत्वतुकोरसिद्धः ॥८६॥

एतयोः कर्त्तव्ययोरेकादेशोऽसिद्धो भवति । एतद्वचनमादेशलक्षण-प्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च । कोऽसिचत् इत्यत्र 'एङः पदान्तादति' इत्येकादेशस्य परं प्रत्यादिवद्भावादपदादेरिण उत्तर-स्यादेशसकारस्य षत्वं प्राप्नोति । तदसिद्धत्वान्न भवति ।

अधीत्य इत्यादावेकादेशस्यासिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' इति तुक् ।

❀ (वा०) सम्प्रसारणङीट्सु प्रतिषेधः । सम्प्रसारणे-ब्रह्महूषु । सम्प्रसारणपरपूर्वत्वस्यासिद्धवात् षत्वं न प्राप्नोति । ङौ—वृक्षे छत्रम् । आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो नित्यस्तुक् प्राप्नोति ।

कोऽसिचत्-कः + असिचत् (√सिच् + लुङ् → तिप्) षत्वं न भवति 'को' इत्येकादेशस्यासिद्धत्वे 'सात्पदाद्योः' इति षत्वप्रतिषेधो भवति । नित्यस्तुक्—अत्र 'पदान्ताद्वा' इति विकल्पेन तुक् भवति तेन वृक्षेच्छत्रम् इत्यपि । इटि उदाहरणम्—अपचेच्छत्रम् / अपचे छत्रम् । अत्रापि विभाषा तुक् ।

आद्गुणः ॥८७॥

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः । तवेदम् । तवोदकम् । तवर्श्यः । तवल्कारः ।

तव + इदम्, तव + उदकम्, तव + ऋश्यः, तव + लृकारः इति सन्धि-विच्छेदाः । क्रमशः ए, ओ, अर् (रपरोऽकारः), अल् (लपरोऽकारः) एते गुणादेशाः—अन्तरतमाः सन्तो भवन्ति ।

वृद्धिरेचि ॥८८॥

अवर्णादेचि परे पूर्वपरयोरेको वृद्धिरादेशः । गुणापवादः । ब्रह्मैडका । ब्रह्मैतिकायनः । ब्रह्मौदनम् । ब्रह्मौपगवः ।

ब्रह्म + एडका, ब्रह्म + ऐतिकायनः, ब्रह्म + ओदनम्, ब्रह्म + औपगवः इति सन्धि-विच्छेदाः ।

एत्येधत्यूठ्सु ॥८९॥

तदेतदेज्ग्रहणमेतेरेव विशेषणं नैधतेरव्यभिचारात्, ऊठश्चासम्भवात् । एषु आद् वृद्धिः । उपैति । उपैधते । प्रष्ठौहः ।

❀ (वा०) अक्षादूहिन्यामुपसंख्यानम् । अक्षौहिणी ।

❀ (वा०) स्वादीरेरिणोः । स्वैरः । स्वैरी । स्वैरिणी ।

❀ (वा०) प्रादूहोढोढ्येषैष्येषु । प्रौहः इत्यादिः ।

❀ (वा०) ऋते च तृतीयासमासे । सुखार्त्तः ।

❀ (वा०) प्रवत्सतरकंबलवसनार्णदशानामृणे । प्रार्णम् इत्यादि ।

प्रष्ठौहः — प्रष्ठ + ऊहः । अक्षौहिणी—अक्ष + ऊहिनी । वृद्धौ सत्यां नकारस्य णकारः । प्रौहः—प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः इत्यप्युदाहरणानि । सुखार्तः—सुखेन ऋतः इति तृ० तत्० । प्रार्णम्—वत्सतरार्णम् । कंबलार्णम् । वसनार्णम् । ऋणार्णम् । दशार्णम् इत्यपि सन्त्युदाहरणानि । आद्—अवर्णात् ।

आटश्च ॥९०॥

'एचि' इति निवृत्तम् । आटोऽचि परे वृद्धिरेकादेशः । ऐक्षत । ऐक्षिष्ट ।

ऐक्षत—√ईक्ष (दर्शने) + लङ्, आ + ईक्षत । ऐक्षिष्ट—√ईक्ष + लुङ्, आ + ईक्षिष्ट ।

उपसर्गादृति धातौ ॥९१॥

ऋकारादौ धातौ परे अवर्णान्तादुपसर्गाद् वृद्धिरेकादेशः । उपार्च्छति ।

उपार्च्छति—उप + ऋच्छति । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः । प्रगता ऋच्छका अस्माद् देशात् इति प्रर्च्छको देशः । अत्र न वृद्धिः 'प्र' इत्यस्य √गम् इत्येतम् प्रत्युपसर्गसंज्ञा न 'ऋच्छ' धातुम् प्रति ।

वा सुप्यापिशलेः ॥९२॥

आदुपसर्गात् सुब्धातौ ऋति वृद्धिर्वा । उपार्षभीयति / उपर्षभीयति ।

उपर्षभीयति—पक्षे 'आद्गुणः' इति गुणः ।

'ऋलृवर्णयोः सावर्ण्यम्' इति लृकारस्यापि ग्रहणात् उप + लृकारीयति = उपाल्कारीयति / उपल्कारीयति ।

'वा' इत्यनेनैव विकल्पे सिद्धे आपिशलेराचार्यस्योल्लेखः प्रधानतया पूजार्थमेव ।

औतोऽम्शसोः ॥९३॥

ओतः अमि शसि च पूर्वपरयोराकार आदेशः । गाम् । गाः ।

आ + ओतः = औतः । ओतः = ओकारात् । गाम्—गो + अम् । गाः गो + शस् । एवं द्याम् । द्याः ।

एङि पररूपम् ॥९४॥

आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः । उपेलयति । प्रेडकीयति ।

उपेलयति–उप + एलयति । एवं प्र + एडकीयति । 'वासुप्यापिशलेः' इति पक्षे वृद्धिरपि–प्रैडकीयति ।

❀ (वा०) शकन्ध्वादिषु पररूपं वक्तव्यम् । शक + अन्धुः (कूपः) शकन्धुः । कुल + अटा = कुलटा ।

❀ (वा०) सीमन्तः केशेषु । अन्यत्र सीमान्तः ।

❀ (वा०) एवे चानियोगे । इह + एव = इहेव । नियोगः = नियोजनम् । तस्याभावः अनियोगः ।

❀ (वा०) ओत्वोष्ठयोः समासे वा । पक्षे वृद्धिः । स्थूल + ओतुः (बिडालः) = स्थूलोतुः / स्थूलौतुः । बिम्बोष्ठी / बिम्बौष्ठी ।

ओमाङोश्च ॥९५॥

ओमि आङि च परे आत् पररूपम् । का + ओम् इत्यवोचत् = कोमित्यवोचत् । आ + ऊढा = ओढा, अद्य + ओढा, = अद्योढा ।

अद्योढा—आ + ऊढा = ओढा अत्र 'आङ्' इत्यस्य ऊकारेण सह गुणः 'आङ्' ग्रहणेन गृह्यते ।

उस्यपदान्तात् ॥९६॥

अपदान्तादवर्णादुसि पररूपमेकादेशः । भिन्द्युः ।

भिन्द्युः– भिन्द्या √भिद् + लिङ् → झि, यासुट् 'झेर्जुस्' इत्यनेन जुसि कृते भिन्द्या + उस् । एवम् अदा + उस् = अदुः ।

अतो गुणे ॥९७॥

अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः । पचन्ति । यजन्ति ।

पचन्ति—पच + अन्ति । एवं यज + अन्ति । दीर्घस्यापवादः ।

अव्यक्तानुकरणस्यात इतौ ॥९८॥

अव्यक्तानुकरणस्य 'अत्' शब्दस्य 'इति' शब्दे परे पररूपमेकादेशः । पटत् + इति = पटिति । कथं घटदिति गम्भीरमम्बुदैर्नदितम् । दकारान्तमेतदनुकरणम् ।

अव्यक्तम् = अव्यक्ता—अस्फुटाः वर्णाः यत्र तत् । तस्यानुकरणं स्फुटवर्णमेव । दकारान्तम्–घटद् इति ।

❀ (वा०) अनेकाच इति वक्तव्यम् । तेनेह न स्रत् + इति = स्रदिति ।

नाम्रेडितस्यान्त्यस्य तु वा ॥९९॥

द्विरुक्तस्य नोक्तं स्यादन्त्यस्य तु तकारमात्रस्य वा भवति । पटत्पटदिति / पटत्पटेति करोति ।

द्विरुक्तस्य—वीप्सायां द्विर्वचनं तस्यान्त्यं पदम् आम्रेडितसंज्ञकम् । पटत्पटेति–पटत् इत्यस्य तकारमात्रस्य पररूपे गुणसन्धिः ।

नित्यमाम्रेडिते डाचि ॥१००॥

डाच् परं यदाम्रेडितं तस्य पूर्वस्याव्यक्तानुकरणस्य 'अत्' शब्दस्य तकारस्य पररूपमेकादेशः । दमदमाकरोति ।

दमदमाकरोति—'दमत्' इत्यस्मात् 'अव्यक्तानुकरणात्' इति डाचि 'डाचि बहुलम्' इति 'दमत्' इत्यस्य द्वित्वम् । दमत् दमत् + डाच् । पूर्वस्य 'त' लोपः, अपरस्य 'टि' लोप इति ।

अकः सवर्णे दीर्घः ॥१०१॥

अकः सवर्णेऽचि पूर्वपरयोर्दीर्घ एकादेशः । दण्डाग्रम् । दधीह । मधूच्छिष्टम् । होतॄकारः । अचीत्येव—कुमारी शेते । 'नाज्झलौ' अत्र यद् 'अच्' इति ग्रहणं तत्र 'ग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात् सवर्णा न गृह्यन्ते ।' इति इकारशकारयोः सवर्णत्वम् अप्रतिषिद्धम् ।

❀ (वा०) ऋति सवर्णे ऋ वा वाच्यः । होतृ + ऋकारः = होत्ॠकारः / होतृकारः ।

❀ (वा०) लृति ल्लृ वा वचनम् । होत्लृकारः ।

दण्डाग्रम्--दण्ड + अग्रम् । एवम् दधि + इह, मधु + उच्छिष्टम्, होतृ + ऋकारः । होत्ल्लृकारः—पक्षे होतृकारः । लृकारस्य दीर्घस्याभावात् ॠकार एव दीर्घः ।

प्रथमयोः पूर्वसवर्णः ॥१०२॥

प्रथमासाहचर्याद् द्वितीयाऽपि प्रथमोच्यते । अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घं एकादेशो भवति । अग्नी । वायू । वृक्षाः । 'अतो गुणे' यदकारे पररूपत्वं तत् 'अकः सवर्णदीर्घत्वमे'व बाधते । 'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्' । 'अचि' इत्येव—वृक्षः ।

साहचर्यात्—प्रथमाशव्दो व्याकरणशास्त्रे विभक्तिविशेषे रूढः, तस्याः साहचर्यात् द्वितीयाऽपि प्रथमा = सुबादिषु आद्यं षट्कं प्रथमा–द्वितीययो–स्त्रिकम् सु······शस् इति षड् विभक्तयः प्रथमयोः इति ग्रहणेन गृह्यन्ते । अग्नी—अग्नि + औ, अग्नि + औट् ।

पुरस्तात्··········नोत्तरान्–'अतो गुणे' इति पररूपम् अनन्तरम् 'अकः सवर्णे दीर्घः' इति दीर्घं बाधते न तु तदुत्तरवर्त्तिनम् 'प्रथमयोः पूर्व सवर्णः' इति दीर्घम् ।

तस्माच्छसो नः पुंसि ॥१०३॥

तस्मात्पूर्वसवर्णादीर्घादुत्तरस्य शसः सस्य नः स्यात् पुंसि । वृक्षान् । अग्नीन् । वायून् ।

शसः–'शस्' विभक्तेरवयवस्य । वृक्षान्—वृक्ष + शस् । शकारस्येत्त्वे वृक्ष + अस्, पूर्वसवर्णदीर्घे वृक्षास् । सकारस्य नकारः ।

नादिचि ॥१०४॥

अवर्णान्तादिचि पूर्वसवर्णदीर्घो न । रामौ ।

रामौ—राम + औ । दीर्घस्य निषेधे वृद्धिः ।

दीर्घाज्जसि च ॥१०५॥

दीर्घात् जसि, इचि च परे पूर्वसवर्णदीर्घो न । कुमार्यौ । कुमार्यः । ब्रह्मबन्ध्वौ । ब्रह्मबन्ध्वः ।

कुमार्यः—कुमारी + जस् । दीर्घस्य निषेधे यण् ।

वा छन्दसि ॥१०६॥

छन्दसि विषये दीर्घात् जसि इचि च परतः पूर्वसवर्णदीर्घो वा न भवति । मारुतीश्चतस्रः / मारुत्यश्चतस्रः । वाराही / वाराह्यौ ।

मारुतीः / मारुत्यः । पूर्वसवर्णदीर्घः / पक्षे यण् ।

अमि पूर्वः ॥१०७॥

अकोऽमि परतः पूर्वरूपमेकादेशः । वृक्षम् । अग्निम् । वायुम् ।

पूर्वरूपम्—पूर्वपरयोः स्थाने ।

❀ (वा०) छन्दसि वा । शमीं च / शम्यं च ।

सम्प्रसारणाच्च ॥१०८॥

सम्प्रसारणादचि परतः पूर्वरूपमेकादेशः । √ यज्–इष्टम् । उप्तम् । सम्प्रसारणविधानसामर्थ्याद् विगृहीतस्य श्रवणे प्राप्ते वचनम् ।

इष्टम्—√यज् + क्त । यकारस्य सम्प्रसारणे इकारे सञ्जाते

अवशिष्टस्याकारस्य पूर्वरूपमनेन विधीयते । उप्तम्-- √वप् + क्त । विगृहीतस्य-अकृतसन्धिकार्यस्य । 'इ अष्टम्' इत्यस्य ।

❀ (वा०) वा छन्दसि । युज्यमानः ।

एङः पदान्तादति ॥१०९॥

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः । अग्नेऽत्र । वायोऽत्र । 'अय्-अव्' आदेशयोरपवादः ।

अग्नेऽत्र—अग्ने + अत्र । अकारप्रश्लेषचिह्नम् ऽ । 'अय्' आदेशः प्राप्तोऽनेन बाध्यते ।

ङसिङसोश्च ॥११०॥

एङो ङसिङसोरति परे पूर्वरूपमेकादेशः । अग्नेः । वायोः । अपदान्तार्थोऽयमारम्भः ।

अग्नेः—अग्ने + ङसि, अग्ने + ङस् । उभयोरपि इदं रूपम् ।

ऋत उत् ॥१११॥

ऋकारान्तात् ङसि-ङसोरति उकार एकादेशः । होतुः । द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यः स लभतेऽन्यतरव्यपदेशमिति 'उरण्रपरः' इति रपरत्वम् ।

होतुः—पञ्चमीषष्ठयोरेकवचने इदमेकमेव रूपम् । होतृ + ङसि, होतृ + ङस् । पूर्वपरयोः ऋकार-अकारयोः स्थाने उकारः इति ऋकार-स्थानेऽपि तस्य भावात् 'उरण् रपरः' इति रपरत्वम् । 'होतु र् स्' इत्यवस्थायां 'रात्सस्य' इति सलोपः, रकारस्य विसर्गो ज्ञेयः ।

ख्यत्यात्परस्य ॥११२॥

'खि-ति' शब्दाभ्यां 'खी-ती' शब्दाभ्यां कृतयणादेशाभ्यां परयोर्ङसि-ङसोरकारस्य उकारादेशः । सख्युः । पत्युः । सह खेन

वर्तते इति सखः, तमिच्छति सखीयति । ततः क्विप् सखीः । सख्युः । लूनम् इच्छति लूनीः । लून्युः । निष्ठानत्वं 'पूर्वत्रासिद्धम्' इत्यसिद्धम् । विकृतनिर्देशादेवेह न भवति—अतिसखेः आगच्छति । सखिशब्दस्य केवलस्य 'घि' संज्ञा प्रतिषिध्यते । न तदन्तस्य ।

ख्यत्यात्—'खि-खी' इत्युभयोरपि पञ्चम्येकवचने 'ख्य' इति रूपम् । एवं 'ति-ती' इत्युभयोः 'त्य' इति । अतः उभयोरपि ग्रहणम् । सख्युः—सखि + ङसि, सखि + ङस्; उभयोरप्येकं रूपम् । एवम् पत्युः इत्यपि । 'खी' इति दीर्घान्तस्योदाहरणम् क्विबन्तस्य 'सखी' शब्दस्य सख्युः । एवं 'ती' इत्यन्तस्य लून्युः । अत्र √लू + क्त ङीप् तकारस्य नकारः । उत्वविधौ नकारस्यासिद्धत्वात् तकार एव लभ्यते । विकृतम् = कृतसन्धिकार्यं, तस्य निर्देशात् ।

अतो रोरप्लुतादप्लुते ॥११३॥

अकारान्तादप्लुतादुत्तरस्य रेफस्य उकारानुबन्ध-विशिष्टस्य अकारे अप्लुते परत उकारादेशो भवति । रामोऽत्र । 'भोभगो……' इति प्राप्तस्य यस्यापवादः । रुत्वमप्याश्रयात् 'पूर्वत्रासिद्धम्' इत्यसिद्धं न भवति । 'अप्लुतादि' ति किम् ? सुस्रोता३ अत्र न्वसि । 'अप्लुते' इति किम् ? तिष्ठतु पय आ३श्विन् । अत्र प्लुतस्यासिद्धत्वादुत्वं प्राप्नोति, तस्मात् 'अप्लुतादप्लुते' इत्युच्यते ।

रामोऽत्र—राम स् अत्र इत्यवस्थायां 'ससजुषो रुः' इति सकारस्य रुः । उकारस्येत्संज्ञा रकारस्य उकारे राम उ + अत्र 'आद्गुणः' इति गुणे रामो + अत्र । 'एङः पदान्तादति' इति पूर्वरूपम् । 'रु' इत्युकारविशिष्टस्य ग्रहणादत्र न भवति–प्रातर् + अत्र = प्रातरत्र ।

हशि च ॥११४॥

हशि च परतः अत उत्तरस्य रोरुकारादेशः । रामो याति ।

रामो याति—राम स् याति इति सन्धिविच्छेदः ।

प्रकृत्याऽन्तःपादमव्यपरे ॥११५॥

अवकारयकारपरेऽति परतः एङ् प्रकृत्या, स्वभावेन, कारणात्मना वा भवति, न विकारमापद्यते। तौ चेन्निमित्तकार्यिणावन्तःपादम् = पादमध्ये भवतः। ते अग्रे अश्वमायुञ्जन् । ते अस्मिन् जवमादधुः। अव्यपरे किम्? तेऽवदन्। तेऽयजन्।

प्रकृत्या — करणे तृतीया। प्रकृतिः = स्वभावः कारणं वा। अन्तःपादम्–पादस्यान्तः = पादमध्ये। पादशब्देन ऋचः पादस्यैव ग्रहणमिष्यते। अव्यपरे—न स्तः वकारयकारौ परौ यस्मात् तस्मिन् अति। प्रकृतिभावेन पूर्वरूपं न। केचिदाचार्याः सूत्रं 'नान्तःपादमव्यपरे' इति स्वीकृत्य सन्धिमात्रस्य प्रतिषेधं कथयन्ति।

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥११६॥

अव्यात्, अवद्यात्, अवक्रमुः, अव्रत, अयम्, अवन्तु, अवस्यु–इत्येतेषु यकारवकारपरेऽप्यति परतः अन्तःपादमेङ् प्रकृत्या। अग्निः प्रथमो वसुभिर्नो अव्यात्।

अव्यात्—एषु सर्वेषु यकारवकारयोरतः परत्वं विद्यते। प्रकृतिभावान्न पूर्वरूपम्। इतः क्रमशः मित्रमहो अवद्यात्। मा शिवासो अवक्रमुः। ते नो अव्रताः। शतधारो अयं मणिः। ते नो अवन्तु पितरः। कुशिकासो अवस्यवः इत्युदाहरणानि बोध्यानि।

यजुष्युरः ॥११७॥

'उरः' शब्द एङन्तो यजुषि विषये अति प्रकृत्या भवति। उरो अन्तरिक्षम्।

यजुषि पादानामभावात् अनन्तःपादार्थं सूत्रम्। अपरे आचार्यास्तु 'यजुष्युरो' इति पाठं मत्वा उरु शब्दं सम्बोधनरूपं 'उरो' इत्यस्य प्रकृतिभावं मन्यन्ते। तन्मते उदाहरणम्–उरो अन्तरिक्षं सजूः।

आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे ॥११८॥

'यजुषि' इत्येव। आपो, जुषाणो, वृष्णो, वर्षिष्ठे, इत्येते अम्बे,

अम्बाले इत्येतौ 'अम्बिके' शब्दात्पूर्वौ यजुषि पठितौ ते अति प्रकृत्या भवन्ति । आपो अस्मान् मातरः शुन्धन्तु । जुषाणो अग्निराज्यस्य वेतु । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधिनाके । अम्बे अम्बालेऽम्बिके । 'यजुषि' ईदृशमेव पठ्यते । अस्मादेव वचनात् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं न ।

'आपो' इत्यादीन्यनुकरणानि । 'सुपां सुलुक्..........' इत्यनेन विभक्तेर्लुक् । शुन्धन्तु–वृत्तौ शुन्धयन्तु–इति पाठः ।

अङ्ग इत्यादौ च ॥११९॥

अङ्गशब्दे य एङ् तदादौ चाकारे यः पूर्वः स यजुषि विषये अति प्रकृत्या । प्राणो अङ्गे अङ्गे अदीव्यत् ।

प्राणो, अङ्गे––इत्युभयत्र प्रकृतिभावः । अदीव्यत्–वृत्तौ 'अदीध्यत्' इति पाठः ।

अनुदात्ते च कुधपरे ॥१२०॥

अनुदात्ते कवर्गधकारपरे अति परतो यजुषि एङ् प्रकृत्या । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते इति किम् ? अधोऽग्रे रुद्रो । अग्रशब्द आद्युदात्तो निपात्यते ।

कुधपरे –– कुः = कवर्गः धश्च = कुधौ परौ यस्मात् तस्मिन् अति । अग्नि–अध्वरशब्दौ अन्तोदात्तत्वेन अनुदात्तादी बोध्यौ ।

अवपथासि च ॥१२१॥

'अवपथाः' शब्दे अनुदात्ते अकारादौ परतो यजुषि 'एङ्' प्रकृत्या । त्री रुद्रेभ्यो अवपथाः । √वप् इत्यस्मात् लङि थासि 'तिङ्ङतिङः' इत्यनुदात्तत्वम् ।

अवपथासि—'अवपथास्' इत्यनुकरणस्य सप्तम्येकवचने रूपम् ।

सर्वत्र विभाषा गोः ॥१२२॥

छन्दसि भाषायां च अति परतो गोः एङ् विभाषा प्रकृत्या । गो अग्रम् / गोऽग्रम् ।

छन्दस्युदाहरणम् -- अपशवो वा अन्ये गो'अश्वेभ्यः पशवो' गो अश्वाः । गोऽग्रम्, गोऽश्वाः–पक्षे पूर्वरूपम् ।

अवङ् स्फोटायनस्य ॥१२३॥

'अति' इति निवृत्तम् । 'अचि' इति पुनरनुवर्त्तते । अचि परे गोः 'अवङ्' आदेशः स्फोटायनस्याचार्यस्य मतेन । गवाग्रम् । पूजार्थं स्फोटायनग्रहणम्, विभाषानुवृत्तेः । सा च व्यवस्थिता, तेन गवाक्षः । अत्र नित्यम् ।

स्फोटायनः—स्फोटः अयनम् = पारायणं यस्य सः स्फोटसिद्धान्त-प्रतिपादनपरो वैयाकरणाचार्यः । गवाग्रम्--गो + अग्रम् । ओकारस्य अवङ् गव + अग्रम् दीर्घः । पक्षे प्रकृतिभावः गो अग्रम्, तस्यापि विभाषया पक्षे पूर्वरूपम् गोऽग्रम् इति रूपत्रयं भवति ।

इन्द्रे च नित्यम् ॥१२४॥

गवेन्द्रः ।

इन्द्रशब्दावयवेऽचिपरे 'गो' इत्यस्य नित्यम् अवङ् । 'गो' + इन्द्रः इति विच्छेदः ।

प्लुतप्रगृह्या अचि ॥१२५॥

प्लुताः प्रगृह्याश्च अचि परतः प्रकृत्या भवन्ति । राम३ अत्र । अग्नी इति । वायू इति ।

प्रकृत्या भवन्ति—नित्यम् इति शेषः । राम३–'दूराद्धूते च' इत्यनेन अकारः प्लुतः । अग्नी इति,–इकारस्य 'ईदूदेद्.......' इति प्रगृह्य–संज्ञा । एवं वायू इति अस्योकारस्य । प्रकृत्या सन्धिकार्यं न ।

आङोऽनुनासिकश्छन्दसि ॥१२६॥

'आङ्' अस्मादचि परतः संहितायां विषये छन्दसि अनुनासिकादेश , स च प्रकृत्या भवति । अभ्र आँ अपः । च्यवन आँ इन्द्रः । केचिद् बहुलम् अनुवर्त्तयन्ति तेनेह न—इन्द्रो बाहुभ्यामातरत् । आ अतरत् ।

आङ्—यद्यपि ङ्कारस्येत्त्वे 'आ' इत्येवावशिष्यते तथापि आ–आङोः व्यवस्था कृताऽऽचार्यैः । ईषदर्थे, क्रियायोगे, मर्यादायाम्, अभिविधौ च आ 'आङ्' (ङिद्विशिष्ट आ) प्रयुज्यते । वाक्ये, स्मरणे च ङिद्रहितः 'आ' इति ।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥१२७॥

इकोऽसवर्णे अचि परतः शाकल्यस्य मतेन प्रकृत्या भवन्ति, ह्रस्वश्च तस्येकः स्थाने भवति । दधि अत्र । कुमारि अत्र ।

दधि अत्र —पक्षे यण् दध्यत्र । कुमारि अत्र — प्रकृत्या सहात्र ह्रस्वत्वमपि । पक्षे यण् कुमार्यत्र ।

❀ (वा०) सिन्नित्यसमासयोः शाकलस्य प्रतिषेधो वक्तव्यः । सिति–अयं ते योनिर्ऋत्वियः (ऋतुरस्य प्राप्तः इति छन्दसि ऋतु + घय्) नित्यसमासे—व्याकरणम् (गति-समासो नित्यः) कुमार्यर्थम् । 'अर्थेन सह नित्यसमासः' ।

ऋत्यकः ॥१२८॥

शाकल्यस्य मतेन ऋकारे परतः अकः प्रकृतिभावः ह्रस्वश्च तस्य अकः स्थाने भवति । खट्व ऋश्यः । कुमारि ऋश्यः । सवर्णार्थमनिगर्थं वचनम् ।

खट्वा + ऋश्यः पक्षे गुणः खट्वर्श्यः । कुमारी + ऋश्यः पक्षे यण्–कुमार्य्श्यः ।

अप्लुतवदुपस्थिते ॥१२६॥

उपस्थितो नामानार्ष इतिकरणः । समुदायादवच्छिद्य पदं येन स्वरूपेऽवस्थाप्यते, तस्मिन् परतः अप्लुतवद्भवति । सुश्लोक३ इति । सुश्लोकेति ।

अनार्षः—ऋषिः = वेदः तत्र भवः आर्षः, तद्भिन्नः । सुश्लोकेति—प्लुताभावे गुणसन्धिः ।

ई चाक्रवर्मणस्य ॥१३०॥

ई३कारः प्लुतोऽचि परतः चाक्रवर्मणस्याचार्यस्य मतेन अप्लुतवद् भवति । अश्नुही३ इत्यब्रवीत् / अश्नुहीत्यब्रवीत् ।

अश्नुही३ — 'विभाषा पृष्टप्रतिवचने' इति प्लुतः । वृत्तौ अस्तु ही३ इत्युदाहृतम् । पक्षे दीर्घः । ईकारादन्यत्रापि भवति । वशा३ इयम् / वशेयम् ।

दिव उत् ॥१३१॥

'एङः पदान्तात्.........' इत्यतः पदग्रहणमनुवर्तते । दिवः प्रातिपदिकस्य उकारादेशो भवति । द्युमान् । विमलद्यु दिनम् । द्युभ्याम् ।

दिवः—'दिव्' इत्यन्तस्य वकारस्योकारः । द्युमान्—दिव् + मतुप् वकारस्योकारे इकारस्य यकारादेशः । विमलद्यु—विमला द्यौः अस्मिन् ।

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥१३२॥

एतत्तदोरककारयोरनञ्समासे सोर्लोपः स्याद्धलि । एष ददाति । स ददाति । अकोः किम् ? एषको रुद्रः । अनञ्-समासे किम् ? असः शिवः । हलि किम् ? एषोऽत्र ।

एष ददाति—एतत् सु + ददाति । सुलोपे कृते 'तदोः स.......'

इति तकारस्य सकारस्तस्य षः । एषको रूपः—एतद् + अकच् = एतकद् अस्य सुविभक्तौ रूपम् ।

स्यश्छन्दसि बहुलम् ॥१३३॥

'स्यः' इत्यस्य छन्दसि हलि परतो बहुलं सोर्लोपः । एष स्य वाजी । एष स्य ते मधुमाँ इन्द्र सोमः । न च भवति–यत्र स्यो निपतेत् ।

स्यः — 'त्यद्' शब्दस्य सु–विभक्तौ रूपम् । स्य वाजी — त्यद् सु + वाजी ।

सोऽचि लोपे चेत्पादपूरणम् ॥१३४॥

'सः' इत्येतस्याचि परतः सुलोपो भवति, सति लोपे चेत्पादः पूर्येत । सेन्दू राजा क्षयति चर्षणीनाम् । सौषधीरनुरुध्यते । पादेनात्र श्लोकपादस्यापि ग्रहणमिच्छन्ति केचित् ।

सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥

सेन्दू राजा — तद् + सु + इन्दुर् + राजा । सैष दाशरथी रामः–तद् सु + एतद् + दाशरथिर् + रामः ।

सुट् कात्पूर्वः ॥१३५॥

इत ऊर्ध्वं 'पारस्कर प्रभृतीनि·········' इति यावत् यद्वक्ष्यामः, तत्र 'सुट्' इति 'कात्पूर्वः' इति चैतदधिकृतं वेदितव्यम् । वक्ष्यति- 'सम्पर्युपेभ्यः·········' इति । संस्कर्ता । कात्पूर्वंग्रहणं सुटोऽभक्तत्व-ज्ञापनार्थम्, तथाहि–संस्कृषीष्ट, संस्क्रियते इति संयोगादिलक्षणौ इड्गुणौ न भवतः । टित्करणं 'सुट्स्तुस्वञ्जाम्' इत्यत्र विशेषणार्थम् ।

अभक्तत्वम्—भक्तः = अवयवस्तस्य भावः = अभक्तः तस्य धर्मः । संस्कृषीष्ट इत्यत्र सुटः √ कृ इत्यस्यानङ्गत्वेन तस्यासंयोगादित्वात् 'ऋतश्च

संयोगादेः' इति 'इट्' न । एवं संस्क्रियते इत्यत्र 'गुणोऽर्तिसंयोगाद्योः' इति गुणो न । विशेषणार्थम्–टिद्विशिष्टस्यैव 'सु' इत्यस्य ग्रहणं यथा स्यान्नतु सामान्यस्य सोः ।

अडभ्यासव्यवायेऽपि ॥१३६॥

अड्व्यवाये, अभ्यासव्यवायेऽपि सुट् कात्पूर्वो भवति । समस्करोत् । सञ्चस्कार ।

किमर्थमिदमुच्यते ? 'पूर्वं धातुरुपसर्गेण युज्यते ।' इति तत्र 'धातूपसर्गयोः कार्यमन्तरङ्गम् ।' इति पूर्वं 'सुट्' क्रियते पश्चादड्-अभ्यासौ । अभक्तश्च 'सुट्' इत्युक्तम् । तत्र सकारात्परावड्-अभ्यासावनिष्टे देशे स्याताम् । एतस्मिंस्तु सति अत एव वचनात्कृतयोरड्-अभ्यासयोस्तद्-व्यवायेऽपि सुट् कात्पूर्वः क्रियते, इति सिद्धमिष्टं भवति ।

सिद्धमिष्टम्–समस्करोत् इत्यत्र सम् √ कृ + लङ् 'सम् अकरोत्' इत्यवस्थायाम् अटो व्यवाये = व्यवधानेऽपि कात् पूर्वं सुट् । एवं सञ्चस्कार इत्यत्र 'सम् + चकार' इति जाते अभ्यासस्य व्यवधानेऽपि सुट् भवति ।

सम्पर्युपेभ्यः करोतौ भूषणे ॥१३७॥

एभ्यो भूषणार्थे करोतौ सुट् कात्पूर्वो भवति । संस्कर्ता । परिष्कर्ता । 'सुट्स्तुस्वञ्जाम्' इति षत्वम् । उपस्कर्ता । भूषणे किम् ? उपकरोति । सम्पूर्वस्य क्वचिदभूषणेऽपि—संस्कृतमन्नम् ।

संस्कृतमन्नम्––अत्र प्रमाणम् 'संस्कृतं भक्षाः' इति सूत्रमेव ।

समवाये च ॥१३८॥

समवायः = समुदायः । तस्मिन्नर्थे करोतौ सम्पर्युपेभ्यः कात्पूर्वः सुडागमः । तत्र नः संस्कृतम् । तत्र नः परिष्कृतम् । समुदितमित्यर्थः ।

संस्कृतम्—सम् √ कृ + त (भावे) कात्पूर्वः सुट् ।

उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ॥१३९॥

सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा प्रतियत्नः। विकृतमेव वैकृतम्। प्रज्ञादित्वादण्। गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्याध्याहारः। एष्वर्थेषु वर्तमाने करोतौ परत उपात्सुट् कात्पूर्वो भवति। क्रमः—एधोदकस्योपस्कुरुते। उपस्कृतं गच्छति। उपस्कृतमधीते।

समीहा = चेष्टा। उपस्कृतम् = विकृतम्, क्रियाविशेषणमिदम्। उपस्कृतमधीते—साध्याहारं यथा तथाऽधीते। क्रमः—क्रमशः।

किरतौ लवने ॥१४०॥

उपादुत्तरस्मिन् किरतौ लवनविषये सुट् कात्पूर्वो भवति। उपस्कारं मद्रका लुनन्ति। विक्षिप्य लुनन्तीत्यर्थः।

उपस्कारम्—उप √कॄ + णमुल्, कात्पूर्वः सुट्।

हिंसायां प्रतेश्च ॥१४१॥

उपात्प्रतेश्चोत्तरस्मिन् किरतौ हिंसायां विषये सुट् कात्पूर्वः। उपस्कीर्णं हं ते वृषल भूयात्। तथा ते वृषल विक्षेपो भूयाद्यथा हिंसामनुबध्नातीत्यर्थः।

उपस्कीर्णम्—उप √कॄ + क्त। एवं प्रतिस्कीर्णम्। हम् = कोपेऽयं शब्दः। अनुबध्नाति = अनुगच्छति।

अपाच्चतुष्पाच्छकुनिष्वालेखने ॥१४२॥

अपादुत्तरस्मिन् किरतौ चतुष्पात्सु, शकुनिषु च यदालेखनं तस्मिन् विषये सुट् कात्पूर्वः। अपस्किरते वृषभो हृष्टः, कुक्कटो भक्ष्यार्थी वा। आलिख्य विक्षिपतीत्यर्थः।

❀ (वा०) हर्षजीविकाकुलायकरणेष्विति वाच्यम् । एष्वर्थेष्वात्मनेपदमुपसंख्यानम् ।

अपस्किरते—अप √कॄ + लट् । वृषभः प्रसन्नो भूत्वा धरणीम् आलिख्य मृत्तिकां कुक्कुटश्च भक्ष्यं चिन्वन् तृणजातम् आलिख्य विक्षिपति । कुलायकरणम् = नीडनिर्माणम् ।

कुस्तुम्बुरूणि जातिः ॥१४३॥

'कुस्तुम्बुरूणि' इति सुडागमो निपात्यते, जातिश्चेत् । कुस्तुम्बुरुरोषधिजातिः । क्लीबत्वमतन्त्रम् ।

कुस्तुम्बुरुः = धान्यकम्, तस्य फलानि कुस्तुम्बुरूणि । अतन्त्रम् = अविवक्षितम् ।

अपरस्पराः क्रियासातत्ये ॥१४४॥

'अपरस्पराः' इति क्रियासातत्ये 'सुट्' निपात्यते । अपरस्पराः सार्थाः यान्ति । सततमविच्छेदेन यान्तीत्यर्थः ।

कथं सततम् ? समस्तते विकल्पेन मकारलोपो विधीयते ।

लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि ।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ॥

सातत्यम्—सततस्य भावः । सम् + ततम् विकल्पेन मकारलोपे सततम् । पक्षेऽनुस्वारपरसवर्णयोः सन्ततम् । लुम्पेत्……घञोः—'अवश्यम्' इत्यस्य कृत्यप्रत्यये मलोपः, अवश्यकार्यम् । 'तुमुन्' प्रत्ययस्य मकारलोपः काममनसोः परयोः । कर्तुकामः । कर्तुमनाः । हिततयोः परयोः समो वा मकारलोपः । सहितम् / संहितम् । सततम् / सन्ततम् । मांसस्य लुटि, घञि च परे पचि अन्त्यस्याकारस्य लोपो वा । मांस्पचनम् / मांसपचनम् ।

गोष्पदं सेवितासेवितप्रमाणेषु ॥१४५॥

'गोष्पदम्' इति निपात्यते । 'सुट्' तस्य च षत्वम् सेविते,

असेविते प्रमाणे च । गोष्पदो देशः । गावः पद्यन्ते यस्मिन् देशे सः । गोभिः सेवित इत्यर्थः ।

असेविते—गोष्पदानि वनानि । असेविते गोष्पदशब्दो न सम्भवति । प्रमाणे—गोष्पदमात्रं क्षेत्रम् ।

गोष्पदम्—गोः पदम् इति गो + पदम्, सुट् तस्य षत्वं च । **न सम्भवति**—अतएव निपातनं क्रियते । **क्षेत्रम्**—'गोष्पद' शब्दोऽत्र क्षेत्रस्य प्रमाणम् व्यनक्ति न स्वार्थम् ।

आस्पदं प्रतिष्ठायाम् ॥१४६॥

आत्मयापनाय स्थानं प्रतिष्ठा । तस्याम् 'आस्पदम्' इति निपात्यते । आस्पदमनेन लब्धम् । प्रतिष्ठा लब्धेत्यर्थः ।

आत्मयापनम् = प्राणधारणम् । तदर्थं यत्स्थानं सा प्रतिष्ठा । **आस्पदम्**—आ + पदम्–सुट् । नपुंसकत्वं लोकात् ।

आश्चर्यमनित्ये ॥१४७॥

अनित्यतया विषयभूतयाऽद्भुतमिह लक्ष्यते । तस्मिन् 'आश्चर्यम्' इति निपात्यते । 'चरेराङि चागुरौ' इति यत्प्रत्यये निपातनात् सुट् । आश्चर्यं यदि स भुञ्जीत ।

अनित्ये—अत्र 'अनित्यम्' इति शब्दो लक्षणया 'अद्भुतम्' इत्यर्थं लक्षयति । कदाचिद् भवनात् कालविशेषे तद् अद्भुतमेव भवति । **आश्चर्यं ....भुञ्जीत** — रुग्णस्यादृष्टपूर्वम् इदानीं दृश्यमानं भोजनम् आश्चर्यमित्यर्थः ।

वर्चस्केऽवस्करः ॥१४८॥

कुत्सितं वर्चो वर्चस्कः । तस्मिन् 'अवस्करः' इति निपात्यते । 'अवकीर्यते' इत्यवस्करः = अन्नमलम् । तत्सम्बन्धाद् देशोऽपि तथोच्यते ।

वर्चस्कः — वर्चस् + कन् 'कुत्सिते' इत्यनेन । अवस्करः — अव √कृ + अप् । अन्नमलम् — पाकभाण्डेषु लग्नं यत् दर्व्यादिना अपकृष्य काकादिभ्यो विकीर्यते । देशः—यत्र भाण्डानि परिमृज्यन्ते तत् स्थानम् ।

अपस्करो रथाङ्गम् ॥१४६॥

अपस्करः इति निपात्यते रथाङ्गं चेत् । अपस्करो रथावयवः ।

अपस्करः—अप √कृ + अप् ।

विष्किरः शकुनिर्विकिरो वा ॥१५०॥

विष्किरः इति निपात्यते शकुनिश्चेत् विकिरशब्दाभिधेयो वा । सर्वे शकुनयो भक्ष्याः विष्किराः । विकिरो वा शकुनिः ।

विष्किरः—वि √कृ + अप् । तित्तिरिजातेः पक्षिणः विष्किराः / विकिराः वा भवन्ति ।

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ॥१५१॥

मन्त्रविषये चन्द्रशब्द उत्तरपदे ह्रस्वात् सुट् । सुश्चन्द्रो युष्मान् देवान् । ह्रस्वात्किम् ? सूर्याचन्द्रमसाविव ।

समास एव । नेह—शुक्र-मसि । चन्द्रमसि ।

सुश्चन्द्रः — सु + चन्द्रः । मध्ये सुट्, तस्य सकारस्य श्चुत्वेन शकारः ।

प्रतिष्कशश्च कशेः ॥१५२॥

√कश् गतिशासनयोः, अस्य धातोः प्रति-पूर्वस्य पचाद्यचि कृते 'सुट्' निपात्यते ।

ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः ।

वार्तापुरुषः, सहायः, पुरोयायी वा 'प्रतिष्कशः' इत्युच्यते ।

सुट् निपात्यते—तस्य सुटः सकारस्य षत्वं च भवति ।

प्रस्कण्वहरिश्चन्द्रावृषी ।।१५३।।

'प्रस्कण्व-हरिश्चन्द्रौ' एतौ सुडर्थं निपात्येते, ऋषी चेद्भवतः । प्रस्कण्वः ऋषिः । हरिश्चन्द्रः ऋषिः । हरिश्चन्द्रग्रहणममन्त्रार्थम् ।

प्रस्कण्व-हरिश्चन्द्रौ वस्तुतः सुटः सकारसहितौ रूढिशब्दौ ऋषिविशेषे प्रसिद्धौ । अमन्त्रार्थम्—मन्त्रे तु पूर्वेण 'ह्रस्वाच्चन्द्र........' इत्यनेन सुट् सिद्धः ।

मस्करमस्करिणौ वेणुपरिव्राजकयोः ।।१५४।।

एतौ निपात्यौ यथासंख्यं वेणौ, परिव्राजके च । 'मकर' इति शब्दोऽयम् अव्युत्पन्नं प्रातिपदिकम् । तस्य वेणौ सुट्' निपात्यते, मस्करो वेणुः । परिव्राजके त्विनिरपि—मस्करी भिक्षुः । नेह—मकरो ग्राहः ।

'मा कुरुत कर्माणि शान्तिर्वः श्रेयसी ।' इति स आह इति वा ।

मस्करो वेणुः — 'मस्करो दण्डः' इत्यपि भवति । वेणुग्रहणमुपलक्षणम् ।

केचिदाचार्याः 'माङ् पूर्वक √'कृ' धातोः 'अच्' प्रत्यये माङो ह्रस्वत्वं च कृत्वा मस्करम्, इनि प्रत्ययं च ताच्छील्ये कृत्वा 'मस्करी' इति शब्दं निपातयन्ति । तन्मते मा कुरुत........इत्युक्तम् ।

कास्तीराजस्तुन्दे नगरे ।।१५५।।

'कास्तीर, अजस्तुन्द' इत्येतौ निपात्यौ नगरे वाच्ये । कास्तीरम् । अजस्तुन्दम् च नगरम् ।

ईषत्तीरं नगरं कास्तीरम् । अजस्येव तुन्दमस्य इति अजस्तुन्दम् । उभयत्र सुट् क्रियते ।

कारस्करो वृक्षः ॥१५६॥

'कारस्करः' इति निपात्यते वृक्षश्चेत् । कारस्करो वृक्षः ।

केचित् सूत्रमेतन्नाधीयते । पारस्करादिष्वेव कारस्करं पठन्ति ।

कारस्करः—कारं करोति इति कार √कृ + ट । सुडागमः ।

पारस्करप्रभृतीनि च संज्ञायाम् ॥१५७॥

एतानि संज्ञायां निपात्यन्ते । पारस्करो देशः । कारस्करो वृक्षः । किष्कुः प्रमाणम् । किष्किन्धा गुहा ।

* (वा०) तद्बृहतोः करपत्योश्चोरदेवतयोः । सुट्, तलोपश्च । तस्करः = चोरः । बृहस्पतिः देवता ।

आकृतिगणोऽयम् । अविहितलक्षणः सुट् पारस्करादिषु ज्ञेयः ।

पारस्करप्रभृतयो रूढिशब्दाः । तस्करः—तत् करोतीति तत् √कृ + अच्, सुडागमः, तकारस्य लोपश्च । बृहस्पतिः—बृहताम् पतिः ।

आकृतिगणः-तेन प्रायश्चित्तम्, प्रायश्चित्तिः इत्येतयोः सिद्धिर्भवति । प्रायश्चित्तम्—प्रायः + चित्तम् ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो-निश्चय-संयोगात्प्रायश्चित्तमिति स्मृतम् ॥

अनुदात्तं पदमेकवर्जम् ॥१५८॥

परिभाषेयं स्वरविधिविषया । यत्रान्यः स्वर उदात्तः स्वरितो वा विधीयते, तत्रानुदात्तं पदमेकं वर्जयित्वा भवति; इत्येतद्द्रष्टव्यम् । अनुदात्ताच्कम् अनुदात्तम् ।

कः पुनरेको वर्ज्यते ? यस्य स्वरो विधीयते । वक्ष्यति–

'धातोः' अन्त उदात्तो भवति । गोपायति । धूपायति । धातोरन्त्यमचं वर्जयित्वा परिशिष्टमनुदात्तं भवति । धातुस्वरं 'श्ना' स्वरो बाधते-लुनाति । श्ना-स्वरं तस्-स्वरः—लुनीतः । तस्-स्वरम् आम्-स्वरः लुनीतस्तराम् । तथाऽयं संग्रहश्लोकः—

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थम् एकवर्जं पदस्वरः ॥

स्वरविधिविषया — स्वरस्य विधिः इति स्वरविधिः, स विषया यस्याः सा । गोपायति—'गोपाय' इत्यस्य धातु-संज्ञायां 'धातोः' इति सूत्रेण तस्यान्तोदात्तता । तेन शिष्टौ 'गोपा' इत्यत्र ओकारः, आकारश्चानुदात्तौ ज्ञेयौ । 'ति' इत्यस्य इकारस्तु उदात्तात्परः स्वरितः ।

कर्षात्वतो घञोऽन्त उदात्तः ॥१५९॥

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तो भवति । कर्षः । पाकः । त्यागः । रागः ।

कर्षात्वतः—कर्षश्च आत्वांश्चेति समाहारद्वन्द्वः तस्य । आकारवतो धातोरुदाहरणानि पाकः इत्यादि । √पच् इत्यादौ वृद्धया आकारो भवति ।

उञ्छादीनां च ॥१६०॥

'उञ्छ' इत्येवमादीनामन्त उदात्तो भवति उञ्छः । म्लेच्छः । जल्पः ।

उञ्छः—एते घञन्ताः सन्ति । अत्र इमे प्रयोगाः अपि अर्थ-विशेषेऽन्तोदात्ताः ज्ञेयाः । तथाच वार्तिकानि—

❀ (वा०) गरो दूष्येऽबन्तः । गरः = विषम् ।

❀ (वा०) वेदवेगवेष्टबन्धाः करणे । भावे आद्युदात्ताः ।

❀ (वा०) वर्तनिः स्तोत्रे । स्तोत्रम् = साम । अन्यत्र मध्योदात्तः ।

अनुदात्तस्य च यत्रोदात्तलोपः ॥१६१॥

यस्मिन्ननुदात्ते परत उदात्तो लुप्यते तस्योदात्तो भवति। कुमार + ईं = कुमारी। कुमारशब्दोऽन्तोदात्तः। 'ङीप्' अनुदात्तः तस्मिन्नुदात्तो लुप्यते। अनुदात्तो ङीप् उदात्तो भवति। भस्य टेर्लोपः। पथः। पथिन् शब्दोऽन्तोदात्तः।

कुमारः—प्रातिपदिकस्वरेणान्तोदात्तः। ङीप्—पित्स्वरेण अनुदात्तः।

धातोः ॥१६२॥

धातोरन्त उदात्तो भवति। पचति। पठति।

धातोः—धातु-पाठे पठितस्य, येषां च 'धातु'संज्ञा विहिता; तेषामपि।

चितः ॥१६३॥

चकारेतः अन्त उदात्तो भवति। भङ्गुरम्। भासुरम्।

भङ्गुरम्—'भञ्जभासमिदो घुरच्' इत्यनेन √भञ्ज + घुरच्, चकारस्येत्संज्ञा। भासुरम्—√भास + घुरच्।

तद्धितस्य ॥१६४॥

चितस्तद्धितस्यान्त उदात्तो भवति। 'गोत्रे कुञ्जादिभ्यः…' इत्यनेन कुञ्ज + च्फञ् = कौञ्जायनाः। मौञ्जायनाः।

किमर्थमिदम् ? परमपि ञित्स्वरं बाधित्वाऽन्तोदात्तमेव यथा स्यात्।

मौञ्जायनाः—मुञ्जस्य गोत्रापत्यानि मुञ्ज + च्फञ्।

कितः ॥१६५॥

तद्धितस्य कितोऽन्त उदात्तो भवति। 'नडादिभ्यः फक्' नाडायनः। ठक्—शालालिकः।

शालालिकः—शलाकया दीव्यति 'तेन दीव्यति.........' इत्यनेन शलाका + ठक्।

तिसृभ्यो जसः ॥१६६॥

तिसृभ्य उत्तरस्य जसोऽन्त उदात्तो भवति। तिस्रस्तिष्ठन्ति। 'उदात्तस्वरितयोर्यणः......' इत्यस्यापवादः।

तिस्रः—'तिसृ' इति प्रातिपदिकस्वरेणान्तोदात्तः, 'जस्' 'अनुदात्तौ सुप्पितौ' इत्यनेनानुदात्तः।

चतुरः शसि ॥१६७॥

चतुरः शसि परतोऽन्त उदात्तो भवति। चतुरः पश्य। चतुरो देहि। चतस्रादेशे आद्युदात्तत्वे निपातनात्, यणादेशे च पूर्वविधौ स्थानिवत्त्वादयं स्वरो न भवति। चतस्रः पश्य।

'चतुर्' इति शब्द 'उरन्' प्रत्ययान्त आद्युदात्तः, तस्यानेन शसि परतोऽन्तोदात्तत्वं विधीयते।

सावेकाचस्तृतीयादिर्विभक्तिः ॥१६८॥

'सौ' इति सप्तमीबहुवचनस्य ग्रहणम्। तत्र सौ य एकाच्, तस्मात्परा तृतीयादिविभक्तिरुदात्ता भवति। वाचा। वाग्भ्याम्। वाग्भिः।

सावििति किम्? राज्ञा। राज्ञे।

एकाच इति किम्? राजसु।

ग्रहणम्—नतु प्रथमैकवचनस्य, तथैव व्याख्यानात्।

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥१६९॥

नित्यशब्दः स्वर्यते। तेन नित्याधिकारविहितसमासः

पर्युदस्यते। नित्यसमासादन्यत्रानित्यसमासे यदुत्तरपदमन्तोदात्तमेकाच्, तस्मात्परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवति। परमवाचा। परमवाचे। परमवाचः। यदा विभक्तिरुदात्ता न भवति, तदा समासान्तोदात्तत्वमेव।

अन्तोदात्तादिति किम्? सुवाचा। सुत्वचा। तत्पुरुषोऽयम्। तत्र 'तत्पुरुषे तुल्यार्थ……' इति पूर्वपदप्रकृतिस्वरः।

परमवाचा—परमा चासौ वाक् इति 'सन्महत्……' इत्यनेन समासः। अयं न नित्याधिकारविहितः समासः।

अञ्चेश्छन्दस्यसर्वनामस्थानम् ॥१७०॥

छन्दसि विषये अञ्चेः परा असर्वनामस्थानविभक्तिरुदात्ता भवति। इन्द्रो दधीचो अस्थिभिः। 'चौ' इति पूर्वपदान्तोदात्तत्वं प्राप्तम्। 'तृतीयादिः' इति वर्त्तमाने शस्परिग्रहार्थमसर्वनामस्थानग्रहणम्। इहापि यथा स्यात्—प्रतीचो बाहून् इति।

दधीचः—दधि अञ्चति इति दधि √ अञ्च् + क्विन्। षष्ठ्येकवचने 'ङस्' विभक्तिः। **प्रतीचः**—प्रति √ अञ्च् + क्विन्। द्वितीया बहुवचने 'शस्'।

ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ॥१७१॥

ऊठ्, इदम्, पदादि, अप्, पुम्, रै, दिव्—एभ्यः परा विभक्तिरसर्वनामस्थानमुदात्ता भवति। ऊठ्—प्रष्ठौहः। प्रष्ठौहा। इदम्—आभ्याम्। एभिः।

'अन्तोदात्तात्' इत्यधिकारादन्वादेशे न भवति—अथो आभ्यां निपुणमधीतमिति।

पदादि--'पद्दन्नोमास्........' इत्यादयो 'निश्'पर्यन्ता इह गृह्यन्ते । निपदश्चतुरो जहि । या दतो धावति ।

'असन्' प्रभृतिभ्यो विभक्तिरनुदात्तैव भवति । ग्रीवायां बद्धो अपि कक्ष आसनि । अप्—अपः पश्य । पुम्—पुंसः पुंसा । रै—रायः पश्य । दिव्—दिवः पश्य ।

प्रष्ठौहः—प्रष्ठवाह् + शस् । आभ्याम् अधीतम्—'इदमोऽन्वादेशेऽशनुदात्तः........' इति इदमः 'अश्' । निपदः—शसि पादस्य 'पत्' । दतः—शसि दन्तस्य 'दत्' । आसनि—'ङि' विभक्तौ आस्यस्य 'आसन्' ।

अष्टनो दीर्घात् ॥१७२॥

असर्वनामस्थानं विभक्तिरुदात्ता भवति । अष्टाभ्यः ।

इदमेव सूत्रम् अष्टन आत्व-विकल्पस्य ज्ञापकम् । घृतादिषु पाठादष्टन् शब्दोऽन्तोदात्तः । तत्र 'झल्युपोत्तमम्' इत्यस्यापवादो विभक्तेरुदात्तत्वं च विधीयते ।

अष्टाभिः — अष्टन् + भिस् । 'अष्टन आ विभक्तौ' इत्यष्टनोऽन्त्यस्यात्वम् ।

शतुरनुमो नद्यजादी ॥१७३॥

अनुम् यः शतृ, तदन्तादन्तोदात्तात्परा नदी, अजादिश्च विभक्तिरसर्वनामस्थानमुदात्ता भवति । तुदती । नुदती । तुदता । नुदता ।

अनुमः किम् ? तुदन्ती । अदुपदेशादिति लसार्वधातुकानुदात्ते कृते एकादेशः, तस्य 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम् । तस्य च 'पूर्वत्रासिद्धम्' नेष्यते इति शत्रन्तमन्तोदात्तम् ।

※ (वा०) बृहन्महतोरुपसंख्यानम् । बृहती । बृहता । महती । महता ।

तुदती / तुदन्ती—'आच्छीनद्योर्नुम्' इति वा नुम् । 'नुम्' पक्षे शत्रन्तं तुदन्त्' इत्यन्तोदात्तम् ।

उदात्तयणो हल्पूर्वात् ॥१७४॥

उदात्तस्थाने यो यण् हल्पूर्वः, तस्मात्परा नदी अजादिश्च सर्वनामस्थानं विना विभक्तिरुदात्ता भवति । कर्त्री । हर्त्री । कर्त्रा । हर्त्रा ।

❀ (वा०) नकारग्रहणं कर्त्तव्यम् । वाक्पत्नी इयं कन्या ।

नद्याः उदाहरणम्—प्रसवित्री । नकारग्रहणम्—उदात्तो यो नकारस्तस्मात्परा नदी विभक्तिश्चोदात्ता भवति । विभक्तेरुदाहरणम्—वाक्पत्न्या ।

नोङ्धात्वोः ॥१७५॥

ऊङो धातोश्च य उदात्तयण् हल्पूर्वस्तस्मात्परा विभक्तिरजादिः सर्वस्थानं विना नोदात्ता भवति । ब्रह्मबन्ध्वा । ब्रह्मबन्ध्वै । 'ऊङ्' प्रत्यय-स्वरेणोदात्तः, तेन सह य एकादेशः सोऽप्युदात्तः; इति उदात्तयण् 'वकारः' तस्मादुदात्तत्वे प्रतिषिद्धे 'उदात्तस्वरितयोर्यणः…' इति विभक्तिः स्वर्यते । धातुयणः खल्वपि—खलप्वा । खलप्वै । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तस्य 'ओः सुपि' इति यण् ।

ब्रह्मबन्ध्वा—ब्रह्मा बन्धुर्यस्याः बहुव्रीहिः । स्त्रियाम् 'ऊङुतः' इति 'ऊङ्' दीर्घश्च ।

सोऽप्युदात्तः—'एकादेश उदात्तेनोदात्तः' इति सूत्रेण ।

खलप्वा—खलं पुनाति इति खल √ पू + क्विप् । तृतीयैकवचनस्य रूपम् ।

ह्रस्वनुड्भ्यां मतुप् ॥१७६॥

ह्रस्वान्तादन्तोदात्तान्नुटश्च परो 'मतुप्' उदात्तो भवति ।

अग्निमान् । नुटः खल्वपि--अक्षण्वान् । शीर्षण्वान् ।

अन्तोदात्तादित्येव-वसुमान् । वसुशब्द आद्युदात्तः, तस्मान्मतुप् अनुदात्त एव भवति ।

अक्षण्वान्—अक्षमस्यास्तीति अक्ष + मतुप् । 'छन्दस्यपि दृश्यते' इति 'अनङ्', 'अनो नुट्' इति 'नुट्' । अक्षन् न् + मत् 'नलोपः प्रातिपदिकान्तस्य' इति नकारस्य लोपः । शीर्षण्वान्—'शीर्षश्छन्दसि' इति 'शीर्षन्' शब्दो निपातितः ।

'नुट्' ग्रहणात् अत्र 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषा नाश्रीयते । तेनात्र न भवति—मरुत्वान् ।

नामन्यतरस्याम् ॥१७७॥

मतुपि यो ह्रस्वस्तदन्तादन्तोदात्ताद् वा 'नाम्' उदात्तः । अग्नीनाम् । वायूनाम् ।

नाम्—'नुट्'सहितस्य षष्ठी-बहुवचनस्य ग्रहणम् ।

ङ्याश्छन्दसि बहुलम् ॥१७८॥

ङ्यन्ताच्छन्दसि विषये बहुलं 'नाम्' उदात्तः । देवसेनानामभिभञ्जतीनाम् ।

न च—नदीनां पारे जयन्तीनां मरुतः ।

जयन्तीनाम्–अत्र 'नाम्' अनुदात्त एव ।

षट्त्रिचतुर्भ्यो हलादिः ॥१७९॥

'अन्तोदात्तात्' इत्येतन्निवृत्तम् । षट्संज्ञकेभ्यः, त्रि-चतुर्, आभ्याश्च परा हलादिर्विभक्तिरुदात्ता भवति । षड्भिः । षण्णाम् । त्रिभ्यः । त्रयाणाम् । चतुर्भ्यः । चतुर्णाम् ।

षण्णाम्—षड् + न् आम् । 'नुट्'सहितः 'आम्' हलादिः ।

झल्युपोत्तमम् ॥१८०॥

एभ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तमम् उदात्तं भवति । त्रिप्रभृतीनाम् अन्त्यम् उत्तमम् तत्समीपम् उपोत्तमम् । पञ्चभिस्तपस्तपति । तिसृभ्यश्च वहसे त्रिशता चतुर्भिः ।

पञ्चभिः—अत्रान्त्यं 'भिः' इत्यस्येकारः, उपोत्तमम् 'पञ्च' इति चकारस्याकारः, स उदात्तः ।

विभाषा भाषायाम् ॥१८१॥

एभ्यो झलादिर्विभक्तिस्तदन्ते पदे भाषायां विभाषा उपोत्तम-मुदात्तम् । पञ्चभिः / पञ्चभिः । सप्तभिः / सप्तभिः इत्यादि ।

पक्षे विभक्तिस्वरो बोध्यः ।

न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥१८२॥

गो, श्वन्, साववर्णम् = सौ—प्रथमैकवचने यदवर्णान्तम्, राट्, अङ्, क्रुङ्, कृत्--इत्येतेभ्यो यदुक्तं तन्न भवति । गो-गवा । गोभ्याम् । 'सावेकाचः···' इति प्राप्तो निषिध्यते । श्वन्-शुना । श्वभ्याम् । पूर्ववत्प्राप्तः । साववर्णान्तम्-तेभ्यः । केभ्यः । राट्—राजा । परमराजः / अङ्—अञ्चतिः क्विबन्तः । तस्य सनकारस्य ग्रहणं विषयावधारणार्थम् । यत्र नलोपो न तत्र प्रतिषेधः । प्राञ्चा । प्राङ्भ्याम् । क्रुङ्—क्रुञ्चा । परमक्रुञ्चा । कृत्—करोतिः कृन्ततिर्वा क्विबन्तः । कृता । परमकृता ।

प्राप्तो निषिध्यते—विभक्तेरुदात्तत्वं प्राप्तम् तत्र प्रतिषेधः—'प्राञ्चा' इत्यादौ 'नाञ्चेः पूजायाम्' इत्यनेन नकारलोपस्य प्रतिषेधः क्रियते ।

दिवो झल् ॥१८३॥

दिवः परा झलादिर्विभक्तिर्नोदात्ता । द्युभ्याम् । द्युभिः ।

द्युभ्याम्—'दिव्' इत्युदात्तः। तस्मात्परा विभक्तिरनुदात्ता उदात्तादनुदात्तस्य स्वरितः भवति।

नॄ चान्यतरस्याम् ॥१८४॥

'नृ' शब्दात्परा झलादिर्विभक्तिर्वा नोदात्ता। नृभिः / नृभिः। नृभ्यः / नृभ्यः।

नृभिः—विभक्तेरुदात्तत्वं, स्वरितत्वं वेति रूपद्वयम्।

तित्स्वरितम् ॥१८५॥

तित्स्वरितम् भवति। 'अचो यत्' चिकीर्ष्यम्। 'ऋहलोर्ण्यत्' कार्यम्।

चिकीर्ष्यम्—सन्नन्तात् 'चिकीर्ष' इत्यस्मात् यत्। यत्-ण्यत् उभावपि स्वरितौ।

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ॥१८६॥

तासेरनुदात्तेतो ङितोऽकारान्तोपदेशाच्च परं लसार्वधातुकमनुदात्तं भवति, √ह्नुङ्-√इङ्, आभ्यां परं विहाय। तासि—कर्त्ता। प्रत्ययस्वरापवादः। अनुदात्तेतः--आस्ते। वस्ते। ङित्--शेते। अदुपदेशात्--तुदतः। तुदतः। पचतः। पठतः। अनुबन्धस्यानेकान्तत्वात् अकारान्तोपदेशे एव शप्। पचमानः। यजमानः।

पचमानः—अत्र 'पच' इति अकारान्तः उपदेशे। अनुबन्धो यद्यपि न एकान्तः = एकदेशः तथापि 'शप्' करणात् अकारान्तो भवति। √ह्नुङ् इत्यस्य ह्नुते। √इङ् इत्यस्य तु यदधीते। उभयत्रापि विभक्तिः उदात्ता।

आदिः सिचोऽन्यतरस्याम् ॥१८७॥

सिजन्तस्यादिरुदात्तो भवत्यन्यतरस्याम्। मा हि कार्ष्टाम् /

मा हि का॒र्ष्टाम् । एकोऽत्राद्युदात्तः, अपरोऽन्तोदात्तः । मा हि लाविष्टाम् / मा हि ला॒विष्टाम् । एकोऽत्राद्युदात्तः, अपरो मध्योदात्तः ।

मा हि कार्ष्टाम्—अपरोऽन्तोदात्तः प्रत्ययस्वरेण ।

मा हि लाविष्टाम्—अपरो मध्योदात्तः प्रत्ययस्वरेण । सिचश्चित्करणात् तस्य स्वरितत्वम् ।

स्वपादिहिंसामच्यनिटि ॥१८८॥

लसार्वधातुकग्रहणं यदनुवर्तते, तद् 'अच्यनिटि' इति सम्बन्धात् इह सप्तम्यन्तं भवति । स्वपादिरा वृत्करणात् । स्वपादीनां हिंसेश्चाजादौ अनिटि लसार्वधातुके परतोऽन्यतरस्यामादिरुदात्तो भवति । स्वपन्ति । स्व॒पन्तु । श्वसन्ति । श्व॒सन्तु । हिंसेः खल्वपि, हिंसन्ति । हि॒सन्तु । पक्षे प्रत्ययस्वरेण मध्योदात्तः ।

* (वा०) ङित्यजादावयं विधिरिष्टः । इह न भवति । स्व॒पानि । हि॒न॒सानि ।

आ वृत्करणात् = आ गणान्तात् । √ञिष्वप् शये, √श्वस प्राणने, √अन चेत्येतत्त्रयमत्र गृह्यते । मध्योदात्तः—'स्वपन्ति' अत्र पकाराकार उदात्तः । यथा स्वपन्तु इत्यत्र ।

अभ्यस्तानामादिः ॥१८९॥

एषामनिट्यजादौ लसार्वधातुके आदिरुदात्तः । ददति । ददतु । जक्षतु । पुनरादिग्रहणं नित्यार्थम् ।

ददति—दा + लट् + झि → अति, 'दा' इत्यस्य द्वित्वम् । 'उभे अभ्यस्तम्' इति 'अभ्यस्त' संज्ञा ।

अनुदात्ते च ॥१६०॥

अविद्यमानोदात्ते च लसार्वधातुके परतोऽभ्यस्तानामादिरुदात्तः । ददा॑ति । जिही॑ते ।

अनुदात्ते—अविद्यमानम् उदात्तम् अस्मिन्निति बहुव्रीहिः नत्वनुदात्तस्वरः । तेन यत्रानुदात्तस्य लोपः 'मा हि दधा॑तु' तत्रापि आद्युदात्तत्वं भवति 'दधात्यत्र' च यणि कृते शास्त्रीयानुदात्तस्याभावेऽपि आद्युदात्तत्वं सिद्ध्यति ।

सर्वस्य सुपि ॥१६१॥

सर्वस्य सुपि परत आदिरुदात्तो भवति । स॑र्वः, स॑र्वौ, स॑र्वे ।

❀(वा०) प्रत्ययलक्षणेनाप्ययं स्वर इष्यते । स॑र्वस्तोमः ।

❀(वा०) सर्वस्वरोऽनकच्कस्येति वाच्यम् । सर्व॑कः । चित्स्वरेणान्तोदात्तः ।

सर्वस्तोमः—सर्वस्य स्तोमः इति समासे विभक्ति-लोपे च 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्याश्रित्य सर्वस्यादिरुदात्तो भवति ।

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥१६२॥

'भी' प्रभृतीनामभ्यस्तानां लसार्वधातुके पिति प्रत्ययात्पूर्वमुदात्तं भवति । बिभे॑ति । जिह्रे॑ति । बिभ॑र्ति । जुहो॑ति । ममत्तु॑ नः परि॑ज्मा वसर्हा॑ । 'मदेः बहुलं छन्दसि' इति विकरणस्य श्लुः । जजन॑मिन्द्रम् । √जन जनने पञ्चमे लकारे रूपम् । √धन धान्ये दधन॑त् । दरिद्रा॑ति । जाग॑र्ति ।

विकरणस्य—दिवादिगणे विहितस्य 'श्यन्' इत्यस्य । **श्लुः**—लोपः । 'श्लौ' इति द्वित्वम् । पञ्चमो लकारः लेट् । **जजनम्**—√जन+लेट् → मिप् । **जजनत्** इति पाठान्ततम् । **दधनत्**—√धन+ लेट् → तिप् ।

लिति ॥१९३॥

लकारेत्संज्ञके प्रत्ययात् पूर्वमुदात्तं भवति । चिकीर्षकः । भौरिकिविधम् ।

लिति—ल् इत् यस्य स लित् तस्मिन् = लकारेत्संज्ञके । **चिकीर्षकः**—√कृ + सन् = चिकीर्ष + ण्वुल् । **भौरिकिविधम्**—भौरिकि + विधल् ।

आदिर्णमुल्यन्यतरस्याम् ॥१९४॥

आदिरन्यतरस्यामुदात्तो भवति णमुलि परतः । लोलूयं-लोलूयम् / लोलूयं लोलूयम् । पोपूयं पोपूयम् / पोपूयं पोपूयम् ।

लोलूयंलोलूयम् — √लूञ् + णमुल् = लोलूयम् 'आभीक्ष्ण्ये द्वे भवतः' इति द्वित्वम् । आम्रेडितम् अनुदात्तं च' इत्यनुदात्तं भवति । पूर्वो 'लोलूय' शब्दः आद्युदात्तः पक्षे लित्स्वरेण मध्योदात्तः ।

अचः कर्तृयकि ॥१९५॥

'उपदेशे' इति वर्तते । अजन्ता ये उपदेशे धातवस्तेषां कर्तृयकि अन्यतरस्यामादिरुदात्तो भवति । लूयते केदारः स्वयमेव । लूयते केदारः स्वयमेव ।

लूयते—कर्मणः कर्तृत्वे √लूञ्+यक् । पक्षे प्रत्ययलक्षणः स्वरो भवति ।

थलि च सेटीडन्तो वा ॥१९६॥

सेटि थलि 'इट्' वा उदात्तो भवति । अन्तो वा आदिर्वा अन्यतरस्याम् । लुलविथ / लुलविथ / लुलविथ ।

लुलविथ—√'लूञ् + लिट् → थल् । इट् उदात्तः इत्येकं रूपम् । आदिरुदात्तः इति द्वितीयम् । अन्त उदात्तः इति तृतीयम् । 'लिटि' इत्यनेन प्रत्ययात् पूर्वमुदात्तम् लुलविथ । इति चत्वारः प्रयोगाः ।

ञ्नित्यादिर्नित्यम् ॥१९७॥

ञिति, निति च नित्यमादिरुदात्तो भवति । 'गर्गादिभ्यो यञ्'–गार्ग्यः । वात्स्यः । वुन्–वासुदेवकः । अर्जुनकः ।

गार्ग्यः—गर्गस्य गोत्रापत्यम् गर्ग + यञ् । अयं ञित् । **वासुदेवकः**—वासुदेवे भक्तिरस्य 'वासुदेवार्जुनाभ्यां वुन्' इति वासुदेव + वुन् । अयं नित् ।

आमन्त्रितस्य च ॥१९८॥

आमन्त्रितस्यादिरुदात्तो भवति । देवदत्त । देवदत्तौ । देवदत्ताः । अत्र 'कारकाद्दत्तश्रुतयोरेवाशिषि' इति प्राप्तिर्बाध्यते ।

❀(वा०) लुमता लुप्ते प्रत्ययलक्षणमत्रेष्यते । सर्पिरागच्छ । सप्तागच्छ ।

प्राप्तिः—अन्तोदात्तत्वस्येति शेषः । **अत्रेष्यते**—तेन सर्पिः, सप्त इत्यनयोः विभक्तेः लुकि सति सूत्रं प्रवर्तत एव ।

पथिमथोः सर्वनामस्थाने ॥१९९॥

एतौ औणादिकौ 'इनि' प्रत्ययान्तौ प्रत्ययस्वरेणान्तोदात्तौ । तयोः सर्वनामस्थाने आदिरुदात्तो भवति । पन्थाः, पन्थानौ । पन्थानः । मन्थाः ।

मन्थाः—मन्थानौ, मन्थानः इत्यादि ।

अन्तश्च तवै युगपत् ॥२००॥

तवैप्रत्ययान्तस्यान्तः, च शब्दादादिश्च युगपदुदात्तौ भवतः । कर्तवै । हर्तवै । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् ।

पर्यायनिवृत्त्यर्थम्—अन्यथा क्वचित् 'अन्तः' क्वचित् 'आदिः' उदात्तः स्यात्, यौगपद्यं न भवेत् ।

क्षयो निवासे ॥२०१॥

क्षयशब्दो निवासे आद्युदात्तो भवति । क्षियन्ति = निवसन्ति अस्मिन्निति क्षयः । 'पुंसि संज्ञायां घः प्रायेण, इति घान्तस्य प्रत्ययस्वरः प्राप्तः ।

क्षयः—√क्षि (निवासगत्योः) + घ । उदाहरणम्—**क्षये** जागृहि प्रपश्यन् ।

जयः करणम् ॥२०२॥

जय शब्दः करणवाची आद्युदात्तो भवति । जयत्यनेन जयः । पूर्ववत् स्वरः प्राप्तः ।

जयः—√जि (अभिभवे) + घ ।

वृषादीनां च ॥२०३॥

एषामादिरुदात्तो भवति । वृषः । जनः । ज्वरः । ग्रहः । श्रयः । सर्व एते पचाद्यच्प्रत्ययान्ताः । वृषादिराकृतिगणः । अविहितमाद्युदात्तत्वमेषु द्रष्टव्यम् ।

कामः, यामः एते घञ् प्रत्ययान्ताः । **शमः** (भावे) **रणः** (कर्मणि) । एतौ अच्प्रत्ययान्तौ । **शान्तिः** क्तिजन्तः । इमेऽपि आद्युदात्ताः बोध्याः ।

संज्ञायामुपमानम् ॥२०४॥

उपमानशब्दः संज्ञायामाद्युदात्तो भवति । चञ्चेव चञ्चा । वर्चिका । खरकुटी । दासी । उपमानशब्दा एते ।

उपमानं किम् ? देवदत्तः ।

चञ्चेव इत्यर्थे चञ्चा + कन् तस्य 'लुम्मनुष्ये' इति लुप् । **वर्चिका**—वृत्तौ 'वध्रिका' इति पाठः ।

निष्ठा च द्व्यजनात् ॥२०५॥

निष्ठान्तं द्व्यच् संज्ञायामाद्युदात्तं भवति, स चेत् आदिः आकारो न भवति । दत्तः । गुप्तः । बुद्धः । प्रत्ययस्वरापवादः । संज्ञायां किम् ? कृतम् । हृतम् ।

दत्तः—√दा + क्त । दत्तादयः संज्ञाशब्दाः । अनात्—न आत् इति नञ् तत्पुरुषः । अत्र न—त्रातः । आप्तः ।

शुष्कधृष्टौ ॥२०६॥

आदिरुदात्त इत्येव । शुष्क, धृष्ट—एतावाद्युदात्तौ भवतः । शुष्कः । धृष्टः । असंज्ञार्थ आरम्भः ।

शुष्कः—√शुष् (शोषणे) + क्त । **धृष्टः**—√धृष् (प्रागल्भ्ये) + क्त ।

आशितः कर्ता ॥२०७॥

आशितशब्दः कर्तृवाची आद्युदात्तो भवति । आशितो देवदत्तः । अशेरयमाङ्पूर्वादविवक्षिते कर्मणि कर्तरि क्तः । तत्र 'थाथघञ्—' इति प्राप्तः अन्तोदात्तस्वरो बाध्यते ।

कर्त्तेति किम् ? आशितमन्नम् । आशितं देवदत्तेन ।

आशितः—आङ् √अश (भोजने) +क्त ।

रिक्ते विभाषा ॥२०८॥

रिक्तशब्दो विभाषाऽऽदिरुदात्तो भवति । रिक्तः / रिक्तः । संज्ञायां 'निष्ठा द्व्यजनात्' इत्यनेन पूर्वविप्रतिषेधान्नित्यमाद्युदात्तम् ।

रिक्तः—√रिच् (विरेचने) + क्त । **संज्ञायाम्**—यदा रिक्तः कस्यचित्संज्ञा भवति तदेदमुदाहरणम् । पक्षे 'थाथघञ्.........' इत्यनेनान्तोदात्तम् ।

जुष्टार्पिते च च्छन्दसि ॥२०९॥

जुष्ट, अर्पित—एतौ मन्त्रविषये छन्दसि विभाषा आद्युदात्तौ भवतः । जुष्टः / जुष्टः । अर्पितः / अर्पितः । भाषायां प्रत्यय-स्वरेणान्तोदात्तावेतौ ।

जुष्टः — √जुषी (प्रीतिसेवनयोः) + क्त । **अर्पितः** — √ऋ + णिच् + क्त ।

नित्यं मन्त्रे ॥२१०॥

जुष्ट—अर्पित एतौ मन्त्रविषये नित्यमाद्युदात्तौ भवतः । जुष्टं देवानाम् । अर्पितं पितॄणाम् । पूर्वेण विकल्पः प्राप्तः ।

केचिदाचार्याः अर्पिते विभाषा मन्यन्ते तथाहि क्वचिदयम् अन्तो-दात्तोऽपि पठ्यते । तस्मिन् साकं त्रिंशता न शङ्कवोऽर्पिताः।

युष्मदस्मदोर्ङसि ॥२११॥

युष्मदस्मदोर्ङसि परत आदिरुदात्तो भवति । तव स्वम् । मम स्वम् ।

तव—युष्मद् + ङस् । 'युष्मदस्मद्भ्यां ङसोऽश्' इति ङस्विभक्तेः 'अश्' 'तवममौ ङसि' इति 'युष्मद्' इत्यस्य 'तव' 'अतो गुणः' इति पररूपम् । एवं **मम** इत्यपि ।

ङयि च ॥२१२॥

'ङे' इत्येतस्मिन् परतो युष्मदस्मदोरादिरुदात्तो भवति । तुभ्यम् । मह्यम् । पृथग्योगकरणं यथासंख्यनिरासार्थम् ।

तुभ्यम्—युष्मद् + ङे 'ङे प्रथमयोरम्' इति विभक्तेः 'अम्' 'तुभ्य-मह्यौ ङयि' इति 'युष्मद्' इत्यस्य 'तुभ्य' 'अस्मद्' इत्यस्य च 'मह्य' आदेशः । निरासार्थम्—अन्यथा युष्मदः ङसि, अस्मदश्च ङयि आद्युदात्तत्वं स्याद् यथासंख्यम् ।

यतोऽनावः ॥२१३॥

'निष्ठा च द्व्यजनात्' इत्यतो द्व्यज्ग्रहणमनुवर्तते। यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो भवति। 'अचो यत्' चेयम्। जेयम्। 'शरीरावयवाद्यत्' कण्ठ्यम्। ओष्ठ्यम्। 'तित्स्वरितम्' इत्यस्यापवादः। अनावः इति किम्? नाव्यम्।

चेयम्—√चि (चयने) + यत्। **कण्ठ्यम्**—कण्ठे भवम् कण्ठ+यत्। **नाव्यम्**—नावा तार्यम् नौ + यत्। अत्र तित्स्वरितम् इत्यनेन यकाराकारः स्वरितः।

ईडवन्दवृशंसदुहां ण्यतः ॥२१४॥

ईड् आदीनां यो ण्यत् तदन्तस्यादिरुदात्तो भवति। ईड्यम्। वन्द्यम्। वार्यम्। शंस्यम्। दोह्या धेनुः। वार्यम्—√वृङ् (संभक्तौ) इत्यस्यायं ण्यत्। क्यप्-विधौ हि वृञो ग्रहणमिष्यते।

ईड्यम् इत्यादि—√ईड्, √वन्द, √वृङ्, √शंस्, √दुह्, एभ्यः 'ऋहलोर्ण्यत्' इति ण्यत्।

विभाषा वेण्विन्धानयोः ॥२१५॥

वेणु, इन्धान—एतयोर्विभाषा आदिरुदात्तो भवति। वेणुः / वेणुः। इन्धानः / इन्धानः / इन्धानः। वेणुशब्दः 'अजिवृरीभ्यो नित्' इति णुप्रत्ययान्तो नित्वान्नित्यमाद्युदात्तः प्राप्तः। इन्धान-शब्दोऽपि यदि चानश् तदा चित्त्वादन्तोदात्तः। अथ शानजन्तः, तदा लसार्वधातुकानुदात्ते कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः। तदेवमिन्धाने सर्वथा नित्यमप्राप्तमाद्युदात्तत्वं पक्षे विधीयते। वेणुरिव वेणुरित्युपमानं यदा संज्ञा भवति तदा 'संज्ञायामुपमानम्' इति नित्यमाद्युदात्तत्वमिष्यते।

वेणुः—पक्षेऽयमन्तोदात्तः। इन्धान शब्दः आद्युदात्तः, अन्तोदात्तः, मध्योदात्तश्चेति त्रिविधस्वरवान् भवति।

त्यागरागहासकुहश्वठक्रथानाम् ॥२१६॥

एषां विभाषा आदिरुदात्तः। त्यागः / त्यागः। रागः / रागः। हासः / हासः। एते घञन्ताः। एषां पक्षे 'कर्षात्त्वतो घञन्त उदात्तः' इत्यन्तोदात्तं भवति। कुहः / कुहः। श्वठः / श्वठः। क्रथः / क्रथः। एते पचाद्यजन्ताः।

पचाद्यजन्ताः—एतेषामपि प्रत्ययस्वरेणान्तोदात्तं भवति।

उपोत्तमं रिति ॥२१७॥

रित्प्रत्ययान्तस्योपोत्तमम् उदात्तम्। करणीयम्। हरणीयम्। पटुजातीयः। प्रत्ययस्वरापवादोऽयम्।

करणीयम् — कृ + अनीयर्। **पटुजातीयः** — पटु + जातीयर्। उभयत्रापि रकारस्येत्संज्ञा भवति।

चङ्यन्यतरस्याम् ॥२१८॥

चङन्ते उपोत्तममन्यतरस्यामुदात्तं भवति। मा हि चीकरताम् / मा हि चीकरताम्।

चीकरताम्—√कृ + णिच् + लङ् प्रथमपुरुष-द्विवचनस्य रूपम्। धात्वकारः (ककाराकारः) उदात्तः पक्षे चङ् (रकाराकारः) उदात्तः।

मतोः पूर्वमात्संज्ञायां स्त्रियाम् ॥२१९॥

मतोः पूर्वमाकार उदात्तो भवति। तच्चेन्मत्वन्तं स्त्रीलिंगे संज्ञा भवति। उदुम्बरावती। मशकावती। पुष्करावती। आत् किम्? इक्षुमती।

उदुम्बरावती—उदुम्बराः सन्त्यस्यामिति उदुम्बर + मतुप् + ङीप् 'मतोर्बह्वचोऽनजिरादीनाम्' इत्यकारस्य दीर्घत्वम्।

अन्तोऽवत्याः ॥२२०॥

संज्ञायामवती शब्दस्यान्त उदात्तो भवति । अजिरवती । खदिरवती । वेत्रवती । 'अवत्याः' इति किमर्थमिदमुच्यते ? न वत्या इत्येवोच्येत । नैवं शक्यम् । इहापि स्यात्–राजवती । स्वरविधौ नलोपस्यासिद्धत्वान्नायमवती शब्दः । वत्वं पुनराश्रयात्सिद्धम् ।

अजिरवती—अजिराणि सन्त्यस्याम् अजिर + मतुप् + ङीप् । **आश्रयात्सिद्धम्**—स्वरकार्ये आश्रयभूतोऽवतीशब्दः, इति हेतोः तस्य सिद्धिरनिवार्या । नलोपश्चासिद्धः ।

ईवत्याः ॥२२१॥

ईवतीशब्दस्यान्त उदात्तः संज्ञायां विषये । अहीवती । ऋषीवती ।

अहीवती—अहयः सन्त्यस्याम् अहि + मतुप् + ङीप् । 'संज्ञायाम्' इति मकारस्य वकारः, 'शरादीनाञ्च' इति दीर्घत्वम् ।

चौ ॥२२२॥

'चौ' इत्यञ्चतिर्लुप्तनकारो गृह्यते । तस्मिन् परतः पूर्वस्यान्त उदात्तो भवति । दधीचः पश्य । दधीचा । मधूचः । मधूचा । उदात्तनिवृत्तिस्वरापवादोऽयम् ।

दधीचः—दधि अञ्चतीति दधि √अञ्च् + क्विन् । शसि रूपम् । **उदात्तनिवृत्ति ...... अयम्**—शसि अकारलोपे कृते 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्युदात्तस्याञ्चतेरकारस्य लोपे विभक्तेरुदात्तत्वं प्राप्तम्, तस्यापवादः ।

समासस्य ॥२२३॥

समासस्यान्त उदात्तो भवति । राजपुरुषः । ब्राह्मण-

कुम्बलः । कुन्यास्वनः । पुटहुशुब्दः । 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति हलन्तेऽप्यन्तोदात्तत्वं भवति । नानापदस्वरस्यापवादः ।

एकाचश्चायो ल्यपि च येच क्षय्याकः सवर्णअवपथासि हिंस यामनुदात्तस्य विभाषा क्षय ईवत्यास्त्रीणि (२२३)।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
षष्ठाध्यायस्य प्रथमः पादः ।

नाना.......अपवादः—समासे पदानां पृथक्स्वरो भवति । समासस्वरविधाने नानापदानां पृथक् स्वरः प्राप्नोति, यथा राजपुरुषः—अत्र 'राजन्' पुरुषश्च नित्स्वरेणाद्युदात्तौ, तौ प्रबाध्य समासस्वरो भवति ।

षष्ठाध्यायस्यास्मिन् प्रथमे पादे एकाचो द्वे प्रथमस्य, चायः की, ल्यपि च, ये च तद्धिते, क्षय्यजय्यौ शक्यार्थे, अकः सवर्णे दीर्घः, अवपथासि च, हिंसायां प्रतेश्च, अनुदात्तस्य च यत्रोदात्तलोपः, विभाषा भाषायाम्, क्षयो निवासे इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा ईवत्याः इत्यत आरभ्य त्रीणि सूत्राणीति संकलनेन त्रयोविंशद्विशतं (२२३) सूत्राणि सन्ति ।

इति काशिकावृत्तिसारसुधायां
षष्ठाध्यायस्य प्रथमः पादः ।

अथ षष्ठाध्याये द्वितीयः पादः

बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥१॥

पूर्वग्रहणमत्र पूर्वपदस्वरे उदात्ते स्वरिते वा वर्त्तते । अस्मिन् समासे पूर्वपदस्य यः स्वरः स प्रकृत्या भवति । न विकारमनुदात्तमापद्यते । अपि तु स्वभावेनोपतिष्ठते । ससासान्तोदात्तत्वे हि सति सोऽनुदात्तः स्यादिति समासान्तोदात्तत्वादपवादोऽयमारभ्यते । कार्ष्णं उत्तरासङ्गोऽस्य कार्ष्णोत्तरासङ्गः । कृष्णो मृगस्तस्य विकारः कार्ष्णः । 'प्राणिरजते' त्यञ् । ञित्त्वादाद्युदात्तः इत्यादि ।

अयं भावः—समासे कृते 'समासस्य' इति सूत्रेण समस्तं पदम् अन्तोदात्तं भवति तेन 'अनुदात्तं पदमेकवर्जम्' इति सूत्रेणावशिष्टं सर्वम् अनुदात्तं स्यात् तद् वारणायेदं सूत्रम् अपवादरूपम् । अनेन पूर्वपदस्य स्वरः तदवस्थ एव तिष्ठति । यथा कार्ष्णोत्तरासङ्गः इति पदे कार्ष्णं इत्याद्युदात्तम् तत्तथैव भवति । एवं सर्वत्र ज्ञेयम् ।

तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥२॥

तत्पुरुषे समासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तमुपमानमव्ययं द्वितीयान्तं कृत्यान्तं च पूर्वपदं तत्प्रकृतिस्वरं भवति । तुल्यार्थम्—तुल्यश्वेतः । तुल्यमहान् । सदृक्श्वेतः । एते 'कृत्यतुल्याख्या

अजात्या' इति कर्मधारयाः । तत्र तुल्यशब्दो 'यतोऽनावः' इत्याद्युदात्तः । सदृक् क्विन् प्रत्ययान्तः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ।

तृतीया—शं॒कुलाखं॑ण्डः । शंकुपूर्वाल्लातेर्घञर्थे 'क' विधानम् । तेनायम् अन्तोदात्तः ।

सप्तमी—अ॒क्षशौं॑ण्डः । √अशेर्देवने इति 'स' प्रत्ययान्तोऽक्षशब्दोऽन्तोदात्तः ।

उपमानम्—श॒स्त्रीश्या॑मा । 'शस्त्री' ङीष्प्रत्ययान्तोऽन्तोदात्तः ।

अव्ययम्—अब्रा॑ह्मणः । कुवृ॑षलः । निर्वा॑राणसिः । एतान्यव्ययान्याद्युदात्तानि ।

द्वितीया—मु॒हूर्त्तसु॑खम् । 'मुहूर्त्त' शब्दः पृषोदरादिरन्तोदात्तः ।

कृत्य—भो॒ज्यो॑ष्णम् । 'भोज्य' शब्दो ण्यदन्तोऽन्तस्वरितः ।

पूर्वपदम्, प्रकृत्या इत्यनुवर्तते ।

❀ (वा०) अव्यये नञ्कुनिपातानाम् । 'निर्' इति निपातः तेन **अब्राह्मणः । कुवृषलानि । निर्वाराणसिः** इत्यत्रेदं प्रवर्तते । नेह-**स्ना॒त्वा॒का॒ल॒कः** । अयम् अन्तोदात्त एव ।

वर्णो वर्णेष्वनेते ॥३॥

वर्णवाचिन्युत्तरपदे एतवर्जे तत्पुरुषे वर्णवाचि एव पूर्वपदं प्रकृतिस्वरम् । कृ॒ष्णसा॑रङ्गः । कृष्ण-शब्दो 'नक्'प्रत्ययान्तोऽन्तोदात्तः ।

अन्तोदात्तः—'कितः' इति सूत्रेण । 'कृष्णस्यामृगाख्या चेत्' इति फिट्सूत्रानुसारं तु **कृष्ण** शब्दोऽत्र मृगवाचकत्वादाद्युदात्त एव ।

गाधलवणयोः प्रमाणे ॥४॥

प्रमाणवाचिनि तत्पुरुषे एतयोरुत्तरयोः पूर्वं प्रकृत्या। शम्बगाधम् । गोलवणम् । प्रमाणमियत्तापरिच्छेदमात्रमिह द्रष्टव्यम् ।

शम्ब शब्दः—'शमेर्बन्' इति 'बन्' प्रत्ययान्त आद्युदात्तः । **गो** शब्दः—√गम् + डो अन्तोदात्तः । **शम्बगाधम्**—शम्बेन–मुसलस्थलौहेन गाध्यते–स्पृश्यते (तलम्) इति । **गोलवणम्**—गवे दीयमानं लवणम् । अत्रोभयोरपि इयत्तापरिच्छेदो विद्यते ।

दायाद्यं दायादे ॥५॥

तत्पुरुषे दायाद उत्तरस्थे दायाद्यवाक् पूर्वस्थं प्रकृतिस्वरम् । विद्यादायादः । धनदायादः । विद्येति 'समजनिषद……' इति क्यबन्तोऽन्तोदात्तः । धनशब्दश्चाद्युदात्तः ।

दायाद्यवाक्—दायम्=स्वभागम् आदत्ते इति **दायादः** । दायादस्य कर्म **दायाद्यं** तस्य वाक्–वाचकः शब्दः ।

प्रतिबन्धि चिरकृच्छ्रयोः ॥६॥

एतयोः प्रतिबन्धवाचि पूर्वपदं प्रकृतिस्वरम् । गमनचिरम् । गमनकृच्छ्रम् । लित्स्वरं पूर्वपदम् ल्युडन्तम् । गमनं हि कारण-विकलतया प्रतिबन्धि ज्ञायते ।

प्रतिबन्धि—कार्यसिद्धिं प्रतिबध्नाति–विहन्ति यत्तत् । **गमनचिरम्**—चिरकालभावि गमनम् । **कृच्छ्रम्**—दुःखम् । **लित्स्वरम्**—प्रत्यया-त्पूर्वमुदात्तम् ।

पदेऽपदेशे ॥७॥

अपदेशो व्याजः । तद्वाचिनि तत्पुरुषे पदशब्द उत्तरे पूर्वं

प्रकृतिस्वरम् । मूत्रपदेन प्रस्थितः । 'मूत्र' शब्दः ष्ट्रन्प्रत्ययान्त आद्युदात्तः । अपदेशे किम् ? विष्णोः पदं विष्णुपदम् ।

मूत्रपदेन--मूत्रव्याजेन । एवम् **उच्चारपदेन** । **उच्चारः** = पुरीषोत्सर्गः । अयमप्याद्युदात्तः ।

निवाते वातत्राणे ॥८॥

निवात उत्तरे त्राणवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । कुटीनिवातम् । 'कुटी' ङीषन्तान्तोदात्ता ।

वातस्याभावो **निवातम्** अथवा निरुद्धो वातोऽस्मिन्निति । 'कुटी' एव निवातम् इति विग्रहः । यत्र पार्श्ववाची रूढो निवातशब्दस्तत्र समासस्वर एव । सुखं मातृनिवातम् ।

शारदेऽनार्तवे ॥९॥

अनृतुभववाचिनि शारद उत्तरे तत्पुरुषे पूर्वं प्रकृतिस्वरम् । रज्जुशारदमुदकम् । 'शारद' शब्दः प्रत्यग्रवाची । सद्यो रज्जूद्धृतम् इत्यर्थः । 'रज्जु' शब्दः 'उ' प्रत्ययान्तः आद्युदात्तः ।

अनार्तवम्--ऋतौ भवमार्तवम् तद्भिन्नम् ।

प्रत्यग्रवाची --शारदशब्दस्यानेकार्थत्वात् ।

रज्जुशारदम्--'रज्जु' शब्दो रज्जूद्धृते लाक्षणिकः ।

अध्वर्युकषाययोर्जातौ ॥१०॥

एतयोरुत्तरयोर्जातिवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । प्राच्याध्वर्युः । प्राच्यो यत्प्रत्ययान्त आद्युदात्तः ।

अध्वर्युः = ऋत्विक् यज्ञकारकः जातिवाची वरणे नियतः । कषायोत्तरपदस्य तत्पुरुषस्योदाहरणम्-सर्पिर्मण्डकषायम् । षष्ठीसमासेन व्युत्पादितोऽयं रूढः शब्दः । **कषायम्** = उद्वर्त्तनम् शरीरे लेपार्थम् सुवासितं तैलं च ।

सदृशप्रतिरूपयोः सादृश्ये ॥११॥

एतयोरुत्तरयोः सादृश्यवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । पितृसंदृशः । मातृप्रतिरूपः । पूर्वावन्तोदात्तौ ।

पितृ-मातृ—एतौ अन्तोदात्तौ उणादिगणे निपातितौ । एवं पितृप्रतिरूपः । मातृसंदृशः ।

द्विगौ प्रमाणे ॥१२॥

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । प्राच्यसप्तसमः । सप्त समाः प्रमाणमस्येति मात्रचो लुक् । प्राच्य आद्युदात्तः ।

सप्तसमः—सप्तशमः इति युक्तः पाठः न्यासे तथैवोद्धरणात् । सप्तानां शमानां समाहार इति द्विगुः । मात्रचो लुकि प्राच्यश्चासौ सप्तशमः इति कर्मधारयः । **शमः** = चतुरङ्गुलः इति यादवकोषः ।

गन्तव्यपण्यं वाणिजे ॥१३॥

वाणिज उत्तरे तत्पुरुषे गन्तव्यं पण्यं च पूर्वपदप्रकृतिस्वरम् । मद्रवाणिजः । सप्तमीसमासः । गोवाणिजः । पूर्वावन्तौदात्तौ ।

वाणिजः = वणिक्+स्वार्थे अण्, मद्रेषु वाणिजः । मद्रेषु गत्वा यो व्यवहरति स **मद्रवाणिजः** । गन्तव्यस्योदाहरणम् । पण्यस्य-**गोवाणिजः**-गवां वाणिजः इति षष्ठीसमासः ।

मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥१४॥

मात्रादिषूत्तरेषु नपुंसकवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । भिक्षामात्रम् । भिक्षा 'गुरोश्च हलः' इत्यन्तोदात्ता । पाणिन्युपज्ञम् । पाणिनिशब्दोऽन्तोदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यचि आद्युदात्तः ।

भिक्षामात्रम्—भिक्षायास्तुल्यप्रमाणम् । 'मात्र'शब्दो वृत्तिविषये (समासे) तुल्य प्रमाणे वर्त्तते । **पाणिन्युपज्ञम्**—वृत्तौ पाणिनोपज्ञम् इत्युदाहृतम् । पाणिनशब्दोऽन्तोदात्तः पाणिनिस्तु इञन्तत्वादाद्युदात्तः । पाणिनेः उपज्ञा, नन्दस्य उपक्रमः इति विग्रहः । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इति सूत्रेण तत्पुरुषे नपुंसकत्वम् । छायाया उदाहरणम् **इषु॑च्छायम्** । 'इषु' शब्द आद्युदात्तः । इषूणां छाया षष्ठीतत्पुरुषः । 'छाया बाहुल्ये' इति नपुंसकत्वम् ।

सुखप्रिययोर्हिते ॥१५॥

एतयोरुत्तरयोर्हितवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । गम॑नसुखम् ।

प्रियस्योदाहरणं **गम॑नप्रियम्** । हितं तद् यदागामिनि काले प्रीतिं करोति । तस्य हेतौ सुखप्रियौ वर्त्तेते । गमनं लित्स्वरम् प्रत्ययात्पूर्वमुदात्तम् ।

प्रीतौ च ॥१६॥

प्रीतौ गम्यायामेतयोरुत्तरयोस्तत्पुरुषे पूर्वं प्रकृतिस्वरम् । ब्राह्मणसु॑खं पायसम् । पूर्वमन्तोदात्तम् ।

प्रीतिपदमत्र तदतिशयप्रतिपत्त्यर्थम् । प्रियस्योदाहारणम्-छात्रप्रि॑योऽनध्यायः । ब्राह्मण-छात्रशब्दौ अन्तोदात्तौ ।

स्वं स्वामिनि ॥१७॥

स्वामिन्युत्तरपदे स्ववाचकं पूर्वं प्रकृतिस्वरम् । गोस्वा॑मी ।

गोशब्दः अन्तोदात्तः ।

पत्यावैश्वर्ये ॥१८॥

पतिशब्द उत्तरे ऐश्वर्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । गोप॑तिः ।

अत्र पतिशब्द ऐश्वर्यार्थकः । 'गवामीश्वरः' (स्वामी) इत्यर्थः ।

न भूवाक्चिद्दिधिषु ॥१९॥

पत्यावुत्तरे ऐश्वर्यवाचिनि तत्पुरुषे भू-वाक्-चित्-दिधिषू, एतानि पूर्वाणि न प्रकृतिस्वराणि । भूपतिः । वाक्पतिः । चित्पतिः । दिधिषूपतिः ।

चित् = ज्ञानम् । दिधिषू = पुनरुद्वाहिता स्त्री । **दिधीषूपतिः**— भ्रातरि मृते तस्य विधवाया उद्वाहकः । एते पूर्वपदप्रकृतिस्वरस्य निषेधात् समासस्वरेणान्तोदात्ताः ।

वा भुवनम् ॥२०॥

पत्यावुत्तरे भुवनं वा प्रकृतिस्वरम् । भुवनपतिः / भुवनपतिः ।

अत्रापि पति शब्द ऐश्वर्यवाची । पूर्वपदप्रवृतिस्वरपक्षे क्युन् प्रत्ययान्तो भुवनशब्द आद्युदात्तः । पक्षे समासस्वरेणान्तोदात्तः ।

आशङ्काबाधनेदीयस्सु सम्भावने ॥२१॥

आशङ्क-आबाध-नेदीयस् एषु उत्तरेषु सम्भावनावाचिनि समासे तत्पुरुषे पूर्वं प्रकृतिस्वरम् । गमनाशङ्कं वर्तते । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते, इति सम्भाव्यते ।

नेदीयः — अतिशयेनान्तिकम् । **सम्भावना** — अस्तित्वनिश्चयः । **गमनाशङ्कम्** — गमनस्याशङ्कः षष्ठीतत्पुरुषः । क्रियाविशेषणत्वान्नपुंसकत्वम् । एवं **गमनाबाधमपि** । **गमननेदीयः** — गमनमतिनिकटमिति मयूरव्यंसकादित्वात्समासः । गमन पदे लित्स्वरः, प्रत्ययात्पूर्वमुदात्तम् ।

पूर्वे भूतपूर्वे ॥२२॥

पूर्वशब्द उत्तरपदे भूतपूर्ववाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । आढचो भूतपूर्वः आढचपूर्वः ।

आढचपूर्वः—पूर्वशब्दो वृत्तौ (समासे) भूतपूर्ववाची । यः पूर्वमाढच आसीत् स एवमुच्यते ।

फा०—३०

सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये । २३॥

सविधादिषूत्तरेषु सामीप्यवाचिनि तत्पुरुषे पूर्वं प्रकृतिस्वरम् । मद्रसंविधम् ।

मद्रसविधम् —विधया सह सविधम् = समीपम् । मद्रस्य सविधम् षष्ठीतत्पुरुषः । एवं सर्वत्र । **मद्रसंनीडम्** । **मद्रसंमर्यादम्** । **मद्रसंवेशम्** । **मद्रसंदेशम्** । मद्रशब्दोऽन्तोदात्तः । सर्वे सविधादयः समीपवाचिनः ।

विस्पष्टादीनि गुणवचनेषु ॥२४॥

विस्पष्टादीनि पूर्वपदानि गुणवचनेषूत्तरेषु प्रकृतिस्वराणि भवन्ति । विस्पंष्टकटुकम् । विचिंत्रकटुकम् । विस्पष्टं कटुकमिति विगृह्य समासः । सुप्सुपेति समासे विस्पष्टशब्दो 'गतिरनन्तरः' इत्याद्युदात्तः । विचित्रशब्दोऽव्ययस्वरेणाद्युदात्तः ।

कटुकशब्दस्यार्थः कटुकवद् द्रव्यम् । विस्पष्टादि कटुकत्वस्य विशेषणम् न कटुकस्य । अतः सामानाधिकरण्यस्याभावान्न कर्मभारयः । विचित्रस्य स्थाने 'विचित्त' इति पाठान्तरम् ।

श्रज्यावमकन्पापवत्सु भावे कर्मधारये ॥२५॥

श्र, ज्य, अवम, कन्, एषु पापवति चोत्तरपदे भाववाचि पूर्वपदं कर्मधारये समासे प्रकृतिस्वरम् । गमंनश्रेष्ठम् । गमंनज्यायः । गमंनावमम् । गमंनकनीयः । गमंनपापिष्ठम् । गमंनपापीयः । लित्स्वरेणाद्युदात्तं गमनपदम् ।

श्र, ज्य, एतौ प्रशस्यशब्दस्यादेशौ । अतिशयेन प्रशस्यं इति प्रशस्य + इष्ठन् = **श्रेष्ठम्** । प्रशस्य + ईय सुन् = **प्रेयः** । **कन्** इति युव-अल्प इत्येतयोरादेशः । अतिशयेनाल्पम् इति **कनिष्ठम्, कनीयः** । **पापिष्ठः**– पापवत् + इष्ठन् । **गमनश्रेष्ठम्**—श्रेष्ठं गमनम् इति विगृह्य कर्मधारयः । मयूरव्यंसकादित्वाद्विशेषणस्य पूर्वनिपातः ।

कुमारश्च ॥२६॥

कुमार शब्दः कर्मधारये पूर्वं प्रकृतिस्वरम् । कुमारश्रमणा । कुमारशब्दोऽन्तोदात्तः ।

पूर्वम्—पूर्वपदम् । कुमारी चासौ श्रमणा इति विग्रहः ।

आदिः प्रत्येनसि ॥२७॥

प्रतिगतमेनो यस्य तस्मिन्नुपपदे कुमारस्यादिरुदात्तो भवति । कुमारप्रत्येनाः । उदात्तः इत्येतदत्र सामर्थ्याद् वेदितव्यम् । पूर्वपदप्रकृतिस्वर एव ह्ययमादेरुपदिश्यते ।

अत्रान्तोदात्तस्य कुमारशब्दस्यादिरुदात्तो विधीयते ।

पूगेष्वन्यतरस्याम् ॥२८॥

गणवाचिन्युत्तरपदे कर्मधारये कुमारस्यान्यतरस्यामादिरुदात्तो भवति । कुमारचातकाः / कुमारचातकाः / कुमारचातकाः । कुमारलोहध्वजाः । चातकादयः पूगशब्दाः, तेभ्यः 'पूगाञ्ञ्यो ग्रामणीपूर्वात्, इति ञ्यः । तद्राजस्येति लुक् । यदा आद्युदात्तत्वं न भवति तदा 'कुमारश्च' इति पूर्वपदप्रकृतिस्वरमेके कुर्वन्ति । अन्ये प्रतिपदोक्तस्य ग्रहणमिच्छन्ति, तेषां मते समासान्तोदात्तत्वमेव ।

पूगाः = गणाः । **प्रतिपदोक्तस्य**—'कुमारश्च' इति सूत्रे एवोक्तस्य ।

इगन्तकालकपालभगालशरावेषु द्विगौ ॥२९॥

इगन्त उत्तरे काल-कपाल-भगाल-शरावेषु च द्विगौ समासे पूर्वपदं प्रकृतिस्वरं भवति । पञ्चारत्निः । दशारत्निः । पञ्चमास्यः । पञ्चकपालः । पञ्चभगालः । पञ्चशरावः ।

पञ्चारत्निः—पञ्च अरत्नयः प्रमाणमस्य इति तद्धितार्थे द्विगुसमासं विधाय मात्रच् प्रत्ययः, तस्य लोपः । एवं दश अरत्नयः प्रमाणमस्य **दशारत्निः** । **पञ्चमास्यः**—पञ्चमासान् भृतो भूतो भावी वा 'द्विगोर्यप्' इत्यनेन यप् । **पञ्चकपालः**—पञ्चसु कपालेषु संस्कृतः ।

एवं **पञ्चनगालः** । **पञ्चशरावः**--पञ्चसु शरावेषु उद्धृतः । 'द्विगोर्लुगनपत्ये' इत्यनेन 'संस्कृतं भक्षाः' इत्यनेन कृतस्याणो लुक् ।

बह्वन्यतरस्याम् ॥३०॥

'बहु' इति पूर्वपदम् इगन्तादिषु उत्तरेषु द्विगौ समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । बह्वरत्निः / बह्वरत्निः । बहुमास्यः / बहुमास्यः । बहुशब्दोऽन्तोदात्तः । तस्य प्रकृतिस्वरे कृते यत्र यणादेशस्तत्रोदात्तस्वरितयोर्यण इत्येष स्वरो भवति ।

बह्वरत्निः—बह्वचः अरत्नयः प्रमाणमस्य । वृत्तौ बहुरत्निः इत्युदाहृतम् । अरत्नि-रत्निशब्दौ प्रमाणविशेषार्थकौ समानार्थौ । अत्र यणि कृते ततः परस्यानुदात्तस्याकारस्य स्वरितत्वं भवति ।

दिष्टिवितस्त्योश्च ॥३१॥

एतयोरुत्तरयोर्द्विगौ समासे पूर्वपदं प्रकृतिस्वरमन्यतरस्याम् । पञ्चदिष्टिः / पञ्चदिष्टिः । पञ्चवितस्तिः / पञ्चवितस्तिः । दिष्टिवितस्ती प्रमाणे तेनात्र मात्रचो लुक् ।

पञ्चदिष्टिः–पञ्च दिष्टयः प्रमाणमस्य । एवम् **पञ्चवितस्तिः**–पञ्च वितस्तयः प्रमाणमस्य इति विग्रहः ।

सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ॥३२॥

सिद्धादिषूत्तरेषु सप्तम्यन्तं पूर्वपदं प्रकृतिस्वरम् । सा चेत् सप्तमी कालान्न । सांकाश्यसिद्धः । काम्पिल्यसिद्धः । पूर्वपदमन्तोदात्तम् ।

एवम् **ऊकशुष्कः** । **कुम्भीपक्वः** । **चक्रबन्धः** । इत्युदाहरणानि ज्ञेयानि । ऊकादीनि पूर्वपदान्यन्तोदात्तानि ।

परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥३३॥

एते पूर्वपदभूताः वर्ज्यमानवाचिनि अहोरात्रावयववाचिनि

चोत्तरपदे प्रकृतिस्वरा भवन्ति । परि॑त्रिगर्त्तं वृष्टो देवः । तत्राप-परी वर्जने वर्तेते इति तयोरेव वर्ज्यमानमुत्तरपदम् नेतरयोः ।

उपसर्गा आद्युदात्ताः अभिवर्जमित्याद्युदात्तानि पूर्वपदानि । तत्पुरुषे बहुव्रीहौ च सिद्धत्वादव्ययीभावार्थ आरम्भः । प्रति॑-पूर्वाह्णम् । उपा॑पराह्णम् ।

परित्रिगर्तम् --त्रिगर्तान् वर्जयित्वा । एवम् **अपत्रिगर्तम्** ।

राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ॥३४॥

राजन्यवाचिनां बहुवचनानां यो द्वन्द्वोऽन्धकवृष्णिषु वर्तते, तत्र पूर्वं प्रकृतिस्वरम् । श्वा॒फ॒ल्कचै॑त्रकाः । शिनि॑वासुदेवाः । श्वाफल्कशिनी क्रमेणान्तोदात्ताद्युदात्तौ ।

श्वाफल्काश्च चैत्रकाश्च । शिनयश्च वासुदेवाश्च इति विग्रहः । शिनिरत्र शिनेरपत्यार्थकः ।

संख्या ॥३५॥

संख्यावाचिनि द्वन्द्वे पूर्वं प्रकृतिस्वरम् । एका॑दश इषीकाः । एकशब्द आद्युदात्तः ।

एकादश—एक च दश च । **इषीकाः**–'सींक' इति भाषायाम् ।

आचार्योपसर्जनश्चान्तेवासी ॥३६॥

आचार्योपसर्जनान्तेवासिनां यो द्वन्द्वः तस्य पूर्वं प्रकृति-स्वरम् । आ॒पि॒श॒लपा॑णिनीयाः । आपिशलशब्दोऽन्तोदात्तः ।

आचार्योपसर्जनः—आचार्यः उपसर्जनं यस्य सः । **अन्तेवासी**–अन्ते वसति यः सः । आपिशलाश्च पाणिनीयाश्चेति द्वन्द्वः ।

कार्तकौजपादयश्च ॥३७॥

कार्तकौजपादयो द्वन्द्वाः, तत्र पूर्वं प्रकृतिस्वरम् । प्रकृतिस्वर-

पूर्वपदा एते भवन्ति । कार्तकौजपौ । कृतस्येदं, कुजस्येदम् इत्यणन्तावेतौ । सार्वर्णिमाण्डूकेयौ ।

वृत्तौ कृतस्यापत्यम् इति लिखितं वर्तते । एवम् अवन्त्यश्मकाः । गर्गवत्साः इत्यादयः ।

महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारत-हैलिहिलरौरवप्रवृद्धेषु ॥३८॥

महान् पूर्वपदं व्रीह्यादिषूत्तरेषु प्रकृतिस्वरम् । महाव्रीहिः । महच्छब्दोऽन्तोदात्तः ।

महाव्रीहिः—महांश्चासौ व्रीहिरिति कर्मधारयः । एवं महापराह्णः । महागृष्टिः । महेष्वासः । महाजाबालः । महाभारः । महाभारतः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । इत्युदाहरणानि बोध्यानि ।

क्षुल्लकश्च वैश्वदेवे ॥३९॥

'क्षुल्लक' पूर्वपदं महांश्च वैश्वदेव उत्तरे प्रकृतिस्वरम् । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लाति क्षुल्लः । तस्मादज्ञातादिषु 'प्रागिवात्कः' इत्यन्तोदात्तः क्षुल्लक शब्दः ।

क्षुल्लः—क्षुध् + √ला + क 'आतोऽनुपसर्गे' । 'तोर्लि' इति धकार-स्थानीयतकारस्य लकारः ।

उष्ट्रः सादिवाम्योः ॥४०॥

'उष्ट्र' पूर्वपदं सादि-वामि एतयोरुत्तरयोः प्रकृतिस्वरम् । उष्ट्रसादी । उष्ट्रवामी । उष्ट्रशब्दः उषेः ष्ट्रन् प्रत्ययान्त आद्युदात्तः । कर्मधारयोऽयम्, षष्ठीतत्पुरुषो वा ।

उष्ट्रसादी—वृत्तौ उष्ट्रसादि, उष्ट्रवामि इति पाठः । कौमुद्यां उष्ट्रसादी, उष्ट्रवामी इति ।

गौः सादसादिसारथिषु ॥४१॥

गोशब्दः पूर्वपदं सादादिषूत्तरेषु प्रकृतिस्वरम् । गोः सादः गोसा'दः । गोसा'दिः । गोसा'रथिः ।

गोसादिः—गो + √सद् + इण् । गां सादयति इति गो √सद् + णिनि=गोसादिन् प्रथमैवचने गोसादी इति भवति । गोशब्दः प्रत्यय-स्वरेणान्तोदात्तः ।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रू-पण्यकम्बलदासीभाराणाञ्च ॥४२॥

एषां पूर्वपदं प्रकृतिस्वरम् । कुरूणां गार्हपतम् कुरुगा'र्हपतम् । कुरुशब्दोऽन्तोदात्तः । रिक्तो गुरुः रिक्त'गुरुः / रि॒क्तगु'रुः । रिक्तशब्द आद्युदात्तः, अन्तोदात्तश्च । असूता जरती असू'तजरती । अश्लीला दृढरूपा अश्ली'लदृढरूपा । अश्लीलशब्द आद्युदात्तः । पा॒रे'वडवा । 'पारे' अन्तोदात्तः । तै॒ति॒लक'द्रूः—तैतिल इति अणन्तः । पण्य'कंबलः—पण्यशब्द आद्युदात्तः । दास्या भारो दा॒सीभा'रः । पूर्वमन्तोदात्तम् ।

वृत्तौ तु 'कुरु ......दृढरूपा पारेवडवा तैतिलकद्रू दासीभाराणां च' इतिरूपः सूत्र पाठः । अत्र पण्यकम्बलादयः सप्तं समस्ताः । अत्र कुरुगार्हपत–रिक्तगुरु इत्यविभक्तिकौ, इतरे पञ्च प्रथमान्ताः । प्रथमा च षष्ठयर्थे 'दासीभाराणाञ्च' इति बहुवचननिर्देशाद् आदिरर्थो लभ्यते । **रिक्त शब्दः** 'रिक्ते विभाषा' इति सूत्रेणाद्युदात्तोऽन्तोदातश्च विकल्पेन । **असूत शब्दोऽपि** नञ्समासस्वरेणाद्युदात्तः । **पारेवडवा**–पारे वडवा इवेति विग्रहे निपात-नादिवार्थे समासः । तैतिलानां कद्रूरिति षष्ठी तत्पुरुषः । **तैतिलशब्दः** प्रत्ययस्वरेणाद्युदात्तः । **तैतिलि** इति पाठान्तरम् । आदिशब्देन **देवहूति** इत्यादि ।

चतुर्थी तदर्थे ॥४३॥

चतुर्थ्यन्तं पूर्वपदं तदभिधेयार्थं यत्र तद्वाचिन्युत्तरपदे प्रकृति-स्वरम् । यूप'दारु । यूपशब्द आ॒द्युदात्तः ।

तदर्थे—तस्य = चतुर्थ्यन्तस्य अर्थे । यूपाय दारु चतुर्थी तत्पुरुषः ।

अर्थे ॥४४॥

अर्थे उत्तरे चतुर्थ्यन्तं पूर्वं प्रकृतिस्वरम् । मा॒त्रर्थम् । पि॒त्रर्थम् । मातृ-पितृशब्दावन्तोदात्तौ उणादिषु निपातितौ ।

मात्रे इदम् इति चतुर्थी तत्पुरुषः ।

क्ते च ॥४५॥

क्तान्ते चोत्तरपदे पूर्वपदं प्रकृतिस्वरम् । गोहि॑तम् । अश्व॑हितम् ।

अश्वशब्द आद्युदात्तः ।

कर्मधारयेऽनिष्ठा ॥४६॥

अस्मिन् क्तान्ते उत्तरपदे अनिष्ठान्तं पूर्वं प्रकृतिस्वरम् । श्रेणि॑कृताः । श्रेणिशब्द आद्युदात्तः ।

श्रेणयः कृताः इति विग्रहे 'श्रेण्यादयः कृतादिभिः' इति कर्मधारयः समासः । एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः **श्रेणिः । श्रेणिः**—श्रिञ् + निन् । नित्त्वादाद्युदात्तः ।

अहीने द्वितीया ॥४७॥

अहीनवाचिनि समासे क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरम् । क॒ष्टश्रि॑तः । कष्टशब्दोऽन्तोदात्तः ।

अहीनम्—न हीनम् = त्यक्तम् । अहीनेन पूर्वपदेन समासोऽप्यहीनवाची । कष्टं श्रितः इति द्वितीयातत्पुरुषः । हीने तु कान्तारम् अतीतः त्यक्तवान् इत्यर्थः । अत्र समासस्वरः का॒न्ता॒रा॒ती॒तः ।

तृतीया कर्मणि ॥४८॥

कर्मवाचिनि क्तान्त उत्तरपदे तृतीयान्तं पूर्वपदप्रकृतिस्वरं भवति । अ॒हिह॑तः । अहिरन्तोदात्तः ।

अन्तोदात्तः—केचिदाचार्याः अहिम् आद्युदात्तं मन्यन्ते । **अहिहतः ।**

गतिरनन्तरः ॥४९॥

कर्मवाचिनि क्तान्त उत्तरपदे गतिरनन्तरः पूर्वपदप्रकृतिस्वरः । प्रकृतः । प्रहृतः ।

अनन्तरः किम् ? अभ्युद्धृतः । व्यवहितस्य गतेरयं स्वरो न भवति ।

प्रकृतः—अत्र 'प्र' शब्दः आद्युदात्तो निपातितः । स एव भवति ।

तादौ निति कृत्यतौ ॥५०॥

तकारादौ तुशब्दवर्जिते निति कृति परतः गतिरनन्तरः प्रकृतिस्वरः । प्रकर्ता । प्रकृतिः ।

तादौ किम् ? प्रजल्पाकः ।

निति किम् ? प्रकर्ता । अत्र तृजन्तः पूर्वत्र तृन्नन्तः ।

अतौ किम् ? आगन्तुः ।

प्रजल्पाकः—'जल्पभिक्ष.........' इत्यादिना 'षाकन्' ।

तवै चान्तश्च युगपत् ॥५१॥

तवै प्रत्ययान्त उदात्तो भवति । चाद्गतिश्चानन्तरः प्रकृतिस्वरः, एतदुभयं युगपत् । अन्वेतवै । परिधातवै । उपसर्गा आद्युदात्ता अभिवर्जम् । अभिरन्तोदात्तः ।

अन्वेतवै—अत्र उपसर्गस्याद्युदात्तताया अनेन अन्तोदात्तता विधीयते । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् । 'अभि' इत्यस्योदाहरणम्—**तस्मात् पिता नाभिचरितवै ।**

अनिगन्तोऽञ्चतौ वप्रत्यये ॥५२॥

अनिगन्तो गतिः प्रकृतिस्वरः अञ्चतौ, 'व' प्रत्यये । प्राङ्,

प्राञ्चौ, प्राञ्चः / प्राङ्, प्राञ्चौ, प्राञ्चः । 'स्वरितो वाऽनुदात्तेऽपदादौ' इत्येकादेश उदात्तः स्वरितो वा ।

प्राङ्--'ऋत्विक् ....' इत्यादिना क्विन् । **वप्रत्यये**-'व' प्रत्ययो यस्य स तस्मिन् । क्विन् प्रत्ययो वकारमात्र एव शेषस्यानुबन्धत्वात् ।

न्यधी च ॥५३॥

एतावञ्चतौ व प्रत्यये प्रकृतिस्वरौ भवतः । न्यङ् । अध्यङ् ।

नि-अधि-इत्येतयोरिगन्तत्वात्पूर्वेणाप्राप्तौ सूत्रारम्भः । नि-अधि इत्येतावाद्युदात्तौ । 'नि' स्थाने यण् सोऽप्युदात्तः । तथा च '**न्यङ्**' इत्यत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यकारः स्वरितः । '**अध्यङ्**' इत्यत्र तु न तथा यणादेशस्याद्युदात्तत्वाभावात् ।

ईषदन्यतरस्याम् ॥५४॥

'ईषत्' इत्येतत् पूर्वपदम् अन्यतरस्यां प्रकृतिस्वरम् । ईषत्कडारः / ईषत्कडारः । ईषत्पिङ्गलः / ईषत्पिङ्गलः । 'ईषत्' इत्ययमन्तोदात्तः ।

अन्यतरस्यां भवतीति **ईषद्भेदः** इत्यादौ कृत्स्वर एव ।

हिरण्यपरिमाणं धने ॥५५॥

हिरण्यपरिमाणवाचि पूर्वपदं धनशब्द उत्तरे अन्यतरस्यां प्रकृतिस्वरम् । द्विसुवर्णधनम् / द्विसुवर्णधनम् ।

द्विसुवर्णधनम्--द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णं, तदेव धनम् । द्विसुवर्णशब्दः समासस्वरेणान्तोदात्तः । 'द्विसुवर्णधनः' इति बहुव्रीहावपि परत्वाद् विकल्प एव नतु 'बहुव्रीहौ प्रकृत्या' इति नित्यं पूर्वपदप्रकृतिस्वरम् ।

प्रथमोऽचिरोपसम्पत्तौ ॥५६॥

प्रथमशब्दः पूर्वपदमचिरोपसम्पत्तौ गम्यायामन्यतरस्यां

प्रकृतिस्वरो भवति। प्रथमवैयाकरणः / प्रथमवैयाकरणः = सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । 'प्रथेरमच्' इति प्रथमशब्दः चित्त्वादन्तोदात्तः ।

अचिरोपसम्पत्तिः—अचिरकालसम्बन्धः । प्रथमश्च वैयाकरणश्चेति समासः । यस्तु मुख्यार्थकः प्रथमशब्दस्तत्र समासस्वरः प्रथमवैयाकरणः । अयं नित्यमन्तोदात्तः ।

कतरकतमौ कर्मधारये ॥५७॥

एतौ पूर्वपदं कर्मधारयेऽन्यतरस्यां प्रकृतिस्वरम् । कतरकठः / कतरकठः । कतमकलापः / कतमकलापः । कर्मधारयपदमुत्तरार्थम् । इह प्रतिपदोक्तत्वादेव सिद्धम् ।

कतरकतमौ क्रमशः डतरच्-डतमच् प्रत्ययान्तौ चित्स्वरेणान्तोदात्तौ ।

आर्यो ब्राह्मणकुमारयोः ॥५८॥

आर्यः पूर्वपदम् अनयोरुत्तरयोः कर्मधारयेऽन्यतरस्यां प्रकृतिस्वरम् । आर्यब्राह्मणः / आर्यब्राह्मणः । आर्यकुमारः / आर्यकुमारः । आर्यशब्दो ण्यदन्तत्वादन्तस्वरितः ।

अन्तस्वरितः—'तित्स्वरितम्' इति सूत्रेण । **आर्यः**—√ऋ + ण्यत् ।

राजा च ॥५९॥

राजा च पूर्वपदं ब्राह्मणकुमारयोरुत्तरयोः कर्मधारयेऽन्यतरस्यां प्रकृतिस्वरम् । राजब्राह्मणः /राजब्राह्मणः । राजकुमारः / राजकुमारः । पृथग्योग उत्तरार्थः ।

'राज' शब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः ।

षष्ठी प्रत्येनसि ॥६०॥

षष्ठ्यन्तो राजा प्रत्येनस्युत्तरेऽन्यतरस्यां प्रकृतिस्वरः राजप्रत्येनाः / राजप्रत्येनाः ।

राज्ञः प्रत्येनाः इति षष्ठीतत्पुरुषः । राज्ञः प्रत्येनाः इत्यत्र 'षष्ठ्या आक्रोशे' इति । षष्ठ्या अलुक् । इदमेवोदाहरणं बोद्धव्यम् ।

क्ते नित्यार्थे ॥६१॥

क्तान्त उत्तरपदे नित्यार्थे समासे पूर्वमन्यतरस्यां प्रकृतिस्वरम् । नित्यंप्रहसितः / नित्यप्रहसितः । नित्यशब्दः 'त्यब्नेर्ध्रुवे' इति त्यबन्त आद्युदात्तः ।

नित्यार्थे किम् ? मुहूर्त्तप्रहसितः ।

नित्यप्रहसितः—'कालाः' इति द्वितीयासमासः । पक्षे समासस्वरः ।

ग्रामः शिल्पिनि ॥६२॥

ग्रामः पूर्वपदं शिल्पिन्युत्तरेऽन्यतरस्यां प्रकृतिस्वरम् । ग्रामंनापितः / ग्रामनापितः । ग्रामंकुलालः / ग्रामकुलालः । ग्राम आद्युदात्तः ।

शिल्पिनि—अर्थग्रहणात् नापितादयो गृह्यन्ते ।

राजा च प्रशंसायाम् ॥६३॥

राजशब्दः पूर्वपदं शिल्पिन्युत्तरेऽन्यतरस्यां प्रकृतिस्वरम् । राजंनापितः / राजनापितः । राजंकुलालः / राजकुलालः ।

राजनापितः—कर्मधारये राजगुणारोपेण नापितस्य प्रशंसा, षष्ठीतत्पुरुषे तु राजानं प्रति योग्यतया ।

आदिरुदात्तः ॥६४॥

आदिरुदात्तः इत्यधिकृतम् । इत ऊर्ध्वं यद्वक्ष्यामः, तत्र पूर्वपदस्यादिरुदात्तः, इत्येवं तद्वेदितव्यम् । वक्ष्यति—'........' 'सप्तमीहारिणौ' इति । स्तूपेंशाणः । मुकुटेंकार्षापणाः । 'आदिः' इति प्रागन्ताधिकारात् । 'उदात्तः' इति 'प्रकृत्या भगाल' मिति यावत् ।

आदिः, उदात्तः इति द्वयोः पदयोरधिकारावधिः पृथगस्ति । तदेव स्पष्टं करोति–आदिः यावत् ।'

सप्तमीहारिणौ धर्म्येऽहरणे ॥६५॥

सप्तम्यन्तं हारिवाचि च पूर्वं धर्म्ये वाचिनि हरणशब्दादन्यस्मिन्नुत्तरे आद्युदात्तो भवति । 'हारी' इति देयं यः स्वीकरोति सोऽभिधीयते । 'धर्म्यम्' इत्याचारनियतं देयमुच्यते । धर्मो ह्यनुप्रवृत्त आचारः । तस्मादनपेतं धर्म्यम् । तेन वा प्राप्तमिति । स्तूपेशाणः । मुकुटेकार्षापणाः । 'संज्ञायाम्' इति सप्तमीसमासः । हारिणि–याज्ञिकाश्वः । क्वचिदयमाचारो व्यवस्थीयते–स्तूपादिषु शाणादि दातव्यम् । याज्ञिकादीनामश्वादि ।

धर्म्य इति किम् ? स्तम्बेरमः ।

अहरणे किम् ? वाडवहरणम् ।

धर्म्यम्—धर्म+यत् ।

स्तूपेशाणः—'कारनाम्नि च' इति सप्तम्या अलुक् ।

युक्ते च ॥६६॥

युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोबल्लवः । गोमलिन्दः । युक्तः–समाहितः ।

बल्लवादयः पालकार्थाः । **मलिन्दः**–वृत्तौ **'मणिन्दः'** इति पाठः । **समाहितः**–कार्ये तत्परः ।

विभाषाऽध्यक्षे ॥६७॥

अध्यक्ष उत्तरे पूर्वं विभाषाऽऽद्युदात्तम् / गवाध्यक्षः / गवाध्यक्षः ।

अध्यक्षशब्दोऽपि समासे युक्तवाची ।

पापं च शिल्पिनि ॥६८॥

पापपदं पूर्वं शिल्पिन्युत्तरे विभाषाद्युदात्तम् । पापंनापितः / पापनापितः । पापंकुलालः / पापकुलालः ।

'पापाणके कुत्सितैः' इति प्रतिपदोक्तः पापशब्दस्य समानाधिकरणसमासः । नेह—पापस्य नापितः पापनापितः ।

पापस्य नापितः—षष्ठीसमासे नेदं सूत्रं प्रवर्तते ।

गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥६९॥

गोत्रवाचिन्यन्तेवासिवाचिन्युत्तरे माणवब्राह्मणयोश्च क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तम् । यो जङ्घादानं ददान्यहमिति वात्स्यः सम्पद्यते स जङ्घावात्स्य इत्युच्यते, इति क्षिप्यते । अन्तेवासि—कुमारीदाक्षाः । कम्बलचारायणीयाः । घृतरौढीयाः । कुमार्यादिलाभकामाः / माणव—भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवो भवति । भयंब्राह्मणः । यो भयेन ब्राह्मणः सम्पद्यते । अत्र यस्यान्यत् समासलक्षणं नास्ति तत्र 'सुप्सुपा' इति समासः ।

वात्स्यः—वत्सस्य गोत्रापत्यम् इति वत्स+यञ् । **जङ्घावात्स्यः**—यत्र अवात्स्योऽपि श्राद्धादौ भोजनाय वात्स्योऽहमिति जङ्घां प्रसारयति प्रक्षालनाय सः । असत्यभाषणात् क्षेपः = निन्दा । **कुमारीदाक्षाः** = कुमारीं प्राप्तुकामाः ये दाक्षप्रोक्तं शास्त्रमधीयते ।

अङ्गानि मैरेये ॥७०॥

मैरेयशब्द उत्तरे तदङ्गवाचीनि पूर्वाणि आद्युदात्तानि । गुडमैरेयः । मधुमैरेयः । मैरेयस्य गुडोऽङ्गम् ।

अङ्गम् = आरम्भकम् कारणमित्यर्थः । **मैरेयम्** = सुरावर्ज्यं मद्यम् ।

भक्ताख्यास्तदर्थेषु ॥७१॥

भक्तम् = अन्नम्, तदाख्यास्तदर्थेषूत्तरेषु आद्युदात्ता भवन्ति । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः ।

तदाख्याः = तद्वाचिनः । **भिक्षाकंसः**—भिक्षायै कंसः इति चतुर्थी-तत्पुरुषः ।

गोबिडालसिंहसैन्धवेषूपमाने ॥७२॥

एतेषूपमानवाचिषूत्तरेषु पूर्वमाद्युदात्तम् । हिरण्यगवः । धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः ।

हिरण्यं गौरिवेति विगृह्य व्याघ्रादेराकृतिगणत्वात् 'उपमितं व्याघ्र ………' इति समासः । गवाकृत्या संनिवेशितम् धान्यं गवशब्देनोच्यते । उपमानशब्दो गवादिभिः प्रत्येकमभिसम्बध्यते । यत्र धान्यं गवाकृत्या **संनिवेशितम्** = व्यवस्थापितम् तत्र **धान्यगव** पद प्रयोगः इत्येतदेव सादृश्यम् ।

अके जीविकार्थे ॥७३॥

अक प्रत्ययान्त उत्तरे जीविकार्थवाचिनि समासे पूर्वपद-माद्युदात्तम् । दन्तलेखकः । नखलेखकः । दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्ते । 'नित्यं क्रीडाजीविकयोः' इति समासः ।

दन्तलेखकः—दन्तानां लेखकः । **लेखकः**—√लिख + ण्वुल् ।

प्राचां क्रीडायाम् ॥७४॥

प्राग्देशवर्तिनां या क्रीडा, तद्वाचिनि समासे अकप्रत्ययान्त उत्तरे पूर्वपदमाद्युदात्तम् । उद्दालकपुष्पभञ्जिका । शालभञ्जिका । 'नित्यं क्रीडा………' इति समासः ।

प्राचाम्—प्राक्शब्दो देशवाची न प्राचीनाचार्यार्थकः । **भञ्जिका**—√भञ्ज + ण्वुल् + टाप् ।

अणि नियुक्ते ॥७५॥

अणन्त उत्तरे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्त्रंधारः । कमण्डलुग्राहः ।

नियुक्त इति किम् ? काण्डलावः ।

छत्त्रंधारः—छत्त्र √धृ + अण् । **ग्राहः** = √ग्रह + अण् । **नियुक्तः** = अधिकृतः । **काण्डलावः** इत्यत्र कर्तृत्वमात्रं प्रतीयते ।

शिल्पिनि चाकृञः ॥७६॥

शिल्पन्युत्तरे पूर्वमाद्युदात्तम् । स चेदण् कृञो न भवति । तन्तुवायः । तुन्नवायः ।

शिल्पिनि किम् ? काण्डलावः ।

अकृञः किम् ? कुम्भकारः ।

तन्तुवायः—तन्तून् वयति तन्तु √वेञ् + अण् । 'आतो युक्' इत्यनेन युक् ।

संज्ञायाम् ॥७७॥

अणन्त उत्तरे पूर्वमाद्युदात्तं संज्ञायाम् । तन्तुवायो नाम कृमिः ।

अकृञ एव । अत्र न भवति—रथकारो नाम ब्राह्मणः ।

गोतन्तियवं पाले ॥७८॥

एतानि पूर्वाणि पाल उत्तरे आद्युदात्तानि । गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थं आरम्भः ।

तन्तिः = वत्सानां बन्धनरज्जुः ।

णिनि ॥७९॥

णिनन्त उत्तरे पूर्वमाद्युदात्तम् । पुष्पहारी ।

पुष्पहारी—पुष्पाणि हरति पुष्प √हृ + णिनि ।

उपमानं शब्दार्थप्रकृतावेव ॥८०॥

उपमानवाचि पूर्वं शब्दार्थप्रकृतावेव णिन्यन्त उत्तरपदे आद्युदात्तम् । उष्ट्र॑क्रोशी । खर॑नादी ।

शब्दार्थप्रकृतिः—शब्दार्थः प्रकृतिः यस्मिन् सा । अर्थात् धातुमात्रेण यत्र सोऽर्थो लभ्यते तत्रैवेदं प्रवर्तते यत्र तूपसर्गेण सह धातुस्तमर्थमभिव्यनक्ति यथा **गर्द॑भोच्चारी** तत्र न भवत्याद्युदात्तम् ।

युक्तारोह्यादयश्च ॥८१॥

युक्तारोह्यादयः समासा आद्युदात्ता भवन्ति । युक्ता॑रोही ।

युक्तारोही—युक्त आ√रुह् + णिनि । कृत्स्वरापवादः । **एक॑शितिपात्**—एकः शितिः = सितः कृष्णो वा पादः अस्य इति बहुव्रीहौ पादस्य अन्त्यलोपः । अत्र समासान्तोदात्तत्वं प्राप्तम्, तस्यापवादः ।

दीर्घकाशतुषभ्राष्ट्रवटं जे ॥८२॥

दीर्घान्तादीनि पूर्वाणि जे उत्तरे आद्युदात्तानि । कुटी॑जः । शमी॑जः । काश॑जः । तुष॑जः । भ्राष्ट्र॑जः । वट॑जः ।

कुटीजः—कुटयां जातः कुटी + √जन् + उ ।

अन्त्यात्पूर्वं बह्वचः ॥८३॥

जे उत्तरे बह्वचः पूर्वपदस्यान्त्यात्पूर्वमुदात्तं भवति । उपस॑रजः । मुद्गर॑जः ।

वृत्तौ **मन्दुर॑जः** इत्युदाहृतम् । **उपसरजः**—सकाराकार उदात्तः ।

ग्रामेऽनिवसन्तः ॥८४॥

ग्राम उत्तर पदे पूर्वमाद्युदात्तम्, तच्चेन्निवसद्वाचि न भवति । ग्रामोऽत्र समूहः । मल्ल॑ग्रामः । वणि॑ग्ग्रामः ।

अनिवसन्त इति किम् ? दाक्षिग्रामः ।

मल्लग्रामः—षष्ठीतत्पुरुषः । **दाक्षिग्रामः**—दाक्षयो निवसन्ति यस्मिन् ग्रामे सः ।

घोषादिषु ॥८५॥

घोषादिषूत्तरेषु पूर्वपदमाद्युदात्तम् । दाक्षिघोषः । दाक्षिपल्लवः ।

दाक्षिघोषः—दाक्षीणां घोषः षष्ठी तत्पुरुषः ।

छात्र्यादयः शालायाम् ॥८६॥

शालायामुत्तरपदे छात्र्यादय आद्युदात्ता भवन्ति । छात्रिशाला । ऐलिशाला ।

ऐलिशाला—'पेलिशाला' इति पाठान्तरम् ।

'छात्रिशालम्' इत्यत्रापि 'तत्पुरुषे शालायाम्' इत्येतद् बाधित्वा पूर्वविप्रतिषेधेनाद्युदात्त एव स्वरो भवति ।

प्रस्थेऽवृद्धमकर्क्यादीनाम् ॥८७॥

प्रस्थे उत्तरे कर्क्यादिवर्जितम् अवृद्धं पूर्वमाद्युदात्तम् । इन्द्रप्रस्थः । दण्डप्रस्थः डिम्भप्रस्थः । सुवर्णप्रस्थः ।

अवृद्धम् इति किम् ? दाक्षिप्रस्थः । माहकिप्रस्थः ।

अकर्क्यादीनाः किम् ? कर्कीप्रस्थः ।

वृत्तौ **'कुण्डप्रस्थः । ह्रदप्रस्थः'** इत्यप्युदाहरणे । **'इन्द्रप्रस्थः'** इत्यादयः षष्ठीतत्पुरुषाः ।

मालादीनां च ॥८८॥

प्रस्थ उत्तरे मालादीनामादिरुदात्तः । मालाप्रस्थः । शोणाप्रस्थः । वृद्धार्थं आरम्भः ।

वृद्धार्थं आरम्भः—'प्रस्थेऽवृद्ध.....' इति सूत्रे **'अवृद्ध'** पदेन वृद्धिर्यस्या-

चामादिस्तद्वृद्धम्' इति सूत्रेण येषां 'वृद्ध' संज्ञा, तद्भिन्नं गृह्यते। माला-दयश्च वृद्धसंज्ञकाः।

अमहन्नवं नगरेऽनुदीचाम् ॥८९॥

नगर उत्तरे महन्नववर्जितं पूर्वमाद्युदात्तम्, तच्चेदुदीचां न भवति। ब्रह्मनगरम्। पुण्ड्रनगरम्। विराटनगरम्।

अमहन्नवमिति किम्? महानगरम्। नवनगरम्।

अनुदीचां किम्? नदीनगरम्।

ब्रह्मनगरम् इत्यादयः षष्ठी-तत्पुरुषाः। **नदीनगरम्**—उदग्देशेऽयं प्रयोगो भवति।

अर्मे चावर्णं द्व्यच्त्र्यच् ॥९०॥

अर्मे उत्तरपदे द्व्यच्-त्र्यच्पूर्वमवर्णान्तमाद्युदात्तम्। दत्तार्मम्। गुप्तार्मम्।

अवर्णं किम्? बृहदर्मम्।

द्व्यच्-त्र्यच् किम्? कपिञ्जलार्मम्।

अमहन्नवमित्येव—महार्मम्।

त्र्यच उदाहरणम्—**कुक्कुटार्मम्**।

न भूताधिकसञ्जीवमद्राश्मकज्जलम् ॥९१॥

एतानि अर्मशब्द उत्तरपदे नोदात्तानि। भूतार्मम्। अधिकार्मम्। सञ्जीवार्मम्। मद्रार्मम्। अश्मार्मम्।

मद्राश्मग्रहणं संघातविगृहीतार्थम्। **मद्राश्मार्मम्**। समासान्तोदात्तत्वमेव भवति।

संघातविगृहीतार्थम्—केवलयोः मद्र-अश्मशब्दयोः संहितस्य च मद्राश्मशब्दस्य नोदात्तत्वमिति भावः।

❀(वा०) आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्। दिवो॑दासाय गायत। वध्र्यश्वाय॑ दाशुषे॑।

अन्तः ॥९२॥

इत ऊर्ध्वं यद्वक्ष्यामः, 'पूर्वपदस्यान्त उदात्तो भवति' इत्येवं तद्वेदितव्यम्। वक्ष्यति—'सर्वं गुणकात्स्न्र्ये' सर्वश्वै॑तः। प्राक् 'उत्तरपदादिः' इत्यस्मादयमधिकारः।

आद्युदात्तप्रकरणं निवृत्तम्।

सर्वं गुणकात्स्न्र्ये ॥९३॥

सर्वशब्दः पूर्वपदं गुणकात्स्न्र्ये वर्तमानमन्तोदात्तं भवति। सर्वश्वै॑तः। सर्वम॑हान्।

सर्वमिति किम्? परमश्वे॒तः। न आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकात्स्न्र्ये सत्यपि न।

गुणकात्स्न्र्यम्—गुणस्य सर्वत्र भावः।

संज्ञायां गिरिनिकाययोः ॥९४॥

एतयोरुत्तरयोः पूर्वपदमन्तोदात्तं भवति संज्ञायां विषये। अञ्जना॑गिरिः। शापिण्डि॑निकायः।

संज्ञायां किम्? परमगिरिः।

अञ्जनागिरिः—अञ्जनस्य गिरिः इति षष्ठी तत्० समासे 'वनगिर्योः संज्ञायाम्' इति दीर्घः।

कुमार्यां वयसि ॥९५॥

कुमार्यामुत्तरपदे वयसि गम्ये पूर्वपदमन्तोदात्तम्। वृद्धकु॑मारी। जरत्कु॑मारी।

कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय

प्रयुक्तः सन् वृद्धादिभिर्वयोवचनैः समानाधिकरणो भवति । तच्च वय इह गृह्यते, न कुमारीत्वमेव ।

वयसि किम् ? परमकुमारी ।

असम्प्रयोगः--असम्बन्धः । **समानाधिकरणो भवति**--तेन 'जरत्कुमारी' इति सिद्ध्यति ।

उदकेऽकेवले ॥९६॥

अकेवलम् = मिश्रम् । तद्वाचिनि समासे उदकशब्द उत्तरपदे पूर्वमन्तोदात्तम् । गुडमिश्रमुदकं गुडोदकम् / गुडोदकम् । तिलोदकम् / तिलोदकम् । स्वरे कृतेऽत्रैकादेशः । 'स्वरितो वाऽनुदात्तेऽपदादौ' इति पक्षे स्वरितः ।

अकेवले किम् ? शीतोदकम् । उष्णोदकम् ।

गुडोदकम्--शाकपार्थिवादित्वादुत्तरपदलोपिसमासः ।

द्विगौ क्रतौ ॥९७॥

द्विगावुत्तरे क्रतुवाचिसमासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः ।

गर्गत्रिरात्रः--तिसृणां रात्रीणां समाहारः त्रिरात्रः (द्विगुः) गर्गाणां त्रिरात्रः इति षष्ठीतत्पुरुषः ।

सभायां नपुंसके ॥९८॥

सभायामुत्तरपदे क्लीबसमासे पूर्वपदमन्तोदात्तम् । गोपालसभम् ।

गोपालसभम्--षष्ठीतत्पुरुषे 'सभाऽराजामनुष्यपूर्वा' इति नपुंसकत्वम् । नपुंसके एवेति 'राजसभा' इत्यत्र न भवति ।

पुरे प्राचाम् ॥९९॥

पुरे उत्तरपदे प्राचां देशे पूर्वपदमन्तोदात्तं भवति । लुलाटपुरम् ।

प्राचां किम् ? शिवपुरम् ।

ललाटपुरम्—षष्ठीतत्पुरुषः ।

शिवपुरम्—इदम् उदीचां देशेऽस्ति ।

अरिष्टगौडपूर्वे च ॥१००॥

एवं पूर्वसमासे पुरे उत्तरे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् ।

उभौ षष्ठीतत्पुरुषौ । पूर्वग्रहणादत्रापि प्रवर्त्तते सूत्रम्—**अरिष्टश्रितपुरम् । गौडभृत्यपुरम् ।**

न हास्तिनफलकमार्देयाः ॥१०१॥

हास्तिन-फलक-मार्देय एतानि पुर उत्तरेऽन्तोदात्तानि न भवन्ति । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् ।

'पुरे प्राचाम्' इत्यनेन प्राप्तस्यान्तोदात्तस्य प्रतिषेधः ।

कुसूलकूपकुम्भशालं बिले ॥१०२॥

एतानि पूर्वपदानि बिलशब्द उत्तरे अन्तोदात्तानि भवन्ति । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालाबिलम् ।

एते सर्वे षष्ठीतत्पुरुषाः ।

दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥१०३॥

दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि भवन्ति, ग्रामजनपदाख्यानवाचिषूत्तरपदेषु चानराटशब्दे च । पूर्वेषुकामशमी / पूर्वेषुकामशमी । पूर्वकृष्णमृत्तिका । पूर्वचानराटम् । अपरचानराटम् ।

शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् ।

पूर्वेषुकामशमी—'दिक्संख्ये संज्ञायाम्' इति समासः । एकादेशे पक्षे स्वरितः । जनपदे **पूर्वपाञ्चालाः**, आख्याने **पूर्वाधिरामम्**, इत्युदाहरणे ।

परिग्रहार्थम्—तेन **पूर्वयायातम्** इति सिद्ध्यति ।

आचार्योपसर्जनश्चान्तेवासिनि ॥१०४॥

आचार्योपसर्जनान्तेवासिन्युपपदे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्वपा॑णिनीयाः । अपरपा॑णिनीयाः ।

आचार्योपसर्जन इति किम् ? पूर्वान्तेवासी ।

आचार्योपसर्जनः—आचार्यः उपसर्जनम्=अप्रधानं यस्य सः । अत्र सप्तम्यर्थे प्रथमा ।

एतदन्तेवासिविशेषणम् । **पूर्वपाणिनीयाः**—पाणिनेराचार्यस्य अन्तेवासिनः पाणिनीयाः पूर्वे च ते पाणिनीयाः इति 'पूर्वापर…' सूत्रेण समासः । अत्र पाणिनिराचार्योऽन्तेवासिविशेषणम् ।

उत्तरपदवृद्धौ सर्वं च ॥१०५॥

उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपा॑ञ्चालकः । अपरपा॑ञ्चालकः । 'सुसर्वार्धदिक्शब्देभ्यो जनपदस्य' इति तदन्तविधिना जनपदलक्षणो 'वुञ्' प्रत्ययः ।

सर्वपाञ्चालकः—सर्वश्चासौ पाञ्चालकः—पञ्चाल+वुञ् 'सुसर्वार्धाज्जनपदस्य' इत्युत्तरपदवृद्धिः ।

बहुव्रीहौ विश्वं संज्ञायाम् ॥१०६॥

बहुव्रीहौ विश्वशब्दः पूर्वपदं संज्ञायां विषये अन्तोदात्तो भवति । विश्वय॑शाः । विश्वम॑हान् । पूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम् ।

'बहुव्रीहौ' इत्येतदधिक्रियते प्रागव्ययीभावसंशब्दनात् ।

विश्वसब्दः√विश्+क्वन् आद्युदात्तः ।

उदराश्वेषुषु ॥१०७॥

उदर, अश्व, इषु—एषूत्तरेषु बहुव्रीहौ पूर्वपदमन्तोदात्तं भवति । दामोद॑रः । हर्य॑श्वः । महे॑षुः ।

दामोदरः—दाम उदरे यस्य सः=श्रीकृष्णः ।

क्षेपे ॥१०८॥

क्षेपे गम्ये एषूत्तरेषु बहुव्रीहौ पूर्वमन्तोदात्तं भवति । कुण्डोदरः । कटुकाश्वः । अनिघातेषुः ।

कुण्डोदरः—कुण्डमिव उदरं यस्य सः । कुण्डशब्द आद्युदात्तः । एवं कटुकानिघातावप्याद्युदात्तौ ।

नदी बन्धुनि ॥१०९॥

बन्धुशब्द उत्तरे बहुव्रीहौ नद्यन्तं पूर्वपदमन्तोदात्तम् । गार्गीबन्धुः ।

नद्यन्तम् = नदीसंज्ञान्तम् । गार्गीशब्दः ङीबन्तो नदीसंज्ञकः, ञित्स्वरेणाद्युदात्तः ।

निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥११०॥

बहुव्रीहौ निष्ठान्तमुपसर्गपूर्वपदमन्तोदात्तं भवत्यन्यतरस्याम् । प्रक्षालितपादः / प्रक्षालितपादः । प्रधौतमुखः / प्रधौतमुखः / प्रधौतमुखः । यदि मुखशब्दः स्वांगवाची तदा पक्षे 'मुखं स्वाङ्गम्' इत्युत्तरपदान्तोदात्तत्वं भवति । न चेत् पूर्वपदप्रकृतिस्वरत्वेन 'गतिरनन्तरः' इत्याद्युदात्तम् ।

प्रक्षालितपादः—पक्षे 'गतिरनन्तरः' इति प्रक्षालितशब्द आद्युदात्तः । **प्रधौतमुखः**—पूर्वपदमन्तोदात्तम्, पूर्वपदमाद्युदात्तम्, उत्तरपदमाद्युदात्तम् इति त्रीणि स्वराणि भवन्ति ।

उत्तरपदादिः ॥१११॥

यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्यादिरुदात्तो भवत्येवं तद्वेद्यम् । वक्ष्यति—'कर्णो वर्णलक्षणात्' शुक्लकर्णः । 'उत्तरपदस्य' इत्येतदापादपरिसमाप्तेः । 'आदिः' इति 'प्रकृत्या भगालम्' इति यावत् ।

'उत्तरपद' इति लुप्तषष्ठीकं पदम् 'उत्तरपदस्य' इत्यर्थः ।

कर्णो वर्णलक्षणात् ॥११२॥

वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदं बहुव्रीहौ आद्युदात्तम् । शुक्लकर्णः । लक्षणात्—दात्राकर्णः ।

वर्णम् = शुक्लादि । **लक्षणम्** = चिह्नम् ।

दात्राकर्णः—दात्रं कर्णे यस्य सः 'लक्षणस्य' इति दीर्घः । पशूनां विभागज्ञापनार्थं दात्र-शङ्कुप्रतिरूपकं चिह्नं कर्णे क्रियते, तदेव लक्षणम् ।

संज्ञौपम्ययोश्च ॥११३॥

संज्ञायामौपम्ये यो बहुव्रीहिस्तत्र कर्णशब्द उत्तरमाद्युदात्तम् । कुञ्चिकर्णः । औपम्ये—गोकर्णः ।

कुञ्चिकर्णः—कुञ्चिः कर्णे यस्य सः ।

कण्ठपृष्ठग्रीवाजङ्घं च ॥११४॥

कण्ठ, पृष्ठ, ग्रीवा, जङ्घा—इत्येतान्युत्तराणि बहुव्रीहौ संज्ञौपम्ययोराद्युदात्तानि भवन्ति । शितिकण्ठः । औपम्ये खरकण्ठः । काण्डपृष्ठः । गोपृष्ठः । सुग्रीवः । अश्वग्रीवः । नारीजङ्घः । गोजङ्घः ।

शितिकण्ठः—शितिः कण्ठो यस्य सः । **खरकण्ठः**—खरस्येव कण्ठो यस्य सः । कण्ठादय आद्युदात्ताः ।

शृङ्गमवस्थायां च ॥११५॥

शृङ्गमुत्तरपदम् अवस्थायां संज्ञौपम्ययोश्च बहुव्रीहावाद्युदात्तं भवति । उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । त्र्यङ्गुलशृङ्गः । अत्र वयोविशेषोऽवस्था । संज्ञायाम्—ऋष्यशृङ्गः । औपम्ये गोशृङ्गः ।

द्व्यङ्गुलशृङ्गः—द्वे अङ्गुली प्रमाणमस्येति द्व्यङ्गुलम् शृङ्गमस्य । **ऋष्यशृङ्गः**—तन्नामक ऋषिः ।

नञो जरमरमित्रमृताः ॥११६॥

नञः उत्तरे जर, मर, मित्र, मृत-शब्दाः बहुव्रीहा आद्युदात्ता भवन्ति । अजरः । अमरः । अमित्रः । अमृतः ।

अजरः—अविद्यमानो जरोऽस्य । जर-मरशब्दावाद्युदात्तौ, मित्र-मृतशब्दावन्तोदात्तौ बोध्यौ ।

सोर्मनसी अलोमोषसी ॥११७॥

सोरुत्तरपदं मन्नन्तमसन्तं च बहुव्रीहौ समासे आद्युदात्तं भवति, लोमोषसी वर्जयित्वा । सुकर्मा । सुशर्मा । सुयशाः । सुस्रोताः ।

मन्नन्तमसन्तं च किम् ? सुराजा । सुतक्षा ।

सुकर्मा—सु=शोभनं कर्म यस्य सः ।

सुस्रोताः—शोभनं स्रोतो यस्य सः ।

क्रत्वादयश्च ॥११८॥

क्रत्वादयः सोरुत्तरे बहुव्रीहावाद्युदात्ता भवन्ति । सुक्रतुः । सुदृशीकः ।

सुक्रतुः—सु=शोभनः क्रतुर्यस्य सः ।

आद्युदात्तं द्व्यच्छन्दसि ॥११९॥

आद्युदात्तं यद् द्व्यच्छब्दरूपं तद्बहुव्रीहौ सोरुत्तरपदमाद्युदात्तं छन्दसि । स्वश्वास्त्वा सुरथामर्जयेम । नित्स्वरेण अश्वरथ-शब्दावाद्युदात्तौ ।

आद्युदात्तमेव भवति, नत्वन्यः स्वर इति भावः ।

वीरवीर्यौ च ॥१२०॥

एतौ सोरुत्तरे बहुव्रीहौ समासे छन्दसि विषये आद्युदात्तौ भवतः । सुवीरेण ते । सुवीर्यस्य पतयः स्याम ।

वीर्यमिति यत्प्रत्ययान्तम्, तत्र 'यतोऽनावः' इति आद्युदात्तत्वं न भवतीत्येतदेव वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ।

वीर्यम्—√वीर् विक्रान्तौ + यत् अथवा वीरे साधुः इति वीर + यत् ।

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥१२१॥

कूलादीन्युत्तरपदानि अव्ययीभावे समासे आद्युदात्तानि भवन्ति । उपकूलम् । उपतीरम् । परितूलम् । उपमूलम् । उपशालम् । पर्यक्षम् । सुषमम् । निःषमम् । दुःषमम् । तिष्ठद्गुप्रभृतिष्वेते पठ्यन्ते ।

उपकूलम्—कूलस्य समीपम् । **सुषमम्**—सु समम् 'सुषामादिषु च' इति सकारस्य षकारः । तस्यासिद्धत्वात् 'सम' शब्द एवेति आद्युदात्तत्वं सिद्धयति ।

कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥१२२॥

कंसादीन्युत्तरपदानि द्विगौ समासे आद्युदात्तानि भवन्ति । द्विकंसः । त्रिमन्थः । द्विशूर्पः । त्रिपाय्यम् । द्विकाण्डम् ।

द्विकंसः—द्वाभ्यां कंसाभ्यां क्रीतः इति द्विकंस + टिठन्, तस्य लुक् । **द्विपाय्यम्**—पाय्यशब्दः परिमाणविशेषे निपातितः । **द्विकाण्डम्**—द्वे काण्डे प्रमाणमस्य द्विकाण्ड + मात्रच्, तस्य लुक् ।

तत्पुरुषे शालायां नपुंसके ॥१२३॥

शालान्ते तत्पुरुषे समासे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तं

भवति । ब्राह्मणशालम् । क्षत्रियशालम् । 'विभाषासेना......' इति नपुंसकलिङ्गता ।

तत्पुरुष इति किम् ?

दृढशालं ब्राह्मणकुलम् ।

शालायां किम् ? ब्राह्मणसेनम् ।

नपुंसक इति किम् ? ब्राह्मणशाला ।

दृढशालम्— दृढाशाला यस्य तद् (बहुव्रीहिः) अत्र पूर्वपदप्रकृतिस्वर एव भवति । दृढशब्दो निष्ठान्तत्वादन्तोदात्तः ।

कन्था च ॥१२४॥

कन्थाशब्द उत्तरपदमाद्युदात्तं भवति तत्पुरुषे नपुंसकलिङ्गे । सौशमिकन्थम् । आह्वरकन्थम् । 'संज्ञायां कन्थोशीनरेषु' इति नपुंसकलिङ्गता । षष्ठीसमासा एते ।

सौशमिकन्थम्—शोभनः शमोऽस्य सुषमः, तस्यापत्यं सौषमिः; तस्य कन्था । **आह्वः**—आ√ह्वेञ्+क तस्य कन्था ।

आदिश्चिहणादीनाम् ॥१२५॥

कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तो भवति । चिहणकन्थम् । मर्डरकन्थम् इत्यादि । पुनरादिग्रहणं पूर्वपदस्याद्युदात्तार्थम् ।

चिहणकन्थम्—चित्+हनः निपातनात्तलोपो नकारस्य च णकारः= चिहणः तस्य कन्था ।

चेलखेटकटुककाण्डं गर्हायाम् ॥१२६॥

चेलादीन्युत्तराणि गर्हायामाद्युदात्तानि भवन्ति । पुत्रचेलम् । भार्याचेलम् । उपानत्खेटम् । उदश्वित्कटुकम् । चेलादिसादृश्येन पुत्रादीनां गर्हा ।

पुत्रचेलम्—**चेलम्**=वस्त्रम् चेलवत्तुच्छमित्यर्थः । यथा चेलम् अकुलीनेन तन्तुवायेन जन्यते तथैवायम् अकुलीनजः पुत्रः । **खेटः**=तृणविशेषः। **कटुकम्**=अस्वादु । भूतकाण्डम् इत्यप्युदाहरणम् । **काण्डम्**=शरविशेषः । उपमितं व्याघ्रादिभिः''''' इति सर्वत्र समासः ।

चीरमुपमानम् ॥१२७॥

चीरमुत्तरपदमुपमानवाचि तत्पुरुषे आद्युदात्तम् । वस्त्रं चीरमिव वस्त्रचीरम् । पटचीरम् ।

वस्त्रचीरम्—उपमितसमासः ।

पललसूपशाकं मिश्रे ॥१२८॥

एतान्युत्तराणि मिश्रवाचितत्पुरुषे आद्युदात्तानि भवन्ति । घृतपललम् । घृतसूपः । घृतशाकम् । 'भक्ष्येण मिश्रीकरणम्' इति समासः ।

घृतपललम्—घृतेन मिश्रं पललम् ।

कूलसूदस्थलकर्षाः संज्ञायाम् ॥१२९॥

एतान्युत्तराणि तत्पुरुषे समासे संज्ञायामाद्युदात्तानि भवन्ति । दाक्षिकूलम् । देवसूदम् । माहकिस्थली । माहकिकर्षः ।

माहकिस्थली—स्थलग्रहणेन लिङ्गविशिष्टपरिभाषया स्थलीशब्दोऽपि गृह्यते । दाक्षिकूलादीनि ग्रामनामानि ।

अकर्मधारये राज्यम् ॥१३०॥

कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरमाद्युदात्तं भवति । ब्राह्मणराज्यम् ।

अकर्मधारय इति किम्? परमराज्यम् । चेलराज्यादिस्वरादव्ययस्वरो भवति 'पूर्वविप्रतिषेधेन ।

पूर्वविप्रतिषेधेन—उदाहरणं **कुचैलम्** इति ।

वर्ग्यादयश्च ॥१३१॥

वर्ग्यादीन्युत्तराणि तत्पुरुषेऽकर्मधारये आद्युदात्तानि । वासुदेववर्ग्यः । वासुदेवपक्ष्यः ।

वासुदेववर्ग्यः—वर्गे भवः वर्ग्यः वर्ग+यत् । वासुदेवस्य वर्ग्यः ।

पुत्रः पुम्भ्यः ॥१३२॥

पुंशब्देभ्यः उत्तरपदं पुत्रशब्दस्तत्पुरुषे समासे आद्युदात्तो भवति । कौनटिपुत्रः । दाशकिपुत्रः ।

पुम्भः किम् ? दाक्षीपुत्रः ।

पुंशब्देभ्यः—पुंलिङ्गशब्देभ्यः ।

नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥१३३॥

एतदाख्येभ्य उत्तरपदं पुत्रशब्दो नाद्युदात्तः ।

आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणम् ।

संयुक्ताः = स्त्रीसम्बन्धिनः श्यालादयः । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः ।

पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्तत्वमेव भवति ।

पर्यायाणाम्—स्वरूपस्य चापि बोध्यम् । राजा—ईश्वरः । **ज्ञातयः**—मातृपितृसम्बन्धिनो बान्धवाः । **उपाध्यायपुत्रः**, **शाकटायनपुत्रः** इतीमे पर्यायस्य, विशेषस्य च ग्रहणादुदाहरणे । **संयुक्तपुत्रः**, '**सम्बन्धिपुत्रः**—इति संयुक्ताख्यस्योदाहरणेऽपि ज्ञेये ।

चूर्णादीन्यप्राणिषष्ठ्याः ॥१३४॥

एतान्युत्तराणि तत्पुरुषे अप्राणिवाचिनः षष्ठ्यन्तात्पराण्याद्युदात्तानि भवन्ति । मुद्गचूर्णम् ।

अप्राणिषष्ठ्या इति किम् ? मत्स्यचूर्णम् । चूर्ण, करिप इत्यादि ।

मुद्गचूर्णम्—मुद्गस्य चूर्णमिति षष्ठीसमासः । **चूर्णादीन्यप्राण्युपग्रहात्** इति सूत्रस्य पाठान्तरम् । तत्र उपग्रहः—षष्ठ्यन्तम् इति पूर्वाचार्याणामुपचारः ।

षट् च काण्डादीनि ॥१३५॥

षट् पूर्वाणि काण्डादीन्यप्राणिषष्ठ्या उत्तराणि आद्युदात्तानि भवन्ति । 'काण्डं गर्हायाम्' इति पूर्वोक्तम्, अगर्हायामप्यनेन भवति । दर्भकाण्डम् ।

दर्भचीरम् इत्यनुपमानमपि भवति ।

अमिश्रेऽपि भवति । तिलपललम् ।

असंज्ञायामपि भवति । नदीकूलम् ।

षडिति किम् ? राजसूदः ।

षट् पूर्वाणि—'चेलखेट ... काण्डम्' इत्यस्य काण्डादारभ्य 'कूलसूद ... संज्ञायाम्' इत्यस्य कूलान्तानि काण्ड, चीर, पल, सूप, शाक, कूल एतानि गृह्यन्ते । **मुद्गसूपः । मूलकशाकम्** । इत्युदाहरणद्वयमपि बोध्यम् ।

कुण्डं वनम् ॥१३६॥

'कुण्डम्' इत्येतदुत्तरं वनवाचिनि तत्पुरुषे आद्युदात्तं भवति । दर्भकुण्डम् ।

वनमिति किम् ? मृत्कुण्डम् ।

दर्भकुण्डम्—कुण्डशब्दोऽत्र कुण्डसादृश्येन वने वर्तते । यथा कुण्डम् उदकस्याश्रयस्तथा वनं दर्भाश्रयः ।

प्रकृत्या भगालम् ॥१३७॥

भगालवाचि यदुत्तरं तत्पुरुषे समासे प्रकृतिस्वरम् ।

कुम्भीभगालम् । कुम्भीनदालम् । कुम्भीकपालम् । भगालादयो मध्योदात्ताः । 'प्रकृत्या' इत्येतदधिकृतम् 'अन्तः' इति यावद् वेदितव्यम् ।

भगालवाचि—सूत्रे भगालम् इति भगालार्थकम् तथैव व्याख्यानात् ।

शितेर्नित्याबह्वज् बहुव्रीहावभसत् ॥१३८॥

शितेरुत्तरपदं नित्यं यद् अबह्वच्कमुत्तरपदं भसच्छब्दवर्जितं बहुव्रीहौ तत्प्रकृतिस्वरं भवति । शितिपादः । शित्यंसः । शित्योष्ठः ।

पादशब्दो वृषादित्वादाद्युदात्तः । अंसौष्ठशब्दौ प्रत्ययस्य नित्वादाद्युदात्तौ ।

'अभसत्' इति किम् ? शितिभसत् ।

शितिपादः—शिती = श्वेतौ कृष्णौ वा पादौ यस्य सः पक्षिविशेषः, शितयः पादाः यस्य सः पशुः वा ।

गतिकारकोपपदात्कृत् ॥१३९॥

गतेः कारकादुपपदाच्च कृदन्तमुत्तरपदं तत्पुरुषे प्रकृतिस्वरं भवति । गतेः—प्रकारकः । प्रकरणम् । कारकात्—इध्मप्रव्रश्चनः । उपपदात्—ईषत्करः । लित्स्वरः ।

लित्स्वरः—प्रत्ययात् पूर्वमुदात्तम् । **प्रकारकः**—प्र√कृ + ण्वुल् । **प्रकरणम्**—प्र√कृ + ल्युट् । **इध्मप्रव्रश्चनः**—इध्म प्र√वृश्च + ल्युट् । **ईषत्करः**—ईषत्√कृ + खल् । इति सर्वे प्रत्यया लितः ।

उभे वनस्पत्यादिषु युगपत् ॥१४०॥

उभे पूर्वोत्तरपदे वनस्पत्यादिषु युगपत् प्रकृतिस्वरे भवतः । वनस्पतिः । वन-पतिशब्दावाद्युदात्तौ ।

बृहस्पतिः । बृहच्छब्दोऽन्तोदात्तः । तस्य केचिदत्रैवाद्युदात्तत्वं निपातयन्ति ।

वनस्पतिः—वनस्य पतिः, पारस्कर प्रभृतित्वात् सुट् । **बृहस्पतिः**—बृहतां पतिः, 'तद्बृहतोः…… सुट् तलोपश्च' इति सुट्, तकारलोपश्च ।

देवताद्वन्द्वे च ॥१४१॥

देवतावाचिनां यो द्वन्द्वस्तत्र युगपदुभे प्रकृतिस्वरे भवतः । इन्द्रासोमौ । इन्द्रावरुणौ ।

इन्द्रासोमौ—इन्द्रश्च, सोमश्च, 'देवताद्वन्द्वे च' इति पूर्वपदस्य 'इन्द्र' इत्यस्य 'आनङ्' । इन्द्र-सोम-वरुणाः आद्युदात्ताः ।

नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥१४२॥

उत्तरपदेऽनुदात्तादौ पृथिव्यादिवर्जिते देवताद्वन्द्वे नोभे युगपत् प्रकृतिस्वरे भवतः । इन्द्राग्नी । इन्द्रवायू । अग्निवायुशब्दावन्तोदात्तौ ।

अपृथिव्यादिष्विति किम् ? द्यावापृथिव्यौ । 'द्यावा' शब्द आद्युदात्तो निपातितः ।

अग्नि…अन्तोदात्तौ—'अनुदात्तम् पदमेकवर्जम्' इति शेषोऽनुदात्तः । तेनेमौ अनुदात्तादौ भवतः । **द्यावापृथिव्यौ—सोमारुद्रौ, इन्द्रापूषणौ, शुक्रामन्थिनौ** इत्यप्युदाहरणानि । एषु युगपत् प्रकृतिस्वरौ भवतः ।

अन्तः ॥१४३॥

'अन्तः' इत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र समासस्योत्तरपदस्यान्त उदात्तो भवतीत्येवं तद्वेद्यम् । वक्ष्यति—'थाथघञ्……' इत्यादि । सुनीथः ।

सुनीथः—सु √ नी + क्थन् । क्वचित्समासस्यान्त उदात्तो भवति, क्वचिदुत्तरपदस्येति विषयविभागः वक्ष्यमाणसूत्रेषु स्फुटितो भविष्यति ।

थाथघञ्क्ताजबित्रकाणाम् ॥१४४॥

थ, अथ, घञ्, क्त, अच्, अप्, इत्र, क—एवमन्ता-

नामुत्तरपदानां गतिकारकोपपदात्परेषामन्त उदात्तो भवति। सुनीथः। अवभृथः। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' 'अवे भृञः' इति क्थन् प्रत्ययान्ताविमौ। तत्र कृदुत्तरपदप्रकृतिस्वर-त्वेनाद्युदात्तमुत्तरपदं स्यात्।

अथ—आवसथः। 'उपसर्गे वसेः' इति अथन् प्रत्ययः।

घञ्—प्रभेदः। काष्ठभेदः। क्त—दूरादागतः।

अच्—प्रक्षयः। अप्—प्रसवः।

इत्र—प्रलवित्रम्। प्रसवित्रम्। क—गोवृषः। खरीवृषः। गां वर्षति, खरीं वर्षति इति मूलविभुजादित्वात् 'क' प्रत्ययः।

गतिकारकोपपदादित्येव, नेह—सुस्तुतं भवता। अतिस्तुतम्। कर्मप्रवचनीयत्वेनाव्ययस्वर एव भवति।

दूरादागतः—दूरात्+आगतः (आ√गम् + क्त) समासे पञ्चम्या अलुक्।

प्रक्षयः—प्र√क्षि + अच्। 'क्षयो निवासे' इत्यनेन क्षयशब्द आद्युदात्तः।

प्रलवः—'ॠदोरप्' इति सूत्रेण प्र√लू + अप्।

प्रलवित्रम्—'अर्तिलू....' इत्यादिना प्र√लू + इत्र।

सुस्तुतम्—'सुः पूजायाम्' इत्यनेन सोः कर्मप्रवचनीयसंज्ञा। 'स्वती पूजायाम्' इति प्रादिसमासः तत्पुरुषः।

सूपमानात्क्तः ॥१४५॥

'सु' एतस्मादुपमानाच्च परं क्तान्तमुत्तरम् अन्तोदात्तम्। सुकृतम्। सुभुक्तम्। उपमानात्—वृकावलुप्तम्। शशप्लुतम्। सुशब्दाद् 'गतिरनन्तरः' इति प्राप्ते उपमानादपि 'तृतीया कर्मणि' इत्ययमपवादः।

वृकावलुप्तम्—वृकैरिवावलुप्तम् । **शशप्लुतम्**—शशेनेव प्लुतम् इति 'कर्तृकरणे कृता बहुलम्' इति समासः ।

संज्ञायामनाचितादीनाम् ॥१४६॥

गत्याद्युपपदात्संज्ञायां क्तान्तमुत्तरमन्तोदात्तम् आचितादीन् विना । उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः।

'गतिरनन्तरः' इत्यत्र 'कर्मणि' इत्यनुवर्तते तद्बाधनार्थं चेदम् ।

अनाचितादीनां किम् ? आचितम् । पर्याचितम् ।

उपहूत—उप√ह्वेञ् + क्त (कर्मणि), **परिजग्धः**—परि√अद् + क्त।

तद्बाधनार्थम्—यदि कर्मणि 'क्त' प्रत्ययो विहितस्तदा 'गतिरनन्तरः' इत्येतद् बाधित्वेदमेव भवति ।

प्रवृद्धादीनां च ॥१४७॥

एषां च क्तान्तमुत्तरपदमन्तोदात्तं भवति । प्रवृद्धं यानम् । प्रयुक्ताः सक्तवः ।

असंज्ञार्थ आरम्भः । आकृतिगणोऽयम् ।

प्रवृद्धम्—प्र√वृध् + क्त । **प्रयुक्ताः**—प्र√युज् + क्त ।

कारकाद्दत्तश्रुतयोरेवाशिषि ॥१४८॥

संज्ञायामाशीर्विषये क्तान्तयोः कारकादुत्तरपदयोः दत्तश्रुतयोरेवान्त उदात्तः । देवा एनं देयासुर्देवदत्तः । विष्णुरेनं श्रूयात् विष्णुश्रुतः ।

देवदत्तः—देवा एनं देयासुरिति प्रार्थितैर्देवैर्दत्तः 'आशिषि लिङ्लोटौ' इति वर्तमाने 'क्तिच्क्तौ च संज्ञायाम्' इत्यनेन√दा + क्त । **विष्णुश्रुतः**—√श्रु + क्त । कारकादेव नियमो न गतेः, तेनात्राप्यन्तोदात्तत्वं 'संज्ञायामनाचितादीनाम्' इत्यनेन भवत्येव ।

इत्थम्भूतेन कृतमिति च ॥१४६॥

इत्थंभूत: = इत्थम्प्रकारमापन्नः । अत्रार्थे यः समासस्तत्र श्तान्तमुत्तरमन्तोदात्तं भवति । सुप्तप्रलपितम् । उन्मत्तप्रलपितम् । 'तृतीया कर्मणि' इत्यस्यायमपवादः ।

कृतम्--इदम् पदमत्र क्रियासामान्यवाचकम् । प्रलपिताद्यपि क्रिया-सामान्यमस्त्येव । **सुप्तप्रलपितम्**--पूर्वं सुप्तावस्थाम् आपन्नः = प्राप्तः तेन प्रलपितम् ।

अनो भावकर्मवचनः ॥१५०॥

अन्प्रत्ययान्तमुत्तरपदं भावकर्मवचनं कारकादन्तोदात्तं भवति । भाववचनम्—ओदनभोजनं सुखम् । पयःपानं सुखम् । कर्मवचनम्—राजभोजनाः शालयः ।

'कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम्' इत्ययं योग उभयथा वर्ण्यते । कर्मण्युपपदे भावे ल्युट्, कर्मण्यभिधेये च ल्युट् । तत्र पूर्वस्मिन् सूत्रार्थे भाववचनान्युदाहरणानि, उत्तरत्र कर्मवचनानि । नेह—दन्तधावनम् । करणे ल्युट् ।

ओदनभोजनम्, पयः पानम्--उभयत्रापि भोजने पाने च भावे ल्युट् । कर्मणि षष्ठी, ओदनस्य भोजनम्, पयसः पानम् इति षष्ठीतत्पुरुषः । **राजभोजनाः**--अत्र भोजने कर्मणि ल्युट्, कर्तरि षष्ठी । राज्ञां भोजनाः इति । सर्वत्र 'कर्मणि ¨ सुखम्' इत्येकेनैव सूत्रेण समासः ।

मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥१५१॥

मन्नन्तम्, क्तिन्नन्तम्, व्याख्यान, शयन, आसन, स्थान, याजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति । मन्—रथवर्त्म । क्तिन्—पाणिनिकृतिः । व्याख्यान—छन्दोव्याख्यानम् । शयन—ब्राह्मणशयनम् । आसन—राजासनम् । स्थान—राजस्थानम् । याजकादि—राजयाजकः । द्विजपूजकः । 'याजकादिभिश्च' इत्यत्रोक्ता ज्ञेयाः । गोक्रीतः ।

व्याख्यानशयनासनस्थानानामभाव-कर्मार्थं वचनम् ।

रथवर्म—रथस्य वर्म, √वृतु (वर्तने) + मनिन् । 'रथवर्म' इत्यादयः 'द्विजपूजकः' इत्यन्ताः षष्ठीतत्पुरुषसमासा ज्ञेयाः । **गोक्रीतः**—गोभिः क्रीतः 'कर्तृकरणे कृता⋯' इति समासः । **याजकादिभिश्च⋯ ज्ञेयाः**—'याजकादिभिश्च' इत्यत्र षष्ठीसमासार्थं ये शब्दाः पठितास्तेऽत्र गृह्यन्ते इति भावः ।

वचनम्—भावकर्मणोस्तु 'अनो भावकर्मवचनः' इत्यनेनैव सिद्धमिति तात्पर्यम् ।

सप्तम्याः पुण्यम् ॥१५२॥

सप्तम्यन्तादुत्तरं पुण्यमन्तोदात्तं भवति । अध्ययने पुण्यम् इति अध्ययनपुण्यम् । वेदपुण्यम् । 'सप्तमी' इति योगविभागात् समासः । 'तत्पुरुषे तुल्यार्थ⋯⋯' इति पूर्वपदप्रकृतिस्वरत्वं प्राप्तम् ।

'सप्तमी' ' समासः—'सप्तमी शौण्डैः' इति सूत्रे ।

ऊनार्थकलहं तृतीयायाः ॥१५३॥

ऊनार्थः कलहशब्दश्चोत्तरं तृतीयायामन्तोदात्तम् । माषोनम् । माषविकलम् । असिकलहः ।

तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः ।

माषोनम्—माषेण ऊनम् । 'पूर्वसदृश श्लक्ष्णैः' इति सूत्रेण तृतीयातत्पुरुषः । केचिदाचार्याः 'ऊनार्थं' इति पदस्य ऊन, अर्थ इति पृथक् पदद्वयं मन्यन्ते । तेषां मते 'धान्येनार्थः धान्यार्थः' इत्यस्यापि संग्रहो भवति ।

मिश्रं चानुपसर्गमसन्धौ ॥१५४॥

मिश्रमेतदुत्तरपदम् अनुपसर्गमसन्धौ तृतीयान्तात्परमन्तोदात्तं भवति । गुडमिश्राः । तिलमिश्राः ।

असन्धाविति किम् ? द्विजमिश्रो राजा । द्विजैः सह संहितः = ऐकार्थ्यमापन्नः ।

गुडमिश्राः—गुडेन मिश्राः । 'पूर्वसदृश…' इति सूत्रेण समासः । अनुपसर्गमिति किम् ? गुडसंम्मिश्राः ।

ऐकार्थ्यमापन्नः—एकः अर्थः यस्य सः एकार्थः, तस्य भावः ऐकार्थ्यम् तदापन्नः = प्राप्तः । अत्र सन्धिः **पणबन्धः** = परिभाषणम् यदि भवानिदं कुर्यात्तदाऽहमपि भवतः इदं करिष्याम्येतद्रूपम् ।

नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः ।।१५५।।

सम्पादि, अर्ह, हित, अलम् इत्येतदर्था ये तद्धितास्तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे वर्तमानादन्तोदात्तानि भवन्ति । सम्पादिनि—कण्ठवेष्टकाभ्यां सम्पादि मुखं काण्ठवेष्टकिकम्, न काण्ठवेष्टकिकम् अकाण्ठवेष्टकिकम् । अर्हे—अच्छैदिकः । हित—अवत्सीयः । अलमर्थाः—सन्तापाय प्रभवति सान्तापिकः, न सान्तापिकः असान्तापिकः ।

'गुण' इति तद्धितार्थं प्रवृत्तिनिमित्तं सम्पादित्वाद्युच्यते ।

अकाण्ठवेष्टकिकम्—वृत्तौ कण्ठस्थाने कर्णशब्दप्रयोगः । **सम्पादि** = शोभितम् । न सम्पादि न शोभितम् । **छैदिकः**—छेदमर्हति छेद + ठक् । **वत्सीयः**—वत्सेभ्यो हितः वत्स + छ । तदनन्तरम् उभयत्र नञ्समासः । तद्धितप्रत्ययस्य प्रवृत्तिनिमित्तं सम्पादित्वादि यथा कण्ठवेष्टकाभ्यां सम्पादि तदेवात्र 'गुणः' इति स्वीक्रियते, तस्य यत्र प्रतिषेधो भवति स गुणप्रतिषेधः ।

ययतोश्चातदर्थे ।।१५६।।

अतदर्थयोरेतयोरुत्तरयोर्नञो गुण-प्रतिषेधविषयादन्त उदात्तः । अपाश्या । अकुण्ठ्यम् ।

अतदर्थयोः—तस्मै अर्थः तदर्थः, न तदर्थः अतदर्थः तयोः । तदर्थे य—यत् प्रत्ययौ भवतः । यथा पादार्थमुदकं पाद्यम्, न पाद्यम् अपाद्यम् । अत्र

नान्तोदात्तत्वम्। **अपाश्या**—पाशानां समूहः इति 'पाशादिभ्यो यः' इत्यनेन पाश+य तद्भिन्नम्। स्त्रियां टाप्।

अकण्ठ्यम्—न कण्ठ+यत्। उभयत्र नञ् समासः।

अच्कावशक्तौ ॥१५७॥

अच्, क—एतदन्त उत्तरे नञः परमन्तोदात्तमशक्तौ। अपचः। यः पक्तुं न शक्नोति। अविलिखः। यो विलेखितुं न शक्नोति।

अपचः—न√पच् + अच्। **अविलिखः**—न वि√लिख् + क। उभयत्र नञ् समासः।

आक्रोशे च ॥१५८॥

नञ उत्तरावचकावन्तोदात्तौ भवतः आक्रोशे गम्ये। अपचोऽयं जाल्मः। अविलिखः।

पक्तुं, शक्तोऽपि यो न पचति य एवम् आक्रुश्यते जनैः। लोभोऽत्र गम्यते नत्वशक्तिः। **आक्रोशः** = दोषवचनम्।

संज्ञायाम् ॥१५९॥

आक्रोशे गम्ये नञ उत्तरपदं संज्ञायामन्तोदात्तं भवति। अदेवदत्तः। अयज्ञदत्तः। अविष्णुमित्रः।

अदेवदत्तः—यो देवदत्तः सन् तत्कार्यं न करोति स एवमाक्रुश्यते।

कृत्योकेष्णुच्चार्वादयश्च ॥१६०॥

कृत्य, उक, इष्णुच्—इत्येतदन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता भवन्ति। अकर्त्तव्यम्। अनागामुकम्। अनलङ्करिष्णुः। अचारुः। असाधुः।

अकर्त्तव्यम्—नञ्√कृ + तव्यत्। **अनागामुकम्**—न√गम् + उकञ्। **अनलङ्करिष्णुः**—नञ् अलम्√कृ + इष्णुच्। सर्वत्र नञ् समासः।

राजाह्नोश्छन्दसि ॥१६०॥ (क)

एतयोर्नञ उत्तरयोरन्तोदात्तं भवति । अराजा । अनहः । भाषायां नञ्स्वर एव भवति ।

वृत्तौ वार्तिकरूपमेवेदं चार्वादिगणे पठ्यते न पृथक् सूत्रमस्ति ।

विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥१६१॥

तृन्, अन्न, तीक्ष्ण, शुचि—इत्येतेषु नञ उत्तरेषु विभाषाऽन्तोदात्तम् । अकर्त्ता / अकर्त्ता । अनन्नम् / अनन्नम् । अतीक्ष्णम् / अतीक्ष्णम् । अशुचि / अशुचि । पक्षेऽव्ययस्वरः ।

अकर्त्ता—नञ्√कृ+तृन् (ताच्छीलिकः) नञ् समासः सर्वत्र ।

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥१६२॥

बहुव्रीहौ समासे इदम्, एतद्, तद्—एभ्यः उत्तरस्य प्रथमशब्दस्य, पूरणप्रत्ययान्तस्य च क्रियागणने वर्त्तमानस्यान्त उदात्तो भवति । इदम् प्रथमं गमनम् आगमनं वा यस्य स इदम्प्रथमः । इदंद्वितीयः । एतत्प्रथमः । एतद्द्वितीयः । तत्प्रथमः । तद्द्वितीयः ।

बहुव्रीहाविदम्......' एतद्वचनम् 'वनं समासे' प्रागेतस्मादधिकृतं वेदितव्यम् ।

पूरणप्रत्ययान्तस्य—'तस्य पूरणे डट्' इत्यधिकृत्य ये प्रत्ययाः विहितास्तेषां ग्रहणं भवति ।

संख्यायाः स्तनः ॥१६३॥

संख्यायाः परः स्तनशब्दो बहुव्रीहावन्तोदात्तो भवति द्विस्तना । त्रिस्तना ।

द्विस्तना—द्वौ स्तनौ यस्याः सा ।

विभाषा छन्दसि ॥१६४॥

बहुव्रीहौ संख्यायाः परः स्तनशब्दो विभाषाऽन्तोदात्तो भवति । द्विस्तनां कुर्याद्वामदेवः । द्विस्तनां करोति द्यावापृथिव्योर्दोहाय ।

विभाषान्तोदात्तः—पक्षे यथाविहितं स्वरो भवति ।

संज्ञायां मित्राजिनयोः ॥१६५॥

संज्ञायां बहुव्रीहौ एतयोरन्त उदात्तो भवति । देवमित्रः । ब्रह्ममित्रः ।

वृकाजिनः । कृष्णाजिनः । इत्यप्युदाहरणे बोध्ये ।

❀(वा०) **ऋषिप्रतिषेधो मित्रे** । विश्वामित्रः ।

व्यवायिनोऽन्तरम् ॥१६६॥

व्यवायी = व्यवधाता, तद्वाचिनः परमन्तरं बहुव्रीहावन्तोदात्तं भवति । पटन्तरः । कंबलान्तरः ।

व्यवायिन इति किम् ? आत्मान्तरः । आत्मा = स्वभावः अन्तरः = अन्यः यस्य सः ।

व्यवधाता = व्यवधानकर्त्ता । **पटान्तरः**—पटः अन्तरम् = व्यवधायकं यस्य सः **अन्तरम्**—अन्तराम् = व्यवधानं करोति इति अन्तरा + णिच् + अच् ।

मुखं स्वाङ्गम् ॥१६७॥

मुखमुत्तरपदं स्वाङ्गवाचि बहुव्रीहावन्तोदात्तं भवति । गौरमुखः । भद्रमुखः ।

स्वाङ्गम् अद्रवादिलक्षणमिह गृह्यते ।

गौरमुखः—गौरं मुखं यस्य सः । **अद्रवादिलक्षणम्**—अद्रवं मूर्त्तिमत्स्वाङ्गम् इति लक्षणं वर्त्तते ।

नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥१६८॥

अव्ययादिभ्यः परं स्वाङ्गं मुखं बहुव्रीहावन्तोदात्तं न भवति। अव्यय — उच्चैर्मुखः। नीचैर्मुखः। दिक्शब्द — प्राङ्मुखः। गो — गोमुखः। महत् — महामुखः। स्थूल — स्थूलमुखः। मुष्टि—मुष्टिमुखः। पृथु—पृथुमुखः। वत्स—वत्समुखः।

पूर्वपदप्रकृतिस्वरो यथायोगमेतेषु भवति। गो — मुष्टि—वत्स पूर्वपदस्योपमानलक्षणोऽपि विकल्पः पूर्वप्रतिषेधेन बाध्यते।

उच्चैर्मुखः—उच्चैः=उन्नतं मुखं यस्य सः। 'उच्चैः' अन्तोदात्तो निपात्यते। **गोमुखः**—गौर्मुखमिव यस्य गौरत्रोपमेयम् नोपमानम्। एवं मुष्टिर्मुखमिव यस्य, वत्सो मुखमिव यस्येति विग्रहो बोध्यः।

निष्ठोपमानादन्यतरस्याम् ॥१६९॥

निष्ठान्तादुपमानवाचिनः परं मुखं स्वांगमुत्तरपदम् अन्यतरस्यामन्तोदात्तं भवति बहुव्रीहौ। प्रक्षालितमुखः। यदैतदुत्तरपदान्तोदात्तत्वं न भवति तदा 'निष्ठोपसर्गपूर्वमन्यतरस्याम्' इति पक्षे पूर्वपदान्तोदात्तत्वम् प्रक्षालितमुखः। तदभावपक्षेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरो भवति प्रक्षालितमुखः। इति त्रीण्युदाहरणानि भवन्ति। उपमानात्—सिंहमुखः / सिंहमुखः।

प्रक्षालितमुखः—प्रक्षालितं मुखं येन, सः। निष्ठान्तस्योदाहरणम्। **सिंहमुखः**—सिंहस्य मुखमिव मुखं यस्य सः। सिंहव्याघ्रौ अन्तोदात्तौ।

जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ॥१७०॥

जातिवाचिन आच्छादन-वर्जितात् कालवाचिनः सुखादिभ्यश्च परं क्तान्तं कृत-मित-प्रतिपन्नान् वर्जयित्वा बहुव्रीहावन्तोदात्तं भवति। जाति — पलाण्डुभक्षितः। सुरापीतः।

काल — मासजातः। संवत्सरजातः।

सुखादिभ्यः—सुखायातः । दुःखायातः ।

पलाण्डुभक्षितः—पलाण्डु भक्षितं येन सः । **सुखायातः**—वृत्तौ तु **सुखजातः** इति वर्तते ।

वा जाते ॥१७१॥

जातशब्द उत्तरपदे वाऽन्तोदात्तो भवति जातिकालसुखादिभ्यः । जातेः—दन्तजातः / दन्तजातः । स्तनजातः / स्तनजातः । कालात्—मासजातः / मासजातः । सुखादिभ्यः—सुखजातः / सुखजातः । दुःखजातः / दुःखजातः ।

जातशब्दोऽपि क्तान्त इति पूर्वेण नित्यं प्राप्तम् अन्तोदात्तत्वमनेन विकल्प्यते । पक्षे यथायोगं स्वरः ।

नञ्सुभ्याम् ॥१७२॥

आभ्यां बहुव्रीहावुत्तरपदमन्तोदात्तं भवति । अयवो देशः । अव्रीहिः । सुयवः । सुव्रीहिः ।

अयवः—अविद्यमानो यवो यस्मिन् स देशः ।

सुयवः—सु—शोभना यवा यस्मिन् सः ।

कपि पूर्वम् ॥१७३॥

नञ्सुभ्यां कपि परतः पूर्वमुदात्तं भवति । अकुमारीको देशः । अवृषलीको देशः ।

एवं **सुकुमारीकः** । **सुवृषलीकः**—इत्यप्युदाहरणे स्तः ।

ह्रस्वान्तेऽन्त्यात्पूर्वम् ॥१७४॥

ह्रस्वोऽन्तो यस्य तदिदं ह्रस्वान्तमुत्तरपदं समासो वा, कपि ह्रस्वान्ते तत्रान्त्यात्पूर्वमुदात्तं भवति नञ्सुभ्याम् । अयवको देशः । अव्रीहिकः । अमाषकः ।

अयवकः—अत्र कपि परतः 'यव' इत्येतद् ह्रस्वान्तमुत्तरपदम्, 'अयव' इति समासोऽपि ह्रस्वान्तः। तथाऽत्रान्त्याद्वकारात्पूर्वो यकाराकार उदात्तः।

बहोर्नञ्वदुत्तरपदभूम्नि ॥१७५॥

उत्तरपदार्थ-बहुत्वे यो बहुशब्दो वर्तते तस्मान्नञ इव स्वरो भवति। 'नञ्सुभ्याम्' इत्युक्तम्। बहोरपि तथा भवति। बहुकुमारीको देशः। बहुव्रीहिः।

उत्तरपदभूम्नि—बहोर्भावः भूमा, उत्तरपदस्य भूमा तस्मिन्। **बहुकुमारीकः**—बह्व्यः कुमार्यः यस्मिन् (देशे) सः। एवं 'नञो जरमर-मित्र-मृताः' इत्युक्तम्, बहोरपि तथा। बहुजरो देशः। **बहुमित्रः** इत्यादि।

न गुणादयोऽवयवाः ॥१७६॥

अवयववाचिनो बहोरुत्तरे गुणादयो बहुव्रीहौ नान्तोदात्ता भवन्ति। बहुगुणा रज्जुः। बह्वक्षरं पदम्। गुणादिराकृतिगणः।

बहुगुणा—बहवो गुणाः = अवयवाः यस्यां सा। बहुगुण+टाप्। गुणशब्द आद्युदात्तः।

उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥१७७॥

उपसर्गादुत्तरं स्वाङ्गं ध्रुवं पर्शुवर्जमन्तोदात्तं भवति। प्रपृष्ठः। प्रोदरः। प्रललाटः। 'ध्रुवम्' इत्येकरूपमुच्यते, ध्रुवमस्य शीलम्। सततं यस्य प्रगतम् = प्र — ध्रुवं गतं पृष्ठं भवति स प्रपृष्ठः।

ध्रुवमिति किम्? उद्बाहुः।

अपर्शु किम्? उत्पर्शुः।

स्वाङ्गम् ध्रुवम्—एकरूपम्। **उद्बाहुः**—उद्गतौ बाहू यस्य सः। न कोऽपि नित्यमुद्बाहुर्भवति। **पर्शुः** = पार्श्वम्।

वनं समासे ॥१७८॥

समासमात्रे 'वनम्' इत्येतदुपसर्गादन्तोदात्तं भवति । प्रवणे यष्टव्यम् । निर्वणेऽधीयते । 'प्रणिरन्त' इति णत्वम् ।

प्रवणे—प्रवणशब्दः प्रकृष्टं वनमस्य स देशः तस्मिन् । अथवा प्रकृष्टं वनम् प्रवणम् इति बहुव्रीहिः, तत्पुरुषो वा ज्ञेयः । सर्वत्र अन्तोदात्तत्वसिद्धये 'समासमात्रे' इत्युक्तम् ।

अन्तः ॥१७९॥

अन्तश्शब्दात्परं वनमन्तोदात्तं भवति । अन्तर्वणो देशः । अनुपसर्गार्थ आरम्भः ।

अन्तर्वणः—अन्तर्वनं यस्मिन्निति बहुव्रीहिः ।

अन्तश्च ॥१८०॥

अन्तःशब्द उत्तरपदमुपसर्गादन्तोदात्तं भवति । प्रान्तः । पर्यन्तः । समन्तः । बहुव्रीहिरयम्, प्रादिसमासो वा ।

प्रान्तः—प्रकृष्टम् अन्तं यस्य सः, प्रकृष्टम् अन्तः इति वा विग्रहः ।

न निविभ्याम् ॥१८१॥

आभ्यामुत्तरोऽन्तःशब्दो नान्तोदात्तो भवति । न्यन्तः । व्यन्तः । पूर्वपदप्रकृतिस्वरत्वे कृते यणादेशः । तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितो भवति ।

न्यन्तः—निर्गतमन्तं यस्मादिति बहुव्रीहिः, अन्तान्निर्गतः इति तत्पुरुषो वा ।

परेरभितोभावि मण्डलम् ॥१८२॥

परेरुत्तरमभितोभाविवचनं मण्डलं चान्तोदात्तं भवति । परिकूलम् । परितीरम् । परिमण्डलम् ।

बहुव्रीहिरयं प्रादिसमासोऽव्ययीभावो वा । 'परिप्रत्युपा ...' इति प्राप्तमनेन बाध्यते । अभितः = उभयतो भावो यस्य तदभितोभावि ।

परिकूलम्—परितः कूलमस्येति बहुव्रीहिः । परिगतं कूलमिति प्रादिसमासः । परिकूलात् इत्यव्ययीभावः ।

परिप्रत्युपा—'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' इत्यनेन पूर्वपद-प्रकृतिस्वरो विधीयते । सोऽनेन बाध्यते ।

प्रादस्वाङ्गं संज्ञायाम् ॥१८३॥

प्रादुत्तरमस्वाङ्गवाचि संज्ञायामन्तोदात्तं भवति । प्रकोष्ठम् । प्रगृहम् ।

प्रकोष्ठम्—प्रगतं कोष्ठम् इति प्रादिसमासः ।

निरुदकादीनि च ॥१८४॥

एतान्यन्तोदात्तानि भवन्ति । निरुदकम् । निरुलपम् । निर्मक्षिकम् । प्रादिसमासो बहुव्रीहिर्वा ।

निष्क्रान्तमुदकं यस्मादिति बहुव्रीहिः, निष्क्रान्तमुदकं वेति प्रादिसमासः । **निरुलपम्-निरुपलम्** इति पाठान्तरम् ।

अभेर्मुखम् ॥१८५॥

अभेरुत्तरं मुखमन्तोदात्तं भवति । अभिमुखम् । बहुव्रीहिः प्रादिर्वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् ।

उपसर्गात्स्वाङ्गमिति सिद्धे बहुव्रीह्यर्थम्, अध्रुवार्थम्, अस्वाङ्गार्थञ्च वचनम् । अभिमुखा शाला ।

अभिमुखम्—अभिगतं मुखमनेनेति बहुव्रीहिः अभिगतो मुखमिति वा प्रादिसमासः ।

अपाच्च ॥१८६॥

अपाच्चोत्तरं मुखमन्तोदात्तं भवति । अपमुखम् । अव्ययीभावोऽप्यत्र प्रयोजयति । तत्रापि 'परिप्रत्युपापा……'इत्युक्तम् । योगविभाग उत्तरार्थः ।

अपमुखम्—अपगतं मुखमिति प्रादितत्पुरुषः । अपगतं मुखमस्मादिति बहुव्रीहौ **अपमुखः** । अप मुखात् इत्यव्ययीभावः ।

स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनाम नाम च ॥१८७॥

एतान्युत्तरपदानि, सीरनामानि, नामशब्दश्च अन्तोदात्तानि भवन्ति । अपस्फिगम् । अपपूतम् । अपवीणम् । अपाञ्जः । अपाध्वा ।

'उपसर्गादध्वनः' इति यदा समासान्तो नास्ति तदाऽनेन अन्तोदात्तं भवति । तस्मिन् हि सति अच्प्रत्ययस्य चित्त्वात्तत एव सिद्धम् । 'अनित्यश्च समासान्तः' इत्येतदेव ज्ञापकम् । अपकुक्षि । अपसीरम् । अपहलम् । अपनाम । सर्वत्र प्रादिसमासः, बहुव्रीहिः, अव्ययीभावो वा ।

अन्तोदात्तानि भवन्ति—'अपादुत्तराणि' इति शेषः ।

सीरनामानि—सीरपर्यायाणि हलादीनि ।

ज्ञापकम्—यदि नित्यः समासान्तः स्यादध्वग्रहणं व्यर्थमेव अच्-समासान्तस्य चित्त्वादेवान्तोदात्तस्य सिद्धेः । **अपस्फिगम्**-अपगतं स्फिगं यस्मादिति, अपगतं स्फिगं वेति विग्रहः ।

अधेरुपरिस्थम् ॥१८८॥

अधेरुत्तरपदमुपरिस्थवाचि अन्तोदात्तं भवति । अधिदन्तः । अधिकर्णः । अध्यारूढो दन्तः प्रादिसमासः । दन्तस्योपरि दन्तः ।

अधिदन्तः—दन्तस्योपरि योऽन्यो दन्तो जायते सः ।

उपरिस्थम्—उपरि तिष्ठति सः ।

अनोरप्रधानकनीयसी ॥१८९॥

अनोरुत्तरमप्रधानवाचि कनीयश्चान्तोदात्तं भवति । अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदार्थप्रधानः प्रादिसमासो वा । अनुगतः कनीयान् अनुकनीयान् ।

उत्तरपदार्थप्रधानोऽयम् । प्रधानार्थञ्च कनीयोग्रहणम् ।

कनीयोग्रहणम्—अप्रधाने चाप्रधानेनैव सिद्धत्वात् ।

पुरुषश्चान्वादिष्टः ॥१९०॥

पुरुषशब्दोऽन्वादिष्टवाची अनोरुत्तरमन्तोदात्तं भवति । अन्वादिष्टः पुरुषः अनुपुरुषः । अन्वादिष्टः—अन्वाचितः, कथितानुकथितो वा ।

अन्वादिष्ट इति किम् ? अनुगतः पुरुषोऽनुपुरुषः ।

अन्वाचितः—अपधानशिष्टः । **कथितानुकथितः**—यः कथितात् पश्चात् कथितः । अर्थात् कस्मिंश्चित् प्राक्कथिते योऽन्यः पश्चात् कथ्यते ।

अतेरकृत्पदे ॥१९१॥

अतेरुत्तरमकृदन्तं शब्दरूपं पदशब्दश्चान्तोदात्तः । अत्यंकुशो नागः । अतिकृशोऽश्वः । अतिपदा शक्वरी ।

अकृत्पदे किम् ? अतिकारकः ।

अत्यङ्कुशः—अङ्कुशमतिक्रान्तः ।

नेरनिधाने ॥१९२॥

निशब्दात्परमुत्तरपदम् अन्तोदात्तं भवत्यनिधाने । निधानम्—अप्रकाशता, तद्भिन्नम् । निमूलम् । न्यक्षम् । बहुव्रीहिः प्रादिसमासो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् ।

निमूलम्—निगतानि मूलान्यस्य, निगतं मूलं वेति विग्रहः ।

प्रतेरंश्वादयस्तत्पुरुषे ॥१९३॥

प्रतेरुत्तरे अंश्वादयस्तत्पुरुषेऽन्तोदात्ता भवन्ति । प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिराजा ।

प्रत्यंशुः–प्रादितत्पुरुषः । **प्रतिराजा**–समासान्तविधेरनित्यत्वान्न टच् ।

उपाद्द्व्यजजिनमगौरादयः ॥१९४॥

उपादुत्तरं यद् द्व्यच्कम् अजिनं चान्तोदात्तं तत्पुरुषे गौरादीन् वर्जयित्वा । उपदेवः । उपसोमः । उपेन्द्रः ।

अगौरादयः इति किम् ? उपगौरः । उपतैषः ।

उपदेवः—उपगतो देवम् इति प्रादिसमासः । अजिनोत्तरपदस्योदाहरणम्—**उपाजिनम्** ।

उपतैषः—उपगतः तैषम् (तिष्येण युक्तः कालः इति तैषस्तम्) ।

सोरवक्षेपणे ॥१९५॥

सोरुत्तरपदमवक्षेपणे तत्पुरुषेऽन्तोदात्तं भवति । अवक्षेपणम् = निन्दा । सुप्रत्यवसितः ।

'सु' शब्दोऽत्र पूजायामेव । वाक्यार्थस्त्वत्रावक्षेपणम् । असूयया तथाऽभिधानात् ।

सुप्रत्यवसितः–असूयया 'आस्स्व सुस्थण्डिले' इति कथनात् 'सुस्थण्डिले सुप्रत्यवसितः' इतीदं वाक्यम् निन्दाबोधकम् ।

विभाषोत्पुच्छे ॥१९६॥

उत्पुच्छशब्दे तत्पुरुषे विभाषाऽन्त उदात्तो भवति । उत्क्रान्तः पुच्छाद् उत्पुच्छः / उत्पुच्छः ।

तत्पुरुष इति किम् ? उदस्तं पुच्छं येन स उत्पुच्छः ।

उत्पुच्छः—पक्षेऽव्ययपूर्वपदप्रकृतिस्वरः ।

द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥१९७॥

आभ्यामुत्तरेषु पाद्, दत्, मूर्धन् इत्येतेषु यो बहुव्रीहिस्तत्र विभाषाऽन्त उदात्तो भवति । द्विपात् / द्विपात् । त्रिपात् / त्रिपात् । द्विदन् / द्विदन् । त्रिदन् / त्रिदन् । द्विमूर्धा / द्विमूर्धा / त्रिमूर्धा / त्रिमूर्धा ।

'मूर्धन्' इत्यकृतसमासान्तो ज्ञापयति—समासान्तविधिरनित्यः । **दत्**—दन्तशब्दस्यादेशः । पाद-दत्-मूर्धन् इति त्रयोऽपि पक्षे अन्तोदात्ता भवन्ति ।

सक्थं चाक्रान्तात् ॥१९८॥

'सक्थम्' इति कृतसमासान्तो गृह्यते । बहुव्रीहौ अक्रान्तात्परः स विभाषाऽन्तोदात्तो भवति । गौरसक्थः / गौरसक्थः । श्लक्ष्णसक्थः / श्लक्ष्णसक्थः ।

अक्रान्तादिति किम् ? चक्रसक्थः । षचश्चित्त्वान्नित्यमन्तोदात्तत्वं भवति ।

कृतसमासान्तः—'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इत्यनेन 'सक्थिन्' शब्दात् षच् समासान्तः ।

अक्रान्तात्—'क्र' शब्दोऽन्तो यस्य स क्रान्तः, न क्रान्तः अक्रान्तः, तस्मात् । चक्रसक्थः—अत्र क्रान्तः चक्रशब्दस्तस्मादुत्तरं सक्थमस्ति । पक्षे गौर-श्लक्ष्णौ अन्तोदात्तौ भवतः ।

परादिश्छन्दसि बहुलम् ॥१९९॥

छन्दसि विषये बहुलं परस्यादिरुदात्तो भवति । परशब्दोऽत्र सक्थशब्द एव गृह्यते । अञ्जिसक्थमालभेत । त्वाष्ट्रौ लोमशसक्थौ ।

बहुव्रीहावाशङ्काबाधगौः सादक्ते नित्यार्थे युक्ता न हास्तिन कूलतीर देवता राजाह्नोश्छन्दस्यन्तश्च विंशतिः (२००) ।

[काशिकावृत्तिसारे 'राजाह्नोश्छन्दसि' इत्येकं सूत्रम् अधिकं वर्तते तत्तु ॥१६०॥ (क) संख्यया निर्दिष्टम् । काशिकावृत्तिसारस्यात्र सूत्र-संख्या द्विशतात्मिका (२००) वर्तते । परन्तु काशिकावृत्ति–सिद्धान्तकौमुदी इति ग्रन्थद्वयेन सहैकार्थता-सम्पादनाय अधिकं सूत्रं 'राजाह्नोश्छन्दसि' इत्यस्य १६० (क) संख्या लिखिता ।]

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
षष्ठाध्यायस्य द्वितीयः पादः ॥

सक्थशब्द एव—सन्निहितत्वात् । बहुलग्रहणादत्राप्याद्युदात्त एव भवति । **ऋजुबाहुः** । **वाक्पतिः** । **चित्पतिः** । एवमन्यत्रापि व्यत्ययो भवति । यथाह—

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं स्मृतः ॥

परादिः उदाहृतः ।

परान्तः—

❀ (वा०) अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम् । **त्रिबन्धुरेण त्रिवृता रथेन त्रिचक्रेण** ।

पूर्वान्तः—

❀ (वा०) पूर्वपदान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्युपसंख्यानम् । **मरुद्वृद्धः** ।

पूर्वादिः—

❀ (वा०) पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् । **दिवोदासाय सामगाय ते** । इत्येवं सर्वं सङ्गृहीतं भवति ।

षष्ठाध्यायस्यास्मिन् द्वितीये पादे बहुव्रीहौ प्रकृत्या पूर्वपदम्, आशङ्का-बाधनेदीयस्सु सम्भावने, गौः सादसादिसारथिषु, क्ते नित्यार्थे, युक्तारोह्यादयश्च, न हास्तिनफलकमार्देयाः, कूलतीरतूलमूलशालाक्षसममव्ययीभावे, देवताद्वन्द्वे च, राजाह्नोश्छन्दसि, अन्तश्च इत्येतेभ्य आरभ्य विंशतिः सूत्राणि इति संकलनेन द्विशतं (२००) सूत्राणि सन्ति ।

काशिकावृत्तिसारकारेण विद्वत्प्रकाण्डेनाचार्येण बलभद्रेण 'राजा-ह्लोश्छन्दसि' इति सूत्रम् अधिकं लिखितम् । वृत्तौ कौमुद्यां चेदं सूत्रं गणसूत्ररूपेण (कौमुद्यां गणपाठ सं० ६५२ काशिकायां १७४) स्वीकृतम् तत्तद्ग्रन्थकर्तृभ्याम् । तथा च काशिकावृत्तिसारानुसारम् षष्ठाध्यायस्य द्वितीयपादे सूत्रसंख्या द्विशतम् (२००) अस्ति ।

वृत्तौ, कौमुद्यां तु षष्ठाध्यायस्य द्वितीयपादे सूत्र संख्या (१९९) वर्तते । एतयोरेव ग्रन्थयोर्निर्दिष्ट-सूत्रसंख्याया अनुरोधेनात्रापि काशिकावृत्तिसारे ग्रन्थे (१९९) संख्यैव सम्मता । अधिकं सूत्रं (१६० क) इति संख्यया निर्दिष्ट-मिति बोध्यम् ।

इति काशिकावृत्तिसारसुधायां
षष्ठाध्यायस्य द्वितीयः पादः ॥

अथ षष्ठाध्याये तृतीयः पादः

अलुगुत्तरपदे ॥१॥

'अलुक्' इति 'उत्तरपदे' इति चेत्यधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामः 'अलुक्-उत्तरपदे' इत्येवं तद्वेदितव्यम् । वक्ष्यति—'पञ्चम्याः स्तोकादिभ्यः' स्तोकान्मुक्तः । अलुगधिकारः प्राक् अनङः । उत्तरपदाधिकारः प्रागङ्गाधिकारात् ।

वेदितव्यम्—उभयोः पदयोः वक्ष्यमाणेषु सूत्रेषु पृथक् पृथक् अधिकारो वर्तते । **प्रागनङः**—'आनङ् ऋतो द्वन्द्वे' इत्यतः प्राक् ।

पञ्चम्याः स्तोकादिभ्यः ॥२॥

स्तोक–अन्तिक–दूरार्थक–कृच्छ्राणि स्तोकादीनि । तेभ्यः परस्याः पञ्चम्या उत्तरपदे अलुग्भवति । स्तोकान्मुक्तः । अन्तिकादागतः । दूरादागतः । कृच्छ्रान्मुक्तः । समासे लुकि प्राप्ते प्रतिषेधः ।

लुकि प्राप्ते—'सुपः' इति शेषः । अथ ग्रहणात् इहाप्यलुक्–**समीपादागतः । विप्रकृष्टादागतः ।**

❀ (वा०) ब्राह्मणाच्छंसिन उपसंख्यानं कर्त्तव्यम् । ब्राह्मणादादाय शंसति इति **ब्राह्मणाच्छंसी** (ऋत्विक्) ।

ओजः सहोऽम्भस्तमसस्तृतीयायाः ॥३॥

ओजस्, सहस्, अम्भस्, तमस्–एभ्य उत्तरस्यास्तृतीयाया अलुग्भवति । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तमसाकृतम् ।

❀(वा०) अञ्जस उपसंख्यानं कर्त्तव्यम् । अञ्जसाकृतम् ।

❀(वा०) पुंसानुजो जनुषान्ध इत्युपसंख्यानम् । पुंसानुजः । जनुषान्धः ।

ओजसाकृतम्—'कर्तृकरणे कृता बहुलम्' इत्यनेन समासः । **पुंसानुजः**–पुंसा हेतुना अनुजः । यस्याग्रजः पुमान् सः । जनुः=जन्म ।

मनसः संज्ञायाम् ॥४॥

मनस उत्तरस्यास्तृतीयाया अलुग्भवति संज्ञायाम् । मनसागुप्ता । मनसासंगता ।

संज्ञायामिति किम् ? मनोदत्ता कन्या ।

मनसागुप्ता—'संज्ञैषा कस्याश्चित् । उपपदसमासः ।

आज्ञायिनि च ॥५॥

'आज्ञायिन्' शब्द उत्तरपदे परतो मनस उत्तरस्यास्तृतीयाया अलुग्भवति । मनसा ज्ञातुं शीलमस्य मनसाज्ञायी ।

मनसाज्ञायी—आज्ञायी–आ √ज्ञा + णिनि ।

आत्मनश्च पूरणे ॥६॥

आत्मन उत्तरस्यास्तृतीयाया अलुग्भवति पूरणप्रत्ययान्त उत्तरपदे । आत्मनापञ्चमः । आत्मनाषष्ठः । तृतीया-विधाने 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया । 'तृतीया' इति

योगविभागात् समासः। आत्मना वा कृतः पञ्चमः आत्मना-पञ्चमः।

कथं जनार्दनस्त्वात्मचतुर्थ एषः? बहुव्रीहिरयम्—आत्मा चतुर्थो यस्य सः।

आत्मना वा कृतः पञ्चमः—'कर्तृकरणे कृता बहुलम्' इत्यनेन समासः।

वैयाकरणाख्यायां चतुर्थ्याः ॥७॥

आख्या = संज्ञा। वैयाकरणानामाख्या। यया संज्ञया वैयाकरणा एव व्यवहरन्ति तस्यामात्मन उत्तरस्याश्चतुर्थ्या अलुग्भवति। आत्मनेपदम्। आत्मनेभाषा। तादर्थ्ये चतुर्थी। 'चतुर्थी' इति योगविभागात्समासः।

आत्मनेपदम्—आत्मार्थं पदम्।

परस्य च ॥८॥

'पर' शब्दस्य च या चतुर्थी तस्या वैयाकरणाख्यायाम् अलुग्भवति। परस्मैपदम्। परस्मैभाषा।

परस्मैभाषा—परार्थं भाषा। एषाऽपि वैयाकरणानामाख्या धातु-पाठे वर्तते।

हलदन्तात्सप्तम्याः संज्ञायाम् ॥९॥

हलन्तात् अदन्ताच्चोत्तरस्याः सप्तम्या अलुग्भवति। युधिष्ठिरः। त्वचिसारः। 'गविष्ठिरः' अत्र तु 'गवियुधिभ्यां स्थिरः' इति वचनादलुक्। अदन्तात्—अरण्येतिलकाः। अरण्ये-भाषकाः। वनेकिंशुकाः। वनेहरिद्रकाः। वनेबिल्वकाः। कूपेपिशाचकाः।

हलदन्तात् किम्? नद्यां कुटिका नदीकुटिका। भूमिपाशः। संज्ञायां किम्? अक्षशौण्डः।

❀(वा०) हृद्द्युभ्यां ङेरुपसंख्यानम् । हृदिस्पृक् । दिविस्पृक् ।

युधिष्ठिरः—सर्वत्र 'संज्ञायाम्' इति समासः । **नदीकुटिका**—वृत्तौ, न्यासे च **कुक्कुटिका** इति पाठः ।

हृदिस्पृक्—द्वितीयार्थे सप्तमी, हृदयं स्पृशति । भाष्यम् अत्र प्रमाणम् ।

कारनाम्नि च प्राचां हलादौ ॥१०॥

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या अलुग्भवति । स्तूपेशाणः । मुकुटेकार्षापणम् । दृषदिमाषकः । कारविशेषस्य संज्ञा एताः । तत्र पूर्वेणैव सिद्धे नियमार्थमिदम् । एते च नियमविकल्पा अत्रेष्यन्ते—कारनाम्न्येव, प्राचामेव, हलादावेव नान्यत्र ।

'कारनाम्नि' इति किम् ? अभ्यागतपशुः । कारादन्यस्यैतद्देयस्य नाम ।

कारः—वणिग्भिः, कर्षकैः, पशुपालैश्च राज्ञे देयो भागः करः । स एव कारः । **स्तूपेशाणः** वृत्तौ 'कूपशाणम्' इत्युदाहृतम् । **अभ्यागतपशुः**—वृत्तौ "**अभ्यर्हितपशुः**" इत्युक्तम् ।

मध्याद् गुरौ ॥११॥

मध्यशब्दादुत्तरस्याः सप्तम्याः अलुग् भवति । मध्येगुरुः ।

❀(वा०) अन्ताच्चेति वक्तव्यम् । अन्तेगुरुः । 'सप्तमी' इति योगविभागात् समासः ।

सप्तमी—'सप्तमी शौण्डैः' इति सूत्रे ।

अमूर्धमस्तकात्स्वाङ्गादकामे ॥१२॥

मूर्ध-मस्तक शब्दवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अलुग् भवति अकाम उत्तरपदे । कण्ठे कालो यस्येति कण्ठेकालः । उरसिलोमा । उदरेमणिः ।

अमूर्धमस्तकादिति किम् ? मूर्धशिखः । मस्तकशिखः । नेह—मुखकामः ।

कण्ठेकालः—व्यधिकरणपदो बहुव्रीहिः । एवं सर्वत्र । **अकामे**—कामपदभिन्ने ।

बन्धे च विभाषा ॥१३॥

'बन्धः' इति घञन्तो गृह्यते, तस्मिन्नुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या विभाषा अलुग् भवति । हस्तेबन्धः/हस्तबन्धः । चक्रेबन्धः / चक्रबन्धः ।

उभयत्र विभाषेयम् । स्वाङ्गाद् बहुव्रीहौ पूर्वेण नित्यम् अलुक् प्राप्नोति । तत्पुरुषे तु स्वाङ्गादस्वाङ्गाच्च 'नेन्सिद्धबध्नातिषु च' इति प्रतिषेधः प्राप्नोति ।

घञन्तः—आद्युदात्तपाठात् । **बन्धः**=बन्धनं √बन्ध् + घञ् (भावे) ।

तत्पुरुषे कृति बहुलम् ॥१४॥

तत्पुरुषसमासे कृदन्त उत्तरपदे अलुग्भवति सप्तम्याः बहुलम् । स्तम्बेरमः । कर्णेजपः । न च भवति—कुरुचरः । मद्रचरः ।

क्वचिद्विभाषा भवति **सरसिजम् / सरोजम्** । क्वचित्पञ्चम्या अप्यलुक्—**ब्राह्मणाच्छंसी** । क्वचित्तद्धितेऽप्युत्तरपदे अलुक् । **अप्सव्यः**—(अप्सु भवः, अप्सु+यत् गुणः 'वान्तो यि प्रत्यये' इति अव् आदेशः) ।

प्रावृट्शरत्कालदिवां जे ॥१५॥

एषां ज उत्तरपदे सप्तम्या अलुग् भवति । प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यायं प्रपञ्चः ।

प्रावृषिजः—सर्वत्र 'उपपदमतिङ्' इति समासः । 'काल' इति स्वरूपग्रहणम् । **प्रपञ्चः**—विस्तरः ।

विभाषा वर्षक्षरशरवरात् ॥१६॥

वर्ष, क्षर, शर, वर—एभ्य उत्तरस्याः सप्तम्या विभाषा अलुक् जे उत्तरपदे । वर्षेजः / वर्षजः । क्षरेजः / क्षरजः । शरेजः / शरजः । वरेजः / वरजः ।

वर्षेजः / वर्षजः—सर्वत्र 'सप्तम्यां जनेर्डः' इति 'ड' प्रत्ययः, 'उपपदमतिङ्' इति समासः ।

घकालतनेषु कालनाम्नः ॥१७॥

घसंज्ञके प्रत्यये कालशब्दे च तनप्रत्यये च परतः कालनाम्न उत्तरस्याः सप्तम्या अलुग् भवति । पूर्वाह्णेतरे / पूर्वाह्णतरे । पूर्वाह्णेतमे / पूर्वाह्णतमे । पूर्वाह्णेकाले / पूर्वाह्णकाले । पूर्वाह्णेतने / पूर्वाह्णतने ।

कालनाम्न इति किम् ? शुक्लतरे ।

घः = तरप्तमपौ प्रत्ययौ । 'काल' इति स्वरूपग्रहणम् । **तनः** = ट्यु-ट्युलोः प्रत्यययोः 'अन' आदेशः 'तुट्' आगमसहितः ।

शयवासवासिष्वकालात् ॥१८॥

एषूत्तरेष्वकालवाचिन उत्तरस्याः सप्तम्या विभाषा अलुग् भवति । खेशयः / खशयः । ग्रामेवासः / ग्रामवासः । ग्रामेवासी / ग्रामवासी ।

❀(वा०) अपो योनियन्मतुषु सप्तम्या अलुग् वाच्यः । अप्सुयोनिः । अप्सव्यः । अप्सुमान् । 'सप्तमी' इति योगविभागात्समासः ।

खेशयः—खे √शीङ् + अच् = शयः । **अकालवाचिनः** = कालवाचकभिन्नात् । **अप्सुयोनिः**—अप्सु योनिः = उत्पत्तिर्यस्य । **अप्सव्यः**—अप्सु + यत् उकारस्य गुणः 'अव्' आदेशः । **अप्सुमान्**—'अप्सु' इति शब्दो यस्मिन् मन्त्रे सः ।

नेन्सिद्धबध्नातिषु च ॥१९॥

इन्नन्त उत्तरपदे सिद्धशब्दे बध्नातौ च परतः सप्तम्यलुग् न भवति । स्थण्डिलवासी । सांकाश्यसिद्धः । चक्रबन्धः ।

स्थण्डिलवासी--स्थण्डिल √वस् + णिनि । **चक्रबन्धः**--चक्र √बन्ध् + अच् । वृत्तौ 'चक्रबद्धः' इत्युदाहृतम् ।

स्थे च भाषायाम् ॥२०॥

स्थे चोत्तरपदे भाषायां सप्तम्या अलुग् न । समस्थः । विषमस्थः ।

समस्थः—सम √स्था + क ।

षष्ठ्या आक्रोशे ॥२१॥

आक्रोशे गम्ये उत्तरपदे षष्ठ्या अलुक् । चौरस्य कुलम् । दासस्य कुलम् ।

❀ (वा०) वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यं षष्ठ्या अलुग् वाच्यः ।

❀ (वा०) आमुष्यायणादीनां च । अमुष्य पुत्रः । अमुष्य कुलिकः ।

वाग्दिक्...... उदाहरणानि क्रमशः—**वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ।**

आमुष्यायणः—अमुष्य पुत्रः = अपत्यम् । एवं अमुष्य कुलिकस्य भावः आमुष्यकुलिका ।

❀ (वा०) **'देवानाम्प्रियः' इत्यत्र षष्ठ्या अलुक् । देवानाम्प्रियः ।**

❀ (वा०) **शेपपुच्छलाङ्गूलेषु शुनः संज्ञायां षष्ठ्या अलुक् । शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः ।**

❀ (वा०) **दिवश्च दासे षष्ठ्या अलुक् । दिवोदासाय गायति ।**

पुत्रेऽन्यतरस्याम् ॥२२॥

पुत्रे परेऽन्यतरस्यां षष्ठ्या अलुग् आक्रोशे । दास्याः पुत्रः / दासीपुत्रः ।

एवं वृषल्याःपुत्रः / वृषलीपुत्रः ।

ऋतो विद्यायोनिसम्बन्धेभ्यः ॥२३॥

ऋदन्तेभ्यो विद्यायोनिसम्बन्धेभ्य उत्तरस्याः षष्ठ्या अलुक् । होतुरन्तेवासी । होतुः पुत्रः । पितुः पुत्रः ।

पितुरन्तेवासो इति विद्यासम्बन्धस्योदाहरणम् । विद्यायोनिसम्बन्धः पूर्वोत्तरपदयोरुभयोरेव भवति । तेन विद्यायोनिसम्बन्धवाचिन्येवोत्तरपदे षष्ठ्या अलुक्, नान्यत्र--होतृधनम् । पितृधनम् ।

विभाषा स्वसृपत्योः ॥२४॥

ऋदन्तेभ्यो विद्यायोनिसम्बन्धेभ्यः परस्याः षष्ठ्या अलुक् । स्वसृ—पति, इत्येतयोरुत्तरपदयोः । गातृष्वसा / मातुःस्वसा / दुहितुःपतिः / दुहितृपतिः ।

मातुःस्वसा--मातुःष्वसा इत्यपि रूपम् अलुक् पक्षे । '**मातृपितृभ्यामन्यतरस्याम्**' इति विकल्पेन षत्वम् । लुक्पक्षे तु ''**मातृपितृभ्यां स्वसा**' इति नित्यं षत्वम्–**मातृष्वसा** ।

आनङ् ऋतो द्वन्द्वे ॥२५॥

ऋदन्तानां विद्यायोनिवाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्य 'आनङ्' आदेशः होतापोतारौ । मातापितरौ ।

मातापितरौ—माता च पिता च इति विग्रहः । 'पुत्रे', इत्यनुवर्तते तेन पुत्रशब्देऽप्युत्तरपदे द्वन्द्वे ऋकारान्तस्य आनङ् भवति । पिता च पुत्रश्च पितापुत्रौ ।

देवताद्वन्द्वे च ॥२६॥

देवतावाचिनां द्वन्द्वे पूर्वपदस्य 'आनङ्' आदेशः । इन्द्रासोमौ । इन्द्रावृहस्पतो ।

केवलं येषां देवानां साहचर्यं लोके वेदे च प्रसिद्धं तेषामेव द्वन्द्वे 'आनङ्' भवति। तेनेह न–ब्रह्मप्रजापती।

❀(वा०) **उभयत्र वायोः प्रतिषेधो वक्तव्यः**। उभयत्र=वायोः पूर्वपदत्वे, उत्तरपदत्वे च। **अग्निवायू**। **वाय्वग्नी**।

ईदग्नेः सोमवरुणयोः ॥२७॥

अनयोः परयोर्देवताद्वन्द्वे अग्नेरीकारादेशः। अग्नीषोमौ। अग्नीवरुणौ।

ईदग्नेः = ईत् + अग्नेः तकार उच्चारणार्थः। ईकार एवादेशो भवति।

इद् वृद्धौ ॥२८॥

कृतवृद्धावुत्तरपदे देवताद्वन्द्वे अग्नेरिकारादेशो भवति। आग्निवारुणीमनड्वाहीमालभेत।

आग्निवारुणीम्—अग्नीवरुणौ देवते अस्याः इति विग्रहे 'सास्य देवता' इत्यनेन अण्, '**देवताद्वन्द्वे च**' इत्युभयपदवृद्धिः। 'अग्नी' इत्यस्य ईकारस्य इकारः आग्निवारुण + ङीप्।

दिवो द्यावा ॥२९॥

'दिव्' इत्यस्य 'द्यावा' इत्यादेशो भवति देवताद्वन्द्वे। द्यावाभूमी।

द्यौश्च भूमिश्चेति विग्रहः।

दिवसश्च पृथिव्याम् ॥३०॥

पृथिव्यामुत्तरपदे देवता द्वन्द्वे दिवः 'दिवस्' इत्यादेशः। चाद् द्यावा च। दिवस्पृथिव्यौ / द्यावापृथिव्यौ। अकारः सस्य विकाराभावप्रतिपत्त्यर्थः।

अकारः—सूत्रे अकारसहितः 'दिवस' इत्युपदिष्टः। अकारो नादेशे

संगृहीतः, तस्येदमेव तात्पर्यम् 'यद् 'दिवस्' इत्यविकृत एवादेशो यथा स्यात् । 'द्यावा चिदस्मै पृथिवी नमेते', इति मन्त्रे दिवो 'द्यावा' आदेशः छान्दसः ।

उषासोषसः ॥३१॥

'उषस्' एतस्य 'उषासा' आदेशो भवति देवताद्वन्द्वे उत्तरपदे । उषासासूर्यम् । उषासानक्तम् ।

उषासासूर्यम्—उषाश्च सूर्यश्च तयोः समाहारः । **उषासानक्तम्**—उषाश्च नक्तञ्च । वृत्तौ **उषासानक्ता** इत्युदाहृतम् । तत्र प्रथमाद्विवचनस्य छान्दसो 'डा' आदेशो बोध्यः ।

मातरपितरावुदीचाम् ॥३२॥

'मातरपितरौ' इत्युदीचां मते 'अरङ्' आदेशो मातृशब्दस्य निपात्यते । मातरपितरौ ।

उदीचां किम् ? मातापितरौ ।

मातरपितरौ—माता च पिता चेति विग्रहः । 'अरङ्' आदेशो ङित्वात् मातृशब्दस्य ऋकारस्य भवति ।

मातापितरौ—अत्र मातुः ऋकारस्य 'आनङ्' आदेशः ।

पितरामातरा चच्छन्दसि ॥३३॥

'पितरामातरा' इति छन्दसि विषये निपात्यते । आमा गन्तां पितरामातरा च ।

पितरामातरा—पूर्वपदस्य 'अराङ्' उत्तरपदे च 'सुपां सुलुक्……' इति विभक्तेः आकारादेशः, 'ऋतो ङि……' इत्यनेन गुणः ।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥३४॥

भाषितः पुमान् येन समानायामाकृतौ एकस्मिन् प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः । तदेव कथं भवति ? भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते । तस्य

प्रातिपदिको यः शब्दः सोऽपि भाषितपुंस्कः । ऊङोऽभावोऽनूङ् । भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे स भाषिकपुंस्कादनूङ् स्त्रीशब्दः । बहुव्रीहिरयम् । अलुङ् निपातनात्पञ्चम्याः ।

ततस्तस्य भाषितपुंस्कादनूङ्-स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति समानाधिकरण उत्तरपदे स्त्रीलिङ्गे पूरणी-प्रियादिवर्जिते । दर्शनीयभार्यः । शोभनभार्यः ।

अपूरण्यामेव, नेह—कल्याणी पञ्चमी आसामिति कल्याणीपञ्चमा निशाः ।

प्रधानपूरणीग्रहणं कार्यम् । इह न—कल्याणपञ्चमीकः पक्षः । 'अप् पूरणीप्रमाण्योः' इत्यत्रापि प्रधानग्रहणम्, अतोऽप् न ।

अप्रियादिषु किम् ? कल्याणीप्रियः । प्रिया, भक्तिरित्यादि । 'दृढभक्तिः' इत्यादौ स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धमिति समाधेयम् ।

सूत्रे **स्त्रियाः** इति 'स्त्रीशब्दस्य' इत्यर्थकः । **समानायाम् आकृतौ** इत्यस्यार्थं स्पष्टीकरोति वृत्तौ 'एकस्मिन् प्रवृत्तिनिमित्ते' आक्रियते—गृह्यते येनार्थस्तत् शब्दस्य प्रवृत्तिनिमित्तं भवति ।

ऊङोऽभावः—'अनूङ्' इत्यत्र नञ् प्रसज्यप्रतिषेधार्थको बोध्यः । सूत्रे **स्त्रियाः** इति पदे षष्ठी, **भाषितपुंस्कादनूङ्** इति तस्य विशेषणम् । 'अनूङ्' इत्यत्र षष्ठ्या लुक् । **दर्शनीयभार्यः**—दर्शनीया भार्या यस्य सः ।

कल्याणीपञ्चमाः—अत्र पञ्चमीशब्दः पूरणप्रत्ययान्तः, तस्मात् 'अप्' समासान्तो भवति ।

दृढभक्तिः—दृढं भक्तिर्यस्य सः इति सामान्ये नपुंसकमत्र ज्ञेयम् । स्त्रीत्वविवक्षायान्तु 'दृढाभक्तिः' इत्येव भवति ।

तसिलादिष्वाकृत्वसुचः ॥३५॥

तसिलमारभ्य कृत्वसुच्-पर्यन्तं ये प्रत्यया विहितास्तेषु

भाषितपुंस्कादनूङ्: स्त्रियाः पुंवत् । तस्याः शालाया इति ततः । तस्यां तत्र ।

परिगणनं कार्यम्—त्रतसिलौ । तरप्तमपौ । चरट्-जातीयरौ । कल्पप्-देशीयरौ । रूपप्पाशपौ । थम्-थालौ । दा-र्हिलौ । तिल्—तातिलौ ।

❀(वा०) शसि बह्वल्पार्थस्य पुंवद्भावो वाच्यः । बह्वीभ्यः इति बहुशो देहि । अल्पशः ।

❀(वा०) त्वत्तलोर्गुणवचनस्य वाच्यः । पट्व्या भावः पटुत्वम् । पटुता । नेह—कठीत्वम् /

❀(वा०) भस्याढे तद्धिते पुंवद्भावो वाच्यः । हस्तिनीनां समूहो हास्तिकम् । नेह—रौहिणेयः । कथम् अग्नायी देवताऽस्य आग्नेयः स्थालीपाकः । यत्नोऽत्र कार्यः ।

❀(वा०) भवतष्ठक्--छसोः पुंवद्भावः । भवत्या इमे भावत्काः । भवदीयाः ।

ततः—'पञ्चम्यास्तसिल्' इत्यनेन सा+तसिल् । अनेन पुंवद्भावः । **तत्र**—सा+त्र। परिगणनम्—भाष्यकारेण कृतमेतत् तेन कृत्वसुचः परयोरपि तिल्-तातिलोः समावेशः ।

त्रतसिलोरुदाहरणद्वयमुक्तम् । अन्येषां क्रमशः उदाहरणानि—**दर्शनीयतरा, दर्शनीयतमा । पटुचरी, पटुजातीया । दर्शनीयकल्पा, दर्शनीयदेशीया । पटुरूपा, पटुपाशा । इत्थम्, तथा । वृकतिः, ज्येष्ठतातिः** ।

न्यासे **थ्यन्--देश्य** प्रत्यययोरपि समावेशो दृश्यते । **अजथ्या, पटुदेश्या** इत्यनयोरुदाहरणे ।

इयमनयोरतिशयेन दर्शनीया इति **दर्शनीयतरा** । एवं स्त्रीप्रत्ययान्तस्यैव सर्वत्रोदाहरणं ज्ञेयम् ।

कठीत्वम्—कठीशब्दः संज्ञावचनः । **रौहिणेयः**—रोहिणीनां समूहः इति विग्रहः । **रोहिणी**—रोहित+ङीप् तकारस्य नकारस्तस्य च णकारादेशः । पुंवद्भावे **रौहितेयः** इति स्यात् ।

यत्नः—व्याख्यानमेवात्र शरणम् 'भस्याढे' इत्यत्र सूत्रे 'अढे' इत्यत्राल्पार्थे नञ्। तथा चानेनैव अल्पार्थे 'ढ' प्रत्ययो बोध्यः। **भवतः**—वृत्तौ 'भवतः' इति नास्ति।

क्यङ्मानिनोश्च ॥३६॥

क्यङि परतो मानिनि च भाषित पुंस्कादनूङः स्त्रियाः पुंवद् भवति। एनी–एतायते। मानिनि–दर्शनीयमानी अयमस्याः, दर्शनीयमानिनी इयमस्याः।

मानिग्रहणमस्त्र्यर्थम्, असमानाधिकरणार्थं च। इह तु दर्शनीयामात्मानं मन्यते दर्शनीयमानिनी इति पूर्वेणैव सिद्धम्।

एतायते—एनी इवाचरति एनी + क्यङ् नामधातोर्लट्। **दर्शनीयमानी**..........—अयम् इमां दर्शनीयां मन्यते इति विग्रहे 'मनः' इति णिनिः **दर्शनीयमानिनी**—इयम् इमां दर्शनीयां मन्यते इति पूर्ववत् णिनिः, ततो ङीप्। एतत्प्रदर्शनार्थमेव अयमस्याः, इयमस्या इति पृथगुपादानम्।

न कोपधायाः ॥३७॥

कोपधायाः स्त्रिया न पुंवत्। याचिकाभार्यः। पाठिकाभार्यः। मद्रिकायते। मद्रिकामानिनी।

❀(वा०) कोपधप्रतिषेधे तद्धित 'वु' ग्रहणं कार्यम्। नेह–पाकभार्यः।

पाचक-पाठक शब्दौ 'ण्वुल्' प्रत्ययान्तौ ताभ्यां स्त्रियां टाप्, 'प्रत्ययस्थात्कात्.........' इति सूत्रेण उपान्त्यस्याकारस्य इत्वम्।

मद्रिका—मद्रेषु भवा इत्यर्थे मद्र + कन्।

तद्धित'वु'—तद्धितस्य 'वु' इत्यस्य च ककारः। स उपधा यस्य तत्रैव प्रतिषेधः स्यात्।

पाकभार्यः—पाकशब्दः प्रथमवयोवाची कन्प्रत्ययान्तो निपातितः। पाका भार्या यस्य सः, अत्र पुंवद्भावो भवति। एवं भेका भार्या यस्य स भेकभार्यः।

संज्ञापूरण्योश्च ॥३८॥

संज्ञायाः पूरण्याश्च स्त्रियाः पुंवद्भावो न भवति । दत्ताभार्यः । दत्तापाशा । पञ्चमीभार्यः ।

'न' इत्यनुवर्त्तते । ये संज्ञाशब्दाः दानादिक्रियानिमित्ताः पुंस्त्वे स्त्रीत्वे च प्रवर्त्तन्ते तेषां निषेधः । **दत्ता** शब्दः दानक्रियाकृतौ, तदाख्यायां स्त्रियां च वर्त्तते इति भाषितपुंस्कः । **दत्तापाशा**—इयमपि कस्याश्चित् संज्ञा । अत्र याप्यादत्ता 'याप्ये पाशप्' इति सूत्रेण दत्ता + पाशप् । याप्या =कुत्सिता ।

पञ्चमीभार्यः—पञ्चमशब्दः पूरणप्रत्ययान्तः । **दत्तायते** । **दत्तामानिनी** । **पञ्चमीयते** । **पञ्चमीमानिनी** इत्युदाहरणान्तराणि ।

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥३९॥

'न' इति वर्तते । वृद्धेर्निमित्तं यस्मिन् स वृद्धिनिमित्तः, स यदि रक्तविकारे न विहितस्तदन्तस्य स्त्रीशब्दस्य पुंवद्भावो न भवति । स्रौघ्नीभार्यः । माथुरीभार्यः ।

अरक्तेति किम् ? काषायकंथः ।

वृद्धेर्निमित्तम्—ञ्–ण्–क् शब्दाः **यस्मिन्**—प्रत्यये इति शेषः । **स्रौघ्नी**—स्रुघ्ने भवा स्रुघ्न+अण्+टाप् । अत्र णकारो वृद्धिनिमित्तकः । **काषायकंथः**—कषायेण रक्ता काषायी कषाय+अण्+ङीप् काषायी कंथा यस्य सः । वृत्तौ कंथायाः स्थाने **बृहतिका** इति वर्त्तते ।

स्वाङ्गाच्चेतोऽमानिनि ॥४०॥

स्वाङ्गादुत्तरो य ईकारस्तदन्तायाः स्त्रिया न पुंवद्भावः । दीर्घकेशीभार्यः इत्यादि ।

ईत इति किम् ? अकेशभार्यः ।

अमानिनि किम् ? दीर्घकेशमानिनी ।

दीर्घकेशीभार्यः—दीर्घाः केशाः यस्याः सा दीर्घकेशी, सा भार्या यस्य सः । केशशब्दः स्वाङ्गवाची ।

अकेशभार्यः—अविद्यमानाः केशाः यस्याः सा अकेशा अत्र 'सहनञ्‌…… ……' इति सूत्रेण ङीपः प्रतिषेधे टाप्। तेनात्र पुंवद्भावो भवत्येव।

जातेश्च ॥४१॥

जातेश्च स्त्रिया न पुंवद्भावः, अमानिनि परतः। कठीभार्यः। वह्वृचीभार्यः। ब्राह्मणीभार्यः इत्यादि।

अमानिनीत्येव-ब्राह्मणमानिनी।

❀(वा०) औपसंख्यानिकस्य नेष्यते। हास्तिकम्।

कठीभार्यः—'गोत्रं च चरणैः सह' इति कठवह्वृचशब्दौ जातिवाचिनौ ताभ्यां ङीष्। **औपसंख्यानिकस्य**=वार्तिकस्य।

नेष्यते—अयं पुंवद्भावस्य प्रतिषेधो न भवतीत्यर्थः।

पुंवत्कर्मधारयजातीयदेशीयेषु ॥४२॥

कर्मधारये, जातीय-देशीययोश्च परतः भाषितपुंस्कादनूङः स्त्रियाः पुंवत्। प्रतिषेधार्थोऽयमारंभः। 'न कोपधायाः' इत्याद्युक्तं तत्रापि यथा पुंवत्स्यात्–पाचकजातीया। पाचकदेशीया। एकशाटी।

❀(वा०) कुक्कुट्यादीनामण्डादिषु पुंवत्। कुक्कुटाण्डम्। मृगपदम्। मृगक्षीरम्। काकशावः।

आरम्भः—यत्र विषये पूर्वसूत्रैः पुंवद्भावस्य प्रतिषेधः कृतस्तदर्थं सूत्रम्। **एकशाटी**—एका चासौ शाटी चेति कर्मधारयः।

कुक्कुटाण्डम्—कुक्कुट्या अण्डम्। अथवा कुक्कुटस्याण्डम् इति सामान्येन कुक्कुटजातेस्तात्पर्यं विवक्षितम्।

❀(वा०) पुंवद्भावाद् विप्रतिषेधेन खिद्घादिषु ह्रस्वत्वं भवति। खित्–कालिम्मन्या। घादिषु वक्ष्यति–'घरूप……' इतिसूत्रेण।

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ॥४३॥

एषु भाषितपुंस्कात्परो यो ङीप् तदन्तस्यानेकाचो ह्रस्वो

भवति । घ—ब्राह्मणितरा । ब्राह्मणितमा । रूप—ब्राह्मणिरूपा इत्यादि ।

घ—'तरप्तमपौ घः' इत्यनेन तरप्-तमप् इत्यनयोः प्रत्यययोः 'घ' संज्ञा । **ब्राह्मणिरूपा**—प्रशस्ता ब्राह्मणी इत्यर्थे ब्राह्मणी + रूपप् । **ब्राह्मणिकल्पा**—ब्राह्मणी + कल्पप् + टाप् । **घ—रूप—कल्प**—एते प्रत्ययाः । **चेलादीनि उत्तर** पदानि । एतेषु चेल-ब्रुव-गोत्रशब्दाः समासवृत्तौ कुत्सावाचिनः तैः सह 'कुत्सितानि कुत्सनैः' इति सूत्रेण समासः । मत-हत-शब्दाभ्यां तु 'विशेषणं विशेष्येण बहुलम् इत्यनेन' समासः । उदाहरणानि क्रमशः—**ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा । ब्राह्मणिमता । ब्राह्मणिहता ।**

नद्याः शेषस्यान्यतरस्याम्॥४४॥

नद्याः शेषस्य घादिषु परतो ह्रस्वो भवत्यन्यतरस्याम् । अङी च या नदी ङ्यन्तं च यदेकाच्, स शेषः । ब्रह्मबन्धुतरा / ब्रह्मबन्धूतरा ।

ॐ (वा) कृन्नद्याः प्रतिषेधः । लक्ष्मीतरा ।

नद्याः—नदीसंज्ञकस्य । ङ्यन्तस्यैकाचः उदाहरणम्—**स्त्रीतरा / स्त्रितरा ।**

उगितश्च ॥४५॥

उगितश्च परा या नदी तस्याः घादिषु परतो ह्रस्वो भवत्यन्यतरस्याम् । श्रेयसितरा / श्रेयसीतरा ।

श्रेयसी शब्द ईयसुन् प्रत्ययान्तः 'उगितश्च' इति ङीप् । एवं √विद + शतृ → वसु = विद्वस् + ङीप् = विदुषी तस्मात् तरप्-तमपौ **विदुषितरा / विदुषीतरा । विदुषितमा / विदुषीतमा** इत्यादि ।

ॐ (वा०) पुंवद्भावोऽप्यत्र पक्षे वाच्यः । तेन **श्रेयस्तरा । विद्वत्तरा** इत्यपि पक्षे भवति ।

आन्महतः समानाधिकरणजातीययोः ॥४६॥

समानाधिकरणे परे जातीये च महत आकारादेशः महादेवः । महाजातीयः ।

महादेवः—महांश्चासौ देवः इति कर्मधारयः । जातीयर् प्रत्ययः । **महाजातीयः**—महा प्रकारः इत्यर्थे 'प्रकारवचने जातीयर्' इति सूत्रेण महत्+जातीयर् ।

※(वा०) महदात्त्वे घास-कर-विशिष्टेषूपसंख्यानम पुंवद्वचनं च समानाधिकरणार्थम् । महत्या घासः **महाघासः** । एवं महत्याः करः **महाकरः** । महत्या विशिष्टः **महाविशिष्टः** ।

※(वा०) अष्टनः कपाले हविष्युपसंख्यानम् । अष्टसु कपालेषु संस्कृतम् इति **अष्टाकपालं** चरुं निर्वपेत् ।

※(वा०) गवि च युक्तेऽष्टन उपसंख्यानम् । अष्टौ गावो युक्ता अस्मिन्निति **अष्टागवं** शकटम् ।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥४७॥

द्वि, अष्टन् एतयोराकारादेशो भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः । द्वादश । द्वाविंशतिः । अष्टादश । अबहुव्रीह्यशीत्योः किम् ? द्विदशाः । द्व्यशीतिः ।

※(वा) प्राक्शतादित्येव । द्विशतम् । अष्टशतम् ।

अबहुव्रीह्यशीत्योः—बहुव्रीहिसमासे, अशीतिशब्दे चोत्तरपदे आत्त्वं न भवति । **द्विदशाः**—द्वि दश इति विग्रहः सुच्प्रत्ययान्तेन समासः । **द्व्यशीतिः**—द्वौ च अशीतिश्च द्वन्द्वसमासः ।

त्रेस्त्रयः ॥४८॥

'त्रि' एतस्य 'त्रयस्' आदेशः संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः । त्रयोदश । त्रयोविंशतिः ।

प्राक्शतात्प्रयोगः—त्रिशतम् । त्रिसहस्रम् ।

सूत्रे **त्रयः** इति सकारान्तं पदम् **त्रयस्** इत्यादेशो भवति । **त्रयोदश**—त्रयश्च दश च द्वन्द्वः । त्रयस्+दश इतिस्थितौ स् → रु → उ त्रय + उ दश = त्रयोदश ।

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥४९॥

चत्वारिंशत्प्रभृतौ संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः परतः सर्वेषां द्वि–अष्टन्–त्रि, एषां यदुक्तं तद् विभाषा भवति । द्विचत्वारिंशत् / द्वाचत्वारिंशत् । द्विपञ्चाशत् / द्वापञ्चाशत् । एवम् अष्टचत्वारिंशत् / अष्टाचत्वारिंशत् । अष्टपञ्चाशत् / अष्टापञ्चाशत् । त्रिचत्वारिंशत् / त्रयश्चत्वारिंशत् । त्रिपञ्चाशत् / त्रयःपञ्चाशत् ।

सूत्रे **सर्वेषाम्** इत्युक्त्या द्वि–अष्टन्–त्रि इति त्रिष्वपि विभाषा प्रवर्त्तते । अन्यथा अनन्तरस्य 'त्रेस्त्रयः' इत्यस्यैव विकल्पः स्यात् ।

हृदयस्य हृल्लेखयदण्लासेषु ॥५०॥

हृदयस्य 'हृत्' आदेशः लेख–यत्–अण्–लास, एषु परतः । हृदयं लिखतीति हृल्लेखः । यत्—हृद्यम् । अण्—हार्दम् । लासः —हृल्लासः ।

हृल्लेखः—हृदयं लिखति इति 'कर्मण्यण्' इत्यनेन √लिख् + अण् । अण्-प्रत्ययान्तस्यैव 'लेख' इत्यस्य ग्रहणं भवति, वार्तिक-भाष्यकारमते घञन्तेन षष्ठीसमासे **हृदयलेखः** इत्येव ।

हृद्यम् हृदयस्य प्रियम् हृदय+यत् । **हार्दम्**-हृदयस्येदम् हृदय + 'तस्येदम्' इत्यनेन अण् । **हृल्लासः**-हृदयस्य लासः । हृत्+लासः 'तोर्लि' इति तकारस्य लकारः ।

वा शोकष्यञ्रोगेषु ॥५१॥

शोक, ष्यञ्, रोग--एषु परतः हृदयस्य वा 'हृत्' इत्ययमादेशः । हृच्छोकः / हृदयशोकः । सौहार्द्यम् / सौहृदय्यम् । 'हृत्'

आदेशपक्षे 'हृद्भग........' इत्यादिनोभयपदवृद्धिः । हृद्रोगः / हृदयरोगः ।

हृच्छोकः—हृदयस्य शोकः इति तत्पुरुषे हृदयस्य 'हृत्' आदेशे हृत् + शोकः तकारस्य चकारे 'शश्छोटि' इत्यनेन शकारस्य छकारे, **हृच्छोकः** इति रूपं सिद्ध्यति **सौहार्द्यम्**—शोभनं हृदवमस्येति बहुव्रीहिः । तकारस्य जश्त्वेन दकारः । हृदयस्य पर्यायवाची हृत्-शब्दोऽप्यस्ति । तेनैव रूपद्वयस्य सिद्धौ सूत्रं पूर्वसिद्धस्यैव विधानार्थमिति ज्ञेयम् ।

पादस्य पदाज्यातिगोपहतेषु ॥५२॥

पादस्य 'पद' इत्ययमादेशो भवति आजि, आति, ग, उपहत एषु परतः । पादाभ्याम् अजति इति पदाजिः । पदातिः 'अज्यतिभ्यां पादे' इत्यौणादिक इञ् । निपातनादजेर्न 'वी' भावः । पदगः । पदोपहतः ।

पद—अकारान्तोऽयमादेशः । इति पदमञ्जरी-न्यासकारमतम् । √अज्, √अत् इति गमनार्थकौ धातू । **पदोपहतः**—पादेनोपहतः 'कर्तृकरणे कृता बहुलम्' इति समासः । 'पद्' आदेशपक्षे तु **पद्गः, पदुपहतः** इति भवतः ।

पद्यत्यतदर्थे ॥५३॥

अतदर्थे यति प्रत्यये पादस्य पत् । पादौ विध्यन्ति पद्याः शर्कराः ।

अतदर्थे किम् ? पाद्यं जलम् ।

❀(वा०) पद्भाव इके चरतावुपसंख्यानम् । पादाभ्यां चरति पदिकः । पाद + ष्ठन् 'पर्पादिभ्यः ष्ठन्' इत्यनेन ।

शरीरावयवस्यैव पादशब्दस्य ग्रहणमत्रेष्यते तेन परिमाणवाचिनो पादशब्दस्य न 'पत्' द्वाभ्यां पादाभ्यां क्रीतं द्विपाद्यम् ।

पद्याः—'विध्यत्यधनुषा' इत्यनेन पाद + यत् ।

पाद्यम्—पादाभ्यामर्थम् इति 'पादार्घाभ्याञ्च' इत्यनेन यत् ।

हिमकाषिहतिषु च ॥५४॥

हिम, काषिन्, हति—एषु परतः पादस्य 'पत्' आदेशः । पद्धिमम् । पत्काषिणो यान्ति । पद्धतिः ।

पद्धिमम्—पादस्य हिमम् । पद्+हिमम् 'झयो होऽन्य-तरस्याम्' इत्यनेन हकारस्य पूर्वसवर्णो धकारः ।

पत्काषिणः=पादचारिणः पादौ कषन्ति √कष् + णिनिः, उपपद-समासः । **पद्धतिः**—पादाभ्यां हन्यते इति √हन् + क्तिन् 'कर्तृकरणे कृता बहुलम्' इति समासः ।

ऋचः शे ॥५५॥

ऋक्सम्बन्धिनः पादशब्दस्य शे परतः 'पत्' इत्ययमादेशो भवति । पच्छो गायत्रीं शंसति । पादं पादं शंसति । 'संख्यैक-वचनात्……' इति शस् ।

शे—तद्धितीय 'शस्' प्रत्ययस्यावयवीभूतो यः 'श' तस्मिन् । **पच्छः**—पत् + शः तकारस्य चकारः, शकारस्य छकारः ।

वा घोषमिश्रशब्देषु ॥५६॥

एषु पादस्य वा 'पत्' आदेशः । पद्घोषः / पादघोषः । पन्मिश्रः / पादमिश्रः । पच्छब्दः / पादशब्दः ।

❀ (वा०) निष्के चेति वाच्यम् । पन्निष्कः / पादनिष्कः ।

पन्मिश्रः—पादेन मिश्रः 'पूर्वसदृश……' इत्यनेन तृतीयातत्पुरुषः । तकारस्यानुनासिको नकारः ।

पन्निष्कः—निष्कशब्दः सुवर्णजातिवाची । अत्रापि तकारस्यानु-नासिको नकारः ।

उदकस्योदः संज्ञायाम् ॥५७॥

उदकस्य संज्ञायां विषये 'उद' आदेशः । उदमेघो नाम

कश्चित्, यस्य औदमेघिः पुत्रः । उदवाहो नाम यस्य औदवाहिः पुत्रः ।

ꕥ (वा०) संज्ञायामुत्तरपदस्य उदकस्योपसंख्यानम् । लोहितोदः । क्षीरोदः ।

औदमेघिः, औदवाहिः—उभयत्र अपत्यार्थे इञ् । उदमेघ-उदवाहौ इत्युभावपि संज्ञाशब्दौ स्तः । **लोहितोदः**—लोहितम् उदकं यस्य सः । एवं **क्षीरोदः** क्षीरम् उदकं यस्य सः । जलाशयवाचिनौ द्वावपि ।

पेषंवासवाहनधिषु च ॥५८॥

एषु उदकस्य 'उद' आदेशः । उदपेषं पिनष्टि । 'स्नेहने पिषः' इति णमुल् । उदवासः । उदवाहनम् । उदधिः ।

एषु—पेषम्, वास, वाहन, धि—एतेषूत्तरपदेषु । **उदपेषम्**—उदक √पिष्लृ + णमुल् ।

उदधिः—उदकं धीयते अस्मिन्निति उदक √धा + कि । अत्र **उदधिः** = घट इत्यादिः । समुद्रार्थे तु पूर्वेणैव सूत्रेण सिद्धेः ।

एकहलादौ पूरयितव्येऽन्यतरस्याम् ॥५९॥

तुल्यजातीयेन = अनन्तरेण हलादिना । एकः हल् आदिर्यस्य तत् एक हलादि तस्मिन् पूरयितव्यवाचिनि अन्यतरस्याम् उदकस्य 'उद' आदेशः । उदकुम्भः / उदककुम्भः । उदपात्रम् / उदकपात्रम् ।

एकहलादौ इति किम् ? उदकस्थाली ।

पूरयितव्य इति किम् ? उदकपर्वतः ।

एकः = असहायः । **अनन्तरेण** = अव्यवहितेन । यस्मिन् शब्दे उत्तरपदे द्वौ हलौ आदौ न स्तः । 'स्थाली' इत्यत्र तु आद्यौ हलौ स-थ् इति द्वौ स्तः । **पूरयितव्ये** = जलादिना पदार्थेन अन्तर्व्याप्ते । पर्वतस्तु न तथा ।

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥६०॥

एषु परेषु उदकस्य 'उद:' अन्यतरस्याम् । उदकेन मन्थः उदमन्थः / उदकमन्थः । उदकेन ओदन उदौदनः / उदकौदनः । एवम् उदसक्तुः / उदकसक्तुः । उदकस्य विन्दुः उदविन्दुः / उदकविन्दुः । उदवज्रः / उदकवज्रः । उदभारः / उदकभारः । उदहारः / उदकहारः । उदवीवधः / उदकवीवधः । उदगाहः / उदकगाहः ।

मन्थः = द्रवद्रव्येण संपृक्ताः सक्तवः । मन्थौदनसक्तुभिः सह उदकस्य तृतीयातत्पुरुषः । बिन्दुवज्रवीवधैः षष्ठीतत्पुरुष· । भारहारगाहैः सह उपपदसमासः । **वीवधः** = भारवहनकाष्ठम् (बहँगी) ।

इको ह्रस्वोऽङ्यो गालवस्य ॥६१॥

इगन्तस्याङ्यन्तस्योत्तरपदे ह्रस्वो भवति गालवस्य मतेन । ग्रामणिपुत्रः / ग्रामणीपुत्रः । ब्रह्मबन्धुपुत्रः / ब्रह्मबन्धूपुत्रः ।

गालवग्रहणं पूजार्थं विकल्पानुवृत्तेः ।

व्यवस्थितविभाषा चेयम्—कारीषगन्धीपुत्रः । इयङ्-उवङ् भाविनामव्ययानां च न—श्रीकुलम् । भ्रूकुलम् ।

❀ (वा०) भ्रूकुंसादीनां तु भवत्येव, अकारश्च वा । भ्रकुंसः / भ्रुकुंसः / भ्रूकुंसः । भ्रकुटिः । भ्रुकुटिः / भ्रूकुटिः ।

ग्रामणीः—ग्रामं नयति ग्राम √नी + क्विप्, नकारस्य णकारः । **ब्रह्मबन्धूः**—ब्रह्मबन्धु + ऊङ् ।

अव्ययस्योदाहरणम्—**काण्डीभूतम्** । **वृषलीभूतम्** । **श्री-भ्रू** शब्दौ क्रमशः इयङ्-उवङ् भाविनौ **श्रियौ, भ्रुवौ** ।

एकतद्धिते च ॥६२॥

एकशब्दस्य तद्धिते, उत्तरपदे च ह्रस्वत्वं भवति ।

एकस्या आगतम् एकरूप्यम्। एकमयम् । उत्तरपदे—एकस्याः क्षीरम् एकक्षीरम्। एकदुग्धम् ।

एकरूप्यम्—एका + रूप्य 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' इत्यनेन। एवम् एकस्या भावः **एकत्वम्** । अत्र 'प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणम्' इति परिभाषा एकशब्देन टाप्प्रत्ययान्तो 'एका' इति गृह्यते ।

ङ्याषोः संज्ञाछन्दसोर्बहुलम् ॥६३॥

ङ्यन्तस्य आबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वत्वं भवति। ङ्यन्तस्य संज्ञायाम्—रेवतिपुत्रः। रोहिणिपुत्रः। न च भवति—नान्दीकरः। आबन्तस्य संज्ञायाम्—शिलवहम्। छन्दसि—अजक्षीरेण जुहोति ।

रेवतिपुत्रः—रेवत्याः पुत्रः इति षष्ठीतत्पुरुषः। ङ्यन्तस्य छन्दसि—**कुमारिदा, उर्विदा** । न च भवति—**जगतीच्छन्दः** । **शिलवहम्**-शिलायाः वहम् इति षष्ठीतत्पुरुषः । आबन्तस्यापि क्वचिन्न संज्ञायाम्-**लोमकागृहम्** । छन्दसि—**ऊर्णासूत्रेण** कवयो वयन्ति ।

त्वे च ॥६४॥

त्वे प्रत्यये ङ्यापोर्ह्रस्वो भवति बहुलम्। अजाया भावः अजत्वम्। रोहिणित्वम् ।

बहुलग्रहणात् पक्षे **अजात्वम्, रोहिणीत्वम्** इत्यपि भवतः।

इष्टकेषीकामालानां चिततुलभारिषु ॥६५॥

इष्टका, इषीका, माला—एषां चित, तूल, भारिषु उत्तरपदेषु यथासंख्यं ह्रस्वो भवति। इष्टकचितम्। इषीकतूलम्। मालभारिणी । अत्र तदन्तस्यापि ग्रहणम् । पक्वेष्टकचितम् इत्यादि ।

इष्टकचितम्—इष्टकाभिः चितम् 'कर्तृकरणे……' इति समासः ।

इषीकतूलम् –षष्ठीतत्पुरुषः । **इषीका** = तृणविशेषः । **मालभारिणी**— मालां भर्तुं शीलमस्या इति माला √भृ + णिनि । उपपदसमासः ।

खित्यनव्ययस्य ।।६६।।

खिदन्त उत्तरपदेऽनव्ययस्य ह्रस्वो भवति । कालिम्मन्या । हरिणिम्मन्या । मुमा ह्रस्वो न बाध्यते, अन्यथा ह्रस्वशासनमनर्थकं स्यात् ।

अनव्ययस्येति किम् ? दोषामन्यमहः । 'अनव्ययस्य' एतदेव ज्ञापकमत्र खिदन्तग्रहणस्य ।

कालिम्मन्या –कालीमात्मानं मन्यते काली √मन् + खश् दिवादित्वात् श्यन्, वक्ष्यमाणसूत्रेण मुम् । **ह्रस्वशासनम्**—ह्रस्वविधायकम् एतत्सूत्रम् । **खिदन्तग्रहणस्य**—अन्यथा प्रत्ययविधौ तदन्तविधेर्निषेधादव्ययात्परः खित्प्रत्यय एव नास्ति प्रत्ययस्य धातोर्विधानात् । तदन्तग्रहणे खिदन्तं 'मन्य' इति उत्तरपदं भवति ।

अरुर्द्विषदजन्तस्य मुम् ।।६७।।

अरुस्, द्विषत्—एतयोरजन्तानां च खिदन्त उत्तरपदे 'मुम्' आगमो भवति । अनव्ययस्येत्येव । अरुन्तुदः । द्विषन्तपः । अजन्तानाम्—कालिम्मन्या ।

अरुन्तुदः—अरुः=तुदति अरुस् तुद् + खश् । मुमि कृतेऽनुबन्धलोपे अरुम् स् तुद (तुदादित्वात् शः) संयोगान्तस्य सस्य लोपे मकारस्यानुस्वारे परसवर्णे च नकारे रूपं सिद्धम् । **द्विषन्तपः** द्विषतः तापयति द्विषत् √तापि (√तप् + णिच्) + खच् णिचः इकारलोपे 'खचि ह्रस्वः' इति आकारस्य ह्रस्वत्वम् ।

इच एकाचोऽम्प्रत्ययवच्च ।।६८।।

इजन्तस्य एकाचः खिदन्त उत्तरपदे अमागमो भवति । अम्प्रत्ययवच्च = द्वितीयैकवचनवच्च स भवति । 'अम्' इति द्विरावर्त्यते । गांमन्यः । स्त्रीम्मन्यः । नरम्मन्यः । श्रियम्मन्यः ।

द्वितीयैकवचनातिदेशात् आत्व-पूर्वसवर्ण-गुण-इयङ् उवङ् आदेशा भवन्ति ।

द्विरावर्त्यते—सूत्र-व्याख्यातृभिराचार्यैः । **द्विरावर्तते**—इति वृत्तौ पाठः तदा 'स्वयमेव' इति शब्दशक्तिस्वभावाद् बोध्यम् । **गांमन्यः**—आत्मानं गां मन्यते इति गो √मन् + खश् 'अम्' आगमे द्वितीयैकवचनम् 'अम्' विभक्तिमाश्रित्य 'औतोऽम्शसोः' इत्यात्वम् । एवं पूर्वसवर्णादयोऽपि प्रयोगानुसारेण बोध्याः । **स्त्रीम्मन्यः**–पक्षे **स्त्रियम्मन्यः** । श्रियमात्मानं ब्राह्मण-कुलं मन्यते इति विग्रहे **श्रीमन्यम्** इति भवति । तत्र श्रीशब्दो ब्राह्मणकुल-वाची इति 'स्वमोर्नपुंसकात्' इत्यनेन 'अम्' इत्यस्य लुक् ।

वाचंयमपुरन्दरौ च ॥६९॥

एतौ निपात्येते । वाचंयमः = मौनी । पुरन्दरः = इन्द्रः ।

वाचंयमः -वाचं यच्छति वाच् √यम् + खच् । वाचम् इति अमन्तं पदं निपात्यते । **पुरन्दरः**—पुरं दारयति पुर् √दॄ + खच् 'दार' इत्यस्य ह्रस्वत्वमपि निपात्यते ।

कारे सत्यागदस्य ॥७०॥

कारशब्द उत्तरे सत्य, अगद–एतयोर्मुम् । सत्यं करोति सत्यङ्कारः । अगदङ्कारः ।

❀ (वा०) गिलेऽगिलस्य मुम् वक्तव्यः । तिमिङ्गिलः ।

सत्यङ्कारः—सत्य √कृ+अण् सत्यम् कारः इत्यवस्थायां मकार-स्यानुस्वार-परसवर्णेन ङकारः ।

❀ (वा०) गिलगिले चेति वक्तव्यम् । **तिमिङ्गिलगिलः** ।

❀ (वा०) 'अस्तु' इत्यस्यापि कारे मुम् । **अस्तुङ्कारः** ।

❀ (वा०) धेनोर्भव्यायां मुम् । **धेनुम्भव्या** ।

❀ (वा०) लोकस्य पृणे मुम् । **लोकम्पृणः** ।

❀ (वा०) इत्येऽनभ्याशस्य । **अनभ्याशमित्यः** । **अनभ्याशम्**=दूरम् ।

❀ (वा०) उष्णभद्रयोः करणे । **उष्णङ्करणम्** । **भद्रङ्करणम्** ।

श्येनतिलस्य पाते ञे ॥७१॥

श्येन–तिलयोः पातशब्द उत्तरे ञ प्रत्यये परे मुमागमो भवति । श्यैनम्पाता मृगया । तैलम्पाता ।

श्यैनम्पाता—पातः √पत्+घञ् । श्येनस्य पातः इति श्येनपातः । श्येनपातः अस्यां क्रियायामिति 'घञः साऽस्यां क्रियेति ञः' ततः टाप् ।

रात्रेः कृति विभाषा ॥७२॥

रात्रेः कृदुत्तरपदे विभाषा मुमागमः । रात्रिंचरः / रात्रिचरः । रात्रिमटः / रात्र्यटः । अप्राप्तविभाषेयम् । खिति नित्यम्—रात्रिम्मन्यः ।

रात्रिञ्चरः—रात्रि √चर् + टः । मकारस्यानुस्वार-परसवर्णेन ञकारः **रात्रिञ्चरः** ।

नलोपो नञः ॥७३॥

नञो नकारस्य लोपो भवति उत्तरपदे । अब्राह्मणः । अवृषलः ।

❀(वा०) नञः क्षेपे तिङ्युपसंख्यानम् । अपचसि त्वं जाल्म ।

अब्राह्मणः—न ब्राह्मणः इति नञ् समासः नलोपे सति अकारोऽत्र शिष्यते । **क्षेपः**=निन्दा ।

तस्मान्नुडचि ॥७४॥

तस्मात्=लुप्तनकारात् नञः 'नुट्' इत्यस्यागमो भवति अजादावुत्तरपदे । अनश्वः । अनजः ।

तस्मात् किम् ? नञ एव हि स्यात् । पूर्वान्ते हि 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति नुट् प्राप्नोति ।

अनश्वः—न अश्वः इति नञ्समासः । न लोपे सति अ अश्व इति

स्थितौ अकारस्य 'नुट्' अनुबन्ध-लोपो भवति । पूर्वान्ते नुटि 'अन्' इति पदम् नान्तम्, तस्मान्नुटि 'अन्नश्वः' इत्यनिष्टः प्रयोगः स्यात् ।

न भ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्र-नक्रनाकेषु प्रकृत्या ॥७५॥

एषु नञ् प्रकृत्या । न भ्राजते इति नभ्राट् क्विबन्तः । नपात् शत्रन्तः । न वेत्ति—नवेदाः असुन्प्रत्ययान्तः । सत्सु साधवः सत्याः । न सत्याः असत्याः, न असत्याः—नासत्याः । न मुञ्चति—नमुचिः । नास्य कुलं नकुलः । नास्य खं नखः । न स्त्री न पुमान् नपुंसकम् । स्त्रीपुंसयोः पुंसकनिपातः । न क्षरति नक्षत्रम् । न क्रामति नक्रः । नास्मिन् अकम् अस्ति इति नाकः ।

प्रकृत्या—प्रकृतिभावः । नञो नलोपो न भवतीत्यर्थः । **नवेदाः**—प्रथमैकवचने नवेदस् इत्यस्य दकाराकारस्य 'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घः । **सत्याः**—साध्वर्थे सत् + यत् । **नमुचिः**—न √मुक् + कि । **अकम्**—कम् = सुखम् तद्भिन्नम् अकम् = दुःखम् । **नभ्राट्**⋯⋯ नाक प्रभृतयः सर्वे रूढिशब्दाः यथाशक्यं व्युत्पादिताः सन्तिः ।

एकादिश्चैकस्य चादुक् ॥७६॥

एकादिर्नञ् प्रकृत्या भवति, एकस्य च 'अदुक्' आगमो भवति । एकेन न विंशतिः एकान्नविंशतिः । पूर्वान्तोऽयम् । पदान्तलक्षणोऽनुनासिकविकल्पो यथा स्यात् ।

अदुक्—वृत्तिकारेण 'आदुक्' इति व्याख्यातम् । पदमञ्जरीकारेणापि 'आदुक्' इति सन्धिच्छेदो विहितः न्यासकारेण च 'अदुक्' इति समर्थितः ।

एकान्नविंशतिः—एक + अदुक् → अद् + न विंशतिः इति स्थितौ अकः सवर्णे दीर्घो दकारस्य चानुनासिको नकारः । **पूर्वान्तः**—'अदुक्' इत्ययं कित्वात् 'आद्यन्तौ टकितौ' इति नियमेनान्तावयवो भवति ।

अनुनासिकविकल्पः—'यरोऽनुनासिकेऽनुनासिको वा' इत्यनेन ।

नगोऽप्राणिष्वन्यतरस्याम् ।।७७।।

'नगः' इत्यत्र नञ् प्रकृत्याऽन्यतरस्याम् अप्राणिषु । न गच्छन्तीति नगाः पर्वताः गमेर्डः / अगाः ।

अप्राणिषु किम् ? अगो वृषलः शीतेन ।

अगाः—पक्षे नलोपो भवति । **अगः** = जडः ।

सहस्य सः संज्ञायाम् ।।७८।।

सहस्य 'स' इत्यादेशो नाम्नि । साश्वत्थम् । सपलाशम् ।

नाम्नि = संज्ञायाम् । **साश्वत्थम्**—अश्वत्थेन सह वर्तते इति 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः ।

ग्रन्थान्ताधिके च ।।७९।।

ग्रन्थान्ते, अधिके च वर्तमानस्य सहशब्दस्य 'स' इत्ययमादेशः । सकलं ज्यौतिषमधीते । समुहूर्त्तम् । ससङ्ग्रहं व्याकरणमधीते । कलान्तम् । मुहूर्त्तान्तम् । ग्रहान्तम् ।

सकलम्—कला=कालविशेषः, तत्सहचरितो ग्रन्थोऽपि कला । सह कलया वर्तते । **कलान्तम्**—अन्तवचने अव्ययीभावः । कलाग्रन्थपर्यन्तमिति विग्रहः । अधिकेऽर्थे **सद्रोणा** खारी । **समाषः** कार्षापणः ।

द्वितीये चानुपाख्ये ।।८०।।

द्वयोः प्रयुक्तयोरप्रधानभूतो द्वितीयः । स द्वितीयः उपाख्यायते=प्रत्यक्षत उपलभ्यते यः उच्यते—उपाख्यः, उपाख्यादन्योऽनुपाख्यः=अनुमेयः । तस्मिन् द्वितीयेऽनुपाख्ये सहस्य 'स' इत्यादेशः । साग्निः कपोतः । सपिशाचा वात्या । अग्न्यादयः साक्षादनुपलभ्यमानाः कपोतादिभिरनुमीयमाना अनुपाख्या भवन्ति ।

साग्निः—अग्निना सह वर्तते । अत्र 'अग्निः' द्वितीयः प्रधानता तु कपोतस्यैव । स एवाग्निः न प्रत्यक्षं दृश्यते कपोतेन तस्यानुमानं भवति यत्र कपोतस्तत्राग्निः ।

अव्ययीभावे चाकाले ॥८१॥

अव्ययीभावे समासे अकालवाचिन्युत्तरपदे सहस्य 'स' इत्ययमादेशो भवति । सचक्रं धेहि । सपुरं व्रज ।

सचक्रम्—चक्रेण सह युगपत् इति यौगपद्येऽव्ययीभावः । **सपुरं व्रज**—वृत्तौ **सधुरं प्राज** इत्युदाहृतम् । **सधुरम्**—ऋक्पूरब्धू......... इति अच् समासान्तः ।

वोपसर्जनस्य ॥८२॥

उपसर्जनस्यावयवः समासे उपसर्जनम् । तदवयवस्य सह-शब्दस्य 'स' इत्ययमादेशो वा । सपुत्रः / सहपुत्रः ।

अवयवः—अत्र सर्वेऽवयवा उपसर्जनीभूता यत्र स सर्वोपसर्जनो बहुव्रीहिर्गृह्यते । **उपसर्जनस्य** इति पदेऽवयवार्थे षष्ठीति तात्पर्यम् । **सपुत्रः**-पुत्रेण सह विद्यमानः इति बहुव्रीहिः । नेह-**सहयुध्वा** । तत्पुरुषोऽयम् न बहुव्रीहिः । नास्त्यत्र सहशब्दः उत्तरपदे परतो विशेषणम् ।

प्रकृत्याशिष्यगोवत्सहलेषु ॥८३॥

प्रकृत्या 'सह' शब्दो भवति आशिषि विषये अगो-वत्स-हलेषु । स्वस्ति देवदत्ताय सहपुत्राय सहच्छात्राय ।

अगोवत्सहलेषु किम् ? स्वस्ति भवते सगवे / सहगवे । सवत्साय / सहवत्साय । सहलाय / सहहलाय ।

स्वस्ति.........छात्राय--आशीर्वादात्मकमिदं वाक्यम् । **सवत्साय / सहवत्साय** --'वोपसर्जनस्य' इति विकल्पेन सहस्य 'स'भावः ।

समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु ॥८४॥

समानस्य 'स' इत्ययमादेशो भवति छन्दसि विषये मूर्धन् प्रभृति, उदर्क-इत्येतान्युत्तरपदानि वर्जयित्वा । अनुभ्राता सगर्भ्यः ।

अनुसखा सयूथ्यः। समानो गर्भः सगर्भः, तत्र भवः 'सगर्भसयूथसनुताद्यत्' इत्यनेन यत्।

सयूथ्यः—समानं यूथम् सयूथं कर्मधारयः, तत्र भवः। मूर्धादिषु परेषु **समानमूर्धा, समानप्रभृतयः, समानोदर्काः**। 'समानस्य' इति योगविभागात् **सपक्षः, सजातीयः, साधर्म्यम्** इत्यादयः सिद्धयन्ति।

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥८५॥

एषूत्तरेषु समानस्य 'स' इत्ययमादेशो भवति। सज्योतिः। सजनपदः। सरात्रिः। सनाभिः। सनामा। सगोत्रः। सरूपः। सस्थानः। सवर्णः। सवयाः। सवचनः। सबन्धुः।

सज्योतिः—समानं ज्योतिः अस्य बहुव्रीहिः। एवं सर्वत्र। तत्पुरुषेऽपि एतत्सूत्रं प्रवर्तते विशेषानुपादानात्।

चरणे ब्रह्मचारिणि ॥८६॥

चरणे गम्ये ब्रह्मचारिण्युत्तरपदे समानस्य 'स' इत्ययमादेशः। समानो ब्रह्मचारी सब्रह्मचारी। ब्रह्म=वेदः, तदर्थं व्रतमपि ब्रह्म। तच्चरति इति ब्रह्मचारी। समानः तस्यैव ब्रह्मणः समानत्वात्।

समानः = समाने ब्रह्मणि व्रतचारी=ब्रह्मचारी = **सब्रह्मचारी**। एकस्मिन् समये यः समाने वेदे व्रतं चरति सः। **चरणः**—अत्र चरणशब्दः कठ-कलापादि शाखाविशेषार्थको मुख्यः, अत्र तदध्येतरि वर्तते। समानो ब्रह्मचारी अत्र कर्मधारय समासः।

तीर्थे ये ॥८७॥

यत्प्रत्ययान्ते तीर्थे उत्तरपदे समानस्य सः। सतीर्थ्यः। 'समानतीर्थेवासी' इति यत्।

सतीर्थ्यः— समाने तीर्थे वसति। पूर्वं तीर्थं सतीर्थम् इति कर्मधारयं कृत्वा ततः सतीर्थ+यत्। सतीर्थ्यः = एकगुरुकः। तीर्थम् = गुरुः, विद्याश्रमश्च।

विभाषोदरे ॥८८॥

यत्प्रत्ययान्ते उदरशब्दे उत्तरपदे विभाषा समानस्य 'स' इत्ययमादेशः। सोदर्यः / समानोदर्यः। समानोदरे शयित……' इति यत्।

सोदर्यः=भ्राता। अत्र 'सोदराद्यः' इत्यनेन यः प्रत्ययोऽपि। रूपं त्वेकमेव।

दृग्दृशवतुषु ॥८९॥

एषूत्तरपदेषु समानस्य 'स' इत्ययमादेशः। सदृक्। सदृशः।

❀(वा०) दृक्षे च वक्तव्यम्। सदृक्षः।

❀(वा०) क्स प्रत्ययोऽपि तत्रैव वक्तव्यः। वतुग्रहण-मुत्तरार्थम्।

सदृक्—समानम् आत्मानं पश्यति 'त्यदादिषु दृशः…………' इति सूत्रस्थेन 'समानान्ययोश्चेति वक्तव्यम्' इति वार्तिकेन समान √दृश् + क्विन्।

सदृशः—पूर्वसूत्रेण समान √दृश् + कञ्।

सदृक्षः—समान √दृश् + क्स।

इदं किमोरीश्की ॥९०॥

इदम्, किम्—एतयोर्यथासंख्यम् ईश्, की एतावादेशौ दृग्-दृश-वतुषु। ईदृक्। ईदृशः। इयान्। कियान्। 'किमिदंभ्याम् वो घः' इति 'वतुप्' वकारस्य च घः।

❀(वा०) दृक्षे चेति वक्तव्यम्। ईदृक्षः। कीदृक्षः।

इयान्—इदम् परिमाणमस्येति इदम् + वतुप्। वकारस्य घः तस्य च 'इय' आदेशः। **कियान्**—अत्रापि घस्य 'इय'। **कीदृक्**। **कीदृशः** इत्युभय-त्रापि 'की' बोध्यम्।

आ सर्वनाम्नः ॥६१॥

दृग्-दृश-वतुषु सर्वनाम्न आकारादेशः । यादृक् । यादृशः । यावान् ।

❀(वा०) दृक्षे च वक्तव्यम् । यादृक्षः ।

यादृक्—यत् √दृश् + क्विन् । तकारस्य 'आ' अ + आ = आ सवर्णदीर्घ । एवं **तादृक्, त्वादृक्** इत्यादयः ।

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥६२॥

विष्वक्, देव—एतयोः सर्वनाम्नश्च टेः स्थाने 'अद्रि' इत्ययमादेशो भवति अञ्चतौ व प्रत्ययान्ते उत्तरपदे । विष्वक् अञ्चति इति विष्वद्र्यङ् । देवानञ्चति देवद्र्यङ् । तद्र्यङ् ।

❀(वा०) अद्रि-सध्र्योरन्तोदात्तत्वनिपातनं कृत्स्वर-निवृत्त्यर्थम् । तत्र यणादेशे कर्त्तव्ये 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितो भवति ।

वप्रत्यये—'व' प्रत्ययो यस्मात् स वप्रत्ययस्तस्मिन् । **विष्वद्र्यङ्**—विष्वक् √अञ्च् + क्विन् टेः = अक् इत्यस्य अद्रि विष्वद्रि + अञ्च् यणि कृते विष्वद्र्यञ्च् । अत्र √अञ्च् इति व (क्विन्) प्रत्ययान्तः प्रथमैक-वचने 'विष्वद्र्यङ्' इति रूपम् । स्त्रियाम् **विष्वद्रीची, देवद्रीची, तद्रीची** इति प्रयोगाः बोध्याः ।

❀(वा) छन्दसि स्त्रियां बहुलमिति वक्तव्यम् । अत्र न भवति—**विश्वाची, घृताची** । अत्र भवति—**कद्रीची** ।

सूत्रे 'व' ग्रहणेनेदं सिद्ध्यति यदन्यत्र धातुग्रहणे तदादिविधिर्भवति । तेन **अयस्कृतम्** इत्यत्र अयः + कृतम् इति स्थितौ 'अतः कृकमि ......' इति सूत्रेण विसर्गस्य सकारो भवति ।

समः समि ॥६३॥

'सम्' इत्यस्य 'समि' इत्ययमादेशो भवति अञ्चतौ व प्रत्ययान्ते उत्तरपदे । सम्यङ् । सम्यञ्चौ । सम्यञ्चः ।

सम्यङ्—सम् √अञ्च् + क्विन् । समः 'समि' कृते यण् सन्धिः ।

तिरसस्तिर्यलोपे ॥६४॥

'तिरस्' इत्यस्य 'तिरि' इत्ययमादेशो भवति अञ्चतौ व प्रत्ययान्ते । यदा अस्य लोपो न भवति । तिर्यङ् ।

अलोपे किम् ? तिरश्चः ।

अलोपे—यदा अञ्चतेः 'अ'लोपो न भवति । **तिरश्चः**-तिरस् अञ्च् + शस् । अत्र 'अचः' इत्यनेन अकारस्य लोपः, सकारस्य श्चुत्वेन शकारः ।

सहस्य सध्रिः ॥६५॥

'सह' इत्यस्य 'सध्रि' इत्यादेशः अञ्चतौ वप्रत्ययान्त उत्तरपदे । सध्र्यङ् । सध्र्यञ्चौ । सध्र्यञ्चः ।

सध्र्यङ्—सहस्य 'सध्रि' आदेशे यण् सन्धिः ।

सध मादस्थयोश्छन्दसि ॥६६॥

छन्दसि विषये माद, स्थ–एतयोः परतः सहस्य 'सध' इत्ययमादेशः । सधमादो द्युम्नि । सधस्थः ।

सधमादः—मादः– √मद् + घञ् । मादेन सह वर्तते इति बहुव्रीहिः । **सधस्थः**—सह तिष्ठति इति सह √स्था + क उपपद समासः ।

द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥६७॥

द्वि, अन्तर्—आभ्यामुपसर्गाच्चोत्तरस्य 'अप्' इत्येतस्य ईकारादेशः । द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् ।

❀(वा०) देवयजने 'समाप' इतीत्वप्रतिषेधो वाच्यः । समापं देवयजनम् ।

❀(वा०) ईत्वमनवर्णादिति वक्तव्यम् । इह मा भूत्– प्रापम् । परापम् ।

द्वीपम्—द्विर्गता आपो यस्मिन्निति बहुव्रीहिः। द्वि + अप् अकारस्य ईकारः, सवर्णदीर्घः । 'ऋक् पूरप्.........' इत्यादिना सूत्रेण अकारः समासान्तः।

ऊदनोर्देशे ॥९८॥

अनोरुत्तरस्य 'अप्' इत्यस्य ऊकार आदेशो देशेऽभिधेये। अनूपो देशः।

❀(वा०) कु-सु-युभ्यश्चेति वाच्यम्। कूपः। सूपः। यूपः।

अनूपः—अनुगता आपो यस्मिन्निति बहुव्रीहिः। दीर्घोच्चारणम् अवग्रहार्थम्। **अवग्रहः** = यत्र समासावयवानां पृथक् रूपाणि प्रदर्श्यन्ते सः।

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सु-कोतिकारकरागच्छेषु ॥९९॥

अषष्ठीस्थस्य अतृतीयास्थस्य, अन्यशब्दस्य दुक् आगमः एषु परतः। अन्या आशीः अन्यदाशीः। एवम् अन्यदाशा। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यत्कारकम्। अन्यद्रागः। अन्यदीयम्।

अषष्ठ्यतृतीयेति किम्? अन्यस्य आशीः अन्याशीः। अन्येन आस्थितम् अन्यास्थितम्।

अन्या आस्था **अन्यदास्था** इत्यपि बोध्यम्। **अन्यदीयम्**—अन्यस्मिन् भवम्। इयमपि कारिका विशेषेणद्धरणीया—

दुगागमोऽविशेषेण वक्तव्यः कारकच्छयोः।
षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु॥

षष्ठी-तृतीया इति द्वयोः प्रतिषेधः सूत्रेषु आशीः प्रभृतिषु सप्तस्वेव नान्यत्र। तेन अन्यस्य कारकः इति **अन्यत्कारकः**। अन्यस्येदम् अन्यदीयम् इत्यपि सिद्ध्यतः।

अर्थे विभाषा ॥१००॥

अर्थशब्द उत्तरे अन्यस्य विभाषा दुगागमः। अन्यदर्थः / अन्यार्थः।

अन्यदर्थः—अन्यस्मै इदम् इति चतुर्थी तत्पुरुषः। **अन्यार्थः**—समासे कृते दुगभावे दीर्घ-सन्धिः।

कोः कत्तत्पुरुषेऽचि ॥१०१॥

'कु' इत्येतस्य 'कत्' इत्ययमादेशो भवति अजादावुत्तरपदे। कदजः। कदश्वः।

तत्पुरुषे किम्? कूष्ट्रो राजा।

'अचि' इति किम्? कुपुरुषः।

❀(वा०) कदभावे त्रावुपसंख्यानम्। कुत्सितास्त्रयः कत्त्रयः।

कदजः—कुत्सितः अजः इति 'कुगतिप्रादयः' इति समासः। **कूष्ट्रः**—कुत्सितः उष्ट्रो यस्य सः।

रथवदयोश्च ॥१०२॥

एतयोः परतः कोः 'कत्' आदेशः। कद्रथः। कद्वदः।

कद्रथः—कुत्सितो रथः इति 'कुगति प्रादयः' इत्यनेन समासः।

तृणे च जातौ ॥१०३॥

तृणे परे जातौ वाच्यायां कोः कत्। कत्तृणा नाम जातिः।

जातिः—तृणस्य कश्चित् प्रकारः।

का पथ्यक्षयोः ॥१०४॥

पथ्यक्षयोः परतः कोः 'का' आदेशः। कापथः। काक्षः।

कापथः—कुत्सितः पन्थाः 'ऋक्पू...... ......' इत्येनाच् समासान्तः। **काक्षः**—कुत्सितः अक्षः इति तत्पुरुषः। अक्षः=धुरी। अथवा कुत्सिते अक्षिणी यस्य सः इति बहुव्रीहिः, 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इत्यनेन षच् समासान्तः।

ईषदर्थे ॥१०५॥

ईषदर्थे च वाच्ये कोः 'का' आदेशः । कामधुरम् । अजादावपि कोष्णम् ।

ईषदर्थे—वृत्तौ 'ईषदर्थे च' इति पाठः । **कामधुरम्**—ईषत् मधुरम् । **कोष्णम्** —ईषदर्थे परत्वात् 'कत्' इत्यमुं बाधित्वा कोः 'का' आदेशः ।

विभाषा पुरुषे ॥१०६॥

पुरुषे परे विभाषा 'का' आदेशः । अप्राप्तविभाषेयम् । कापुरुषः / कुपुरुषः । ईषदर्थे तु पूर्वविप्रतिषेधेन नित्यं 'का' आदेशः । कापुरुषः ।

कापुरुषः--कुत्सितः पुरुषः इति विग्रहः । द्वितीयोदाहरणे ईषत् पुरुषः **कापुरुषः** इति ।

कवं चोष्णे ॥१०७॥

उष्णे परे कोः 'कव' आदेशः 'का' च विभाषा । कवोष्णम् / कोष्णम् / कदुष्णम् ।

कदुष्णम्—ईषद् उष्णम् इति विग्रहे पक्षे कोः 'कत्' ।

पथि च छन्दसि ॥१०८॥

पथिशब्दे परे छन्दसि वा 'कव' आदेशः । पक्षे 'का' विभाषा । कवपथः / कापथः / कुपथः ।

कुपथः—कुत्सितः पन्थाः इति 'ऋक्पूरब्धू·······' इत्यकारः समासान्तः । कव–का इत्यनयोर्विकल्पकत्वात्पक्षे 'कुः' एव ।

पृषोदरादीनि यथोपदिष्टम् ॥१०९॥

एतानि शब्दरूपाणि यथोपदिष्टान्येव साधूनि भवन्ति । यानि यानि यथा शिष्टैरुच्चारितानि तथाऽवगन्तव्यानि । पृषदुदरं

यस्य सः पृषोदरः । 'त'लोपो निपात्यते । वारि वाहको बलाहकः । पूर्वपदस्य 'ब' शब्द आदेशः, उत्तरपदादेश्च लत्वम् । जीवनस्य मूतो जीमूतः । 'वन' शब्दस्य लोपः । पिशिताशः पिशाचः । यथासंख्यं 'पिश-अच' आदेशौ ।

पृषोदरादीनि=पृषोदरप्रकाराणि । प्रकारः=सादृश्यम् । **यथोपदिष्टानि**—यथा+उपदिष्टानि=उच्चारितानि=ग्रन्थेषु प्रयुक्तानि । सूत्रे **यथोपदिष्टम्** इति पदे वीप्सायाम् अव्ययीभावः । तदेव सुस्पष्टं करोति—यानि यानि ···· **अवगन्तव्यानि** । **शिष्टाः**—यथार्थवेदिनो यथाविहित-प्रयोक्तारश्च विद्वांसः । अष्टाध्यायी अपि—शिष्टपरिज्ञानार्था ।

पृषत्=**जीमूतः**—जीवनस्य=जलस्य मूतः=भाजनम् । एवम् शवानां शयनम् **श्मशानम्** । ऊर्ध्वं खम्=विलम् अस्य इति **उलूखलम्** । **पिशाचः**=पिशितम्=मांसम् अश्नाति सः । तृणमयम् आसनम् **बृसी**=ब्रुवन्तोऽस्यां सीदन्ति इति । मह्यां रौति इति मयूरः । एवम् **अश्वत्थ-कपित्थप्रभृतयोऽपि** बोध्याः ।

❀ (वा०) दिक्शब्दस्योत्तरस्य तीरस्य तारो वा । **दक्षिणतीरम्** / **दक्षिणतारम्** । **उत्तरतीरम्** / **उत्तरतारम्** ।

❀ (वा०) षष उत्वं दतृ-दश-धासूत्तरपदादेः ष्टुत्वं च । षड् दन्ता अस्य **षोडन्** । षट् च दश च **षोडश** ।

❀ (वा) धासु वा । **षोढा**/**षड्धा** ।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

निरुक्तम्=निर्वचन-प्रकारः । तत् पञ्चविधम् । **वर्णविकारः**—कौ जीर्यते कुञ्जरः कुशब्दस्य नुक्—आगमः । **वर्ण विपर्ययः**—हिनस्ति इति सिंहः । 'ह-स' एतयोः वर्णपरिवर्तनम् । **वर्णविकारः**—षोडन् । षकारस्य उत्वम् । **वर्णनाशः**—पृषोदरः । तकारस्य लोपः । **अर्थातिशयेन**—प्रसिद्धार्थ-भिन्नेन । धातोः **योगः**=सम्बन्धः **मयूरः**—'रु' धातोः रमणत्वार्थः ।

संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ ॥११०॥

एतत्पूर्वस्य अह्नस्य स्थाने 'अहन्' इत्ययमादेशो भवत्य-

न्यतरस्यां ङौ परतः । द्वयोरह्नोर्भवः द्वयह्नः द्वयहनि / द्वयह्नि / द्वयह्ने । व्यह्नि / व्यहनि / व्यह्ने ।

द्वयह्नः—समासे कृते 'कालाट्ठञ्' इति भवार्थे ठञ्, तस्य लुक् । 'राजाहःसखिभ्यष्टच्' इति टच् समासान्तः । **द्वयह्नि / द्वयहनि**—'विभाषा ङिश्योः' इति पाक्षिकः अकारलोपः ।

व्यह्नः—व्यपगतम् अहः इति प्रादिसमासः । एवं सायम् अह्नः सायाह्नः । **सायाह्नि / सायाहनि / सायाह्ने** । सायाह्न शब्दे एकदेशि-समासः, मकारस्य लोपश्च भवति । एतदेव ज्ञापकं 'पूर्वापर ' सूत्रेण पूर्वादिभ्योऽन्यस्यापि समासो भवति तेन मध्यम् अह्नः **मध्याह्नः** इत्यपि सिद्धयति ।

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥१११॥

ढ-रेफयोर्लोपो यस्मिन् स ढ्रलोपः । तस्मिन् परे पूर्वस्य अणः स्थाने दीर्घो भवति । लीढम् । गूढम् ।

'अणः' इति किम् ? आवृढम् ।

लीढम्—√लिह् + क्त । अत्र हल्-सन्धिकार्ये कृते √लिह् + ढ इति दशायां पूर्वढकारस्य लोपे तन्निमित्ते परढकारे परतः पूर्वस्येकारस्य दीर्घः । **गूढः**—√गुह् + क्त ।

रकारस्योदाहरणम्—**नीरक्तम्**—निर् + रक्तम् 'रोरि' इत्यनेन पूर्वरकारस्य लोपः । एवम् **हरी रम्यः**—हरिस् + रम्यः सस्य रुत्वे, उकार-लोपे तदनन्तरम् रकारस्य लोपः ।

सहिवहोरोदवर्णस्य ॥११२॥

एतयोरवर्णस्य ओकार आदेशः ढ्रलोपे सति । सोढा । वोढा ।

अवर्णस्य किम् ? ऊढः ।

सोढा—√सह् + तृच् । **वोढा**—√वह् + तृच् । उभयत्र हकारस्य, तृचः तकारस्य च ढः, 'ढोढे लोपः' इत्यनेन पूर्वढकास्य लोपः ।

साढ्यै साढ्वा साढेति निगमे ॥११३॥

एते निपात्यन्ते निगमे । साढ्यै समन्तात् । साढ्वा शत्रून् । साढा—इति तृचि रूपम् ।

निगमे=वेदे । **साढ्यै**—साढ्वा—√सह् + क्त्वा तस्य पक्षे 'ध्यै' । अत्र ओत्वाभावो निपात्यते । भाषायां तु सोढ्वा, सोढा इति । **साढा**—√सह् + तृच् । सूत्रे साढ + इति पदच्छेद उचितः तेन निष्ठायामपि 'आषाढः' इति प्रयोगः सिद्ध्यति ।

संहितायाम् ॥११४॥

यदित ऊर्ध्वमनुक्रमिष्यामः 'संहितायाम्' इत्येवं तद् वेदितव्यम् । वक्ष्यति 'द्व्यचोऽतस्तिङः' इति । विद्मा हि त्वा सत्पतिं शूर गोनाम् ।

विद्मा—√विद् + लट्→मस् 'स उत्तमस्य' इति सकारलोपः । 'द्व्यचोऽतस्तिङः' इत्यनेन संहितायां दीर्घः । पदपाठे तु 'विद्म' इत्येव ।

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्र स्रुवस्वस्तिकस्य ॥११५॥

कर्णे परे लक्षणवाचिनो दीर्घो भवति पूर्वपदस्य विष्टादीन् वर्जयित्वा । दात्राकर्णः । द्विगुणाकर्णः । द्व्यङ्गुलाकर्णः ।

यत्पशूनां स्वामिविशेष-सम्बन्धज्ञापनार्थं दात्रादिना क्रियते तदिह लक्षणं गृह्यते ।

लक्षणस्येति किम् ? शोभनकर्णः ।

अविष्टादीनामिति किम् ? विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ।

लक्षणम् = चिह्नम् । **दात्राकर्णः**—दात्रम् = दात्राकारं (चिह्नम्) कर्णे यस्य सः । एवं सर्वत्र बहुव्रीहिसमासो बोध्यः । **द्व्यङ्गुलाकर्णः**—द्वयोः

अङ्गुल्योः समाहारः द्व्यङ्गुलम्, तदाकारं चिह्नमपि द्व्यङ्गुलम् कर्णे यस्य सः।

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥११६॥

क्विप्प्रत्ययान्तेषु एषूत्तरेषु पूर्वस्य दीर्घो भवति संहितायां विषये। उपानत्। उपावृत्। प्रावृट्। मर्माविध्। नीरुक्। ऋतीषट्। परीतत्।

इह कस्मान्न—पटुरुक्। तिग्मरुक्। गतिकारकयोरेव दीर्घविधानात्।

उपानत्—उप√नह् + क्विप्। **प्रावृट्**—प्र √वृष् + क्विप्। **परीतत्**—परि √तन + क्विप्। अनुनासिकस्य नकारस्य लोपे तुक्।

इह···विधानात्—'विभाषा' इत्यस्यानुवृत्त्या तस्याश्च व्यवस्थानात् अयमर्थलाभः।

वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ॥११७॥

वन, गिरि—एतयोः परयोर्यथासंख्यं कोटरादीनां किंशुलुकादीनां च दीर्घो भवति संज्ञायाम्। कोटरावणम्। सिध्रकावणम्। किंशुकागिरिः। अञ्जनागिरिः।

कोटर, मिश्रक, सिध्रक, पुरग, शारक—कोटरादिः। किंशुक, अञ्जन, भञ्जन, लोहित, कुक्कुट—किंशुकादिः।

कोटरावणम्—कोटरस्य वनम् षष्ठीतत्पुरुषः। वनं 'पुरगा·······' इति णत्वम्। **किंशुकागिरिः**—वृत्तौ **किंशुलक**, कौमुद्यां **किंशुलुक** इति पाठः। **पुरग**—वृत्तौ पुरक इति पाठः। **शारक**—वृत्तौ **सारिक** इति पाठः।

वले ॥११८॥

वले परे दीर्घः। आसुतीवलः। कृषीवलः। दन्तावलः। वलच् प्रत्ययो गृह्यते।

वलच्प्रत्ययः—'रजःकृष्यासुति····' इत्यनेन विहितः वक्ष्यमाणेन मतुपा साहचर्यात्।

मतौ बह्वचोऽनजिरादीनाम् ॥११९॥

मतौ परे बह्वचो दीर्घः अजिरादीन् वर्जयित्वा संज्ञायाम् ।
उदुंबरावती । वीरणावती । पुष्करावती । 'नद्यां मतुप्' इति मतुप् ।

बह्वचः किम् ? धनवती । हंसवती ।

अनजिरादीनां किम् ? अजिरवती । खदिरवती ।

उदुंबरावती—उदुंबर + मतुप् । 'संज्ञायाम्' इति मतुपो मकारस्य वकारः । एवं सर्वत्र ।

शरादीनां च ॥१२०॥

मतौ दीर्घः संज्ञायाम् । शरावती । मधूवती । कुशावती ।
शरावती—शर + मतुप् । **मधूवती, कुशावती**—वृत्तौ कौमुद्यां च नास्ति मधु-कुशयोः शरादिगणे पाठः ।

इको वहेऽपीलोः ॥१२१॥

इगन्तस्य पूर्वस्य पीलुवर्जितस्योत्तरपदे दीर्घः । ऋषीवहम् ।
कपीवहम् ।

ऋषीवहम्—ऋषीणां वहम् षष्ठीतत्पुरुषः । **वह** शब्दः पचाद्यजन्तः ।

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥१२२॥

उपसर्गस्य घञन्त उत्तरपदेऽमनुष्यविषये बहुलं दीर्घः ।
वीक्लेदः । वीमार्गः । न च भवति—प्रस्तावः ।

❀(वा०) सादकारयोः कृत्रिमे दीर्घो भवति । प्रासादः ।
प्राकारः ।

अमनुष्ये किम् ? निषादः ।

वीक्लेदः—वि √क्लिद् + घञ् । **कृत्रिमम्**—करणेन = पुरुष-क्रियया निर्वृत्तम् । **प्रासादः, प्राकारश्च** पुरुषैरेव क्रियते ।

निषादः—निषीदत्यस्मिन् पापम् इति नि √षद् + घञ् ।

इकः काशे ॥१२३॥

इगन्तस्योत्तरपदस्य काश उत्तरे दीर्घः । वीकाशः । नीकाशः । पचाद्यच्प्रत्ययान्तः काशः ।

पचाद्यच्प्रत्ययान्तः—न तु घञन्तः तेन पूर्वसूत्रेण नास्य सिद्धिः ।

दस्ति ॥१२४॥

'दा' इत्येतस्य यस्तकारादिरादेशस्तस्मिन् परत इगन्तस्योपसर्गस्य दीर्घो भवति । नीत्तम् । वीत्तम् । 'अच उपसर्गात्तः' इत्यनेनान्तस्य तकारः क्रियते, तथापि चर्त्वभूतस्याश्रयणात् सिद्धं तकारादित्वमिति भवति दीर्घः ।

अन्तस्य—'दा' इत्यस्य आकारस्य । **चर्त्वस्य**—'खरि च' इत्यनेन । **नीत्तम्**—नि √दा + क्त ।

अष्टनः संज्ञायाम् ॥१२५॥

'अष्टन्' एतस्योत्तरपदे संज्ञायां विषये दीर्घो भवति । अष्टावक्रः । अष्टाबन्धुरः । अष्टापदम् ।

अष्टावक्रः--अष्टौ वक्राणि अस्येति बहुव्रीहिः ।

छन्दसि च ॥१२६॥

छन्दसि अष्टन उत्तरपदे दीर्घो भवति । अष्टाकपालं निर्वपेत् ।

❀(वा०) गवि च युक्ते भाषायाम् । अष्टागवं शकटम् ।

अष्टाकपालम्--अष्टसु कपालेषु संस्कृतम् । **अष्टागवम्**- अष्टौ गावः युक्ता अस्मिन् ।

चितेः कपि ॥१२७॥

चितेः कपि प्रत्यये परतो दीर्घः । एकचितीकः । द्विचितीकः ।

एकचितीकः—एका चितिर्यस्य सः । अग्निसंज्ञकः स्थण्डिलविशेषः ।

विश्वस्य वसुराटोः ॥१२८॥

विश्वस्य वसु, राट्—एतयोः परतो दीर्घः । विश्वावसुः । विश्वाराट् ।

राट् किम् ? विश्वराजौ ।

विश्वावसुः—विश्वं वसु यस्य सः । **विश्वाराट्**—विश्वस्मिन् राजते इति विश्व √राज् + क्विप् ।

नरे संज्ञायाम् ॥१२९॥

नरे उत्तरे विश्वस्य दीर्घो भवति संज्ञायाम् । विश्वानरो नाम यस्य वैश्वानरिः पुत्रः ।

नाम—कस्यचित् पुरुषस्येति शेषः ।

मित्रे चर्षौ ॥१३०॥

मित्रे परे ऋषावभिधेये विश्वस्य दीर्घः संज्ञायाम् । विश्वामित्रो नाम ऋषिः ।

विश्वामित्रः—विश्वं मित्रं यस्य सः । महर्षिगाधेः पुत्रः ।

मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥१३१॥

सोम, अश्व, इन्द्रिय, विश्वदेव्य एषां मतौ दीर्घः मन्त्रविषये । सोमावती । अश्वावती । इन्द्रियावती । विश्वदेव्यावती ।

लोके भाषायां **सोमवती** इत्यादि ।

ओषधेश्च विभक्तावप्रथमायाम् ॥१३२॥

मन्त्रविषये ओषधिशब्दस्य अप्रथमायां विभक्तौ परतो दीर्घो भवति । नम॒ ओ॑षधीभ्यः ।

प्रथमायां तु स्थिरेयमस्त्वोषधिः ।

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥१३३॥

ऋचि विषये तु, नु, घ, मक्षु, तङ्, कु, त्र, उरुष्य—एषां दीर्घः । आ तू न॑ इन्द्र वृत्रहन् । नू मर्त॑ः । उ॒त वा॑ घा स्या॒लात् । म॒क्षू गोम॑न्तमीमहे । भर॑ता जा॒तवे॑दसम् ।

'तङ्' इति था—आदेशस्य ग्रहणम् न प्रत्याहारस्य । कूमनाः । अत्रा हे । उरु॒ष्याणो॑ऽग्ने: ।

घा स्यालात्—'घ' इति स्वरूपग्रहणम् न संज्ञायाः । **भरता**— √भृ + लोट् → मध्यमपुरुष बहुवचने 'था' तस्य 'तङ्' आदेशः ।

उरुष्याणः—उरुष्य इति नामधातुः लोडन्तः । 'नः' इति अस्मदादेशः तस्य णत्वम् ।

इकः सुञि ॥१३४॥

इकः सुञि परतः ऋचि विषये दीर्घः । अ॒भी षु ण॒ः सखी॑नाम् । नेतार ऊ॒ षु ण॒ः ।

अभी षु—'सु' इति निपातः सुञ् । 'अभि' अस्य इकारस्य दीर्घः । **ऊ षु**—उकारस्य दीर्घः । 'षु' 'सुञः' इत्यनेन सकारस्य षकारः ।

द्व्यचोऽतस्तिङः ॥१३५॥

द्व्यचस्तिङन्तस्य अतो दीर्घो मन्त्रविषये । वि॒द्मा हि त्वा॒ सत्प॑तिं शूर॒ गोना॑म् ।

विद्मा—'विद्म' इत्यस्य दीर्घः । विद्म—√विद् + लट् → मस्, तस्य 'विदो लटो वा' इति 'म' आदेशः ।

निपातस्य च ॥१३६॥

मन्त्रे निपातस्य दीर्घः । एवा तें । अच्छा ते ।

एव-अच्छ शब्दौ निपातौ ।

अन्येषामपि दृश्यते ॥१३७॥

अन्येषामपि दीर्घो दृश्यते । स शिष्टप्रयोगादनुगन्तव्यः । केशाकेशि । जलाषाट् । श्वादन्तः ।

केशाकेशि--केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति बहुव्रीहिः । **जलाषाट्**--जलं सहते इति जल √सह् + ण्वि । **श्वादन्तः**--शुनो दन्तः इति षष्ठी तत्पुरुषः । वृत्तौ वार्तिकमिदं पठितम्--

❀ (वा०) शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु । **श्वादंष्ट्रः** । **श्वाकर्णः** । **श्वाकुन्दः** । **श्वावराहः** । **श्वापुच्छः** । **श्वापदः** । इत्युदाहरणानि ।

चौ ॥१३८॥

चौ, परतः पूर्वस्य दीर्घो भवति । 'चौ' इति 'अञ्चु' धातुर्लुप्तनकाराकारोऽत्र गृह्यते । दधीचः पश्य । अन्तरङ्गोऽपि यणादेशो दीर्घविधानसामर्थ्यान्न प्रवर्तते ।

चौ--'अञ्चु' धातोर्ग्रहणं व्याख्यानात् । **दधीचः**--दधि √अञ्च् + क्विन्, द्वितीया बहुवचनस्य रूपम् ।

सम्प्रसारणस्य ॥१३९॥

सम्प्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घः । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः ।

अलुक् षष्ठ्या जातेरिकोऽव्ययीभावे कोः कदिको वहे एकोनविंशतिः (१३९) ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
षष्ठाध्यायस्य तृतीयः पादः ॥

कारीषगन्धीपुत्रः—करीषस्येव गन्धोऽस्य इति करीषगन्धिः। तस्यापत्यं स्त्री कारीषगन्ध्या। तस्याः पुत्रः कारीषगन्धीपुत्रः। 'ष्यङः सम्प्रसारणम्' इति सम्प्रसारणे, आकारस्य पूर्वरूपे च 'कारीषगन्धि' तस्य चानेन दीर्घः।

षष्ठाध्यायस्यास्मिन् तृतीये पादे अलुगुत्तरपदे, षष्ठ्या आक्रोशे, जातेश्च, इकोह्रस्वो… …, अव्ययीभावे चाकाले, कोः कत्तत्पुरुषेऽचि, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि २० × ६ = १२० + तथा इको वहे… इत्यत आरभ्य १६ सूत्राणीति संकलनेनैकोचत्वारिंशदुत्तरशतं (१३६) सूत्रात्रि सन्ति।

इति काशिकावृत्तिसारसुधायां
षष्ठाध्यायस्य तृतीयः पादः॥

अथ षष्ठाध्याये चतुर्थः पादः

अङ्गस्य ॥१॥

आसप्तमाध्यायपरिसमाप्तेर्यदित ऊर्ध्वमनुक्रमिष्यामः, 'अङ्गस्य' इत्येवं तद्वेदितव्यम् । वक्ष्यति–'हलः' हूतः । जीनः । 'अतो मिस् ऐस्' वृक्षैः ।

'अङ्गस्य' इति किम् ? ब्राह्मणभिस्सा ।

अङ्गाधिकारो 'नामि' इति दीर्घत्वादिव्यवस्थापनार्थः । तदर्थमर्थवद्ग्रहणपरिभाषा नाश्रयितव्या ।

'अङ्गस्य' इति सम्बन्धसामान्ये षष्ठी यथायोगं विशेषेष्ववतिष्ठते । अथवा प्रातिपदिकार्थमात्रमविवक्षितविभक्त्यर्थमधिक्रियते । तदुत्तरत्र यथायथं विपरिणम्यते । ततोऽकारान्तादङ्गाद्भिस 'ऐस्' इत्येवमाद्युपपन्नं भवति ।

हूतः—√ह्वेञ् + क्त सम्प्रसारणे कृते अङ्गस्य दीर्घो भवति । **जीनः**—√ज्या + क्त । **वृक्षैः**—वृक्ष + भिस् अकारान्तादङ्गात् 'भिस्' इत्यस्य 'ऐस्' ।

ब्राह्मणभिस्सा—ब्राह्मणस्य भिस्सा=ओदनः अत्र 'भिस्' इत्यस्य 'ऐस्' न, ब्राह्मणस्य अङ्गत्वाभावात् ।

व्यस्थापनार्थः—'क्रिमिणाम्' इत्यत्र 'नामि' इति सूत्रेण दीर्घो न भवति । अतः तस्य व्यवस्थापनार्थः ।

सम्बन्धसामान्ये—सम्बन्धमात्रे । अयम्भावः—अयम् अधिकारः । अत्र प्रयुक्ता षष्ठी सम्बन्धमात्रमर्थं व्यनक्ति ।

यथायोगम्—यस्मिन् सूत्रे यदर्था षष्ठी वर्तते तत्र पर्यवस्यति । तेन 'अतो भिस् ऐस्' इत्यत्र 'अकारान्तस्य अङ्गस्य' इत्यत्र निमित्तनिमित्तिभावे षष्ठीं मत्वा 'अङ्गनिमित्तस्य भिस्' इत्यर्थकरणात् 'अकारान्तादङ्गात्' इत्ययमर्थो भवति । **अथवा...... भवति**—'अङ्गस्य' इत्यत्र 'अङ्ग' इति प्रातिपदिकमात्रार्थे षष्ठी न सम्बन्धे । अङ्गमात्रस्यैवोत्तरत्र अधिकारः । स क्वचित् पञ्चम्या विपरिणम्यते । यथा 'अतो भिस् ऐस्' इत्यत्र ।

हलः ॥२॥

'सम्प्रसारणस्य' इति वर्त्तते । अंगावयवाद्धलो यदुत्तरं सम्प्रसारणं तदन्तस्याङ्गस्य दीर्घो भवति । हूतः । संवीतः ।

'हलः' इति किम् ? उतः उतवान् ।

मण्डूकप्लुत्या अत्र 'अण' इत्यनुवर्तते तेनेह न–तृतीयः ।

अङ्गग्रहणं द्विरावर्तयितव्यम्–हल् विशेषणार्थम् कार्यप्रतिपत्त्यर्थं च ।

संवीतः—सम् √व्येञ् (संवरणे) + क्त ।

आवर्तयितव्यम्—आवृत्त्या विशेषेण द्वयम् 'अङ्गस्य' अन्वितं भवति, 'हलः' इति 'तदन्तस्य' इति च ।

नामि ॥३॥

'नामि' इत्येतत् षष्ठीबहुवचनम् आगतनुट्कं गृह्यते । तस्मिन् परतोऽजन्तस्याङ्गस्य दीर्घो भवति । अग्नीनाम् । वायूनाम् । 'अणः' इत्येतदत्र निवृत्तम्, 'न तिसृचतसृ' इति दीर्घत्वप्रतिषेधात् । आगतनुट्कस्य ग्रहणमुत्तरार्थम्, कृते च नुटि दीर्घप्रतिपत्त्यर्थम् । अन्यथा 'नुट्' एव न स्यात् ।

आगतनुट्कम्—आगतः = प्राप्तः नुट् यम्, येन वा यत्र तत् । **अग्नीनाम्** इत्यत्र अग्नि + आम् इति स्थितौ 'ह्रस्वनद्यापो नुट्' इति नुटि

अग्नि नाम्, ततोऽनेन इकारस्य दीर्घत्वम् । **उत्तरार्थम्**—'नोपधायाः' इत्यनेन **पञ्चानाम्, सप्तानाम्** इत्यत्र दीर्घो यथा स्यात्, **चर्मणाम्** इत्यत्र च मा भूत् । **प्रतिपत्त्यर्थम्**—प्रतिपत्तिः = ज्ञानम्, तदर्थम् । 'नुटि कृते एव दीर्घो भवति' इति तात्पर्यम् ।

न तिसृचतसृ ॥४॥

एतयोर्नामि न दीर्घः । तिसृणाम् । चतसृणाम् ।

इदमेव प्रतिषेधवचनं ज्ञापकम्—'अचि र ऋतः' इत्यस्माद् विप्रतिषेधेन नुडागमो भवति इति ।

पूर्वविप्रतिषेधेन—अन्यथा परत्वाद् 'र' आदेश एव स्यात् । **तिसृणाम्, चतसृणम्**-'त्रि-चतुर्' शब्दयोः स्त्रियां क्रमशः 'तिसृ, चतसृ' आदेशः ।

छन्दस्युभयथा ॥५॥

एतयोश्छन्दस्युभयथा दृश्यते दीर्घश्चादीर्घश्च । तिसृणाम् / तिसृणाम् मध्यं दिने । चतसृणाम् । चतसृणाम् मध्यं दिने ।

उभयथा—विकल्पेन । एष विकल्पोऽन्यत्रापि छन्दसि दृश्यते तैत्तिरीयके ह्रस्वः बह्वृचे दीर्घः । धातृणाम् / धातृणाम् ।

नृ च ॥६॥

'नृ' शब्दस्य नामि परत उभयथा स्यात् । नृणाम् / नृणाम् । केचित् 'छन्दसि' इति नानुवर्तयन्ति तेन भाषायामपि ।

केचित्—'आचार्याः' इति शेषः । सूत्रे चकारः तिसृचतस्रोरनु-कर्षणार्थः ।

नोपधायाः ॥७॥

नान्तस्याङ्गस्य उपधायाः नामि परतो दीर्घो भवति । सप्तानाम् । नवानाम् ।

सूत्रे 'न' इति षष्ठ्येकवचनान्तं सौत्रत्वात्तेन 'नान्तस्य' इत्यर्थो लभ्यते ।

सर्वनामस्थाने चासम्बुद्धौ ॥८॥

असम्बुद्धौ सर्वनामस्थाने परतः नोपधायाः दीर्घः । राजा । राजानौ । राजानः ।

नोपधायाः—नकारात् पूर्वस्य 'उपधा' संज्ञकस्य ह्रस्वस्वरस्य । 'सुडनपुंसकस्य' इत्यनेन सु, औ, जस् अम्, औट् इति पञ्चानां विभक्तीनां **'सर्वनामस्थान'** संज्ञा ।

वा षपूर्वस्य निगमे ॥९॥

षपूर्वस्याचो नोपधायाः निगमे सर्वनामस्थानेऽसम्बुद्धौ वा दीर्घो भवति । स॑ तक्षा॑णम् / तक्षणम् ति॑ष्ठन्तमब्रवीत् ।

निगमे किम् ? तक्षा । तक्षाणौ ।

निगमः—वेदः । **तक्षा**—तक्षन् + सु । भाषायां नित्यं दीर्घः ।

सान्तमहतः संयोगस्य ॥१०॥

सान्तसंयोगस्य महतश्च यो नकारः, तस्योपधायाः दीर्घः सर्वनामस्थानेऽसम्बुद्धौ । श्रेयान् । श्रेयांसौ । महान् । महान्तौ ।

सान्तः—सः=सकारः अन्तो यस्य सः । 'सान्त' इति लुप्तषष्ठीकं पदं 'संयोगस्य' विशेषणम् । **श्रेयान्**—श्रेयस् + सु । उगिदचाम्.........' इत्यनेन नुम् ।

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥११॥

'अप्' इत्यादीनामुपधायाः दीर्घो भवति असम्बुद्धौ सर्वनामस्थाने । आपः । बह्वाम्पि तडागानि । समासान्तविधेरनित्यत्वपक्षे । तृन्—कर्ता । कर्तारौ ।

तृच्—कटस्य कर्ता । कर्तारौ ।

स्वसृ—स्वसा । स्वसारौ । स्वसारः इत्यादि ।

नप्तृ-आदीनां ग्रहणम् अव्युत्पत्तिपक्षे विध्यर्थं व्युत्पत्तिपक्षे नियमार्थम् । एवमन्येषां संज्ञाशब्दानां दीर्घो मा भूत् इति । पितरौ ।

बह्वाम्पि—बहवः आपः येषु तानि । अत्र अप्-अन्तस्यापि दीर्घः । **अनित्यत्वपक्षे**—अन्यथा 'ऋक्पूरप्……' इत्यादिना 'अ' प्रत्यये **बह्वपानि** स्यात् ।

कर्ता—कृ + (तच्छीलाद्यर्थे) तृन् । **कटस्य कर्ता**—कर्त्रर्थे तृच् । **इत्यादि**—आदिना नप्तृ—**नप्ता** । **नप्तारौ** । नेष्टृ **नेष्टा** । **नेष्टारौ** । त्वष्टृ—**त्वष्टा** । **त्वष्टारौ** । क्षतृ—**क्षत्ता** । **क्षत्तारौ** । होतृ-**होता** । **होतारौ** । पोतृ—**पोता** । **पोतारौ** । प्रशास्तृ—**प्रशास्ता** । **प्रशास्तारौ** ।

व्युत्पत्तिपक्षे प्रकृति-प्रत्यय कल्पना, अव्युत्पत्ति पक्षे सा न भवतीति विशेषः । **एवम्**—एषामेव नप्तृ-आदीनां संज्ञाशब्दानाम् उपधायाः दीर्घः स्यात् अन्येषां पितृ-आदीनां मा भूत्-**पितरौ** । **मातरौ** इत्यपि ।

इन्हन्पूषार्यम्णां शौ ॥१२॥

एवमन्तानामङ्गानाम् उपधायाः दीर्घो भवति 'शौ' एव सर्वनामस्थाने परतः । बहुदण्डीनि । बहुच्छत्रीणि । बहुब्रह्महाणि । बहुपूषाणि । बह्वर्यमाणि । सिद्धे सत्यारम्भो नियमार्थः ।

एवमन्तानाम्—इन्, हन्, पूषन्, अर्यमन्-इत्यन्तानाम् ।

बहुदण्डीनि—बहवो दण्डिनः एषां सन्ति इति बहुदण्डिन् + जस् → शि । **बहुब्रह्महाणि**—बहवो ब्रह्महणः (ब्रह्म √हन् + क्विप्) येषु तानि ।

बहुपूषाणि—बहवः पूषणो येषु तानि ।

बह्वर्यमाणि—बहवः अर्यमणो येषु तानि ।

सिद्धे—'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेनेति शेषः । **शौ एव**—यत्र जस्-शस् विभक्त्योः 'शिः' तत्रैव । तेनात्र न—दण्डिनौ । दण्डिनः ।

सौ च ॥१३॥

असम्बुद्धौ सौ च परतः एषामुपधाया दीर्घो भवति । दण्डी । वृत्रहा । पूषा । अर्यमा ।

असम्बुद्धौ—प्रथमाया एकवचनस्य 'सम्बुद्धि' संज्ञा भवति। तत्र न—हे दण्डिन्।

अत्वसन्तस्य चाधातोः ॥१४॥

अतु, अस्—इत्येवमन्तस्याङ्गस्य अधातोरुपधायाः दीर्घः असम्बुद्धौ सौ परतः। भवान्। सुयशाः।

अधातोः किम्? पिण्डं ग्रसते इति पिण्डग्रः। चर्मवः।

भवान्—अतु-अन्तोऽयं 'भवत्' शब्दः √भा + डवतु। **सुयशाः**—शोभनं यशः यस्य सः। असन्तस्येदमुदाहरणम्। **चर्मवः**—चर्म वस्ते इति।

अनुनासिकस्य क्विझलोः क्ङिति ॥१५॥

अनुनासिकान्तस्याङ्गस्योपधायाः दीर्घो भवति क्विप्रत्यये झलादौ क्ङिति परतः। क्वौ—प्रशान्। प्रतान्। झलादौ किति—शान्तः। ङिति—शंशान्तः। यङ्लुगन्तादयं तस्।

प्रशान्—प्र √शम् + क्विप्। **शान्तः**—√शम् + क्त। **शंशान्तः**—√शम् + यङ् तस्य लुक् शंशम् + लट् → तस्। 'सार्वधातुकमपित्' इति तस्य ङित्त्वम्।

अज्झनगमां सनि ॥१६॥

अजन्तानाम् अङ्गानाम्, हन्, गम्—एतयोश्च झलादौ सनि दीर्घो भवति। चिकीर्षति। जिघांसति।

❀ (वा०) गमेरिङादेशस्येति वाच्यम्। अधिजिगांसते।

चिकीर्षति—√कृ + सन् + लट् → ति। **जिघांसति**—√हन् + सन् + लट् → ति। **अधिजिगांसते**—√इङ् + सन् + लट् → ति 'इङ्' इत्यस्य 'गम्' आदेशः।

इङादेशस्यैव 'गम्' इत्यस्य ग्रहणादत्र न—संजिगंसते। अत्र सम् √गम् + सन्।

तनोतेर्विभाषा ॥१७॥

तनोतेरङ्गस्य झलादौ सनि परतो विभाषा दीर्घो भवति । तितांसति / तितंसति ।

'झलि' इत्येव–तितनिषति । 'सनीवन्तर्ध···' इत्यत्र तनोतेरुपसंख्यानात् इट्–आगमो विकल्पेन भवति ।

तितनिषति– √तन् इत्यस्माद् सनि विभाषा इट् । इडागम-पक्षे न दीर्घः ।

क्रमश्च क्त्वि ॥१८॥

क्रमेरङ्गस्योपधायाः विभाषा दीर्घो भवति झलादौ क्त्वा-प्रत्यये परतः । क्रान्त्वा / क्रन्त्वा ।

झलि किम् ? क्रमित्वा ।

क्रमित्वा–√क्रमु (पादविक्षेपे) इत्यस्मात् 'उदितो वा' इत्यनेन पक्षे इट्-आगमः ।

च्छ्वोः शूडनुनासिके च ॥१९॥

सतुक्कस्य छस्य वस्य च क्रमात् 'श्, ऊठ्' एतौ आदेशौ भवतः अनुनासिकादौ प्रत्यये क्वौ झलादौ क्ङिति च परतः । प्रश्नः । विश्नः । अन्तरङ्गत्वात् 'छे च' इति तुकि कृते सतुक्कस्य 'श्' आदेशः । वकारस्य ऊठ्—स्योनः । √सिव् इत्यस्मादौणादिके 'न' प्रत्यये कृते 'पुगन्त······' इति गुणात्पूर्वम् ऊठ् । तत्र कृतेऽन्तरङ्गत्वाद् यण् आदेशः । नानाश्रयत्वाच्च न 'वार्णादाङ्गं बलीयः ।'

प्रश्नः–√प्रच्छ्+नङ् । 'च्छ्' इत्यस्य श् आदेशः ।

विश्नः–विच्छ्+नङ् । **स्योनः**–√षिव्+न ।

नानाश्रयत्वात्--गुणस्य निमित्तम् आर्धधातुकम्, यणश्च 'ऊठ्' इति नैकाश्रयौ गुण्-ऊठौ ।

वार्णादाङ्गं बलीयः इति परिभाषा एकं निमित्तम् आश्रित्य प्रवर्त्तते, अत्र तु भिन्नाश्रयौ गुण-ऊठौ ।

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।।२०।।

ज्वर, त्वर, स्रिवि, अवि, मव—एषामङ्गानां वकारस्य उपधायाश्च स्थाने 'ऊठ्' इत्ययमादेशः अनुनासिके, क्वौ, झलादौ च क्ङिति । √ज्वर—जूः, जुरौ, जुरः । जूर्तिः । √त्वर—तूः, तुरौ, तुरः । तूर्तिः । √स्रिवि—स्रूः, स्रुवौ, स्रुवः । स्रूतिः । √अवि—ऊः, उवौ, उवः । ऊतिः । √मव्—मूः, मुवौ, मुवः । मूतिः । ज्वर-त्वरोरुपधा वकारात्परा, अन्यत्र पूर्वा ।

जूः—√ज्वर्+क्विप् । **जूर्तिः**—√ज्वर्+क्तिन् ।

अन्यत्र—स्रिव्-अव्-मव् धातुषु ।

कौमुद्यां तु 'क्ङिति' इत्यस्यानुवृत्तिर्न कृता । अत एव √अव्+मन्= **ओम्** इति सिद्ध्यति ।

राल्लोपः ।।२१।।

रेफादुत्तरयोः च्छ्वोर्लोपो भवति क्वौ झलादौ च क्ङिति । **√मूर्च्छा—मूः, मुरौ, मुरः । मूर्त्तवान् ।** 'न ध्याख्या......' इति **नत्वाभावः ।**

च्छ्वोः--च्छ्, व्—एतयोः । मूः--√मूर्च्छा+क्विप् अत्र तुक्सहितस्य छकारस्यासम्भवात् केवलः छकारो गृह्यते ।

वकारलोपस्योदाहरणम्—√तुर्वी+क्विप्=तूः, तुरौ, तुरः । √धुर्वी +क्विप्=धूः, धुरौ, धुरः ।

नत्वाभावः--'न ध्याख्यापॄमूर्छिमदाम्' इत्यनेन निषेधात् निष्ठायाः तकारस्य नत्वं न भवति ।

असिद्धवदत्राभात् ॥२२॥

इत ऊर्ध्वम् आ अध्यायपरिसमाप्तेः कार्यम् आ भात् शास्त्रीयं तस्मिन् कर्त्तव्ये तत्रत्यं कार्यमसिद्धवत्स्यात् । एधि । शाधि । इत्यत्र एत्व-शा-भावयोः कृतयोर्झल्लक्षणं धित्वं न प्राप्नोति । असिद्धत्वाद् भवति ।

❀(वा०) वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ । बभूव, बभूवतुः । उपदिदीये ।

आ भात् शास्त्रीयम्—सूत्रे 'अत्र' इति विषयनिर्देशः, तेनायमर्थो लभ्यते—आभात् = 'भस्य' इति सूत्र पर्यन्तं यत् किमपि शास्त्रम् = सूत्रम् तत् समानाश्रये आभीये शास्त्रे कर्त्तव्ये । **एधि**—√अस् + लोट् → सिप् → हि √अस् इत्यस्य 'ध्वसोरेद्धावभ्यास लोपश्च' इत्ययेन एत्वम् । अस्य असिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति 'हि' इत्यस्य 'धि' आदेशः । **शाधि**—√शास् + लोट् → सिप् → हि √शास् इत्यस्य 'शा' आदेशः । तस्य असिद्धत्वात् हेर्धिः । **बभूव**— √भू + लिट् → तिप् → णल् । अत्र 'वुक्' आगमः नासिद्धवत, तेन 'भू' इत्यस्य ऊकारस्य 'उवङ्' न । **उपदिदीये** - उप √दी + लिट् → त → एश् युट् आगमः । स यणि कर्त्तव्ये नासिद्धवत् ।

श्नान्नलोपः ॥२३॥

'श्नम्' अयम् उत्सृष्टानुबन्धो गृह्यते । तत उत्तरस्य नकारस्य लोपो भवति । अनक्ति । भनक्ति ।

श्नात्—मकारानुबन्धात् 'श्नम्' इत्यस्मात् ।

अनक्ति—√अञ्जू + लट् → तिप् । श्नमि कृते अन न् ज् ति उत्तरनकारस्य लोपे जकारस्य कुत्वे चर्त्वे च रूपं सिद्धयति । **भनक्ति**—√भञ्जू + लट् → तिप् ।

अनिदितां हल उपधायाः क्ङिति ॥२४॥

अनिदिताम् अङ्गानां हलन्तानाम् उपधाया नकारस्य लोपो भवति क्ङिति परतः । स्रस्तः । ध्वस्तः । स्रस्यते । सनीस्रस्यते ।

*(वा०) रञ्जेणौ मृगरमण उपसंख्यानम् । रजयति मृगान् । 'जनीजॄष……' इति मित्त्वात् उपधाया ह्रस्वत्वम् ।

*(वा०) घिनुणि चोपसंख्यानम् । रागी ।

*(वा०) रजनरजकरजःसूपसंख्यानम् । रजनम् । रजकः । रजः ।

स्रस्तः—√स्रन्स्+क्त । **ध्वस्तः**—√ध्वन्स्+क्त ।

सनीस्रस्यते—√स्रन्स्+यङ्+लट् । सर्वत्र नकारस्य लोपः । **मृगरमणम्**—मृगानां क्रीडा । **रागी**—√रञ्ज्+घिनुण् । **रजकः**—√रञ्ज्+ष्वुन् । **रजः**—√रञ्ज्+असुन् ।

दंशसञ्जस्वञ्जां शपि ॥२५॥

एषां शपि उपधानकारस्य लोपो भवति । दशति । सजति । परिष्वजते ।

दशति—√दन्श्+लट्→तिप् । **परिष्वजते**—परि √ष्वञ्ज्+लट्→तिप् ।

रञ्जेश्च ॥२६॥

रञ्जेश्च शपि परतः उपधानकारस्य लोपः । रजति । रजतः ।

'रञ्जेश्च' पृथक्सूत्रम् उत्तरत्रानुवृत्त्यर्थम् । **रजति**—√रञ्ज्+लट्→तिप् ।

घञि च भावकरणयोः ॥२७॥

भावे करणे च विहिते घञि रञ्जेर्नकारस्य लोपो भवति । रागः । रञ्जनम् इत्यर्थः । करणे—रज्यतेऽनेन इति रागः ।

रागः—नकारस्य लोपे उपधावृद्धिः । '√रञ्ज्' इत्यस्य जकारस्य 'चजोः कु……' इत्यनेन कुत्वं गकारः । अधिकरणे तु रङ्गः ।

स्यदो जवे ॥२८॥

जवेऽभिधेये 'स्यदः' इति निपात्यते ।

स्यदः—√स्यन्द्+घञ्, नलोपो वृद्धेरभावश्चात्र निपात्यते । **जवः**= वेगः ।

अवोदैधौद्मप्रश्रथहिमश्रथाः ॥२९॥

अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ–एते निपात्यन्ते । अवोदः–'अव' पूर्वस्य √उन्दी–घञि न लोपो निपात्यते । एधः – इन्धे–र्घञि 'न' लोपो गुणश्च निपात्यते । ओद्मः – √उन्दी, एतस्मात् औणादिको मतुप् प्रत्ययः । प्रश्रथः । हिमश्रथः । घञि श्रन्थेः रूपम् ।

अवोदः—अव √इन्दी+घञ् । अव+उ=अवो ।

प्रश्रथः—प्र √श्रन्थ+घञ् । **हिमश्रथः**—हिम √श्रन्थ+घञ् । उभयत्र नलोपो वृद्ध्यभावश्च निपात्यते ।

नाञ्चेःपूजायाम् ॥३०॥

अञ्चेः पूजायामर्थे नलोपो न भवति । अञ्चिता अस्य गुरवः । अञ्चितं शिरो वहति ।

अञ्चिताः—√अञ्च+क्त 'अञ्चेः पूजायाम्' इत्यनेन इट् । **अस्य**— 'क्तस्य च वर्त्तमाने' इत्यनेन षष्ठी ।

क्त्वि स्कन्दिस्यन्दोः ॥३१॥

क्त्वा प्रत्यये एतयोर्नलोपो न । स्कन्त्वा । स्यन्त्वा । स्यन्देरिट् पक्षे 'न क्त्वा सेट्' इति कित्त्वप्रतिषेधादेव न लोपाभावः । स्यन्दित्वा ।

स्कन्त्वा—√स्कन्दि (गतिशोषणयोः)+क्त्वा । **इट्पक्षे**—√स्यन्द इत्यस्य उदित्वात् 'उदितो वा' इत्यनेन विभाषा इट् ।

जान्तनशां विभाषा ॥३२॥

जान्तानामङ्गानां नशेश्च क्त्वाप्रत्यये परतो विभाषा नकारलोपो न भवति। रङ्क्त्वा / रक्त्वा। भङ्क्त्वा / भक्त्वा। नंष्ट्वा/ नष्ट्वा।

रङ्क्त्वा— √रन्ज् + क्त्वा। नलोपस्य निषेधपक्षे ञकारस्य अनुस्वार—परसवर्णेन ङकारः। नष्ट्वा—√नश् + क्त्वा। 'मस्जिनशोर्झलि' इति 'नुम्'। इट् पक्षे 'नशित्वा' इत्यपि।

भञ्जेश्च चिणि ॥३३॥

भञ्जेश्च चिणि परतो विभाषा नकारस्य लोपो भवति। अभाजि / अभञ्जि। अप्राप्तोऽयं नलोपः पक्षे विधीयते, ततो नेति नानुवर्त्तते।

अभाजि—√भञ्ज् + लुङ्। 'न' लोपे कृते उपधा वृद्धिः।

शास इदङ्हलोः ॥३४॥

शास उपधाया इकारादेशो भवति अङि हलादौ किति ङिति च परे। अन्वशिषत्। हलादौ—शिष्टः। शिष्टवान्। 'शासिवसि……' इति षत्वम्।

ॐ(वा०) क्वौ च शास इत्वं भवतीति वाच्यम्। आर्यान् शास्ति इति आर्यशीः। आशीः।

अन्वशिषत्—अनु √शास् + लुङ्। अत्र 'सर्तिशास्त्यर्त्तिभ्यश्च' इत्यनेन च्लेः 'अङ्' तस्मिन् परे शासः इत्त्वम्। **शिष्टः**—√शास् + क्त हलादौ किति इदमुदाहरणम्। हलादौ ङिति √शास् + वस् = **शिष्वः** इत्युदाहरणम्। **आर्यशीः**—आर्य √शास् + क्विप्। प्रथमैकवचने सकारस्य रुत्वे 'र्वोरुपधायाः' इति दीर्घः। **आशीः**—सूत्रे √शास् अनुशिष्टौ इत्यस्यैव ग्रहणम् नतु आङः √शास् इच्छायाम् इत्यस्य तेनात्र न—**आशास्ते, आशास्यमानः**। परन्तु क्विप् प्रत्यये उभयस्य √शास् इत्यस्य ग्रहणम्, तेन इच्छार्थकस्यापि शास्धातोः इत्त्वं भवति। एतदर्थं वृत्तौ वार्तिकमपि वर्त्तते।

✻(वा०) क्विप् प्रत्यये तु तस्यापि भवतीति वक्तव्यम् ।

तस्यापि=आङ् √शास् (इच्छायाम्) इत्यस्यापि । **'क्षियाशीः प्रैषेषु तिङाकांक्षम्'** इत्यत्र निपातनाद्वा सिद्धयति ।

शा हौ ॥३५॥

शासः 'शा' आदेशः हौ । शाधि ।

शासः—स्थाने योगा षष्ठी, शासः स्थाने शा भवति । **शाधि**—√शास् +लोट्→सिप्→हि । शासः 'शा' आदेशे कृते हेर्धिः ।

हन्तेर्जः ॥३६॥

हन्तेर्हौ 'ज' आदेशः √जहि शत्रून् ।

जहि—√हन्+लोट्→सिप्→हि ।

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥३७॥

अनुदात्तोपदेशानाम् अङ्गानां वनति-तनोत्यादीनां चानुनासिकस्य लोपो भवति झलादौ किति, ङिति ।

√यमु—यत्वा । यतः । यतवान् । √रमु—रत्वा । रतः । रतवान् । इत्यादयोऽनुदात्तोपदेशाः । √वनु–वतिः । √तनु—ततः । ततवान् । इत्यादि ।

अनुदात्तोपदेशाः–अनुदात्ताः उपदेशाः,=उपदिश्यमानावस्थायामनुदात्ताः धातवः । **इत्यादि**—√क्षणु—**क्षतः** । √मनु—**मतः** । एते हलादौ किति प्रयोगाः सन्ति । ङिति तु तनु+लुङ्=**अतत, अतथाः** इत्याद्युदाहरणानि ।

वा ल्यपि ॥३८॥

ल्यपि परतः एषां वा अनुनासिक-लोपः । **व्यवस्थित-विभाषा चेयम्**, तेन मान्तानां विकल्पः, अन्यत्र नित्यम् । **प्रयत्य/ प्रयम्य । आहत्य । प्रतत्य ।**

प्रयत्य—प √यम्+क्त्वा→ल्यप् । अनुनासिकस्य मकारस्य लोपे 'ह्रस्वस्व पिति कृति तुक्' इति तुक् ।

न क्तिचि दीर्घश्च ॥३९॥

क्तिचि अनुनासिकलोपो दीर्घश्च न । यन्तिः । रन्तिः । 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घः प्राप्तः प्रतिषिध्यते ।

यन्तिः—√यम्+क्तिच् । 'क्तिच्क्तौ च संज्ञायाम्' इत्यनेन ।

गमः क्वौ ॥४०॥

गमः क्वौ परतोऽनुनासिकलोपो भवति । जनगत् । ब्रजगत् ।

❀(वा०) गमादीनां वाच्यम् । संयत् । परीतत् ।

❀(वा०) ऊ च गमादीनामिति वक्तव्यम् । अग्रेगूः ।

जनगत्—जनं गच्छति जन √गम्+क्विप् ।

परीतत्—परि √तनु + क्विप् 'नहिवृति……' इत्यनेन दीर्घः । **अग्रेगूः**--अग्रे गच्छति अग्रे √गम्+क्विप् । अनुनासिकलोपे अकारस्य ऊकारः ।

विड्वनोरनुनासिकस्यात् ॥४१॥

अनुनासिकस्य 'आत्' स्यात् विटि वनि च । अब्जाः ।

अब्जाः—अप्सु जायते अप् √जन्+विट् । उपपदसमासः, पकारस्य जश्त्वेन बकारः । एवं **कूपखाः**, **अग्रेगाः** इत्यादि । वनि उदाहरणम्—**विजावा** ।

जनसनखनां सञ्झलोः ॥४२॥

जन, सन, खन—एषामङ्गानां सनि झलादौ च क्ङिति आकारादेशो भवति । जातः । जातवान् । जातिः । सातः । सातवान् । सातिः । खातः । खातवान् । खातिः । तदिह सनोत्यर्थमेव सन् ग्रहणम् । अत्र झलादौ क्ङिति सनोतेर्विप्रतिषेधादात्त्वम्

अनुनासिकलोपं बाधते । 'घुमास्था······' इति हल् ग्रहणं ज्ञापकम् अस्मिन् प्रकरणे विप्रतिषेधो भवति ।

सनि झलादौ एव आत्त्वं भवति √सन्+सन्+लट्→तिप् सिषासति । 'सनीवन्तर्घ······' इट्पक्षे तु सिसनिषति । **सातः**—√सन्+क्त । अत्र 'अनुदात्तोपदेश······' इत्यनेन नकारस्य लोपः प्राप्नोति, तं बाधित्वा आत्त्वं भवति । **तदिह**—'सातः' इत्यादिषु । **ज्ञापकम्**—अस्मिन् 'असिद्धवदत्राभात्' इत्यसिद्धप्रकरणे विप्रतिषेधो न भवति चेत्तदा **गोदः** इत्यादिषु ईत्त्वे कृतेऽपि तस्यासिद्धत्वाद् आकारस्य लोपो भविष्यत्येव । तत्र सूत्रस्याप्रवृत्तये हल् ग्रहणमनर्थकमेव स्यात् ।

ये विभाषा ॥४३॥

यादौ प्रत्यये क्ङिति एषामाकारादेशो विभाषा भवति। जायते / जन्यते । √सायते / सन्यते । खायते । खन्यते ।

जायते—√जन्+भावे लट् 'यक्' आगमः । श्यनि तु 'ज्ञाजनोर्जा' इति नित्यं 'जा' आदेशः **जायते** । एवं यङि **जाजायते** / **जञ्जन्यते** । इत्यादि ।

तनोतेर्यकि ॥४४॥

तनोतेर्यकि परतो विभाषा आकारादेशो भवति । तायते / तन्यते ।

यकि सत्येव विभाषा । यङि तु न—**तन्तन्यते** ।

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥४५॥

सनोतेरङ्गस्य क्तिचि परतः आकारादेशो भवति, लोपश्चास्य अन्यतरस्याम् । सातिः / सन्तिः / सतिः ।

अस्य—अङ्गस्य लोपोऽन्त्यस्य नकारस्य भवति ।

आर्धधातुके ॥४६॥

'न ल्यपि' इति प्रागेतस्माद् यदित ऊर्ध्वमनुक्रमिष्यामः' 'आर्धधातुके' इत्येवं तद्वेदितव्यम् । वक्ष्यति—'अतो लोपः' चिकीर्षिता । जिहीर्षिता ।

चिकीर्षिता—चिकीर्ष + तृच् 'इट्' आगमे 'अतो लोपः' सूत्रेण अकारस्य लोपः। एवं **बेभिदिता**—'यस्य हलः' इत्यनेन यङो यकारस्य लोपः। सार्वधातुके तु न भवति। **बेभिद्यते**।

एवं **कारणा** इत्यत्र णिलोपः, **ययतुः** इत्यत्र आतो लोपः, **दीयते** इत्यत्र ईत्वम्, **स्नेयात्** इत्यत्र एत्वम्, **कारिषीष्ट** इत्यत्र चिण्वद्भावः एतत्सर्वम् आर्धधातुके एव भवति। तथा चायं संग्रहश्लोकः—

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम्।
आल्लोप ईत्वमेत्वं च चिण्वद्भावश्च सीयुटि॥

भ्रस्जो रोपधयो रमन्यतरस्याम् ॥४७॥

भ्रस्जो रेफस्योपधायाश्च 'रम्' अन्यतरस्यां भवति। रोपधयोरिति स्थानषष्ठीनिर्देशात् उपधा, रेफश्च निवर्त्तेते। मित्त्वाच्चायमन्त्यादचः परो भवति। भर्ष्टा / भ्रष्टा। भर्ष्टुम् / भ्रष्टुम्।

भर्ष्टा—√भ्रस्ज् + तृच् रमि कृते 'स्कोः' इत्यनेन सकार लोपे 'व्रश्चभ्रस्ज……' इति सूत्रेण जकारस्य षत्वम्, ष्टुत्वं च। पक्षे **भ्रष्टा**।

अतो लोपः ॥४८॥

अकारान्तस्याङ्गस्य आर्धधातुके परतो लोपो भवति। चिकीर्षिता। चिकीर्षितुम्।

❀(वा०) वृद्धिदीर्घाभ्याम् अतो लोपः पूर्वविप्रतिषेधेन। चिकीर्षकः। चिकीर्ष्यते।

चिकीर्षिता—√कृ + सन् + तृच्।

यस्य हलः ॥४९॥

हलः उत्तरस्य यस्य लोपो भवति आर्धधातुके। बेभिदिता। बेभिदितुम्।

'यस्य' इति संघातग्रहणम्। तत्र 'अलोऽन्त्यस्य' इत्येतन्न

भवति, 'अतो लोपः' इत्यनेनापि तस्य सिद्धत्वात् । 'हलः' इति पञ्चमी-निर्देशात् 'आदेः परस्य' इति यकारोऽनेन लुप्यते ।

संघातग्रहणं किम् ? ईर्ष्यिता । मव्यिता ।

वेभिदिता—√भिद्+यङ्+तृच् । यत्र यकारः संघातरूपः, तस्य लोपः । **ईर्ष्यिता**—√ईर्ष्य+तृच् अत्र यकारः धातोरंशभूतः । एवं **मव्यिता**—√मव्य+तृच् इत्यत्रापि, इति नास्य सूत्रस्य प्रवृत्तिः ।

क्यस्य विभाषा ॥५०॥

क्यस्य हल उत्तरस्य विभाषा लोपो भवति । समिधिता / समिध्यिता ।

'क्य' इति क्यच्-क्यङोः सामान्येन ग्रहणम् । **समिधिता**—समिधम् आत्मनः इच्छति इति समिध्+क्यच्=समिध्यति समिध्य+तृच् अथवा समिद् इव आचरति इति समिध्+क्यङ्=समिध्यते । तृच् प्रत्यये तदेव रूपम् ।

णेरनिटि ॥५१॥

अनिडादावार्धधातुके णेर्लोपो भवति । इयङ्-यण्-गुण-वृद्धि-दीर्घाणामपवादः । अततक्षत् । अररक्षत् । कारणा । हारणा । कारकः । कार्यते ।

अततक्षत्—√तक्ष+णिच्+लुङ् 'च्लिः' तस्य 'चङ्' आदेशः, । ङित्त्वादत्र न गुणस्य प्रसङ्गः 'इयङ्' आदेश-प्राप्तिः तस्यापवादो 'णि' लोपः । एवम् **अररक्षत्** इत्यत्रापि । 'यण्' आदेशापवादस्योदाहरणम् **आटिटत्** । **कारणा**--गुणादेशापवादोऽत्र णेर्लोपः एवं **हारणा** इत्यत्रापि । **कारकः**—अत्र प्राप्ताया वृद्धेरपवादो णिलोपः । **कार्यते**—अत्र दीर्घं बाधित्वा णिलोपो भवति ।

निष्ठायां सेटि ॥५२॥

सेटि निष्ठायां णेर्लोपो भवति । कारितम् । गणितम् ।

'सेटि' इति किम् ? संज्ञपितः पशुः । सेट्–ग्रहणसामर्थ्यादिह पूर्वेणापि न भवति । 'सनीवन्तर्ध' इति ज्ञपेरिङ्विकल्पिते 'यस्य विभाषा' इति निष्ठायां प्रतिषेधः ।

कारितम्—√कृ + णिच् + क्त । एवं **गणितम्**—इत्यत्र √गण् धातुः संख्यानार्थकः अदन्तस्तेन नोपधावृद्धिः । **संज्ञपितः**—सम् √ज्ञप + णिच् + क्त । मित्त्वात् 'मितां ह्रस्वः' इत्यनेनोपधाया ह्रस्वत्वम् ।

जनिता मन्त्रे ॥५३॥

'जनिता' इति मन्त्र विषये इडादौ णिलोपो निपात्यते । यो नः पिता जनिता ।

मन्त्रे किम् ? जनयिता ।

जनिता—√जनी + णिच् + तृच् । **जनयिता**—अत्र मित्त्वात् 'मितां ह्रस्वः' इति उपधाया ह्रस्वत्वम् ।

शमिता यज्ञे ॥५४॥

यज्ञविषये 'शमिता' इति इडादौ णिलोपो निपात्यते । शृतं हविः शमितः । तृचि सम्बुद्धयन्तमेतत् ।

शमितः—√शम् + णिच् + तृच्, सम्बोधने रूपम् । न तु 'क्त' प्रत्ययान्तमिदम् इति ज्ञेयम् ।

अयामन्ताल्वाय्येत्न्विष्णुषु ॥५५॥

णेः 'अय्' आदेशः आम्-अन्त-आलु-आय्य-इत्नु-इष्णुषु परतः । आम्—कारयाञ्चकार ।

अन्त—मण्डयन्तः । आलु—गृहयालुः । आय्य—स्पृहयाय्यः । इत्नु—स्तनयित्नुः । इष्णु—पोषयिष्णुः । 'न' इति वक्तव्ये 'अय्' आदेशवचनम् उत्तरार्थम् ।

कारयाञ्चकार—√कृ (णिजन्तः)+लिट् 'आम्' इत्यस्यागमः ।

मण्डयन्तः—√मडि (भूषायाम्)+झच् 'झोऽन्तः' इति तस्य अन्त आदेशः । **स्पृहयालुः**—√स्पृह् (ईप्सायाम् चुरादिः)+आलुच् । **स्पृहयाय्यः**—√स्पृह्+आय्यः । **स्तनयित्नुः**—√स्तन+इत्नुच् । **पोषयिष्णुः**—√पुष् (पुष्टौ णिजन्तः)+इष्णुच् ।

ल्यपि लघुपूर्वात् ॥५६॥

ल्यपि परे लघुपूर्वादुत्तरस्य णेः 'अय्' आदेशः । प्रणमय्य गतः । प्रतमय्य गतः ।

प्रणमय्य—प्र √नम् (णिजन्तः)+क्त्वा→ल्यप् । √नम् आदयः मितः इति ह्रस्वत्त्वात् मकारो लघुपूर्वोऽस्ति ।

विभाषाऽऽपः ॥५७॥

प्राप्य गतः / प्रापय्य गतः ।

प्राप्य—प्र√आप्लृ (स्वादिगणी णिजन्तः, चुरादिगणी च)+क्त्वा →ल्यप् ।

युप्लुवोर्दीर्घश्छन्दसि ॥५८॥

एतयोर्ल्यपि परतः छन्दसि विषये दीर्घो भवति । यथा—दान्त्य॑नुपूर्व॑ वि॒यूय॑ । दक्षिणा यो यत्रा परिप्लूय ।

वियूय—वि √यु+क्त्वा→ल्यप् । **परिप्लूय**—अत्र √प्लुङ् गतौ धातुः ।

क्षियः ॥५९॥

क्षियश्च दीर्घो भवति ल्यपि परतः । प्रक्षीय ।

प्रक्षीय—प्र+√क्षि (क्षये, निवासगत्योश्च वा)+क्त्वा→ल्यप् ।

निष्ठायामण्यदर्थे ॥६०॥

कृत्यस्यार्थो भावकर्मणी । ताभ्यामन्यत्र या निष्ठा तस्यां क्षियो दीर्घो भवति । आक्षीणः । प्रक्षीणः ।

अकर्मकत्वात् क्षियः कर्तरि 'क्त' प्रत्ययोऽयम् । 'क्तोऽधिकरणे' इत्यधिकरणे क्तः । प्रक्षीणमिदं देवदत्तस्य ।

कृत्यस्य—'ण्यतः' इति पदं पूर्वं योज्यम् । **ताभ्यामन्यत्र**—भावकर्मभ्याम् अन्यत्र=कर्तरि, अधिकरणे च । **प्रक्षीणम्**—प्रक्षीयतेऽस्मिन्निति अधिकरणभूतं द्रव्यम् । **देवदत्तस्य**—'अधिकरणवाचिनश्च' इति कर्तरि षष्ठी ।

वाऽऽक्रोशदैन्ययोः ॥६१॥

आक्रोशे गम्यमाने दैन्ये च क्षियो निष्ठायामण्यदर्थे वा दीर्घो भवति क्षीणायुः / क्षितायुः । दैन्ये—क्षितकः / क्षीणकः ।

क्षितायुः—दीर्घाभावपक्षे 'क्षियो दीर्घात्' इति 'क्त' इत्यस्य तकारस्य नकारस्तस्य च णकारोऽपि न । **क्षितकः / क्षीणकः**—'अनुकम्पायाम्' इति 'कन्' ।

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥६२॥

एषु भावकर्मविषयेषु परत उपदेशेऽजन्तानां 'हन्' आदीनां च वा चिण्वत् कार्यं भवति ।

चिण्वद्भावपक्षे इडागमः । कस्य ? स्य-सिच्-सीयुट्-तासीनामेव वेदितव्यम् ।

प्रयोजनम्—

चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥

अजन्तानां स्ये—चेष्यते / चायिष्यते । अचेष्यत / अचायिष्यत । √हन्—हनिष्यते / घानिष्यते । अहनिष्यत / अघानिष्यत इत्यादि ।

प्रयोजनम्—वृत्तौ 'प्रयोजनानि' इत्युक्तम् । वृद्धिः—**चायिष्यते** इत्युदाहरणम् । युक्—**दायिष्यते** इत्यत्र 'आतो युक् चिण् कृतोः' इति 'युक्' । **हन्तेर्घत्वम्**—**घानिष्यते** इत्यत्र 'हो हन्तेर्ञ्णिन्नेषु' इति कुत्वेन हकारस्य घकारः । दीर्घः.... चिणीति—**शमिष्यते / शामिष्यते** इत्यत्र विकल्पेन

दीर्घः । **इट्……विघाती**—अयं चिण्वत् 'इट्' असिद्धः तेन **शमिष्यते / शामिष्यते** इत्यत्र णेर्लोपो भविष्यति । अयम् 'इट्' नित्यः तेन यत्र 'आर्धधातुकस्येड् वलादेः' इत्यस्य प्रवृत्तिः वलादौ तत्रापि नित्यत्वादयमेव भविष्यति । स वल्निमित्तो **विघाती**—विघातः=निमित्ताभावात् अप्रवृत्तिः स अस्यास्तीति—सर्वत्र चिण्वद् 'इट्' भविष्यति स चासिद्ध इति भावः ।

√ग्रह—**ग्राहिष्यते / ग्रहीष्यते । अग्राहिष्यत / अग्रहीष्यत** । 'अत उपधाया' इति वृद्धिः, 'ग्रहोऽलिटि दीर्घः' इति दीर्घत्वम् च भवति । √दृश—**दर्शिष्यते / द्रक्ष्यते । अदर्शिष्यत / अद्रक्ष्यत** । विकल्पेन 'इट्' ।

सिचि—**अचायिषाताम् / अचेषाताम्** इत्यादि ।

सीयुटि—**चायिषीष्ट / चेषीष्ट** इत्यादि ।

तासौ—**चायिता / चेता** इत्यादि ।

दीङो युडचि क्ङिति ॥६३॥

दीङो युडागमो भवति अजादौ किति ङित्यार्धधातुके परतः । उपदिदीये । उपदिदीयाते । 'दीङः' इति पञ्चमी-निर्देशादजादेर्युडागमो भवति । विधानसामर्थ्याच्चि 'एरनेकाचः……' इति यणादेशे कर्त्तव्ये तस्यासिद्धत्वं न भवति ।

उपदिदीये—उप √दीङ् (क्षये) + लिट् → त → एश् । **पञ्चमीनिर्देशात्**—'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति परिभाषाया बलेनेति बोध्यम् । तेन सूत्रे 'अचि' इति सप्तमी षष्ठीत्वेन प्रकल्प्यते । **अजादेः युट्**—टित्त्वात्तस्य आदौ भवति ।

आतो लोप इटि च ॥६४॥

इटचजादावार्धधातुके परतः किति ङिति चाकारान्तस्याङ्गस्य लोपो भवति । इटि—पपिथ । तस्थिथ । अचि किति—पपतुः । गोदः । ङिति—प्रदा । प्रस्था ।

पपिथ—√पा + लिट् → सिप् → थल् । **तस्थिथ**—√स्था + लिट् । **पपतुः**—पा + लिट् → तस् → अतुस् 'असंयोगाल्लिट् कित्' इति कित्त्वम् । **गोदः**—गो √दा + क । **प्रदा**—प्र √दा + अङ् + टाप् । **प्रस्था**—प्र √स्था + अङ् + टाप् ।

ईद्यति ॥६५॥

आदन्तस्याङ्गस्य यति प्रत्यये परे ईकार आदेशो भवति । देयम् । धेयम् । मेयम् ।

देयम्—√दा + यत् । **मेयम्**—√मा + यत् । सर्वत्र ईकारस्य गुणः ।

घुमास्थागापाजहातिसां हलि ॥६६॥

घुसंज्ञकानामङ्गानाम्, मा, स्था, गा, पा जहाति, सा एषां हलादौ क्ङिति प्रत्यये ईकार आदेशो भवति । दीयते । धीयते । मीयते । मेमीयते । स्थीयते । गीयते । जेगीयते । पीयते । पिबतेर्ग्रहणम् अलुग्विकरणत्वात् । अवसीयते ।

घुसंज्ञकानाम्—√दा-√धा इत्येतयोः 'घु' संज्ञा । 'गा-मा-दाग्रहणेष्वविशेषः' इति सर्वेषां गा-मा-दा इत्याकारकाणां ग्रहणम् । **दीयते**—√दा + कर्मणि लट्→त । **मेमीयते**—√मा + यङ् + लट्→त । **पिबतेर्ग्रहणम्**—√पा पाने इति शब्विकरणो धातुः भ्वादिः, पा रक्षणे इति अदादिः अत्र शपो लुक् । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इति परिभाषाया बलेन √पा पाने इत्यस्यैवात्र ग्रहणम् । **अवसीयते**—अव √षो (अन्तकर्मणि) + कर्मणि लट् ।

एर्लिङि ॥६७॥

घु-मा-स्था-गा-पा-जहाति-सा एषामङ्गानां लिङि परत एकार आदेशो भवति । देयात् । धेयात् । मेयात् । स्थेयात् । गेयात् । पेयात् । अवसेयात् ।

मेयात्—√मा (माने) + इत्यस्यैवोदाहरण् √माङ्— √मेङ् इत्यनयोरात्मनेपदत्वात् । एवं **गेयात्** इत्यत्र √गै (शब्दे) इति बोध्यः ।

वाऽन्यस्य संयोगादेः ॥६८॥

ध्वादिभ्योऽन्यस्य संयोगादेराकारान्तस्य वा एकार आदेशो भवति किति ङिति लिङि परे । ग्लेयात् / ग्लायात् । म्लेयात् / म्लायात् ।

अन्यस्येति किम् ? स्थेयात् ।

ग्लेयात्, म्लेयात्—√ग्लै, √म्लै (हर्षक्षये) + आशीर्लिङ् ।

न ल्यपि ॥६९॥

ल्यपि परतो घ्वादीनामङ्गानां यदुक्तं तन्न भवति। प्रदाय। प्रधाय ।

यदुक्तम्—'घुमास्था ....' इत्यनेन विहितम् ईत्त्वम् ।

मयतेरिदन्यतरस्याम् ॥७०॥

मयतेरिकारादेशो भवति अन्यतरस्यां ल्यपि परे । अपमित्य / अपमाय ।

अपमित्य—अप √मेङ् (प्रणिदाने) + क्त्वा → ल्यप्, अनेन इत्वे कृते 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन 'तुक्' आगमः ।

लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥७१॥

एषु परतोऽङ्गस्य अडागमो भवति स चोदात्तः। अकार्षीत्। अकरोत् । अकरिष्यत् ।

अङ्गस्य—अत्र धातुः अङ्गम् तस्य आगमः 'अट्' आदौ भवति ।

उदात्तः—'आगमा अनुदात्ताः भवन्ति' इति कारणादनेन उदात्तत्वं विधीयते ।

आडजादीनाम् ॥७२॥

अजादीनामङ्गानाम् आडागमो भवति । ऐक्षिष्ट । ऐक्षत । ऐक्षिष्यत । 'आटश्च' इति वृद्धिः ।

आडागमः—आट् + आगमः स च उदात्त इति शेषः । **ऐक्षिष्ट**—√ईक्ष + लुङ् → त । 'आट्' टित्त्वाद् धातोः आदौ भवति आ + ईक्षिष्ट = ऐक्षिष्ट ।

छन्दस्यपि दृश्यते ॥७३॥

छन्दसि विषये विहितादन्यत्रापि आडागमो दृश्यते । अनजादीनामपि । आनक् । आयुनक् ।

आनक्—√नश्+लुङ् । **आयुनक्**—√युज्+लङ् । इमौ धातू अनजादी तथापि 'आट्' आगमो भवति ।

न माङ्योगे ॥७४॥

लुङादिषूक्तं माङ् योगे न भवति । मा भवान् कार्षीत् । मा स्म भवान् करोत् ।

उक्तम्—'अट्-आट्' इत्यागमद्वयम् । अटः उदाहरणम्—**कार्षीत्, करोत्**—√कृ इत्यस्य क्रमशः लुङि, लङि च रूपे । आटः उदाहरणम्—**मा भवान् ईक्षिष्ट ।**

बहुलं छन्दस्यमाङ्योगेऽपि ॥७५॥

बहुलं छन्दसि विषये अमाङ्योगेऽपि अडाटौ न भवतः । अपि शब्दान्माङ् योगेऽपि भवतः । जनिष्ठा उग्रः । कामंमूनयीः । मा वः क्षेत्रे परबीजान्यवाप्सुः ।

जनिष्ठाः—अमाङ्योगेऽपि न 'अट्' । **ऊनयीः**—अत्र 'आट्' न । **मा……अवाप्सुः**—'माङ्' योगेऽपि √वप्+लुङ् (कर्मणि) अट् आगमः 'अवाप्सुः' इति ।

इरयो रे ॥७६॥

'इरे' इत्यस्य छन्दसि बहुलं 'रे' इत्यादेशः । शमी गर्भं प्रथमं दध्रे । याऽस्य परिददृश्रे । धाञो 'रे' भावस्यासिद्धत्वादातो लोपो भवति । न च भवति—परमाया धियोऽग्निकर्माणि चक्रिरे । अत्र 'रे' शब्दस्य सेटां धातूनाम् इटि कृते पुना 'रे' भावः क्रियते, तदर्थम् 'इरयोः' इत्ययं द्विवचननिर्देशः ।

शरी ......दध्रे—वृत्तौ तु गर्भं प्रथमं दध्र आपः इत्युदाहृतम् । दध्रे इत्यत्र दधा+इरे इत्यवस्थायां 'इरे' इत्यस्य 'रे' आदेशः तस्यासिद्धत्वात् आतो लोपो भवति । **परिददृश्रे**—परि √दृश्+लिट्→झ→इरेच् तस्य 'रे' भावे 'इट्' आगमे 'इरे' इति जायते तस्य पुनः 'रे' आदेशः इत्येतदर्थमेव 'इरयोः' इत्यत्र द्विवचनम् ।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ।।७७।।

श्नुप्रत्ययान्तस्याङ्गस्य धातोरिवर्णोवर्णान्तस्य 'भ्रू' इत्येतस्य यथासंख्यम् 'इयङ्-उवङ्' आदेशौ भवतः अजादौ प्रत्यये । आप्नुवन्ति । राध्नुवन्ति । चिक्षियतुः । लुलुवतुः । नियौ । नियः । लुवौ । लुवः । भ्रुवौ । भ्रुवः । आभ्याम् इयङ्-ऊवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन । नयनम् । लवनम् ।

'श्नु' इत्यस्योदाहरणद्वयम्—**आप्नुवन्ति** √आप्+श्नु+लट्→अन्ति । **राध्नुवन्ति**—√राध्+श्नु+लट्→अन्ति । धातोरुदाहरणद्वयम्—**चिक्षियतुः**—√क्षि+लिट्→अतुस् । **लुलुवतुः**—√लूञ्+लिट्→अतुस् । **नियौ । नियः । लुवौ । लुवः**—√नी+क्विप्, √लू+क्विप् ततः प्रथमा द्विवचन-बहुवचनयो रूपे । 'क्विबन्ताः शब्दा धातुत्वं न जहति ।' इत्यनयोर्धातुत्वम् अक्षुण्णम् बोध्यम् । **भ्रुवौ । भ्रुवः**—भ्रू इत्यस्य प्रथमाद्विवचन-बहुवचनयो रूपे बोध्ये । **नयनम् । लवनम्**—अत्र गुणो भवति । वृद्धेरुदाहरणे—**चायकः** । लावकः ।

अभ्यासस्यासवर्णे ।।७८।।

अभ्यासस्येवर्णोवर्णान्तस्यासवर्णेऽचि परत एतावादेशो भवतः । इयेष । उवोष ।

इयेष—√इष (इच्छायाम्)+लिट्→णल् इ+एष इति दशायाम् अभ्यासस्य इकारस्य 'इयङ्' । **उवोष**—√उष (दाहे)+लिट्→णल् । अत्र उकारस्य उवङ् ।

स्त्रियाः ।।७९।।

स्त्री शब्दस्याजादौ 'इयङ्' आदेशः स्त्रियौ । स्त्रीणाम् । अत्र परत्वान्नुडागमः । पृथक्करणमुत्तरार्थम् ।

'स्त्री' शब्दस्य—न तु स्त्रीसंज्ञकस्येति तात्पर्यम् । **स्त्रियौ**—स्त्री + औ । **स्त्रीणाम्**—स्त्री + आम् । परत्वात् नुटि कृते अजादिः प्रत्ययो नास्ति तेन न 'इयङ्' ।

वाम्शसोः ॥८०॥

अमि शसि च स्त्रिया वा इयङ् आदेशः । स्त्रियम् / स्त्रीम् । स्त्रियः / स्त्रीः ।

स्त्रीम्—'इयङ्' इत्यस्य अभावपक्षे 'अमि पूर्वः' इति इति पूर्वरूपमेकादेशः । **स्त्रीः**—'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घः ।

इणो यण् ॥८१॥

इणोऽङ्गस्य यणादेशो भवति अचि परतः । यन्ति । यन्तु । इयङादेशापवादोऽयम् ।

इणः—√इण् धातोः न तु 'इण्' प्रत्याहारस्य । **यन्ति**—√इण् + लट्→झि→अन्ति । **यन्तु**—अत्र लोट् लकारः शेषं पूर्ववत् । इयङ्...... **अयम्**—'अचिश्नु :.....' इत्यनेन प्राप्तस्य । तेन 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते ।' इति परत्वाद् गुणवृद्धी यणं बाधेते **अयनम्** । **आयकः** ।

एरनेकाचोऽसंयोगपूर्वस्य ॥८२॥

धातोः इति वर्तते । धातोरवयवः संयोगः पूर्वो यस्मादिवर्णान्नास्ति, असावसंयोगपूर्वः । तदन्तस्याङ्गस्यानेकाचोऽचि परतो यण् आदेशो भवति । निन्यतुः । ग्रामण्यौ ।

संयोगपूर्वस्य तु यवक्रियौ ।

❀(वा०) गतिकारकाभ्यामन्यपूर्वस्य नेष्यते । परमनियौ ।

निन्यतुः—√नी + लिट्→अतुस् । **ग्रामण्यौ**—ग्रामणी + औ । **यवक्रियौ**—यवान् क्रीणीतः=यवक्री + औ । अत्र ईकारात् पूर्वः 'क्र' संयोगः । **नेष्यते**—तथा व्याख्यानात् ।

ओः सुपि ॥८३॥

धात्ववयवः संयोगः पूर्वो यस्मादुवर्णान्नास्ति तदन्तस्याङ्ग-

स्यानेकाचो यणादेशो भवति अजादौ सुपि परे । खलप्वौ । खलप्वः । शतस्वौ । शतस्वः ।

असंयोगपूर्वस्यैव—कटप्रुवौ ।

खलप्वौ—खलं पुनीतः खल √पू + क्विप् = खलपू + औ । एवं शतं सुवाते इति शतसू + औ = **शतस्वौ** । **कटप्रुवौ**—अत्र √प्रूङ् धातोः ऊकारः 'प्रू' इत्यतः संयोगपूर्वः । अत्र ऊकारस्य 'उवङ्' आदेशः । अयमपि गतिकारकाभ्यामन्यत्पूर्वस्य नेष्यते । दरमलुवौ ।

वर्षाभ्वश्च ॥८४॥

एतस्याजादौ सुपि परे यणादेशो भवति । वर्षाभ्वौ । वर्षाभ्वः ।

❀ (वा०) पुनर्भ्वश्चेति वाच्यम् । पुनर्भ्वौ ।

❀ (वा०) कारापूर्वस्यापीष्यते । काराभ्वौ ।

वर्षाभ्वौ—वर्षायां भवतः = वर्षा भू + औ । **पुनर्भ्वौ**—पुनर्भवति (विवाहिता) या सा पुनर्भूः = पूनर्भू + औ ।

न भूसुधियोः ॥८५॥

एतयोर्यणादेशो न । प्रतिभुवौ । सुधियौ ।

प्रतिभुवौ—प्रति भवतः इति प्रति भू + औ । प्रतिभूः = (जमानत लेने वाला) । **सुधियौ**—सुष्ठु ध्यायतः इति सुधी + औ ।

छन्दस्युभयथा ॥८६॥

छन्दसि विषयेऽनयोरुभयथा दृश्यते । चि॒त्रं वि॒भ्वं' वि॒शे / वि॒भुवं' वि॒शे । सुध्यौ हव्यमग्ने / सुधियौ हव्यमग्ने ।

अनयोः—'भू-सुधी' शब्दयोः । **उभयथा**—यण्, इयङ्-उवङौ ।

हुश्नुवोः सार्वधातुके ॥८७॥

'हु' इत्येतस्याङ्गस्य 'श्नु' प्रत्ययान्तस्यानेकाचोऽसंयोगपूर्व-

स्याजादौ सार्वधातुके परतो यणादेशो भवति। जुह्वति। जुह्वतुः। सुन्वन्ति। सुन्वन्तु।

जुह्वति—√हु + लट् → झि → अति। **सुन्वन्ति**—√सु (√षुञ् अभिषवे) + लट् → झि → अन्ति।

भुवो वुग् लुङ्लिटोः ॥८८॥

भुवोऽङ्गस्य वुगागमो भवति लुङि लिटि चाजादौ परतः। लुङि—अभूवन्। अभूवम्। लिटि—बभूव। बभूवतुः। बभूवुः।

वुक्—कित्त्वात् अन्तागमो भवति—**अभूवन्**—√भू + लुङ् → झि → अन्, आदौ 'अट्' अ भू + अन् 'वुक्' आगमः। **बभूव**—भू + लिट् → ति → णल्। कृताकृतप्रसङ्गितया नित्यत्वात् पूर्वं 'वुक्' ततो गुणवृद्ध्योः प्राप्तिरेव नास्ति।

ऊदुपधाया गोहः ॥८९॥

गोहोऽङ्गस्योपधाया ऊकार आदेशो भवति अजादौ प्रत्यये परतः। निगूहति। निगूहकः।

उपधाया इति किम्? अन्त्यस्य मा भूत्।

'गोहः' इति निर्देशाद् गुणहेतावचि परे। नेह—निजुगुहतुः।

निगूहति—नि √गुह (संवरणे) + लट् → ति 'शप्' आगमः। **निगूहकः**—नि √गुह + ण्वुल् → अक। अत्र गुण-प्राप्त्या 'गोहः' भविष्यति' तस्यैव सूत्रे निर्देशः। तेन गुण-विषये एवास्य प्रवृत्तिः। **निजुगुहतुः**—अत्र कित्त्वाद् गुणनिषेधे न 'गोह' इति रूपं सम्भवति इति हेतोर्न ऊकार आदेशः।

दोषो णौ ॥९०॥

दोष उपधाया ऊकार आदेशो भवति णौ परतः। दूषयति।

दूषयति—√दुष् (वैकृत्ये) + णिच् + लट् → ति। 'गोहः' इति प्रकरणेनाभेदात् अत्रापि 'दोषः' इति निर्देशः कृतः। अन्यथा णौ दोष एव सम्भवति।

वा चित्तविरागे ॥६१॥

चित्तविरागे दोष उपधाया वा ऊकार आदेशो भवति णौ परतः । चित्तं दूषयति / दोषयति ।

दोषयति—ऊकारादेशे असति उपधाया गुण ओकारः । **चित्त-विरागः**—चित्तस्याप्रीतिः । **चित्तं दूषयति**=चित्तं विमुखं करोति ।

मितां ह्रस्वः ॥६२॥

'घटादयो मितः' इति कृतसंज्ञानामुपधाया ह्रस्वो भवति । घटयति । व्यथयति । जनयति ।

केचिदत्र 'वा' इत्यनुवर्त्तयन्ति । सा व्यवस्थितविभाषा । तेन सङ्क्रामयति । उत्क्रामयति इत्येवमादि सिद्धं भवति ।

घटयति—'अत उपधायाः' इति वृद्धौ कृतायाम् अनेन ह्रस्वत्वं विधीयते । **सङ्क्रामयति**—सम् √क्रमु (पादविक्षेपे)+णिच्+लट्→ति । अत्र न ह्रस्वत्वम् । व्यवस्थिता चासौ विभाषा इति **व्यवस्थितविभाषा** क्वचित् प्रयोगे ह्रस्वो भवति क्वचिन्न । अत्र आचार्या एव प्रमाणम् ।

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥६३॥

चिण्—णमुल् परे च णौ परतो मितामङ्गानाम् उपधाया दीर्घो भवत्यन्यतरस्याम् । अशमि / अशामि । शमं शमम् / शामं शामम् ।

दीर्घग्रहणं किम् ? ह्रस्व-विकल्प एव विधीयते ? नैवं शक्यम्, शमयन्तं प्रयुङ्क्ते इति द्वितीये णिचि ह्रस्वविकल्पो न स्यात् णिलोपस्य स्थानिवद्भावात् । शमयन्तं प्रयुक्तवान् । अशमि / अशामि । योऽसौ णौ णिर्लुप्यते, यङ्कारश्च; तयोर्दीर्घविधावजादेशो न स्थानिवद् भवतीत्यस्थानिवद्भावाद् दीर्घः सिद्धो भवति । ह्रस्वविकल्पे तु विधीयमाने स्थानिवद्भावः स्यात् ।

अशमि / अशामि—√शम्+णिच्+लुङ् । **दीर्घग्रहणं किम्**—**ह्रस्व-**

विकल्पेनापि कार्यसिद्धेः। दीर्घविधौ 'न पदान्त……' इति सूत्रेण स्थानिवद्भावस्य निषेधो भवति, ह्रस्वविकल्पे तु स न स्यात् तथा च द्वितीये णिचि कृते णेर्लोपस्य यङोऽकारस्य स्थानिवत्त्वे उपधाया अभावात् विकल्पेन ह्रस्वत्वं न स्यात्।

खचि ह्रस्वः ॥९४॥

खच्परे णौ परतः अङ्गस्योपधाया ह्रस्वो भवति। द्विषन्तपः। परन्तपः। पुरन्दरः।

द्विषन्तपः—द्विषत् √तप्+णिच्+खच्, 'मुम्' आगमः संयोगान्तलोपः। एवं **परन्तपः**। **पुरन्दरः**—अत्रापि खचि 'मुम्' इत्यस्य आगमः। सर्वत्र मुमो मकारस्यानुस्वार-परसवर्णेन नकारः।

ह्लादो निष्ठायाम् ॥९५॥

ह्लादोऽङ्गस्य उपधाया ह्रस्वो भवति निष्ठायां परतः। प्रह्लन्नः।

प्रह्लन्नः—प्र √ह्लाद्+क्त। एवं क्तवतु प्रह्लन्नवान्।

छादेर्घेऽद्व्युपसर्गस्य ॥९६॥

छादेरङ्गस्य अद्व्युपसर्गस्य 'घ' प्रत्यये परत उपधाया ह्रस्वो भवति। उरश्छदः। प्रच्छदः। दन्तच्छदः। तनुच्छदः।

उरश्छदः—उरस् √छद् (चुरादिः णिजन्तः)+घः, श्चुत्वम्। **प्रच्छदः** इत्यादिषु 'तुक्' आगमः। **अद्व्युपसर्गस्य**—द्वि-उपसर्गरहितस्य। तेनात्र ह्रस्वो न—**समुपच्छादः**।

इस्मन्त्रन्क्विषु च ॥९७॥

इस्-मन्-त्रन्-क्विप् एषु परतश्छादेरङ्गस्योपधाया ह्रस्वो भवति। इस्-छदिः। मन्-छद्म। त्रन्-छत्त्रम्। क्विप्-धामच्छत्।

छदिः—√छद् (णिजन्तः)+इसि। **धामच्छत्**—अत्र 'तुक्' आगमः।

गमहनजनखनघसां लोपः क्ङित्यनङि ॥९८॥

एषामङ्गानाम् उपधाया लोपो भवति अजादौ किति ङिति नत्वङि । जग्मतुः । जग्मुः । जघ्नतुः । अङि तु अघसत् ।

जग्मतुः— √गम् + लिट् → तस् → अतुस् । **जघ्नतुः**—अत्र √हन् + लिट् । एवम् √जन्—**जज्ञे** । √खन्—**चख्नतुः** । √घस्—**जक्षतुः** । **अघसत्**— √घस् + लुङ् अत्र च्लेः 'अङ्' भवति ।

तनिपत्योश्छन्दसि ॥९९॥

एतयोश्छन्दसि विषये उपधाया लोपः अजादौ किति ङिति । वितत्निरे कवयः । विपप्तिरे । शकुना इव पप्तिम ।

छन्दसि—लौकिके संस्कृते **वितेनिरे** । **पेतिम** इति भवतः ।

घसिभसोर्हलि च ॥१००॥

एतयोश्छन्दसि विषये उपधाया लोपः हलादावजादौ च किति ङिति । सग्धिश्च मे सपीतिश्च मे । बब्धां ते हरी धानाः ।

सग्धिः—समाना ग्धिः इति समानस्य 'स' भावः । **बब्धाम्**—√भस् + लोट् अत्र द्वित्वे कृते उपधालोपः । अजादौ उदाहरणम्—**बप्सति** अत्रापि द्वित्वे कृते उपधालोपः ।

हुझल्भ्यो हेर्धिः ॥१०१॥

होर्झलन्तात्परस्य हलादेर्हेः धिः आदेशः । जुहुधि । भिन्धि ।

होः—√हु इत्यस्मात् । **जुहुधि**—√हु + लोट् → सिप् → हि, तस्य अनेन 'धि' आदेशः । **भिन्धि**—√भिद् + लोट् → सिप् → हि ।

श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥१०२॥

श्रु-शृणु-पॄ-कृ-वृ एभ्यः परस्य हेः धिः आदेशः छन्दसि । श्रुधी हवमिन्द्र । शृणुधी गिरः । पूर्द्धि । उरु णस्कृधि । अपावृधि ।

श्रुधी, शृणुधी—'अन्येषामपि दृश्यते' इति दीर्घः । 'शृणु' इति 'श्लु' विकरणसहितस्य 'श्रु' इत्यस्यैव रूपम् ।

अङितश्च ॥१०३॥

अङितश्च हेः धिः आदेशः । 'वा छन्दसि' इति पित्त्वेनास्य अङित्वम् । सोमं रारन्धि । अस्मभ्यं तद्धर्यश्व प्रयन्धि ।

रारन्धि—व्यत्ययेन परस्मैपदम् । प्रयन्धि —√यम्+लोट् 'शप्' इत्यस्य लुक् ।

चिणो लुक् ॥१०४॥

चिण उत्तरस्य प्रत्ययस्य लुक् भवति । अकारि । अहारि ।

चिणः— अत्र पञ्चमी विभक्तिः । **अकारि**—लुङो लुक् ।

अतो हेः ॥१०५॥

अकारान्तादुत्तरस्य हेर्लुग् भवति । पठ । गच्छ । धाव ।

पठ—√पठ+लोट्→सिप्→हि, तस्य लुक् । **गच्छ**—√गम+लोट् 'इषुगमियमां छः' इति मस्य 'छ', 'तुक्' आगमः ।

उतश्च प्रत्ययादसंयोगपूर्वात् ॥१०६॥

उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादुत्तरस्य हेर्लुक् । चिनु । तनु ।

चिनु—√चि (चयने)+लोट् 'श्नु' आगमः तस्यैवात्र उकारः सोऽस्ति न संयोगपूर्वः । **तनु**—√तनु (विस्तारे)+लोट् अत्र 'उ' आगमः । 'असंयोगपूर्वो य उकार' इत्यर्थकरणेन उभयत्र सूत्रं प्रवर्त्तते ।

*(वा०) उतश्च प्रत्ययाच्छन्दो वा वचनम् । आतनुहि यातुधानान् । तेन मा भगिनं कृणु ।

लोपश्चास्यान्यतरस्यां म्वोः ॥१०७॥

योऽयमुकारोऽसंयोगपूर्वस्तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो

भवति मकारवकाराद्योः प्रत्यययोः परतः । सुन्वः / सुनुवः । सुन्मः / सुनुमः ।

म्वोः—मकारवकारयोः मकारवकाराद्योरिति भावः । मिपि तु परत्वाद् गुणः **शृणोमि** ।

नित्यं करोतेः ॥१०८॥

करोतेः उकार प्रत्ययस्य वकारमकाराद्योः प्रत्यययोः परतो नित्यं लोपः । कुर्वः । कुर्मः । 'न भकुर्छुराम्' इत्यनेन 'हलि च' इति दीर्घत्वनिषेधः ।

कुर्वः, कुर्मः—उकार लोपे कृते दीर्घविधौ 'न पदान्त……' इत्यनेन स्थानिवद्भावस्य निषेधात् प्राप्तस्य दीर्घस्य निषेधः ।

ये च ॥१०९॥

यादौ प्रत्यये परतः करोतेः उकारस्य नित्यं लोपो भवति । कुर्यात् ।

कुर्यात्—√कृ + विधिलिङ्→ति ।

अत उत्सार्वधातुके ॥११०॥

'उ' प्रत्ययान्तस्य करोतेः अकारस्य उकारादेशो भवति क्ङिति सार्वधातुके । कुरुतः । कुर्वन्ति ।

'उ' प्रत्ययः 'तनादि कृञ्भ्य उः' इत्यनेन भवति । भूतपूर्वेऽपि सार्वधातुके इदं सूत्रं प्रवर्तते कुरु । अत्र सिप्स्थानिकस्य 'हि' इत्यस्य लोपेऽपि सार्वधातुकपरत्वं मत्वा अकारस्य उकारादेशो भवत्येव ।

श्नसोरल्लोपः ॥१११॥

श्नस्यास्तेश्चाकारस्य लोपो भवति क्ङिति सार्वधातुके । रुन्धः । रुन्धन्ति । अस्तेः—स्तः । सन्ति ।

श्नसोरित्यत्र पररूपं द्रष्टव्यम् ।

रुन्धः— √रुन्ध + लट्→तस् । **अस्तेः**— √अस् इत्यस्य । **द्रष्टव्यम्**— श्नसोः इत्यत्र श्ना + अस् शकन्ध्वादिगणम् आकृतिगणं मत्वा पररूपं कृतं, तयोः षष्ठीद्विवचनान्ते रूपम् ।

श्नाभ्यस्तयोरातः ॥११२॥

अनयोः आकारस्य लोपो भवति सार्वधातुके क्ङिति । लुनते । लुनताम् । मिमते । मिमताम् ।

अनयोः—श्ना अभ्यस्तयोः । **लुनते**—√लु + लट् ('श्ना' आगमः)→ झ→अत । मिमते – √मा + लट्, अत्र 'उभे अभ्यस्तम्' इत्यनेन उभयोः 'मा' पदयोः 'अभ्यस्त' संज्ञा ।

ई हल्यघोः ॥११३॥

श्नाभ्यस्तयोरात ईकारादेशो भवति 'घु' वर्जितयोः हलादौ किति ङिति सार्वधातुके । लुनीतः । पुनीतः । अभ्यस्तस्य-मिमीते । मिमीषे ।

मिमीते—√माङ् + लट्→आताम् । पिति तु न— **लुनाति** ।

इद्दरिद्रस्य ॥११४॥

दरिद्रातेः इकारादेशो भवति हलादौ किति ङिति सार्वधातुके परतः । दरिद्रितः । दरिद्रिवः ।

❀(वा०) दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति वाच्यम् । दरिद्रातीति दरिद्रः । 'श्याद्व्यधास्रु……' इति णः प्रत्ययो न ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥

❀(वा०) अद्यतन्यां वेति वाच्यम् । अदरिद्रीत् / अदरिद्रासीत् ।

दरिद्रः—√दरिद्रा+अच् आकारलोपे सति आकारान्तत्वाभावात् 'श्याद्व्यधास्रु' इति 'ण' प्रत्ययो न। **दरिद्रायकः**—√दरिद्रा+ण्वुल् 'युक्' आगमः। **दरिद्राणः**—√दरिद्रा+ल्युट् (कर्त्तरि) उभयत्रापि आकारलोपो न। **दिदरिद्रासति**—आकारलोपे तु दिदरिद्रिषति। **अद्यतन्याम्**—लुङि लकारे। पूर्वाचार्यैः लुङो '**अद्यतनी**' इति संज्ञा कृता। सूत्रे **दरिद्रस्य** इति पदे छान्दसं ह्रस्वत्वं ज्ञेयम्।

भियोऽन्यतरस्याम् ॥११५॥

'भी' इत्येतस्य अन्यतरस्याम् इकारादेशो भवति हलादौ क्ङिति सार्वधातुके। विभीतः / विभितः। विभीथः / विभिथः।

विभीतः—√भी (भये)+लट्→तस्। इकारादेशे विभितः। आर्धधातुके तु भीतः। **भीतवान्** इति न तत्र इकारादेशः।

जहातेश्च ॥११६॥

जहातेरन्यतरस्याम् इकारादेशो भवति हलादौ क्ङिति सार्वधातुके। जहितः / जहीतः। जहिथ / जहीथ।

जहितः / जहीतः—√हा+लट्→तस्। इकारादेशाभावे 'ई हल्यघोः' इत्यनेन पक्षे ईकारादेशः।

आ च हौ ॥११७॥

जहातेः आकारादेशो भवति, इकारश्चान्यतरस्यां हौ। जहाहि / जहिहि / जहीहि।

सूत्रे **च** इति पदम् इत्त्वमन्यतरस्यां चानुकर्षति।

लोपो यि ॥११८॥

जहातेर्लोपो भवति यादौ क्ङिति सार्वधातुके। जह्यात्।

जह्यात्—√हा+विधिलिङ्→तिप् 'यासुट्' आगमः।

ध्वसोरेद्धावभ्यासलोपश्च ॥११९॥

घोरस्तेश्च एकारादेशः हौ अभ्यासलोपश्च । घोः—देहि । धेहि । अस्तेः—एधि । 'श्नसोरल्लोपः' इत्यकार-लोपः । शिदयं लोप इष्यते । तेन सर्वस्याभ्यासस्य लोपो भवति ।

देहि—√दाञ् + लोट् → सिप् → हि । **धेहि**—√धाञ् इत्यस्य रूपम् । **एधि**—√अस् + लोट् → सिप् → हि 'हुझल्भ्यो हेर्धिः' इत्यनेन हेः 'धि' । **सर्वस्याभ्यासस्य**—अन्यथा अन्त्यस्यैव लोपः स्यात् ।

अत एकहल्मध्येऽनादेशादेर्लिटि ॥१२०॥

लिट्कृताभ्यासादेशहीनस्य धातोरसहायहलोर्मध्यस्यात एत्वं स्यात् किति लिटि अभ्यास लोपश्च । रेणतुः । रेणुः । येमतुः ।

अत इति किम् ? दिदिवतुः ।

तपरत्वं किम् ? ररासे ।

एक हल्मध्य इति किम् ? ततक्षतुः ।

अनादेशादेः इति किम् ? चकणतुः ।

'लिटि' इत्यादेशविशेषणं किम् ? नेमतुः ।

❀(वा०) दम्भेरेत्वं वाच्यम् । देभतुः । 'न'लोपस्यासिद्धत्वान्न प्राप्नोति ।

रेणतुः—√रणि (शब्दार्थे) + लिट् → तस् → अतुस् । अत्र सूत्रे **एक** शब्द असहायार्थकः । **एकहल्मध्ये** इत्यत्र एकौ = असहायौ यौ हलौ तयोर्मध्ये इति समासो बोध्यः । **देभतुः**—√दम्भ + लिट् । तस्य 'श्रन्थि ग्रन्थि दम्भि...' इत्यनेन कित्त्वात् उपधाया नकारस्य लोपे तस्यासिद्धतया सूत्रेण न प्राप्तम् एत्त्वं विधीयते ।

❀(वा०) नशिमन्योरलिट्येत्त्वं वाच्यम् **अनेशम्**—√नश् + लुङ् । **मेनका**—मन् + वुन् 'आशिषि च' इत्यनेन = मेनक + स्त्रियां 'टाप्' ।

थलि च सेटि ॥१२१॥

इड्वति थलि पूर्वविषये एकारादेशः अभ्यासलोपश्च । पेचिथ ।

सेटि किम् ? पपक्थ। 'थल्'ग्रहणं विस्पष्टार्थम् । अक्ङिदर्थमेतद्वचनम् अकितोऽन्यस्य सेटोऽसम्भवात् ।

विस्पष्टार्थम्--यत्र पूर्वसूत्रेण न सिद्ध्यति तदर्थम् । **पेचिथ / पपक्थ**--अत्र विभाषा 'इट्' भवति । 'इट्' पक्षे एकारादेशः ।

तृफलभजत्रपश्च ॥१२२॥

एषां किति ङिति सेटि थलि च एत्वाभ्यासलोपौ भवतः । तेरतुः । तेरिथ । फेलतुः । फेलिथ । भेजतुः । भेजिथ । त्रेपतुः । त्रेपिथ ।

❀(वा०) श्रन्थश्च । श्रेथतुः ।

तेरतुः—√तॄ+लिट्→तस्→अतुस् । 'ऋच्छत्यॄताम्' इति गुणः ।

राधो हिंसायाम् ॥१२३॥

हिंसार्थस्य राधेः प्राग्वत् । अपरेधतुः । अपरेधिथ ।

धातुपाठे √राध संसिद्धौ पठितः । धातूनामनेकार्थत्वात् हिंसायामपि एष बोध्यः । **प्राग्वत्**--आकारस्य एकार आदेशो भवति ।

वा जॄभ्रमुत्रसाम् ॥१२४॥

एषां वा प्राग्वत् । जेरतुः / जजरतुः । जेरिथ / जजरिथ इत्यादि ।

इत्यादि--आदिपदेन √भ्रमु—**भ्रेमतुः / बभ्रमतुः** । √त्रस—**त्रेसतुः / तत्रसतुः** इत्यादीनि बोध्यानि ।

फणां च सप्तानाम् ॥१२५॥

फणादीनां सप्तानां वा प्राग्वत् । फेणतुः । फेणिथ । एवं राजृ भ्राजृ भ्राशृ भ्लाशृ स्यमु स्वन ।

फेणतुः—पक्षे **पफणतुः** । **फेणिथ**—पक्षे **पफणिथ** । √**राजृ**—**रेजतुः / रराजतुः** इत्यादि । √**भ्राजृ**—**भ्रेजे / बभ्राजे** इत्यादि । √**भ्राशृ**—**भ्रेशे /**

बभ्राशे इत्यादि । √भ्लाशृ—भ्लेशे / बभ्लाशे इत्यादि । √स्यमु—स्येमतुः / सस्यमतुः इत्यादि । √स्वन –स्वेनतुः / सस्वनतुः इत्यादि ।

न शसददवादिगुणानाम् ॥१२६॥

एषां न प्राग्वत् । निर्वृत्तोऽपि । शशसतुः । ददद । ववमतुः । शशरतुः ।

एषाम् – √शस—√दद धात्वोः वकारादीनां धातूनां गुणद्वाराऽभिनिर्वृत्तो योऽकारस्तस्य च **प्राग्वत्**—अकारस्य एकार आदेशोऽभ्यासस्य लोपश्च न भवति । **शशरतुः**—√शस + लिट् → अतुस् । **शशरतुः**—√शॄ (हिंसायाम्) अत्र गुणेन अभिनिर्वृत्तोऽकारः ।

अर्वणस्त्रसावनञः ॥१२७॥

अनञोऽर्वणस्तृ इत्यन्तादेशो भवति असौ प्रत्यये । अर्वन्तौ । अर्वन्तः ।

असौ किम् ? अर्वा ।

अनञः किम् ? अनर्वा ।

अनञः—यत्र नञ् समासो नास्ति तस्य । **असौ**—'सु' भिन्ने प्रत्यये । **अर्वन्तौ**—अर्वन्+औ । नकारस्य 'तृ' 'ऋ' लोपे 'उगिदचाम्………' इति 'नुम्' ।

मघवा बहुलम् ॥१२८॥

मघवन् इत्यस्य 'तृ' इत्ययमादेशो बहुलम् । मघवा । मघवन्तौ । न च—मघवा । मघवानौ ।

मघवा —षष्ठ्याः स्थाने व्यत्ययेन प्रथमा । **बहुलम्**—विकल्पवाचकमिदम् अत्र ।

भस्य ॥१२९॥

यदित ऊर्ध्वमनुक्रमिष्याम आ अध्यायपरिसमाप्तेः 'भस्य' इत्येवं तद् वेदितव्यम् । वक्ष्यति—'पादः पत्' द्विपदाकृतम् ।

भस्य—'भ' इति संज्ञा 'यचि भम्' इति सूत्रेण भवति, तस्य।

पादः पत् ॥१३०॥

पाद शब्दस्य भस्य 'पत्' आदेशः। द्विपदः पश्य।

द्विपद्—द्वौ पादौ अस्य द्विपात्। 'निर्दिश्यमानस्यादेशा भवन्ति' इति 'पात्' शब्दस्यैव 'पत्' न तु तदन्तस्य। द्विपदः इति रूपं द्वितीया बहुवचनान्तम्।

वसोः सम्प्रसारणम् ॥१३१॥

वस्वन्तस्य भस्याङ्गस्य सम्प्रसारणं भवति। विदुषः पश्य। विदुषा।

भस्य—'भ' संज्ञकस्य। **विदुषः**--विद्वस्+शस्। वकारस्य सम्प्रसारणम् उकारः। **विदुषा**—विद्वस्+टा।

❀(वा०) वसुग्रहणे क्वसोरपि ग्रहणमिष्यते। **पेचुषः** पश्य। **पपुषः** पश्य।

वाह ऊठ् ॥१३२॥

भस्य वाहः ('वा'शब्दस्य) 'ऊठ्' इत्ययमादेशो भवति सम्प्रसारणम्। प्रष्ठौहः। प्रष्ठौहा।

वाहः—'वाह्' इत्येतदन्तस्य। सामर्थ्यादत्र तदन्तविधिः। **प्रष्ठौहः**—प्रष्ठवाह्+शस्। सम्प्रसारणपूर्वरूपे सति प्रष्ठ+ऊह्+शस् इत्यवस्थायां 'एत्येधत्यूठ्सु' इत्यनेन अ+ऊ='औ' वृद्धिः। एवं **दित्यौहः पश्य**।

श्वयुवमघोनामतद्धिते ॥१३३॥

एषां 'भ' संज्ञानाम् अतद्धिते परतः सम्प्रसारणं भवति। शुनः। शुना।

शुनः—श्वन्+शस्। एवं युवन्—**यूनः** पश्य। मघवन्—**मघोनः** पश्य। तद्धिते तु न। शुनः इदं **शौवं** मांसम्। **यौवनं** वर्धते।

❀(वा०) श्वादीनामेतत्सम्प्रसारणं नकारान्तानामिष्यते। तेनात्र न भवति **युवतीः** पश्य।

अल्लोपोऽनः ॥१३४॥

अन्नन्तस्य भस्याङ्गस्याकारस्य लोपो भवति। राज्ञः पश्य।

राज्ञः—राजन्+शस्। 'राजन्' शब्दः 'अन्' अन्तः।

षपूर्वहन्धृतराज्ञामणि ॥१३५॥

'ष' पूर्वो योऽन् तस्य, 'हन्' इत्येतस्य, धृतराजन् शब्दस्य च; तस्य अकार—लोपो भवति अणि। औक्ष्णः। भ्रौणघ्नः। धार्तराज्ञः।

औक्ष्णः—उक्षन्+अण् (अपत्यार्थे)+शस् भ्रूणं हतवान् इति भ्रूणहा। भ्रूणहन्+अण्=**भ्रौणघ्नः**। एवं धृतराजन्+अणि=**धार्तराज्ञः**।

विभाषा ङिश्योः ॥१३६॥

अन्नन्तस्य भस्याङ्गस्याकारस्य विभाषा लोपो भवति ङिश्योः परयोः। राज्ञि / राजनि।

सूत्रे **ङिश्योः**—अत्र ङि—सप्तम्येकवचनम्। शी—'नपुंसकाच्च' इत्यनेन विहितः 'औ' इत्यस्य 'शी' आदेशः। शी—**साम्नी / सामनी** इत्युदाहरणे ज्ञेये।

न संयोगाद्वमन्तात् ॥१३७॥

वकार-मकारान्तसंयोगादुत्तरस्यानोऽकारस्य न लोपः। पर्वणः। पर्वणा। वर्मणः। वर्मणा।

पर्वणः—पर्वन्+शस्। वकारान्तोऽयं संयोगः तदुत्तरम् 'अन्'। मकारान्तसंयोगस्योदाहरणं **वर्मणः**।

अचः ॥१३८॥

'अचः' इत्ययमञ्चतिर्लुप्तनकारो गृह्यते। तदन्तस्याङ्गस्य अकारलोपो भवति। दधीचः पश्य। दधीचा।

(श्रीधराधरचरणसुजातजलजातयुगलाभ्यां नमः ।)

अचः ......गृह्यते—'अल्लोपः' इत्यनुवर्त्तनात् अत्र अकारस्यैव लोपो भवति तथा चात्र 'अच्' प्रत्याहारग्रहणे तस्यानुवृत्तिः अनर्थिका स्यात् । अत एवात्र अञ्चतेः 'अच्' गृह्यते । **दधीचः**—दध्यच् + शस् । **श्री धराधर ... नमः**—गुरवे नमस्कारो विधीयते । मङ्गलमध्यानि च शास्त्राणि प्रथन्ते इति सूक्त्या काशिकावृत्तिसारकर्त्ता मध्येऽपि हरये गुरवे च नमस्कृतिम् शिष्य-शिक्षार्थमुल्लिखति ।

उद ईत् ॥१३९॥

(श्री कृष्णो जयति ।) उद उत्तरस्याच ईकारादेशो भवति । उदीचः । उदीचा ।

उदीचः—उदच् + शस् । **श्री......**—भगवते नमस्कारो विधीयते ।

आतो धातोः ॥१४०॥

आकारान्तस्य धातोर्भस्य लोपो भवति । कीलालपः पश्य ।

कीलालपः—कीलालम् पिबति इति कीलालपाः = रुधिरपायी राक्षसः । कीललपा + शस् ।

मन्त्रेष्वाङ्यादेरात्मनः ॥१४१॥

मन्त्रेष्वात्मन आलोपो भवत्याङि परतः । त्मना सोमेभ्यः । आङ् इति 'टा' ।

आङ् इति किम् ? यदात्मनि तन्नोपतिष्ठते ।

त्मना देवेभ्यः—आत्मना इत्यस्य आकारलोपः । वृत्तौ 'सोमेभ्यः' इत्यस्य स्थाने 'देवेभ्यः' इति पाठः । **टा**—पूर्वाचार्यैः 'टा' इत्यस्य 'आङ्' इति संज्ञा कृता ।

❀ (वा०) आङोऽन्यत्रापि दृश्यते । **त्मन्या[1] समञ्जन्** । **त्मन्या**—अत्र आत्मन् + ङि → तस्य 'या' आदेशः ।

ति विंशतेर्डिति ॥१४२॥

विंशतेर्भस्य 'ति'शब्दस्य डिति परे लोपो भवति । विंशत्या क्रीतो विंशकः । 'विंशतित्रिंशत्......' इति ड्वुन् ।

विंशकः——विंशति + ड्वुन् 'ति' इत्यस्य लोपे 'वु' इत्यस्य 'अक' आदेशः ।

टेः ॥१४३॥

'टि'संज्ञस्य डिति प्रत्यये परे लोपो भवति । कुमुद्वान् । नड्वान् ।

कुमुद्वान्— कुमुद + ड्मतुप् । **नड्वान्**—नड + ड्मतुप् ।

नस्तद्धिते ॥१४४॥

नकारान्तस्य भस्य टेर्लोपो भवति तद्धिते । आग्निशर्मिः । औडुलोमिः ।

आग्निशर्मिः—अग्निशर्मणः अपत्यं पुमान् इत्यर्थे 'बाह्वादिभ्यश्च' इत्यनेन इञ् । **औडुलोमिः**- उडुलोमन् + इञ् । उभयत्र टेः 'अन्' इत्यस्य लोपः ।

❀ (वा०) नान्तस्य टिलोपे सब्रह्मचारि पीठसर्पि कलापि कुथुमि तैतिलि जाजलि लाङ्गलि शिलालिशिंखण्डि सूकरसद्म सुपर्वणामुपसंख्यानं कर्तव्यम् । **सब्रह्मचारिन्** इत्यादयः केचन इन्नन्ताः केचन अन्नन्ताः । तेषाम् अणि टिलोपे उदाहरणानि क्रमशः—**साब्रह्मचाराः । पैठसर्पाः । कालापाः । कौथुमाः । तैतिलाः । जाजलाः । लाङ्गलाः । शैलालाः । शैखण्डाः । सौकरसद्माः । सौपर्वाः ।**

❀ (वा०) अश्मनो विकार उपसंख्यानम् । अश्मनो विकारः **आश्मः ।** अन्यत्र **आश्मनः ।**

❀ (वा०) चर्मणः कोश उपसंख्यानम् । **चार्मः** कोशः **चार्मणः** अन्यः ।

❀ (वा०) शुनः सङ्कोच उपसंख्यानम् । **शौवः** सङ्कोचः । **शौवनः** अन्यः ।

अह्नष्टखोरेव ॥१४५॥

'अहन्' एतस्य ट–खोरेव परतष्टिलोपो भवति । द्वे अहनी समाहृते द्व्यहः । त्र्यहः । द्वे अहनी अधीष्टो भृतो भूतो भावी वा द्व्यहीनः । त्र्यहीनः ।

❀ (वा०) अह्नः समूहे खो वाच्यः । अह्नां समूहः अहीनः । सिद्धे सत्यारम्भो नियमार्थः ।

द्व्यहः—'तद्धितार्थोत्तरपदसमाहारे च' इति समासः । समासान्तः 'टच्' । **द्व्यहीनः**—'रात्र्यहः संवत्सराच्च' इति 'ख' तस्य 'ईन' आदेशः । **नियमार्थः**—समूहे एव 'टि' लोपः । तेन नात्र भवति—अह्ना निर्वृत्तम् **आह्निकम्** ।

ओर्गुणः ॥१४६॥

उवर्णान्तस्याङ्गस्य गुणो भवति तद्धिते परतः । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । 'ओत्' इति वक्तव्ये संज्ञापूर्वको विधिरनित्यो यथा स्यात् । तेन स्वायम्भुव इति सिद्धो भवति ।

बाभ्रव्यः—बभ्रु+यञ् । उकारस्य गुण ओकारः । तस्य 'अव्' आदेशः । **माण्डव्यः**—मण्डु+यञ् । **शङ्कव्यम्**—शङ्कवे हितम् इति शङ्कु+यत् । **संज्ञा····अनित्यः**—'गुण' संज्ञा-नाम्ना विधिः क्वचिन्न प्रवर्तते तेन स्वयम्भुवोऽपत्यम् इति स्वयम्भू+अण् । अत्र न गुणोऽपि तु ऊकारस्य 'उवङ्' ।

ढे लोपोऽकद्र्वाः ॥१४७॥

ढे परत उवर्णान्तस्य लोपो भवति न तु कद्र्वाः । कामण्डलेयः । शैतवाहेयः ।

कामण्डलेयः—कमण्डलु+ढञ् ढकारस्य 'एय' आदेशः । कद्रवास्तु **काद्रवेयः** ऊकारस्य गुणः ।

यस्येति च ॥१४८॥

भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे । दाक्षी । प्लाक्षी । सखी । दाक्षिः । कुमारी । गौरी । सौमित्रिः ।

❀ (वा०) औङः श्यां प्रतिषेधो वाच्यः । काण्डे । कुड्ये ।

इवर्णस्य ईकारे परतः लोपः । **दाक्षी**—दाक्षि+ङीष् । **सखी**—सखि+ई । तद्धिते उदाहरणम्—अत्रि+ढक्→एय=**आत्त्रेयः** ।

अवर्ण लोपेः ईकारे परतः **कुमारी**-कुमार+ङीप् । तद्धिते-**सौमित्रिः**-

सुमित्रा + इञ् । काण्डे—काण्ड + औ → शी आदेशः तदानीम् अकारलोपः प्राप्तः ।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥१४९॥

एषामुपधाया यकारस्य लोपो भवति ईति तद्धिते च । सूर्येणैकदिक् बलाका सौरी बलाका । तिष्य—तैषम् अहः । तैषी रात्रिः । अगस्त्यस्यापत्यं स्त्री आगस्ती । मत्सी ।

❀ (वा०) मत्स्यस्य ङ्याम् ।

❀ (वा०) सूर्यागस्त्ययोश्छे च ङ्याञ्च ।

❀ (वा०) तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् ।

तिष्यः—पुष्यपर्यायः । **तैषमहः**—तिष्येण युक्तम् अहः । **तैषी रात्रिः**—तैष + ङीप् । वार्तिकानां बलेनात्र न भवति 'य' लोपः—**मात्स्यं मांसम्** । **सौर्यं चरुं निर्वपेत्** ।

हलस्तद्धितस्य ॥१५०॥

हल उत्तरस्य तद्धितयकारस्योपधाया भस्य ईति परतो लोपो भवति । गार्गी ।

गार्गी—गार्ग्य + ङीप् । एवं **वात्सी**—वात्स्य + ङीप् ।

आपत्यस्य च तद्धितेऽनाति ॥१५१॥

अपत्ययकारस्य हल उत्तरस्य तद्धितेऽनाकारादौ परतो लोपो भवति । गर्गाणां समूहो गार्गकम् । वात्सकम् । अनाति किम् ? गार्ग्यायणः ।

आपत्यस्य—अपत्यार्थकस्य (अपत्ये जातः अपत्य + अण्) **गार्गकम्**—गार्ग्य + वुञ् । **गार्ग्यायणः**—गार्ग्य + फक् फकारस्य 'आयन' आदेशः ।

क्यच्व्योश्च ॥१५२॥

क्य-च्वि, एतयोः परयोरापत्ययकारस्य हल उत्तरस्य लोपो भवति । गार्गीयति । गार्गीयते । गार्गीभूतः । वात्सीभूतः ।

क्य—क्यच्-क्यङ् इत्युभयोः सामान्येन ग्रहणम् । **गार्गीयति**—गार्ग्य + क्यच्, आत्मनः गार्ग्यमिच्छति इत्यर्थे क्यच् । **गार्गीयते**—गार्ग्य इवाचरति गार्ग्य + क्यङ् । **गार्गीभूतः**—अगार्ग्यो गार्ग्यो भूतः इत्यर्थे अभूततद्भावे गार्ग्य + च्वि ।

बिल्वकादिभ्यश्छस्य लुक् ॥१५३॥

नडादिषु बिल्वादयः पठ्यन्ते, 'नडादीनां कुक् च' इति कृत-कुगागमा भवन्ति । तेभ्यः परस्य छस्य लुक् तद्धिते । बिल्वा यस्यां भवन्ति सा बिल्वकीया, तस्यां भवा बैल्वकाः । वेत्रकीयाः, वैत्रकाः ।

नडादिषु......**तद्धिते**—एषोऽर्थः सूत्रे 'बिल्वकादिभ्यः' इति पाठेन लभ्यते । **बैल्वकाः**—बल्वकीय + अण् ।

❀(वा०) क्रुञ्चा ह्रस्वत्वं च । क्रुञ्चकीयाः (क्रुञ्चा + छ→ईय कुक् आगमः)—**क्रौञ्चकाः** ।

तुरिष्ठेमेयस्सु ॥१५४॥

इष्ठन्—इमनिच्—ईयसुन्, एषु परेषु 'तृ' शब्दस्य लोपो भवति । आसुतिं करिष्ठः / विजयिष्ठः । दोहीयसी धेनुः ।

सर्वस्य 'तृ' शब्दस्य लोपार्थम् आरम्भः । इह इमनिज्ग्रहणम् उत्तरार्थम् । इतरौ तु 'तुश्छन्दसि' इति भवतः । गुणवचनादपि ।

करिष्ठः—अतिशयेन करोतीत्यर्थे √कृ + तृन् = कर्तृ + इष्ठन् 'तृ' इत्यस्य लोपः । **दोहीयसी**—अतिशयेन दोग्धि इत्यर्थे √दुह् + तृच् = दोग्धृ + ईयसुन् = दोहीयस् + ङीप् । **गुणवचनादपि**—'अजादी गुणवचनादेव' इति नियमोऽत्र व्याख्यातः ।

टेः ॥१५५॥

भस्य टेर्लोपो भवति इष्ठेमेयस्सु । पटिष्ठः । पटिमा । पटीयान् ।

❀(वा०) णाविष्ठवत्प्रातिपदिकस्य कार्यं भवतीति वक्त-

व्यम् । किं प्रयोजनम् ? पुंवद्भाव-रभाव-टिलोप-यणादिपरलोपार्थम् । एनीमाचष्टे एतयति । पृथुमाचष्टे प्रथयति । पटयति । स्थवयति ।

भारद्वाजीयास्तु विन्मतुपोर्लोपाय प्रस्थाद्यादेशाय च । स्रजयति । वसुमन्तमाचष्टे वसयति । प्रियमाचष्टे प्रापयति । स्थापयति ।

एतयति—एनी + णिच् + लट् पुंवद्भावे 'एनी' इत्यस्य स्थाने 'एत' इति । **प्रथयति**—'र ऋतो ......' इत्यनेन ऋकारस्य 'र' भावः । **स्थवयति**—स्थूलमाचष्टे इति स्थूल + णिच् 'स्थूल ......:गुणः' इति वक्ष्यमाण सूत्रेण लकारस्य लोपः ऊकारस्य च गुणः । **स्रजयति**—स्रग्विणम् आचष्टे । वृत्तौ **कनयति** इत्युदाहरणम् तदर्थं वार्तिके 'कनर्थम्' इत्यधिकः पाठो वर्त्तते ।

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः ॥१५६॥

स्थूलादीनां यणादिपरं लुप्यते इष्ठादिषु, पूर्वस्य च गुणो भवति । स्थूल—स्थविष्ठः । स्थवीयान् । दूर—दविष्ठः । दवीयान् । युवन्—यविष्ठः । यवीयान् । क्षिप्र—क्षेपिष्ठः । क्षेपीयान् । क्षेपिमा ।

परग्रहणं किम् ? यविष्ठः । यवीयान् इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत् । पूर्वग्रहणं विस्पष्टार्थम् ।

ह्रस्व—ह्रसिष्ठः । ह्रसिमा । ह्रसीयान् । तथा क्षुद्र—**क्षोदिष्ठः । क्षोदिमा । क्षोदीयान् ।** इत्युदाहरणानि च बोध्यानि ।

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः ॥१५७॥

प्रियादीनां यथासंख्यं प्रादय आदेशा भवन्ति इष्ठादिषु । प्रेष्ठः । प्रेयान् । प्रेमा । स्थेष्ठः । वरीयान् । वरिष्ठः । बंहिष्ठः । बंहीयान् । बंहिमा । गरिष्ठः । गरिमा । गरीयान् । वर्षिष्ठः । वर्षीयान् । द्राघिष्ठः । द्राघीयान् । द्राघिमा । वृन्दिष्ठः । वृन्दीयान् ।

स्फिर—स्फेष्ठः । स्फीयान् । तृप्र—त्रपिष्ठः । त्रपीयान् । स्थिर-स्फिर-वृद्ध-वृन्दारकेभ्य इमनिच् न भवति ।

बहोर्लोपो भू च बहोः ॥१५८॥

बहोरुत्तरेषाम् इष्ठेमेयसां लोपो भवति, तस्य च बहोः स्थाने 'भू' इत्ययमादेशः । भूयान् । भूमा ।

सूत्रे बहोः पुनरावृत्तिः तस्य स्थानित्वबोधार्थम् । अन्यथा प्रत्ययानामेव 'भू' आदेशः स्यात् ।

भूयान्—बहु+ईयसुन्, अत्र पञ्चमीनिर्देशेन परस्य लोपे 'आदेः परस्य' इति नियमेन आदेः ईकारस्य लोपो भवति । एवं भूमा इत्यत्रापि 'इमनिच्' इत्यस्यादेः इकारस्य लोपः ।

इष्ठस्य यिट् च ॥१५९॥

इष्ठस्य बहोरुत्तरस्य 'यिट्' आगमो भवति बहोश्च 'भू' इत्ययमादेशो भवति । लोपापवादः । भूयिष्ठः ।

भूयिष्ठः—अत्र 'यिट्' टित्त्वात् इष्ठनः आदौ भवति । 'यिट्' इत्यत्र इकार उच्चारणार्थः ।

ज्यादादीयसः ॥१६०॥

ज्यादुत्तरस्य ईयस आकारादेशो भवति । ज्यायान् । लोपस्य यिटा व्यवहितत्वात् 'आत्' इत्युच्यते । लोपे सति 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घेण ज्यायान् इति सिद्ध्यति ।

ज्यायान्—'प्रशस्यस्य श्रः, ज्य च' इति ईयसुनि प्रशस्यस्य 'ज्य' आदेशः ।

र ऋतो हलादेर्लघोः ॥१६१॥

हलादेरंगस्य लघो ऋकारस्य रेफादेशः इष्ठेमेयस्सु । प्रथिष्ठः । प्रथीयान् । प्रथिमा ।

परिगणनं कर्त्तव्यम्—

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ।

अतो नेह मातरमाचष्टे मातयति ।

प्रथिष्ठः—पृथु + इष्ठन् ऋकारस्य रकारः । एवं **प्रथीयान्**—पृथु + ईयसुन् । **प्रथिमा**—पृथु + इमनिच् ।

'र' विधौ—ऋकारस्य रकारे कर्त्तव्ये । **मातयति**—'टेः' इत्यनेन ऋकारस्य लोपः ।

विभाषोर्जोश्छन्दसि ।।१६२।।

ऋजु इत्येतस्य ऋकारस्य स्थाने विभाषा रेफादेशो भवति इष्ठेमेयस्सु छन्दसि । रजिष्ठमनु नेषि पन्थानम् । ऋजिष्ठः ।

'र'भावे **रजिष्ठम्** / तदभावे 'टि'लोपे **ऋजिष्ठः** ।

प्रकृत्यैकाच् ।।१६३।।

एकाच् यो 'भ' संज्ञः, स इष्ठेमेयस्सु परतः प्रकृत्या भवति । 'स्रग्विन्' इत्येतस्य विन्नन्तस्य स्रजिष्ठः । स्रजीयान् ।

एवं स्रग्विणमाचष्टे **स्रजयति** । मतुवन्तस्य 'स्रुग्वत्' इत्यस्योदाहरणत्रयम्—**स्रुचिष्ठः** । **स्रुचीयान्** । **स्रुचयति** ।

ॐ(वा०) प्रकृत्याऽके राजन्यमनुष्ययुवानः । राजन्यानां समूहो **राजन्यकम्** राजन्य + वुञ् । 'आपत्यस्य च.......' इत्यनेन 'य' लोपो न । एवं **मानुष्यकम्** । यूनो भावः **यौवनिका** युवन् + वुञ् 'नस्तद्धिते' इति 'न' लोपो न भवति ।

इनण्यनपत्ये ।।१६४।।

इन्नन्तमणि परतः अनपत्येऽर्थे प्रकृत्या भवति । साङ्कूटिनम् । सांराविणम् ।

सम् √कूट + इनुण् = साङ्कूटिन् + स्वार्थे अण् = **साङ्कूटिनम्** । अत्र प्रकृतिभावे 'न' लोपो न । एवं **सांराविणम्**—सम् √रु + इनुण् = संराविन् + स्वार्थे अण् ।

गाथिविदथिकेशिगणिपणिनश्च ॥१६५॥

गाथिन्-विदथिन्-केशिन्-गणिन्-पणिन् एते अणि प्रकृत्या भवन्ति। अपत्यार्थोऽयमारम्भः। गाथिनोऽपत्यं गाथिनः। वैदथिनः। कैशिनः। गाणिनः। पाणिनः।

काशिकावृत्तिसारस्य पाण्डुलिप्यां सूत्रे तथा तद्वृत्तौ 'गाधि, विदधि' इति पाठः परम्परया श्रुतलेखकस्य दोषाद्वा। सर्वत्र काशिकावृत्तौ कौमुद्याञ्च 'गाथि, विदथि' इत्येव पाठो दृश्यते। **गाथिनः**—गाथिन्+अण्। एवं सर्वत्र बोध्यम्।

संयोगादिश्च ॥१६६॥

संयोगादिश्च प्रकृत्या भवति इन्-अणि परतः। स्राग्विणः। चाक्रिणः।

स्राग्विणः—स्रग्विन् (स्रज्+विन्) +अण्। **चाक्रिणः**—चक्रिन् (चक्र+इनि)+अण्। एवं **शाङ्खिनः**। **माद्रिणः**।

अन् ॥१६७॥

अणि 'अन्' प्रकृत्या। अपत्ये चानपत्ये च। सामनः। वैमनः। सौत्वनः।

सामान्येन अणि प्रकृतिभावविधिः। **सामनः**—सामन्+अण्। **सौत्वनः**—सुत्वन्+अण्।

ये चाभावकर्मणोः ॥१६८॥

यकारादौ तद्धिते अभावकर्मणोरर्थयोः अन् प्रकृत्या भवति। सामनि साधुः सामन्यः / वैमन्यः।

अभावकर्मणोरिति किम्? राज्ञो भावः कर्म वा राज्यम्।

सामन्यः—सामन्+यत्।

आत्माध्वानौ खे ॥१६९॥

एतौ खे परतः प्रकृत्या भवतः। आत्मने हितम् आत्मनीनम्। अध्वनीनः।

आत्मनीनम्—आत्मन्+ख। **अध्वनीनः**—अध्वन्+ख।

न मपूर्वोऽपत्येऽवर्मणः ॥१७०॥

'म' पूर्वोऽन् अणि परतोऽपत्येऽर्थे प्रकृत्या न भवति। वर्मणस्तु भवत्येव। सौषामः। माद्रसामः। नेह—चाक्रवर्मणः।

सौषामः—सुषाम्णः अपत्यं सुषामन्+अण्। एवं मद्रसाम्नोऽपत्यं **माद्रसामः**। **चाक्रवर्मणः**—चक्रवर्मणोऽपत्यम्। अत्र वर्मणः 'अन्' अस्ति।

ब्राह्मोऽजातौ ॥१७१॥

'ब्राह्मः' इत्येतदपत्याधिकारेऽपि सामर्थ्यादन्यत्राणि 'टि' लोपार्थं निपात्यते। ब्राह्मो गर्भः। ब्राह्ममन्नम्। ब्राह्मी ओषधिः। अपत्ये जातावणि ब्रह्मणष्टिलोपो न भवति ब्रह्मणोऽपत्यं ब्राह्मणः।

अत्र योगविभागः क्रियते 'ब्राह्मः' इत्येको योगः। **ब्राह्मो गर्भः**। ब्रह्मणः अयम् इति ब्रह्मन्+अण्। ततः 'अजातौ' इत्यपरो योगः। अपत्ये जातौ 'टि'लोपो न। ब्रह्मणोऽपत्यं जातिः **ब्राह्मणः**। अपत्ये मनुष्ये तु भवति टिलोपः **ब्राह्मो नारदः**।

कार्मस्ताच्छील्ये ॥१७२॥

कार्म इति ताच्छील्ये 'टि' लोपो निपात्यते। कर्मशीलः कार्मः। 'शीलम्, छत्रादिभ्यो णः' इति 'ण' प्रत्ययः।

यद्येवं किमर्थमिदम्? 'नस्तद्धिते' इत्येव 'टि' लोपः सिद्धः। सत्यमेतज्ज्ञापयति—ताच्छीलिके णे अण्कृतानि भवन्ति। 'चौरी, तापसी' इति णान्तात् ईकारः सिद्धो भवति।

'ताच्छील्ये' इति किम्? कार्मणम्।

चौरी, तापसी—अनयोरपि शीलार्थे 'ण' प्रत्ययः तदन्तात् चौर, तापस शब्दाभ्यां 'टिड्ढाण् ...' इति ङीप्। **ईकारः**—ङीप्। **कार्मणम्**—कर्मणा युक्तम् कर्मन्—अण्। 'ज्ञापक सिद्धं न सर्वत्र' तेन **छात्रा** इति टाबन्तं पदं भवति।

औक्षमनपत्ये ॥१७३॥

'औक्षम्' इत्यनपत्ये टिलोपो निपात्यते। औक्षम् पदम्।

अपत्ये तु उक्ष्णोऽपत्यम् औक्ष्णः। 'षपूर्वहन्धृतराज्ञामणि' इत्यनेन अकारस्य लोपः।

औक्षम्—उक्ष्ण इदम् इति उक्षन् + अण्।

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥१७४॥

दाण्डिनायनादयः शब्दा निपात्यन्ते। दण्डिन्-हस्तिन्, एतौ नडादिगणे पठ्येते, तयोः आयने परतः प्रकृतिभावो निपात्यते। दण्डिनोऽपत्यं दाण्डिनायनः। हास्तिनायनः। अथर्वन् इति वसन्तादिषु पठ्यते। अथर्वणा प्रोक्तो ग्रन्थः उपचारात् अथर्वन् इत्युच्यते। तमधीते स आथर्वणिकः। इके प्रकृतिभावः। जिह्माशिन् इति शुभ्रादिषु पठ्यते। तस्य एये परतः प्रकृति भावो निपात्यते। जिह्माशिनोऽपत्यं जैह्माशिनेयः। वासिनोऽपत्यम् 'उदीचां वृद्धादगोत्रात्' इति 'फिञ्' तत्र प्रकृतिभावो निपात्यते—वासिनायनिः।

भ्रूणहन्-धीवन्, एतयोः ष्यञि परतः तकार आदेशो निपात्यते। भ्रूणघ्नो भावो भ्रौणहत्यम्। धीव्नो भावो धैवत्यम्। 'हनस्तोऽचिण्णलोः' इति धातु प्रत्यये एव नान्यत्र। तेन भ्रौणघ्नः। वार्त्रघ्नः इत्यत्र न भवति।

सरय्वां भवम् उदकं सारवम्। 'सरयू' शब्दस्याणि परतो 'यू' शब्दस्य 'व' इत्यादेशो निपात्यते। इक्ष्वाकोरपत्यं 'जनपदशब्दात्……' इति 'अञ्' उकारलोपो निपात्यते—ऐक्ष्वाकः। मैत्रेय इति 'मित्रयु' शब्दो गृष्टयादिषु पठ्यते। ततो ढञि कृते यादेः इयादेशाऽपवादो लोपो निपात्यते। हिरण्यस्य मयटि यादिलोपो निपात्यते। हिरण्यस्य विकारः हिरण्मयः।

हास्तिनायनः—हस्तिनोऽपत्यं 'नडादिभ्यः फक्' इत्यनेन 'फक्' तस्य 'आयन' आदेशः। **उपचारात्** = लक्षणया। तत्प्रोक्तार्थे लक्षणा। **इयादेशापवादो लोपः**—'केकयमित्रयु ·· यादेरियः' इति सूत्रेण 'इय' आदेशः प्राप्तः, तं बाधित्वा लोपो भवति।

ऋत्व्यवास्त्व्यमाध्वीहिरण्ययानिच्छन्दसि ॥१७५॥

एतानि निपात्यन्ते छन्दसि । ऋतु-वास्तु, एतयोर्यति 'यण्' आदेशो निपात्यते । ऋतौ भवः ऋत्व्यः । वास्तुनि भवः वास्त्व्यः । वस्तुशब्दस्यापि 'यण्' आदेशो निपात्यः । वास्त्वम् । मधु शब्दस्यापि स्त्रियां यणादेशो निपात्यः माध्वीर्नः सन्त्वोषधीः । हिरण्यशब्दाद् विहितस्य 'मयट्' प्रत्ययस्य 'म' शब्दस्य लोपो निपात्यते । हिरण्ययम् ।

अङ्गस्य राल्लोपो विड्वनोर्वाऽऽक्रोशेणो हुझल्भ्यस्थलि च मन्त्रेषु र ऋतः पञ्चदश (१७५)

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे षष्ठाध्यायस्य चतुर्थः पादः ।

षष्ठाध्यायस्यास्मिन् चतुर्थे पादे अङ्गस्य, राल्लोपः, विड्वनोरनुनासिकस्यात्, वाऽऽक्रोशदैन्ययोः, इणो यण्, हुझल्भ्यो हेर्धिः, थलि च सेटि, मन्त्रेष्वाङ्यादेरात्मनः, इत्येतेभ्यः प्रत्येकम् आरभ्य विंशतिः सूत्राणि तथा र ऋतो हलादेर्लघोः इत्यारभ्य पञ्चदश सूत्राणीति संकलनेन पञ्चसप्तत्युत्तरशतं (१७५) सूत्राणि सन्ति ।

इति सामवेदि-विप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना विरचितायां काशिकावृत्तिसार-सुधायां षष्ठाध्यायस्य चतुर्थः पादः ।

अथ सप्तमाध्याये प्रथमः पादः

युवोरनाकौ ॥१॥

श्रीकृष्णोजयति । यु-वू उत्सृष्टविशेषणौ अनुत्वासिकयणौ गृह्येते । तयोः स्थाने यथासंख्यं अन-अक आदेशौ भवतः । नन्दनः । रमणः । वासुदेवकः । अर्जुनकः ।

अनुनासिकयोरेव ऊर्णायुः । 'भुजिमृङ्भ्यां युक्त्युकौ' भुज्युः । मृत्युः । युवोरिति निर्देशे द्वन्द्वैकभावपक्षे 'अनित्यमागमानुशासनम् ।' इति 'नुम्' न क्रियते । 'लोकाश्रयत्वाल्लिङ्गस्य' इति क्लीबता न इति वा । इतरेतरयोगपक्षे तु छान्दसो वर्णलोपो द्रष्टव्यः ।

युवोश्चेद् द्वित्वनिर्देशो द्वित्वे यण् तु प्रसज्यते ।
अथ चेदेकवद्भावः कथं पुंवद् भवेदयम् ॥
द्वित्वे नैगमिको लोप एकत्वे नुमनित्यता ।
अशिष्यत्वाद्धि लिङ्गस्य पुंस्त्वं वेह समाश्रितम् ॥

श्री''''—श्रीकृष्णस्य जयं ब्रुवन् आचार्यो मङ्गलमाचरति । **अनुनासिकयणौ**—अनुनासिकः महर्षिणा पाणिनिना प्रतिज्ञातः 'यण्' ययोः यु-वु एतयोस्तौ । ययोरादेश इष्यते तौ 'यु-वू' गृह्येते । 'प्रतिज्ञानुनासिक्याः पाणिनीयाः ।'

युवोश्चेद् ''''' **समाश्रितम्**—समाहार द्वन्द्वे 'युवुनः' इति 'नुम्' भवेत् । परमत्र आगमस्यानित्यतया स 'नुम्' न भवति । इतरेतरयोगे **नैगमिकः**= छान्दसः 'ओस्' विभक्तेर्लोपो ज्ञेयः ।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥२॥

प्रत्ययादिभूतानां फादीनां क्रमादायनादयो भवन्ति ।

'नडादिभ्यः फक्'—नाडायनः । स्त्रीभ्यो ढक्—सौपर्णेयः । कुलात्खः कुलीनः । वृद्धाच्छः गार्गीयः । क्षत्राद्घः—क्षत्रियः ।

फादीनाम्……भवन्ति—प्रत्ययस्य आदौ स्थितानां फ्-ढ्-ख्-छ्-घ् इत्येतेषां क्रमशः आयन्—एय्—ईन्—ईय्—इय् इत्येते आदेशाः भवन्ति । **नाडायनः**—नड + फक् । **सौपर्णेयः**—सुपर्णा + ढक् । **कुलीनः**—कुल + ख । **गार्गीयः**—गार्ग्य + छ । **क्षत्रियः**—क्षत्र + घ । सर्वत्र व्यञ्जनमात्राणाम् 'फ्' आदीनामादेशाः 'आयन्' आदयो भवन्ति, अकारस्तु शिष्यत एव ।

झोऽन्तः ॥३॥

आदिग्रहणं निवृत्तम् । प्रत्ययावयवस्य झस्य 'अन्त' इत्ययमादेशः । कुर्वन्ति । सुन्वति । √जॄ √विशिभ्यां झच्—विजरन्तः । वेशन्तः ।

कुर्वन्ति—√कृ + लट् → झि । 'झ' मात्रस्य 'अन्त' इत्यादेशः । **विजरन्तः**—वि √जॄ + झच् प्रथमैकवचने रूपम् ।

अदभ्यस्तात् ॥४॥

अभ्यस्तादङ्गादुत्तरस्य झस्य 'अत्' इत्यादेशः । ददतु । दधतु ।

ददतु—√दा + लोट् → झि । 'उभे अभ्यस्तम्' इत्यनेन द्वित्वे कृते सति 'दा दा' इत्युभयोरपि 'अभ्यस्त' संज्ञा भवति । **दधतु**—√धा + लोट् → झि ।

आत्मनेपदेष्वनतः ॥५॥

आत्मनेपदेषु यो झकारस्तस्य नकारान्तादङ्गादुत्तरस्य 'अत्' इत्ययमादेशः । चिन्वते । अचिन्वत ।

चिन्वते—√चि + लट् → झ । **अचिन्वत**—√चि + लङ् → झ ।

शीङो रुट् ॥६॥

शीङोऽङ्गादुत्तरस्य 'झ' आदेशस्यातो रुट् आगमः । शेरते ।

अशेरत । 'रुट्' अयं परादिः क्रियते । स यदि झस्यैव स्यात् अत् आदेशो न स्यात् इति । अत एवायमादेशस्यागमः क्रियते ।

शेरते—√शीङ् + लट्→झ→अत् ए ('झ') इत्यत्र अकारस्य एकारः । अत्र 'रुट्' टित्त्वात् अतः आदौ भवति । **अशेरत**—√शीङ् + लङ्→झ ।

वेत्तेर्विभाषा ॥७॥

वेत्तेरङ्गादुत्तरस्य झ-आदेशस्यातो रुट् आगमः विभाषा भवति । संविद्रते / संविदते ।

संविद्रते—सम् √विद् (ज्ञाने) + लट् 'समो गमृच्छि ....' इत्यनेन आत्मनेपदं विधीयते । रुडभावे **संविदते** । एवं लोटि **संविद्रताम् / संविदताम्** ।

बहुलं छन्दसि ॥८॥

छन्दसि विषये बहुलं रुट् आगमः । दे॒वा अ॑दुह्र । गन्धर्वाप्सरसो अदुह्र । दुहेर्लङि अदादेशे सति रुटि कृते 'लोपस्त आत्मनेपदेषु' इति 'त' लोपः । न च अदुहत ।

अदुह्र—स्वरितेतत्त्वादत्र आत्मनेपदम् । बहुल-ग्रहणादन्यत्रापि √दृश् इत्यस्मात् अद॑श्रमस्य के॒तवः॑ ।

अतो भिस ऐस् ॥९॥

अतोऽङ्गात् भिस ऐस् भवति । वृक्षैः । प्लक्षैः ।

एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति ।
एत्वे कृते भौतपूर्व्यादैस्तु नित्यस्तथा सति ॥

अत इत्यधिकारो 'जसः शी' इति यावत् ।

वृक्षैः—वृक्ष + भिस्→ऐस् । **एत्वं ...... सति**—'वृक्ष भिस्' इत्यवस्थायां 'बहुवचने झल्येत्' इति क्षकाराकारस्य एत्वं परत्वात् प्राप्नोति । अदन्तमङ्गं तु एत्वे कृतेऽपि भूतपूर्वं मत्वा ततो 'भिस ऐस्' स्यात् तदा उत्तरयति—**'ऐस्' तु नित्यः तथा सति** । अयम्भावः वचनसामर्थ्यात् कृतेऽप्येत्त्वे

'भिस ऐस्' भविष्यति पूर्वम् 'ऐस्' आदेशानन्तरं झलादित्वाभावात् एत्वं न भविष्यति इति 'ऐस्' नित्यः। परिभाषा चास्ति—

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः।

अस्या बलेन परम् एत्वं बाधित्वा नित्य 'ऐस्' भवति।

बहुलं छन्दसि ॥१०॥

छन्दसि बहुलं भिस 'ऐस्' आदेशः। देवेभिः। भवति च देवैः।

देवेभिः—भिस 'ऐस्' आदेशभावपक्षे 'बहुवचने झल्येत्' इत्यनेन वकाराकारस्य एकारः। बहुलग्रहणात् अनतो ईकारान्तादपि भिस ऐस् नदी + भिस् = **नद्यैः**।

नेदमदसोरकोः ॥११॥

अककारयोरिदमदसोर्भिस ऐस् आदेशो न। एभिः। अमीभिः।

अकोः किम्? इमकैः।

अककारयोः—अविद्यमानः ककारो ययोस्तौ अकौ तयोः **अकोः**। **एभिः**—इदम् + भिस् अत्वे कृते भिस 'ऐस्' प्राप्तः। निषेधे सति 'बहुवचने झल्येत्' इत्यनेन अकारस्य एकारः। **अमीभिः**—अदस् + भिस्। **इमकैः**—'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यनेन 'इदम्' इत्यस्य टेः 'अम्' इत्यस्मात् प्राक् 'अकच्' अत्र 'भिस्' इत्यस्य 'ऐस्' भवत्येव। अकच् सहितस्यापि इदमः अदसश्च शब्दान्तरत्वं न भवति। एतद् 'अकोः' इति प्रतिषेधवचनमेव ज्ञापयति—**तन्मध्यपतितस्तद्ग्रहणेन गृह्यते**। साकच्कस्य अदस उदाहरणम् **अमुकैः**।

टाङसिङसामिनात्स्याः ॥१२॥

अकारान्तादङ्गादुत्तरेषां टा-ङसि-ङसां यथासंख्यं इन-आत्-स्य एते आदेशा भवन्ति। वृक्षेण। वृक्षात्। वृक्षस्य। अतिजरसिना। अतिजरसात् इति केचिदिच्छन्ति। यथा तु भाष्ये तथा नैतदिष्यते।

वृक्षेण —वृक्ष+टा→इन गुणः नकारस्य च णकारः। **वृक्षात्**—वृक्ष+ङसि→आत् दीर्घः। **वृक्षस्य**—वृक्ष+ङस्→स्य। **केचित्**—पाणिनिमतानुसारिणः। **यथोत्तरं मुनीनां प्रामाण्यम्** इति भाष्यमतमेव मान्यम्। जरसादेशे **अतिजरसा**। **अतिजरसः**, अनादेशे च **अतिजरेण**। **अतिजरात्** इत्येव स्वीकार्यम्।

ङेर्यः ॥१३॥

अकारान्तादङ्गादुत्तरस्य 'ङे' इत्येतस्य 'य' आदेशः। 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येषा परिभाषा अनित्या 'कष्टाय क्रमणे' इति ज्ञापकात् तेन दीर्घः।

उदाहरणम्—**वृक्षाय**। वृक्ष+ङे→य 'वृक्ष य' इत्यवस्थायां 'सुपि च' इत्यनेन वृक्ष-अकारस्य दीर्घः। अत्र 'ङे' इति चतुर्थ्येकवचनं गृह्यते प्रतिपदोक्तत्वात्। यकारं प्रति अदन्ताङ्गता निमित्तं तथा च सन्निपातलक्षणो यकारः कथम् अतो विघाताय प्रभवेत्। 'कष्टाय क्रमणे' इत्यत्र **कष्टाय** इति प्रयोगात् **वृक्षाय** इत्यत्रापि दीर्घत्वं सिद्धम् इति भावः।

सर्वनाम्नः स्मै ॥१४॥

अतोऽङ्गात् सर्वनाम्नः परस्य 'ङे' इत्यस्य 'स्मै' आदेशः। **सर्वस्मै**।

अन्वादेशे अत्र इदम्+ङे इत्यवस्थायाम् 'इदमोऽन्वादेशे' इत्यनेन 'इदम्' इत्यस्य 'अश्' आदेशे 'अत्र अ+ङे' इति स्थितौ अन्तरङ्गत्वात् पूर्वं 'ङे' इत्यस्य 'स्मै' भवति तदनन्तरं दीर्घः **अत्रास्मै**।

ङसिङ्योः स्मात्स्मिनौ ॥१५॥

अतोऽङ्गात्सर्वनाम्नः परयोर्ङसिङ्योः स्मात् स्मिनौ आदेशौ भवतः। सर्वस्मात्। सर्वस्मिन्।

सर्वस्मात्—सर्व+ङसि। **सर्वस्मिन्**—सर्व+ङि। यथासंख्यम् स्मात्-स्मिनौ आदेशौ भवतः।

पूर्वादिभ्यो नवभ्यो वा ॥१६॥

पूर्वादिभ्यो नवभ्यः सर्वनामभ्यः परयोरनयोर्वा एतावादेशौ

भवतः । पूर्वस्मात् / पूर्वात् । पूर्वस्मिन् / पूर्वे । पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तर ।

अनयोः—ङसि-ङि विभक्त्योः । एतौ स्मात्-स्मिन् आदेशौ । **पूर्वात्**—पक्षे आत् आदेशः । एवम् परादिभ्यः—**परस्मात् / परात् । परस्मिन् / परे । अवरस्मात् / अवरात् । अवरस्मिन्** / अवरे प्रभृतीन्युदाहरणानि ज्ञेयानि ।

जसः शी ॥१७॥

अकारान्तात्सर्वनाम्नोऽङ्गात् उत्तरस्य जसः शी इत्ययमादेशो भवति । सर्वे । विश्वे । दीर्घोच्चारणमुत्तरार्थम् ।

सर्वे—सर्व+जस्→शी शकारः इत् गुणसन्धिः । **उत्तरार्थम्—त्रपुणी, जतुनी** इत्येतदर्थम् ।

औङ आपः ॥१८॥

आबन्तादङ्गादुत्तरस्य औङः शी स्यात् । खट्वे तिष्ठतः ।

ओकारोऽयं शी-विधौ ङिद्गृहीतो
ङिच्चास्माकं नास्ति कोऽयं प्रकारः ।
सामान्यार्थः, तस्य चासञ्जनेऽस्मिन्
ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥

ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥

खट्वे तिष्ठतः—खट्वा+औ→शी । एवं **खट्वे पश्य**—खट्वा+औट्→शी । आपः—टाप्-डाप्-चाप् इति सर्वेषां ग्रहणम् । टापः उदाहरणद्वयम् उक्तम् । डापः **बहुराजे** । चापः **कारीषगन्ध्ये** ।

औकारः ···· स्यात्—अयम्भावः सूत्रे 'औङः' इत्युक्तम् न च कापि विभक्तिः 'औङ्' अस्ति । अत्र 'औङ्' इति पदेन 'औ ङित्' गृह्यते 'औट् टित्' अस्ति । तेनोभयोर्ग्रहणं भवति । **औङ्** इति वर्णमात्रः 'औ' ङकारस्तु मुखसुखार्थः । अथवा 'औ—औट्' इत्युभयोः स्थाने पूर्वाचार्यैः **आबौटावौङ्** इति **औङ्** इत्येव पाठः स्वीकृतः ।

नपुंसकाच्च ॥१९॥

नपुंसकादङ्गादुत्तरस्य औङः 'शी' इत्ययमादेशः । कुण्डे तिष्ठतः । कुण्डे पश्य ।

कुण्डे—क्रमशः कुण्ड+औ, कुण्ड+औट् इत्युभयत्राप्येकमेव रूपं भवति ।

❀(वा०) श्यां प्रतिषेधो वाच्यः इति नात्र भवति 'यस्येति च' इति 'अ' लोपः **दधिनी** । **मधुनी** । उभयोरपि 'इकोऽचि विभक्तौ' इति 'नुम्' ।

जश्शसोः शिः ॥२०॥

नपुंसकाद्ङ्गादुत्तरयोः जस्—शसोः 'शि' आदेशः । कुण्डानि तिष्ठन्ति । जसा सहचरितस्य शसो ग्रहणात् इह न भवति-कुण्डशो ददाति । पदशः प्रविशन्ति ।

कुण्डानि तिष्ठन्ति—इदं जस उदाहरणम्, शसस्तु **कुण्डानि पश्य** । **शसो ग्रहणम्**—सुपां षष्ठस्य । **कुण्डशो ददाति** वीप्सायां 'शस्' कुण्डं कुण्डं ददातीत्यर्थः ।

अष्टाभ्य औश् ॥२१॥

श्री कृष्णो जयति । कृताकारादष्टनः परयोः जस्-शसोः 'औश्' इत्यादेशः । अष्टौ तिष्ठन्ति । अष्टौ पश्य । कृताकारस्येत्येव, नेह—अष्ट तिष्ठन्ति । एतदेव कृतात्त्वस्य ग्रहणं ज्ञापकं 'अष्टन आ विभक्तौ' इत्यात्त्व—विकलपस्य । 'षड्भ्यो लुक्' इत्यस्यायमपवादः । नाप्राप्ते ह्येतस्मिन्निदमारभ्यते । यस्तु 'सुपो धातुप्रातिपदिकयोः' इति, तस्मिन् प्राप्ते चाप्राप्ते चेति न स बाध्यते अष्टपुत्रः । अष्टभार्यः ।

कृताकारादष्टनः—यत्र 'अष्टन्' इत्यस्य आत्त्वं विहितं तत्र तस्मात् परयोः 'औश्' । इदमेव ज्ञापयति 'अष्टन आ विभक्तौ' इति सूत्रेण आत्त्वविधानं वैकल्पिकम् । तेन 'अष्ट तिष्ठन्ति' इत्यत्र न 'औश्' ।

❀(वा०) तदन्तग्रहणमत्रेष्यते । **परमाष्टौ** । **उत्तमाष्टौ** ।

षड्भ्यो लुक् ॥२२॥

षट्-संज्ञकेभ्यः परयोर्जस्-शसोर्लुग्भवति । षट् तिष्ठन्ति । षट् पश्य । पञ्च । सप्त । नव । दश । यत्र तूपसर्जनं षट् तत्र न। प्रियषषः । प्रियपञ्चानः ।

पञ्च........**दश**—एते पञ्चन्-आदयो नान्ताः शब्दाः । जस्-शसोर्लुकि 'न लोपः प्रातिपदिकान्तस्य' इति नकारलोपः । **यत्र**...... **तत्र न**—अन्य-पदार्थप्राधान्ये षडर्थस्य गुणभावात्तत्र 'षड्' न प्रधानः । **प्रियषषः**—प्रियाः षट् येषां ते । षट्प्रधानात्तदन्तात्तु भवत्येव लुक् । **परमषट्** ।

स्वमोर्नपुंसकात् ॥२३॥

नपुंसकादुत्तरयोः स्वमोर्लुक् । दधि । जतु ।

स्वमोः—सु-अम् एतयोः । **दधि**—**दधि** तिष्ठति अत्र 'सु' इत्यस्य **दधि पश्य** इत्यत्र च 'अम्' इत्यस्य लुक् । **तद् ब्राह्मणकुलम्** इत्यत्र पूर्वविप्रतिषेधेन नित्यत्वाद् वा 'लुक्' 'त्यदादीनामः' इति अत्वं बाधयित्वा भवति ।

अतोऽम् ॥२४॥

अकारान्तान्नपुंसकात् परयोः स्वमोरम् । कुण्डम् । वनम् । मकार एव कस्मान्न ? 'सुपि च' इति दीर्घत्वं प्राप्नोति ।

कुण्डम्—कुण्ड+सु→अम् 'अमि पूर्वः' इत्यनेन पूर्वरूपत्वम् ।

अद्ड् डतरादिभ्यः पञ्चभ्यः ॥२५॥

डतरादिभ्यः पञ्चभ्यः नपुंसकेभ्यः उत्तरयोः स्वमोः 'अद्ड्' आदेशो भवति । कतरत् । कतमत् । इतरत् । अन्यत् । अन्यतरत् ।

डित्करणं किम् ? कतरत् तिष्ठति इत्यत्र पूर्वसवर्णदीर्घो मा भूत् । इह तु कतरत् पश्य इति स्थानिवद्भावात् अमि पूर्वत्वेनापि सिद्ध्यति । एवं तर्हि तकारादेश एव कस्मान्न क्रियते ? हे कतरत् ! अत्र सम्बुद्धिलोपो मा भूत् ।

अपृक्तश्चेदमो दोषो निवृत्ते डतरादिषु ।
अद्‌डित्त्वाड्डतरादीनां न लोपो नापि दीर्घता ॥

अपृक्तः……दीर्घता—अयम्भावः– एकाल्-प्रत्ययस्य 'अपृक्त' संज्ञा भवति । सम्बुद्धि लोपे 'अपृक्त' इत्यस्यानुवृत्तेः हे कुण्ड ! इत्यत्र सोः अमि कृते लोपो न स्यात् । 'अपृक्त'—इत्यस्य निवृत्ते तु हे कतरत् ! अत्र लोपः स्यात् अतः 'अद्‌ड्' इत्यत्र 'ड्–इत्' करणमावश्यकम् तेन डित्त्वात् 'टि' लोपे ह्रस्वाकारान्ताङ्गाभावान्न 'अत्' इत्यस्य लोपः, न च 'कतरत् तिष्ठति' इत्यत्र पूर्वसवर्णदीर्घः ।

नेतराच्छन्दसि ॥२६॥

इतर शब्दादुत्तरयोः स्वमोश्छन्दसि न 'अद्‌ड्' आदेशः । मृतमितरमण्डमापद्यत ।

इतरम् इत्युदाहरणम् । अद्‌ड्–आदेशनिषेधे सोः 'अम्' ।

✱(वा०) एकतराद्धि सर्वत्र छन्दसि भाषायां प्रतिषेध इष्यते । एकतरं तिष्ठति । एकतरं पश्य ।

युष्मदस्मद्भ्यां ङसोऽश् ॥२७॥

आभ्यामुत्तरस्य ङसोऽश् इत्ययम् आदेशः । तव **स्वम्** । मम स्वम् ।

शित्करणं सर्वादेशार्थम् । अन्यथा ह्यादेश-व्यपदेश–प्रक्लृप्त्यर्थम् आदेरेव स्यात् । ततश्च 'योऽचि' इत्येतन्न स्यात् ।

तव, मम—'तव-ममौ ङसि' इत्यनेन मपर्यन्तयोः युष्मदस्मदोः 'तव-मम' इत्यादेशौ क्रमशः 'शेषे लोपः' इति शेषस्य दकारस्य लोपे ङस् इत्यस्य अश् आदेशे तव+अ, मम+अ, इति स्थितौ 'अतो गुणे' इति पूर्वरूपम् । **अन्यथा……स्यात्**–'आदेः परस्य' इति सूत्रेण आदेशभावस्य या प्रक्लृप्तिः=निष्पत्तिः तदर्थम् आदेः एव स्यात् तेन केवलं 'योऽचि' इत्यनेन यत्वाभावमात्रं प्रयोजनं स्यान्नत्विष्टरूपसिद्धिः ।

ङेप्रथमयोरम् ॥२८॥

'ङे' इत्येतस्य प्रथमा–द्वितीययोश्च युष्मदस्मद्भ्यामुत्तरयोः

'अम्' इत्ययमादेशो भवति । तुभ्यम् । मह्यम् । त्वम् । अहम् । युवाम् । आवाम् । यूयम् । वयम् । त्वाम् । माम् । युवाम् । आवाम् ।

ङे—अविभक्तिकोऽयं निर्देशः । अस्योदाहरणद्वयम्—**तुभ्यम्, मह्यम्** । यूष्मद् + ङे, अस्मद् + ङे । मपर्यन्तयोः युष्मदस्मदोः तुभ्य-मह्य आदेशौ 'ङे' इत्यस्य च 'अम्' । उभयोरपि एतयोः प्रथमा-द्वितीया विभक्तयोः सु-औट् इति पञ्चानामुदाहरणानि क्रमशः **त्वम्**·······**आवाम्** इति दश ।

शसो न ॥२९॥

आभ्यां परस्य शसो नकारादेशो भवति । युष्मान् । अस्मान् ।

पूर्वेण सूत्रेण शसः 'अम्' प्राप्ते अनेन 'न' आदेशो विधीयते । 'अमि पूर्वः' इत्यनेन बाधनात् अत्र पूर्वसवर्णदीर्घस्य प्राप्तिर्नास्ति । 'तस्माच्छसो नः पुंसि' इत्यनेन पुंस्येव 'न' आदेशो विधीयते । अनेन तु सर्वलिङ्गेषु **युष्मान् ब्राह्मणीः । अस्मान् कुलानि** । अलिङ्गे वा युष्मदस्मदी ।

भ्यसो भ्यम् ॥३०॥

आभ्यामुत्तरस्य भ्यसो 'भ्यम्' इत्यादेशः । युष्मभ्यम् । अस्मभ्यम् । अङ्गान्त्यकार्ये वृत्ते पुनर्नाङ्गान्त्यकार्यम् । तेन झल्येत्वं न । 'अभ्यम्' आदेशो वा ।

अङ्ग······एत्वं न—वृत्तौ 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति परिभाषा स्वरूपम् । एकस्मिन् कार्ये जाते पुनस्तन्निमित्तमन्यत् अङ्ग-कार्यं न, तेन 'शेषे लोपे' न झल्येत्वम् । **अभ्यम्**—कौमुद्याम् अयमेव पाठः 'भ्यसोऽभ्यम्' इति ।

पञ्चम्या अत् ॥३१॥

आभ्यामुत्तरस्य पञ्चम्या भ्यसः 'अत्' इत्यादेशः । युष्मद् गच्छन्ति । अस्मत् ।

युष्मद्—युष्मत् + भ्यस् → अत् ।

एकवचनस्य च ॥३२॥

आभ्यामुत्तरस्य पञ्चम्या एकवचनस्य 'अत्' इत्ययमादेशः। त्वद् गच्छति। मत्।

सूत्रे **च** इति पदम् 'अत्' आदेशानुकर्षणार्थकम्। **त्वद्** - युष्मद्+ ङसि→अत् युष्मदो मपर्यन्तस्य 'त्व' आदेशः। **मत्**— अस्मद्+ङसि→अत् अस्मदो मपर्यन्तस्य 'म' आदेशः।

साम आकम् ॥३३॥

आभ्यामुत्तरस्य साम आकं भवति। युष्माकम्। अस्माकम्। अथ किमर्थमागतसुट्को गृह्यते, नह्यादेशविधान एव 'सुड्' विधीयते ? तस्यैव तु भाविनः सुटो निवृत्त्यर्थम्। कृते हि शेषे लोपेऽनयोरकारान्तत्वात् 'सुट्' प्राप्नोति, स स्थान्यन्तर्भूतत्वान्निवर्तते।

अथ ··· निवर्तते—'सामः इत्यत्र स (सुट्+आम्) इति कृत सुट्-आगमस्य निर्देशः अनन्तरभाविनः सुटो निवृत्त्यर्थम्। यदा 'युष्मद्' इत्यत्र शेषे लोपो भवति तदा 'आकम्' आदेशे कृतेऽपि युष्म+आकम् इति स्थितौ 'सुट्' प्राप्नोति सुट् सहितस्य 'आकम्' आदेशविधाने यदा 'आम्' इत्यस्य 'आकम्' कृतः, तदा स्थानिनो 'आम्' इत्यस्य निवर्तनात् आगमः 'सुट्' अपि निवृत्तो भवति।

आत औ णलः ॥३४॥

आकारान्तादङ्गादुत्तरस्य णल आकारादेशः। पपौ। अत्र औत्वमेकादेशः। स्थानिवत्त्वम्, द्विर्वचनम् इति क्रमः। एकादेशादनवकाशत्वादौत्वम्, द्विर्वचनादपि परत्वादेकादेशः इति।

पपौ—√पा+लिट्→तिप्→णल्। **अत्र ······ इति**—अयम्भावः पा+अ (णल्) इति स्थितौ अनवकाशत्वेन दीर्घं बाधित्वा अनेन सूत्रेण औत्वम् पा+औ। अत्र द्वित्वं प्राप्नोति वृद्धिश्च। तत्र पूर्वं परत्वात् वृद्धिर्भवति तदनन्तरं स्थानिवद्भावेन 'पा' इत्येतावन्मात्रस्य द्वित्वं भवति।

तुह्योस्तातङाशिष्यन्यतरस्याम् ॥३५॥

आशिषि तु-हि स्थाने तातङ् अन्यतरस्यां भवति। जीवतु / जीवतात्। ङित्त्वं गुणाद्यभावाय, नान्त्यादेशाय।

तातङि ङित्त्वं संक्रमकृत्स्यादन्त्यविधिश्चेत्तच्च तथा न ।
हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह ।।

जीवतु / जीवतात्—√जीव् + लोट्→तिप्→तु→तातङ् विभाषा । 'हि' इत्यस्योदाहरणम् जीव / **जीवतात्**—√जीव् + लोट्→सिप्हि → तातङ् विभाषा । **तातङि ·· आह**—'तातङ्' आदेशे ङित्करणम् सङ्क्रम-**कृत्**—**सङ्क्रमः**=गुणवृद्धिप्रतिषेधः तदर्थं स्यात्, 'ङिच्च' इत्यनेन अन्त्यस्य विधानार्थं तु न अनेकल्त्वात्सर्वस्यैव स्यात् । 'अतो हेः' इत्यनेन लोपस्तु हेः अधिकारे यो 'हि' तस्यैव इति ज्ञापयतीदमेवङित्करणम् । ङित्त्वात् पित्त्वा-भावे 'ब्रूतात्' इत्यत्र 'ब्रवीति' वत् 'इट्' नेति ज्ञेयम् । अस्याग्रे वृत्तौ कारि-कैषाऽपि वर्तते—

तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः ।
तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ।।

'अनङ् सौ' इति सूत्रेण 'अनङ्' इत्यादयस्तु अन्त्यस्यैव भवन्तीति बोध्यम् ।

विदेः शतुर्वसुः ।।३६।।

√विद् ज्ञाने, अस्मात्परस्य शतुर्वसुरादेशः । विद्वान् । विद्वांसौ । विद्वांसः । वसोः उगित्करणं 'वसोः सम्प्रसारणम्' अत्र क्वसोरपि ग्रहणार्थम् । 'एकानुबन्धकग्रहणे······' इत्यादि परिभाषा न प्रवर्तते । तथा सति उकारकरणमनर्थकं स्यात् ।

'अन्यतरस्याम्' इति केचिदनुवर्त्तयन्ति । विदन् । विदन्तौ ।

विद् ज्ञाने—सत्ता-विचारार्थकौ √विद् आत्मनेपदिनौ, इति ताभ्यां 'शतृ' न सम्भवति । उभयपदिनो लाभार्थस्य 'श' विकरणेन व्यवधानमिति परिशेषादयमेव गृह्यते । **उगित्करणम्······स्यात्**—'शतृ' इत्यस्य स्थाने 'वसु' भवति तथा च स्थानिवद्भावादेव उगित्कार्यं 'नुम्' आदि सिद्धयेत् तथा चास्य प्रयोजनम् क्वसोरपि सम्प्रसारणं यथा स्यात् । अस्यैवोगित्करण-स्य बलेन 'एकानुबन्धक-ग्रहणे न द्व्यनुबन्धकस्य' इति परिभाषायाः प्रवृत्ति-रत्र न भवति ।

समासेऽनञ्पूर्वे क्त्वो ल्यप् ।।३७।।

अनञ्पूर्वे समासे क्त्वो ल्यप् आदेशः । प्रकृत्य । प्रहृत्य ।

अनञ्पूर्वे—न नञ् अनञ्, अनञ् पूर्वो यस्य स तस्मिन् । **प्रकृत्य**—प्र √कृ + क्त्वा → ल्यप् । एवं पार्श्वतःकृत्य । नानाकृत्य । स्वीकृत्य । ल्यपि कृते सर्वत्र 'ह्रस्वस्य पिति कृति तुक्' इति 'तुक्' आगमः । प्रधाय । प्रस्थाय इत्यादिषु 'हि' इत्यादि बाधित्वा 'ल्यप्' एवेति बोध्यम् ।

क्त्वाऽपिच्छन्दसि ॥३८॥

अनञ्पूर्वे समासे 'क्त्वा' अस्य 'क्त्वा' आदेशः । अपेर्ल्यप् छन्दसि । कृ॒ष्णं वासो॒ यज॑मानं परि॒धाप॑यित्वा । ल्यप् अपि । उद्धृत्य जानु जुहोति । अर्च्य देवान् गतः ।

परिधापयित्वा—परि √धा + णिच् + क्त्वा । **अर्च्य**—अत्र समासं विनाऽपि क्त्वो ल्यप् ।

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥३९॥

छन्दसि सुपां सु-लुक्-पूर्वसवर्ण-आ—आत्-शे-या-डा-ड्या-याच्-आल् इत्येते आदेशाः । सु—अ॒नृ॒क्ष॒रा ऋ॒जवः॑ सन्तु॒ पन्थाः॑ । अत्र जसः 'सु' । लुक्—आर्द्रे चर्मन् । ङि-लुक् । ह॒विर्धाने॒ यत्सु॒न्वन्ति॑ । यस्मिन्निति वाच्ये 'यत्' इत्यादि ।

जसः सु—'पन्थानः' इति प्राप्ते **पन्थाः** ।

❀(वा०) सुपां सुपो भवन्तीति वक्तव्यम् । **धुरि दक्षिणयाः** । 'दक्षिणायाम्' इति प्राप्ते ।

❀(वा०) तिङां तिङो भवन्तीति वक्तव्यम् । **चषालं ये अश्वयूपाय तक्षति** । 'तक्षन्ति' इति प्राप्ते ।

इत्यादि—पूर्वसवर्ण—**धीती** । 'धीत्या' इति प्राप्ते ।

आ—**द्वा यन्तारा** 'द्वौ यन्तारौ' इति प्राप्ते ।

आत्—**न ताद् ब्राह्मणाद् निन्दामि** । तान् ब्राह्मणान् इति प्राप्ते ।

शे—**न युष्मे वाजबन्धवः** । **अस्मे इन्द्राबृहस्पती** । यूयम्-वयम् इति प्राप्ते ।

या—**उरुया** । **धृष्णुया** । उरुणा, धृष्णुना इति प्राप्ते ।

डा—**नाभा पृथिव्याम्** । 'नाभौ' इति प्राप्ते ।

ड्या— **अनुष्टुयो च्च्यावयतात्** । 'अनुष्टुभा' इति प्राप्ते ।

याच्—**साधुया**—'साधु' इति सोर्लुकि प्राप्ते ।

आल्—वसन्ता यजेत । 'वसन्ते' इति प्राप्ते ।

⁂(वा०) इयाडियाजीकाराणामुपसंख्यानम् । इया—**उर्विया परिज्यन्** । 'उरुणा' इति प्राप्ते । डियाच्—**सुक्षेत्रिया** । 'सुक्षेत्रिणा' इति प्राप्ते । ईकारः – **दृतिं न शुष्कं सरसी शयानम्** । 'सरसि' इति प्राप्ते ।

⁂(वा०) आङ्याजयारां चोपसंख्यानम् आङ्—**प्र बाहवा** । 'प्रबाहुना' इति प्राप्ते । अयाच्—**स्वप्नया सचसे जनम्** । 'स्वप्नेन' इति प्राप्ते । अयार्—**स नः सिन्धुमिव नावया** । 'नावा' इति प्राप्ते ।

अमो मश् ॥४०॥

अमो मिप्-आदेशस्य छन्दसि 'मश्' आदेशः । वधीं वृत्रम् । क्रमीं वृक्षस्य शाखाम् । 'बहुलं छन्दस्यमाङ्……' इत्यडागमाभावः ।

वधीम्—√हन्+लुङ्→मिप्→अम्→मश् । शित्त्वात् सर्वस्य भवति । अत्र मिप्-आदेशः यः अम्' तस्य ग्रहणम्, छन्दसि दृष्टानुविधानात् । **क्रमीम्**-अत्र √क्रमु वर्तते, शेषं पूर्ववत् ।

लोपस्त आत्मनेपदेषु ॥४१॥

एषु यस्तः तस्य लोपश्छन्दसि । देवा अदुह्र । 'अदुहत' इति प्राप्ते ।

अदुह्र—√दुह+लङ् । 'बहुलं छन्दसि' इति रुट् ।

ध्वमो ध्वात् ॥४२॥

छन्दसि ध्वमो ध्वात् स्यात् । अन्तरेवोष्माणं वारयध्वात् । वारयध्वम् इति प्राप्ते ।

वारयध्वात्—√वृङ्+लोट्→ध्वम्→ध्वात् ।

यजध्वैनमिति च ॥४३॥

'यजध्वम्' अस्य छन्दसि 'एनम्' इत्येतस्मिन् परे 'म' लोपो

निपात्यः, वस्य च यः । यजध्यैनं प्रियमेधाः । 'यजध्वमेनम्' इति प्राप्ते ।

यजध्यैनम्—सूत्रे यकार पाठः वृत्तेः कौमुद्याश्च न सम्मतः । 'यजध्वैनम्' इत्येव पाठः स्वीकृतः । वृत्तौ 'वस्य च यः' इत्युल्लेखेन ज्ञायते यत् **यजध्यैनं प्रियमेधाः** इत्यपि प्रयोग आसीत् । अयं न ऋग्वेदि-सम्मतः ।

तस्य तात् ॥४४॥

तकारस्य लोट्-मध्यम पुरुष बहुवचनस्य 'तात्' इत्ययमादेशो भवति । गात्रं गात्रमस्यानूनं कृणुतात् । कृणुत इति प्राप्ते । अवध्यगोहं पार्थिवं खनतात् । खनत इति प्राप्ते । श्री कृष्णो जयति ।

तकारस्य......**तात्**—छन्दसि दृष्टानुविधानात् प्रथम-पुरुष-एकवचनस्य न ।

तप्तनप्तनथनाश्च ॥४५॥

श्री कृष्णो जयति । तकारस्य स्थाने तप्-तनप्-तन-थन एते आदेशा भवन्ति । तप्—शृणोत ग्रावाणः । 'शृणुत' इति प्राप्ते । सुनोत सोमम् । 'सुनुत' इति प्राप्ते । तनप्—सं वरत्रा दधातन । 'धत्त' इति प्राप्ते । तन—जुजुष्टन । 'जुषत' इति प्राप्ते । थन—यदिष्ठन । 'यदिच्छत' इति प्राप्ते । पित्करणमङित्त्वार्थम् ।

शृणोत—√श्रु + लोट् → थ → त → तप् । पित्त्वाद् गुणः । **दधातन**—√धा + लोट् → थ → त → तनप् । पित्त्वाद् ङित्त्वाभावे 'श्नाभ्यस्तयोरातः' इत्यनेन आकार-लोपो न । **जुजुष्टन**—√जुष् + लोट् अत्र छान्दसः श्लुः । **यदिष्ठन**—'इष्ठन' इत्युदाहरणम् √इष् + लोट् । तकारस्य 'थन' आदेशे 'बहुलं छन्दसि' इति 'श' विकरणस्य लुकि ष्टुत्वेन सिद्ध्यति ।

इदन्तो मसि ॥४६॥

'मस्' इत्ययं शब्दः छन्दसि विषये इकारान्तो भवति । पुनस्त्वोद्दीपयामसि । उद्दीपयामः इति प्राप्ते ।

इदन्तः—'इत्' अन्तो यस्य सः । 'मस्' (प्र० पु० ब० व०) इत्यस्य स्थाने 'मसि' भवतीति भावः ।

क्त्वो यक् ॥४७॥

'क्त्वा' इत्येतस्य यक्-आगमो भवति छन्दसि । दुत्त्वाय । स्थित्वाय ।

दत्त्वाय, स्थित्वाय—'दत्त्वा, स्थित्वा' इति च प्राप्ते ।

इष्ट्वीनमिति च ॥४८॥

'इष्ट्वीनम्' इत्ययं शब्दो निपात्यते छन्दसि । इष्ट्वीनं देवान् । इष्ट्वा देवान् इति प्राप्ते ।

❀(वा०) पीत्वीनं सोमम् इति चेष्यते ।

इष्ट्वीनम्—√यज् + क्त्वा = इष्ट्वा अन्त्यस्याऽऽकारस्य 'ईनम्' आदेशो निपात्यते । **पीत्वीनम्**—'पीत्वा' इति प्राप्ते ।

स्नात्व्यादयश्च ॥४९॥

'स्नात्वी' इत्यादयः शब्दाः छन्दसि विषये निपात्यन्ते । स्नात्वी मलादिव । पीत्वी सोमस्य वावृधे । 'स्नात्वा, पीत्वा' इति प्राप्ते ।

स्नात्वी, पीत्वी—स्नात्वा, पीत्वा अन्त्यस्य आकारस्य स्थाने 'ईत्त्वम्' निपात्यते ।

आज्जसेरसुक् ॥५०॥

अवर्णान्ताज्जसेः असुक्-आगमो भवति छन्दसि विषये । ब्राह्मणासः पितरः सोम्यासः ।

ब्राह्मणासः, सोम्यासः—ब्राह्मणाः, सोम्याः इति प्राप्ते । **जसेः**—पूर्वाचार्याः 'जस्' विभक्तेः 'जसि' संज्ञामकार्षुः ।

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥५१॥

'छन्दसि' इति निवृत्तम् । अश्व-क्षीर-वृष-लवण, एषामङ्गानामात्मप्रीतौ विषये क्यचि परे असुक् आगमो भवति ।

अश्वस्यति वडवा । वृषस्यति गौः । क्षीरस्यति बालः । लवणस्यति उष्ट्रः ।

❀(वा०) अश्ववृषयोर्मैथुनेच्छायां वाच्यम् ।

❀(वा०) क्षीरलवणयोर्लालसायाम् । अभिलाषातिरेको लालसा ।

❀(वा०) अपर आह—सर्वप्रातिपदिकानां लालसायां सुक्-असुगौ वाच्यौ । दधिस्यति / दध्यस्यति । मधुस्यति / मध्वस्यति ।

आत्मप्रीतिः—आत्मनः प्रीतिः । **अश्वस्यति**—अश्वम् इच्छति (नियोगतः आत्मनः प्रीत्यर्थम्) अश्व+क्यच् असुक्-आगमः लट्→तिप् । **दधिस्यति**—दधि+सुक्+क्यच् । **दध्यस्यति**—अत्र असुक्—आगमः ।

आमि सर्वनाम्नः सुट् ।।५२।।

अवर्णान्तात् सर्वनाम्नोऽङ्गात् उत्तरस्य आमः सुट्-आगमो भवति । सर्वेषाम् ।

'आत्' इत्येव—भवताम् । 'आम्' इति षष्ठी-बहुवचनं गृह्यते । न 'ङेराम्नद्याम्नीभ्य' इति । तस्य परत्वात् आट्-याट्-स्याटो भवन्ति । यश्च 'घादामुः' यश्च 'आम् च लिटि' न तौ सर्वनाम्नः परौ स्तः । सानुबन्धकाविति वा न गृह्येते । इह तु 'सर्वनाम्नः' इति पञ्चमीनिर्देशात् 'तस्मादित्युत्तरस्य' इति षष्ठ्यां प्रक्लृप्तिर्भवति ।

सर्वेषाम्—सर्व+आम् सुट्—आगमः तस्मिन् परे अकारस्य एत्वं सकारस्य च षत्वम् । **षष्ठीबहुवचनम्**—तस्यैवेष्टत्वात् । **इह ...... भवति**—आमः एव 'सुट्' तथा च परिभाषा वर्तते –**'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्'** ।

त्रेस्त्रयः ।।५३।।

'त्रि' इत्यस्य आमि परतः 'त्रय' इत्ययम् आदेशो भवति । त्रयाणाम् ।

❀(वा०) त्रीणाम् इत्यपि छन्दसीष्यते । त्रीणामपि समुद्राणाम् इति ।

त्रयाणाम्—सूत्रे 'त्रेः' इति षष्ठी । 'त्रय' आदेशे—अन्त्याकारस्य दीर्घः ।

ह्रस्वनद्यापो नुट् ॥५४॥

ह्रस्वान्तात्-नद्यन्तात्-आबान्ताच्चाङ्गात् उत्तरस्यामो नुट्-आगमो भवति । ह्रस्वान्तात्—वृक्षाणाम् । हरीणाम् । वायूनाम् । नद्यन्तात्—कुमारीणाम् । आबन्तात्—खट्वानाम् ।

नुट्—टित्त्वात् 'आम्' इत्यस्य आदौ भवति । **वृक्षाणाम्**—नुटि कृते अन्त्यस्य अकारस्य दीर्घः, नकारस्य च णत्वम् । **कुमारीणाम्** 'यूस्त्र्याख्यौ नदी' इत्यनेन 'कुमारी' इत्यस्य 'नदी' संज्ञा । एवं **लक्ष्मीणाम्** । **ब्रह्मबन्धूनाम्** । **आबन्तात्**—आप्–डाप्–चाप् इति त्रयाणां ग्रहणम् । आप्—**खट्वानाम्** । डाप्—**बहुराजानाम्** । चाप्—**कारीषगन्ध्यानाम्** ।

षट्चतुर्भ्यश्च ॥५५॥

षट्-संज्ञकेभ्यः, चतुर् शब्दाच्चोत्तरस्य आमो नुट्—आगमो भवति । पञ्चानाम् । सप्तानाम् । रेफान्तायाः संख्यायाः 'षट्' संज्ञा विहिता 'षड्भ्यो लुक्' इति लुक् मा भूत् ।

पञ्चानाम्—पञ्चन्+नाम् इति स्थितौ उपधाया दीर्घः, पूर्वनकारस्य च लोपः । एवं **षण्णाम्** ।

'षट्चतुर्भ्यः' इति बहुवचन निर्देशात् यत्र संख्या प्रधानं तत्रापि नुट्—**परमपञ्चानाम्** । **परमचतुर्णाम्** । यत्र तु संख्या उपसर्जनीभूता तत्र न—**प्रियपञ्चाम्** । **प्रियचतुराम्** ।

श्रीग्रामण्योश्छन्दसि ॥५६॥

आभ्यामुत्तरस्यामः छन्दसि विषये नुट् आगमो भवति ।
श्री॒णामु॑दा॒रो ध॒रुणो॑ र॒यी॒णाम् । अन्यत्र सूतग्रामणीनाम् ।

श्रीणाम्—भाषायाम् 'वामि' इत्यनेन विकल्पेन 'नदी' संज्ञा, छन्दसि तु नित्यम् ।

गोः पादान्ते ॥५७॥

'गो' इत्येतस्माद् ऋक्पादान्ते वर्त्तमानादुत्तरस्य आमो नुट्-आगमो भवति । विद्मा हि त्वा सत्पतिं शूर गोनाम् ।

ऋक्पादान्ते—'छन्दसि' इत्यनुवर्तनात् ऋच एव पादान्तस्य ग्रहणम् । छन्दसि सर्वविधीनां विकल्पनात् पादान्तेऽपि क्वचिन्न—हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् । **गोनाम्**—नुट्—आगमः । **गवाम्** - ओकारस्य 'अव्' आदेशः ।

इदितो नुम् धातोः ॥५८॥

इदितो धातोः नुम्-आगमो भवति । √कुडि—कुण्डिता । कुण्डितुम् । स च धातूपदेशावस्थायामेव भवति । कुण्डा, हुण्डा इत्यत्र 'गुरोश्च हलः' इति 'अ' प्रत्ययो यथा स्यात् । 'गोः पादान्ते' अतः 'अन्त' ग्रहणम् अनुवर्त्तयितव्यम् । तेनान्ते इदितो धातवो गृह्यन्ते ।

कुण्डिता—√कुडि (इकारः इत्) + तृच् । 'नुम्' मित्त्वात् अन्त्यादचः उकारात् परो भवति तस्य णत्वम् । **स च**······ **भवति**—उपदेशे एव नुम्—आगमे 'कुण्ड्' इति उकारः 'संयोगे गुरुः' इत्यनेन गुरु-संज्ञको जातः । **तेन**······**गृह्यन्ते**—तथा च **भेत्ता** इत्यत्र √भिदिर् इति रकारान्तो धातुः न इदन्तः, तस्मान्न 'नुम्' इति ।

शे मुचादीनाम् ॥५९॥

शे प्रत्यये मुच्-आदीनाम् अङ्गानां नुम्-आगमो भवति । मुञ्चति । विन्दति । लिम्पति । सिञ्चति । कृन्तति । खिन्दति । पिंशति ।

❀ (वा०) तृम्फादीनामुपसंख्यानम् । तृम्फति । उम्भति इत्यादि ।

शे—√मुच् आदयः तुदादिगणे पठिताः, तेभ्यः 'श' प्रत्ययो भवति । **मुञ्चति**—मुच् + लट् → ति 'नुम्' उकारादुत्तरं भवति, तस्यानुस्वारपरसवर्णः 'ञ्' भवति । एवम् अनुस्वार-परसवर्णे सति **लिम्पति**, ···**खिन्दति** इति । **पिंशति**—अत्र नुमो नकारस्यानुस्वार एव ।

तृम्फादयः—√तृफ-√तृम्फ-√दृफ-दृम्फ इत्यादयः दश धातवः तेषु ये √तृम्फ प्रभृतयः पञ्च सानुषङ्गाः=अनुषङ्गेण नकारेण सहिताः सन्ति, तेषाम् 'अनिदितां ....क्ङिति' इत्यनुनासिकलोपे 'नुम्' भवति, तस्य च विधानसामर्थ्यान्न लोपः। अनुस्वार-परसवर्णे कृते **तृम्फति । उम्भति** । ये तु निरनुनासिकास्तेषां **तृफति** इत्यादि रूपाणि भवन्ति ।

मस्जिनशोर्झलि ॥६०॥

मस्जि-नश् एतयोर्झलादौ नुम्-आगमो भवति । मङ्क्ता । मङ्क्तुम् । मङ्क्तव्यम् । नंष्टा । नंष्टुम् । नंष्टव्यम् । मस्जेरन्त्यात्पूर्वं 'नुम्' इच्छन्ति मग्नः, मग्नवान् इत्यत्र अनुषंगसंयोगादिलोपार्थम् ।

मङ्क्ता—√मस्ज (टुमस्जो शुद्धौ)+तृच् अन्त्यात् जकारात्पूर्वं नुम् 'म स् न् ज्–तृ' 'स्कोः संयोगाद्योः.......' इत्यनेन 'स्' लोपः जकारस्य कुत्वं गकारः । नकारस्यानुस्वार-परसवर्णे ङकारः गकारस्य चर्त्वेन ककारः। **नंष्टा**—इट्–अभाव पक्षे 'न न् श् तृ' इत्यवस्थायां शकारस्य 'व्रश्च भ्रस्ज ...' इत्यनेन षकारः नकारस्य चानुस्वारः । इट् पक्षे **नशिता । मस्जेः.... लोपार्थम्**—सकार-जकारयोर्मध्ये 'नुम्' भवति तेन संयोगादेः सकारस्य उपधायां नकारस्य च लोपः सिद्ध्यति । **मग्नः**—√मस्ज्+क्त 'ओदितश्च' इत्यनेन तकारस्य नकारः ।

रधिजभोरचि ॥६१॥

एतयोरजादौ प्रत्यये नुम्-आगमो भवति । रन्धयति । रन्धकः । जम्भंजम्भम् । जम्भो वर्तते ।

रन्धयति—√रध्+णिच्+लट्→ति । **रन्धकः**—√रध्+ण्वुल् । **जम्भंजम्भम्**—√जभ्+णमुल् 'आभीक्ष्ण्ये द्वे भवतः' इति द्वित्वम् । **जम्भो वर्तते**—√जभ्+घञ् । सर्वत्र अनुस्वार-परसवर्णौ भवतः ।

नेट्यलिटि रधेः ॥६२॥

इडादावलिटि प्रत्यये परतो रधेः नुम्-आगमो न भवति । रधिता । रधितुम् । रधितव्यम् ।

रधिता—√रध्+इट् तृच्-आगमः ।

रभेरशब्लिटोः ॥६३॥

रभेरङ्गस्य शप्-लिट्वर्जिते अजादौ प्रत्यये परतो नुम्-आगमो भवति । आरम्भयति । आरम्भकः ।

रभेः—√रभ् (राभस्ये) अनुदात्तेत् धातुः । **आरम्भयति**—आ √रभ् + णिच् + लट्→ति । नुमि कृते नकारस्य अनुस्वार-परसवर्णेन मकारः ।

लभेश्च ॥६४॥

प्राग्वत् । लम्भयति । लम्भकः ।

लभेः—√लभ् (डुलभष् प्राप्तौ) अनुदात्तेत् । **लम्भकः**—√लभ् + ण्वुल् । नुमो नकारस्य अनुस्वार-परसवर्णेन मकारः ।

आङो यि ॥६५॥

आङ उत्तरस्य लभेर्यकारादौ प्रत्ययविषये नुम्-आगमः । आलम्भ्या गौः ।

यि—यकारादौ प्रत्ययविषये=प्रत्ययोत्पत्तेः प्रागेव 'नुम्' तेन अत्-उपधत्वाभावात् 'ऋहलोर्ण्यत्' इति 'ण्यत्' स्वरितान्तं भवति । यति प्रत्यये तु आद्युदात्तं स्यात् । सर्वविधीनां छन्दसि विकल्पनात् अ॒ग्निष्टो॒मे॑ आ॒ल॑भ्य॒ः इत्यत्र नुमो नकार-लोपो बोध्यः ।

उपात् प्रशंसायाम् ॥६६॥

उपादुत्तरस्य लभेः प्रशंसायां गम्यायां यादौ प्रत्यये विषयभूते नुम्-आगमो भवति । उपलम्भ्या विद्या । उपलम्भ्यानि धनानि ।

उपलम्भ्या—अत्रापि 'ण्यत्'—प्रत्ययान्तत्वात् अन्तस्वरितत्वमेव । **प्रशंसा**—यस्य प्राप्तिः, यस्माद्वा प्राप्तिः प्रशंसायाः हेतुर्भवति तत्रेदं प्रवर्तते ।

उपसर्गात्खल्घञोः ॥६७॥

लभेरुपसर्गादुत्तरस्य, खल्घञोः प्रत्यययोः परतो नुम्-आगमो भवति । ईषत्प्रलम्भः । दुष्प्रलम्भः । सिद्धे सत्यारम्भो नियमार्थः । उपसर्गादेव खल्घञोर्भवति, नान्यत्र । ईषल्लभः । लाभो वर्तते ।

ईषत्प्रलम्भः, दुष्प्रलम्भः—'ईषद्दुःसुषु ··· खल्' इति सूत्रेण खल्। घञ उदाहरणम्—**विप्रलम्भः । ईषल्लभः**—अत्र उपसर्गो नास्ति एवं **लाभः** इत्यत्रापि ।

न सुदुर्भ्यां केवलाभ्याम् ॥६८॥

सु-दुस्, आभ्यां केवलाभ्याम् अन्योपसर्गरहिताभ्याम् उपसृष्टस्य लभेः खल-घञोः नुम्-आगमो न भवति । सुलभम् । दुर्लभम् । घञि—सुलाभः । दुर्लाभः ।

उपसृष्टस्य—उपसर्गेण सम्बद्धस्य । सु—दुर् एतदतिरिक्तस्योपसर्गस्य सु—दुर्धातूनां मध्ये सन्निवेशो न स्यात् तेनात्र नुम्—निषेधो न—**सुप्रलम्भः । दुष्प्रलम्भः । अतिसुलभम्** इत्यत्र तु निषेधः प्रवर्तते एव । अत्र 'अति' इत्यस्य 'कर्मप्रवचनीय' संज्ञा इति 'सु' एवोपसर्गोऽस्ति धातुना सम्बद्धः ।

विभाषा चिण्णमुलोः ॥६९॥

चिण्-णमुल् एतयोः प्रत्यययोः लभेर्विभाषा नुम् भवति । अलाभि / अलम्भि । लाभंलाभम् / लम्भंलम्भम् ।

अलाभि—√लभ्+लुङ्→त 'चिण्' प्रत्यये कृते 'चिणो लुक्' इति तकारस्य लुक् । व्यवस्थित-विभाषा चेयम्, तेनोपसर्गेण सम्बद्धस्य लभेः नित्यं नुम् **प्रालम्भि । प्रलम्भंप्रलम्भम्** ।

उगिदचां सर्वनामस्थानेऽधातोः ॥७०॥

उगितामङ्गानां धातुवर्जितानाम् अञ्चतेश्च सर्वनामस्थाने परतो नुम्—आगमो भवति । भवतु—भवान् । भवन्तौ । भवन्तः । ईयसुन्—श्रेयान् । अञ्चतेः—प्राङ् । प्राञ्चौ ।

अञ्चतिग्रहणं नियमार्थम्—अञ्चतेरेव धातोः । अन्यस्य मा भूत् । उखास्रत् । पर्णध्वत् ।

अधातोरिति किम् ? अधातुभूतपूर्वस्य यथा स्यात् । गोमन्तम् इच्छति गोमत्यति, तस्मात् क्विप् गोमान् । अत्र गोमान् इति अधातुः पूर्वम् आसीत् इत्यस्मात् भवति 'नुम्' ।

भवान्—भवतु शब्दोऽस्ति उगित् (√भा+डवतु) प्राङ्—प्र √अन्च्+क्विन् ।

युजेरसमासे ॥१७१॥

युजेरङ्गस्य असमासे सर्वनामस्थाने नुम्—आगमो भवति । युङ् । युञ्जौ ।

'असमासे' इति किम् ? अश्वयुक् । अश्वयुजौ ।

युङ्—√युज्+क्विन् । 'युजेः' इति इकार निर्देशात् √युज् समाधौ इत्यस्य ग्रहणं न भवति **युजम्** आपन्ना ऋषयः ।

नपुंसकस्य झलचः ॥७२॥

झलन्तस्याजन्तस्य नपुंसकस्याङ्गस्य सर्वनामस्थाने परतो नुमागमो भवति । उदश्विन्ति । पयांसि । शकृन्ति । अजन्तस्य—कुण्डानि । वनानि । उगितो झलन्तस्य नपुंसकस्य परत्वान्नुम् । श्रेयांसि ।

❀ (वा०) बहूर्जि प्रतिषेधो वाच्यः । बहूर्जि ब्राह्मणकुलानि । केचिदन्त्यात्पूर्वं नुममिच्छन्ति । बहूर्न्जि ब्राह्मणकुलानि ।

उदश्विन्ति—उदश्वित्+जस् 'नुम्' मित्त्वादन्त्यादचः परो भवति । **बहूर्जि**—बहवः ऊर्जो = बलानि येषु तानि । **बहूर्न्जि**—अत्रान्त्यो जकारः (बहूर्ज्) तस्मात्पूर्वो 'नुम्' अनुबन्धलोपे नकारस्य श्चुत्वेन ञकारः ।

इकोऽचि विभक्तौ ॥७३॥

इगन्तस्य क्लीबस्य अजादौ विभक्तौ परतो नुमागमो भवति । त्रपुणी । जतुनी । त्रपुणे । जतुने ।

अचि किम् ? उत्तरार्थम् । यद्येवं तत्रैव कर्त्तव्यम् । इह तु करणे त्रपो । इत्यत्र नुम् मा भूत् ।

'न ङिसम्बुध्योः' इति प्रतिषेधः स्यात् । ननु च 'न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधाद् विभक्तिरेव नास्ति । एवं तर्हि एतदेवाज् ग्रहणं ज्ञापकम्—प्रत्ययलक्षणप्रतिषेधोऽत्र न भवति तथा सम्बुद्धिगुणः क्रियते ।

सूत्रे **विभक्तौ** इति वचनात् सर्वत्राजादौ विभक्तौ भवति । **त्रपो** — 'त्रपु' शब्दस्य सम्बोधने रूपम् । **तथा** ······**क्रियते**—'सम्बुद्धौ च' इति वर्तमाने **'ह्रस्वस्य गुणः'** इत्यनेन गुणो भवति । भाष्येऽपि श्लोकद्वयेन 'अचि' इत्यस्यात्र वचनमेवं समर्थितम्—

इकोऽचि व्यञ्जने माभूदस्तु लोपः स्वरः कथम् ।
स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति ॥१॥

रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।
नुड् वाच्य उत्तरार्थं तु इह किञ्चित्त्रपो इति ।

अयमाशयः—सूत्रे 'अचि' इति कथनाभावे हलादौ नुमि सत्यपि तस्य 'न लोपः प्रातिपदिकान्तस्य' इति लोपो भविष्यति । **पञ्चत्रपुभ्याम्** इत्यत्र स्वरस्तु व्यञ्जनस्याविद्यमानत्वादेव भविष्यति । अतिरि+भ्याम्=**अतिराभ्याम्** इत्यत्र आत्वम्, **प्रियतिसृभ्याम्** इत्यत्र त्रेः तिसृभावः परत्वात् नुमं बाधित्वा भविष्यतः । **त्रपूणाम्** इत्यत्र 'नुट्' वाच्यः 'नामि' इति दीर्घत्वार्थम् । अतः 'अचि' इति पदम् उत्तरार्थम् । अत्र च **त्रपो** इत्येतदर्थमिति ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥७४॥

तृतीयादिष्वजादिषु परतः भाषितपुंस्कमिगन्तं नपुंसकं पुंवत् गालवस्य मतेन । यथा पुंसि ह्रस्वत्वं नुम् च न भवति तथाऽत्रापि न भवतीत्यर्थः । ग्रामण्या / ग्रामणिना कुलेन । ग्रामण्याम् / ग्रामणीनाम् इत्यादि ।

इह कस्मान्न भवति—पीलुर्वृक्षः । पीलु फलम् । पीलुने फलाय इति । समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते तद् भाषितपुंस्क शब्देनोच्यते ।

इह तु वृक्षाकृतिः प्रवृत्तिनिमित्तं पुंसि शब्दस्य, फलाकृतिः

प्रवृत्तिनिमित्तं नपुंसके शब्दस्य । तदेतदेवं कथं भवति भाषित-पुंस्कमिति । भाषितः पुमान् यस्मिन्नर्थे तुल्ये प्रवृत्तिनिमित्ते स 'भाषितपुंस्क' शब्देनोच्यते । तद्योगादभिधेयमपि यन्नपुंसकं तदपि भाषितपुंस्कम् । तस्य प्रतिपादकं शब्दस्वरूपं तदपि भाषित-पुंस्कमिति ।

भाषितपुंस्कम्—भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषित-पुंस्कः शब्दः । अत्र बहुव्रीहिः अन्यपदार्थः शब्दः ।

इगन्तं नपुंसकम्—'नपुंसकस्य' 'इकः' इति षष्ठ्यन्तमुभयमपि अनु-वर्तते विभक्तिविपरिणामात्प्रथमान्तं भवति । **ग्रामण्या / ग्रामणिना**—ग्रामणीः ब्राह्मणः, ग्रामणि कुलम् इति भाषितपुंस्कमेतत् शब्दस्वरूपम् । पुंसि 'ह्रस्वत्वं नुम्' च न **ग्रामण्या** । नपुंसके तदुभयमेव **ग्रामणिना** । **कुलेन**—'ब्राह्मण' इति शेषः ।

पीलुने फलाय — इहापि भाषित पुंस्कत्वं शब्दसादृश्यान्मत्वा पक्षे पुंस्त्वाय प्रश्नः संगच्छते, उत्तरयति—अत्र **वृक्षाकृतिः** = वृक्षजातिः पुंस्त्वस्य **फलाकृतिः** — फलजातिः नपुंसकत्वस्य च प्रवृत्तिनिमित्त-मिति भेदः ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥७५॥

एषां तृतीयादिष्वजादिषु विभक्तिषु परतः अनङ् आदेशः । स चोदात्तो भवति । अस्थ्ना । अस्थ्ने । दध्ना । दध्ने । सक्थ्ना । सक्थ्ने । अक्ष्णा । अक्ष्णे ।

एषाम् – अस्थि-दधि-सक्थि-अक्षि शब्दानाम् । **अनङ्** – ङकारः अन्त्यादेशार्थः । **अस्थ्ना**—अस्थि + आ (टा) अन्त्यस्य इकारस्य अनङि कृते 'अल्लोपोऽनः' इत्यकार लोपः । **उदात्तः**—अस्थि-आदयः आद्युदात्ताः पठिताः । अनङि कृते स्थानिवद्भावेन सोऽनुदात्तः स्यादिति उदात्तो विधी-यते । तृतीयादिष्वेव-नेह **अस्थिनी** ।

अत्र तदन्तग्रहणमिष्यते । प्रियास्थ्ना ब्राह्मणेन ।

छन्दस्यपि दृश्यते ॥७६॥

एषामनङ् छन्दस्यपि दृश्यते। यत्र विहितस्ततोऽन्यत्रापि दृश्यते। 'अचि' इत्युक्तम् अनजादावपि दृश्यते। इन्द्रो दधीचो अस्थभिः।

अतृतीयादिष्वपि-- अस्थान्युत्कृत्य जुहोति। अत्र द्वितीया-बहुवचने 'अनङ्' अस्थानि। अविभक्तावपि-अक्षण्वता लाङ्गलेन। अत्र मतुपि 'अनङ्'।

ई च द्विवचने ॥७७॥

द्विवचने परतः छन्दसि विषयेऽस्थ्यादीनाम् ईकारादेशो भवति। स चोदात्तः।.अक्षी ते इन्द्र पिङ्गले। कपेरिव सक्थी।

अक्षी—अक्षि + औ → शी 'अक्षि' इत्यस्य **अक्षी** कृते पूर्वसवर्ण-दीर्घः। असति विधाने 'नुम्' प्रसज्येत। ईकारे कृते तु न 'नुम्' सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायात्। एवं **सक्थी**-सक्थि +औ। वृत्तौ तु **अक्षी ते इन्द्र पिङ्गले कपेरिव** इत्युदाहृतम् 'सक्थी, इति नास्ति।

नाभ्यस्ताच्छतुः ॥७८॥

अभ्यस्तादङ्गादुत्तरस्य शतुर्नुम्–आगमो न भवति। ददत्। ददतौ। ददतः। दधत्। दधतौ। दधतः इत्यादि। शतुरनन्तर ईकारो न विहितः इति व्यवहितस्यापि नुमः प्रतिषेधो विज्ञायते।

ददत्—√दा + शतृ 'उभे अभ्यस्तम्' इति अभ्यस्त संज्ञा। एवं **जाग्रत्** —अत्र 'जक्षित्यादयः षट्' इत्यनेन अभ्यस्त संज्ञा विज्ञेया।

शतुः.........विज्ञायते—अयम्भावः—'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा।' इति न्यायात् अनन्तरप्राप्तस्य ईकारस्य प्रतिषेधो वक्तव्यो न नुमः। परम् ईकारो न केनापि विहितः इति तस्य प्रतिषेधोऽयुक्तः। अतः सामर्थ्याद् व्यवहितस्यापि 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमः प्रतिषेधः क्रियते।

वा नपुंसकस्य ॥७९॥

अभ्यस्तादंगादुत्तरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य वा नुमागमो भवति । ददति / ददन्ति कुलानि ।

कुलानि—नपुंसकत्वज्ञानार्थम् एतद्योजितम् । **ददति**—√दा + शतृ = ददत् + जस् → 'शि' नपुंसके ।

आच्छीनद्योर्नुम् ॥८०॥

अवर्णान्तादङ्गादुत्तरस्य शतुर्वा नुमागमो भवति शी-नद्योः परयोः । तुदती कुले / तुदन्ती कुले । तुदती ब्राह्मणी / तुदन्ती ब्राह्मणी ।

अत्रान्तरङ्गत्वादेकादेशे कृते व्यपवर्गाभावात् अवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुम् 'उभयत आश्रये नान्तादिवत्' इति अन्तादिवद्भावो नास्ति । भूतपूर्वगत्याश्रयेण अदती इत्यादिषु अतिप्रसंगः । तत्र समाधिमाहुः—शत्रवयवे 'शतृ' शब्दो वर्तते । अवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति ।

अपरे पुनः-'आत्' इत्यनेन शीनद्यावेव विशेष्येते । अवर्णान्तादङ्गादुत्तरे ये शी-नद्यौ, तयोः परतः शत्रन्तस्य नुम् । तत्र येन नाव्यवधानम्, तेन व्यवहितेऽपि वचनप्रामाण्यात् इति तकारव्यवधानमाश्रयितव्यम् इति ।

तुदती—√तुद् + शतृ = तुदत् + औ → शी नपुंसके । **तुदती ब्राह्मणी**—तुदत् + स्त्रियां ङीप् । **व्यपवर्गः**=भेदः एकादेशे कृते भेदो न भवति । **उभयत ''.........नान्तादिवत्**—'तुदती' इत्यत्र अकारान्तमङ्गम् 'श' सहितं 'तुद' इति । ततः शतुः अकारे पररूपे कृते क्षीरोदकन्यायेन इदम् अकारान्तम् अङ्गम्, अयं शतृप्रत्ययस्याकारः इति न ज्ञायते ।

समाधिः—समाधानम् । **वचनप्रामाण्यात्**—अन्यथा सूत्रमेवानर्थकं स्यात् ।

शप्श्यनोर्नित्यम् ॥८१॥

नुम् । पचन्ती कुले । दीव्यन्ती ।

नुम्—शप्-श्यनोः शतुः नित्यं नुम् शी-नद्योः परतः । शपः उदाहरणं **पचन्ती**–√पच् + शतृ = पचत् + औ→शी । श्यनः उदाहरणं **दीव्यन्ती** । इदम् उदाहरणद्वयं 'शी' परतो बोध्यम् । नद्यां तु **पचन्ती ब्राह्मणी** । **दीव्यन्ती ब्राह्मणी** ।

सावनडुहः ॥८२॥

अनडुहो नुम् सौ । अनड्वान् ।

अनड्वान्—अनडुह् + सु । 'चतुरनडुहोरामुदात्तः' इति आम् 'अनडु + आ + ह् + सु ततः नुम् । उकारस्य यण् वकारः सुलोपः संयोगान्तस्य हकारस्य च लोपः ।

दृक्स्ववस्स्वतवसां छन्दसि ॥८३॥

दृक्-स्ववस्-स्वतवस् एषां नुम् छन्दसि सौ । ईदृङ् । स्ववान् । स्वतवान् ।

ईदृङ्—इदम् √दृश् + क्विन् = ईदृश् + सु । इदमः 'ई' । 'क्विन् प्रत्ययस्य कुः' इत्यनेन नुमो नकारस्य कुत्वम् । **स्ववान्** –स्ववस् + सु ।

स्वतवान्—स्वतवस् + सु । वृत्तौ **स्वतवान् पायुरग्ने** इति मन्त्र उदाहृतः । उभयत्र नुमि सति सोः सकारस्य, संयोगान्त-सकारस्य च लोपः 'सान्तमहतः संयोगस्य' इति दीर्घः ।

दिव औत् ॥८४॥

दिव् इति प्रातिपदिकम् तस्य औत् सौ । द्यौः ।

द्यौः—दिवः वकारस्य औत्त्वे यकारस्य यण् । **प्रातिपदिकम्**—धातुस्तु नेह गृह्यते सानुबन्धकत्वात् । तेनात्र नेदं प्रवर्तते अक्षैर्दीव्यति **अक्षद्यूः** ।

पथिमथ्यृभुक्षामात् ॥८५॥

एषां सौ आकारादेशः । पन्थाः । मन्थाः । ऋभुक्षाः ।

भाव्यमानोऽण् सवर्णान्न गृह्णातीति नस्य सानुनासिकादेशो न ।

पन्थाः (पथिन्) = मार्ग । **मन्थाः** (मथिन्) = मन्थनदण्डः । **ऋभुक्षाः**— 'ऋभुक्षः स्वर्गवज्रयोः' सोऽस्यास्तीति ऋभुक्षिन् = इन्द्रः । **भाव्यमानः……न** —'अणुदित्……' सूत्रे 'अप्रत्ययः' इति वर्तते इति शुद्ध एव आकारः आदेशो भवति ।

इतोऽत्सर्वनामस्थाने ॥८६॥

एषाम् इकारस्थाने अकारादेशः सर्वनामस्थाने । पन्थानौ । पन्थानः इत्यादि ।

पन्थानौ—पथिन् + औ पूर्वसूत्रेण नकारस्य आकारः, अनेन च इकारस्य अकारः ततः सवर्णदीर्घः । एवम् **मन्थानौ ऋभुक्षाणौ** इत्यादयः । 'वा षपूर्वस्य निगमे' इत्यनेन छन्दसि दीर्घविकल्पात् पक्षे **ऋभुक्षणौ** इत्यपि ।

थो न्थः ॥८७॥

एषां थस्य स्थाने 'न्थ' इत्ययमादेशो भवति सर्वनामस्थाने परतः । पन्थाः । पन्थानौ । पन्थानः ।

थो न्थः—थः = थकारस्य 'न्थ' आदेशः । आदेशस्यानेकाल्त्वेऽपि 'निर्दिश्यमानस्यादेशा भवन्ति' इति थकारमात्रस्यैव भवति न सर्वस्य । **पन्थाः**—एवं **मन्थाः । मन्थानौ । मन्थानः ।**

भस्य टेर्लोपः ॥८८॥

एषां 'भ' संज्ञानां टेर्लोपः । पथः । पथा इत्यादि ।

'भ' संज्ञा —'यचि भम्' इत्यनेन **असर्वनामस्थाने**—स्वादि पञ्च विहाय यकारादौ, अजादौ च विभक्तौ 'भ' संज्ञा विधीयते । तत्रैव **टेः** = अन्तिमस्वरसहितस्य हलः । **पथः**—पथिन् + शस् 'इन्' इत्यस्य लोपः ।

पुंसोऽसुङ् ॥८९॥

पुंसः सर्वनामस्थाने असुङ् आदेशः । पुमान् । पुमांसौ । पुमांसः ।

असुङ्—ङकारः अन्त्यादेशार्थः, उकारश्च 'उगिदचां ....' इत्यनेन 'नुम्' अर्थः। पुमान्—पुंस् + सु सकारस्य असुङ् = पुमस् नुमि पुमन्स् + स् (सु) 'सान्तमहतः संयोगस्य' इति दीर्घः पुमान्स्स् 'हलङ्याब्भ्यो दीर्घात्......' इति सोर्लोपः संयोगान्तस्य सकारस्य च लोपः पुमान् इति।

गोतो णित् ॥९०॥

'गो' शब्दात्परं सर्वनामस्थानं णिद् भवति। गौः। गावौ। गावः। तपरकरणं तु निर्देशार्थमेव। केचित् 'ओतो णित्' इति पठन्ति। 'द्यो' शब्दोऽप्यस्ति, तदर्थम्। द्यौः। द्यावौ। द्यावः।

'गोतः' इत्येव वा। तपरमोकारान्तोपलक्षणार्थम्। वर्णनिर्देशेषु हि तपरकरणस्य प्रसिद्धिरिति। नतु शब्दनिर्देशेषु।

सर्वनामस्थानम्—सु-औ-जस्-अम्-औट् विभक्तयः। **णिद्**—णिद्वत् अर्थात् णकारमितं वति च विनापि तद्वत् णित्कार्याणां निमित्तं भवति। **गौः**—अत्र वृद्धिः णित्कार्यम्। **निर्देशार्थम्**-स्पष्टनिर्देशार्थमिति भावः। 'गो' इत्यस्मादेव न तु 'चित्रगु' इत्यस्मात्। प्रायः तपरकरणं वर्णादेव दृश्यते 'वृद्धिरादैच्, अदेङ्गुणः' इत्यादिषु, तेनः **गोतः** इत्यत्र 'गो' शब्दः 'ओ' इत्यस्योपलक्षणम्। तदन्तग्रहणेन 'गो, द्यो' इत्युभयोर्ग्रहणम्।

णलुत्तमो वा ॥९१॥

उत्तमो णल् णिद्वा। अहं चकार / चकर। पपाच / पपच।

णिद्वा—णित्कार्यं वृद्ध्यादि वा भवति। **चकार / चकर**-णित्त्वपक्षे वृद्धिः, तदभावे गुणः। **पपाच** पपच-अत्रापि णित्त्वपक्षे 'अत उपधायाः' इति वृद्धिः। 'अहम्' इति प्रयोगः उत्तमपुरुषख्यापनार्थः।

सख्युरसम्बुद्धौ ॥९२॥

सख्युः सर्वनामस्थानं णिद्वत् सखिशब्दश्चेदसम्बुद्धौ। सखा। सखायौ। सखायः। सखायम्। सखायौ।

असम्बुद्धौ किम्? हे सखे!

असम्बुद्धौ—सम्बुद्धेः अन्या सा असम्बुद्धिः तस्याम् । **सखा**.......... **सखायौ**—अत्र 'सखा' इति नोदाहरणम्, तत्रोत्तरसूत्रेण 'अनङ्' भवति । शिष्टानि चत्वारि **सखायौ** प्रभृतीनि सन्ति उदाहरणानि । एषु सखि-इकारस्य वृद्धिः ऐकारः तस्य 'आय्' । **हे सखे !**—अत्र 'ह्रस्वस्य गुण.' इत्यनेन इकारस्य 'ए' गुणः ।

अनङ् सौ ॥९३॥

सखि शब्दस्य सौ परतः 'अनङ्' आदेशः । सखा ।

असम्बुद्धौ इत्येव—हे सखे !

सौ—सर्वनामस्थानान्तर्गतस्य 'सु' इत्येतस्य ग्रहणम् । **अनङ्**—ङकारोऽन्त्यादेशार्थः । **सखा**—अनङि कृते 'सर्वनामस्थाने चासम्बुद्धौ' इत्यकारस्य दीर्घः । सुलोप-नलोपौ ।

ऋदुशनस्पुरुदंसोऽनेहसां च ॥९४॥

ऋदन्तानाम् उशनस्-आदीनां च अनङ्-आदेशो भवति सावसम्बुद्धौ परतः । कर्त्ता । हर्त्ता । माता । पिता । उशना । पुरुदंसा । अनेहा । सम्बुद्धौ तु कर्त्तः ।

❀ (वा०) उशनसः सम्बुद्धावपि पक्षेऽनङ् इष्यते । नलोपोऽपि पक्ष इष्यते । हे उशनन् । हे उशन । हे उशनः । तदुक्तम्—

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥

कर्ता - कर्तृ + सु ङित्त्वात् ऋकारस्य अनङ् । **उशना** = शुक्राचार्यः—उशनस् + सु अन्त्यसकारस्य 'अनङ्' । **त्रिरूपम्**—त्रयाणां रूपाणां समाहारः अनङ्-नलोपयोर्विकल्पात् । **माध्यन्दिनिः**—तन्नामकः आचार्यः । **वष्टि**—इच्छति । **व्याघ्रपदां वरिष्ठः**—आचार्यो वैयाघ्रपद्यः । **नपुंसके इगन्ते गुणम्**—हे त्रपो ! इत्यादिषु । **पुरुदंसा** —बहुदंशन—कर्त्ता । **अनेहा**—कालः ।

तृज्वत्क्रोष्टुः ॥९५॥

क्रोष्टुशब्दः सर्वनामस्थानेऽसम्बुद्धौ तृज्वद् भवति । तृजन्तस्य

यद्रूपं तदस्य भवतीत्यर्थः । रूपातिदेशोऽयम् । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः ।

सर्वनामस्थान इत्येव–क्रोष्टून् । असम्बुद्धावित्येव–हे क्रोष्टो !

तृजन्तस्य ......अर्थः – क्रोष्टृ शब्दस्य तृजन्तं रूपं 'क्रोष्टृ' भवति । **रूपातिदेशः**—प्रत्यासत्तेः √क्रुश् इत्यस्य तृजन्तं रूपम् 'क्रोष्टृ' अतिदिश्यते, न तु 'कर्तृ' इत्यादयः । **क्रोष्टा**–क्रोष्टु + सु 'क्रोष्टृ' आदेशे 'ऋदुशनस्...... ' इत्यनेन ऋकारस्य 'अनङ्' ।

स्त्रियां च ॥९६॥

स्त्रियां च क्रोष्टुः तृज्वत् । असर्वनामस्थानार्थ आरम्भः । क्रोष्ट्रीः । क्रोष्ट्र्या । क्रोष्टीभ्याम् । क्रोष्टीभिः ।

स्त्रियां तृज्वत् क्रोष्टृ + 'ऋन्नेभ्यो ङीप्' इत्यनेन ङीप् = **क्रोष्ट्री** द्वितीया-बहुवचने शसि पूर्वसवर्णे दीर्घे सकारस्य रुत्वविसर्गौ **क्रोष्ट्रीः** ।

विभाषा तृतीयादिष्वचि ॥९७॥

तृतीयादिष्वजादिषु विभक्तिषु परतो विभाषा तृज्वत् । क्रोष्टुः / क्रोष्टोः । क्रोष्ट्रा / क्रोष्टुना । क्रोष्ट्रे / क्रोष्टवे ।

❀ (वा०) तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्-नुटौ भवतः । क्रोशत्क्रोष्टुनेऽरण्याय । प्रियक्रोष्टूनाम् ।

क्रोष्ट्रा—तृज्वद्भावे ऋकारस्य यण् रकारः, तदभावे 'आङोनाऽस्त्रि-याम्' इति 'ना' **क्रोष्टुना** । क्रोशत्क्रोष्टुने—'इकोऽचि विभक्तौ' इति नुम्, न तृज्वद्भावः । क्रोशन्तः क्रोष्टारो यस्मिन्नरण्ये तस्मै । **प्रियक्रोष्टूनाम्**-प्रियाः क्रोष्टारो तेषाम् ।

चतुरनडुहोरामुदात्तः ॥९८॥

अनयोः सर्वनामस्थाने परे आम्-आगमो भवति स चोदात्तः । चत्वारः । अनड्वान् । अनड्वाहौ । अनड्वाहः ।

❀(वा०) तदन्तविधिरत्रेष्यते । प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः ।

❀(वा०) अनडुहः स्त्रियां वा आम् वाच्यः । अनडुहो / अनड्वाही ।

उदात्तः – आगमाः अनुदात्ताः भवन्ति इत्युदात्तविधानम् ।

चत्वारः–चतुर् + जस् आमि कृते उकारस्य यण् ।

अनड्वान्—अनडुह् + सु, सौ नुम् ततः सोः सकारस्य लोपे संयोगान्तस्य हकारस्य लोपः । **प्रियचत्वाः**–प्रियाः चत्वारो यस्य सः अन्यपदार्थप्राधान्यात् एकवचनम् । सोः सकारस्य लोपे रकारस्य विसर्गः । **अनडुही**–अनडुह् + ङीष् ।

अम् सम्बुद्धौ ॥९९॥

अनयोः सम्बुद्धौ अम्-आगमः । हे प्रियचत्वः ! हे प्रियानड्वन् !

प्रियचत्वः—प्रियः चत्वारो यस्य तत्सम्बुद्धौ ।

ॠत इद्धातोः ॥१००॥

ॠकारान्तस्य धातोरिकारादेशो भवति । किरति । गिरति ।

❀ (वा) लाक्षणिकस्यापि ग्रहणमिष्यते । चिकीर्षति ।

किरति—√कॄ + लट् > ति 'तुदादिभ्यः शः' इत्यनेन श–आगमः । स रपरो भवति । **चिकीर्षति**–अत्र √कृ + सन् 'अज्झनगमां सनि' इति दीर्घे लाक्षणिक ॠकारो भवति । तथा ईत् रपरः । **लाक्षणिकम्**—लक्षणेन = सूत्रेण निर्वृत्तम् ।

उपधायाश्च ॥१०१॥

उपधायाश्च ॠकारस्य इकारादेशो भवति । कीर्तयति । कीर्तयतः ।

कीर्तयति —√कॄत संशब्दने + चुरादिः णिच् ॠकारस्य इत् रपरः 'उपधायां च' इति दीर्घः ।

उदोष्ठ्यपूर्वस्य ॥१०२॥

ओष्ठ्यपूर्वस्य ॠत उत्स्यात् । पूर्त्ताः पिण्डाः । पुपूर्षति । ओष्ठ्योऽत्राङ्गावयवो गृह्यते । नेह—समीर्णम् । सम्पूर्वो √ॠ गतौ धातुः ।

❀ (वा०) इत्त्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन । आस्तरणम् । आस्तारकः ।

पूर्त्ताः—√पॄ (पालनपूरणयोः) + क्त ॠकारस्य 'उत्' रपरः 'उपधायां च' इति दीर्घः । **अङ्गावयवः**—धातोरवयव इति यावत्, तेन **समीर्णम्** इत्यत्र नास्य प्रवृत्तिः । अत्र सम् √ॠ (गतौ) ओष्ठ्यो मकारो नाङ्गावयवः । तेनात्र ॠत इत्त्वं भवति ।

आस्तरणम्—आ √स्तॄ + ल्युट् → अन अत्र गुणः 'अर्' । **आस्तारकः**—आ √स्तॄ + ण्वुल् → अक । दन्त्योष्ठ्योऽपि ओष्ठ्यपूर्वो भवतीति मत्वा अत्रापि भवत्युत्वम्--**वुवूर्षति** ॠत्विजम् । √वॄ अत्र दन्त्योष्ठ्यवकारपूर्व ॠकारः ।

बहुलं छन्दसि ॥१०३॥

छन्दसि विषये ॠकारान्तस्य धातोः उकारादेशो भवति बहुलम् अनोष्ठ्यपूर्वस्यापि । मित्रावरुणौ ततु॑रिः । दू॒रे ह्यध्वा॑ जगु॑रिः ।

युवोरष्टाभ्योलोपस्तरधिशप्श्यनोरुपधायास्त्रीणि ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
सप्तमाध्यायस्य प्रथमः पादः ।

ततुरिः—√तॄ + कि । **जगुरिः**—√गॄ + कि । क्वचिदोष्ठ्यपूर्वस्यापि न--**पप्रतिमम्** । क्वचिद् भवति--**पपुरिः** ।

सप्तमाध्यायस्यास्मिन् प्रथमे पादे युवोरनाकौ, अष्टाभ्य औश्, लोपस्त आत्मनेपदेषु, रधिजभोरचि, शप्श्यनोर्नित्यम् इत्यत आरभ्य विंशतिः सूत्राणि, उपधायाश्च इत्यत आरभ्य त्रीणि सूत्राणीति संकलनेन त्र्यधिकशतं (१०३) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
सप्तमाध्यायस्य प्रथमः पादः ।

अथ सप्तमाध्याये द्वितीयः पादः

सिचि वृद्धिः परस्मैपदेषु ॥१॥

श्री कृष्णो जयति । सिचि परस्मैपदे इगन्ताङ्गस्य वृद्धिर्भवति । गुणापवादः । अनैषीत् । अकार्षीत् । अन्तरंगमपि गुणमेषा वृद्धिर्वचनाद् बाधते ।

श्री कृष्णो जयति—वाचिकं मङ्गलं शिष्यशिक्षायै निबध्नाति वृत्तिसारकृत् । **गुणापवादः**—'सार्वधातुकार्धधातुकयोः' इत्यनेन प्राप्तस्य गुणस्यापवादः । **इगन्ताङ्गस्य**—'इको गुणवृद्धी' इत्यस्य स्थित्या तदन्तविधिमाश्रित्यैतदर्थलाभः । **अनैषीत्**—√नी + लुङ् 'च्लेः सिच्' । **अकार्षीत्**—√कृ + लुङ् । **अहार्षीत्**—√हृ + लुङ् । **अन्तरंगमपि ... बाधते**—आर्धधातुकमात्रस्यापेक्षया गुणोऽन्तरंगः । **वचनात्**—सूत्रारम्भसामर्थ्यात् । यत्र तु ङित्वाद् वृद्धेः प्रतिषेधस्तत्र **न्यनुवीत्** इत्यादौ उकारस्य 'उवङ्' भवति ।

अतो ल्रान्तस्य ॥२॥

अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्यात एव स्थाने वृद्धिर्भवति परस्मैपदपरे सिचि परतः । अक्षारीत् । अत्सारीत् । अज्वालीत् । अतो हलादेरिति विकल्पापवादः ।

अतः समीपौ ....सूत्रे ल्रान्त पदे 'अन्त' शब्दः अवयवार्थको न अपि तु समीपार्थकः । ल्रौ-रकारलकारौ । **अक्षारीत्**—√क्षर(संचलने) + लुङ् । **अत्सारीत्**—√त्सर (छले) + लुङ् । **अज्वालीत्**—√ज्वल् + लुङ् । सर्वत्र रकारलकारौ अतः समीपवर्तिनौ । अतो वृद्धिः आकारः । **अतो** ...... **अपवादः**—'अतो हलादेर्लघोः, इति विकल्पस्यापवादः ।

वदव्रजहलन्तस्याचः ॥३॥

वदव्रज्योर्हलन्तानाञ्चाङ्गानामचः स्थाने वृद्धिर्भवति परस्मैपदे सिचि परतः । अव्राजीत् । विकल्पबाधनार्थं वदव्रज्योर्ग्रहणम् । हलन्तानाम्-अपाक्षीत् ।

अवादीत्—√वद्+लुङ् । √वद्-√व्रज् इत्यनयोः पृथगुपादानम् 'अतो हलादेः ·····' इति विकल्पबाधनार्थम् । **अपाक्षीत्**—√पच्+लुङ् ।

'हल्' इति ग्रहणम् हल्-समुदायपरिग्रहार्थम्-**अराङ्क्षीत्**—√रञ्ज् (रागे)+लुङ् ।

नेटि ॥४॥

इडादौ सिचि परे हलन्तस्याङ्गस्य वृद्धिर्न भवति । अदेवीत् । असेवीत् ।

अदेवीत्—√दिवु (क्रीडादौ)+लुङ् । वृद्धेः प्रतिषेधे 'पुगन्तलघूपधस्य च' इति गुणः ।

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥५॥

हमयान्तानां क्षण-श्वस-जागृ-णि श्वि एषामेदिताञ्च इडादौ सिचि परस्मैपदे परतो वृद्धिर्न भवति । √ग्रह—अग्रहीत् । √स्यमु—अस्यमीत् । √व्यय—अव्ययीत् √क्षण—अक्षणीत् । √श्वस—अश्वसीत् । √जागृ—अजागरीत् । √णि-औनयीत् । इत्यादि ।

ह्मयन्त-क्षण-श्वसामेदिताञ्च विकल्पापवादः । जागृ-णि-श्वीनां तु सिचि वृद्धिः प्राप्ता । सा च 'नेटि' इति न प्रतिषिध्यते । न चान्तरङ्गत्वात्पूर्वं गुणः सिचि वृद्धिरनवकाशत्वात् । यदि पूर्वं गुणः, इह णि-श्विग्रहण-मनर्थकं पूर्वगुणायादेशयोः कृतयोः यकारान्तत्वादेव प्रतिषेधः । तस्मादिदमेव णि-श्विग्रहकं ज्ञापकं न सिच्यन्तरङ्गमस्तीति ।

अथ जागर्तेः कथं ग्रहणम् ? 'जाग्रोऽविचिण्णल्ङित्सु' इति

अपवादो विधीयते । स यथा 'अचो ञ्णिति' इति वृद्धिं बाधते तथा सिचि वृद्धिमपि । नैतत्, कृते गुणे 'अतो ल्रान्त' लक्षणा वृद्धिरत्र बाध्यते । अथ गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाधिष्यते यथा 'जागरयति' इत्यत्रोपधावृद्धिर्न । तथा चिण्णलोः प्रतिषेधोऽर्थवान् भवतीति शक्यमिह 'जागृ'ग्रहणमकर्तुम् । विस्पष्टार्थं तत् क्रियते ।

√ग्रह (उपादाने) हकारान्तः । **√स्यमु** (ध्वन्यर्थे) मकारान्तः । **√व्यय्** (वित्तोत्सर्गे) यकारान्तः । **णि**—अयं चुरादिधातुभ्यः क्रियमाणः 'णिच्' प्रत्ययः । तदन्तस्य ग्रहणण् । **औनयीत्**—√ऊन (परिहाणे) + णिच् (चुरादि) + लुङ् । अत्र वेदे 'नोननति ध्वनयति ....' इत्यादिना च्लेश्चङो निषेधे सिचि वृद्धिनिषेधः । अपरमुदाहरणम्—**ऐलयीत्** अत्रापि√इल (प्रेरणे) + णिच् (चुरादिः) + लुङ् । एवं छान्दसान्येवोदाहरणानि बोध्यानि । एवं √ श्वि (टुओश्वि गतिवृद्धयोः)—**अश्वयीत्** । एदिताम् √ रगे (सङ्गे) —**अरगीत्** ।

विकल्पापवादः 'अतो हलादेर्लघोः' इत्यनेन प्राप्तस्य । **यदि**...... **अस्तीति**—इकारस्य गुणे एकारे तस्य 'अय्' आदेशे भवत्येव यकारान्तो धातुः तेन निषेधः स्यादेव ।

अजागरीत्—√जागृ (निद्राक्षये अदादिः) + लुङ्- सिच् इट् अ जागृ + इस् अत्र क्रमशः **यण्**—सार्वधातुकगुणः—सिचि **वृद्धिः**—'जाग्रो......' इति **गुण**.—हलन्तलक्षणा वृद्धिः—'नेटि' इति **वृद्धिनिषेधः**—अतो हलादि **विकल्पः**—'अतो ल्रान्त' लक्षणा **वृद्धिः**—'ह्म्यन्त...... जागृ' इति **निषेधः** इति नव विधयः प्राप्ताः निषिध्यन्ते तदाह कारिकया—

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽसौ यण्पूर्वाः प्राप्तयो नव ।।

विस्पष्टार्थम्—यो व्याकरणविद्यार्थी एवं प्रक्रियां ज्ञातुमसमर्थः तस्य कृते √जागृ-धातू-पादानम् आवश्यकम् ।

ऊर्णोतेर्विभाषा ।।६।।

ऊर्णोतेरिडादौ परस्मैपदपरे सिचि परतो विभाषा वृद्धिर्न

भवति । और्णवीत् । और्णावीत् । 'विभाषोर्णोः' इत्यङित्त्वपक्षे वृद्धिविकल्पोऽयम् । ङित्त्वपक्षे तु गुणवृद्ध्योः प्रतिषेधात् 'उवङ्' भवति । और्णुवीत् । श्री कृष्णो जयति ।

और्णवीत्—वृद्धेर्विकल्पे पक्षे गुणः ।

अतो हलादेर्लघोः ॥७॥

हलादेरङ्गस्य लघोरकारस्य इडादौ सिचि परस्मैपदे वा वृद्धिर्भवति । अकाणीत् / अकणीत् ।

अथेह कस्मान्न भवति अचकासीत् । येन नाव्यवहितं तेन व्यवहितेऽपि वचनप्रामाण्यात् इत्येकेन हला व्यवधानमाश्रितम् । अत्र पुनरचापि व्यवधानमस्तीति वृद्धिर्न भवति ।

अथ पुनरेकेनैव वर्णेन व्यवधानमाश्रीयते न पुनरनेकेन इति कल्पने 'लघोः' इति शक्यमकर्तुम् । अरक्षीत् । अतक्षीत् इत्यत्र अनेकेन व्यवधानमस्तीति वृद्धिर्न भवति । तत् क्रियते विस्पष्टार्थम् ।

'नेटि' इति वृद्धिनिषेधेऽयं विकल्पः । **अचकासीत्**—यथा **अकाणीत्** इत्यत्र लघोः अकारस्य वृद्धिः आकारो भवति तथा अत्रापि चकाराकारस्य वृद्धिः स्यात् इति प्रश्नः । ✓चकास् इत्यत्र 'का' इति आकारेण सह ककारस्य व्यवधानमस्तीति नेदं प्रवर्तते ।

नेड्वशि कृति ॥८॥

वशादौ कृति प्रत्यये परत इडागमो न भवति । 'आर्धधातुकस्येड्वलादेः' इति वक्ष्यति, तस्यायं प्रतिषेधः । वरमनादौ कृति प्रयोजनम् । ईश्वरः ।

'स्थेसभास......' इति वरच् । दीप्रः । 'नमिकम्पि......' इति रः । भस्म । 'अन्येभ्योऽपि दृश्यते' इति मनिन् । याच्ञा । 'यजयाच......' इति नङ् ।

वरमनादौ कृति—वकारादि-रकारादि-मकारादि-नकारादि प्रत्ययेषु कश्चित् आदौ यस्य स तस्मिन् कृत्प्रत्यये। क्रमशः ईश्वरः। दीप्रः। भस्म। याच्ञा इत्युदाहरणचतुष्टयम् ज्ञेयम्। इदं परिगणनं न, तेनात्रापि निषेधः सिद्धयति-षण्डः। शङ्खः।

तितुत्रतथसिसुसरकसेषु च ॥९॥

एषु कृत्सु परत इडागमो न भवति। तन्तिः। सक्तुः। पत्रम्। हस्तः। औणादिकस्तशब्दोऽत्र ज्ञेयः।

कुषेः थन् कुष्ठग्। कुषेः क्सिः कुक्षिः। इषेः क्सुः इक्षुः। अशेः क्सरन् अक्षरम्। शलेः कन् शल्कः। वदेः सः वत्सः।

❀ (वा०) त्रितुत्रेत्याद्याग्रहादीनां वाच्यम्। येषाम् इट् क्तिनि दृश्यते ते ग्रहादयः। निगृहीतिः। निपठितिः। 'कृति' इत्येव—रोदिति।

तन्तिः—√तनु (विस्तारे) + क्तिच्। 'ति' इति पदेन सामान्येन क्तिन्-क्तिचोर्ग्रहणम्। क्तिनः उदाहरणम् √दीप + क्तिन् = **दीप्तिः**। **सक्तुः** √सच् (समवाये) + तुन्। **पत्रम्**—√पत् + ष्ट्रन्। **हस्तः**—√हस् + तन्। **औणादिकः**—तेन √हस् + क्त = **हसितम्**। **निगृहीतिः**—नि √ग्रह + क्तिन्।

एकाच उपदेशेऽनुदात्तात् ॥१०॥

उपदेशे यो धातुः एकाच् अनुदात्तः ततः परस्य वलादेरार्धधातुकस्य इट् न। प्रकृत्याश्रयोऽयं प्रतिषेधः। के पुनः उपदेशेऽनुदात्ताः ? ये तथा पठ्यन्ते तेऽनिट् कारिकासु प्रदर्श्यन्ते—

अदृदृदन्त रु स्नु क्ष्णु शी यु णु क्षु श्विडी श्रिभिः।
वृङ्-वृञ्भ्यां च विनैकाचः स्वरान्ता धातवोऽनिटः ॥१॥

वसतिः शक्ष घस्तभ्यभ् लभ्यमौ रमिमन्यती।
नमिर्हनिगमो देग्धि दुह्-मिह्-वह्-दह-लिह्-नहो रुहिः ॥२॥

दर्शिर्दिशिदृशी दंशि-स्पृशि मृशिवशिक्रुशः ।
लिश्-रिश् सिध्यतिबुध्यन्ती युध-राध्-साध् शुधि युध्यती ॥३॥

क्रुधिक्षुधी व्यधिर्बन्धिः शुष्यति पुष्यति श्लिषी ।
दुषि-द्विषी शिष् पिष्विषित्विष च कृषि कर्षती ॥४॥

तप्तिवापि वपि-स्वप्-लिप्-लुपस्तृप्यतिदृप्यती ।
सृप्शपौ क्षुप्क्षिपौ स्कन्दिर्हदि छिदिभिदिक्षुदः ॥५॥

अदिः शदि-सदी खिद्-नुद्-तुदः स्विद्यतिपद्यती ।
विनत्तिर्विद्यतिः पच् वच् विचि-रिच्-पृच्छि-रञ्जयः ॥६॥

निजिः सिचमुची भञ्जि-भज्-भृज्जति-यज-त्यजः ।
युजिः स्वञ्जि-सृजीसञ्जि-मृजि-मस्जिभुजो विजिर् ।
इमे हलन्तेष्वनिट इत्येतद्धातुसङ्ग्रहः ॥७॥

याता । वाता । वस्ता । वस्तुम् । शक्ता इत्यादि ज्ञेयम् ।

अनुदात्तः—न विद्यमानः उदात्तो यस्मिन् सः । तेन अनुदात्त-अच्-सहितः समुदायोऽत्र गृह्यते । **प्रकृत्याश्रयोऽयं प्रतिषेधः**—ये प्रकृत्या = उपदेशावस्थया अनुदात्ताः एकाचश्च धातवः तेभ्यः इटः प्रतिषेधः । तेन **कर्ता** इत्यादिषु नित्स्वरेण सम्प्रत्युदात्तत्वेऽपि तथा **चकृव, चकृम** इत्यत्र द्विर्वचनेन एकाच्त्वाभावेऽपि प्रतिषेधो भवति ।

अनुदात्तानां धातूनां गणे तथा पाठं काशिकावृत्तिसारकारः स्वरचितैः **अदूदृदन्त**...... इत्यादिभिः सार्धसप्तभिः श्लोकैः प्रदर्शयति ।

भाष्ये गद्यरूपेण पठिताः इमे धातवः काशिकाकारेण, कौमुदीकारेण च स्वनिर्मितश्लोकैः वर्गीकृताः । परवर्तिभिराचार्यैः भाष्यानुक्ताः नव धातवः स्वकारिकासु संगृहीताः ।

एतेषां पद्यानामर्थः—धातवो द्वये भवन्ति स्वरान्ताः हलन्ताश्च । सर्वे **स्वरान्ता** धातवः **अनुदात्ताः** अनिटः । तेषां मध्ये अदन्ताः सेटः ।

इकारान्तेषु— √शी–√श्वि–√डी–√श्रि इत्येते सेटः ।

उदन्तेषु—√रु–√स्नु–√क्षु + √ऊर्णु, √यु, √णु, √क्ष्णु इत्येते सेटः।

ऊदन्तेषु—√लू–√यू इति सेटौ (एतयोः पाठो वृत्ति ग्रन्थे एव वर्तते।)

ऋकारान्ततेषु—√वुङ्–वृञ् इति सेटौ ॥१॥

कान्तेषु—√शक् अनिट्।

सान्तेषु—√वस् (प्रसारणी), √घस्।

भान्तेषु—√रभ्–√यभ्–√लभ्।

न-मान्तेषु—√यम्–√रम्–√मन् (ज्ञाने)–√नम्–√हन्।

हान्तेषु—√दिह्–√दुह्–√मिह्–√वह्–√दह्–√लिह्–√नह्–√रुह ॥२॥

शान्तेषु—√दश्–√दिश्–√दृश्–√दश–√स्पृश्–√मृश्–√वश्–√क्रुश्–√लिश्–√रिश्।

धातेषु—√सिध्–√बुध्–√युध्–√राध्–√साध्–√शुध्–√युध् ॥३॥ √क्रुध्–√क्षुध्–√व्यध्–√बन्ध् ॥३॥

षान्तेषु—शुष्–√पुष्–√श्लिष्–√दुष्–√द्विष्–√शिष्–√पिष्–√तुष्√विष्–त्विष्–√कृषि—(तुदादि-भ्वादि) ॥४॥

पान्तेषु—√तप्–√तिप्–√आप्–√वप्–√स्वप्–√लिप्–√लुप्–√तृप्–√दृप्–√सृप्–√शप्–√क्षुप्–√क्षिप्।

दान्तेषु—√स्कन्द्–√हृद्–√छिद्–√भिद्–√क्षुद् ॥५॥
√अद्–√शद्–√सद्–√खिद्–√नुद्–√तुद्–√स्विद्–√पद्–√विन्ते–√विद्यते।

च-जान्तेषु—√पच्–√वच्–√विच्–√रिच्–√पृच्छ–√रञ्जि– ॥६॥ √निज्–√सिच्–√मुच्–√भञ्जि–√भज्–√भृस्ज्–√यज्–√त्यज्–√युज्–√स्वञ्ज्–√सृज्–√सञ्जि–√मृज्–√मस्जि–√भुज्–√विजिर्।

इति धातवोऽनिटः पठिताः ॥७॥

याता ... ज्ञेयम्—√या + लुट् अथवा √या + तृच् कारिकायाम् अदन्तं वर्जितम् अयम् आकारान्तो धातुः तेन 'इट्' प्रतिषेधः। **वाता**—√वा + ल्युट्।

√वस्ता—√वस् (प्रसारिणी)+तृच्। √वस् (आच्छादने) इत्यस्य तु वसिता वस्त्राणाम्। √वस् (निवासे)+तृच्=उषिता।

सूत्रे **उपदेशे** इति हेतोः **लविष्यति** इत्यत्र इट् भवति, **कर्त्ता** इत्यत्र च निषेधः। अन्यथा √लू इत्यस्य धातोः प्रत्ययस्वरेण शेषानुदात्तत्वान्निषेधः स्यात्। √कृ इत्यस्य च 'तृन्' प्रत्ययस्य नित्स्ववेण धातोरुदात्तत्वान्निषेधो न प्रवर्त्तेत।

श्र्युकः किति ॥११॥

'श्रि' इत्यस्मात् उगन्ताच्च किति इडागमो न। श्रित्वा। श्रितः। उगन्तात्—युत्वा। युतः। वृत्वा। वृतः।

उदात्तधातूनाम् इटो निषेधार्थमिदं सूत्रम्। **उगन्तात्**—'उक्' इति प्रत्याहारः तेन उ-ऋ इत्येतयोर्ग्रहणम्। वृत्वा-√वृ+क्त्वा।

❀ (वा०) वाच्य ऊर्णोतेर्णुवद्भावो यङ् प्रसिद्धिः प्रयोजनम्। इति √ऊर्णु धातोः एकाच्त्वम् उदात्तत्वञ्चातिदिश्यते। **प्रोर्णुतः**। **प्रोर्णुतवान्**।

सनि ग्रह गुहोश्च ॥१२॥

ग्रहेर्गुहेरुगन्ताच्च सन इट् न। जिघृक्षते। जुघुक्षति। बुभूषति।

जिघृक्षते—√ग्रह+सन्+लट्→त √ग्रह उभयपदी वृत्तौ कौमुद्याञ्च **जिघृक्षति** इत्युदाहृतम्। **जुघुक्षति**—√गुहू (संवरणे)+सन्+लट्→ति। पदमञ्जरीकारः √गुहु स्वरितेतं मन्यते। न्यासकारस्तु आत्मनेपदिनम् तेन **जुघुक्षते** इत्युदाहरणं मतम्। **बुभूषति**—√भू+सन्+लट्→ति। उगन्तस्य धातोरिदमुदाहरणम्।

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥१३॥

कृ—आदिभ्यो लिटि इट् न। सिद्धे सत्यारम्भो नियमार्थः कृ आदय एव लिटयनिटः। अन्ये सेटः। चकृव। ससृव इत्यादि।

सिद्धेसति······अत्र √वृङ्—√वृञ् इत्येतयोः 'श्र्युकः किति' इत्यनेन शेषाणां √कृ प्रभृतीनाम् अनुदात्तत्वादेव निषेधः प्राप्तः, अतः सूत्रं नियमार्थ-

मेव। तेन **बिभिदिव, लुलुविव** इत्यादिषु 'इट्' भवति। **इत्यादि**—√भू—बभूव। √वृञ्—ववृव। √वृङ्—ववृमहे। √स्तु— तुष्टुव। √द्रु—दुद्रुव। √स्रु—सुस्रुव। √श्रु—शुश्रुव। √वृञ्+थल्=**ववर्थ** इति तु वेदे निपातनात् सिद्धयति।

❀ (वा०) क्रञोऽसुट्कस्येति वाच्यम्। **सञ्चस्करिव**।

श्वीदितो निष्ठायाम् ॥१४॥

श्वयतेरीदितश्च निष्ठायां नेट्। शूनः। √ओविजी—उद्विग्नः। दीप्तः।

निष्ठाधिकारः प्रागर्धधातुकस्येट् इति।

श्वयतेः—√टुओश्वि (गतिवृद्धयोः) इत्यस्मात् शूनः √टुओश्वि+क्त। 'वचि स्वपि ···' इत्यनेन वकारस्य सम्प्रसारणम्, ओदितश्च' इति तकारस्य नकारः। **दीप्तः**—√दीप+क्त।

यस्य विभाषा ॥१५॥

यस्य धातोः क्वचिद् विभाषा इट् उक्तस्तस्य निष्ठायाम् इट् न। वक्ष्यति—'स्वरति······' इत्यादि। सूतवान्। धूतः। 'उदितो वा' वृद्धः।

'स्वरति ·····'—'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विभाषा 'इट्' विधीयते। **धूतः**—√धूञ् (कम्पने)+क्त। **वृद्धः**—√वृधु (वृद्धौ) +क्त।

आदितश्च ॥१६॥

आदितो धातोर्निष्ठायां न इट्। मिन्नः। चकारोऽनुक्त-समुच्चयार्थः। आश्वस्तः।

आदितः—आत् इत् यस्य स तस्मात् **भिन्नः**—√ञिमिदा (स्नेहने)+क्त। **आश्वस्तः**—आ√श्वस्+क्त। एवं **वान्तः**।

विभाषा भावादिकर्मणोः ॥१७॥

भावे आदिकर्मणि च आदितो धातोर्वा निष्ठायाम् इट् । मिन्नमनेन / मेदितमनेन । प्रमिन्नः / प्रमेदितोऽसौ नागः ।

मिन्नम्—नपुंसके भावे क्तः । **मेदितम्**–'निष्ठा शीङ्' इति कित्वप्रतिषेधे गुणः । **प्रमिन्नः । प्रमेदितोऽसौ नागः**–ग्रन्थकारमतेनात्र **नागः** = हस्ती **प्रमिन्नः** = स्निग्धः कर्तुमारब्धः । **आदिकर्मणि**–आदिभूतक्रियाक्षणे ।

वृत्तिकारस्तु एवं पठति–**प्रमिन्नः** । **प्रमेदितः** । सौनागाः कर्मणि निष्ठायां शकेः इट् इच्छन्ति विकल्पेन । **शंकितः** / शक्तो घटः कर्तुम् । अत्र पदमञ्जरी—**सौनागाः**–सुनागस्य आचार्यस्य शिष्याः ।

सूत्रकारमतेन 'विभाषा' इति योगविभागादयं विकल्पः सिद्ध्यति ।

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥१८॥

क्षुब्ध-आदोनि क्रमेण मन्थ-आदिष्वर्थेषु निपात्यन्ते । क्षुब्ध इति भवति मन्थाभिधानं चेत् / क्षुभितमन्यत् । स्वान्तं मनश्चेत् / स्वनितमन्यत् । ध्वान्तं तमः / ध्वनितमन्यत् । लग्नं सक्तम् / लगितमन्यत् । म्लिष्टमविस्पष्टम् / म्लेच्छितमन्यत् । विरिब्धं स्वरः / विरेभितमन्यत् √रेभृ शब्दे । फाण्टम् अनायासश्चेत् / फाणितमन्यत् । बाढं भृशम् । बाहितमन्यत् ।

निपात्यन्ते—सर्वत्र 'इट्' इत्यस्य अभावो निपात्यते । **मन्थः**—द्रवद्रव्यसंयुक्ताः सक्तवः । यथा दध्ना संयुक्ताः सक्तवः दधिमन्थः । **क्षुब्धा नदी, क्षुब्धः समुद्रः** इत्यादि प्रयोगास्तु मन्थनसादृश्याद् ज्ञेयाः ।

स्वान्तम् – बाह्यविषयेष्वनाकुलम् । **लग्नम्**——लगे + क्त निष्ठायाः नत्वमपि निपात्यते । **म्लेच्छितम्**—अपभाषितम् । **विरिब्धम्**–वि √ रेभृ + क्त धातोरेकारस्य इत्त्वमपि निपात्यते ।

फाण्टम्——फण् (गतौ) + क्त । 'सद्योऽभिषुत्य पूतस्तु **फाण्टः**' इति वाग्भटः । फाण्टनिर्माणे रसादि निर्माणापेक्षया **अनायासः** = अल्पायास एव भवति । **बाढम्**—√बाह (प्रयत्ने) + क्त । **भृशम्** = अतिशयः ।

धृषिशसी वैयात्ये ॥१९॥

वैयात्यं प्रागल्भ्यम् । तस्मिन् वाच्ये एतयोर्निष्ठायां नेट् । धृष्टः । विशस्तः ।

वैयात्यम्—विरूपं यातं यस्य स वियातः=प्रगल्भः अविनीत इत्यर्थः तस्य भावः । **एतयोः** √-ञिधृषा (प्रागल्भ्ये)-√शस हिंसायाम्) इति धात्वोः । सूत्रे षष्ठचर्थे प्रथमा ।

'आदितश्च' यस्य विभाषा' इति सूत्राभ्यां सिद्धे इडभावे नियमार्थमिदं वैयात्ये एव । अन्यत्र **धर्षितः**=अभिभूतः । **विशसितः**=विरूपितः ।

दृढः स्थूलबलयोः ॥२०॥

स्थूले बलवति च दृढो निपात्यते । दृढः स्थूलो बलवान् वा ।

दृढः—√दृंहि / √दृहि (वृद्धौ)+क्त । **स्थूलः**=मांसलः । **बलः**=बलवान् 'अर्शाद्यच्' । अन्यत्र **दृंहितम्** / **दृहितम्** ।

प्रभौ परिवृढः ॥२१॥

परिवृढो निपात्यते प्रभुश्चेद् वाच्यः । परिवृढः स्वामी / परिबृंहितमन्यत् ।

परिवृढः—परि √वृंहि / √वृहि+क्त । **परिवृढः** कुटुम्बी । अन्यत्र **परिवृंहितम्** / **परिवृहितम्** ।

कृच्छ्रगहनयोः कषः ॥२२।

कृच्छ्रगहनयोरर्थयोर्वाच्ययोः कषेर्निष्ठायामिट् न । **कष्टः** अग्निः । कष्टं व्याकरणम् । गहने—कष्टानि वनानि । नेह—कषितं कनकम् ।

कृच्छ्रम्=दुःखम् तत्कारणम् अग्निचयनादिकमपि दुःखम् । **अग्निः**-

अत्र हवनीयश्चीयमानोऽग्निर्विवक्षितः, अग्निचयनस्य दुर्ज्ञानत्वात् । एवं व्याकरणमपि **कष्टम्**—प्रकृति-प्रत्ययादेर्दुर्ज्ञेयत्वात् । एवं **कष्टतराणि सामानि**—स्वरस्य दुर्ज्ञानत्वात् । **गहनम्**=अगम्यम्, दुष्प्रवेश्यम् ।

घुषिरविशब्दने ॥२३॥

घुषेर्धातोरविशब्दनेऽर्थे निष्ठायाम् इडागमो न । घुष्टा रज्जुः । घुष्टौ पादौ ।

अविशब्दने किम् ? अवघुषितं वाक्यमाह । शतघुषितम् ।

अविशब्दने—विशब्दनम्=प्रतिज्ञानम्=शब्देन स्वाभिप्रायस्याविष्करणम् । **घुष्टा**--अभिप्रायरहितं शब्दिता । **अवघुषितम्**—अभिप्रायाविष्करणपूर्वकम् । **शतघुषितम्**=शतेन पुरुषैः घुषितम् । वृत्तौ इदम् उदाहरणं नास्ति ।

अर्देः संनिविभ्यः ॥२४॥

सम्-नि-वि एभ्य उत्तरस्यार्देः निष्ठायाम् इडागमो न । समर्णः । न्यर्णः । व्यर्णः । अर्दितः । श्रीराघवाय नमः ।

अर्देः--√अर्द (गतौ, याचने च) इत्यस्मात् । **समर्णः** इत्यादिषु 'रदाभ्याम्''''''' इत्यनेन निष्ठायाः तकारस्य नकारः । **अर्दितम्**-इटि कृते इदं रूपम् ।

अभेश्चाविदूर्ये ॥२५॥

अभिशब्दादुत्तरस्यादेराविदूर्ये निष्ठायाम् इडागमो न भवति । अभ्यर्णा सेना । अभ्यर्णा शरत् ।

आविदूर्ये किम् ? शीतेनाभ्यर्दितः ।

आविदूर्ये=विशेषेण दूरं विदूरम् । न विदूरम् अविदूरम् तस्य भावः तस्मिन्नर्थे । **अभ्यर्णा**=अविप्रकृष्टा (सेना) आसन्ना (शरत्) **अभ्यर्दितः**=पीडितः ।

णेरध्ययने वृत्तम् ॥२६॥

ण्यन्तस्य वृतेर्निष्ठायाम् अध्ययने वृत्तम् इति इडागमाभावो 'णि' लुक्च निपात्यते । वृत्तो गुणो देवदत्तेन / वर्तितमन्यत् ।

अध्ययनम्—अधीयते इति कर्मणि ल्युट् अध्येतव्यम् इत्यर्थः **वृत्तो गुणो देवदत्तेन–वृत्तः**–√वृत् (ण्यन्तः)+क्त = सम्पादितः । गुणः = पाठः (पद-क्रम-संहितारूपोऽध्ययन-विशेषः) । यद्यपि √वृत् इत्यकर्मकः स ण्यर्थे वर्त्तमानः सकर्मको भवति ।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥२७॥

दान्तादयः शब्दाः ण्यन्तानां धातूनां वा निष्ठायामिडागम-रहिताः निपात्यन्ते । दान्तः / दमितः । शान्तः / शमितः । पूर्णः / पूरितः । दस्तः / दासितः । स्पष्टः / स्पाशितः । छन्नः / छादितः । ज्ञप्तः / ज्ञपितः । इट्-प्रतिषेधो णि-लुक्च निपात्यते ।

ज्ञपेस्तु 'भरज्ञपिसनाम्' इति विकल्पविधानाद् 'यस्य विभाषा' इति प्रतिषेधे प्राप्ते विकल्पार्थं विधानम् ।

दान्तः—√दमु णिजन्तः (उपशमे)+क्त 'अनुनासिकस्य क्विझलोः क्ङिति' इति उपधायाः दीर्घः । एवं **शान्तः** (√शमु णिजन्तः+क्त) इत्यत्रापि । **दमितः, शमितः**–इट् पक्षे 'मितां ह्रस्वः' इति ह्रस्वत्वम् । **पूर्णः / पूरितः**–√पूरी णिजन्तः (आप्यायने)+क्त इडभावपक्षे निष्ठायाः नत्वम् । **दस्तः**—√दस् णिजन्तः (उपक्षये) इडभावे ह्रस्वत्वमपि निपात्यते । एवं **स्पष्टः, छन्नः, ज्ञप्तः ज्ञपितः** इत्यत्रापि उपधाह्रस्वत्वं भवति ।

रुष्यमत्वरसंघुषास्वनाम् ॥२८॥

रुषि-अम-त्वर-सङ्घुष-आस्वन एषां वा निष्ठायाम् इडागमो न भवति । रुष्टः / रुषितः । 'तीषसहलुभरुषरिषः' इति विकल्पाद-प्राप्ते इटि विकल्पः । √अम्–अभ्यान्तः / अभ्यमितः । √त्वर-तूर्णः । त्वरितः । 'आदितश्च' इति प्रतिषेधे प्राप्ते । सङ्√घुष–सङ्घुष्टं वाक्यमाह । सङ्घुषितम् । सम्-पूर्वस्य घुषेरविशब्दनेऽपि

परत्वादयमेव विकल्पः । आ √स्वन–आस्वान्तो मैत्रः / आस्वनितः ।

विकल्पादप्राप्ते—'यस्य विभाषा' सूत्रेण इति शेषः ।

अभ्यान्तः—अभि √अम (गत्यादिषु) + क्त इडभावे उपधादीर्घः ।

तूर्णः—√ञित्वरा (सम्भ्रमे) + क्त 'ज्वरत्वर ......' इत्यनेन उपधाया ऊठ् । **परत्वात्** -'घुषिरविशब्दने' इत्यस्मात् परमिदं सूत्रं बलवत्'। **आस्वान्तः / आस्वनितः**—अत्रापि 'क्षुब्धस्वान्त..........' इत्यपेक्षया परत्वादयमेव विकल्पो भवति ।

हृषेर्लोमसु ॥२९।

लोमसु वर्तमानस्य हृषेर्निष्ठायां वा इडागमः । हृष्टानि रोमाणि / हृषितानि ।

❀ (वा०) तुष्टयर्थस्य विस्मयप्रतिघातयोश्चेति वाच्यम् । हृष्टो मैत्रः / हृषितः । हृष्टा दन्ताः / हृषिताः प्रतिहता इत्यर्थः ।

हृष्टानि = √हृष (तुष्टौ) + (कर्तरि) = क्त उत्स्फुटानि । **रोमाणि**-वृत्तौ **लोमानि** इत्युदाहृतम् । केशाः -मूर्द्धजाः लोमानि चाङ्गान्तरजानि । इह तु सामान्येनोभयेषां ग्रहणम् । **तुष्टयर्थस्य**–वृत्तौ नायमंशः पठितः । **हृष्टः** = विस्मितो मैत्रः । **हृष्टाः** = कठिनवस्तु-भक्षणेन शीतेन वा हताः ।

अपचितश्च ॥३०॥

अप-पूर्वस्य चायतेर्निष्ठायाम् अनिट्त्वम् 'चि' भावश्च वा निपात्यते । अपचितोऽनेन गुरुः / अपचायितः ।

अपचितः—अप √चायृ (पूजा-निशामनयोः) + क्त । **निशामनम्** = चाक्षुषं ज्ञानम् ।

❀ (वा०) क्तिनि नित्यमिति वाच्यम् । **अपचितिः** ।

ह्रु ह्वरेश्छन्दसि ॥३१॥

ह्वरेश्छन्दसि विषये निष्ठायां 'ह्रु' इत्ययमादेशः । ह्रुतस्य

चाह्रुतस्य च । अह्रुतमसि हविर्धानम् । ह्रुतमित्याहुतिवचनम् ।

ह्रुतम्—√ह्वृ (कौटिल्ये) + क्त ।

अपरिह्वृताश्च ॥३२॥

अपरिह्वृताः इति निपात्यते छन्दसि विषये । अपरिह्वृताः सनुयाम वाजमग्ने ।

अपरिह्वृताः—पूर्वसूत्रेण प्राप्तः 'ह्रु' आदेशो निषिद्ध्यते ।

सोमे ह्वरितः ॥३३॥

ह्वरितः इति ह्वरतेर्निष्ठायाम् इडागमो गुणश्च निपात्यते छन्दसि, सोमश्चेदभिधेयः । मा नः सोमो ह्वरितः । विह्वरितस्त्वम् ।

ह्वरितः, विह्वरितः—अत्र ह्वरतेः 'ह्रु' आदेशो न भवति ।

ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ॥३४॥

ग्रसित—आदयः शब्दाश्छन्दसि निपात्यन्ते । ग्रसितं वा एतत्सोमस्य । ग्रस्तम् इति भाषायाम् । विष्कभिते अजरे / स्कब्ध इति भाषायाम् । येन स्वः स्तभितम् / स्तब्धम् इति भाषायाम् । सत्येनोत्तभिता भूमिः / उत्तब्धा इति भाषायाम् ।

चत्ता वर्षेण विद्युत् । चतिता इति भाषायाम् । उत्तानाया हृदयंयद् विकस्तम् / विकसितम् इति भाषायाम् । निपातनं बहुत्वापेक्षं, विकस्ताः इति बहुवचनम् । तेनैकवचनान्तोऽपि प्रयोगः साधुः ।

त्वष्टुरश्वस्याविशस्तां / विशसिता इति भाषायाम् । उत शंस्ता सुविप्रः / शंसिता इति भाषायाम् । प्रशास्ता विप्रः / प्रशासिता इति भाषायाम् ।

तरु॒तार॑ं रथा॑नाम्, तरूतारम् / तरितारम्, तरीतारम् इति भाषायाम् । वरुतारं रथानाम् वरूतारम् / वरितारम्, वरीतारम् इति भाषायाम् । व॑रू॒त्रीष्ट्वा दे॒वी: वि॒श्व॑दे॒व्यवती । जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम् । तच्चातन्त्रम् ।

अग्निरुज्ज्वलिति / उज्ज्वलति इति भाषायाम् । स्तोकं क्षरिति / क्षरति इति भाषायाम् । क्षमिति / क्षमति इति भाषायाम् । सोमं वमिति / वमति इति भाषायाम् । अभ्यमिति वरुणः / अभ्यमति इति भाषायाम् ।

ग्रसितादिषु चतुर्षु क्तान्तेषु 'इट्' निपात्यते । **चत्त-विकस्तयोः** 'क्त' प्रत्यये प्राप्तस्य इटोऽभावो निपात्यते । **विशस्तृ प्रभृतिषु त्रिषु** तृचि प्रत्यये इटोऽभावो निपात्यते । **तरुतृ-आदिषु पञ्चसु** तृचि 'उट्' 'ऊट्' इत्यागमौ इटोऽभावश्च निपात्यते । **'वरुत्री'** इति स्त्रीलिङ्गनिर्देशः ।

उज्ज्वलिति इत्यादिषु पञ्चसु लटि शपोऽकारस्य इकार आदेशो निपात्यते ।

सूत्रेऽन्ते **इति** पदं प्रकारार्थम् तेन क्वचित् ईकारोऽपि आदेशो भवति **रविमभ्यमीति** वरुणः ।

आर्धधातुकस्येड् वलादेः ॥३५॥

वलादेरार्धधातुकस्येडागमो भवति । लविता । पविता । पठिता । 'इट्' इति वर्तमाने पुनर्ग्रहणं प्रतिषेधनिवृत्त्यर्थम् ।

लविता—√लूञ् (छेदने) + लुट् । **प्रतिषेधनिवृत्त्यर्थम्**—इदमेव ज्ञापकं यत् आर्धधातुकमात्रस्य 'इट्' भवति ।

स्नुक्रमोरनात्मनेपदनिमित्ते ॥३६॥

स्नु-क्रमोरार्धधातुकस्य वलादेः इडागमो भवति । तौ चेत् अनात्मनेपदनिमित्ते भवतः । प्रस्नविता । प्रस्नवितुम् ।

अनात्मनेपदनिमित्त इति किम् ? प्रस्नोषीष्ट । प्रस्नोष्यते ।

अनात्मनेपदनिमित्ते—आत्मनेपदस्य निमित्ते यत्र एतौ धातू आश्रित्य आत्मनेपदं भवति तदेव आत्मनेपदनिमित्तम् तद् व्यतिरिक्ते 'इट्' भवतीति तात्पर्यम् । तेन सत्यात्मने पदे प्रतिषेधो भवति नासति । **प्रस्नविता**–प्र √स्नु + तृच् । एवं √क्रम् इत्यस्य **प्रक्रमिता, प्रक्रमितुम्** इत्युदाहरणे बोध्ये ।

प्रस्नोषीष्ट—अत्र 'भावकर्मणोः' इत्यनेन आत्मनेपदं विहितम् । एवं **प्रक्रंसीष्ट**—अत्र 'प्रोपाभ्यां समर्थाभ्याम्' इति कर्तरि आत्मनेपदम् ।

ग्रहोऽलिटि दीर्घः ॥३७॥

ग्रह उत्तरस्य इटः अलिटि परतः दीर्घो भवति । ग्रहीता । ग्रहीतुम् । लिटि तु जगृहिव । चिण्वदिटो न । ग्राहिता । ग्राहिष्यते ।

ग्रहीता—√ग्रह + तृच् इटि कृते तस्य दीर्घत्वम् ।

जगृहिव—√ग्रह + लिट्→वस्→व । 'ग्रहिज्या..........' इत्यनेन सम्प्रसारणम् । **चिण्वदिटो न**—अत्र 'आर्धधातुकस्येड्वलादेः' इत्यनेन विहितस्य इटो ग्रहणं तस्यैव प्रकृतत्वान्न तु 'स्यसिच्.......' इति विहितस्य चिण्वदिटः । **ग्राहिता**—अत्र 'स्यसिच्.......' इत्यनेन 'इट्' कृतः ।

वॄतो वा ॥३८॥

वृङ्-वृञ्भ्याम्, ॠदन्ताच्च इटो वा दीर्घो भवति । वरिता / वरीता । तरिता / तरीता ।

वॄतः—√वृङ्-√वृञ् इत्येताभ्याम् ॠदन्तेभ्यश्च धातुभ्यः । **तरिता**—√तॄ (प्लवनतरणयोः) + लुट् । दीर्घपक्षे **तरीता** । लिटि तु न दीर्घः **ववरिथ** । **तेरिथ** ।

न लिङि ॥३९॥

वॄत इटो लिङि न दीर्घः । वरिषीष्ट ।

वरिषीष्ट—√वृङ् + लिङ् सीयुट्, 'लिङ्सिचोरात्मनेपदेषु' इति 'इट्' ।

सिचि च परस्मैपदेषु ॥४०॥

वृत इटः सिचि परस्मैपदेषु न दीर्घः अवारिष्टाम् । अवारिषुः । अतारिष्टाम् ।

अवारिष्टाम्–√वृञ् + लुङ्→तस्→ताम् सिच् इट् ऋकारस्य वृद्धिः ।

इट् सनि वा ॥४१॥

वृतः सनि परे वा इडागमो भवति । वुवूर्षते/विवरिषते / विवरीषते । तितीर्षति / तितरिषति । तितरीषति ।

वुवूर्षते—√वृङ् + सन् + लट्→त । इडभावपक्षे 'अज्झनगमां सनि' इति ऋकारस्य दीर्घः 'उदोष्ठ्यपूर्वस्य' इति उत्वम् रपरत्वञ्च । **विवरीषते**—इटः पक्षे दीर्घः ।

लिङ्सिचोरात्मनेपदेषु ॥४२॥

वृतः परस्मिन् लिङि सिचि चात्मने पदे परे वा इडागमो भवति । वृषीष्ट / वरिषीष्ट । आस्तीर्षीष्ट / आस्तरिषीष्ट । सिचि खल्वपि-अवृत / अवरिष्ट / अवरीष्ट । आस्तीर्ष्ट / आस्तरिष्ट / आस्तरीष्ट ।

वृषीष्ट—'उश्च' इत्यनेन कित्त्वाद् गुणाभावः । **आस्तीर्षीष्ट**-आ √स्तॄ + आशीर्लिङ् पूर्ववत् कित्त्वात् न गुण, 'ॠत इद्धातोः' इत्यनेन ॠकारस्य इत्त्वम् रपरत्वञ्च 'हलि च' इत्यनेन तस्य दीर्घत्वम् ।

ॠतश्च संयोगादेः ॥४३॥

ॠदन्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्-सिचोरात्मनेपदेषु वा इडागमो भवति । ध्वृषीष्ठ / ध्वरिषीष्ट । स्मृषीष्ट / स्मरिषीष्ट । अध्वृत / अध्वरित ।

ध्वृषीष्ट—√ध्वृ (कौटिल्ये) + आशीर्लिङ् 'भावकर्मणोः' इत्यात्मनेपदम् ।

स्वरतिसूतिसूयतिधूञूदितो वा ॥४४॥

स्वरति-सूति-सूयति-धूञ् इत्येतेभ्य ऊदिद्भ्यश्च उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । स्वर्ता / स्वरिता । प्रसोता / प्रसविता । सोता / सविता । धोता / धविता । ऊदिद्भ्यः—√गाहू—विगाढा / विगाहिता ।

'वा' इति वर्तमाने पुनर्वचनं लिङ्सिचोर्निवृत्त्यर्थम् । सूति-सूयत्योर्विकरणनिर्देशः √षू प्रेरणे इत्यस्य निवृत्त्यर्थः । धूञः सानुबंधकस्य √धू विधूनने इत्यस्य निवृत्त्यर्थः । परत्वात स्वरतेः स्यस्य नित्यमिट्—स्वरिष्यति । किति तु 'श्र्युकः किति' इति इटो निषेधः । स्वृत्वा । सूत्वा । धूत्वा ।

स्वरति—√स्वृ शब्दोपतापयोः । **सूति**—√षूङ् प्राणिगर्भविमोचने । **सूयति**—√षूङ् प्राणिप्रसवे । **√धूञ्** कम्पने । **विगाढा**—वि√गाह् + लुट् →तिप् ढत्वादिसन्धिकार्यम् ।

स्वरिष्यति—'ऋद्धनोः स्ये' इति विप्रतिषेधेन 'इट्' भवति । **निषेधः**—पूर्वविप्रतिषेधेनेति शेषः ।

रधादिभ्यश्च ॥४५॥

√रध हिंसासंराध्योः । रधादिभ्योऽष्टाभ्यो धातुभ्यः परस्य वलादेरार्धधातुकस्य वा इडागमो भवति । रद्धा / रधिता । नंष्टा / नशिता । त्रप्ता / तर्पिता । द्रप्ता / दर्पिता । द्रोग्धा / द्रोढा / द्रोहिता । मोग्धा / मोढा / मोहिता । स्नोग्धा / स्नोढा / स्नोहिता । स्नेग्धा / स्नेढा / स्नेहिता ।

अष्टाभ्यः—**√रध**—**√णश** (अदर्शने) **√तृप** (प्रीणने) **√दृप** (हर्षण-मोहनयोः) **√द्रुह** (जिघांसायाम्) **√मुह** (वैचित्ये) **√ष्णुह** (उद्गिरणे) **√ष्णिह** (प्रीतौ) इत्येतेभ्यः । तदाह—

रधिर्णशिस्तृपिदृपी द्रुहिर्मुहिः ष्णुहिष्णिही ।
रधादयोऽमी पठिता दिवादिष्वष्ट कृष्टिभिः ॥

नंष्टा—इडभावपक्षे 'मस्जिनशोर्झलि' इति 'नुम्' 'व्रश्च ......' सूत्रेण शकारस्य षकारः ष्टुत्वसन्धिश्च । **त्रप्ता**—√तृप + लुट् → ति । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति पक्षे अम् तृ + अ + प् + ता यण्सन्धिः । एवं **द्रप्ता** इत्यपि ।

द्रोग्धा, मोग्धा, स्नोग्धा, स्नेग्धा—इडभावपक्षे 'वा द्रुहमुहष्णुहष्णिहाम्' इति हकारस्य धकारः 'झषस्तथोर्धोऽधः' इति तकारस्य धकारः, पूर्वघकारस्य च जश्त्वेन गकारः । **द्रोढा** इत्यादि—ढत्वादिकार्यम् ।

निरः कुषः ॥४६॥

निरः उत्तरस्य कुषः परस्य वलादेरार्धधातुकस्य वा इडागमः । निष्कोष्टा / निष्कोषिता । निष्कोष्टुम् / निष्कोषितुम् । 'निस्' इति वक्तव्ये रेफ-निर्देशाद्रेफान्तो ज्ञायते । तेन निलयनम् इति 'उपसर्गस्यायतौ' इति लत्वम् । निसस्तु रुत्वस्यासिद्धत्वाल्लत्वं न स्यात् ।

निष्कोष्टा—निर् √कुष (निष्कर्षे) + तृच् । रकारस्य विसर्गः तस्य 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनेन षकारः, ष्टुत्वञ्च । **निलयनम्**– निर् √अय + ल्युट् ।

इण्निष्ठायाम् ॥४७॥

निरः कुषो निष्ठायाम् इडागमः । निष्कुषितः । इड्ग्रहणं नित्यार्थम् अत्रैव । परस्ताद्विकल्पः ।

नित्यार्थम्—अन्यथा प्रसक्तो विकल्प एव स्यात् । **परस्तात्**—उत्तरसूत्रेषु ।

तीषसहलुभरुषरिषः ॥४८॥

एभ्यो वा इट् तादावार्धधातुके । एष्टा / एषिता । √इषु इच्छायाम् इत्यस्य ग्रहणम् । √इष गतौ इत्यस्य प्रेषिता इदमेव । तदर्थमेव 'तीषु' इति उदितमिषुं पठन्ति । सोढा / सहिता । सोढुम् / सहितुम् । लोब्धा / लोभिता । रोष्टा / रोषिता । रेष्टा / रेषिता ।

एष्टा—√इषु + तृच् ष्टुत्वसन्धिः । ग्रहणम्–तथैवेष्टत्वात् । पठन्ति—केचिदाचार्याः स्पष्टार्थम् । सोढा—√षह (मर्षणे) + तृच् । ढत्वादि-सन्धिः । रेष्टा—√रिष (हिंसायाम्) + तृच् ।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥४९॥

इवन्तानम् √ऋधु आदीनाञ्च सनि वा इडागमो भवति । दिदेविषति / दिद्यूषति ।

√ऋध्—अर्दिधिषति / ईर्त्सति ।

√भ्रस्ज्—बिभ्रज्जिषति । बिभ्रक्षति / बिभर्ज्जिषति / बिभर्क्षति ।

√दम्भु—दिदम्भिषति / धिप्सति / धीप्सति ।

√श्रि—उच्छिश्रयिषति / उच्छिश्रीषति ।

√स्वृ—सिस्वरिषति / सुस्वूर्षति ।

√यु—यियविषति / युयूषति ।

√ऊर्णु—ऊर्णुनविषति / ऊर्णुनुविषति / ऊर्णुनूषति ।

√भर—बिभरिषति / बुभूर्षति ।

√ज्ञप्—जिज्ञपयिषति / ज्ञीप्सति ।

√सन—सिसनिषति / सिषासति ।

❀ (वा) तनिपतिदरिद्राणां वाच्यम् । √तन—तितनिषति / तितंसति / तितांसति ।

√पत—पिपतिषति / पित्सति ।

√दरिद्रा—दिदरिद्रिषति / दिदरिद्रासति ।

इवन्तानाम्—इव् अन्ते येषाम् √दिव √सिव इत्यादीनाम् । √भ्रस्ज् (पाके) इटः, अम्–आगमस्य च विकल्पेन चत्वारि रूपाणि । √दम्भु (दम्भे)

'दम्भ इच्च' इति इत्त्वमीत्त्वञ्चेति इडभावपक्षे रूपद्वयम्, इट्-पक्षे चैकमिति त्रीणि रूपाणि। √ऊर्णु (आच्छादने) इट्-पक्षे 'विभाषोर्णोः' इति कित्त्वपक्षे 'उवङ्' अन्यदा गुणः।

सिषासति—इडभावे 'जनसन.......' इत्यात्त्वम्।

तितांसति—इडभावे 'तनोतेर्विभाषा' इति पक्षे दीर्घत्वम्। अत्र प्रयोगाणां सिद्धिप्रकारः लक्ष्यग्रन्थेष्वन्वेष्टव्यः।

क्लिशः क्त्वानिष्ठयोः ॥५०॥

क्लिशः क्त्वानिष्ठयोः इडागमो वा भवति। क्लिष्ट्वा / क्लिशित्वा। क्लिष्टः। क्लिष्टवान्।

क्लिशित्वा–'रलो व्युपधात् ....' इति कित्त्वाद् गुणाभावः। **क्लिष्टः** पक्षे क्लिशितः। एवं **क्लिशितवान्** इत्यपि।

पूङश्च ॥५१॥

पूङश्च क्त्वानिष्ठयोः वा इट्। पूत्वा / पवित्वा। पूतः / पवितः।

पवित्वा, पवितः—'पूङः क्त्वा च' इति कित्त्वप्रतिषेधाद्गुणः।

वसतिक्षुधोरिट् ॥५२॥

अनयोरिडागमो भवति क्त्वानिष्ठयोः। उषित्वा। उषितः। क्षुधित्वा / क्षोधित्वा। क्षुधितः। 'रलो व्युपधात्.........' इति वा कित्त्वम्।

उषित्वा √वस् (निवासे)+क्त्वा 'मृडमृद..........' इत्यनेन कित्त्वान्न गुणः, 'वचिस्वपि ......' इत्यनेन सम्प्रसारणम्। **क्षोधित्वा**—√क्षुध् (बुभुक्षायाम्)+क्त्वा कित्त्वाभावपक्षे उपधायामुकारस्य गुणः।

अञ्चेः पूजायाम् ॥५३॥

पूजार्थस्याञ्चतेः क्त्वानिष्ठयोरिडागमो भवति। अञ्चित्वा जानु जुहोति। अञ्चिता अस्य गुरवः।

अञ्चिताः = पूजिताः √अञ्च + क्त 'मतिबुद्धिपूजार्थेभ्यश्च' इत्यनेन । अञ्चित्वा = नमयित्वा 'आकुञ्च्य' इत्यर्थः । जानु जुहोति इत्युल्लेखः पूजाऽर्थ-प्रकाशनाय ।

लुभो विमोहने ॥५४॥

लुभेर्विमोहनार्थे क्त्वानिष्ठयोः इडागमो भवति । लुभित्वा / लोभित्वा । लोभितः केशपाशः । विलुभितः सीमन्तः । विमोहन-माकुलीकरणम् । नेह—लुब्धो वृषः । लुब्ध्वा / लुभित्वा / लोभित्वा । गार्ध्ये यथाप्राप्तमेव ।

लोभितः = आकुलीकृतः विलुलित इत्यर्थः । 'रलो व्युपधात् ' इति कित्त्वविकल्पे पक्षे गुणः । **गार्ध्ये** = लोभे ।

जॄव्रश्च्योः क्त्वि ॥५५॥

एतयोः क्त्वा प्रत्यये इडागमो भवति । जरित्वा / जरीत्वा । व्रश्चित्वा । √जॄ धातोः 'श्र्युकः किति' इति प्रतिषेधः प्राप्तः । व्रश्चेरुदित्वाद्विकल्पः प्राप्तः ।

जरीत्वा—'वॄतो वा' इति पक्षे दीर्घः । √जॄष् (वयोहानौ) इत्य-स्यात्र न ग्रहणम् सानुबन्धकत्वात् जीर्त्वा । **व्रश्चित्वा**–'न क्त्वा सेट्' इति कित्त्वस्य निषेधादत्र 'व्रश्च……' इत्यनेन न सम्प्रसारणम् ।

उदितो वा ॥५६॥

उदितो धातोः क्त्वा प्रत्यये वा इडागमो भवति । √शमु—शमित्वा / शान्त्वा । √तमु—तमित्वा / तान्त्वा ।

शान्त्वा, तान्त्वा—इडभावपक्षे 'अनुनासिकस्य क्विझलोः क्ङिति, इति दीर्घः ।

सेऽसिचि कृतचृतच्छृदतृदनृतः ॥५७॥

एभ्यः परस्मिन् सकारादौ सिज्-विरहिते आर्धधातुके वा इडागमः । कर्त्स्यति / कर्तिष्यति । चिकृत्सति इत्यादि ।

असिचि इति किम् ? अनर्तीत् ।

कर्त्स्यति – √कृती (छेदने) + लृट् → ति उपधागुणः । **चिकृत्सति**– √कृत् + सन् 'हलन्ताच्च' इति कित्त्वान्न गुणः । **इत्यादि**–एवं √चृती (हिंसासंग्रन्थयोः) **चर्त्स्यति / चर्तिष्यति** । √उछृदिर् (दीप्तिदेवनयोः)– **छर्त्स्यति / छर्दिष्यति** । √तृदिर् (हिंसाऽनादरयोः)–**तर्त्स्यति / तर्दिष्यति** । √नृती (गात्रविक्षेपे)–**नर्त्स्यति / नर्तिष्यति** । एवं सर्वेभ्यः लृङ्लकारेऽपि **अकर्त्स्यत् / अकर्तिष्यत्** इत्यादि प्रयोगाः ज्ञेयाः ।

गमेरिट् परस्मैपदेषु ॥५८॥

गमेरुत्तरस्य सकारादेरार्धधातुकस्य परस्मैपदेष्विडागमो भवति । गमिष्यति । अगमिष्यत् । जिगमिषति ।

परस्मैपदेष्विति किम् ? संगंसीष्ट ।

❀ (वा०) आत्मनेपदेन समानपदस्थस्य गमेरिडागमो नेष्यते । अन्यत्र सर्वत्रैवेष्यते । कृत्यपि भवति । परस्मैपदे लुकि च । सञ्जिगमिषिता व्याकरणस्य । अधिजिगमिषिता ।

संगंसीष्ट—सम् √गम् + आशिषि लिङ् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम् । **समानपदस्थस्य**–एकपदस्थस्य । **सञ्जिगमिषिता**–सम् √गम् + सन् + तृच् । **परस्मैपदे लुकि**–अस्योदाहरणम् **जिगमिष त्वम्** । अत्र लोट्-लकारस्य परस्मैपदादेशस्य सिपो लुक् ।

न वृद्भ्यश्चतुर्भ्यः ॥५९॥

वृतादिभ्यश्चतुर्भ्यः उत्तरस्य सकारादेरार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । वर्त्स्यति । अवर्त्स्यत् । एवं √वृध । √शृध–शर्त्स्यति । √स्यन्द–स्यन्त्स्यति । अस्यन्त्स्यत् । सिस्यन्त्सति । परस्मैपदेष्वित्येव ।

एवं √वृध्—लृटि, लृङि च स्ये परतः उभयोर्धात्वोः समाने रूपे भवतः । सनि च **विवृत्सति** । √वृत आदयः चत्वारो धातवः । तदाह—

वृतिर्वृधिः शृधिः स्यन्दिश्चत्वारोऽमी वृतादयः । परस्मैपदेष्विति— **आत्मनेपदेषु तु 'इट्' भवत्येव—वर्तिष्यते ।**

तासि च क्लृपः ॥६०॥

क्लृपेरुत्तरस्य तासेः सादावार्धधातुके च परस्मैपदेषु इडागमो न भवति । श्वः कल्प्ता । कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति ।

सूत्रे **तासि**—'स्यतासी लृलुटोः' इत्यनेन लुटि 'तास्' आगमो भवति । **कल्प्ता**–√कृपू (सामर्थ्ये) इत्यस्य लुटि, पराणि क्रमशो लृटि, लृङि, सनि च रूपाणि । 'लुटि च क्लृपः' इति विकल्पेन परस्मैपदम् । 'कृपो रो लः' इति रकारस्य लकारः ।

आत्मनेपदे तु **कल्पितासे, कल्पिष्यते** इत्यादि ।

अचस्तास्वत्थल्यनिटो नित्यम् ॥६१॥

अजन्तो यो धातुस्तासौ नित्यानिट्, ततः परस्य थलो नेट् । याता–ययाथ । चेता–चिचेथ ।

ययाथ, चिचेथ—इति √या, √चि इत्येताभ्यां लिटि, तस्यादेशस्य सिपो थलि इडभावस्योदाहरणे । **याता, चेता**–इति प्रयोगौ तासि (लुटि) नित्यानिट्त्वज्ञापनार्थम् ।

उपदेशेऽत्वतः ॥६२॥

उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थलो नेट् । पक्ता–पपक्थ ।

अत्वतः =अकारवतो धातोः **नित्यानिटः**–नित्यम् अनिट् यो धातुस्तस्मात् । **पपक्थ**–थलि उदाहरणम् ।

ऋतो भारद्वाजस्य ॥६३॥

तासौ नित्यानिट ऋदन्तस्यैव थलि नेट् भारद्वाजस्य मतेन । सस्मर्थ । बभर्थ । तेन पक्षे अजन्तानां तासावनिटाम् उपदेशे अकारवताम् च इट्–ययिथ । पेचिथ ।

भारद्वाजस्य—तन्नामकस्य आचार्यस्य । **तेन पक्षे**–इदं सूत्रं नियमार्थ-

मिति कृत्वा । **ययिथ**—√या + लिट्→सिप्→थल् । **पेचिथ**—√पच् + लिट्→सिप्→थल् ।

बभूथाततन्थजगृम्भववर्थेति निगमे ॥६४॥

निगमे एते निपात्यन्ते । बभूथ । आततन्थ । जगृम्भ । ववर्थ । क्रादिसूत्रादेवास्य प्रतिषेधे सिद्धे नियमार्थं वचनम्—निगमे एव न भाषायाम् ।

बभूथ—त्वं हि होता प्रथमो बभूथ । **आततन्थ**-येनान्तरिक्षमुर्वाततन्थ । **जगृम्भ**—जगृम्भा ते दक्षिणमिन्द्र हस्तम् ।

ववर्थ—ववर्थ त्वं हि ज्योतिषा इति वैदिकान्युदाहरणानि । भाषायां तु क्रमशः **बभूविथ** । **आतेनिथ** । **जगृहिम** । **ववरिथ** इति इट्सहिताः प्रयोगाः ज्ञेयाः ।

क्रादिसूत्रात् ......—'कृसृभृवृद्रुस्रुश्रुवो लिटि' इति सूत्रात् । तत्र '√वृ' इत्यस्य पाठादेव निषेधः सिद्ध इति भावः ।

विभाषा सृजिदृशोः ॥६५॥

'थलि' इति वर्तते । सृजि—दृशि इत्येतयोर्विभाषा इडागमो न भवति । सस्रष्ठ / ससर्जिथ । दद्रष्ठ / ददर्शिथ । श्रीत्रिपाठिरामकृष्णचरणयुगलशारदारविन्दमकरन्दमधुपोऽहम् ।

सस्रष्ठ—√सृज् + लिट्→सिप्→थल् । इडभावे 'व्रश्चभ्रस्जसृज......' इत्यनेनान्त्यस्य षकारः, ष्टुत्वञ्च, 'सृजिदृशोर्झल्यमकिति' इत्यनेन अम् आगमः ऋकारस्य यण् । एवं **दद्रष्ठ** इत्यपि ।

इडत्त्यर्तिव्ययतीनाम् ॥६६॥

अद्—ऋ—व्येञ् इत्येतेभ्यस्थलो नित्यमिट् स्यात् । आदिथ । आरिथ । विव्ययिथ ।

अत्ति-व्ययत्योः 'ऋतो भारद्वाजस्य' इति नियमाद्विकल्पः प्राप्तः, अर्त्तेश्च प्रतिषेधः प्राप्तः ।

आदिथ, आरिथ, विव्ययिथ –क्रमशः √अद् (भक्षणे), √ऋ (गतौ) तथा √व्येञ् (संवरणे) इति धातुभ्यः लिटि (थलि) रूपाणि।

वस्वेकाजाद्घसाम् ॥६७॥

कृतद्विर्वचनानाम् एकाचाम्, आकारान्तां धातूनां घसेश्च वसौ इडागमो भवति। आदिवान्। आशिवान्। धात्वभ्यासयोरेकादेशे, एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एते एकाचो भवन्ति। आत्–पपिवान्। √घस्–जक्षिवान्।

सिद्धे सत्यारम्भो नियमार्थः। एषामेव वसौ इट्। नेह–बिभिद्वान्। बभूवान्। शिश्रिवान्। क्रादिनियमात् प्राप्तो नियम्यते।

सूत्रे **वसु** इति अविभक्तिकं पदम्। 'लिटः' क्वसुश्च' इति लिट्स्थानिकस्य 'क्वसु' इत्यस्यात्र ग्रहणम्।

आदिवान्—√अद् + लिट् → क्वसु। **पपिवान्**—√पा + लिट् → क्वसु। वृत्तौ **यथिवान्** (√या) इत्युदाहृतम्।

आत्—अनेकाचां धातूनां क्वसौ इट्-सिद्ध्यर्थम्।

जक्षिवान्—√अद् + लिट् → क्वसु √अद् इत्यस्य 'घस्लृ' आदेशः। 'गमहन ....' इत्युपधा-अकारलोपे, परस्य घकारस्य 'खरि च' इति चर्त्वेन ककारः, सकारस्य षकारे चोभयोः 'क्ष्' इति।

विभाषा गमहनविदविशाम् ॥६८॥

एषां धातूनां वसोरिडागमो वा भवति। जग्मिवान् / जगन्वान्। जघ्निवान् / जघन्वान्। विविदिवान् / विविद्वान्। विविशिवान् / विविश्वान्।

❀ (वा) दृशेश्चेति वक्तव्यम्। ददृशिवान् / ददृश्वान्।

जग्मिवान्—√गम् + लिट् → क्वसु इति कृते 'गमहन......' इत्युपधालोपः। **जगन्वान्**—इडभावे 'मो नो धातोः' इति मकारस्य नकारः। **जघन्वान्**–√हन् + लिट् → क्वसु अभ्यासाच्च' इति हकारस्य कुत्वेन घकारः।

सनिंससनिवांसम् ॥६९॥

सनिंससनिवांसम् इति निपात्यते। सनिंपूर्वस्य (द्वितीयान्तस्य) सनोतेर्वंसौ एत्वाभ्यासलोपाभावाश्च निपातनात्। अग्निं-त्वाग्ने सनिंससनिवांसम्। सेनिवांसम् इति प्राप्तम्।

सनिंससनिवांसम्—सनिं √षणु (दाने)+लिट्→क्वसु। वेदे एषा एवानुपूर्वी नियता तेन तत्रैव भवति। **सेनिवांसम्**—भाषायाम् एत्वाभ्यासलोपौ भवतः।

ऋद्धनोः स्ये ॥७०॥

ऋतो हन्तेश्च स्ये नित्यम् इट्। करिष्यति। हरिष्यति। हनिष्यति।

करिष्यति—√कृञ्+लृट्→ति। 'स्यतासी लृलुटोः' इति लृटि 'स्य' आगमः 'स्वरतिसूति……' इति विकल्पं बाधित्वा पूर्वविप्रतिषेधेन नित्यमिट् **स्वरिष्यति**।

अञ्जेः सिचि ॥७१॥

अञ्जेः सिचि इट्। आञ्जीत्। आञ्जिष्टाम्। आञ्जिषुः। ऊदित्वाद् विभाषा प्राप्तः।

आञ्जीत्—√अञ्जू (व्यक्तिम्रक्षणकान्तिगतिषु) व्यक्तिः=विवेचनम्। म्रक्षणम्=स्निग्धता+लुङ्→तिप् च्लि→सिच्। 'अस्ति सिचोऽपृक्ते' इति ईट्। एवम् **आञ्जिष्टाम्**—लुङ्→तस्→ताम्। **आञ्जिषुः**—झि→जुस्।

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥७२॥

एभ्यः परस्मैपदपरे सिचि इडागमो भवति। अस्तावीत्। अस्ताविष्टाम्। असावीत्। अधावीत्।

परस्मैपदेष्विति किम्? अस्तोष्ट। असोष्ट। अधोष्ट/अधविष्ट।

√ष्टुञ् (स्तुतौ), √षुञ् (अभिषवे), धूञ (कम्पने) इति त्रयोऽप्युभयपदिनो धातवः। तेन पक्षे आत्मनेपदे इट् न भवति अस्तोष्ट इत्यादि। **अधविष्ट** – 'स्वरतिसूति ...' इत्यनेन विभाषा इट्।

यमरमनमातां सक्च ॥७३॥

यमादेरादन्तानां च सक्–आगमो भवति परस्मैपदपरे सिचि इडागमश्च। √यम–अयंसीत्। अयंसिष्टाम्। √रम–व्यरंसीत्। व्यरंसिष्टाम्। √नम–√अनंसीत्। अनंसिष्टाम्। आकारान्तानाम्-- √या--अयासीत्। अयासिष्टाम्। √यम-आदीनां हलन्तलक्षणा वृद्धिः प्राप्ता सा 'नेटि' इति निषिध्यते।

व्यरंसीत्—वि √रम्+लुङ्→तिप् सक् इट्। अत्र 'व्याङ्परिभ्यो रमः' इति √रम धातोः परस्मैपदत्वं भवति।

√यम् आदीनां ... निषिध्यते—एवम् द्विवचने **अयंसिष्टाम्** इत्यादिषु सक्-इटोः श्रवणं भवति। एकवचनेऽपि इटि कृते 'नेति' इति प्रतिषेधः सिद्ध्यतीति भावः।

स्मिपूङ्रञ्ज्वशां सनि ॥७४॥

एषां सनि इडागमो भवति। स्मिङ्–सिस्मयिषते। √पूङ्-- पिपविषते। √ऋ–अरिरिषति। √अञ्जू--अञ्जिजिषति। √अशू--अशिशिषते। अशेरूदितस्य ग्रहणम्। अश्नोतेस्तु नित्यम् इट् अस्त्येव अशिशिषति।

अशिशिषते—√अशू (व्याप्तौ)+सन्+लट्→त।

अशिशिषति—√अश (भोजने) अत्रोदात्तत्वादेव 'इट्' सिद्धः।

किरश्च पञ्चभ्यः ॥७५॥

किरादिभ्यः सनि इडागमो भवति। √कॄ–चिकरिषति। √गॄ–जिगरिषति। √दृङ्–दिदरिषते √धृङ्–दिधरिषते। √प्रच्छ– पिप्रच्छिषति।

किरति-गिरत्योः 'इट् सनि वा' इति विकल्पः प्राप्तः । 'वृतो वा' इति चास्य दीर्घत्वं नेच्छन्ति ।

पिपृच्छिषति—'रुदविद.......' इति किस्वम्, ग्रहिज्या......' इति सम्प्रसारणम् । दीर्घत्वं नेच्छन्ति-'वृतो वा' इति सूत्रे व्यवस्थितविभाषया तथैव व्याख्यानात् ।

रुदादिभ्यः सार्वधातुके ॥७६॥

रुद-आदिभ्यः पञ्चभ्यः परस्य वलादेः सार्घधातुकस्य इडागमो भवति । रोदिति । रुदितः । रोदिषि इत्यादि । स्वपिति । श्वसिति । प्राणिति । जक्षिति ।

रुदादिभ्यः—√रुदिर् (अश्रुविमोचने) √ञिष्वप् (शयने) √श्वस् (प्राणने) √अन च, √जक्ष (भक्षणे) एते धातवः अदादिगणे पठ्यन्ते । क्रमशः उदाहरणानि बोध्यानि ।

ईशः से ॥७७॥

ईश उत्तरस्य 'से' इत्यस्य सार्वधातुकस्य इडागमो भवति । ईशिसे । ईशिष्व ।

ईशिसे—√ईश (ऐश्वर्ये) + लट्→थास्→से ।

ईशिष्व—लोट्→शास→से 'सवाभ्यां वामौ' इत्येकारस्य 'व' आदेशे कृतेऽपि 'एकदेशविकृतमनन्यवत्' इति परिभाषया इडागमः ।

ईडजनोर्ध्वे च ॥७८॥

√ईड--√जन इत्याभ्याम् उत्तरस्य ध्वे, से इत्येतस्य च सार्वधातुकस्य इडागमो भवति । ईडिध्वे । ईडिध्वम् । ईडिषे । ईडिष्व । जनिध्वे । जनिध्वम् । जनिषे । जनिष्व ।

❀ (वा०) ईशेरपि ध्वे परे इट् इष्यते । ईशिध्वे । ईशिध्वम् ।

ईशीडिजनां सेध्वयोः इत्येकमेव सूत्रं न कृतम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेः ।

'ध्वे' इत्येकदेशविकृतस्यानन्यत्वात् लोटि भवति । लिङि तु न कृतटेरेत्वस्य ग्रहणात् ।

√ईड (स्तुतौ) √जनी (प्रादुर्भावे) इति धातुभ्याम् । **ईडिध्वे** इत्यादि-लट् तथा लोट्—क्रमशः ध्वम्, थास् इति विभक्त्योः चत्वारि रूपाणि भवन्ति । **जनिषे**–अत्र 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति नियमात् श्यनो लुक्, उपधालोपस्याभावश्च भवति ।

√जन (जनने) इत्यस्यापि ग्रहणमत्रेष्यते । **व्यतिजज्ञिषे** इत्यादि कर्मव्यतिहारे उदाहरणानि ज्ञेयानि ।

विचित्रा—लाघवेऽपि न तथाकृतमिति वैचित्र्यमेत्र । सूत्रे 'ध्वे' इति पदम् 'ध्वम्' इत्यस्य टेः 'अम्' इत्यस्य एकारे कृते सति रूपं पठितम् । लङि तु न टेः एत्वं भवतीति न तत्र इट् ।

लिङः सलोपोऽनन्त्यस्य ॥७९॥

सार्वधातुक लिङोऽनन्त्यस्य सस्य लोपः । स च यासुट्-सीयुट्-सुटां सम्बन्धो । कुर्यात् । कुर्वीत ।

सार्वधातुकलिङः—सार्वधातुकेषु यो लिङ् तस्य ।

कुर्यात्—√कृ + विधिलिङ्→तिप् । यासुट्-सुट् आगमौ भवतः, उभयो-रपि सकारस्य लोपो भवति ।

कुर्वीत—√कृ + विधिलिङ्→त सीयुटः सकारस्य लोपः ।

अतो येयः ॥८०॥

अकारान्तादङ्गादुत्तरस्य 'या' इत्यस्य सार्वधातुकस्य 'इय्' स्यात् । पचेत् । पचेताम् । पचेयुः । 'उस्यपदान्तात्' अस्मात् परत्वात् 'इय्' आदेशः ।

पचेत्—√पच् + विधि लिङ्→तिप्→त् । शप्-यासुट्–आगमौ 'पच या त्' इति दशायाम् 'या' इत्यस्य इय् गुणो यलोपश्च । **पचेयुः**–अत्र 'इय्' इत्यस्य यकारस्य श्रवणं भवति । अत्र पररूपं बाधित्वा 'इय्' भवति ।

आतो ङितः ॥८१॥

आतोऽङ्गादुत्तरस्य ङिदवयवस्य आकारस्य 'इय्' इत्ययमादेशो भवति । पचेते । पचेथे । पचेताम् । पचेथाम् ।

पचेते—√पच् + लट् → आताम् 'सार्वधातुकमपित्' इति तस्य ङित्त्वम् । शप् आगमः । आकारस्य 'इय्' आदेशे कृते पच+इय् ते 'लोपो व्योर्वलि' इति यकारस्य लोपः । **पचेथे** । √पच् + लट्→आथाम् । **पचेताम्, पचेथाम्**—लोटि भवतः ।

आने मुक् ॥८२॥

आने परेऽङ्गस्यातो नुम्-आगमो भवति । पचमानः । यजमानः ।

पचमानः—√पच्+लट्→शानच् । 'मुक्' आने परतः धातोरन्ते । **यजमानः**—√यज्+लट्→शानच् ।

ईदासः ॥८३॥

आस उत्तरस्य आनस्य ईकारादेशो भवति । आसीनो यजते ।

'आने इति' अनुवृत्तं पदं षष्ठयन्तं प्रकल्प्यते । तेन आसः उत्तरस्य इत्यर्थः । 'तस्मादित्युत्तरस्य', इत्यस्य बलेन 'उत्तरस्य' इत्यर्थो लभ्यते । 'आदेः परस्य इत्यनेन आकारस्य ईकारः ।

अष्टन आ विभक्तौ ॥८४॥

अष्टनो विभक्तौ परत आकारादेशो भवति । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु ।

'अष्टनो दीर्घात्' इति ज्ञापकाद् वा । अष्टभिः । तदन्तविधिरत्र । प्रियाष्टा । प्रियाष्टानः इति यथा ।

सूत्रे 'आ' शुद्धस्य निरनुनासिकस्य आकारस्य व्यक्तिरूपस्य निर्देशः, अन्यथा नकारस्य स्थाने क्रियमाण आकारः अनुनासिक एव स्यात् ।

वा-विकल्पः । **तदन्तविधिः**-तेन अष्टन् शब्दान्तस्यापि भवति । **प्रियाष्टा**-अष्टौ (पुरुषाः) यस्य सः प्रियाष्टन् अत्रापि भवति ।

रायो हलि ॥८५॥

'रै' इत्यस्य हलादौ विभक्तौ आकारादेशः । राः । राभ्याम् । राभिः । 'मृजेर्वृद्धिः' इत्यतः प्राग् विभक्त्यधिकारः ।

राः—रै=धनम्+सु, तस्य रुत्वविसर्गौ ।

युष्मदस्मदोरनादेशे ॥८६॥

अनयोरनादेशे विभक्तौ परत आकारादेशः । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु ।

सूत्रे **अनादेशे**—विभक्तेः आदेशे असति । **अनादिष्टायाम्** इति क्वचिद् वृत्तौ पाठः सुस्पष्टं करोतीदं तात्पर्यम् । तेनात्र न-**युष्मत् अस्मत्** । अत्र 'पञ्चम्या अत्' इत्यनेन 'भ्यस्' इत्यस्य 'अत्' आदेशः । **युष्माभिः**-युष्मद् +भिस् । दकारस्य आकार आदेशः, उभयोर्दीर्घश्च । एवम् **अस्माभिः**-अस्मद्+भिस् ।

द्वितीयायां च ॥८७॥

द्वितीयायां च विभक्तौ अनयोराकारादेशः । त्वाम् । माम् । युवाम् । आवाम् । युष्मान् । अस्मान् ।

त्वाम्—युष्मद्+अम् । 'त्वमावेकवचने' इति युष्मदो 'म' पर्यन्तस्य 'त्व' आदेशः । एवम् **माम्**-अस्मद्+अम् । अत्र अस्मदः मपर्यन्तस्य 'म' आदेशः । **युवाम्, आवाम्**—'युवावौ द्विवचने' इत्यनेन युष्मद, अस्मद्+औट् इति स्थितौ क्रमशः तयोः 'युव, आव' आदेशौ ज्ञेयौ ।

प्रथमायाश्च द्विवचने भाषायाम् ॥८८॥

प्रथमायाश्च द्विवचने परे भाषायाम् अनयोः आकारादेशः । युवाम् । आवाम् । छन्दसि तु युवं वस्त्राणि पवीसा वंसाघे ।

युवाम्, आवाम्—युष्मद्, अस्मद्+औ ।

योऽचि ॥८९॥

अजादौ विभक्तावनादेशे युष्मदस्मदोर्यकारादेशो भवति । त्वया । मया । त्वयि । मयि । युवयोः । आवयोः । 'युष्मदस्मदोरनादेशे' इत्यत्र यदि 'हलि' इत्यनुवर्त्तते शक्यमकर्तुम् 'अचि' इत्येतत् ।

त्वया, मया—युष्मद्, अस्मद्+टा (ट्-लोपः) मपर्यन्तयोः युष्मदस्मदोः त्व–म इत्यादेशौ शेषस्य 'अद्' इत्यस्य 'य' आदेशः । **युष्म**… … **इत्येतत्**—'हलि' इत्यनुवृत्ते विशेषेण विधानात् हलादौ विभक्तौ आकार आदेशः परिशेषादजादावेव यकारादेशो भविष्यति इति तदर्थम् 'अचि' न कर्तुं शक्यम्, तथापि विस्पष्टार्थं तत्कृतम् ।

शेषे लोपः ॥९०॥

शेषे विभक्तौ परतो युष्मदस्मदोर्लोपो भवति ।

कश्च शेषः ? यत्राकारो यकारश्च नोक्तः ।

पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि ।
यान्यद्विवचनान्यत्र शेषे लोपो विधीयते ॥

त्वम् । अहम् । यूयम् । वयम् इत्यादि ।

शेषे लोपे स्त्रियां 'टाप्' कथं न—अहं ब्राह्मणी । 'सन्निपातलक्षण' परिभाषया न । अलिङ्गे वा युष्मदस्मदी ।

केचित्तु शेषे लोपं टिलोपम् इच्छन्ति । कथम् ? वक्ष्यमाणादेशापेक्षः शेषः । ते चादेशाः 'म' पर्यन्तस्य । तेन मपर्यन्तादन्यः शेषः, तत्रायं लोपः ।

यान्यद्वितीयवचनानि—यानि एकवचन-बहुवचनानि । **त्वम्, अहम्**—युष्मद-स्मदोर्मपर्यन्तस्य 'त्व-'अह' आदेशौ शेषस्य दकारस्य लोपः 'अतो गुणे' इति पररूपम्, 'सु' विभक्तेः 'अम्' आदेशे 'अमि पूर्वः' इति पूर्वरूपम् । **इत्यादि**—तुभ्यम् । मह्यम् । युष्मभ्यम् । अस्मभ्यम् । त्वत् । मत् । युष्मत् । अस्मत् । तव । मम । युष्माकम् । अस्माकम् इत्युदाहरणान्तराणि ।

'सन्निपातलक्षण'—'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येषा

परिभाषा विभक्तेः सन्निपातेन = निमित्तभूत-सम्बन्धेन कृते शेषे लोपे अदन्तत्वं भवति तद् टापि कृते विभक्तेर्लोपरूप विघातस्य निमित्तं न भविष्यति । **अलिङ्गे**—लिङ्गविशेषरहिते । तेन स्त्रीत्वस्य विवक्षैव नास्ति ।

मपर्यन्तस्य ॥९१॥

यदित ऊर्ध्वमनुक्रमिष्यामो 'म' पर्यन्तस्येत्येवं तद्वेदितव्यम् । वक्ष्यति—युवावौ इत्यादि ।

अधिकारसूत्रमिदम् **इत्यादि**—'युवावौ द्विवचने' इति सूत्रम् युष्मद-अस्मदोः 'म' पर्यन्तभागस्य 'युव-आव' इत्येतावादेशौ विदधाति ।

मपर्यन्तस्य किम् ? साकच्कस्य मा भूत् । युवकाम् । आवकाम् ।

युवावौ द्विवचने ॥९२॥

'द्विवचने' इत्यर्थग्रहणम् । द्व्यर्थवाचिनोरनयोर्मपर्यन्तस्य युवावौ भवतः । युवाम् । आवाम् इत्यादि । यदा समासे द्व्यर्थे युष्मदस्मदी भवतः समासार्थस्य अन्यसंख्यात्वादेकवचनं बहुवचनं वा तदा द्व्यर्थयोः युवावौ स्तः एव । यदि 'त्वाहौ सौ' इत्येवमादिना आदेशान्तरेण न बाध्यते । अतिक्रान्तं युवाम् अतियुवाम् । अतिक्रान्तान् युवाम् अतियुवान् । अतिक्रान्तेन युवाम् अतियुवया इत्यादि ।

त्वाहादीनां तु विषये परत्वात् ते एव भवन्ति । अतिक्रान्तः, अतिक्रान्ताय, अतिक्रान्तस्य वा युवाम् अतित्वम् । अतियूयम् । अतितुभ्यम् । अतितव इत्यादि ।

यदा त्वेते एकत्वबहुत्वयोः, समासार्थस्तु द्वित्वे स्यात् तदा युवावौ न भवतः । अतिक्रान्तौ त्वाम् अतित्वाम् । अतिक्रान्तौ युष्मान् अतियुष्मान् इत्याद्युन्नेयम् ।

अर्थग्रहणम्—द्विवचने ये युष्मदस्मदी इत्यर्थः । **युवावौ**—युव-आव इति । **युवाम्, आवाम्**—क्रमशः युष्मदः 'युव' अस्मदः 'आव' भवति । **अतियुवाम्**—एवम् अतिक्रान्तम् आवाम् **अत्यावाम्** इत्यादि अस्मदः उदाहरणानि सर्वत्र बोध्यानि ।

यूयवयौ जसि ॥९३॥

अनयोर्मपर्यन्तस्य यूयवयौ स्तो जसि । यूयम् । वयम् । तदन्तविधिरत्र । परमयूयम् । अतिवयम् ।

परमयूयम्—अत्र युष्मदः परे 'जस्' विद्यते एव । 'अङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया अत्रापि तदन्तविधेराश्रयणात् मपर्यन्तस्य 'युष्मद्' इत्यस्य 'यूय' आदेशो भवत्येव । एवम् **परमवयम्** । **अतियूयम्** । **अतिवयम्** इति प्रयोगाः ।

त्वाहौ सौ ॥९४॥

अनयोर्मपर्यन्तस्य त्व—अह एतौ भवतः सौ परतः । त्वम् । अहम् । परमत्वम् । अत्यहम् ।

त्वम्, अहम्—अत्र मपर्यन्तयोर्युष्मदस्मदोः त्व, अह इत्यादेशे शेषे लोपे सोः 'अमि पूर्वः' इति पूर्वरूपम् । **परमत्वम्, अत्यहम्**—अत्रापि तदन्तविधिरस्त्येव । एवम् **अतित्वम्** । **अत्यहम्** इत्यपि ।

तुभ्यमह्यौ ङयि ॥९५॥

अनयोर्मपर्यन्तस्य तुभ्य-मह्यौ भवतो 'ङे' विभक्तौ । तुभ्यम् । मह्यम् । परमतुभ्यम् । अतिमह्यम् ।

सूत्रे ङयि—'ङे' इति चतुर्थ्येकवचनविभक्तौ ।

तवममौ ङसि ॥९६॥

अनयोर्मपर्यन्तस्य तव-ममौ भवतः ङसि परतः । तव । मम । परमतव । अतिमम ।

ङसि—'ङस्' इति षष्ठ्येकवचनविभक्तिः तस्मिन् ।

त्वमावेकवचने ॥९७॥

'एकवचन' इत्यर्थनिर्देशः । एकवचने ये युष्मदस्मदी एकार्थाभिधानविषये, तयोर्मपर्यन्तस्य स्थाने त्व-म एतावादेशौ

भवतः । त्वाम् । माम् । त्वया । मया । त्वत् । मत् । त्वयि । मयि ।

यदा एतौ समासे एकार्थे भवतः, समासार्थस्य त्वन्यसंख्यत्वात् द्विवचनम्, बहुवचनं वा भवति तदापि त्व-मौ भवतः । आदेशान्तराणां तु त्व-अह इत्यादीनां विषये पूर्वविप्रतिषेधेन ते एवेष्यन्ते । अतिक्रान्तस्त्वाम् अतित्वम् । अत्यहम् । अतित्वाम् । अमिमाम् । अतियूयम् । अतितुभ्यम् एवमाद्युदाहार्यम् ।

अर्थनिर्देशः—एवम् अर्थस्येदं ग्रहणम् न तु पारिभाषिकस्यैकवचनस्य । तेनेमे प्रयोगाः सिद्ध्यन्ति—अतिक्रान्तौ त्वाम् माम् इति **अतित्वाम् / अतिमाम्** । अतिक्रान्तान् त्वाम् / माम् इति **अतित्वान् / अतिमान्** । एवम् **अतित्वाभ्याम् अतिमाभ्याम्** इत्यादि । **अतियूयम्, अतिवयम्**—अत्र यूय-वयौ भवतः ।

प्रत्ययोत्तरपदयोश्च ॥९८॥

एकवचनेऽनयोर्मपर्यन्तस्य त्व-मौ भवतः प्रत्यये उत्तरपदे च । त्वदीयः । मदीयः । त्वत्तरः । त्वद्यति । त्वत्पुत्रः । मत्पुत्रः ।

एकवचने इति किम् ? युष्माकम् अयं युष्मदीयः ।

त्वदीयः—तव अयम् इति युष्मद् + छ→ईय । **मदीयः**–अस्मद् + छ →ईय । **त्वत्तरः**–अतिशयेन त्वम् इति युष्मद् + तरप् । एवं **मत्तरः** । **त्वद्यति**–त्वाम् इच्छति युष्मद् + क्यच् + लट्→तिप् । एवं माम् इच्छति **मद्यति** । उत्तरपदपरत्वस्योदाहरणम्-**त्वत्पुत्रः**–तव पुत्रः । **मत्पुत्रः**–मम पुत्रः उभयत्र षष्ठीतत्पुरुषः ।

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥९९॥

स्त्रियां वर्त्तमानयोः एतयोर्यथासंख्यं तिसृ-चतसृ एतावादेशौ भवतः विभक्तौ परतः । तिस्रः । चतस्रः । तिसृभिः । चतसृभिः ।

स्त्रियां किम् ? त्रयः । चत्वारः । त्रीणि । चत्वारि ।

'स्त्रियाम्' इत्येतत् त्रि-चतुरोर्विशेषणं नाङ्गस्य । तेन यदा

एतौ स्त्रियाम् अङ्गं च लिङ्गान्तरे तदाप्यादेशौ भवतः । प्रियाः तिस्रः अस्य मैत्रस्य प्रियतिसा मैत्रः । प्रियाः तिस्रः अस्य कुलस्य प्रियतिसृ कुलम् । प्रियचतसा । प्रियचतसृ । 'नदृतश्च' इति कप् न, विभक्त्याश्रयत्वात् तिसृभावस्य ।

यदा एतौ लिङ्गान्तरे स्त्रियामङ्गम् तदा आदेशौ न भवतः प्रियाः त्रयः त्रीणि वा यस्याः प्रियत्रिः ।

नाङ्गस्य—यस्मात् प्रत्ययो भवति तदङ्गम्, तस्य न । **प्रियतिसा**–प्रियतिसृ + सु–'अनङ् सौ' इत्यनेन ऋकारस्य 'अनङ्' अत्र 'त्रि' शब्दः स्त्रियां वर्तते, अङ्गं तु पुल्लिंगे । **प्रियचतसा**–प्रियाः चतस्रो यस्य पुरुषस्य सः । **विभक्त्याश्रयत्वात्** ...... त्रि' शब्दस्य 'तिसृ' आदेशो विभक्तेराश्रयत्वेन बहिरङ्गः. तेनायम् अन्तरङ्गे 'कप्' प्रत्ययविधानेऽसिद्धो भवति ।

❀ (वा०) तिसृभावे संज्ञायां कन्युपसंख्यानं कर्त्तव्यम् । **तिसृका नाम ग्रामः** । अत्र 'त्रि' शब्दात् संज्ञायां कन् ।

अचि र ऋतः ॥१००॥

अनयोः ऋकारस्य रेफो भवति अचि विभक्तौ । तिस्रः तिष्ठन्ति । तिस्रः पश्य । चतस्रः । पूर्वसवर्णोत्त्वङिसर्वनामस्थान-गुणानामपवादः ।

ऋतः इति किम् ? तिसृ-चतस्रोः प्रतिपत्त्यर्थम् । अन्यथा हि तदपवादः त्रिचतुरोरेवायमादेशो विज्ञायेत ।

तिस्रः पश्य—त्रि + शस् (द्वितीयैकवचने) **चतस्रः**—तिष्ठन्ति, पश्य वा । एवं प्रियाः तिस्रः येषां तान् **प्रियतिस्रः आनय** । **प्रियचतस्रः आनय** इत्यादि । **प्रतिपत्त्यर्थम्**–प्रतिपत्तिः = प्राप्तिः यथा स्यात्तदर्थम् ।

जराया जरसन्यतरस्याम् ॥१०१॥

'जरा' शब्दस्य 'जरस्' इत्ययमादेशो भवत्यजादौ विभक्तौ अन्यतरस्याम् । जरसा दन्ताः शीर्यन्ते / जरया । एवमजादौ सर्वत्रोन्नेयम् ।

जरस–जरा + टा जराया जरस् । पक्षे **जरया** । जराम् अतिक्रान्तानि

अतिजरांसि ब्राह्मणकुलानि । अत्र 'जरस्' आदेशो विप्रतिषेधेन नुमं बाधते । वृत्तिकारः द्वितीया-एकवचने **अतिजरसं ब्राह्मणकुलं पश्य** इत्यत्रापि परत्वात् 'जरस्' आदेशं स्वीकरोति । कृते जरसि 'स्वमोर्नपुंसकात्' इति लुक् पूर्वम् अमा बाधितं सत् भ्रष्टावसरत्वात् पुनः न प्रवर्त्तते ।

'सु' विभक्तौ **अतिजरम्**, भिस् विभक्तौ **अतिजरैः** इति रूपे भवतः । अत्र क्रमशः अमि, ऐसि च कृते अजादिविभक्तौ सत्यामपि न जरायाः एकदेशविकृतन्यायेन (जर) जरस् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । विस्तरेण महाभाष्ये द्रष्टव्यम् ।

त्यदादीनामः ॥१०२॥

'त्यद्' एवमादीनामङ्गानाम् अकार आदेशो भवति / त्यद्—स्यः । त्यौ । त्ये । तद्—सः । तौ । ते । यद्—यः । यौ । ये ।

❀ (वा०) द्विपर्यन्तानामिष्यते । नेह, भवत्—भवान् । भवन्तौ । संज्ञोपसर्जनीभूताः त्यद्-आदयः पाठादेव पर्युदस्ताः । नेह—त्यद् इति कश्चित् । अतित्यद् । अतित्यदौ ।

स्यः—त्यद् + सु । 'तदोः सः सावनन्त्ययोः' इति तकारस्य सकारः । एवं तद्+सु **सः** ।

द्विपर्यन्तानाम्—त्यदादिगणे पठिताः ये शब्दाः तेषु 'द्वि' पर्यन्तानाम् एव अकारादेशो भवति, न ततः परेषाम् ।

त्यद् इति कश्चित् अतित्यद्—कस्यचित् पुरुषस्य 'त्यद्' इति संज्ञा वर्तते तदा न तस्य सर्वनामसंज्ञा भवति । एवं त्यम् अतिक्रान्तः । **अतित्यद्** अत्र 'त्यद्' इत्युपसर्जनमस्ति । **संज्ञा……पर्युदस्ताः**—तथा च 'सर्वादीनि सर्वनामानि' इति सूत्रे वार्तिकम्—

❀ (वा०) संज्ञोपसर्जनीभूतास्तु न सर्वादयः । पाठात् **पर्युदासः**= बहिष्कारः । यत्र त्यदादीनां प्राधान्यं तत्र तदन्तविधिना **भवत्येव** परमः सः इति **परमसः** ।

किमः कः ॥१०३॥

किमः को भवति विभक्तौ । कः । कौ ।

ककिम्—साकच्कस्य 'किम्' इत्यस्यापि 'क' आदेशो भवति । कः—किम्+सु ।

कु तिहोः ॥१०४॥

तकार-हकारादौ विभक्तौ किमः 'कु' इत्यादेशः । कुतः । कुत्र । कुह । 'तिहोः' इकार उच्चारणार्थः ।

कुतः—कस्मात् इत्यर्थे किम्+तसिल् । **कुत्र**—कस्मिन् इत्यर्थे किम् +त्रल् ।

क्वाति ॥१०५॥

'अति' इत्येतस्यां विभक्तौ किमः 'क्व' आदेशः । क्व गमिष्यसि ?

क्व—कस्मिन्नर्थे किम्+अत् । 'अतो गुणे' इति पररूपम् । 'कु' इत्यादेशे सति उकारस्य यणं बाधित्वा 'ओर्गुणः' इत्यनेन गुणः स्यात् । 'अकच्' सहितस्यापि 'ककिम्' इत्यस्य 'क्व' आदेशो भवति ।

तदोः सः सावनन्त्ययोः ॥१०६॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सकार आदेशः सौ परतः । स्यः । सः । एषः । असौ ।

अनन्त्ययोः—अन्ते भवः अन्त्यः । स न भवति इति अनन्त्यः, तयोः तकार-दकारयोः । **स्यः–सः–एषः–असौ**– क्रमशः त्यद्-तद्-एतद्-अदस् शब्दानां प्रथमैकवचने सौ रूपाणि ।

अदस औ सुलोपश्च ॥१०७॥

अदसः औकारः आदेशो भवति सौ परतः, सोश्च लोपः । असौ ।

असौ——अदस्+सु (पुल्लिङ्गे, स्त्रीलिङ्गे च) औकारः अन्त्यस्य 'स्' इत्यस्य भवति । दकारस्य पूर्वसूत्रेण सकारः वृद्धिसन्धिश्च ।

❀ (वा०) औत्वप्रतिषेधः साकच्चाद् वा वक्तव्यः सादुत्वं च ।

यदा औत्वं न तदा सकारादुत्तरस्य अकारस्य उत्वम् । असकौ / असुकः । अमुकः इति तु अव्युत्पन्नं प्रातिपदिकम् अदस्-पर्यायः अमुकः इत्यपि वा ।

इदमो मः ॥१०८॥

इदमः सौ परतः मकार आदेशो भवति । इयम् । अयम् । मस्य 'म'वचनं त्यादाद्यत्वबाधनार्थम् ।

इयम् —इदम्+सु (स्त्रीलिङ्गे) । **अयम्** —मस्य''''मकारस्यैव मकार आदेशः ।

दश्च ॥१०९॥

इदमो दस्य स्थाने मकार आदेशो भवति विभक्तौ । इमौ । इमे । इयम् । इमौ । इमान् ।

इमौ —इदम्+औ दकारस्य मकारे कृते 'त्यदादीनामः' इत्यनेन मकारस्य अकारः, पररूपम्; वृद्धिसन्धिः ।

यः सौ ॥११०॥

इदमो दकारस्य य आदेशः सौ । इयम् । उत्तरसूत्रे 'पुंसि' इति बचनात् स्त्रियाम् अयं यकारः ।

इयम्—दकारस्य यकारे कृते । 'हल्ङ्याभ्यः''''' इति सुलोपः । **स्त्रियाम्** —नपुंसके तु 'स्वमोर्नपुंसकात्' इत्यनेन सोर्लुक् ।

इदोऽय् पुंसि ॥१११॥

इदमः 'इद्' रूपस्य 'अय्' आदेशः सौ पुंसि । अयं ब्राह्मणः ।

अयम्—,इद्' इत्यस्य 'अय्' शेषं पूर्ववत् ।

अनाप्यकः ॥११२॥

इदमः इद्रूपस्य अककारस्य 'अन्' इत्ययम् आदेशो भवति

आपि विभक्तौ परतः। 'आप्' इति तृतीयैकवचनादारभ्य सुपः पकारेण प्रत्याहारः। अनेन / अनयोः ।

अककारस्य—अकच्-प्रत्ययरहितस्य। **अनेन**—इदम्+टा 'त्यदादीनामः' इति मकारस्य अकारे, पररूपे च 'इद' इति। 'इद्' भागस्य 'अन्'। अन+आ (टा)→इन गुणे रूपं सिद्ध्यति। **अनयोः**-इदम्+ओस्। **आप्**-(टा) ..... प् (सुप्)। साकच्कस्य तु **इमकेन**। **इमकयोः**।

हलि लोपः ॥११३॥

हलादौ विभक्तौ इदमोऽककारस्य इद्-रूपस्य लोपो भवति। आभ्याम्। एभिः। 'नानर्थकेऽलोऽन्त्यविधिः।' इति सर्वस्यायम् इद्-रूपस्य लोपः। अथवा अन एवायं लोपो विधीयते। 'अनाप्यकः' इति 'अन्'ग्रहणमनुवर्तते।

आभ्याम्—इदम्+भ्याम्। 'इद' इत्यस्य इद्भागस्य लोपे 'अ' इत्यत्रशिष्यते। तस्य दीर्घो भवति। **नानर्थके** .....—अन्त्यस्य दकारस्यैव लोपः स्यादिति प्रश्नस्योत्तरम्। **अथवा**-अनर्थकेऽप्यलोऽन्त्यस्य विधिं मत्वा उत्तरयति।

मृजेर्वृद्धिः ॥११४॥

'विभक्तौ' इति निवृत्तम्। मृजेरङ्गस्य इको वृद्धिर्भवति। लघूपधस्य गुणस्यापवादः। मार्ष्टा। मार्ष्टुम्। मार्ष्टव्यम्।

'मृजेः' इति धातुग्रहणम्। धातोश्च कार्यमुच्यमानं धातुप्रत्यये एव भवति। कंसपरिमृड्भ्याम् न भवत्यत्र।

मार्ष्टा—√मृज् (शुद्धौ)+तृच्। **मार्ष्टुम्**—तुमुन्। **मार्ष्टव्यम्**-तव्यत्। **कंसपरिमृड्भ्याम्**—कंसं परिमार्ष्टि इति क्विप् ताभ्याम्। अत्र विभक्तौ वृद्धिः प्राप्नोति। **धातुप्रत्यये**-धातोर्यः प्रत्ययः तस्मिन् अत्र नैवंविधः प्रसंगः।

अचो ञ्णिति ॥११५॥

अजन्तस्यांगस्य वृद्धिर्भवति ञिति णिति प्रत्यये परतः। कारः। गावः। सखायौ।

कारः—√कृ+अण्। **गावः**-गो+जस् 'गोतो णित्' इति सर्वनामस्थ विभक्तेः णित्वम् ओकारस्य वृद्धिः औकारः। **सखायौ**—सखि+औ 'सख्युरसम्बुद्धौ' इति णित्वम्, इकारस्य वृद्धिः ऐकारः। ञिति उदाहरणम्—**तण्डुलनिश्चायः**-निस् √चि+घञ्।

अत उपधायाः ॥११६॥

अङ्गस्योपधाया अकारस्य स्थाने ञ्णिति प्रत्यये वृद्धिः। पाकः। त्यागः।

पाकः—√पच् + घञ्। अकारस्य वृद्धिः आकारः। **त्यागः**—त्यज् + घञ्। 'चजोः कु.........' इति कुत्वेन ककाराकारौ। णिति उदाहरणम्—**पाठयति**—√पठ् + णिच् + लट् → तिप्। **पाठकः**—√पठ् + ण्वुल्।

तद्धितेष्वचामादेः ॥११७॥

तद्धितेषु ञित्-णित् प्रत्येयषु परतोऽङ्गस्य अचामादेरचो वृद्धिर्भवति। गार्ग्यः। वात्स्यः। दाक्षिः। औपगवः।

गार्ग्यः—गर्ग+यञ्। **वात्स्यः**—वत्स+यञ्। **दाक्षिः**—दक्ष+इञ्। **औपगवः**—उपगु+अण्। सूत्रे **अचाम्**—इति निर्धारणे षष्ठी, तेन 'अचां मध्ये' इत्यर्थलाभः।

किति च ॥११८॥

किति च तद्धितेऽङ्गस्याचामादेरचो वृद्धिर्भवति। आक्षिकः। लावणिकः।

सिच्चिप्रभाविट्सन्यचआतोजराया अष्टादश।

आक्षिकः—अक्षि+ठक् ठस्य 'इक' आदेशः। **लावणिकः**—अत्र

'चरति' इत्यनेन भक्षणार्थे ठक् लवणेन भक्षयति । अन्यत्र तु 'लवणाट्ठञ्' इत्यनेन 'ठञ्' लवणं पण्यम् अस्येति लावणिकः ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
सप्तमाध्यायस्य द्वितीयः पादः ।

सप्तमाध्यायस्यास्मिन् द्वितीये पादे सिचि वृद्धिः परस्मैपदेषु, प्रभौ परिवृढः, इट् सनि वा, अचस्तास्वत्थल्यनिटो नित्यम्, आतो ङितः इत्यत आरभ्य विंशतिः सूत्राणि तथा जराया जरसन्यतरस्याम् इत्यत आरभ्य अष्टादश सूत्राणीति संकलनेन अष्टादशोत्तरशतं (११८) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
सप्तमाध्यायस्य द्वितीयः पादः ।

अथ सप्तमाध्याये तृतीयः पादः

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥१॥

एषामादेरचः स्थाने वृद्धिप्रसंगे आकार आदेशो भवति ञिति णिति किति च तद्धिते परतः। देविकायां भवं दाविकं जलम्। शिंशपाया विकारः शांशपः चमसः। दित्यवाट्—दित्यौह इदं दात्यूहम्। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयसि भवं श्रायसम्।

आकार आदेशः—आन्तरतम्यात् सर्वत्र ऐकारे वृद्धौ प्राप्तायामेषु आकारो विधीयते। अत्रायमर्थोऽभिमतः अङ्गस्यावयवभूता ये देविका आदयस्तेषामादेरचः स्थाने आकारः, तेनेमे प्रयोगा अपि सिद्ध्यन्ति-देविकाकूले भवाः **दाविकाकूलाः** शालयः। पूर्वदेविका कश्चन प्राचां ग्रामस्तत्र भवः **पूर्वदाविकः**। एवं **शांशपास्थलाः**। **पूर्वशांसपाः** इति बौध्यौ। **देविका**—एतन्नामिका नदी हिमवतः समुद्भूता सरय्वा सह संगता।

तदाह पद्मपुराणे भूमिखण्डे—

अर्धयोजनविस्तारां पञ्चयोजनमायताम्।
एतावद्देविकामाहुर्देवर्षिपरिसेविताम् ॥

चमसः—यज्ञे सोमपानाय पात्रविशेषः। **दित्यवाट्**—धान्यवाहको वृषभः। **दीर्घसत्रम्**—दीर्घम्=बहुकालसाध्यं सत्रम्=यज्ञः अथवा तन्नामकं तीर्थम्। **श्रेयः**—कल्याणम्।

केकयमित्रयुप्रलयानां यादेरियः ॥२॥

एषां यकारादेः 'इय' आदेशः ञिति णिति किति च तद्धिते। केकयस्यापत्यं कैकेयः। 'जनपदशब्दात्……' इति अञ्।

मित्रयुभावेन श्लाघते इति मैत्रेयिकया श्लाघते । 'गोत्रचरणात्…' इति वुञ् । ऋषिशब्दः गोत्रमित्यभिधीयते । प्रलयादागतं प्रालेयमुदकम् ।

सूत्रे **केकयमित्रयुप्रलयानाम्**—अवयवावयविभावे षष्ठी, **यादेः** इत्यत्र च स्थाने षष्ठी ज्ञेया । **कैकेयः**=केकय+अपत्यार्थे अञ् । **मैत्रेयिकया**—गोत्रचरण……' सूत्रे लौकिकं गोत्रं गृह्यते । **प्रालेयम्**—'प्रलय' शब्दात् 'तत आगतः' इति 'अण्' । सर्वत्र कैकेय-आदिषु यकारादेः 'इय' कृते अकारेकारयोः गुणः एकारः ।

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।।३।।

पदान्ताभ्यां य-वकारामुत्तरस्य अचामादेः अचो वृद्धिर्न । ताभ्यां तु यकार-वकाराभ्यां पूर्वौ ऐच्—आगमौ भवतः । व्यसने भवं वैयसनम् । वैयाकरणः । स्वश्वस्यापत्यं सौवश्वः ।

ऐच्=ऐ+औ । यकारात्पूर्वम् 'ऐ' वकारात्पूर्वम् 'औ' भवतीत्यर्थः । **वैयसनम्**—व्यसन+भवार्थे अण् । **वैयाकरणः**—व्याकरणम् अधीते वेद वेत्यर्थे व्याकरण+अण् । **सौवश्वः**—शोभनः अश्वः इति स्वश्वः तस्यापत्यम् इति स्वश्व+अण् ।

द्वारादीनां च ।।४।।

द्वार इत्येवमादीनाञ्च य्वाभ्यामुत्तरस्य अचामादेरचः स्थाने वृद्धिर्न । पूर्वौ तु ताभ्यामैजागमौ भवतः । द्वारे नियुक्तः द्वौवारिकः । स्वरमधिकृत्य कृतः सौवरो ग्रन्थः । व्यल्कशस्यापत्यं वैयल्कशः । स्वस्ति इत्याह सौवस्तिकः इत्यादि ।

दौवारिकः—द्वार+ठक् । **सौवरः**-स्वर+अण् । **वैयल्कशः**-वृत्तौ भवार्थे 'अण्' प्रत्ययो लिखितः । **सौवस्तिकः**—स्वस्ति+ठक् ।

न्यग्रोधस्य च केवलस्य ।।५।।

न्यग्रोधस्य केवलस्य यकारादुत्तरस्य अचामादेःअचो वृद्धिर्न ।

तस्मात्तु पूर्वमैच्–आगमो भवति । न्यग्रोधस्य विकारः नैयग्रोधः चमसः ।

केवलस्य किम् ? न्यग्रोधमूले भवाः न्याग्रोधमूलाः शालयः ।

नैयग्रोधः—न्यग्रोध + विकारार्थे अण् । **न्याग्रोधमूलाः**—अत्र आदेः अकारस्य वृद्धिः आकारः ।

न कर्मव्यतिहारे ॥६॥

कर्मव्यतिहारे यदुक्तं तन्न भवति । व्यावक्रोशी । व्यावहासी । कर्मव्यतिहारे णच्, स्त्रियाम् अञ् ।

यदुक्तम्—अस्मिन् आदेरचोवृद्धि-ऐजागम-प्रसङ्गे । **व्यावक्रोशी**–पुनः पुनः व्यवक्रोशति इति वि अव √क्रुश + णच् = व्यवक्रोश + 'णचः स्त्रियामञ्' इति अञ् । ऐजागमनिषेधे आदेरचो वृद्धिः व्यावक्रोश + ङीप् एवं पुनः पुनः व्यवहसति इति या सा **व्यावहासी** ।

स्वागतादीनां च ॥७॥

स्वागतादीनां च यदिदमुक्तं तन्न भवति । स्वागतमाह स्वागतिकः । स्वध्वरेण चरति स्वाध्वरिकः । स्वाङ्गिः । व्याङ्गिः । व्यावहारिकः । स्वपतौ साधुः स्वापतेयः । 'स्व' शब्दस्य द्वारादिपाठात्प्राप्नोति ।

यदिदमुक्तम्—ऐच्-आगमः । **स्वागतिकः**–स्वागत + ठक् । **स्वाङ्गिः**–स्वङ्ग = शोभनाङ्ग + अपत्यार्थे इञ् । **व्यावहारिकः**–व्यवहारः = लौकिकं वृत्तम् + ठक् । **स्वापतेयः**–स्वपति + ढक् ।

श्वादेरिञि ॥८॥

श्वादेरङ्गस्य इञि परे उक्तं न भवति । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः ।

❀ (वा०) इकारग्रहणं कार्यम् । श्वगणेन चरति श्वागणिकः ।

श्वाभस्त्रिः—श्वा इव भस्त्रा यस्य स श्वभस्त्रः + अपत्यार्थे इञ्। **इकारग्रहणम्**—तेन श्वागणिकः अत्र 'ठक्'-आदेशभूत इकारः तस्मिन् परेऽपि निषेधः सिद्ध्यति।

पदान्तस्यान्यतरस्याम् ॥९॥

श्वादेरङ्गस्य पदशब्दान्तस्य यदुक्तमन्यतरस्यां तन्न भवति। श्वपदस्येदं श्वापदम् / शौवापदम्।

शौवापदम्—निषेधाभावपक्षे ऐच् (औ) आगमे 'अन्येषामपि दृश्यते' इति वकारस्य दीर्घः।

उत्तरपदस्य ॥१०॥

'हनस्तोऽचिण्णलोः' एतस्मात्प्राक् यदित ऊर्ध्वमनुक्रमिष्यामः' 'उत्तरपदस्य' इत्येवं तद् वेदितव्यम्। वक्ष्यति– 'अवयवादृतोः' पूर्ववार्षिकः। यत्र पञ्चमी नास्ति 'जे प्रोष्ठपदानाम्' इत्येवमादौ। तदर्थमुत्तरपदाधिकारः। पञ्चमीनिर्देशेष्वपि विस्पष्टार्थः।

अधिकारसूत्रम् इदम्। **पूर्ववार्षिकः**—पूर्व वर्षा + ठक्। अत्र 'अवयवादृतोः' इत्यनेनोत्तरपदस्यादेरचो वृद्धिः।

अवयवादृतोः ॥११॥

अवयववाचिनः पूर्वपदादुत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति वृद्धिनिमित्ते तद्धिते परतः। पूर्ववार्षिकः। अपरवार्षिकः। अपरहैमनः। पूर्वं वर्षाणाम् इत्येकदेशिसमासः। 'तत्र भवः' इत्यर्थे 'वर्षाभ्यष्ठक्'। 'हैमनः' इति 'हेमन्ताच्च' 'सर्वत्राण् तलोपश्च' इति 'अण्' प्रत्ययः।

सूत्रे **ऋतोः**—ऋतुवाचिनः वर्षा-प्रभृति शब्दात्। **एकदेशिसमासः**– 'पूर्वापराधरोत्तर·······' इत्यनेन।

सुसर्वार्धाज्जनपदस्य ॥१२॥

एभ्य उत्तरस्य जनपदवाचिनः अचामादेरचो वृद्धिर्भवति

ञिति णिति किति तद्धिते । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः । 'अवृद्धादपि बहुवचन……' इति वुञ् ।

सुपाञ्चालकः—शोभनाः पञ्चालाः इति प्रादि तत्पुरुषः । तत्र भवः तेषाम् अयम् इति वा पूर्वपञ्चाल+वुञ् । उत्तरपदस्य पञ्चालस्य आदेरचः पकाराकारस्य वृद्धिः आकारः । **सर्वपाञ्चालकः**—अत्र कर्मधारयः । **अर्धपाञ्चालकः**—अर्धं पञ्चालानाम् इति तत्पुरुषः ।

दिशोऽमद्राणाम् ॥१३॥

दिग्वाचिन उत्तरपदस्य जनपदवाचिनो मद्रवर्जितस्य अचामादेरचो वृद्धिर्भवति णिति ञिति किति तद्धिते । पूर्वपाञ्चालकः । अपरपाञ्चालकः । योगविभाग उत्तरार्थः ।

पूर्वपाञ्चालकः—पूर्वेषु पञ्चालेषु भवः 'तद्धितार्थ………' इति समासानन्तरं वुञ् । एवं अपरेषु पञ्चालेषु भवः **अपरपाञ्चालकः** ।

प्राचां ग्रामनगराणाम् ॥१४॥

प्राचां देशे ग्रामनगराणां दिश उत्तरपदानाम् अचामादेरचो वृद्धिर्भवति ञिति णिति किति तद्धिते परतः । ग्रामाणां तावत्-पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । अपरैषुकामशमः । पूर्वकार्ष्णमृत्तिकः ।

नगराणाम्—पूर्वस्मिन् पाटलिपत्रे भवः पूर्वपाटलिपुत्रः । पूर्वकान्यकुब्जः ।

पूर्वैषुकामशमः—पूर्वा इषुकामशमी इति 'दिक्संख्ये संज्ञायाम्' इति समासः ततः 'दिक्पूर्वपदात्……' इति ञः । अत्र इकारस्य वृद्धिः ऐकारः, ततः अकार-ऐकारयोः पुनर्वृद्धिसन्धिः । **पूर्वकार्ष्णमृत्तिकः**—पूर्वस्यां कृष्णमृत्तिकायां भवः । **पूर्वपाटलिपुत्रकः**—पूर्वस्मिन् पाटलिपुत्रे भवः इति पूर्वपाटलिपुत्र+वुञ् ।

संख्यायाः संवत्सरसंख्यस्य च ॥१५॥

संख्याया उत्तरपदस्य संवत्सरशब्दस्य च संख्यायाश्च अचामादेरचो वृद्धिर्भवति ञिति णिति किति च तद्धिते परतः। द्वौ संवत्सरौ अधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः।

संख्यायाः—द्वे षष्टी अधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः।

द्विसांवत्सरिकः—द्विसंवत्सर + अधीष्टाद्यर्थे ठञ्। **द्विषाष्टिकः**—द्विषष्टि + ठञ्।

सूत्रे 'संवत्सर' इति ग्रहणेन अन्यस्य कालपरिमाणस्य ग्रहणं न, तेनात्र पूर्वपदवृद्धिरेव **द्वैसमिकः**। **द्विवर्षा माणविका** इत्यत्र च द्विगोः इति ङीप् न।

वर्षस्याभविष्यति ॥१६॥

संख्याया उत्तरपदस्य वर्षशब्दस्य अचामादेरचो वृद्धिर्भवति ञिति णिति किति तद्धिते परतः। स चेत्तद्धितो भविष्यत्यर्थे न भवति। द्वे वर्षे अधीष्टो भृतो भूतो भावी वा द्विवार्षिकः। त्रिवार्षिकः।

द्विवार्षिकः—द्विवर्ष + ठञ्। द्विवार्षिको मनुष्यः = मनुष्यसदृशः प्रतिमादिः। मनुष्ये चैतन्यवति तु 'चित्तवति नित्यम्' इति लुक् स्यात्। अथवा सूत्रारम्भसामर्थ्यान्न लुक्। भविष्यति तु **द्वैवर्षिकम्**।

परिमाणान्तस्यासंज्ञाशाणयोः ॥१७॥

परिमाणान्तस्याङ्गस्य संख्याया यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति ञिति णिति किति च तद्धिते परतः। संज्ञायां विषये शाणे चोत्तरपदे न भवति। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्।

असंज्ञाशाणयोः किम्? पाञ्चलोहितिकः। द्वैशाणम्।

द्विकौडविकः—द्विकुडव+ठञ् । **पाञ्चलोहितिकः**-पञ्च लोहित्यः परिमाणम् अस्य पञ्चलोहिनी+ठक् (पुंवद्भावेन ङीप्-नकारयोर्निवृत्तिः) **द्वैशाणम्**—द्वाभ्यां शाणाभ्यां क्रीतम् ।

जे प्रोष्ठपदानाम् ॥१८॥

'ज' इति जातार्थे यस्तद्धितः तस्मिन् । ञिति णिति किति च प्रत्यये परतः प्रोष्ठपदानामुत्तरस्य अचामादेरचो वृद्धिर्भवति ।

प्रोष्ठपदा नाम नक्षत्रम् । ताभिर्युक्तः कालः प्रोष्ठपदाः + अण्, तस्य च लुप् । तासु भवः प्रोष्ठपादः माणवकः ।

भवः—वृत्तौ 'जातः' इत्युक्तम् । **प्रोष्ठपदाः**-पूर्वा भाद्रपद-उत्तरा-भाद्रपदनामनी नक्षत्रे । अण्-'ताभिर्युक्तः कालः' इत्यनेन । लुप्-लुब-विशेषे' इत्यनेन । 'प्रोष्ठपदानाम्' इति बहुवचननिर्देशात्पर्यायोऽपि गृह्यते **भद्रपादः** ।

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥१९॥

हृद्-भग-सिन्धु इत्येवमन्तेऽङ्गे पूर्वपदस्योत्तरपदस्य च अचामादेरचो वृद्धिर्भवति ञिति णिति किति च तद्धिते परतः । सुहृद इदं सुहृदयस्य भावो वा सौहार्दम् । सुभगस्य भावः सौभाग्यम् । दौर्भाग्यम् । सुभगाया अपत्यं सौभागिनेयः । सक्तुसिन्धुषु भवः साक्तुसैन्धवः ।

सुहृदयस्य भावः—हृदयस्य 'हृद्' आदेशः । **सौहार्दम्**-सुहृद्+अण् । **सौभाग्यम्**—सुभग+ष्यञ् ।

सौभागिनेयः—सुभगा+ढक् अन्त्यस्य इनङ् 'कल्याण्यादीनामिनङ्' इत्यनेन । **साक्तुसैन्धवः**—सक्तुप्रधानाः सिन्धवः इति सक्तुसिन्धवः मध्यम-पदलोपी समासः । सक्तुसिन्धु+अण् ।

अनुशतिकादीनां च ॥२०॥

'अनुशतिक' एवमादीनां पूर्वपदस्योत्तरपदस्य च अचामादे-रचो वृद्धिर्भवति ञिति णिति किति च तद्धिते परतः । अनुशति-

कस्येदम् आनुशतिकम् । ऐहलौकिकम् । पारलौकिकम् । सर्व-भूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । पारस्त्रैणेयः । अभि-गममर्हति आभिगामिकः । आधिदैविकम् । आधिभौतिकम् । चतस्र एव विद्याः चातुर्वैद्यम् । आकृतिगणश्चायम् ।

आनुशतिकम्—शतेन क्रीतः शतिकः, शतिकेनानुगतः अनुशतिकः तस्येदम् अनुशतिक + अण् । **ऐहलौकिकम्**—इहलोक + भवार्थे ठञ् । **सार्वभौमः**—सर्वभूमि + अण् । **पारस्त्रैणेयः**—परस्त्रियाम् उत्पन्नः परस्त्री + ढक् अन्त्यस्य इनङ् च । **आधिदैविकम्**—अधिदेव + भवार्थे ठञ् । **चातुर्वैद्यम्**—चतुर्विद्या + स्वार्थे ष्यञ् । **आकृतिगणः**—आकृत्या = प्रयोगेण ये एवंविधाः दृश्यन्ते तेषामत्र गणे पाठो बोध्यः ।

देवताद्वन्द्वे च ॥२१॥

देवताद्वन्द्वे पूर्वोत्तरयोराद्यचो वृद्धिर्भवति ञिति णिति किति च तद्धिते । आग्निमारुतीमनड्वाहीमालभेत । आग्निमारुतं कर्म ।

यो देवताद्वन्द्वः सूक्तहविःसम्बन्धी तत्रायं विधिः । नेह—स्कान्दविशाखः ।

आग्निमारुतीम्—अग्निश्च मरुच्च अग्निमरुतौ तौ देवते अस्याः अग्निमरुत् + अण् 'साऽस्यदेवता' इत्यनेन । अत्र टिड्ढाणञ्...... इति ङीप् । **स्कान्दविशाखः**—अत्र आद्यच एव वृद्धिः ।

नेन्द्रस्य परस्य ॥२२॥

परस्येन्द्रस्य नोक्तं भवति । सौमेन्द्रः । आग्नेन्द्रः ।

सौमेन्द्रः—सोमश्च इन्द्रश्च सोमेन्द्र + अण् । **आग्नेन्द्रः**—अत्र 'अग्नि' शब्दस्येकारस्य 'आनङ्' ।

दीर्घाच्च वरुणस्य ॥२३॥

दीर्घादुत्तरस्य वरुण शब्दस्य यदुक्तं तन्न भवति । ऐन्द्रा-वरुणम् ।

दीर्घात् किम् ? आग्निवारुणीमनड्वाहीमालभेत ।

ऐन्द्रावरुणम्—इन्द्रश्च वरुणश्च इति इन्द्रावरुणौ 'देवताद्वन्द्वे च' इति इन्द्रशब्दान्त्यस्य 'आनङ्' ।

प्राचां नगरान्ते ॥२४॥

प्राचां देशे नगरान्तेऽङ्गे पूर्वोत्तरयोराद्यचो वृद्धिर्भवति ञिति णिति किति च तद्धिते । सुह्मनगरे भवः सौह्मनागरः । पौण्ड्रनागरः ।

प्राचामिति किम् ? माद्रनागरः ।

सूत्रे **प्राचाम्** इति देशवाचकम् । **माद्रनागरः**—मद्रनगरम् उदीच्यां वर्तते । अत्र पूर्वपदस्याद्यचो वृद्धिः । सर्वत्र भवार्थे अण् ।

जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥२५॥

जङ्गल-धेनु-वलज इत्येवमन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिर्भवति, उत्तरपदस्य विभाषितम् ञिति णिति किति च तद्धिते । कुरुजङ्गलेषु भवं कौरुजङ्गलम् / कौरुजाङ्गलम् । वैश्वधेनवम् / वैश्वधैनवम् । सौवर्णवलजम् / सौवर्णवालजम् ।

विभाषितम्—विकल्पः । कुरुषु जङ्गलं **कुरुजङ्गलम्, कौरुजङ्गलम्**—भवार्थे अण् । एवं सर्वत्रोदाहरणेषु । विश्वेषाम् = सर्वेषां देवानां धेनुः = नवप्रसूता **विश्वधेनुः** । **वलजम्**—सुवर्णविकारः ।

अर्धात्परिमाणस्य पूर्वस्य तु वा ॥२६॥

'अर्ध'शब्दात्परस्य परिमाणवाचिनः उत्तरपदस्य अचामादेरचो वृद्धिर्भवति, पूर्वपदस्य तु वा भवति ञिति णिति किति च तद्धिते । अर्धद्रोणेन क्रीतम् आर्धद्रौणिकम् / अर्धद्रौणिकम् । आर्धकौडविकम् / अर्धकौडविकम् ।

आर्धद्रौणिकम्—अर्धद्रोण+'प्राग्वतेष्ठञ्' इत्यनेन ठञ् । **आर्धकौडविकम्**—अर्धकुडव+ठञ् । **द्रोण-कुडवौ** परिमाणवाचिनौ शब्दौ ।

नातः परस्य ॥२७॥

अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न भवति, पूर्वस्य तु वा भवति । अर्धप्रस्थिकम् / आर्धप्रस्थिकम् ।

अर्धप्रस्थिकम्—'अर्धं नपुंसकम्' इति तत्पुरुषः ततः 'ठञ्' ।

प्रवाहणस्य ढे ॥२८॥

'प्रवाहण'शब्दस्य ढे परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वपदस्य तु वा । प्रवाहणस्यापत्यं प्रावाहणेयः / प्रवाहणेयः ।

प्रावाहणेयः—प्रवाहण प्र √वह (प्रापणे) + णिच् + ल्युट् (कर्तरि) + ढक् → एय । प्रवाहण-शब्दे उत्तरपदस्याद्यचः आकारस्य वृद्धित्वेऽपि पुनर्वृद्धिविधानं **प्रवाहणेयीभार्यः** इत्यत्र 'वृद्धिनिमित्तस्य च……' इत्यनेन पुंवद्भावप्रतिषेधार्थम् । अनित्योऽयं प्रतिषेधः तेन हस्तिनीनां समूहो **हास्तिकम्** इत्यत्र पुंवद्भावप्रतिषेधो न ।

तत्प्रत्ययस्य च ॥२९॥

'ढ' प्रत्ययान्तस्य 'प्रवाहण' शब्दस्य तद्धिते ञिति णिति किति परे उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वपदस्य तु वा भवति । प्रवाहणेयस्यापत्यं प्रावाहणेयिः / प्रवाहणेयिः ।

प्रावाहणेयिः—प्रवाहणेय + इञ् 'अत इञ्' इत्यनेन । एवं **प्रावाहणेयकम् / प्रवाहणेयकम्** । अत्र 'गोत्रचरणाद् वुञ्' इत्यनेन 'वुञ्' ।

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥३०॥

नञ उत्तरेषामेषामचामादेरचो वृद्धिर्भवति पूर्वपदस्य तु वा ञिति णिति किति तद्धिते । आशौचम् / अशौचम् । आनैश्वर्यम् / अनैश्वर्यम् । अक्षैत्रज्ञ्यम् । अक्षैत्रज्ञ्यम् । आकौशलम् / अकौशलम् । आनैपुणम् । अनैपुणम् ।

अशुचि-अनीश्वर-अक्षेत्रज्ञ-अकुशल इत्येषु नञ्-तत्पुरुषसमासः, 'अशुचि'शब्दे बहुव्रीहिरपि ।

आशौचम्, आकौशलम्, आनैपुणम्—अत्र 'तस्येदम्' इति 'अण्' । **आनैश्वर्यम्, आक्षैत्रज्ञ्यम्**—अत्र ब्राह्मणादिगणे पाठात् भावे 'ष्यञ्' ।

यथातथयथापुरयोः पर्यायेण ॥३१॥

एतयोः पर्यायेण अचामादेरचो वृद्धिर्भवति ञिति णिति किति च तद्धिते । आयथातथ्यम् / अयाथातथ्यम् । आयथापुर्यम् / अयाथापूर्यम् । एतौ ब्राह्मणादिषु नञ्समासौ द्रष्टव्यौ । यथातथ-यथापुर-शब्दौ तु 'यथाऽसादृश्ये' इत्यव्ययीभावसमासौ । तथाहि नपुंसका-श्रयं ह्रस्वत्वं कृतम् । भाष्ये तु यथा दर्शितम्—अयथातथाभावः । अयथापुराभावः इति तथा 'सुप्सुपा' इति समासो लक्ष्यते ।

आयथातथ्यम्—नञ् समासे कृते यथातथ+ष्यञ् । **यथातथम्**= सत्यम् **यथापुरम्**—पुरातनम् । अतः 'असादृश्ये' इति प्रतिषेधो न भवति । पूर्वस्याचो वृद्धौ विकल्पः उत्तरस्य तु नित्यम् । **भाष्ये ...... लक्ष्यते**—तथा च **यथातथा, यथापुरा** इति शब्दौ ज्ञेयौ । सूत्रे ह्रस्वत्वम् व्यत्ययेन बोध्यम् ।

हनस्तोऽचिण्णलोः ॥३२॥

'तद्धितेषु' इति निवृत्तम् । तत्सम्बद्धं 'किति' इत्यपि । 'ञ्णिति' वर्तते । हन्तेस्तकारोऽन्तादेशो भवति चिण्-णल् वर्जिते ञिति णिति । घातयति । घातकः । साधुघाती । घातंघातम् । घातो वर्तते ।

अचिण्-णलोः किम् ? अघानि । जघान ।

किति—तेन **जायाघ्नः** इत्यत्र तकारादेशो न भवति ।

घातयति—√हन्+णिच्+लट् → ति । **घातकः**–हन्+ण्वुल् । **साधुघाती**-साधु√हन्+णिनि । **घातंघातम्**—√हन्+णमुल् । **घातः**—√हन्+घञ् । **अघानि**-√हन्+लुङ्→चिण् । **जघान**—√हन्+लिट्→ति→णल् । सर्वेषु प्रयोगेषु हनो हकारस्य कुत्वं घकारः ।

आतो युक् चिण्कृतोः ॥३३॥

आदन्तानां युक्-आगमो भवति चिणि ञ्णिति च कृति। चिणि—अदायि। अधायि। कृति—दायकः। धायकः।

अदायि—√दा + लुङ्→चिण्। **युक्**—कित्त्वात् अन्त्यावयवो भवति। **धायकः**—√धा + ण्वुल्। एवं √दा + घञ् = **दायः**।

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥३४॥

उदात्तोपदेशस्य मान्तस्याङ्गस्य आचमिवर्जितस्य चिणि, ञिति, णिति च कृति यदुक्तं तन्न भवति। किञ्चोक्तम्? अत उपधावृद्धिः। अशमि। अतमि। शमकः। दमकः।

उदात्तोपदेशस्येति किम्? यामकः। रामकः। उद्यमोपरमौ तु निपातनादनुगन्तव्यौ।

अनाचमेः इति किम्? आचामकः।

❀ (वा०) अनाचमिकमिवमीनामिति वक्तव्यम्। आचामः। वामः। कामः। 'विश्रामभूमिः' इत्यादिकं प्रयोगमन्याय्यमेव मन्यन्ते।

उपधावृद्धिः—'अत उपधायाः' इत्यनेन। **अशमि**—√शम् (उपशमे) + लुङ् → चिण्। **रामकः**—√रम् (क्रीडायाम्) + ण्वुल्। **उद्यमोपरमौ**—उद्यमः। उपरमः।

अनुगन्तव्यौ—साधुप्रयोगौ बोध्यौ। **अन्याय्यम्**—असाधुम्। **आमः**—√अम् (चुरादिः) + णिच् = आमि + अच्।

जनिवध्योश्च ॥३५॥

एतयोः चिणि ञ्णिति कृति च यदुक्तं तन्न भवति। अजनि। जनकः। अवधि। वधकः। वधिः प्रकृत्यन्तरमस्ति व्यञ्जनान्तम्, तस्यायं निषेधः।

अजनि—√जन्+लुङ् → चिण् । **वधिः**—√वध् (हिंसायाम्) भूवादिः, न हनेः आदेशः । **वधकः**—तथा च प्रयोगः—

भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते ।

अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ॥३६॥

सर्वं निवृत्तम् । 'अङ्गस्य' इति वर्तते । अर्ति-आदीनाम् अङ्गानाम् आकारान्तानाञ्च पुक्-आगमो भवति णौ परतः । अर्ति–अर्पयति । ह्रेपयति । व्लेपयति । रेपयति । क्नोपयति । क्ष्मापयति । दापयति । धापयति ।

पुकः पूर्वान्तिकरणम् 'अदीदिपत्' इत्यत्र उपधाह्रस्वार्थम् ।

अर्ति—√ऋ (गतौ) इति । **अर्पयति**—√ऋ+लट्→तिप् पुकि कृते 'पुगन्तलघूपधस्य' इति गुणः । **क्नोपयति**—क्नूयी (शब्दे)+लट् । **क्ष्मापयति**—√क्ष्माय्+लट् । उभयत्र पुकि कृते 'लोपो व्योर्वलि' इति यकारस्य लोपः । **पूर्वान्तकरणम्**—धातोरन्ते विधानम् । तेन **अदीदिपत्** इत्यत्र धातोरवयवत्वात् उपधायाः ह्रस्वत्वं भवति ।

शाच्छासाह्वाव्यावेपां युक् ॥३७॥

एषां युक्-आगमो भवति णौ परतः । निशाययति । अवच्छाययति । अवसाययति । ह्वाययति । संव्याययति । वाययति । पाययति ।

❀ (वा०) पातेर्णौ लुक् आगमो वक्तव्यः । पालयति ।

❀ (वा०) धूञ्-प्रीञोर्नुग् वाच्यः । धूनयति । प्रीणयति । एतेऽण्युपधाह्रस्वार्थं पूर्वान्ता एव क्रियन्ते । न्यशीशयत् ।

एषाम्—√शा-√छा-√सा-√ह्वा-√व्या-वे-√पा इत्येतेषां धातूनाम् । **निशाययति**-क्रमशः उदाहरणानि ज्ञेयानि । एषां मूलधातवः इमे सन्ति-√शो (तनूकरणे) √छो (छेदने) √षो (अन्तकर्मणि) √ह्वेञ् (स्पर्धायाम्) √व्येञ् (संवरणे) √वेञ् (तन्तुसन्ताने) √पा (पाने)-√पै शोषणे च

द्वावपि । एते कृतात्त्वाः पठिताः । **पालयति**—√पा (रक्षणे)+णिच्+लट् लुक्-आगमः ।

वो विधूनने जुक् ॥३८॥

'वा' इत्येतस्य विधूनने वर्तमानस्य 'जुक्' आगमो भवति णौ परतः । पक्षेणोपवाजयति ।

विधूनने किम् ? केशान् आवापयति ।

विधूनने—कम्पने । **उपवाजयति**—उप √वा (गतिगन्धनयोः)+ णिच् जुक्+लट् ।

आवापयति—अत्र 'पुक्' भवति ।

लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥३९॥

√ली-√ला इत्येतयोरङ्गयोरन्यतरस्यां यथासंख्यं नुक्-लुक् इत्येतावागमौ भवतः णौ परतः स्नेहविपातनेऽर्थे । घृतं विलीनयति / विलाययति । विलालयति / विलापयति । 'ली' इति ईकारोऽत्र प्रश्लिष्यते तत ईकारान्तस्यैव 'नुक्' भवति । नतु 'विभाषा लीयतेः' कृतात्वस्य ।

स्नेहविपातने किम् ? जतु विलापयति । जटाभिरालापयते ।

√ली—√ली (श्लेषणे) √लीङ् (श्लेषणे) इति द्वयोर्ग्रहणम् । √ला—√ला (आदाने) कृतात्वस्य च लीयतेरपि ।

विपातनम्—विशेषेण पातनम् । **विलीनयति**—नुकि कृते गुण-अय्-आदेशौ । पक्षे **विलाययति** णिचि वृद्धिः आय्-आदेशश्च । **विलापयति**—पक्षे पुक् ।

भियो हेतुभये षुक् ॥४०॥

'भी' इत्येतस्याङ्गस्य हेतुभयेऽर्थे षुक्-आगमः णौ परतः । मुण्डो भीषयते ।

हेतुभये इति किम् ? कुञ्चिकयैनं भाययति । ईकारप्रश्लेषेणात्रापि ईकारान्तस्यैव षुक् ।

हेतुभये—हेतुः=स्वतन्त्रस्य कर्तुः प्रयोजकः । **भयः**=विभेत्यस्मात् इति √भी+अच् । हेतुश्चासौ भयश्चेति कर्मधारयः । **मुण्डो भीषयते**–अत्र मुण्डः इति हेतुरपि भयोऽपि । 'भीस्म्योर्हेतुभये' इत्यात्मनेपदम् ।

कुञ्चिकयैनं भाययति –अत्र कुञ्चिका भयस्य हेतुः । **ईकार**........ **षुक्**—नात्र भवति **मुण्डो भापयते** । 'विभेतेर्हेतुभये' इत्यात्त्वे कृते पक्षे पुक् ।

स्फायो वः ॥४१॥

'स्फाय्' इत्यस्याङ्गस्य वकार आदेशो भवति णौ परतः स्फावयति ।

स्फावयति—स्फायी (वृद्धौ) + णिच् + लट् > तिप् । यकारस्य वकारः ।

शदेरगतौ तः ॥४२॥

शदेरङ्गस्यागतावर्थे वर्त्तमानस्य तकारादेशो भवति णौ परतः । पुष्पाणि शातयति । गतौ तु गाः शादयति यष्ट्या गोविन्दः ।

शातयति—√षद्लृ (विशरणे) +णिच् । दकारस्य तकारः=प्रसारयति । गतौ तु **शादयति**–चालयति ।

रुहः पोऽन्यतरस्याम् ॥४३॥

'रुह्' एतस्याङ्गस्य वा पकार आदेशो भवति णौ परतः । व्रीहीन् रोपयति / रोहयति ।

रोपयति—√रुह् (जन्मनि प्रादुर्भावे च)+णिच्, हकारस्य पकारः । पक्षे **रोहयति** ।

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥४४॥

प्रत्ययस्थात् ककारात् पूर्वस्याकारस्य इकार आदेशो भवति

आपि परे । स चेत् आप् सुपः परो न भवति । जटिलिका । मुण्डिका । कारिका । हारिका ।

प्रत्ययग्रहणं किम ? शका । 'स्थ' ग्रहणं विस्पष्टार्थम् । असुप इति किम् ? बहवः परिव्राजका यस्यां सा बहुपरिव्राजका मथुरा ।

❀ (वा०) मामकनरकयोरुपसंख्यानम् अप्रत्ययस्थत्वात् । ममेयं मामिका । नरान् कायति नरिका ।

❀ (वा०) त्यक्त्यपोश्चोपसंख्यानम् । 'उदीचामातः स्थाने यक्पूर्वायाः' इति विकल्पो मा भूत् । दाक्षिणात्यिका । इहत्यिका ।

सुपः—सुबन्तादित्यर्थः । **जटिलिका**—अज्ञाता जटिला इत्यर्थे **जटिला** +क 'प्रागिवात्कः' इत्यनेन । 'केऽणः' इति ह्रस्वत्वम् ततः जटिलक + टाप् । ककारात्पूर्वस्य आप्स्थानिकस्य अकारस्य इकारः । **कारिका**–√कृ+ण्वुल्=कारक+टाप् । **बहुपरिव्राजका**–सुप्–प्रत्यय–लोपेऽपि प्रत्यय-लक्षणेन 'सु' प्रत्ययपरता अस्ति ।

मामिका—मम इयम् इत्यर्थे युष्मद्+अण्+टाप् युष्मदः 'ममक' आदेशः । **नरिका**—नर √कै+क+टाप् । **दाक्षिणात्यिका**–दक्षिणस्यां दिशि भवा दक्षिणा+त्यक्+टाप् । **इहत्यिका**–इह भवा इह+त्यप् । सर्वत्र ककारात्पूर्वस्य अकारस्य इकारः ।

न यासयोः ॥४५॥

या–सा एतयोः इकार आदेशो न । यका । सका । या–सा इति निर्देशोऽतन्त्रम् । यत्तदोरुपलक्षणमेतत् यकाम् । तकाम् ।

❀ (वा०) प्रतिषेधे त्यकन उपसंख्यानम् । उपत्यका । अधित्यका ।

❀ (वा०) आशिषि चोपसंख्यानम् । जीवतात् जीवका । भूयात् भवका ।

❀ (वा०) उत्तरपदलोपे चोपसंख्यानम् । देवदत्तिका / देवका । यज्ञदत्तिका / यज्ञका ।

❀ (वा०) क्षिपकादीनां चोपसंख्यानम् । क्षिपका । ध्रुवका ।

❀ (वा०) तारका ज्योतिषि । तारका । अन्यत्र तारिका दासी ।

❀ (वा०) वर्णका तान्तवे । वर्णका । वर्णिका भागुरी लौकायतस्य ।

❀ (वा०) अष्टका पितृदैवत्ये । अष्टका । अष्टिका खारी ।

❀ (वा०) सूतकादीनां वा वाच्यः । सूतिका / सूतका । पुत्रिका / पुत्रका । वृन्दारिका / वृन्दारका ।

यका—या + अकच् (टेः प्राक्) = यका । **अतन्त्रम्**-अप्रधानम् । **यकाम्-तकाम्**-यत्तदोः द्वितीयान्ते रूपे । अत्रापि इत्वं न भवति ।

उपत्यका—उप + त्यकन् । **जीवका**-√जीव् + वुञ् + टाप् 'आशिषि च' इत्यनेन । **देवका**-देवदत्त + कन् + टाप् 'अनुकम्पायां कन्' इत्यनेन, ततः विभाषा उत्तरपदलोपः । **क्षिपका**-√क्षिप् + क + टाप् ।

तारका—√तॄ + ण्वुल् + टाप् । **तान्तवे**-प्रावरणविशेषे । **भागुरी** वर्णिकानाम्नी व्याख्या । **पितृदैवत्ये**—पितृ-देवतार्थे कर्मणि ।

❀ (वा०) पावकादीनां छन्दस्युपसंख्यानम् । हिरण्यवर्णाः शुचयः पावकाः ।

उदीचामातः स्थाने यकपूर्वायाः ॥४६॥

य-कपूर्वस्य स्त्रीप्रत्ययस्य आकारस्य स्थाने योऽकारः तस्य कात्पूर्वस्य इकारो न भवति । आचार्यग्रहणं विकल्पार्थम् । इभ्यका / इभ्यिका । क्षत्रियका / क्षत्रियिका । चटकका / चटकिका । मूषकका । मूषकिका ।

आत इति किम् ? सांकाश्ये भवा सांकाश्यिका ।

❀ (वा) धात्वन्तय-कोस्तु नित्यम् । सुनयिका । सुपाकिका ।

सूत्रे **य-कपूर्वायाः**—यश्च कश्च यकौ तौ पूर्वौ यस्याः, आतः शब्दे अर्थगतं स्त्रीत्वम् आरोप्य स्त्रीत्वनिर्देशः । तदाह वृत्तौ **स्त्रीप्रत्ययस्य आकारस्य** । **आचार्यग्रहणम्**—उदीचाम् इति तात्पर्यम् । **इभ्यका**—इभ्या एव इभ्या + क 'प्रागिवात्कः, केऽणः' इति ह्रस्वत्वम् । प्रतिषेधाभावे **इभ्यिका** । **सांकाश्यिका**—नात्र आतः स्थाने अकारः । **सुनयिका**—सु √नी + अच् + टाप् । **नित्यम्**—प्रतिषेधस्य प्रतिषेधात् । **सुपाकिका**-सु √पच् + घञ् + टाप् ।

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ।।४७।।

भस्त्रा—एषा—अजा—ज्ञा—द्वा—स्वा एषां नञ्पूर्वाणाम् अनञ्पूर्वाणामपि आतः स्थाने योऽकारस्तस्य इकारादेशो न भवति उदीचां मतेन । भस्त्रका / भस्त्रिका । अभस्त्रका / अभस्त्रिका इत्यादि ।

एषां द्वे नञ्पूर्वे न प्रयोजयतः । तेन अनेषका । अद्वके । इत्येव नित्यम् ।

इत्यादि—एषका / एषिका । अजा / अजिका । अनजका / अनजिका । ज्ञका / ज्ञिका । अज्ञका / अज्ञिका । द्वके / द्विके । स्वका / स्विका । अस्वका / अस्विका । न **प्रयोजयतः**-समासे कृते आकारस्य सुबन्तात्परत्वात् । सूत्रे **नञ्पूर्वाणामपि** इत्यत्र अपि शब्दात् अन्यपूर्वाणामपि भवति-**निर्भस्त्रका** / **निर्भस्त्रिका** । **बहुभस्त्रका** / **बहुभस्त्रिका** ।

अभाषितपुंस्काच्च ।।४८।।

अस्मान्नञ्पूर्वादनञ्पूर्वादपि इत् न उदीचां मतेन । खट्वा / खट्विका । अखट्वका / अखट्विका ।

खट्का—'खट्वा' शब्दो नित्यं स्त्रियामेव वर्तते इत्ययम्, अभाषितपुंस्कः (न भाषितः पुमान् यस्य सः) । **अखट्वका**—न खट्वा अखट्वा । एवम् **परमखट्वका** / **परमखट्विका** इत्यपि ।

आदाचार्याणाम् ॥४९॥

अभाषितपुंस्काद् विहितस्य आतः स्थाने योऽकारस्तस्य आकार आदेशो भवति । खट्वाका । मालाका ।

आचार्याणाम्—'उदीचाम्' इत्युक्तम्, ततो भिन्नानाम् । 'महर्षेः पाणिनेराचार्यस्य' इति केचित् । अत्र पक्षे गौरवार्थं बहुवचनं वेद्यम् । एवञ्च त्रीणि रूपाणि भवन्ति **खट्वका / खट्विका** / खट्वाका । नञ्पूर्वे नायं प्रवर्तते ।

ठस्येकः ॥५०॥

अङ्गस्य निमित्तं यः ठः तस्य 'इक' इत्ययमादेशः । आक्षिकः । लाविणकः ।

अङ्गस्य निमित्तम् = प्रत्ययः । 'ठक्' इत्यादिषु प्रत्ययेषु 'ठ्' इत्येतन्मात्रमेव प्रत्ययः 'क्' इत्संज्ञकः । अकारः उच्चारणार्थः । **आक्षिकः**—अक्षैर्दीव्यति इत्यर्थे अक्ष + ठक् । **लावणिकः**—लवणं पण्यम् अस्य इति लवण + ठञ् ।

इसुसुक्तान्तात्कः ॥५१॥

इस्—उस्—उक् इत्येवमन्तात् तकारान्ताच्चाङ्गादुत्तरस्य ठस्य 'क' आदेशः । सार्पिष्कः । धानुष्कः । शाबरजम्बुकः । मातृकम् । पैतृकम् । शाकृत्कः ।

सार्पिष्कः—सर्पिः पण्यम् अस्य इति सर्पिस् + ठक् । **धानुष्कः**—धनुः प्रहरणम् अस्य । **उक्**—प्रत्याहारः उ—ऋ—लृ वर्णास्तदन्तात् । **शाबरजम्बुकः**—शाबरजम्बू + जातार्थे ठञ् । केऽणः इति अकारस्य ह्रस्वत्वम् । **मातृकम्**—मातुरागतम् मातृ + ठञ् । **शाकृत्कः**—शकृता संसृष्टः शकृत् + ठञ् ।

❀ (वा०) दोष उपसंख्यानम् । दोर्भ्यां चरति दोष्कः ।

चजोः कु घिण्ण्यतोः ॥५२॥

चकारजकारयोः कवर्गादेशः घिति ण्यति च प्रत्यये परतः । पाकः । त्यागः । वाक्यम् ।

कवर्गादेशः—आन्तरतम्यात् चकारस्य ककारः, जकारस्य च गकारः। **पाकः**–√पच् + घञ्। **त्यागः**–त्यज् + घञ्। **वाक्यम्**–√वच् + ण्यत्।

न्यङ्क्वादीनां च ॥५३॥

न्यङ्कु–एवमादीनां कवर्गादेशः। 'नावञ्चेः' इति 'उ' प्रत्ययः न्यङ्कुः। भृगुः इत्यादि।

न्यङ्कुः—नि √अञ्च् + उ। **भृगुः**–भ्रस्ज + उ, 'प्रथिम्रदिभ्रस्जि ......' इत्यनेन' सम्प्रसारणं 'स' लोपश्च। उणादी एतौ।

हो हन्तेर्ञ्णिन्नेषु ॥५४॥

हन्तेर्हस्य कवर्गादेशो भवति। ञिति णिति प्रत्यये नकारे च परे। घातयति। घातकः। साधुघाती। घ्नन्ति। घ्नन्तु। अघ्नन्।

'ह' इति किम्? अलोऽन्त्यस्य मा भूत्।

घातयति—√हन् + णिच् + लट्। **साधुघाती**–साधु√हन् + णिनि। ञिति उदाहरणम् **घातः**– √हन् + घञ्। नकारे परतः–घ्नन्ति–√हन् + लट्→ति 'गमहन ......' इत्युपधालोपः। **अलोऽन्त्यस्य**–नकारस्य इत्यर्थः।

अभ्यासाच्च ॥५५॥

अभ्यासादुत्तरस्य हन्तेर्हकारस्य कवर्गादेशो भवति जिघांसति। जङ्घन्यते।

जिघांसति—हन्तुमिच्छति √हन् + सन् + लट्→ति। द्वित्वादि-कार्यम्। **जङ्घन्यते**-पुनः पुनः अतिशयेन वा हन्ति √हन् + यङ्। 'उगतोऽनुनासिकान्तस्य' इति नुक्। द्वित्वादिकार्ये जन् + घन्यते अनुस्वार-परसवर्णौ।

हेरचङि ॥५६॥

हिनोतेर्हकारस्य अभ्यासादुत्तरस्य कवर्गादेशो भवति अचङि। प्रजिघीषति। प्रजेघीयते। प्रजिघाय।

'अचङि' इति किम् ? प्राजीहयत् दूतम् ।

प्रजिघीषति—प्र √हि (गतौ) + सन् + लट् → ति । द्वित्वादि सन्नन्तकार्यम् । **प्रजेघीयते**—प्र √हि + यङ् । **प्रजिघाय**—प्र √हि + लिट् → तिप् → णल् । **प्राजीहयत्**—प्र √हि + णिच् + लुङ् 'णिश्री……' इत्यनेन च्लेः 'चङ्' आदेशः ।

सन्लिटोर्जेः ॥५७॥

सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यासः तस्मादुत्तरस्य कवर्गादेशो भवति । जिगीषति । जिगाय ।

लाक्षणिकत्वात् जिनातेर्ग्रहणं न भवति । जिज्यतुः ।

जिगीषति—√जि (जये) + सन् + लट् । **जिगाय**—√जि + लिट् । **जिज्यतुः**—√ज्या (वयोहानौ) + लिट् → तस् → अतुस् । अत्र 'ग्रहिज्या……' इति सूत्रेण सम्प्रसारणे कृते 'जि' इति रूपं निष्पद्यते अतः लाक्षणिकमिदम् ।

विभाषा चेः ॥५८॥

चिनोतेरङ्गस्य सन्लिटोर्योऽभ्यासः तस्मादुत्तरस्य कवर्गादेशो भवति विभाषा । चिकीषति / चिचीषति ।

चिकीषति—√चि (चयने) + सन् । लिटि उदाहरणम्-**चिकाय / चिचाय** । सर्वत्र कुत्वेन चकारस्य ककारः । पक्षे चकार एव ।

न क्वादेः ॥५९॥

क्वादेर्धातोः चजोः कवर्ग आदेशो न भवति । कूजो वर्तते । कूज्यं भवताम् । खर्ज्यम् ।

कूजः—√कूज् (अव्यक्तशब्दे) + अच् । **खर्ज्यम्**—√खर्ज (व्यथने) + ण्यत् । **भवताम्**—वृत्तौ 'भवता' इति तृतीयान्तमुक्तम् 'कृत्यानां कर्तरि वा' इति तृतीया-षष्ठ्यौ उभेऽपि भवतः । **गर्ज्यम्**—√गर्ज (शब्दे) + ण्यत् ।

अजिव्रज्योश्च ॥६०॥

अजि-व्रजि एतयोः कवर्ग आदेशो न भवति । समाजः । उदाजः । व्रजि—परिव्राजः । परिव्राज्यम् ।

'वी' भावविधानादजेर्ण्यति नास्ति उदाहरणम् । चकारोऽनुक्तसमुच्चयार्थः, तेन वजेः अपि प्रतिषेधो भवति । वाजः । वाज्यम् ।

समाजः—सम् √अज् + घञ् । **परिव्राज्यम्**—परि √व्रज + ण्यत् । **वी-भावः**......—'अजेर्व्यघञपोः' इति ण्यति √अज् इत्यस्य 'वी' भवति । **वाजः**—√वज् (गतौ) + घञ् ।

भुजन्युब्जौ पाण्युपतापयोः ॥६१॥

भुज-न्युब्ज एतौ निपात्येते यथासंख्यं पाणौ उपतापे चाभिधेये । भुज्यतेऽनेन इति भुजः पाणिः । 'हलश्च' इति घञ् । तत्र कुत्वाभावो गुणाभावश्च निपात्यः । अन्यत्र भोगः । न्युब्ज्य शेरतेऽस्मिन्निति न्युब्जः उपतापः रोगः । तथैव घञि कुत्वाभावो निपात्यते ।

भुजः—√भुज् (पालनाभ्यवहारयोः) + घञ् । **पाणिः**—बाहुरत्र अभीष्टोऽर्थः । **न्युब्जः**—अधोमुखीभूय, निश्चेष्टो भूत्वा वा । **न्युब्जः**—नि √उब्ज (आर्जवे) + घञ् √उद्ज इति मते दकारस्य बकारः ।

प्रयाजानुयाजौ यज्ञाङ्गे ॥६२॥

प्रयाज—अनुयाज एतौ शब्दौ निपात्यौ यज्ञाङ्गे । पञ्च प्रयाजाः । त्रयः अनुयाजाः । प्रयागः । अनुयागश्च अन्यत्र ।

प्रयाजाः = दर्श-पूर्णमासयज्ञयोः अङ्गभूताः यज्ञाः प्र √यज् + घञ् । कुत्वाभावो निपात्यते । एवम् **उपयाजाः** । **पत्नीसंयाजाः** इत्यादि । **प्रयाज-प्रभृतयः** प्रधानयागा भवन्ति ।

वञ्चेर्गतौ ॥६३॥

वञ्चेरङ्गस्य गतौ वर्तमानस्य कवर्गादेशो न भवति। वञ्च्यं वञ्चन्ति वणिजः । अन्यत्र वङ्कं काष्ठम् । कुटिलम् इत्यर्थः ।

वञ्च्यम् = गन्तव्यम् । √वचु······इत्यादयः अष्टौ धातवो गत्यर्थाः + कर्मणि घञ् । **वञ्चन्ति** = गच्छन्ति । **वङ्कम्**– √वञ्च + घञ् 'हलश्च' इत्यनेन ।

ओकः उचः के ॥६४॥

उचेर्धातोः के प्रत्यये ओकः इति निपात्यते । गुणकुत्वे अत्र निपात्येते । न्योकः शकुन्तः । न्योको वृक्षः ।

न्योकः—नि √उच् (समवाये) + क । न्युचति = निवसति पक्षि-समवायोऽस्मिन् इति । **वृक्षः**—वृत्तौ 'गृहम्' इति पाठो वर्तते । **ओकः** इत्यत्र अधिकरणार्थे 'क' प्रत्ययः । एवं **दिवौकसः** । **जलौकसः** इत्यत्र असुनि प्रत्यये गुण-कुत्वे निपात्ये ।

ण्य आवश्यके ॥६५॥

ण्ये परतः आवश्यकेऽर्थे च-जोः कवर्गादेशो न भवति । अवश्यवाच्यम् । अवश्यरेच्यम् ।

अवश्यवाच्यम्—अवश्यम् √वच् (परिभाषणे)+आवश्यकेऽर्थे ण्यत् । 'लुम्पेदवश्यमः कृत्ये·······' इति मकारलोपः । आवश्यकार्थादन्यत्र **वाक्यम्** । **रेक्यम्** ।

यजयाचरुचप्रवचर्चश्च ॥६६॥

एषां च ण्ये परतः कवर्गादेशो न भवति । याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यम् । अर्च्यम् ।

ऋदुपधादपि ऋचेरत एव वचनाद् ण्यद् भविष्यति ।

❀ (वा) त्यजेरुपसंख्यानम् । त्याज्यम् ।

अनावश्यकार्थं सूत्रम् । **अत एव वचनात्**—√ऋच (स्तुतौ) ऋगुपधः तस्मात् 'ऋदुपधाच्चाक्लृपि चृतेः' इत्यनेन 'क्यप्' भवति । अतः ज्ञापकादेवात्र ण्यत् । अन्यथा कवर्गादेशस्य निषेधो व्यर्थः स्यात् । **प्रवाच्यम्**–प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थः ।

वचोऽशब्दसंज्ञायाम् ॥६७॥

वचः अशब्दसंज्ञायां ण्ये परतः कवर्ग आदेशो न भवति । बाच्यमाह ।

अशब्दसंज्ञायां किम् ? अवघुषितं वाक्यमाह ।

वाच्यम्—वक्तुं योग्यम् निन्दा वा । **वाक्यम्**—साकांक्ष–सार्थकशब्द-समूहः । व्याकरणसम्मतं तिङन्तसुबन्तचयो वाक्यम् ।

प्रयोज्यनियोज्यौ शक्यार्थे ॥६८॥

एतौ शब्दौ निपात्येते शक्यार्थे । शक्यः प्रयोक्तुं प्रयोज्यः । नियोज्यः ।

शक्यार्थे किम् ? प्रयोग्यः । नियोग्यः ।

निपात्येते—कुत्वाभावेन । **प्रयोज्यः**–भृत्यः । प्र √युजिर्+ण्यत् । **नियोज्यः**–नियोक्तुं शक्यः । दासः इत्यर्थः ।

भोज्यं भक्ष्ये ॥६९॥

भोज्यम् इति निपात्यते भक्ष्येऽभिधेये । भोज्यः ओदनः । भक्ष्ये किम् ? भोग्यः कवलः ।

भोज्यः—√भुज् (पालनाभ्यवहारयोः) + ण्यत् । भक्ष्यम् अभ्यवहार्यम् । पालनार्थे तु भोग्याः–पालनीयाः अपूपाः इति भवति ।

घोर्लोपो लेटि वा ॥७०॥

घुसंज्ञानाम् अंगानां लेटि परतो वा लोपो भवति । दध॒द्रत्ना॑नि दा॒शुषे॑ । सोमो॑ ददद् गन्ध॒र्वाय॑ । न च भवति–त॒दग्नि॒रग्नये ददात् ।

दधत्—√धा+लेट् → झि → अत् । **ददत्**—√दा+लेट् → झि →अत् । उभयत्र आकारस्य लोपः । **ददात्**- √दा→लेट् → तिप्, तिपः इकारस्य लोपः 'आट्' आगमो दीर्घश्च । **दाशुषे**—यजमानाय ।

ओतः श्यनि ॥७१॥

ओकारान्तस्याङ्गस्य श्यनि परतो लोपो भवति । √शो–निश्यति । √छो–अवच्छ्यति । √दो–अवद्यति ।

√सो–अवस्यति ।

ओतः—'ओत्' इत्यत्र तकारो मुखसुखार्थः । √शो (तनूकरणे) √दो (अवखण्डने) √छो (छेदने) √षो (अन्तकर्मणि) इति धातवो बोध्याः ।

क्सस्याचि ॥७२॥

क्सस्य अजादौ प्रत्यये परतो लोपो भवति । अधुक्षाताम् । अधुक्षाथाम् । अधुक्षि ।

अधुक्षाताम्—√दुह् + लुङ् 'च्लिः' तस्य 'शल इगुपधादनिटः क्सः' इति 'क्स' आदेशः । तस्य 'अलोऽन्त्यस्य' इति नियमेन अकारस्य लोपः ।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥७३॥

दुह-दिह-लिह-गुह एषामात्मनेपदे दन्त्यादौ परतः क्सस्य वा लुग् भवति । अदुग्ध / अधुक्षत । अदुग्धाः / अधुक्षथाः । अदुग्ध्वम् / अधुक्षध्वम् । अदुह्वहि / अधुक्षावहि । अदिग्ध / अधिक्षत । अलीढ / अलिक्षत । अगूढ / अघुक्षत ।

लोप इति वर्तमाने लुग्ग्रहणं सर्वादेशार्थम् ।

अदुग्ध / अधुक्षत—क्सस्य सर्वस्य लुकि हकारस्य घकारः, तकारस्य च धकारः । लुगभावे धातोर्दकारस्य धकारः । **अलीढ**—क्सस्य लोपे ढ्लोप······सन्धिः ।

शमामष्टानां दीर्घः श्यनि ॥७४॥

शमादीनामङ्गानामष्टानां दीर्घो भवति श्यनि परतः ।

शाम्यति । ताम्यति । श्राम्यति । दाम्यति । क्षाम्यति। भ्राम्यति । क्लाम्यति । माद्यति ।

'अष्टानाम्' इति किम् ? अस्यति ।

शमादीनाम्—दिवादिगणे पठिताः अष्टौ धातवः । तदाह—

शमुस्तमुः श्रमुदमू भ्रमुक्षमुमदक्लमः ।
शमादयोऽमी पठिता दिवादिष्वष्ट कृष्टिभिः ॥

ष्ठिवुक्लम्याचमां शिति ॥७५॥

ष्ठिवु-क्लमु-आचम एषामङ्गानां दीर्घो भवति शिति परतः । ष्ठीवति । क्लामति । आचामति । क्लमु-ग्रहणं शबर्थम् । चमेः आङ्पूर्वस्य ग्रहणादिह न—उच्चमति । विचमति ।

ष्ठीवति—अत्र इकारस्य दीर्घः । **क्लामति**–'वा भ्राश ......क्लमु ...' इति सूत्रेण श्यनोऽभावे शप् । वृत्तौ 'क्लमि' पाठः । आङ्पूर्वस्य–तेन अनुपसर्गस्य, अन्योपसर्गस्य च न ।

क्रमः परस्मैपदेषु ॥७६॥

परस्मैपदे शिति परतः क्रमेरङ्गस्य दीर्घो भवति । क्रामति । क्रामतः । क्रामन्ति ।

परस्मैपदेषु किम् ? आक्रमते आदित्यः ।

इह उत्क्राम । संक्राम । इति हेर्लुकि कृते 'न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधाद् दीर्घो न प्राप्नोति । नैष दोषः । लुमता लुप्ते यदङ्गम्, तस्य कार्ये सति प्रतिषेधः । न च हौ क्रमिरङ्गम् किं तर्हि ? शपि ।

क्रामति—√क्रमु (पादविक्षेपे)+लट्→तिप् । **आक्रमते**–आङ्पूर्वः √क्रम 'आङ उद्गमने' इत्यात्मनेपदम् । **न च** ......**शपि**—हौ परतः √क्रम इत्यस्य 'अङ्ग' संज्ञा नास्ति । शपा व्यवधानात् ।

इषुगमियमां छः ॥७७॥

इषु-गमि-यम, एषामङ्गानां शिति परतश्छकार आदेशो भवति। इच्छति। गच्छति। यच्छति।

इच्छति—√इषु (इच्छायाम्) + लट् → ति 'तुदादिभ्यः शः'। **गच्छति**—√गम् + लट् → ति अत्र शप्। **यच्छति**—√यम (उपरमे) + लट् → ति अत्रापि शप्।

√इषु इत्युदितस्येह ग्रहणम्, तेनात्र न—इष्यति। इष्णाति।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥७८॥

पा—आदीनाम् अङ्गानां क्रमात् पिब-आदयः आदेशाः स्युः शिति परतः। पा—पिबति।

पिबतेर्लघूपधगुणः प्राप्नोति, सः 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति न भवति। अथवा अकारान्तोऽयमादेशः आद्युदात्तो निपात्यते।

घ्रा—जिघ्रति। ध्मा—धमति। स्था—तिष्ठति। म्ना—मनति। √दाण—यच्छति। दृशि—पश्यति। अर्ति—ऋच्छति। सर्ति—धावति। शद्—शीयते। सद्—सीदति। श्रीकृष्णो जयति।

√पा—इत्यादीनां धातूनां **पिब**—इत्यादयः आदेशाः यथासंख्यं भवन्ति।

अङ्गवृत्ते ··· निष्ठितस्य—एषा परिभाषा अस्ति। तेन 'पा' इत्यस्य 'पिब' आदेशे कृते सति पुनर्गुणादयो न भवन्ति।

अकारान्तः—'पिब' इत्यादेशे इगुपधत्वमेव नास्ति। **निष्ठितस्य**—प्रयोगार्हस्य। **धावति**—√सृ गतौ इत्यस्य वेगे एव 'धौ' आदेशः इष्यते। तेनान्यत्र **सरति, अनुसरति** इत्यादयो भवन्ति।

ज्ञाजनोर्जा ॥७९॥

ज्ञा—जन् इत्येतयोरङ्गयोः 'जा' इत्ययम् आदेशो भवति शिति परतः। जनेर्दैवादिकस्य ग्रहणम्। जानाति। जायते।

जानाति—√ज्ञा (अवबोधने) + लट् → तिप् 'क्र्यादिभ्यः श्ना' इति 'श्ना' शित् । **दैवादिकस्य**—न तु जुहोत्यादेः । तत्र शितोऽसम्भवः ।

प्वादीनां ह्रस्वः ॥८०॥

पू—इत्येवमादीनाम् अङ्गानां ह्रस्वो भवति शिति परतः । पुनाति ।

पू--आदयः क्र्यादिषु पठ्यन्ते । √पूञ् (पवने) इत्यतः प्रभृति √प्ली (गतौ) वृत् इति यावत् केचिदिच्छन्ति । वृत्करणमेतल्ल्वादीनां प्वादीनां च समाप्त्यर्थमिति ।

केषाञ्चित् आगणान्ताः प्वादयः, तेषां मते 'जानाति' इत्यत्रापि ह्रस्वः प्राप्नोति । दीर्घकरणसामर्थ्यान्न भविष्यति ।

पुनाति—√पूञ् (पवने)+लट् → तिप् श्ना । एवं √लूञ्-लुनाति । **वृत्**—वृत्ताः=समाप्ताः इत्यर्थः ।

मीनातेर्निगमे ॥८१॥

मीनातेरङ्गस्य निगमविषये ह्रस्वो भवति शिति परतः । प्रमिणन्ति व्रतानि । भाषायां प्रमीणाति ।

निगमे—वेदे । **प्रमिणन्ति**—प्र √मीञ् (हिंसायाम्) + लट् → झि → अन्ति, श्ना । 'श्नाभ्यस्तयोरातः' इत्याकारलोपः । 'श्ना' विकरणनिर्देशात् दिवादिगणे पठितस्य √मीङ् इत्यस्य न ग्रहणम् ।

मिदेर्गुणः ॥८२॥

मिदेरङ्गस्य गुणो भवति शिति परतः । मेद्यति । मेद्यतः । मेद्यन्ति ।

मेद्यति—√ञिमिदा (स्नेहने) इति दिवादिगणे पठितस्य ग्रहणम् । भौवादिकस्य तु 'पुगन्त......' इति गुणः सिद्धः ।

जुसि च ॥८३॥

जुसि च प्रत्यये परतः इगन्तस्याङ्गस्य गुणो भवति । अजुहवुः । अबिभयुः । अबिभरुः । अजिह्रयुः । अजागरुः ।

अजुहवुः—√हु (दानादनयोः) + लङ् → झि → जुस् । शपः श्लुः । 'श्लौ' इति द्वित्वम् । गुणे कृते ओकारस्य 'अव्' आदेशः । **अबिभयुः**—√ञिभी (भये) + लङ् → झि ।

अबिभरुः—√डुभृञ् (धारणपोषणयोः) + लङ्→झि । **अजिह्रयुः**—√ह्री (लज्जायाम्) + लङ् → झि । **अजागरुः**—√जागृ (निद्राक्षये) + लङ् → झि । अन्तिमम् उदाहरणद्वयं वृत्तौ न लिखितम् ।

सार्वधातुकार्धधातुकयोः ॥८४॥

सार्वधातुके आर्धधातुके च परत इगन्ताङ्गस्य गुणो भवति । सार्वधातुके—नयति । भवति । तरति । आर्धधातुके—कर्ता । हर्ता ।

सार्वधातुकार्धधातुकयोरिति किम् ? अग्निकाम्यति ।

नयति—√नी + लट् → तिप् 'तिङ्शित्सार्वधातुकम्' इति 'सार्वधातुक'संज्ञा ।

कर्ता—कृ + तृच् 'आर्धधातुकं शेषः' इति 'तृच्' प्रत्ययस्य 'आर्धधातुक' संज्ञा ।

जाग्रोऽविचिण्णल्ङित्सु ॥८५॥

जागर्तेरङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः । जागरयति । जागरकः । साधुजागरी ।

वृद्धिविषये प्रतिषेधविषये च जागर्तेरयं गुण आरभ्यते । तस्मिन् सति उपधावृद्धिः प्राप्नोति । सा न । यदि स्यात् गुणोऽनर्थकः स्यात् ।

अविचिण्णल्ङित्सु किम् ? जागृविः । चिण्—अजागारि । णल्-जजागार । ङित्—जागृतः ।

जागरयति—√जागृ (निद्राक्षये) + णिच् + लट् → तिप् । **जागरकः**—√जागृ + ण्वुल् → अक । **साधुजागरी**—√जागृ + णिनि (ताच्छील्ये) सर्वत्र ऋकारस्य गुणः 'अर्' ।

उपधावृद्धिः—गुणे कृते (जागर्) इत्यवस्थायाम् 'अत उपधायाः' इत्यनेन । **जागृविः**—√जागृ + वि (क्विन्) ।

जागृतः—√जागृ + लट् → तस् । 'सार्वधातुकमपित्' इति तसो ङित्त्वम् ।

पुगन्तलघूपधस्य च ॥८६॥

पुगन्तस्य लघूपधस्याङ्गस्य इको गुणः स्यात् सार्वधातुकार्धधातुकयोः । ह्रेपयति । क्नोपयति । भेत्ता । भेदनम् ।

पुगन्तस्य—पुक् अन्तो यस्य स तस्य । **लघूपधस्य**—लघ्वी उपधा = अन्त्यादलः पूर्वो वर्णः यस्य स तस्य । **ह्रेपयति**—√ह्री (लज्जायाम्) + णिच् + लट् । 'अर्ति ह्रीव्लीरीक्नू ...' इति पुक् पित्त्वासार्वधातुकम् । **क्नोपयति**—√क्नूयी (शब्दे) + णिच् + लट् । लघूपधस्योदाहरणम् **भेत्ता**—√भिदिर् (विदारणे) + तृच् । **भेदनम्**—√भिदिर् + ल्युट् । उभयम् आर्धधातुकस्योदाहरणम् ।

नाभ्यस्तस्याचि पिति सार्वधातुके ॥८७॥

अभ्यस्तस्याङ्गस्य लघूपधस्य अजादौ पिति सार्वधातुके परतो गुणो न भवति । नेनिजानि । अनेनिजम् । वेविजानि । अवेविजम् ।

अभ्यस्तस्य किम् ? वेदानि । 'अचि' इति किम् ? नेनेक्ति । पित्करणम् उत्तरार्थम् ।

नेनिजानि—√णिजिर् (शौचपोषणयोः) + लोट् → मिप् 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लुः । अभ्यासस्य पूर्वनिकारस्येकारस्य गुणः । उत्तरस्यानेन निषेधः । **वेविजानि**—√विजिर् (पृथग्भावे) + लोट् → मिप् । **अनेनिजम्**—√णिजिर् + लङ् → अम् ।

उत्तरार्थम्—अपित्सार्वधातुकस्य ङित्त्वादेव गुणो न भविष्यति ।

भूसुवोस्तिङि ॥८८॥

भू-सू इत्येतयोः तिङः सार्वधातुके परतो गुणो न भवति । अभूत् । अभूः । सुवै । सुवावहै । लुग्विकरणस्य सूतेर्ग्रहणम् ।

अभूत्—√भू+लुङ् → तिप् सिचो लुक् । **सुवै**—षूङ् (प्राणिगर्भविमोचने) + लोट् → मिप् । अदादित्वात् शपो लुक् । **लुग्विकरणस्य**—अदादेरेव नतु तुदादेः √षू (प्रेरणे), दिवादेः षूङ् (प्राणिप्रसवे) इत्यनयोः । तत्र विकरणेन तिङो व्यवधानात् ।

उतो वृद्धिर्लुकि हलि ॥८९॥

लुग्विषये उकारस्य वृद्धिः स्यात् पिति हलि सार्वधातुके । यौति । स्तौति । 'नाभ्यस्तस्य' इत्येतदिहानुवर्तते—योयोति एवमादिषु न ।

यौति—√यु (मिश्रणामिश्रणयोः) + लट् → तिप् । **स्तौति**—√ष्टुञ् (स्तुतौ) + लट् → तिप् । अदादित्वात् शपो लुक् ।

ऊर्णोतेर्विभाषा ॥९०॥

ऊर्णोतिरंगस्य विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके परतः । प्रोर्णौति / प्रोर्णोति ।

प्रोर्णोति—प्र √ऊर्णुञ् (आच्छादने) + लट् → तिप् । शपो लुक् । वृद्धेरभावपक्षे गुणः ।

गुणोऽपृक्ते ॥९१॥

ऊर्णोतेरपृक्ते पिति हलि सार्वधातुके परतो गुणो भवति । प्रौर्णोत् । प्रौर्णोः ।

प्रौर्णोत्—प्र √ऊर्णुञ् + लङ् → तिप् । अयं गुणः विभाषावृद्धेरपवादः ।

तृणह इम् ॥६२॥

'तृणह' इत्येतस्याङ्गस्य 'इम्' आगमो भवति हलादौ पिति सार्वधातुके । तृणेढि ।

सूत्रे **तृणह** इति श्नम्सहितो धातुर्निदिष्टः । **तृणेढि**—√तृह (हिंसायाम्) इत्यस्य ग्रहणम् । इम् मित्त्वात् श्नमः परो भवति–तृ न (श्नम्) + इ (इम्) ह + लट् → ति सन्धिकार्यम् ।

ब्रुव ईट् ॥६३॥

'ब्रू' इत्येतस्मादुत्तरस्य हलादेः पितः सार्वधातुकस्य ईट् आगमो भवति । ब्रवीति । ब्रवीषि ।

सूत्रे **ब्रुवः** इत्यत्र पञ्चमी, न षष्ठी । 'तस्मादित्युत्तरस्य' इति सूत्रबलात् 'सार्वधातुके' इत्यत्र सप्तम्याः षष्ठीत्वं प्रकल्प्यते । **ब्रवीति**—√ब्रूञ् (व्यक्तायां वाचि) + लट् → तिप् शपो लुक्, ईटि कृते अकारस्य गुणः 'अव्' आदेशश्च ।

यङो वा ॥६४॥

यङः उत्तरस्य हलादेः पितः सार्वधातुकस्य वा ईट् आगमो भवति । लालपीति । न च–वर्वर्ति ।

लालपीति—√लप् + यङ् तस्य लुक् (द्वित्वादि) + लट् तिप् ईट् आगमः । **वावदीति** । एवं त्रिधा बुद्धो वृषभो रोरवीति । **वर्वर्ति**–अभ्यासस्य 'रुक्' आगमः ।

ईटि कृते यङन्तस्य पित्त्वाभावात् यङ्लुकि उदाहरणं दत्तम् ।

तुरुस्तुशम्यमः सार्वधातुके ॥६५॥

तु-रु-स्तु-शम-अम एभ्यः परस्य सार्वधातुकस्य हलादेर्वा ईट् आगमः । उत्तवीति / उत्तौति । उपरवीति / उपरौति । स्तवीति / स्तौति । शमीध्वम् / शाम्यध्वम् । अभ्यमीति / अभ्यमति ।

सार्वधातुकग्रहणम् अपिदर्थम् । स्तुवीते ।

√तु—सौत्रो धातुः वृद्धौ, मतान्तरेण हिंसायाम् । आपिशलास्तु 'छन्दसि' एव सूत्रप्रवृत्तिं स्वीकुर्वन्ति । तेषां मते 'तुरु'''' सार्वधातुके छन्दसि' इति पाठः ।

अस्तिसिचोऽपृक्ते ॥९६॥

अस्तेः सिजन्ताङ्गाच्चोत्तरस्य अपृक्तसार्वधातुकस्य 'ईट्' आगमः । अस्तेः—आसीत् । आसीः । सिजन्तादङ्गात्--अकार्षीत् । अहार्षीत् ।

❀ (वा०) आहो भुवश्चेण् नेष्यते । आत्थ । अभूत् ।

सूत्रे **अपृक्ते** इति षष्ठयर्थे सप्तमी, तेन **अपृक्तस्य** इत्यर्थं लाभः । 'अपृक्त एकाल् (एकः अल् = वर्णः यस्मिन् सः) प्रत्ययः' । **आसीत्**—टित्त्वात् तिपः पूर्वम् ईट् । **आहो भुवश्च**—स्थानिवद्भावेन 'ब्रू' इत्यस्य 'आह' आदेशेऽपि ग्रहणात् सिप् स्थानीय थलः पित्त्वाच्च 'ब्रुव ईट्' इत्यनेन 'ईट्' प्राप्तः । **अभूत्**—अत्र 'अस्तेर्भूः' इत्यनेन 'अस्' धातुत्वमादाय 'ईट्' प्राप्तः ।

बहुलं छन्दसि ॥९७॥

अस्तिसिचोरपृक्तस्य सार्वधातुकस्य बहुलम् ईट् आगमो भवति । सर्वमेवेदं सलिलं सर्वमाः । अहरेवासीत् ।

सिचः—गोभिरक्षाः । प्रत्यञ्चमत्साः । अभैषीर्मा पुत्रि ।

आः —आसीत् इति भवति । 'ईट्' आगमाभावे 'हल्ङ्याभ्यः''''''' अन्त्यस्य तकारस्य लोपे सकारस्य रुत्वविसर्गौ । **अक्षाः**—√क्षर (सञ्चलने) + लुङ् । **अत्साः**—√त्सर (छद्मगतौ) + लुङ् । सर्वत्र 'ईट्' न भवति । **अभैषीः**—अत्र 'ईट्' तथा माङ्योगेऽपि अट् भवति ।

रुदश्च पञ्चभ्यः ॥९८॥

रुदादिभ्यः पञ्चभ्यः उत्तरस्य अपृक्तसार्वधातुकस्य ईट् आगमः । अरोदीत् । अस्वपीत् । प्राणीत् । अजक्षीत् ।

सूत्रे **रुदः** इति व्यत्ययेन बहुवचनस्थाने एकवचनम् । 'रुदादिभ्यः पञ्चभ्यः' इत्ययेन 'इट्' इत्यस्यापवादः । √रुद्–√स्वप्–√श्वस्–√अन–√जक्ष इति रुदादयः । √श्वस्–अश्वसीत् इत्युदाहरणम् ।

प्राणीत्—प्र √अन + लङ् → तिप् 'अनितेः इति नकारस्य णत्वम् ।

अड् गार्ग्यगालवयोः ॥९९॥

एभ्यः परस्य अपृक्तसार्वधातुकस्य अट् आगमो भवति गार्ग्य-गालवयोर्मतेन । अरोदत् । अस्वपत् । अश्वसत् । प्राणत् । अजक्षत् ।

अट्-ईट् इत्युभयोर्विधानसामर्थ्यादिव पर्यायः सिद्धः । गार्ग्य-गालव-ग्रहणम् पूजार्थम् । **एभ्यः**—पूर्वसूत्रोक्तेभ्यः √रुद्–आदिभ्यः ।

अदः सर्वेषाम् ॥१००॥

अदः परस्य अपृक्तसार्वधातुकस्य अट् आगमः सर्वेषां मतेन । आदत् ।

अदः—√अद् (भक्षणे) इत्यस्मात् । **आदत्**–√अद् + लङ् → तिप् । **सर्वेषाम्** इति कथनं पूजार्थम् ।

अतो दीर्घो यञि ॥१०१॥

अतोऽङ्गस्य दीर्घः स्याद् यञादौ सार्वधातुके । पचामि ।

अतः—अदन्तस्य । **पचामि**—√पच् + लट् → मिप् शप् आगमः तदा 'पच' इति अदन्तम् अङ्गम्, तस्य दीर्घः ।

सुपि च ॥१०२॥

यञादौ सुपि अतोऽङ्गस्य दीर्घः । रामाय । रामाभ्याम् ।

रामाय—राम + ङे → 'य' आदेशे कृते यञ्त्वाद्दीर्घः । यद्यपि अदन्तत्वादेव 'ङे' विभक्तेः 'य' आदेशो जातः इति स स्वनिमित्तम् अदन्तत्वं न हन्यादिति 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' तथापि 'कष्टाय क्रमणे' इति निर्देशेन तस्याः परिभाषाया अनित्यत्वं ज्ञाप्यते ।

बहुवचने झल्येत् ॥१०३॥

झलादौ सुपि बहुवचने परतोऽङ्गस्य एकारः । रामेभ्यः ।

रामेभ्यः—राम + चतुर्थी बहुवचने 'भ्यस्' मकारान्तस्य अकारस्य एकारः ।

ओसि च ॥१०४॥

ओसि च परे अतोऽङ्गस्य एकारः । रामयोः ।

रामयोः—राम + षष्ठी द्विवचने 'ओस्' अकारस्य एकारे कृते तस्य 'अय्' आदेशः ।

आङि चापः ॥१०५॥

आङ् इति 'टा' । तस्मिन् ओसि च आवन्तस्य एकारः । खट्वया । खट्वयोः ।

सूत्रे **चापः**—च + आपः चकारात् 'ओस्' विभक्तिर्गृह्यते । **आपः**—आवन्ताः = टाप्-डाप्-चाप् प्रत्ययान्ताः । **टा**—पूर्वे आचार्याः तृतीयैकवचनं 'टा' इति 'आङ्' नाम्ना निर्दिशन्ति स्म ।

सम्बुद्धौ च ॥१०६॥

आवन्तस्य एकारादेशो भवति सम्बुद्धौ । हे खट्वे ।

सम्बुद्धिः—सम्बोधनम् = प्रथमैकवचनम् ।

अम्बार्थनद्योर्ह्रस्वः ॥१०७॥

अम्बार्थानां नद्यन्तानाञ्च ह्रस्वो भवति सम्बुद्धौ परतः । हे अम्ब ! हे अक्क ! हे अल्ल ! नद्यन्तानाम्—हे कुमारि !

❀ (वा०) डलकवतीनां प्रतिषेधो वाच्यः । हे अम्बाडे ! हे अम्बाले ! हे अम्बिके !

❀ (वा०) छन्दसि वेति वाच्यम् । हे अम्बाड ! हे अम्बाडे ! हे अम्बाल ! हे अम्बाले । हे अम्ब ! हे अम्बे !

❀ (वा०) मातॄणां मातच् पुत्रायार्हते । मातॄणां 'मातच्' आदेशो वक्तव्यः सम्बुद्धौ । पुत्राय=पुत्रमभिधातुम् । कीदृशाय ?

अर्हते=मात्रा व्यपदेशमर्हति श्लाघनीयत्वाद्यः पुत्रस्तदर्थम् । हे गार्गीमातः ! कुन्तीमातः ! 'नद्यृतश्च' इति समासान्तापवादो 'मातच्' आदेशः । चित्करणमन्तोदात्तार्थम् ।

सूत्रे **अम्बार्थाः**—मातुरर्थकाः अम्बा-अक्का-अल्ला इति त्रयः शब्दाः । **ह्रस्वः**—अन्त्यस्य दीर्घाकारस्य । नद्यः-नदीसंज्ञकाः । अकारान्तेषु **हे वीर-बन्धु ! डलकवतीनाम्**-यासां श्रुतीनाम् ड-ल-क वर्णाः सन्ति तासाम् । असंयुक्तानामेवात्र ग्रहणम्, तेन संयुक्तानां क्क-ल्ल सहितानां अक्क-अल्ल आदीनां भवत्येव ह्रस्वत्वम् ।

गार्गीमातः—यः पुत्रः गार्ग्या मात्रा व्यपदेशेन प्रशंसामर्हति । **अर्हते**—√अर्ह + लट् → शतृ प्रशंसायाम् तस्मै ।

ह्रस्वस्य गुणः ॥१०८॥

ह्रस्वान्तस्याङ्गस्य गुणो भवति सम्बुद्धौ परतः । हे अग्ने ! हे वायो !हे गौरि ! हे व्रह्मबन्धु !

एवमादीनां ह्रस्वत्वविधानसामर्थ्याद् गुणो न भवति । यदीह गुण इष्टः स्यात् अम्बार्थानां ह्रस्वः, इत्युक्त्वा 'नदी-ह्रस्वयोर्गुणः' इत्येवं ब्रूयात् ।

सूत्रे **ह्रस्वस्य** इति अङ्गस्य विशेषणम् । **हे अग्ने** !—अग्नि शब्दस्य इकारस्य गुणः किञ्चित्स्थानानन्तर्यात् एकारः । एवं **हे वायो** ! इत्यत्र उकारस्य ओकारः ।

जसि च ॥१०९॥

जसि च परतो ह्रस्वान्तस्याङ्गस्य गुणो भवति । अग्नयः । वायवः । बुद्धयः । धेनवः ।

❀ (वा०) जसादिषु छन्दसि वा वचनम् प्राङ्णौ चङ्युप-धायाः । इतः प्रभृति छन्दसि वेति वाच्यम् ।

अग्नयः—अग्नि + जस् गुणे एकारे कृते तस्य 'अय्' आदेशः । **धेनवः**–धेनु + जस् उकारस्य गुणः ओकारः तस्य 'अव्' आदेशः ।

जसादिषु—जस्-प्रकारेषु प्रत्ययेषु । छन्दसि विभाषायाः उदाहरणानि– अम्बे / अम्ब । अत्र ह्रस्वविकल्पः । पूर्णा दर्वि / दर्वी । 'ह्रस्वस्य गुणः' इत्यस्य विकल्पः ।

ऋतो ङिसर्वनामस्थानयोः ॥११०॥

ऋकारान्तस्याङ्गस्य ङौ, सर्वनामस्थाने च परतो गुणो भवति । मातरि । पितरि । मातरौ । मातरः । मातरम् । मातरौ ।

ऋतः—तपरत्वं मुखसुखार्थम् । ङौ सर्वनामस्थाने परतः दीर्घ ॠकारो न सम्भवति ।

मातरि—मातृ + ङि, ऋकारस्य गुणः 'अर्' ।

घेर्ङिति ॥१११॥

घ्यन्तस्याङ्गस्य ङिति परतो गुणो भवति । अग्नये । वायवे । अग्नेः २ । वायोः २ । 'सुपि' इत्येव—पट्वी ।

घ्यन्तस्य—घिसंज्ञकस्य । येषां 'शेषो घ्यसखि' इत्यनेन 'घि' संज्ञा विहिता, तेषामित्यर्थः । **ङिति**–ङे-ङसि-ङस्-ङि विभक्तयो ङितः । २—ङसि-अन्तम्, ङस्-अन्तं च अर्थात् पञ्चमी-षष्ठी उभययोरप्येकवचने **अग्नेः** इत्येव रूपं भवति । **पट्वी**–पटु + ङीष् । नायं 'सुप्' ङित् ।

आण्नद्याः ॥११२॥

नद्यन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य आट्-आगमो भवति । कुमार्यै । ब्रह्मबन्ध्वै ।

सूत्रे **नद्याः** इति पञ्चम्यन्तं पदम्, तद्बलात् पूर्वसूत्रात् अनुवृत्तं **ङिति** पदम् षष्ठ्यन्तत्वेन प्रकल्प्यते ।

कुमार्यै—कुमारी + ङे 'आट्' टित्त्वात् आदौ भवति कुमारी आ ए इति स्थितौ 'आटश्च' इति वृद्धिः ऐकारः । ईकारस्य यण् यकारः ।

याडापः ॥११३॥

आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य याट्-आगमः । खट्वायै । बहुराजायै । ङ्याप्-ग्रहणे दीर्घग्रहणात् अत्र न–अतिखट्वाय ।

खट्वायै—खट्वा (टाप् अन्तः) + ङे याटि कृते वृद्धिः । **बहुराजायै**-बहुराजा (डाप्-प्रत्ययान्तः) + ङे । चापः उदाहरणम्-**कारीषगन्ध्यायै** । **अतिखट्वाय**-स्थानिवद्भावेन प्राप्तिराशङ्किता । लाक्षणिकत्वान्न भवति ।

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥११४॥

आबन्तादङ्गादुत्तरस्य सर्वनाम्नः ङितः प्रत्ययस्य स्याट्-आगमो भवति ह्रस्वश्च सर्वनाम्नः । सर्वस्यै । विश्वस्यै । तस्यै । कस्यै ।

स्याड्ढ्रस्वश्च—स्यात् + ह्रस्वश्च । **सर्वस्यै**-सर्वा + ङे स्याटि कृते वृद्धिः, सर्वा-अन्त्याकारस्य ह्रस्वत्वं च ।

विभाषा द्वितीयातृतीयाभ्याम् ॥११५॥

आभ्यामुत्तरस्य ङितो विभाषा स्याट्-आगमो भवति, ह्रस्वश्चाङ्गस्य । द्वितीयस्यै / द्वितीयायै । द्वितीयस्या / द्वितीयायाः इत्यादि । तद्वत् तृतीयायाः ।

द्वितीयायै—अत्र 'याडापः' इत्यनेन पक्षे 'याट्' । **तृतीयायाः**-तृतीयस्यै / तृतीयायै इत्यादि ।

ङेराम्नद्याम्नीभ्यः ॥११६॥

नद्यन्तात् आबन्तात् 'नी' शब्दाच्चोत्तरस्य ङेः 'आम्' इत्यादेशो भवति । गौर्याम् । ब्रह्मबन्ध्वाम् । आपः–खट्वायाम् । नो–ग्रामण्याम् ।

ङेः–'ङि' विभक्तेः । **गौर्याम्**-गौरी + ङि → आम् आट् यण्

दीर्घश्च । **खट्वायाम्**—खट्वा + ङि → आम् 'याडापः' इत्यनेन याट् आगमः । एवं **सर्वस्याम्**-अत्र स्याट् आगमः । एते आट्-याट्-स्याट् आगमाः 'ह्रस्वनद्यापो नुट्' इति सूत्रेण क्रियमाणं नुटं प्रबाध्य भवन्ति ।

इदुद्भ्याम् ॥११७॥

इकारोकारान्ताभ्यां नदीसंज्ञकाभ्यां परस्य ङेः 'आम्' आदेशो भवति । मत्याम् । धेन्वाम् ।

मत्याम्—मति + ङि → आम् यणादेशः ।

औत् ॥११८॥

इकारोकाराभ्यामुत्तरस्य ङेः 'औत्' आदेशो भवति । सख्यौ । पत्यौ ।

यन्न नदी संज्ञं नापि घि संज्ञं तदिहोदाहरणम् ।

सख्यौ—सखि + ङि → औत् → यण् ।

अच्च घेः ॥११९॥

घेः उत्तरस्य ङेः औकारादेशो भवति तस्य च घेः अकारः । अग्नौ । वायौ । मतौ । धेनौ ।

घेः—'घि' संज्ञकात् । **अग्नौ**-अग्नि + ङि → औ, अग्नेः इकारस्य अकारः, ततो वृद्धिसन्धिः ।

आङो नाऽस्त्रियाम् ॥१२०॥

घेः उत्तरस्य आङो 'ना' इत्ययमादेशो भवति अस्त्रियाम् । अग्निना । वायुना । अमुना कुलेन ।

स्त्रियां तु मत्या । धेन्वा ।

देविका देवता द्वन्द्वे स्फायो भुज मीनातेरतोदीर्घो विंशतिः ॥

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
सप्तमाध्यायस्य तृतीयः पादः ।

आङः—'टा' (तृतीयैकवचने) विभक्तेः । अमुना—अदस् + टा → ना अदसो 'मु' अन्त्यादेशे कृते 'अस्त्रियाम्' इति कथनेन नपुंसकेऽपि 'ना' भवति ।

सप्तमाध्यायस्यास्मिन् तृतीये पादे देविकाशिंशपा ·· ···, देवता द्वन्द्वे च, स्फायो वः, भुजन्युब्जौ पाण्युपतापयोः, मीनातेर्निगमे, अतो दीर्घो यञि इत्येतेभ्यः आरभ्य विंशतिः सूत्राणीति गुणनेन (२०×६) विंशत्युत्तर-(१२०) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
सप्तमाध्यायस्य तृतीयः पादः ।

अथ सप्तमाध्याये चतुर्थः पादः

णौ चङ्युपधाया ह्रस्वः ॥१॥

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वो भवति। अचीकरत्। अजीहरत्।

द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः परत्वात् ह्रस्वत्वमेव भवति। तस्मिन् कृते द्विर्वचनम्। इह तु 'मा भवान् अटिटत्' इत्यत्र नित्यत्वात् द्विर्वचनं प्राप्नोति। तथा सति ह्रस्वभाविनः आकारस्य उपधात्वं विहितम् इति ह्रस्वो न स्यात्। नैष दोषः, ओणेर्ऋदित्करणं ज्ञापकं नित्यमपि द्विर्वचनम् उपधाह्रस्वत्वेन बाध्यते।

'णौ' इति किम्? चङ्युपधाया ह्रस्व इत्युच्यमाने 'अलीलवत्' इत्यत्र वचनसामर्थ्यात् अन्तरङ्गामपि वृद्धिम् 'आव्' आदेशं च बाधित्वा ह्रस्व एव स्यात्। 'अदीदपत्' इत्यत्र ह्रस्वत्वेन पुक् बाध्येत।

उपधाया इति किम्? अचकांक्षत्। तदेतदुपधाग्रहणम् उत्तरार्थमवश्यं कार्यम्, तदिहापि ह्रस्वत्वं निवर्तयतीत्येवमर्थम्। 'येन नाव्यवधानम्' इत्येतन्नाश्रयितव्यम्।

चङ्परे—चङ् परो यस्मात् (णेः) तस्मिन्। **अचीकरत्**—√कृञ् + णिच् + लुङ् च्लि → चङ् णिलोपः। **अटिटत्**—√अट् + णिच् + लुङ्। **नित्यत्वात्**—'अजादेर्द्वितीयस्य' इति द्विर्वचनम् कृतेऽपि ह्रस्वे प्राप्नोति,

अकृतेऽपि । **ज्ञापकम्**—तत्र ऋदित्करणं 'नाग्लोपि ·····' इत्यनेन ह्रस्वप्रतिषेधार्थम् तत्तु द्विर्वचनस्य बाधकतयैव सिद्धम् इति ह्रस्वत्वस्य बलवत्त्वं ज्ञापयति । **अचकांक्षत्**—कांक्ष् + णिच् + लुङ् अत्र आकारस्य उपधात्वं नास्ति ।

❀ (वा०) उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् । वादितवन्तं प्रयोजितवान् इति अवीवदत् वीणां परिवादकेन । अत्र √वद् + णिच् + णिच् + लुङ् । अत्रापि उपधाया ह्रस्वो भवति ।

नाग्लोपिशास्वृदिताम् ॥२॥

अग्लोपिनामङ्गानां शासेः ऋदितां च णौ चङ्युपधाया ह्रस्वो न भवति । अग्लोपिनाम्—मालाम् आख्यत् अममालत् । राजानम् अतिक्रान्तवान् अत्यरराजत् । शासेः—अशशासत् । ढौकृ—अडुढौकत् ।

अग्लोपिनाम्—'अक्' इति प्रत्याहारः अको लोपः अग्लोपः सः अस्ति एषाम् इति अग्लोपिनो धातवः तेषाम् । **अममालत्**—माला + णिच् 'तत्करोति तदाचष्टे' इत्यनेन । 'णौ इष्ठवद्भावः' इति 'तुरिष्ठेमेयःसु' इति तस्य लोपः ततो लुङ् । **अत्यरराजत्**—'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इत्यनेन 'णिच्' तस्य लोपश्च ततो लुङ् । **अडुढौकत्**—√ढौकृ (गतौ) + लुङ् । **'अभ्यासे चर्च'** इति जश्त्वेन ढकारस्य डकारः ।

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥३॥

एषामङ्गानां णौ चङि उपधाया ह्रस्वो न भवत्यन्यतरस्याम् । अबिभ्रजत् / अबिभ्राजत् । अबीभसत् / अबभासत् । इत्यादि ज्ञेयम् ।

एषाम्—√भ्राजृ √भासृ (दीप्तौ) √भाष् (व्यक्तायां वाचि) √दीप् (दीप्तौ) √जीव (प्राणधारणे) √मील (निमेषणे), √पीड् (अवबाधने) इति धातूनाम् । **अबिभ्रजत्**—ह्रस्वपक्षे पूर्वस्य इत्त्वम् । इत्यादि-**अबीभषत् / अबभाषत** । **अदीदिपत् / अदिदीपत्** । **अजीजिवत् / अजिजीवत्** । **अमीमिलत् / अमिमीलत्** । **अपीपिडत् / अपिपीडत्** । सर्वत्र ह्रस्वपक्षे अभ्यासस्य दीर्घत्वम् ।

लोपः पिबतेरीच्चाभ्यासस्य ॥४॥

पिबतेरङ्गस्य णौ चङि उपधाया लोपो भवति, अभ्यासस्य च ईकारादेशो भवति। अपीप्यत्। अपीप्यताम्। अपीप्यन्। उपधालोपे कृते 'ओः पुयण्वचनं ज्ञापकम्-णौ कृतं स्थानिवद्-भवति इति स्थानिवद्भावाद् द्विर्वचनम्।

पिबतेः—√पा (पाने) इत्यस्य। **अपीप्यत्**-√पा + णिच् + लुङ् 'शाच्छासाह्वाव्यावेपाम्' इति युक्। आकारलोपेऽपि ज्ञापकबलेन द्विर्वचने स्थानिवद्भावः।

तिष्ठतेरित् ॥५॥

तिष्ठतेरङ्गस्य णौ चङि उपधाया इकार आदेशो भवति। अतिष्ठिपत्। अतिष्ठिपताम्।

अतिष्ठिपत्—√स्था + णिच् + लुङ् पुक् आगमः। सन्वद्भावात् अभ्यासस्येत्त्वम्।

जिघ्रतेर्वा ॥६॥

जिघ्रतेरङ्गस्य णौ चङि उपधाया वा इकार आदेशो भवति। अजिघ्रिपत् / अजिघ्रपत्।

अजिघ्रपत्—इत्त्वाभावे 'णौ चङ्युपधाया ह्रस्वः' इत्यनेन उपधाया ह्रस्वः अकारः।

उर्ऋत् ॥७॥

णौ चङ्युपधाया ऋवर्णस्य स्थाने ऋकार आदेशो भवति वा। इररारामपवादः। √कृत (संशब्दने)-अचीकृतत् / अचिकर्तत्। √वृतु (वर्तने)-अवीवृतत् / अववर्तत्। √मृजू (शुद्धौ)-अमीमृजत् / अममार्जत्।

इरराराम्—इर्-अर्-आर् इत्येतेषाम्। त्रिषु धातुषु क्रमशः

ऋकारस्य 'उपधायाश्च' इति 'इर्', 'पुगन्तलघूपधस्य' इति 'अर्' 'मृजेर्वृद्धिः' इति 'आर्' आदेशाः प्राप्ताः। तेषाम् अपवादः, पक्षे तेऽपि भवन्ति।

नित्यं छन्दसि ॥८॥

णौ चङ्युपधाया ऋवर्णस्य स्थाने नित्यम् ऋकारादेशो भवति छन्दसि। अवीवृधत्।

अवीवधत्—√वृधु (वृद्धौ) + णिच् + लुङ् → तिप्।

दयतेर्दिगि लिटि ॥९॥

दयतेरङ्गस्य 'दिगि' इत्यादेशो भवति लिटि परतः। दिग्ये। दिग्याते। दिग्यिरे।

देङो ग्रहणम्, नतु 'दय' दाने इत्यस्य।

❀ (वा०) दिग्यादेशे द्वित्वबाध इष्यते।

दिग्ये—√देङ् (रक्षणे) + लिट् → त → एश्। 'दिगि' आदेशे कृते 'एरनेकाचः ......' इत्यनेन यण्। वृत्तौ 'अवदिग्ये' इत्युदाहृतम्।

देङः—√देङ् (रक्षणे) इत्यस्य। √दय इत्यस्मात् लिटि आम् विहितः। **द्वित्वबाधः**—पूर्वसूत्रात् 'नित्यम्' इति पदमनुवर्त्तते, तेन 'दिगि' आदेशानन्तरं लिडाश्रितं प्राप्तं द्वित्वं निवर्तते।

ऋतश्च संयोगादेर्गुणः ॥१०॥

ऋकारान्तस्याङ्गस्य संयोगादेर्गुणो भवति लिटि परतः। सस्वरतुः। सस्वरुः।

प्रतिषेधविषयेऽपि यथा स्यादित्यारम्भः। वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते। सस्वार।

❀ (वा०) संयोगोपधग्रहणं कर्त्तव्यं कृञर्थे। सञ्चस्करतुः। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण इति दर्शने लिटि, तदाश्रये च द्विर्वचने कृते पश्चादुपसर्गसम्बन्धे सति 'अडभ्यासव्यवायेऽपि'

इति सुट् क्रियते । एवं च कृत्वा 'सङ्क्रृषीष्ट' इति सुटो बहिरङ्ग-लक्षणस्यासिद्धत्वात् 'ऋतश्च संयोगादेः' इति 'इट्' आगमो न भवति ।

सस्वरतुः—√स्वृ (शब्दोपतापयोः) + लिट् → तस् → अतुस् 'उरत्' इति अभ्यासस्य अत्त्वम् रपरत्वञ्च, हलादिशेषः ।

प्रतिषेधविषये—यत्र कित्त्वात् 'क्ङिति च' इत्यनेन गुणः प्रतिषिद्ध-स्तत्र । **पूर्वम्** ··· ···**क्रियते**—पूर्वम् अन्तरङ्गत्वात् द्वित्वं पश्चात् बहिरङ्गत्वात् 'सुट्' इति तात्पर्यम् ।

ऋच्छत्यॄताम् ॥११॥

तौदादिक ऋच्छेः, 'ऋ' धातोः ॠकारान्तानां चावृद्धि-निमित्ते लिटि गुणः स्यात् । आनर्च्छतुः । आनर्च्छुः । √ऋ—आरतुः । आरुः । ॠकारान्तानाम्—निचकरतुः । निचकरुः ।

ऋच्छतेरलघूपधत्वादप्राप्तो गुणो विधीयते । ॠकारान्तानां तु वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । निचकार । निजगार ।

सूत्रे **ऋच्छेः**······**ॠकारान्तानां च**—ऋच्छति + ऋ + ॠताम् इति सन्धि-विच्छेदः । तेनोक्तार्थलाभः । **ॠकारान्ताः** √कॄ √गॄ आदयः ।

ऋच्छतेः········अन्तरङ्गत्वात् 'छे च' इत्यनेन तुकि नायं लघू-पधो धातुः ।

शॄद्‌प्रां ह्रस्वो वा ॥१२॥

शॄ—दॄ, पॄ एषामङ्गानां लिटि परतो वा ह्रस्वो भवति । विशश्रतुः / विशशरतुः । विदद्रतुः / विददरतुः । निपप्रतुः / निपपरतुः ।

शॄ (हिंसायाम्), √**दॄ** (विदारणे), √**पॄ** (पालनपूरणयोः) इति । **विशश्रतुः**—वि √शॄ + लिट् → तस् → अतुस् ह्रस्वे कृते 'ऋ' इत्येतस्य यण् रकारः । पक्षे गुणः **विशशरतुः** ।

ह्रस्वस्य विधाने न कृते गुणस्य च विकल्पे गुणाभाव पक्षे

'ॠत इद् धातोः' इति ॠकारस्य इत्वं √पॄ इत्यत्र च 'उदोष्ठ्यपूर्वस्य' इति उत्त्वं प्रसज्येत ।

केऽणः ॥१३॥

क प्रत्यये परतः अणो ह्रस्वो भवति । ज्ञका । कुमारिका ।

ज्ञका—जानाति या √ज्ञा + क + टाप् = ज्ञा अज्ञाता 'ज्ञा' अथवा अनुकम्पिता 'ज्ञा' इति विग्रहे ज्ञा + कन् तदन्तात् टाप् । अनेन कात् पूर्वस्य आकारस्य ह्रस्वत्वम् ।

न कपि ॥१४॥

कपि परतो ह्रस्वो न भवति । बहुकुमारीकः ।

बहुकुमारीकः—बह्व्यः कुमार्यः यस्य सः बहुकुमारी + 'नद्यृतश्च इति कप् ।

आपोऽन्यतरस्याम् ॥१५॥

आबन्तस्याङ्गस्य ह्रस्वो भवति अन्यतरस्यां कपि परतः । बहुखट्वाकः / बहुखट्वकः देशः ।

बहुखट्वाकः—बहुव्रीहौ कृते 'शेषाद् विभाषा' इति कप् ।

ऋदृशोऽङि गुणः ॥१६॥

ऋवर्णान्तानां दृशेश्च अङि परतो गुणो भवति । शलाकाङ्गुष्ठकोऽकरत् । अदर्शत् । अदर्शताम् । अदर्शन् ।

अकरत्—√कृ + लुङ्, च्लि → अङ्, छन्दसि अङि परतः ऋकारस्य 'अर्' गुणः ।

अदर्शत्—√दृशिर् (त्रिलोचने) + लुङ्, अत्र 'इरितो वा' इत्यनेन च्लेः अङ् ।

अस्यतेस्थुक् ॥१७॥

अस्यतेः अङ्गस्य थुक्-आगमो भवति अङि परतः । आस्थत् । आस्थताम् । आस्थन् ।

आस्थत्—√असु (क्षेपणे) + लुङ्, 'अस्यति...... ' इत्यनेन च्लेः 'अङ्'। 'थुक्' कित्त्वात् अन्त्यावयवो भवति।

श्वयतेरः ॥१८॥

श्वयतेरङ्गस्य अकार आदेशो भवति अङि परतः। अश्वत्। अश्वताम्। अश्वन्।

अश्वत्—√टुओश्वि (गतिवृद्धयोः) + लुङ् 'जॄस्तम्भु.......' इत्यनेन च्लेः 'अङ्'। 'श्वि' इत्यस्य इकारस्य अकारे अङः अकारेण सह तस्य पररूप आदेशः।

पतः पुम् ॥१९॥

पतेरङ्गस्य पुम्–आगमो भवति अङि परतः। अपप्तत्। अपप्तताम्। अपप्तन्।

अपप्तत्—√पत्लृ (गतौ) + लुङ्। लृदित्वात् 'पुषादि.... ' सूत्रेण च्लेः 'अङ्'। 'पुम्' मित्त्वात् पकारस्य अकारात् अन्त्यो भवति।

वच उम् ॥२०॥

वचः अङ्गस्य 'उम्' आगमो भवति अङि। अवोचत्।

अवोचत्—√वच् (परिभाषणे) + लुङ् 'अस्यतिवक्ति.......' इत्यनेन च्लेः अङ्। 'उम्' अन्त्यादचः परो भवति। तदनन्तरम् अ + उ = ओ।

शीङः सार्वधातुके गुणः ॥२१॥

सार्वधातुके परतः शीङः अङ्गस्य गुणो भवति। शेते। शयाते।

शेते—√शीङ् (स्वप्ने) + लट् → त ईकारस्य गुणः एकारः।
शयाते—√शीङ् + लट् → आताम्। एकारस्य 'अय्' आदेशः।

अयङ् यि क्ङिति ॥२२॥

यादौ क्ङिति शीङः 'अयङ्' इत्ययम् आदेशो भवति। शय्यते। शय्येते।

शय्यते—√शीङ् + लट् → त भाववाच्ये 'सार्वधातुके यक्' इत्यनेन यक्। शीङः ईकारस्य 'अयङ्'।

उपसर्गाद्ध्रस्व ऊहतेः ॥२३॥

उपसर्गादुत्तरस्य ऊहतेरङ्गस्य ह्रस्वो भवति यादौ किति ङिति। समुह्यते। समुह्येते।

'उपसर्गात्' इति किम्? ऊह्यते। 'यति' इत्येव समूहितम्।

समूह्यते—सम् √ऊह (वितर्के) अकारस्य ह्रस्वः। **यिति**—यकारादौ।

एतेर्लिङि ॥२४॥

एतेरङ्गस्य उपसर्गादुत्तरस्य लिङि यादौ किति ङिति परतो ह्रस्वो भवति। उदियात्। समियात्।

उदियात्—उत् + √इण् (गतौ) + लिङ् (आशिषि) → तिप् 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे कृते पुनः अनेन ह्रस्वो भवति। **समियात्**—'सम्' उपसर्गः।

अकृत्सार्वधातुकयोर्दीर्घः ॥२५॥

अकृद्यकारे असार्वधातुके यकारे च किति ङिति परतः अजन्तस्याङ्गस्य दीर्घो भवति। भृशायते। चीयते। स्तूयते। स्तूयात्।

अकृत्—कृद्भिन्नः प्रत्ययः। **असार्वधातुकम्**—सार्वधातुकभिन्नः प्रत्ययः यकारादिः। **भृशायते**—अभृशो भृशो भवति इति भृश + क्यङ्। **चीयते** √चिञ् (चयने) + कर्मणि लट्।

च्वौ च ॥२६॥

'च्वि' प्रत्यये परतोऽजन्तस्याङ्गस्य दीर्घो भवति। शुचीकरोति। शुचीभवति।

शुचीकरोति—अभूततद्भावे च्विः अशुचिं शुचिं करोति इति।

रीङ् ऋतः ॥२७॥

ऋकारान्तस्याङ्गस्य अकृत्सार्वधातुकयकारे च्वौ च परे रीङ्-आदेशो भवति। पित्रीयति। पित्रीभूतः। 'क्ङिति' इति निवृत्तम्।

पित्रीयति—आत्मनः पितरम् इच्छति इति पितृ + **क्यच्**। ऋकारस्य 'रीङ्'। **निवृत्तम्**—तेन **पित्र्यम्** इति सिद्ध्यति।

रिङ् शयग्लिङ्क्षु ॥२८॥

शे, यकि, यादावसार्वधातुके लिङि च ऋतः 'रिङ्' आदेशो भवति। रीङं बाधित्वा रिङ्-विधि-सामर्थ्यात् 'अकृत्सार्वधातुकयोः' इति न दीर्घः। आद्रियते। क्रियते। क्रियात्।

ऋतः—ऋकारान्तस्य अङ्गस्य। **आद्रियते**—आ √दृङ् (आदरे) + लट् → त, तुदादित्वात् 'शः'। तस्मिन् परतः ऋकारस्य 'रिङ्'। यकि—**क्रियते**। आशीर्लिङि—**क्रियात्**।

गुणोऽर्तिसंयोगाद्योः ॥२९॥

ऋकारान्तानां संयोगादीनाम् अर्तेश्च यकि लिङि च यकारादावार्धधातुके परतो गुणो भवति।

अर्यते। अर्यात्। स्मर्यते। स्मर्यात्।

अर्यते—√ऋ (गतौ) + कर्मणि लट् यक्। आशीर्लिङि **अर्यात्**। संयोगादेरुदाहरणम् **स्मर्यते**—√स्मृ + कर्मणि लट् यक्।

यङि च ॥३०॥

यङि च परतो अर्ति-संयोगाद्योः ऋतो गुणो भवति। अरार्यते। सास्वर्यते।

❀(वा०) 'अर्तेः अटयत्यर्यशूणोर्तीनामुपसंख्यानम्' इति यङ्।

❀ (वा०) हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः । जेघ्नीयते ।

अरार्यते—√ ऋ + यङ् गुणः 'अर्' द्वित्वं हलादिशेषः । ततः 'दीर्घोऽकितः' इति दीर्घः ।

अरार्यते इति भाष्य प्रयोग बलेनात्र यकारपररेफस्य 'नन्द्राः संयोगादयः' इत्यनेन द्वित्वनिषेधो न ।

जेघ्नीयते—'अभ्यासाच्च' इति कुत्वं गुणश्च । हिंसायामेव, गत्यर्थे तु **जङ्घन्यते** ।

ई घ्राध्मोः ॥३१॥

अनयोर्यङि ईकारादेशो भवति । जेघ्रीयते । देध्मीयते ।

जेघ्रीयते—√घ्रा (घ्राणे) + यङ् । **देध्मीयते**—√ध्मा (शब्दे) + यङ् ।

अस्य च्वौ ॥३२॥

अवर्णान्तस्याङ्गस्य च्वौ परतः ईकारादेशो भवति । शुक्लीकरोति । शुक्लीभवति । 'च्वौ च' इति दीर्घस्यापवादोऽयं योगः ।

शुक्लीकरोति—अशुक्लं शुक्लं करोति इति 'अभूततद्भावे 'च्वि' । **अपवादः**—दीर्घे सति 'शुक्लाभवति' इति प्रयोगः स्यात् ।

क्यचि च ॥३३॥

क्यचि प्रत्यये परतः अवर्णान्तस्याङ्गस्य ईकारादेशो भवति । पुत्रीयति । पटीयति । मालीयति । पृथग्योगकरणमुत्तरार्थम् ।

पुत्रीयति—आत्मनः पुत्रम् इच्छति इति पुत्र + क्यच् । **मालीयति**—आत्मनः मालाम् इच्छति ।

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥३४॥

अशनाय–उदन्य–धनाया एतानि निपात्यन्ते यथासंख्यं

बुभुक्षा–पिपासा–गर्ध इत्येतेष्वर्थेषु । अशनायति भवति बुभुक्षा चेत् । उदन्यति पिपासा चेत् । धनायति गर्धश्चेत् ।

अशनाया—अशन, अन्त्यस्यात्वं क्यचि । **उदन्या**—'उदक' शब्दस्य 'उदन्' आदेशः क्यचि । **धनाया**—धनस्यात्त्वं क्यचि । **अर्थेषु**—गम्यमानेषु इति शेषः । **गर्धः**—इच्छा, लोभः ।

नच्छन्दस्यपुत्रस्य ॥३५॥

छन्दसि विषये पुत्रवर्जितस्याङ्गस्य क्यचि यदुक्तं तन्न भवति । किञ्चोक्तम् ? दीर्घत्वम्, ईत्वं च । स्वे॒दयुः । सुम्न॒युः ।

अपुत्रस्येति किम् ? पुत्री॒यन्तः ।

स्वेदयुः—स्वेद + क्यच् + उ 'क्याच्छन्दसि' इत्यनेन ।

❀ (वा) अपुत्रादीनामिति वक्तव्यम् । **जनीयन्तः** ।

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ॥३६॥

एतानि छन्दसि विषये निपात्यन्ते ।

'दुष्ट' शब्दस्य 'दुरस्' भावः अधीयानो दुरस्युः । दुष्टीयति इति प्राप्ते ।

'द्रविण' शब्दस्य 'द्रविणस्' भावो निपात्यते द्रविणस्युः । द्रविणीयति इति प्राप्ते ।

'वृष' शब्दस्य 'वृषण' भावः वृषण्यति । वृषीयति इति प्राप्ते ।

'रिष्ट' शब्दस्य रिषण् भावः रिष॒ण्यति । रिष्टीयति इति प्राप्ते ।

अधीयानः—वृत्तौ **अवियोना** इति पाठः । **द्रविणीयति** प्रभृतयः भाषायां भवन्ति । **रिष्टम्** = नाशः हानिः ।

अश्वाघस्यात् ॥३७॥

अश्व–अघ इत्येतयोः क्यचि परतः आकारादेशो भवति

छन्दसि विषये । अश्वायन्तो मघवन् । मा त्वा वृका अघायवो विदन् ।

एतदेव आद्वचनं ज्ञापकं 'नच्छन्दस्यपुत्रस्य' इति दीर्घस्यापि प्रतिषेधो भवति ।

एतदेव ...... भवति—अन्यथा 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः सिद्ध एव, व्यर्थमेतत्सूत्रम् ।

देवसुम्नयोर्यजुषि काठके ॥३८॥

देव–सुम्न इत्येतयोः क्यचि परतः आकार आदेशो भवति यजुषि काठके । देवायन्तो यजमानम् । सुम्नायन्तो हवामहे ।

काठके—कठस्येदं **काठकम्** 'गोत्रचरणाद् वुञ्' तस्मिन् । कठेन प्रोक्ते यजुषि इत्यर्थः ।

कव्यध्वरपृतनस्यर्चि लोपः ॥३९॥

एषां क्यचि परतो लोपो भवति ऋचि विषये । कव्यन्तः सुमनसः । अध्वर्यन्तो यजमानाः । पृतन्यन्तस्तिष्ठन्ति ।

कव्यन्तः, अध्वर्यन्तः, पृतन्यन्तः—सर्वत्र क्यचि तदन्तेभ्यः शतृ । 'अलोऽन्त्यस्य' इत्यन्त्याकारस्य लोपः ।

द्यतिस्यतिमास्थामित्ति किति ॥४०॥

एषामङ्गानाम् इकार आदेशो भवति तादौ किति परतः । द्यति–निर्दितः । निर्दितवान् । अवसितः । मितः । स्थितः ।

निर्दितः—निर् √दो (अवखण्डने) + क्त । **अवसितः**—अव √षो (अन्तकर्मणि) + क्त । **मितः**—√मा (माने) + क्त । √माङ्–√मेङ् इत्यनयोरपि इत्वं ज्ञेयम् । **स्थितः**—√ष्ठा (गतिनिवृत्तौ) + क्त ।

शाच्छोरन्यतरस्याम् ॥४१॥

अनयोरन्यतरस्याम् इकार आदेशो भवति तादौ किति √शा–निशितम् / निशातम् । √छा–छितम् / छातम् ।

√शा—शो (तनूकरणे) √छा-√छो (छेदने)।

❀ (वा०) श्यतेरित्त्वं व्रते नित्यम्। **संशितो ब्राह्मणः।** संशितव्रतः इत्यर्थः। **संशितम्** = सम्पादितं व्रतं येन सः। परे तु व्यवस्थितविभाषायाः आश्रयणात् सिद्धमिमं प्रयोगं मन्यन्ते—

देवत्रातो गलो ग्राहः इति योगे च सद्विधिः।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः॥

अस्याः अर्थः—**देवत्रातः** (संज्ञायां तकारस्य नकारो न भवति।)

गलः—√गॄ + अच् (प्राण्यङ्गे नित्यं लकारः।)

ग्राहः—√ग्रह् + ण (जलचरार्थे नित्यं 'ण' प्रत्ययः)।

इति योगे सद्विधिः न—सत्=शतृ-शानच् प्रत्ययौ। यथा **वर्षतीति धावति। हन्तीति पलायते** अत्र 'इति' योगे न 'शतृ' प्रत्ययः।

मिथस्ते न विभाष्यन्ते—एकस्मिन्नेवार्थे विधिसूत्रैः विकल्पो न क्रियते।

गवाक्षः—वातायने नित्यम् 'अवङ्' भवति अन्यत्र **गोऽक्षम् / गवाक्षम्** इत्युभयम्।

संशितव्रतः—व्रते नित्यम् इत्वम्, अन्यत्र विकल्पेन।

दधातेर्हिः ॥४२॥

दधातेरङ्गस्य 'हि' इत्ययमादेशो भवति तादौ किति। हितः। हितवान्।

हितः—√डुधाञ् + क्त। श्तिपा निर्देशाद् यङ् लुकि न। दाधीतः। दाधीतवान्।

जहातेश्च क्त्वि ॥४३॥

जहातेरङ्गस्य 'क्त्वा' प्रत्यये परतो 'हि' इत्ययमादेशो भवति। हित्वा राज्यं वनं गतः।

हित्वा—√ओहाक् (त्यागे) + क्त्वा। √ओहाङ् (गतौ) इत्यस्य तु **हात्वा** भवति। एतदर्थमेव 'जहातेः' इति श्तिपा निर्देशः।

विभाषा छन्दसि ॥४४॥

छन्दसि विषये विभाषा 'हि' आदेशः क्त्वा प्रत्यये। हित्वा शरीरं यातव्यम् / हात्वा।

हात्वा–'घुमास्था ....' इत्यनेन ईत्वं न छान्दसत्वात्।

सुधितवसुधितनेमधितधिष्वधिषीय च ॥४५॥

एतानि छन्दसि विषये निपात्यन्ते। सुधित-वसुधित-नेमधित इति सु-वसु-नेम पूर्वस्य दधातेः क्त प्रत्यये परतः इत्वं निपात्यते। गर्भं माता सुधितम्। सुहितम् इति भाषायाम्। वसुधितमग्नौ जुहोति। वसुहितम् इति प्राप्ते। नेमधिता बाधन्ते। नेमहिता इत्येवं प्राप्ते।

धिष्व सोमम्। धत्स्व इति प्राप्ते। धिषीय। धासीय इति प्राप्ते।

इत्वम्—√धा इत्यस्य आकारस्य। **सुहितम्**—'दधातेर्हिः' इति 'हि' आदेशः। **धिष्व**—√धा + लोट् → थास् → से एकारस्य 'सवाभ्यां वामौ' इति वकारः। इत्वं 'श्लौ' इत्यनेन द्वित्वाभावश्च निपात्यते। **धिषीय**—√धा + आर्शीलिङ् → इट्, धातोः इत्वम् निपात्यते।

दो दद् घोः ॥४६॥

'दा' इत्येतस्य घुसंज्ञकस्य 'दद्' इत्ययम् आदेशो भवति तादौ किति। दत्तः। दत्तवान्।

'द' इति किम्? धीतः। धेटः एतद्रूपम्। 'घोः' इति किम्? दातम्।

अयमादेशः थान्त इष्यते। एतत् ह्युक्तम्–

तान्ते दोषो दीर्घत्वं स्याद् दान्ते दोषो निष्ठानत्वम्।

धान्ते दोषो धत्वप्राप्तिस्थान्तेऽदोषः तस्मात्थान्तः।

यदि 'दस्ति' इति तकारादौ दीर्घत्वं तदा तान्तेऽप्यदोषः । दान्त-धान्तयोरपि 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।' इति नत्वधत्वे न भविष्यतः इत्यदोषः ।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥
'अच उपसर्गात्तः' इति प्राप्ते निपात्यन्ते ।

धीतः—'घुमास्था ' इति सूत्रेण धातोः आकारस्य ईकारः । एतद्रूपम् √धेट् (पाने) इत्यस्य । **दातम्**—√दाप् (लवने) इत्यस्य रूपम् । एवं √दैप (शोधने) इत्यस्य अवदातं मुखम् इति भवति ।

थान्तः—सूत्रे 'दद्' इति पदं जश्त्वेनापि भवति इति थान्तं स्वीकृत्याह भाष्यकारः । **दीर्घत्वम्**—'दस्ति' इति सूत्रेण । **निष्ठानत्वम्**—'रदाभ्यां निष्ठातो नः ......' इति सूत्रेण । **धत्वप्राप्तिः**—'झषस्तथोर्धोऽधः' इत्यनेन । **सन्निपात** ......—तकारादिं निमित्तीकृत्य जातो 'दद्' आदेशः तं विहन्तुं न शक्नोति ।

आदिकर्मणि—क्रियायाः प्रारम्भे । **अवदत्तम्, विदत्तम्, प्रदत्तम्, सुदत्तम्, अनुदत्तम्**—क्रमशः अव-वि-प्र-सु-अनु पूर्वकाद् √दा इत्यस्मात् 'क्तः' सर्वत्र √दा इत्यस्य 'दद्' भावः अन्यत्र **अवत्तम्** इत्यादि ।

अच उपसर्गात्तः ॥४७॥

अजन्तादुपसर्गादुत्तरस्य 'दा' इत्येतस्य 'घु' संज्ञकस्य 'त' आदेशो भवति तादौ किति प्रत्यये । प्रत्तम् । अवत्तम् । नीत्तम् । वीत्तम् ।

अच इति किम् ? निर्दत्तम् ।

उपसर्गादिति पञ्चमीनिर्देशात् आदेरलः प्राप्नोति ।

तत्र समाधिमाहुः—'अचः' इत्येतदावर्तते—पञ्चम्यन्तमुपसर्गविशेषणार्थम् । अपरमपि षष्ठ्यन्तं स्थानिनिर्देशार्थम्, इत्याकारस्य स्थाने तकारो भवति । द्वितकारको वा निर्देशः । सोऽनेकाल्त्वात् सर्वस्य भविष्यति ।

'अपो भि' इत्यत्र पञ्चम्यन्तम् 'अचः' इत्यनुवर्तते, तेन पकारमात्रस्य भविष्यति ।

प्रत्तम्—प्र √दा + क्त आकारस्य 'त' आदेशे दकारस्य च चर्त्वेन तकारः । **नीत्तम्**—नि √दा + क्त 'दस्ति' इति इकारस्य दीर्घत्वम् । **सर्वस्य भविष्यति**—'अनेकाल् शित् सर्वस्य' इत्यनेन ।

अपो भि ॥४८॥

'अप्' इत्येतस्याङ्गस्य भादौ प्रत्यये परे 'त' इत्ययमादेशो भवति । अद्भिः । अद्भ्यः ।

सूत्रे **त**—अकारः उच्चारणार्थः । **अद्भिः**—अप् + भिस् पकारस्य तकारे कृते तस्य जश्त्वेन दकारः ।

सः स्यार्धधातुके ॥४९॥

सकारान्तस्याङ्गस्य सकारादौ आर्धधातुके परतः 'त' इत्ययम् आदेशो भवति । वत्स्यति । अवत्स्यत् । विवत्सति । जिघत्सति ।

सूत्रे **सि** = सकारादौ । **त**—अकारः उच्चारणार्थः । 'निर्दिश्यमानस्य आदेशाः भवन्ति ।' इति सकारस्यैव तकारो भवति । **वत्स्यति**—√वस (निवासे) + लृट् स्य आगमः । **अवत्स्यत्**—लृङ् लकारः । **विवत्सति**—√वस् + सन् । **जिघत्सति**—√अद + सन् 'लुङ्सनोर्घस्लृ' इत्यनेन धातोः 'घस्लृ' आदेशः ।

तासस्त्योर्लोपः ॥५०॥

तासेः अस्तेश्च सस्य लोपः स्यात् सकारादौ प्रत्यये परे । कर्तासि । कर्तासे । त्वम् असि । व्यतिसे । अस्तेरकारसकारयोर्लुप्तयोः प्रत्ययमात्रमेवेदम् । तस्य 'सात्पदाद्योः' इति षत्व-निषेधः ।

कर्तासि—√कृञ् + लुट् → सिप् तास्-आगमः । **कर्तासे**—अत्र आत्मनेपदे 'थास्' इत्यस्य 'से' आदेशः । **असि**—√अस् + लट् → सिप् । **व्यतिसे**—वि अति √अस् + लट् → थास् → से । अत्र 'कर्तरि

कर्मव्यतिहारे' इत्यात्मनेपदम् । अस्तेः ···निषेधः–'आदेशप्रत्यययोः' इत्यनेन प्राप्तस्य षत्वस्य ।

रि च ॥५१॥

रेफादौ प्रत्यये परे तास्-अस्त्योः सकारस्य लोपो भवति । कर्तारौ । कर्तारः । अस्तेः लिटि–व्यतिरे ।

कर्तारौ—√कृञ् + लुट् + तस् + रौ । **कर्तारः**+ लुट् → झि + रस् । **व्यतिरे**—वि अति √अस् + लिट् → झ → 'इरयो रे' इत्यनेन 'रे' आदेशः । भाषायां प्रयोगादर्शनात् छन्दसि उदाहृतम् ।

ह एति ॥५२॥

तास्–अस्त्योः सस्य हः स्यात् एति परे । कर्ताहे । अस्तेः–व्यतिहे ।

कर्ताहे—√कृञ् + लुट् → आत्मनेपदे इट् टेः एत्वे इकारस्य 'ए' । **व्यतिहे**--वि अति √अस् + लुट् → इट् → ए । उभयत्र सकारस्य हः ।

यीवर्णयोर्दीधीवेव्योः ॥५३॥

यादौ, इवर्णादौ च प्रत्यये दीधी-वेव्योर्लोपो भवति । यकारादौ–आदीध्य गतः । आदीध्यते । आवेव्यते । इवर्णादौ–आदीधिता । आवेविता ।

सूत्रे **यीवर्णयोः**—यिः = यकारादिः इवर्णः = इकारः तयोरितरेतर-योग द्वन्द्वः यीवर्णौ तयोः । **आदीध्य गतः**–आ √दीधीङ् + क्त्वा → ल्यप् । अन्त्यस्य ईकारस्य लोपः । **आवेव्य**–आ √वेवीङ् + क्त्वा + ल्यप् । **आदीध्यते**–आत्मनेपदे लटि 'सार्वधातुके यक्' इति यक्-आगमः । **आदी-धिता**–आ √दीधीङ् + तृच् इट् आगमः । एवम् **आवेविता** ।

सनि मीमाघुरभलभशकपतपदामच इस् ॥५४॥

सनि प्रत्यये सकारादौ परतः मी-मा-घु-रभ-लभ-शक-पत-पद इत्येतेषाम् अङ्गानाम् अचः स्थाने 'इस्' इत्ययम् आदेशो भवति ।

'मी' इति मीनाति–मिनोत्योर्ग्रहणमिष्यते । मित्सति । प्रमित्सति ।

मा–माङोर्ग्रहणम्–मित्सते । √मेङ्–अपमित्सते । घु–√दा--√धा इत्यनयोः संज्ञा । दित्सति । धित्सति । √रभ--आरिप्सते । √लभ--आलिप्सते । √पत -पित्सति । पतेरिड्-विक--√ल्प इष्यते । पिपतिषति । पद--प्रपित्सते ।

मित्सति---प्रभृतिषु 'अत्र लोपोऽभ्यासस्य' इति अभ्यासलोपः, 'स स्यार्धधातुके' इति सस्य तकारो भवति । **आरिप्सते, आलिप्सते**--उभयत्र 'पूर्ववत्सनः' इत्यात्मनेपदम् । 'खरि च' इति चर्त्वेन भकारस्य पकारः, 'स्कोः संयोगाद्योरन्ते च' इति सस्य लोपः ।

❀ (वा०) सनि राधो हिंसायाम् अच इस् वक्तव्यः । प्रतिरित्सति ।

आप्ज्ञप्यृधामीत् ॥५५॥

आप्-ज्ञप्-ऋध् इत्येतेषामङ्गानामच ईकारादेशो भवति सनि सकारादौ परतः । ईप्सति । ज्ञीप्सति । ईर्त्सति ।

ज्ञपेर्द्वौ अचौ तत्र णेः पूर्वविप्रतिषेधेन लोपः, इतरस्य ईत्वम् ।

ईप्सति—√आप् (व्याप्तौ) + सन् । **ज्ञपि**--√ज्ञा (अवबोधने) + णिच् = ज्ञपि तस्मात् सनि पूर्वं 'णेरनिटि' इति णेः इकारस्य लोपः पश्चात् पूर्वाकारस्य ईत्वम् । **ईर्त्सति**—√ऋधु (वृद्धौ) + सन् । ईकारो रपरः । धकारस्य चर्त्वेन तकारः । इट्-विकल्पे पक्षे अर्दिधिषति ।

दम्भ इच्च ॥५६॥

दम्भेः अचः स्थाने इकार आदेशो भवति, ईकारश्च सादौ सनि । धिप्सति / धीप्सति ।

धिप्सति—√दम्भु (दम्भे) + सन् । 'हलन्ताच्च' इति कित्त्वात् अनुनासिक मकारस्य लोपः । भकारस्य चर्त्वेन पकारः ।

मुचोऽकर्मकस्य गुणो वा ॥५७॥

मुचः अकर्मकस्य गुणो वा भवति सकारादौ सनि । मोक्षते/मुमुक्षते वा वत्सः स्वयमेव ।

मोक्षते—√मुच्लृ (मोक्षणे) + सन् । 'कर्मवत् कर्मणा.........' इत्यात्मनेपदम् । अत्र कर्मणः कर्तृत्वेन विवक्षया √मुच् अकर्मकः । उभयत्र 'चोः कुः' इत्यनेन चकारस्य कुत्वम् ।

अत्र लोपोऽभ्यासस्य ॥५८॥

यदेतत् अनुक्रान्तम् 'सनि मीमा......' इत्यादि 'मुचोऽकर्मकस्य गुणो वा' इति यावत् । अत्र अभ्यासस्य लोपो भवति । तथैवोदाहृतम् ।

यदित ऊर्ध्वमाऽध्यायसमाप्तेर्वक्ष्यामः, तत् अभ्यासस्य भवति इत्येवमप्यधिकृतं वेदितव्यम् । वक्ष्यति—'ह्रस्वः' डुढौकिषते ।

सूत्रे अत्र इति पदं व्याचष्टे—**यदेतत्... वेदितव्यम्** । **डुढौकिषते**—अत्राभ्यासस्य ह्रस्वो भवति ।

सूत्रे अत्र इति पदस्य प्रयोगं केचन विषयावधारणार्थम्, अपरे सर्वस्य लोपादिकार्यार्थं मन्यन्ते ।

ह्रस्वः ॥५९॥

अभ्यासस्य ह्रस्वो भवति । डुढौकिषते ।

❀ (वा०) अभ्यासस्यानचि । अभ्यासस्य यदुच्यते, अनचि तद्वक्तव्यम् । चराचरः । पतापतः ।

डुढौकिषते—√ढौकृ (गतौ) + सन् + लट् → त । वार्तिके **अनचि** = अचि प्रत्यये न । **चराचरः**—√चर + अच् 'चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्य' इत्यनेन अचि 'चर्' इत्यस्य द्वित्वम् अभ्यासस्य च आक्-आगमः ।

हलादिः शेषः ॥६०॥

अभ्यासस्य आदिः हल् शिष्यते, अन्यो लुप्यते । जग्लौ ।

मम्लौ । पपाच । पपाठ । आदिशेषनिमित्तोऽयम् अनादेर्लोपो विधीयते । तत्र अभ्यासजातेराश्रयणात् क्वचिदपि वर्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति ।

शिष्यते—अवस्थाप्यते = स्थिरो भवति । सूत्रे **'हलादिः'** पदम् असमस्तम् हल् + आदिः ।

जग्लौ—√ग्लै (हर्षक्षये) + लिट् → तिप् → णल् → औ । अभ्यासस्य 'ग्ला' ('आदेच उपदेशेऽशिति' इत्यनेन कृतात्वस्य) इत्यस्य लकारस्य लोपः, आकारस्य 'ह्रस्वः' इत्यनेन अकारः । गकारः शिष्यते, तस्य जकारः ।

शर्पूर्वाः खयः ॥६१॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते, अन्ये हलो लुप्यन्ते । चुश्च्योतिषति । तिष्ठासति ।

❀ (वा०) खर्पूर्वाः खयः इति वक्तव्यम् । उचिच्छिषति इत्यत्र उच्छेरन्तरङ्गत्वात् तुकि कृते द्विर्वचनम् । तत्र 'हलादिशेषे' सति तकारः श्रूयेत ।

चुश्च्योतिषति—√श्च्युतिर् (आर्द्रीकरणे) + सन् + लट् → तिप् । अत्र द्वित्वे अभ्यासस्य 'चु' मात्रस्य शेषः ।

उचिच्छिषति—√उच्छी (विवासे) + सन् + लट् । 'उच्छ्' इति तुकि कृते **'पूर्वत्रासिद्धीयमद्विवचने'** इति तकारस्य पूर्वं चकारे कृते पश्चाद् द्वित्वे 'हलादिशेषे' **'निमित्तापाये नैमित्तिकस्याप्यपायः'** इति छकारनिमित्तस्य चकारस्यापि निवृत्तिः स्यात् । **'खर्पूर्वाः'** इति न्यासे तु 'च्छ' इत्येतस्य शेषे तकारो न श्रूयते ।

कुहोश्चुः ॥६२॥

अभ्यासकवर्ग-हकारयोश्चवर्गादेशो भवति । चकार । चखान । जघान ।

चखान—√खन (विदारणे) + लिट् → तिप् → णल् । द्वित्वे कृते खकारस्य चवर्गः छकारः । तस्य 'अभ्यासे चर्च' इत्यनेन चकारः ।

जहार—√हृ + लिट् । अत्र द्वित्वे हकारस्य जकारः ।

न कवतेर्यङि ॥६३॥

यङि परतः कवतेरभ्यासस्य न कुत्वम् । कोकूयते उष्ट्रः । विकरणनिर्देशः कौति–कुवत्योर्निवृत्यर्थः । चोकूयते ।

विकरणनिर्देशः—कवतेः इति √कुङ् (भ्वादिगणी) इत्यस्य ग्रहणार्थम् । तेन अदादि-तुदादिगणयोः पठितयोर्न ग्रहणम् ।

कृषेश्छन्दसि ॥६४॥

छन्दसि कृषेर्धातोर्यङि परतः अभ्यासस्य चुत्वं न भवति । करीकृष्यते ।

करीकृष्यते— √कृष (विलेखने) + यङ् । 'रीगृपधस्य' इति रीक् आगमः । भाषायां तु **चरीकृष्यते कृषीवलः** इति भवति ।

दाधर्तिदर्धर्तिदर्घर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ॥६५॥

एतानि छन्दसि निपात्यन्ते । 'छन्दसि' इति चकारेणानुकृष्यते । आदौ रूपत्रिकं धारयतेः धृङो वा श्लौ यङ्लुकि वा यल्लक्षणेनानुपपन्नं तन्निपात्यते ।

बोभूतु इति–भवतेर्यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते । तेतिक्ते इति–तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते ।

अलर्षि इति–इयर्तेः लटि, सिपि अभ्यासस्य हलादिशेषाभावो रेफस्य लत्वं निपात्यते ।

आपनीफणत् इति–फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीक् निपात्यते ।

संसनिष्यदत् इति—स्यन्देः सम्पूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक्–आगमश्च धातुसकारस्य षत्वं निपात्यते ।

करिक्रत् इति—करोतेः यङ्लुगन्तस्य शतरि अभ्यासस्य चुत्वाभावो रिक्-आगमश्च निपात्यते ।

कनिक्रदत् इति—क्रन्देर्लुङि च्लेः अङ्-आदेशो द्विर्वचनम्, अभ्यासस्य चुत्वाभावः, निक्-आगमश्च निपात्यते ।

भरिभ्रत् इति—बिभर्तेर्यङ्लुगन्तस्य शतरि जश्त्वाभावः अभ्यासस्य निक्-आगमो निपात्यते ।

दविध्वतः इति—ध्वरतेर्यङ्लुगन्तस्य शतरि जसि रूपमेतत् अस्याभ्यासस्य विक्-आगमो ऋकारलोपश्च धातोर्निपात्यते ।

दविद्युतत् इति—द्युतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य सम्प्रसारणाभावः, विक्--आगमश्च निपात्यते ।

तरित्रतः इति—तरतेः शतरि षष्ठ्येकवचने अभ्यासस्य रिक्-आगमो निपात्यते ।

सरीसृपतम् इति—सृपेः शतरि श्लौ द्वितीयैकवचने अभ्यासस्य रीक्-आगमो निपात्यते ।

वरीवृजत् इति—वृजेः शतरि अभ्यासस्य रीक्-आगमो निपात्यते ।

मर्मृज्य इति—मृजेः लिटि → णलि अभ्यासस्य रुक्-आगमो धातोश्च युक्-आगमो निपात्यते ।

आगनीगन्ति इति—गमेः आङ्पूर्वस्य लटि → तिपि श्लौ अभ्यासस्य चुत्वाभावो नीक्-आगमश्च निपात्यते ।

इतिकरणम् एवम्प्रकाराणाम् अन्येषामुपसंग्रहार्थम् ।

एतानि—'दाधर्ति' इत्यादीनि अष्टादश पदानि ।

रूपत्रिकम्—दाधर्ति, दर्धर्ति, दर्धर्षि **धारयतेः**······**निपात्यते**—धारयतेः श्लौ णिलोपः अभ्यासस्य दीर्घत्वञ्च **दाधर्ति** इत्येतस्य सिद्धये निपात्यते । यङ्लुकि तु यङ् प्रत्ययः (अनेकाच्त्वात् अप्राप्तः) उपधाह्रस्व-

त्वञ्च निपात्यते। धृङश्चेत् श्लौ द्विर्वचने अभ्यासस्य दीर्घत्वम्, यङ्लुकि तु 'ऋतश्च' इत्यनेन प्राप्तस्य रुक्-आदेः अभावो निपात्यते।

एवं **दर्धर्ति, दर्धर्षि**—इत्यनयोरपि यथा सिद्धिर्भवेत् तन्निपात्यते।

सम्प्रसारणाभावः—'द्युतिस्वाप्योः सम्प्रसारणम्' इत्यनेन सम्प्रसारणम् प्राप्तम्।

यल्लक्षणे ......निपात्यते—सूत्रैः यत् क्रियते तदतिरिक्तं प्रयोगेषु यद् दृश्यते तस्य सर्वस्य निपातनं भवति।

उपसंग्रहार्थम्—तेन **गलोगर्ति** प्रभृतयः प्रयोगाः सिद्ध्यन्ति।

उरत् ॥६६॥

ऋवर्णान्तस्य अभ्यासस्य अत्-आदेशो भवति। ववृधे। शशृधे।

ववृधे—√वृधु (वृद्धौ) + लिट् → त → एश्। द्वित्वे, हलादिशेषे कृते 'वृ' इत्यवस्थायां ऋकारस्य अत्, रपरत्वम्, पुनः हलादिशेषः। **शशृधे**—√शृधु (शब्दकुत्सायाम्) + लिट्।

नर्नर्ति इत्यादिषु ऋकारस्य अत्त्वे कृते पश्चात् रुक्-रिक् इत्यादयो भवन्त्येव। अभ्यासविकारेषु अपवादो नोत्सर्गान् विधीन् बाधन्ते।

द्युतिस्वाप्योः सम्प्रसारणम् ॥६७॥

अनयोरभ्यासस्य सम्प्रसारणं भवति। विदिद्युते। व्यदिद्युतत्। सुस्वापयिषति।

विदिद्युते—√द्युत (दीप्तौ) + लिट् → त → एश्। **व्यदिद्युतत्**—द्युत + णिच् + लुङ्। **सुस्वापयिषति**—√ञिष्वप् (शयने) + णिच् + सन् + लट्।

व्यथो लिटि ॥६८॥

व्यथो लिटि सम्प्रसारणं भवति। विव्यथे। विव्यथाते। हलादिशेषस्यापवादः।

√व्यथ (भयचलनयोः) + लिट्। **अपवादः**--'हलादिःशेषः' इत्यनेन

यकारस्य लोपे प्राप्ते अपवादत्वात् पूर्वं यकारस्य सम्प्रसारणे कृते 'न सम्प्रसारणे सम्प्रसारणम्' इति वकारस्य न सम्प्रसारणम् ।

दीर्घ इणः किति ॥६९॥

इणोऽभ्यासस्य दीर्घो भवति लिटि किति परतः । ईयतुः । ईयुः । 'इणो यण्' इत्यनेन यण्-आदेशे कृते स्थानिवद्भावाद् द्वित्वम् ।

ईयतुः—√इण् (गतौ) + लिट् → तस् → अतुस् । **स्थानिवद्भावात्**—'द्विर्वचनेऽचि इत्यनेन' ।

अत आदेः ॥७०॥

अभ्यासस्य आदेः अकारस्य दीर्घो भवति लिटि परतः । 'अतो गुणे' इत्यस्यापवादः । आद । आदतुः ।

आद—√अद् + लिट् → तिप् → णल् । **अपवादः**—'पररूपस्य' इति शेषः ।

तस्मान्नुड् द्विहलः ॥७१॥

दीर्घीभूतादभ्यासात् परस्य द्विहलो धातोः नुट्-आगमो भवति । आनर्च । आनर्चतुः ।

ऋकारैकदेशो रेफो हल्-ग्रहणेन गृह्यते । तेनात्रापि द्विहलोऽङ्गस्य नुट्-आगमो भवति । आनृधतुः ।

द्विहलः—द्वौ हलौ यस्मिन् तद् द्विहल्, तस्मात् । **आनर्च**—√अर्च (पूजायाम्) + लिट् → तिप् → णल् । 'नुट्' अभ्यासात्परम् टित्त्वात् 'अर्च' इत्यस्यादौ भवति । **आनृधतुः**—√ऋधु (वृद्धौ) + लिट् । अत्र ऋकारे 'र्' इति श्रवणम् हल्त्वं बोधयति तदाश्रित्य 'द्विहल्' भवति ।

अश्नोतेश्च ॥७२॥

अश्नोतेरङ्गस्य दीर्घीभूतादभ्यासात् उत्तरस्य 'नुट्' लिटि । व्यानशे । व्यानशाते ।

व्यानशे—वि √अशू (व्याप्तौ) + लिट् → त → एश् ।
विकरण निर्देशात् अश्नोतेर्भवति नतु अश्नातेः—आश ।

भवतेरः ॥७३॥

भवतेरभ्यासस्य अकारादेशो भवति लिटि परतः । बभूव । बभवतुः । 'भवतेः' इति कर्तृ निर्देशात् भावकर्मणोर्न अत्वम् अनुबुभुवे कम्बलो मैत्रेण ।

बभूव—√भू (सत्तायाम्) + लिट् तिप् → णल् । **भवतेः**······ **मैत्रेण**—इदं कथनं प्रक्रियाग्रन्थानुसारम् । वृत्तौ त्वयं पाठः **भवतेः** इति धातुनिर्देशात् इहापि भवति **अनुबभूवे कम्बलो देवदत्तेन** ।

सिद्धान्त कौमुद्याः तत्त्वबोधिन्यामयं ग्रन्थो व्याख्यातः । तत्र भावकर्मणोरपि 'भवतेरः' इत्यस्य प्रवृत्तिः स्वीकृता कविभिरपि कर्मणि अकारविधानं कृतम्—**तस्यातपत्रं बिभरांबभूवे** तथा **विभावरीभिर्बिभरांबभूविरे** ।

ससूवेति निगमे ॥७४॥

'ससूव' इति निगमे निपात्यते । सूतेर्लिटि परस्मैपदम्, वुक्—आगमः, अभ्यासस्य च अत्वं निपात्यते । गृष्टिः ससूव ।

ससूव—√षूङ् (प्राणिगर्भविमोचने) । भाषायां **सुषुवे** ।

निजां त्रयाणां गुणः श्लौ ॥७५॥

निजादीनां त्रयाणाम् अभ्यासस्य गुणो भवति श्लौ । नेनेक्ति । वेवेक्ति । वेवेष्टि ।

निजाम्—वृत्तौ **णिजाम्** इति पाठः कौमुद्यान्तु 'निजाम्' इत्येव । **त्रयाणाम्**—√णिजिर् (शौचपोषणयोः), विजिर् (पृथग्भावे), √विष्लृ (व्याप्तौ) इति धातूनाम् जुहोत्यादिगणे पठितानाम् । **नेनेक्ति, वेवेक्ति, वेवेष्टि**—लट्-लकारान्तानि रूपाणि ।

भृञामित् ॥७६॥

भृञ्–आदोनां त्रयाणाम् अभ्यासस्य इकारादेशो भवति । भृञ्–बिभर्ति । माङ्–मिमीते । ओहाङ्–जिहीते ।

मिमीते––√माङ् माने 'ई हल्यघोः' इति आकारस्य ईत्त्वम् । एवं **जिहीते** इत्यत्रापि ।

अर्तिपिपर्त्योश्च ॥७७॥

एतयोः अभ्यासस्य इकार आदेशः श्लौ । इयर्ति धूमम् । पिपर्ति सोमम् ।

एतयोः –√ऋ (गतौ) √पृ (पालनपूरणयोः) इति धात्वोः ।

इयर्ति—अभ्यासस्य 'उरत्' इत्यनेन अकारादेशे रपरत्वे च ततः 'अभ्यासस्यासवर्णे' इति 'इयङ्' ।

बहुलं छन्दसि ॥७८॥

छन्दसि विषये श्लौ अभ्यासस्य बहुलम् इकार आदेशो भवति । पूर्णां विवष्टि । वशेः रूपम् । तथा वचेः जनिमा विवक्ति ।

विवष्टि—√वश (कान्तौ) + लट् । 'व्रश्चभ्रस्ज·······' इति षत्वम्
विवक्ति—√वच (परिभाषणे) + लट् ।

सन्यतः ॥७९॥

अभ्यासस्य अकारस्य इकार आदेशो भवति । पिपक्षति । यियक्षति ।

पिपक्षति—√पच् (पाके) + सन् + लट् । **यियक्षति**—√यज् (पूजायाम्)—सन् + लट् । 'व्रश्चभ्रस्ज·······' इति जकारस्य षत्वम् ।

ओः पुयण्ज्यपरे ॥८०॥

उवर्णान्तस्याभ्यासस्य पवर्गे यणि जकारे चावर्णपरे परतः इकार आदेशो भवति सनि प्रत्यये परतः ।

पवर्गेऽपरे—पिपविषते । पिपावयिषति ।

यणि अपरे—यियविषति । यियावयिषति । रिरविषति । रिरावयिषति ।

जकारेऽपरे—'जु' इति सौत्रो धातुः । जिजावयिषति ।

एतदेव वचनं ज्ञापकम्—अद्विर्वचननिमित्तेऽपि णौ स्थानिवद् भवति इति ।

पु-यण्-ज् इति समाहारद्वन्द्वं कृत्वा सप्तम्येकवचनान्तेन निर्देशः । ततः 'अ' परो यस्मात् इति **अपरे** सर्वस्य विशेषणम् । **पिपविषते**—√पूङ् (पवने) + सन्—इटि परे गुणे 'अव्' आदेशे च कृते पश्चात् स्थानिवद्-भावात् 'पू' इत्यस्य द्वित्वे अभ्यासस्य इकारः । **पिपावयिषति**—√पूङ् + णिच् + सन् । **यियविषति**—√यु + सन् । **रिरविषति**—√रु + सन् ।

एतदेव.........भवति—णिचं विना पू-यण्-जकाराः अवर्णपराः नैव सम्भवन्ति ।

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥८१॥

एषाम् अभ्यासस्य उकारस्य अवर्णपरे यणि परतः इकार आदेशो वा भवति सनि परतः । स्रवति—सिस्रावयिषति / सुस्रावयिषति ।

शृणोति—शिश्रावयिषति / शुश्रावयिषति ।

द्रवति—दिद्रावयिषति / दुद्रावयिषति ।

प्रवति—पिप्रावयिषति / पुप्रावयिषति ।

प्लवति—पिप्लावयिषति / पुप्लावयिषति ।

च्यवति—चिच्यावयिषति / चुच्यावयिषति ।

वचनसामर्थ्यात् एकेन वर्णेन व्यवधानम् इहाश्रीयते । पूर्वत्र त्वनन्तर एव यणि भवितव्यम् इत्यप्राप्तविभाषेयम् ।

अपरे इत्येव—सुस्रूषति ।

सिस्रावयिषति—√स्रु (गतौ) + णिच् + सन् + लट् → तिप् । एवं क्रमेण √श्रु (श्रवणे)-√द्रु-√प्रुङ्-√प्लुङ्-√च्युङ् (गत्यर्थाः) इत्येतेभ्यः ण्यन्तेभ्यः सन् ज्ञेयः ।

एकेन वर्णेन—सनः सकारेण ।

गुणो यङ्लुकोः ॥८२॥

इगन्तस्य अभ्यासस्य गुणः स्याद् यङ्, यङ्लुकि च । सोसूच्यते । बोभवीति ।

सूत्रे **लुक्** इति यङ्लुकः सम्प्रत्यायकः । नह्यन्यत्र लुकि अभ्यासः सम्भवति । **सोसूच्यते**—√सूच् (पैशुन्ये) +यङ् 'सूचिसूत्रि ......' इति वार्तिकेन । **बोभवीति**—√भू + यङ्, 'धातोरेकाचो हलादेः........' इत्यनेन तस्य लुक् । उभयत्रापि अभ्यासस्य ऊकारस्य गुणः 'ओकारः' ।

दीर्घोऽकितः ॥८३॥

अकितोऽभ्यासस्य दीर्घः स्याद् यङि यङ्लुकि च । पापच्यते । पापचीति ।

पापच्यते—√पच् + यङ् । **पापचीति**—अत्र यङो लुक् । **यंयम्यते** इत्यादौ अपवादत्वात् नुकि कृते अभ्यासो नास्ति अजन्तः इति हेतोः नात्र दीर्घत्वप्राप्तिः । एवं तर्हि **अकितः** इत्येतद् ज्ञापयति—**अभ्यासविकारेष्वपवादाः नोत्सर्गान् विधीन् बाधन्ते** ।

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥८४॥

एषामभ्यासस्य नीक्-आगमो भवति यङि, यङ् लुकि च ।

वञ्चु—वनीवच्यते । वनीवञ्चीति । स्रंसु—सनीस्रस्यते । सनीस्रंसीति ।

ध्वंसु—दनीध्वस्यते । दनीध्वंसीति । भ्रंसु—बनीभ्रस्यते । बनीभ्रंसीति ।

कस—चनीकस्यते । चनीकसीति । पत-पनीपत्यते । पनीपतीति ।

पद—पनीपत्थते । पनीपतीति । स्कन्द--चनीस्कद्यते । चनीस्कन्दीति ।

वनीवच्यते—'अनिदिताम्……' इत्यनेन अनुनासिकस्य नकारस्य लोपः । **वनीवञ्चीति**—नकारस्य श्चुत्वेन ञकारः । दीर्घोच्चारणसामर्थ्यात् ईकारस्य ह्रस्वत्वं न । **दनीध्वस्यते, बनीभ्रस्यते, चनीकस्यते** तथा **चनीस्कद्यते** इत्यादिषु अभ्यासकार्यं यथाविधि बोध्यम् ।

नुगतोऽनुनासिकान्तस्य ॥८५॥

अनुनासिकान्तस्याङ्गस्य योऽभ्यासः तस्याकारान्तस्य 'नुक्' आगमो भवति यङ्-यङ्लुकोः परतः । तन्तन्यते । तन्तनीति । जङ्गम्यते । जङ्गमीति । यंयम्यते । यंयमीति । रंरम्यते । रंरमीति ।

'नुक्' इत्येतत् अनुस्वारोपलक्षणार्थम् । स्थानिना ह्यादेशो लक्ष्यते । तेन यंयम्यते इत्येवमादौ अझल्यपि अनुस्वारो भवति ।

❀ (वा) पदान्तवच्च इत्यत्र वक्तव्यम् । 'वा पदान्तस्य' इति परसवर्णविकल्पो यथा स्यात् ।

जङ्गम्यते—√गम् + यङ् नकारस्य अनुस्वार-परसवर्णेन ङकारः । **विकल्पः**—तेन पक्षे अनुस्वारोऽपि श्रूयते **जंगम्यते** ।

सूत्रे **अतः** इति तपरकरणं भूतपूर्वस्य दीर्घस्य निवृत्त्यर्थम्—**बाभाम्यते** ।

जपजभदहदशभञ्जपशां च ॥८६॥

√जप…, एषाम् अभ्यासस्य नुक्-आगमो भवति यङि यङ्लुकि च परतः । जञ्जप्यते । जञ्जपीति । √जभ—जञ्जभ्यते । जञ्जभीति ।

√दह—दन्दह्यते । दन्दहीति । √दश—दन्दश्यते । दन्दशीति ।

'दश' इति नकारलोपार्थमेव निर्दिश्यते। तेन यङ्लुकि अपि नकारलोपो भवति। √भन्ज—बम्भज्यते। बम्भजीति।

√पश इति सौत्रो धातुः—पम्पश्यते। पम्पशीति।

जञ्जप्यते—√जप + यङ् नुकि कृते नकारस्यानुस्वार-परसवर्णेन ञकारः। **दश**—मूलधातुः √दन्श इति।

चरफलोश्च ॥८७॥

एतयोः अभ्यासस्य नुक्-आगमो भवति यङि, यङ्लुकि च परतः। √चर—चञ्चूर्यते। चञ्चुरीति। पम्फुल्यते। पम्फुलीति।

चञ्चूर्यते—'लुपसद... ... ' इत्यनेन यङ्। नकारस्यानुस्वारपरसवर्णौ।

उत्परस्यातः ॥८८॥

चर-फलोः अभ्यासात् परस्य अकारस्य 'उत्'यङि, यङ्लुकि च। चञ्चूर्यते। चञ्चुरीति। पम्फुलीति।

चञ्चूर्यते--अकारस्य उकारे कृते 'हलि च' इत्यनेन दीर्घः।

सूत्रे **उत्** इति तपरकरणं **पम्फुलीति** इत्यत्र लघूपधदीर्घनिवृत्त्यर्थम्।

ति च ॥८९॥

तकारादौ प्रत्यये परतः अनयोः अकारस्य उकार आदेशो भवति। चरणं चूर्तिः। ब्राह्मणस्य चूर्तिः। प्रफुल्ताः सुमनसः।

चूर्तिः = गतिः √चर् + क्तिन्। उकारादेशे कृते दीर्घः। **प्रफुल्ताः** = विशीर्णाः प्र √ञिफला (विशरणे) + क्त + टाप् 'जसि' रूपम्। **प्रफुल्लाः** इति √फुल्ल (विकासे) + अच्।

रीगृदुपधस्य च ॥९०॥

ऋदुपधस्याङ्गस्य योऽभ्यासः नस्य 'रीक्' आगमो भवति यङ्-यङ्लुकोः परतः। वरीवृत्यते। वरीवृतीति।

❀ (वा०) रीगृत्वतो वाच्यम् । इहापि यथा स्यात्–वरीवृश्च्यते ।

वरीवृत्यते—√वृतु (वर्तने) + यङ्, ऋकारोपधोऽयम् ।

वरीवृश्च्यते—√व्रश्च (√ओव्रश्चू छेदने) 'ग्रहिज्या · व्रश्च···' इत्यनेन सम्प्रसारणे कृते अयम् ऋत्वान् धातुः ।

रुग्रिकौ च लुकि ॥९१॥

यङ्लुकि ऋदुपधस्याङ्गस्य योऽभ्यासः तस्य 'रुक्-रिक्' आगमौ भवतः । चात् 'रीक्' च । वर्वर्ति / वरिवर्ति / वरीवर्ति ।

वर्वर्ति—√वृतु + यङ् → तस्य लुक्, 'रुक्' आगमः । उकारः उच्चारणार्थः, रकारः शिष्यते ।

वरिवर्ति—अत्र 'रिक्' आगमः । **वरीवर्ति**—अत्र 'रीक्' आगमः ।

ऋतश्च ॥९२॥

ऋकारान्तस्याङ्गस्य योऽभ्यासः तस्य रुक्-रिकौ भवतः चात् रीक् च यङ्लुकि । चर्कर्ति / चरिकर्ति / चरीकर्ति । जर्हर्ति / जरिहर्ति / जरीहर्ति ।

तपरकरणं किम् ? किरतेः–चाकर्ति ।

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ॥

तत्रेयं प्राप्तिः—तपरकरणसामर्थ्यात् अङ्गविशेषणम् 'ऋतः' इत्येतत् । तथा चाप्राप्तिः किरतेः रुगादीनाम् इति ।

चर्कर्ति—√कृ (डुकृञ् करणे) + यङ् → लुक् + लट् → तिप् रुक् आगमः । जर्हर्ति—√हृञ् (हरणे) + यङ् → लुक् ।

किरतेः—√कॄ (विक्षेपे) इत्यस्य **चाकर्ति**—'दीर्घोऽकितः' इत्यनेन अभ्यासस्व अकारस्य दीर्घः ।

किरतिम् ······ **संग्रहः** इति कारिकाया अयमर्थः ।

किरतिम्—उपलक्षणेन ॠकारान्तान् धातून् । **चर्करीतान्तम्**- यङ्-लुगन्तम् । **चर्करीतम्** इति पूर्वैराचार्यैः यङ्लुकः संज्ञा कृता, तदन्तम् । **पचति**—यङ्लुगन्तस्य इति **अत्र** = लट् लकारे प्रथमपुरुषैकवचनं **यो नयेत्**—'चार्कर्ति' इत्यादीनि रूपाणि साधयेत् तम् व्याकरणविद्यार्थिनम् **अहम्** = परीक्षकः **प्राप्तिज्ञम्**—'रुक्' आदीनां **प्राप्तिम्** = प्रवृत्तिम् वेत्ति यः तं **मन्ये** = स्वीकुर्वे ।

तेन = विदुषा **संग्रहः** = व्याकरणशास्त्रम् **प्रारब्धम्** = बहुभ्यो गुरुभ्यो बहुशः श्रुतम् । यः √कॄ प्रभृतीनां विषये रुक् प्राप्तिं जानाति स एव वस्तुतो वैयाकरणशिरोमणिः ।

तत्रेयम् ······ **इति**—'ॠतश्च' इति सूत्रे 'ॠतः' इति पदम् अङ्गस्य विशेषणम् । एवम् √कॄ इति धातोः अङ्गम् ॠकारान्तं न ऋकारान्तम् इति तत्र न 'रुक्' ।

सन्वल्लघुनि चङ्परेऽनग्लोपे ।।९३।।

लघुनि धात्वक्षरे परे योऽभ्यासस्तस्य चङ्परे णौ परतः सनि इव कार्यं भवति अनग्लोपे सति । 'सन्यतः' इत्युक्तम् । चङ्परेऽपि तथा । अपीपचत् ।

'ओः पुयण्ज्यपरे' इत्युक्तम् । चङ्परेऽपि तथा । अपीपवत् इत्यादि बोध्यम् ।

चङ्परे—'चङ्' परो यस्मात् तस्मिन् **णौ** = णिचि । **अनग्लोपे**—यस्य अक्-लोपो न भवति तस्मिन् । **अपीपचत्**—√पच् + णिच् + लुङ् → तिप् च्लेः सिच् । अत्र 'सन्यतः' इति अभ्यासस्य अकारस्य इकारः, ततः 'दीर्घो लघोः' इति दीर्घत्वम् ।

एवं 'स्रवतिशृणोति······ वा' इत्यनेन सनि परतः अभ्यासस्य उकारस्य इकार आदेशो विभाषा क्रियते । चङ्परेऽपि तथा भवति—**असिस्रवत् / असुस्रवत्** । **अशिश्रवत् / अशुश्रवत्** । इत्यादि बोध्यम् ।

'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् ।' इति **अचीकरत्** इत्यादौ ककारेण व्यवहितेऽपि चङ्परे णौ अभ्यासस्य इकारो भवति सूत्रारम्भसामर्थ्यात् ।

अजजागरत् इत्यादौ तु वर्णसङ्घातस्य 'जाग' इत्यस्य व्यवधाने इकारो नैव भवति ।

अचिक्षणत् इत्यत्र यद्यपि 'क्ष' (क्-ष्) इति संयुक्ताक्षरस्य व्यवधानम् अस्ति परन्तु आचार्यस्य पाणिनेः प्रवृत्तिर्ज्ञापयति—√क्षणु (हिंसायाम्) इत्यस्य चङि रूपे संयोगस्य व्यवधानम् आश्रीयते । यतोऽयम् **असस्मरत्** इत्यत्र इत्वबाधनार्थम् 'अत्स्मृ ......' इति अत्त्वं विदधाति ।

दीर्घो लघोः ॥९४॥

दीर्घो भवति लघोरभ्यासस्य लघुनि चङ्परेऽनग्लोपे। अचीकरत् । अजीहरत् ।

लघुनि इत्येव—अततक्षत् ।

अनग्लोपे इत्येव-अचकथत् ।

अचीकरत्—√कृ + णिच् पूर्वसूत्रेण 'सन्वल्लघुनि ......' इत्यनेन अभ्यासस्य अकारस्य इकारे, तस्य दीर्घत्वम् ।

अत्स्मृदृत्वरप्रथम्रदस्तॄस्पृशाम् ॥९५॥

एषामभ्यासस्य 'अत्' आदेशो भवति चङ्परे णौ परतः । सन्वदितोऽपवादः । √स्मृ (चिन्तायाम्)—असस्मरत् । √दृ (भये)—अददरत् ।

√त्वर (ञित्वरा सम्भ्रमे)--अतत्वरत् । √प्रथ (प्रख्याने)--अपप्रथत् ।

म्रद (मर्दने)—अमम्रदत् । √स्तॄञ् (आच्छादने)-अतस्तरत् । √स्पृश (स्पर्शे)--अपस्पर्शत् ।

इदमेव सूत्रं ज्ञापयति—√क्षणु जातीयानाम् धातूनाम् चङि इत्त्वविधिर्भवति । **अददरत्**—अत्त्वविधानसामर्थ्यात् 'दीर्घो लघोः' इति दीर्घत्वं न । **असस्मरत्** इत्यादिषु 'सन्वल्लघुनि ......' इत्यनेन प्राप्तम् इत्त्वम् अनेन बाध्यते ।

विभाषा वेष्टिचेष्ट्योः ॥९६॥

√वेष्टि-√चेष्टि इत्यनयोरभ्यासस्य विभाषा 'अत्' आदेशो भवति चङ्परे णौ परतः । अववेष्टत् / अविवेष्टत् ।

अचचेष्टत् / अचिचेष्टत् ।

अववेष्टत्—√वेष्ट (वेष्टने) + णिच् + लुङ् च्लेः अङ्। पक्षे इत्वम् **अविवेष्टत्** । **अचचेष्टत्**—√चेष्ट (चेष्टायाम्), पक्षे इत्वम् **अचिचेष्टत्** ।

ई च गणः ॥९७॥

विभाषा इति चकारेणानुकृष्यते । √गण इत्येतस्याभ्यासस्य ईकार आदेशो भवति चङ्परे णौ । अजीगणत् / अजगणत् । गणयतिरदन्तः ।

णौ चङि शीङः शाच्छोः शर्पूर्वाः स्रवति शृणोति सप्तदश ।

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे सप्तमाध्यायस्य चतुर्थः पादः ।

अजीगणत् / अजगणत्— √गण (संख्याने) अदन्तो धातुः । तस्य 'अतो लोपः' इत्यनेन अकारलोपे कृते 'अनग्लोपे' इति वचनात् 'सन्वल्लघुनि ......' इत्येन अप्राप्तयोः सन्वद्भावदीर्घयोः अनेन ईत्वं पक्षे अत्वं विधीयते ।

सप्तमाध्यायस्यास्मिन् चतुर्थे पादे णौ चङ्युपधाया ह्रस्वः, शीङः सार्वधातुके, शाच्छोरन्यतरस्याम्, शर्पूर्वाः खयः, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा स्रवतिशृणोति······इत्यत आरभ्य सप्तदश सूत्राणीति संकलनेन सप्तनवतिः (९७) सूत्राणि सन्ति ।

इति सामवेदि-विप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना विरचितायां काशिकावृत्तिसार-सुधायां सप्तमाध्यायस्य चतुर्थः पादः ।

अथाष्टमाध्याये प्रथमः पादः

सर्वस्य द्वे ॥१॥

'सर्वस्य' इति, 'द्वे' इति च एतत् अधिकृतं वेदितव्यम्। इत ऊर्ध्वं यद् वक्ष्यामः प्राक् 'पदस्य' इत्यतः। 'सर्वस्य द्वे भवतः' इत्येवं तद् वेदितव्यम्।

वक्ष्यति—'नित्यवीप्सयोः' इति, तत्र सर्वस्य स्थाने द्वे भवतः।

अथ के द्वे भवतः ? ये शब्दतः, अर्थतश्चान्तरतमे। एकस्य 'पचति' शब्दस्य द्वौ 'पचति' शब्दौ भवतः—पचतिपचति। ग्रामोग्रामो रमणीयः।

'सर्वस्य' इति किम् ? विस्पष्टार्थम्।

अथ 'पदस्य' इत्येव कस्मान्नोच्यते ? नैवं शक्यम्, इह हि न स्यात्—'प्रपचति प्रपचति' इति। इह 'द्रोग्धाद्रोग्धा' 'द्रोढाद्रोढा' इति घत्व-ढत्वयोरसिद्धत्वात् अकृतयोरेव तयोर्द्विर्वचनं प्राप्नोति—तत्र पश्चाद् विकल्पे सति अनिष्टमपि प्राप्नोति—द्रोग्धाद्रोढा, द्रोढाद्रोग्धा इति तस्माद् वक्तव्यमेतत्—'पूर्वत्रासिद्धीयमद्विर्वचने'।

'सर्वस्य' इत्येतदेव वा कृतम् सर्वकार्यप्रतिपत्त्यर्थं द्रष्टव्यम्।

अधिकारसूत्रमिदम्। अत्र अर्थस्य ग्रहणं न तु शब्दस्य, तेन 'सर्वस्य द्वे भवतः' इति योऽर्थः प्रतीयते एतदर्थस्वरूपम् वक्ष्यमाणसूत्रेषु अधिकृतं भवति।

सर्वस्य स्थाने—'षष्ठी स्थाने योगा' इति न्यायात् । **ये**……… **अन्तरतमे**—शब्दार्थद्वारा उभयथा आन्तरतम्यम् अभीष्टम् । अत्र 'द्विःप्रयोगो द्विर्वचनम्' इत्यपि पक्षः समाश्रितः । अस्मिन् पक्षे 'पचति' शब्द एव द्विरावर्तते ।

प्रपचति—इदं न पदम् अपितु पदसमुदायरूपं वाक्यम् ।

पूर्वत्रासिद्धीयमद्विर्वचने—'पूर्वत्रासिद्धम्' इत्यस्मिन्नधिकारे यद् भवति तद् द्विर्वचने कर्तव्ये असिद्धं न भवति तेन **द्रोग्धा** इत्यत्र घत्वं, **द्रोढा** इत्यत्र ढत्वं कृत्वैव द्विर्वचनं भवति तच्च सिद्धमेव स्थितं भवति ।

तस्य परमाम्रेडितम् ॥२॥

तस्य द्विरुक्तस्य यत्परं शब्दरूपं तत् आम्रेडितसंज्ञम् । चौरचौराः । वृषलवृषलाः ।

प्रदेशाः—'आम्रेडितं भर्त्सने' इत्येवमादयः ।

चौरचौराः—चौर चौर ३ इति भर्त्सने सम्बोधनस्य प्लुतः ।

अनुदात्तं च ॥३॥

यत् आम्रेडितं तत् अनुदात्तं च भवति । भुङ्क्ते भुङ्क्ते । पशून्पशून् ।

अनुदात्तम्—प्रकृतिस्वरे प्राप्ते परस्यानुदात्तत्वं विधीयते ।

नित्यवीप्सयोः ॥४॥

नित्ये चार्थे वीप्सायां च यत्तस्य द्वे भवतः ।

अथ केषु नित्यता ? तिङ्क्षु । अव्ययकृत्सु । कुत एतत् ? आभीक्ष्ण्यम् इह नित्यता । आभीक्ष्ण्यं क्रियाधर्मः । यां क्रियां कर्त्ता प्राधान्येन अनुपरमन् करोति तत् नित्यम् । पचतिपचति । भुक्त्वाभुक्त्वा व्रजति ।

अथ केषु वीप्सा ? सुप्सु । का वीप्सा ? नानावाचिनाम्

अधिकरणानां क्रिया-गुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । ग्रामोग्रामो रमणीयः । पुरुषः पुरुषो निधनमुपैति ।

नित्ये ·····भवतः—सूत्रे नित्य-वीप्सयोः सप्तमी ननु षष्ठी । नित्यता चात्र **आभीक्ष्ण्यम्** = पुनः पुनः प्रवृत्तिः । **वीप्सा** = प्रयोक्तुः व्याप्तिविषया इच्छा तयोः अर्थयोः **यत्** = पदं तस्य **द्वे** = द्विर्वचनं भवति । **तत् नित्यम्**—तत् क्रियारूपं वस्तु नित्यम् । **पचतिपचति**—पुनः पुनः अनुपरमन् = विरामम् अकुर्वन् पचति ।

अव्ययकृतः उदाहरणम्—**भुक्त्वाभुक्त्वा व्रजति**—अत्र आभीक्ष्ण्यम् द्विर्वचनेनैव बोध्यते ।

ग्रामोग्रामो रमणीयः—बाहुल्येन शोभनत्वगुणम् आश्रित्य प्रयोक्ता प्रयुङ्क्ते एतद्वाक्यम् । **पुरुषःपुरुषो निधनमुपैति**—अत्र पुरुषाणां निधन-क्रियया युगपद् व्याप्तुम् इच्छा प्रयोक्तुर्वर्तते । **जातस्य हि ध्रुवो मृत्युः** ।

युगपत् = एककालम् । **व्याप्तुम्** = सम्पूर्णतां सम्बद्धुम् । **वीप्सा**—विशिष्टा इच्छा ।

परेर्वर्जने ॥५॥

'परि' इत्येतस्य वर्जनेऽर्थे द्वे भवतः । परिपरि त्रिगर्त्तेभ्यो वृष्टो देवः ।

⊛ (वा०) असमासे वा । परिपरि त्रिगर्तेभ्यः / परि त्रि-गर्त्तेभ्यः ।

वर्जनम्—परिहारः । **परिपरि त्रिगर्त्तेभ्यः**—'अपपरी वर्जने' इत्यनेन परेः 'कर्मप्रवचनीय'संज्ञा, 'पञ्चम्यपाङ्परिभिः' इति परि-योगे पञ्चमी । **असमासे वा**—'वक्तव्यम्' इति शेषः । तेन **परि त्रिगर्त्तेभ्यः** इत्यपि पक्षे भवति ।

समासे तु तेन = समासेन वर्जनार्थस्योक्तत्वान्न भवति द्वित्वम् **परित्रिगर्त्तं वृष्टो देवः** ।

प्रसमुपोदः पादपूरणे ॥६॥

एषां पादपूरणेऽर्थे द्वे भवतः । प्रप्रायमग्निर्भरतस्य शृण्वे । संसमिद्युवसे वृषन् । उपोप मे परामृश । किं नोदुदु जातवेदसः ।

सामर्थ्याच्छन्दस्येतद्विधानम् । भाषायाम् अनर्थकं स्यात् प्रयोगाभावात् ।

एषाम्—प्र-सम्-उप-उत् इति अव्यय-शब्दानाम् । **पादपूरणे**—'यस्य च भावेन ·····' इति सप्तमी । **पादस्य**—ऋचः एव नतु लौकिकश्लोकस्य ।

उपर्यध्यधसः सामीप्ये ॥७॥

उपरि-अधि-अधस् एषां द्वे भवतः सामीप्ये विवक्षिते । उपर्युपरि दुःखानि भवन्ति । उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोऽधः नगरम् ।

इह कस्मान्न भवति ? उपरि शिरसो घटम् । अत्र सामीप्यं न विवक्षितम् ।

सामीप्यम् = प्रत्यासत्तिः । सा कालकृता देशकृता च । कालकृतस्य सामीप्यस्योदाहरणम्—**उपर्युपरि दुःखानि**—दुःखानि समीपकालभावीनि समीपकालातिक्रान्तानि वा । **उपर्युपरि ग्रामम्**—ग्रामस्य समीपे इत्यर्थः । **अध्यधि ग्रामम्**—ग्रामस्य उपरि देशे । **अधोधः ग्रामम्**—ग्रामस्य सामीप्येन अधस्तात् । **शिरसः**—नात्र द्वितीया आम्रेडितत्वाभावात् । अत्र उत्तराधर-भाव एव विवक्षितः । सर्वत्र आम्रेडितम् अनुदात्तं भवति ।

वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ॥८॥

एकार्थः पदसमूहो वाक्यम् । वाक्यादेरामन्त्रितस्य द्वे भवतः, असूयादिषु यदि वाक्यम् ।

परगुणासहनम् असूया । सम्मतिः पूजा । कोपः क्रोधः । निन्दनं कुत्सनम् । अपकारशब्दैः भयोत्पादनं भर्त्सनम् । एते प्रयोक्तुः धर्माः, नभिधेयधर्माः ।

असूयायाम्—माणवक३ माणवक अभिरूपक३ अभिरूपक व्यर्थं ते आभिरूप्यम् ।

सम्मतौ—अभिरूपक३ अभिरूपक शोभनः खल्वसि ।

कोपे—अविनीतक३ अविनीतक इदानीं ज्ञास्यसि ।

कुत्सने—शक्तिक३ शक्तिके रिक्ता ते शक्तिः ।

भर्त्सने—वृषलवृषल३ घातयिष्यामि त्वाम् ।

सूत्रे **वाक्यादेः**—वाक्यस्य = एकार्थकस्य पदसमूहस्य आदेः पूर्व-पठितस्य उक्तस्य वा । **आमन्त्रितस्य**—सम्बोधन प्रथमान्तस्य । **प्रयोक्तुः**—यो वाक्यं ब्रवीति, तस्य ।

अभिधेयः—अर्थः माणवकादिः । **माणवक३**—'स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु' इति पूर्वपदस्य प्लुतः ।

माणवक + क **कुत्सितेऽर्थे** । **अभिरूपक३**—अभिरूपः = सुन्दरः, प्रियः, पण्डितो वा तस्मात् अनुकम्पायां कन् । **व्यर्थम्** = असारम । **शक्तिके**—कुत्सिता शक्ता इति शक्ता + क + टाप् । वृषलवृषल३ – 'आम्रेडितं भर्त्सने' इति आम्रेडितस्यैव प्लुतः क्रियते ।

वाक्यान्ते वाक्यमध्ये च न द्वित्वम्—शोभनः खल्वसि **माणवक** !

यद्यपि कुत्सनम् असूयाजनितम्, भर्त्सनं च कोपप्रभवम् इति कुत्सने असूयायाः, भर्त्सने च कोपस्य प्रतीतिर्भवत्येव तथापि असूया-कोपयोः पृथक्करणात् ज्ञायते यत् विनाप्यसूयां गुरवः कुत्सयन्ति, कोपं विनाऽपि भर्त्सयन्ति बालान् । एवं महर्षिणा तयोः पृथक् निर्देशः कृतः—यदाह कारिकासु—

गुरवो हि हितैषित्वादकुप्यन्तोऽपि भर्त्सनम् ।
कुर्वते भर्त्स्यमानास्तु कुपितान् प्रतियन्ति तान् ॥
विनाऽप्यसूयया कुत्सां कुर्वन्तीति पृथक् तयोः ।
निर्देशः सूत्रकारेण विहितः सूक्ष्मदर्शिना ॥
सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ॥

एकं बहुव्रीहिवत् ॥९॥

'एकम्' इत्येतत् शब्दरूपं द्विर्भवति, बहुव्रीहिवच्च भवति । बहुव्रीहिवत्त्वे प्रयोजनम्-सुप्-लोक-पुंवद्-भावौ । एकैकमक्षरं पठति । एकैकया आहुत्या जुहोति ।

सर्वनामसंज्ञाप्रतिषेध-स्वर-समासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते । तेनातिदेशिके न ।

एकम्......**भवति**—द्विर्वचनं 'वीप्सा' इत्यनुवृत्तेः लभ्यते । अत्र प्रमाणम् 'एकैकस्य प्राचाम्' इति सूत्रम् । **एकैकम्**—समासे कृते प्रातिपदिकत्वात् 'सुः' तस्य नपुंसके 'अम्' ।

सर्वनाम...... **न** । यो वस्तुतः बहुव्रीहिसमासाधिकारे विहितो विधिः सः **अतिदेशिके** = बहुव्रीहिवद्भावे कृते न भवति ।

आबाधे च ॥१०॥

आबाधनम् आबाधः = पीडा प्रयोक्तुर्धर्मः । तत्र वर्तमानस्य द्वे भवतः । बहुव्रीहिवच्चास्मिन् कार्यम् । गतगतः । गतगता । प्रियस्य चिरगमनादिना पीडितः एवं प्रयुङ्क्ते ।

गतगता—गता इत्यस्य द्वित्वे पूर्वस्य पुंवद्भावः ।

कर्मधारयवदुत्तरेषु ॥११॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं भवति ।

प्रयोजनम्—सुप्-लोप-पुंवद्भावान्तोदात्तत्वानि । सुप्-लोपः-पटुपटुः । पुंवद्भावः—पटुपट्वी ।

अधिकारेणैव सिद्धे यत् 'उत्तरेषु' इति वचनं तद्विस्पष्टार्थम् ।

पटुपटुः—अन्तोदात्तमपि भवति । **पटुपट्वी**—पूर्वस्य पुंवद्भावः ।

प्रकारे गुणवचनस्य ॥१२॥

प्रकारोऽत्र सादृश्यम् । तत्रस्थस्य द्वे भवतः । पटुपटुः । पण्डितपण्डितः । परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते ।

जातीयरोऽनेन द्विर्वचनेन वाधनं नेष्यते । पटुजातीयः । मृदुजातीयः ।

❀ (वा०) आनुपूर्व्ये सम्भ्रमे च क्रियासमभिव्याहारके ।

आभीक्ष्ण्ये डाच्परस्यापि द्विर्भाव इह कथ्यते ।

क्रमेणोदाहरणम् । आनुपूर्व्ये—मूलेमूले स्थूलाः ।

सम्भ्रमे—अहिरहिः । नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ । यावद्भिः सोऽर्थो ज्ञायते ।

क्रियासमभिव्याहारे—लुनीहि-लुनीहि इत्येवायं लुनाति ।

आभीक्ष्ण्ये—भुक्त्वा भुक्त्वा व्रजति ।

डाचि—पटपटा करोति ।

❀ (वा०) कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः । समासवच्च वहुलम् । यदा न समासवत्तदा प्रथमैकवचनं पूर्वपदस्य । अन्योऽन्यम् इमे भोजयन्ति । इतरेतरम् । इतरेतरस्य ।

❀ (वा) स्त्रीक्लीबयोरम्भावो वा उत्तरपदस्य वाच्यः । अन्योऽन्यामिमे ब्राह्मण्यौ भोजयतः / अन्योऽन्यम् ।

सादृश्यम्—तथैव प्रयोगाः दृश्यन्ते । वहुभिः **प्रकारैः**—भेदैः भुङ्क्ते इति भेदार्थे द्विर्वचनं न । **पटुपटुः**—अपरिपूर्णगुणोऽपि परिपूर्णगुणसदृशः ।

बाधनं नेष्यते—विभाषाया आश्रयणात् द्वित्व-जातीयर् इत्युभौ भवतः । **मूले मूले स्थूलाः**—वेणु-नडप्रभृतयः **आनुपूर्व्येण**—मूलादारभ्य क्रमशः स्थूलाः सन्ति ।

अहिरहिः—अहिः अहिः इति बोधयति कश्चन स्वम् अज्ञानिनं सहचरम् । **नावश्यं······ ज्ञायते**—यावत् सहचरो न बध्यते तावद् आवृत्तिः क्रियते—अहिः, अहिः, अहिः·······।

कर्मव्यतिहारः—क्रियाविनिमयः । **अन्योऽन्यम्**—असमास पक्षे **अन्यम् अन्यम्** इति भवति । **इतरेतरस्य**—इतरेतरसम्बन्धिनः पुत्रादीन् इत्यर्थः ।

❀ (वा०) स्वार्थेऽवधार्यमाणेऽनेकस्मिन् द्वे भवतः । अस्मात् कार्षापणात् भवद्भ्यां माषं माषं देहि । **कार्षापणम्** = अनेकमाषसमुदायः । अत्र द्वौ एव माषौ दीयेते न एकः न च बहवः ।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥१३॥

अकृच्छ्रे अर्थे अनयोः वा द्वे भवतः । प्रियप्रियेण ददाति / प्रियेण ददाति । सुखसुखेन ददाति / सुखेन ददाति ।

कृच्छ्रम् = दुःखम् = प्रयासः तस्याभावः अकृच्छ्रम् विना प्रयासम् । **प्रियप्रियेण**—'प्रियेण' इत्यस्य द्वित्वे पुनः समस्तपदात् तृतीया । एवं **सुखसुखेन**—खेदं विनापि ।

यथास्वे यथायथम् ॥१४॥

यो य आत्मा यद् यद् आत्मीयं तद् यथास्वम् । तत्र यथायथम् इति निपात्यते । 'यथा' शब्दस्य द्वित्वं क्लीबत्वं च निपात्यम् । ज्ञातं सर्वं यथायथम् । यथास्वभावम् इत्यर्थः । सर्वेषां तु यथायथम् । यथाऽऽत्मीयम् इत्यर्थः ।

यथास्वम्—'यथाऽसादृश्ये' इत्यनेन अव्ययीभावः । **यथायथम्** समासे सति प्रातिपदिकत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः ।

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥१५॥

'द्वन्द्वम्' इति 'द्वि' शब्दस्य द्वित्व निपातः । पूर्वस्य 'अम्' भावः, अत्वम् उत्तरस्य, क्लीबत्वं च । तत्र रहस्यं द्वन्द्वशब्दवाच्यम् । अन्ये विषयभूताः । द्वन्द्वं मन्त्रयते । रहस्यम् इत्यर्थ ।

पूर्वस्य……च—द्वित्वे कृते द्वि + द्वि इति स्थितौ पूर्वस्य द्वि-इकारस्य अम् = द्वम् उत्तर द्वि-इकारस्य अकारः = द्व । मकारस्यानुस्वार-परसवर्णे नपुंसकत्वे च द्वन्द्वम् । **रहस्यम्**—रहसि = एकान्ते भवम् ।

मर्यादावचने—आचतुरं हि इमे पशवो द्वन्द्वं मिथुनायन्ते । मिथुनशब्देनात्र मैथुनं कर्म लक्ष्यते । अर्थात् पशुषु माता पुत्रेण, पौत्रेण, प्रपौत्रेण च मिथुनं गच्छति ।

व्युत्क्रमणम्=पृथगवस्थानम् । **द्वन्द्वं व्युत्क्रान्ताः**=द्विवर्ग-सम्बन्धेन पृथक्-अवस्थिताः।

यज्ञपात्रप्रयोगे—धीरः यज्ञपात्राणि द्वन्द्वं न्यञ्चि प्रयुनक्ति = द्वे द्वे पात्रे **न्यञ्चि** = न्यग्भूतानि उपकल्पयति ।

अभिव्यक्तौ = साहचर्येण द्वन्द्वं नारदपर्वतौ ।

अन्यत्रापि 'द्वन्द्व' इत्यस्य प्रयोगो दृश्यते यथा—**द्वन्द्वं युद्धं प्रवर्तते । चार्थे द्वन्द्वः** । तदर्थं सूत्रे 'द्वन्द्वम्' इति योगविभागः कार्यः ।

पदस्य ॥१६॥

अधिकारोऽयम् प्राक् अपदान्ताधिकारात् । यदित ऊर्ध्वम् अनुक्रमिष्यामः 'पदस्य' इत्येवं तद् वेद्यम् । वक्ष्यति—'संयोगान्तस्य लोपः' पचन् । यजन् ।

पदस्य किम् ? यजन्तौ ।

अपदान्ताधिकारात्—'अपदान्तस्य मूर्धन्यः' इत्यतः प्राक् । **पचन्**—पचन्त् इति स्थिते संयोगान्तपदस्यान्तस्य तकारस्य लोपो भवति । **यजन्तौ**—अत्र 'यजन्त्' इति न पदम् । 'पदस्य' इत्यत्र क्वचित् 'स्थान षष्ठी' क्वचित् 'अवयवषष्ठी' ।

पदात् ॥१७॥

अधिकारः 'कुत्सने च सुप्यगोत्रादौ' इत्यतः प्राक् । यदित ऊर्ध्वमनुक्रमिष्यामः 'पदात्' इत्येवं तद् वेद्यम् । वक्ष्यति—आमन्त्रितस्य च' पचसि चैत्र ।

पचसि चैत्र—अत्र पदात् परस्य चैत्रस्य निघातः = अनुदात्तो भवति । पदादौ तु न भवति चैत्र ! पचसि ।

अनुदात्तं सर्वमपादादौ ॥१८॥

'अनुदात्तम्' इति च, 'सर्वम्' इति च, 'अपादादौ' इति च—एतत्त्रयम् अधिकृतं वेद्यम् आपादपरिसमाप्तेः । यदित ऊर्ध्वम् अनुक्रमिष्यामः 'अनुदात्तं सर्वमपादादौ' इत्येवं तद् वेदितव्यम् । वक्ष्यति—'आमन्त्रितस्य' । पचसि देवदत्त ।

अपादादौ -'पाद' इत्यनेन ऋक्पादः, श्लोकपादश्च इति उभयमपि गृह्यते । युष्मद्-अस्मदोः आदेशाः अपि सर्वस्य सुबन्तस्य भवन्ति-**प्रायो वां दीयते । जनपदो नौ दीयते** ।

आमन्त्रितस्य ॥१९॥

आमन्त्रितस्य पदस्य पदात् परस्य अपादादौ वर्तमानस्य अनुदात्तो भवति । पचसि देवदत्त ! पचसि यज्ञदत्त ! आमन्त्रिताद्युदात्तत्वे प्राप्ते वचनम् ।

वृत्तौ कौमुद्यां च **आमन्त्रितस्य च** इति सूत्र पाठः ।

❀ (वा०) समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः इह मा भूवन्—**अयं दण्डो हर अनेन** । अत्र 'हर' इत्यत्र निघातो न । **ओदनं पच तव भविष्यति** । अत्र 'तव' इत्यस्य 'ते' आदेशो न, भिन्नवाक्ययोः स्थितत्वात् ।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥२०॥

युष्मद्-अस्मद्, इत्येतयोः षष्ठी-चतुर्थी-द्वितीयास्थयोः यथासंख्यं 'वाम्-नौ' इत्यादेशौ भवतः । ग्रामो वां स्वम् । ग्रामो नौ स्वम् । ग्रामो वां दीयते । ग्रामो वां पश्यति । ग्रामो नौ पश्यति ।

'पदस्य, पदात् अनुदात्तं सर्वमपादादौ' इति सर्वमिह संबद्धयते । द्विवचनान्तयोः एव आदेशौ शेषयोरग्रे विशिष्य विधानात् । 'स्थ' ग्रहणान्नेह—युष्मत्पुत्रः ।

यथासंख्यम्—युष्मदः **वाम्**, अस्मदः **नौ** । आदेशः इति क्रमेण **ग्रामो वां स्वम्—ग्रामः** = जनसमुदायः । **वाम्** = युवयोः । **नौ** = आवयोः । इति षष्ठीद्विवचनान्तयोः एतौ आदेशौ बोध्यौ । चतुर्थीद्विवचनान्तयोः द्वितीयं युग्मं **'दीयते'** इति क्रियान्तम् । द्वितीयाद्विवचनान्तयोः अन्तिमौ **'पश्यति'** क्रियान्तौ ज्ञेयौ ।

पदस्य ......सम्बद्धयते—तेन पदात् परयोः युष्मदस्मदोः पदयोः अनुदात्तौ आदेशौ भवतः ।

शेषयोः ....विधानात् —एकवचन-बहुवचनान्तयोः आदेशान्तरकरणात् ।

स्थ ....नेह—यत्र विभक्तिः श्रूयते तत्रैव आदेशौ भवतः, न समासादिना विभक्तिलोपे प्रत्ययलक्षणंनेति भावः ।

बहुवचनस्य वस्नसौ ॥२१॥

बहुवचनान्तयोरनयोः षष्ठ्यादिस्थितयोः यथासंख्यं 'वस्-नस्' इत्येतौ आदेशौ भवतः । ग्रामो वः स्वम् । ग्रामो नः स्वम् । ग्रामो वो दीयते । ग्रामो नो दीयते । ग्रामो वः पश्यति । ग्रामो नः पश्यति ।

ग्रामो वः स्वम्—वः = युष्माकम् । नः = अस्माकम् एवं क्रमशः 'युष्मभ्यम्-अस्मभ्यम्' इत्येतयोः तथा 'युष्मान्-अस्मान्' इत्येतयोः वस्नसौ बोध्यौ ।

तेमयावेकवचनस्य ॥२२॥

अनयोः एकवचनान्तयोः षष्ठीचतुर्थीस्थयोः 'ते, मे'—इत्येतौ आदेशौ भवतः । ग्रामः ते स्वम् । ग्रामः मे स्वम् । ग्रामः ते दीयताम् । ग्रामः मे दीयताम् ।

ते, मे—क्रमशः तव, मम तथा तुभ्यम्, मह्यम् इत्येतयोः आदेशौ बोध्यौ । द्वितीयान्तयोः एतयोः अग्रे 'त्वा-मा' इत्यादेशविधानान्नात्र तस्याः ग्रहणम् ।

त्वामौ द्वितीयायाः ॥२३॥

द्वितीयायाः यदेकवचनं तदन्तयोः अनयोः 'त्वा' मा' इत्येतौ आदेशौ भवतः । ग्रामः त्वा पश्यति । ग्रामो मा पश्यति ।

त्वा—त्वाम् । मा—माम् ।

न चवाहाहैवयुक्ते ॥२४॥

च-वा-ह-अह-एव, एतैर्युक्ते अनयोः वाम्, नौ आदयो न भवन्ति । ग्रामः तव च स्वम्, मम च । एवं 'वा-ह-अह-एव' एतैरपि योगेऽप्युदाहार्यम् ।

युक्तग्रहणं साक्षाद् योगप्रतिपत्त्यर्थम् । युक्तयुक्ते तु न निषेधः । ग्रामश्च ते स्वम्, नगरं च मे स्वम् ।

एवं…… उदाहार्यम्—षष्ठी-चतुर्थी-द्वितीयाविभक्तीनाम् एक-द्वि-बहुवचनेषु प्रत्येक शब्दस्य नव रूपाणि भवन्ति एवम् युष्मद् अस्मदोः अष्टादश रूपाणि सन्ति येषु **'वा-ह-अह-एव'** इत्येतेषाम् एकतमेनापि योगे पूर्वोक्ताः **ते मे, वां-नौ-वः नः** इत्यादेशाः न भवन्ति ।

च—समुच्चयार्थे । **वा**—विकल्पे । ह-अह उभौ अद्भुते । ह—खेदे । **एव**—अवधारणे निपाताः सन्ति ।

कतिपयोदाहरणानि लिख्यन्ते—

वा—ग्रामः तव वा स्वम्, मम वा । ह—ग्रामः त्वां ह पश्यति, मां ह । अह—ग्रामः तुभ्यम् अह दीयते, मह्यम् अह । एव—ग्रामो युष्माकम् एव स्वम्, अस्माकम् एव स्वम् । एवम् संकलितानि रूपाणि १८×५=९० (नवतिः) ज्ञेयानि ।

साक्षात्—अव्यवधानेन यत्र 'च' आदिभिर्योगोऽस्ति तत्रैव निषेधो भवति । **युक्तयुक्ते**—युक्तैः युक्ते अर्थात् यदा 'च' इत्यादयो निपाताः युष्मद्-अस्मद् इत्येतयोः अनुगतान् अर्थान् द्योतयन्ति, तदा च-आदिभिः युष्मद्-अस्मदोः साक्षाद् योगः । **ग्रामश्च ते स्वं, नगरं च मे स्वम्** अत्र ग्राम-नगर शब्दौ 'च' शब्देन युक्तौ युष्मद्-अस्मदौ च ग्राम-नगराभ्यां युक्तौ ।

पश्यार्थैश्चानालोचने ॥२५॥

अचाक्षुषज्ञानार्थैः धातुभिर्योगे अनयोः 'वाम्-नौ' आदयः आदेशाः न भवन्ति । ग्रामस्त्वां समीक्ष्य आगतः । मां समीक्ष्य आगतः । मम स्वम् । तव स्वम् । तुभ्यं दीयमानं समीक्ष्य । मह्यम् ।

पश्यार्थैः = दर्शनार्थैः । **दर्शनम्** = ज्ञानम् । **आलोचनम्** = चक्षुर्विज्ञानम् । तद्भिन्नं मनसा निरूपणम् अनालोचनम् । **ग्रामः**=जनसमुदायः । **समीक्ष्य** = मनसा निरूप्य । सर्वेषु उदाहरणेषु **ग्रामः समीक्ष्य आगतः** इति योजनीयम् ।

सपूर्वायाः प्रथमाया विभाषा ॥२६॥

विद्यमानपूर्वात् प्रथमान्तात् उत्तरयोः एते आदेशा विभाषा

न भवन्ति। ग्रामे कंबलः ते स्वम् / तव स्वम्। मम स्वम् / मे स्वम्। ग्रामे छात्रः त्वाम् / त्वा। माम् / मा वा पश्यति।

❀ (वा०) अन्वादेशेऽनयोर्वा एते स्युः। भक्तस्त्वमप्यहं तेन हरिस्त्वा त्रायते स माम्।

सपूर्वायाः—अत्र स (सह) शब्दो विद्यमानार्थकः, पूर्व शब्दो व्यवस्थावाचकः; पञ्चमी विभक्तिः। **प्रथमान्तात्**—तेन षष्ठी-चतुर्थी-द्वितीया विभक्तीनाम् एकवचनान्तानां रूपाणामेव विकल्पो भवति। **ग्रामे कंबलः तुभ्यम् / ते। मह्यम् / मे** इत्यपि उदाहरणम्।

अन्वादेशे वा—इदं वार्तिकम् कौमुदीकारानुसारम्। तत्र कौमुद्याम् सूत्रस्य व्याख्याने एव 'अनन्वादेश' पदं वर्तते। वृत्तौ तु वार्तिके 'अन्वादेशस्य' स्थाने **अनन्वादेश** इति पाठः।

सूत्रस्य प्रयोजनम् अन्वादेशार्थम् उक्तम्। वस्तुतः वार्तिके 'अनन्वादेशे' एव पाठः प्रशस्यः सूत्रेणान्वादेशे विकल्पविधानात्।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥२७॥

तिङन्तात्पदात् उत्तराणि कुत्सने आभीक्ष्ण्ये चार्थे अनुदात्तानि भवन्ति। कुत्सने—पचति गोत्रम्। जल्पति गोत्रम्। आभीक्ष्ण्ये-पचतिपचति गोत्रम्।

ब्रुवः—पचति ब्रुवम्। ब्रुवः इति ब्रूञः कन् निपातनात्, वच्यादेशाभावश्च।

गोत्र। ब्रुव। प्रवचन। यजन इत्यादि।

पचति गोत्रम्—पौरुषेण जीवकां कल्पयितुम् अशक्तः गोत्रख्यापनेन तां कल्पयति। **पचति**—व्यक्तीकरोति। √पचि 'व्यक्तीकरणे' इत्यस्य रूपम्। **पचतिब्रुवम्**—स्वं वक्तारं ख्यापयति।

❀ (वा०) वा नाम। **नाम** इत्येतद् वा अनुदात्तो भवति। पक्षे आद्युदात्तम्। पचति नाम्। पठति नाम। **यजन**—वृत्तौ इदं न पठितम्।

तिङ्ङतिङः ॥२८॥

तिङन्तम् अतिङन्तात् पदात् परम् अनुदात्तं भवति । चैत्रः पचति ।

'तिङ्' इति किम् ? नीलम् उत्पलम् ।

'अतिङः' किम् ? पचति भवति । करोति वक्ष्यति ।

सूत्रे तिङ् + अतिङः इति सन्धिविच्छेदः 'ङुट्' आगमः । **उत्पलम्** आद्युदात्तं ततः परोऽनुदात्तः पकारः स्वरितो भवति ।

पचति भवति—पाकक्रिया भवति । 'पचत्यादयः क्रियायाः कर्त्र्यो भवन्ति ।' इति भाष्ये उक्तम् ।

न लुट् ॥२९॥

लुट्-अन्तं तिङन्तं नानुदात्तं भवति । श्वः कर्ता । मासेन कर्ता ।

कर्ता—'तास्' उदात्तः ।

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥३०॥

एतैर्निपातैर्युक्तं नानुदात्तं भवति । यत्करोति । यदि पचति । हन्त करोति । कुवित्करोति । नेज्जिह्मायन्तो नरकं पताम । चेत् अधीते ।

'चण्' इति णिद्विशिष्टः 'चेत' अर्थे वर्तते अयं च करिष्यति 'अयं चेत् करिष्यति' इत्यर्थः । समुच्चयादिवाचकस्य 'च' शब्दस्य तु योगे नायं विधिः ।

कच्चिचद्भुङ्क्ते । यत्र भुङ्क्ते ।

एतैः—यत्-यदि-हन्त-कुवित्-नेत्-चेत्-चण्-कच्चित्-यत्र नामकैः (निपातैः) । एतेषाम् अर्थबोधकौ सङ्ग्रहश्लोकौ यथा—

यद् यदार्थे च हेतौ च विचारे **यदि-चेत्-चणः** ।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥

कच्चित् प्रश्ने नेन्निषेधे प्रशंसायां कुवित् स्मृतम् ।
यत्राधारे निपात्वं यदादीनां विशेषणम् ॥

नह प्रत्यारम्भे ॥३१॥

'नह' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रत्यारम्भे वर्तमाने । चोदितस्यावधोरणे उपालिप्सया प्रतिषेध-युक्तः प्रत्यारम्भः क्रियते । नह भोक्ष्यसे । नहाध्येष्यसे ।

प्रत्यारम्भ इति किम् ? नह वै तस्मिन् लोके दक्षिणामिच्छन्ति ।

नह = अयं निपातसमुदायः प्रतिषेधार्थकः । **प्रत्यारम्भः** = पुनरारम्भः । **चोदितस्य** = कर्त्तव्यरूपेणोपन्यस्तस्य । **अवधीरणे** = अपमाने । **उपालिप्सया**—अवधीरणकर्तुः उपालम्भस्येच्छया ।

सत्यं प्रश्ने ॥३२॥

'सत्यम्' इत्यनेन युक्तं तिङन्तं प्रश्ने न अनुदात्तं भवति । सत्यं भोक्ष्यसे । सत्यम् अध्येष्यसे ।

सत्यम् इति शब्दः उदाहरणे **प्रश्नार्थकः** । प्रत्युदाहरणे तु **ऋतस्य** बोधकः ।

अङ्गाप्रातिलोम्ये ॥३३॥

'अङ्ग' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अप्रातिलोम्ये । अङ्ग कुरु । अङ्ग पच ।

अप्रातिलोम्य इति किम् ? अङ्ग कूज वृषल इदानीं ज्ञास्यसि जाल्म ।

प्रातिलोम्यम् = प्रतिकूलता । **अप्रातिलोम्यम्** = अनुकूलत्वम् । **अङ्ग**—निपातोऽयम् अनुज्ञार्थकः अनुकूलत्वं गमयति । **अङ्ग कूज**.......—कूजनम् अत्र अनभिमतम्, अतः प्रतिकूलो भवति ।

हि च ॥३४॥

'हि' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अप्रातिलोम्ये। स हि कुरु। स हि पच'।

अप्रातिलोम्ये किम्? स हि कूज वृषल इदानीं ज्ञास्यसि जाल्म।

स हि कुरु—'हि' शब्दस्य अवधारणम् अर्थः हेतुर्वा। प्रत्युदाहरणे तु 'हि' अमर्षार्थिकः।

छन्दस्यनेकमपि साकाङ्क्षम् ॥३५॥

छन्दसि 'हि' इत्यनेन युक्तं साकांक्षम् अनेकमपि नानुदात्तं भवति। कदाचित् एकम्, कदाचित् अनेकम् इत्यर्थः। अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति। तिङन्तद्वयमप्येतन्न निहन्यते।

एकं खल्वपि—अग्निर्हि अग्रे पूर्वमुदजयत् तमिन्द्रोऽनूदजयत्। एकम् 'उदजयत्' आद्युदात्तम्, अपरमनुदात्तम्।

अनृतम्...... **विपुनाति**—अनेकस्योदाहरणम् एतत्। अत्र द्वे तिङन्ते 'हि' शब्देन युक्ते। **पाप्मा** = मदः। **विपुनाति** = शुद्धिम् आपादयति। **एकम्**.......—अत्र पूर्वम् **उदजयत्** न अनुदात्तम्।

यावद्यथाभ्याम् ॥३६॥

आभ्यां युक्तं तिङन्तं नानुदात्तं भवति। यावद् भुङ्क्ते। यथा भुङ्क्ते।

यावद् – साकल्ये, अध्यवसाये वा प्रयुज्यते। **यथा**-योग्यता-वीप्सा-सादृश्यार्थाः।

सूत्रे तृतीया निर्देशात् परेणापि योगे भवति निषेधः—देवदत्तः पचति यावत्। देवदत्तः पचति यथा।

पूजायां नानन्तरम् ॥३७॥

आभ्यां युक्तम् अनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति । पूर्वेण प्राप्तो निघात प्रतिषेधः प्रतिषिध्यते ।

किं तर्हि ? अनुदात्तमेव । यावत्पचति शोभनम् । यथा-पचति शोभनम् ।

'पूजायाम्' इति किम् ? यावद् भुङ्क्ते । यथा भुङ्क्ते ।

अनन्तरम्' इति किम् ? यावद् देवदत्तः पचति शोभनम् ।

पूर्वेणात्र निघातः प्रतिषिध्यते ।

आभ्याम्—यावत्-यथा इत्येताभ्याम् । **अनुदात्तमेव**—द्वौ नकारौ प्रकृतम् अर्थं गमयतः । **यावत्पचति शोभनम्**—पाकस्य स्तुतिः अत्र पूजा । **यावद् देवदत्तः**···—अत्र यावत्-पचत्योर्मध्ये देवदत्तस्य पाठात् नानन्तर्यम् ।

उपसर्गव्यपेतं च ॥३८॥

आभ्यां युक्तम् उपसर्गव्यपेतं च तिङन्तं पूजायां विषये नानुदात्तं न भवति । किं तर्हि ? अनुदात्तमेव । उपसर्गव्यवधानार्थं वचनम् । पूर्वम् 'अनन्तरम्' इत्युक्तम् । यावत्प्रपचति । शोभनम् । यथा प्रपचति चारु ।

व्यपेतम्—व्यवहितम् । 'अनन्तरम्' इत्येव—यावद् देवदत्तः प्रपचति ।

तुपश्यपश्यताहैः पूजायाम् ॥३९॥

एतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायाम् माणवकस्तु भुङ्क्ते शोभनम् । पश्य माणवको भुङ्क्ते । एवं 'पश्यत-अह' योगेऽपि ।

तु—आश्चर्यार्थे भोजनस्य पूजा गम्यते । **पश्य···भुङ्क्ते—शोभनम्** इति शेषः । **योगेऽपि—पश्यत माणवको भुङ्क्ते शोभनम् । अह माणवको भुङ्क्ते शोभनम्** सर्वत्र 'पूजा' अर्थो वर्तते ।

पूजायाम् इति किम् ? पश्य मृगो धावति । तत्त्वकथनमेतत् ।

अहो च ॥४०॥

'अहो' इत्यनेन युक्तं तिङन्तं नानुदात्तं न भवति पूजायाम् । अहो मैत्रः पचति शोभनम् । पृथग् योगः उत्तरार्थम् ।

सूत्रे चकारेण पूजार्थोऽनुकृष्यते । **उत्तरार्थम्**—'शेषे विभाषा' इत्यत्र 'अहो' इत्यस्यैव अनुवृत्तिः यथा स्यात् ।

शेषे विभाषा ॥४१॥

'अहो' इत्यनेन युक्तं तिङन्तं विभाषा नानुदात्तं भवति शेषे । कश्च शेषः ? यदन्यत् पूजायाः । अहो कटं करिष्यसि । ग्रामम् अहो गमिष्यसि । असूयावचनमेतत् ।

'पूजायाम्' इति पूर्वत्र चानुकृष्टत्वात् अनधिकारादेव सिद्धे 'शेष' वचनं विस्पष्टार्थम् ।

असूयावचनम्—असूया ग्रस्तमनाः पुरुषः एवं आश्चर्यवत् प्रतिपादयति । पक्षे प्रत्ययस्वरः करिष्यसि । **अनुकृष्टत्वात्**—अनुकृष्टस्य अनुवृत्तिर्न भवति ।

पुरा च परीप्सायाम् ॥४२॥

'पुरा' इत्यनेन युक्तं तिङन्तं परीप्सायाम् अर्थे विभाषा नानुदात्तं भवति । परीप्सा = त्वरा । अधीष्व माणवक, पुरा विद्योतते विद्युत् । 'पुरा' शब्दोऽत्र भविष्यत्प्रत्यासत्ति द्योतयति । पक्षे प्रत्ययस्वरः विद्योतते ।

अधीष्व—'त्वरितम् अधीष्व' इत्यर्थो गम्यते । **प्रत्यासत्तिम्** = समय-सामीप्यम् । **पुरा विद्योतते**—'यावत् पुरानिपातयोर्लट्' । अत्र विद्युद्द्योतनात् अध्ययने अन्तरायस्य प्रत्यासत्तिम् द्योतयति 'पुरा' शब्दः ।

नन्वित्यनुज्ञैषणायाम् ॥४३॥

'ननु' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये । अनुज्ञायाः एषणा = प्रार्थना इत्यर्थः । ननु करोमि भोः ! । ननु गच्छामि भोः ! । अनुजानीहि माम् इत्यर्थः ।

अनुज्ञा—स्वयमेव कर्तुम् उद्यतस्य 'एवं क्रियताम्' इति अनुज्ञानम्। **ननु**—'ननु + इति' इतिकरणेन एकम् एवेदं शब्दरूपम् इति ज्ञायते न निपातयोः समुदायः।

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ॥४४॥

'किम्' इत्येतद् यदा क्रियाप्रश्ने वर्तते, तेन युक्तं तिङन्तम् अनुपसर्गम् अप्रतिषिद्धं नानुदात्तं भवति।

किं देवदत्तः पचति, आहोस्वित् अधीते।

क्रियाग्रहणं किम्? साधन-प्रश्ने मा भूत्। किं देवदत्तः ओदनं पचति, आहोस्वित् अपूपान्।

'अप्रतिषिद्धम्' इति किम्? किं देवदत्तो न पठति, आहोस्विन्न करोति।

अनुपसर्गम् = उपसर्गरहितम्। तेनात्र भवति निघातः, किं देवदत्तः प्रपचति, आहोस्वित् प्रकरोति।

अप्रतिषिद्धम् = प्रतिषेधार्थभिन्नम्। **साधन...... अपूपान्**—अत्र ओदन-अपूपयोर्मध्ये कः पाककर्म इति प्रश्नः।

क्रियाप्रश्ने द्वे वाक्ये भवतः। तत्र केषाञ्चित् आचार्याणां मते किं युक्तस्य तिङन्तपदस्य निघातो भवति द्वितीयस्य न। अपरेषां मते उभयत्र निघात-प्रतिषेधो भवतीति विशेषः।

लोपे विभाषा ॥४५॥

किमो लोपे सति क्रियाप्रश्ने अनुपसर्गम् अप्रतिषिद्धं तिङन्तं विभाषा अनुदात्तं भवति। क्व चास्य लोपः? यत्र गम्यते चार्थः, न प्रयुज्यते शब्दः। स पचति, आहोस्वित् पठति। विनैव किमा प्रश्नो गम्यते। प्राप्तविभाषेयं किमर्थेन योगात्।

किमो लोपे—प्रकृतत्वात्तस्यैव लोपो विज्ञायते।

गम्यते चार्थः—प्रकरणवशात् । **किमा**—'किम्' इति शब्देन ।

प्राप्तविभाषा—पक्षे प॒च॒ति॒, प॒ठ॒ति॒ इत्यपि ज्ञेयम् ।

एहिमन्ये प्रहासे लृट् ॥४६॥

'एहि मन्ये' इत्यनेन युक्तं लृडन्तं प्रहासे नानुदात्तं भवति । एहि मन्ये भो॒क्ष्यसेँ, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः ।

'गत्यर्थलोटा लृट्….' इत्यनेनैव सिद्धे सत्यारम्भो नियमार्थः—'एहि मन्ये'-युक्ते प्रहासे एव यथा स्यात्, अन्यत्र मा भूत्—एहि मन्यसे, ओदनं भो॒क्ष्य॒े ।

एहिमन्ये इति द्वयोः तिङन्तयोः समुदाये एकवचनम् ।

प्रहासः = प्रकृष्टो हासः, परिहासः इत्यर्थः ।

एहिमन्ये ….अतिथिभिः—अत्र 'प्रहासे च मन्योपपदे' इत्यनेन √भुज् धातोः उत्तमपुरुषस्थाने **मध्यमः**, √मन् इत्यस्मात् मध्यमपुरुषस्य स्थाने उत्तमः इति पुरुषव्यत्ययः ।

जात्वपूर्वम् ॥४७॥

'जातु' इत्येतत् अविद्यमानपूर्वम्, तेन युक्तं तिङन्तं नानुदात्तं भवति । जातु भो॒क्ष्यसेँ ।

'अपूर्वम्' इति किम् ? कटं जातु क॒रि॒ष्य॒ति॒ ।

अपूर्वम्—अविद्यमानं पूर्वं यस्मात् तत् । इदं 'जातु' इत्येतस्य विशेषणम् । प्रत्युदाहरणे तु **कटम्** इति पूर्वं वर्तते इति न सूत्रप्रवृत्तिः ।

किंवृत्तं च चिदुत्तरम् ॥४८॥

किमो वृत्तं किंवृत्तम् । किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतर-डतमौ च प्रत्ययौ । तत् किंवृत्तं चित्-उत्तरम् अविद्यमानपूर्वम्, तेन युक्तं तिङन्तं नानुदात्तं भवति । कश्चिद् भुङ्क्ते । कश्चिद॒धी॒ते । कतरश्चिद् भु॒ङ्क्ते । कतमश्चिद भु॒ङ्क्ते ।

किमः वृत्तम्—अत्र परिसंख्यानं कृतम्, किं विभक्त्यन्तं पदम्, 'किम्' इत्यस्य 'डतर-डतम'-प्रत्ययान्तं रूपम् कतर-कतमाख्यम् ।

अपूर्वम् इत्येव—अत्र न—देवदत्तः किञ्चित् पठति ।

आहो उताहो चानन्तरम् ॥४९॥

निघातप्रतिषेधोऽनुवर्तते, 'अपूर्वम्' इति च । आभ्याम् अविद्यमानपूर्वाभ्यां युक्तम् अनन्तरं तिङन्तं नानुदात्तं भवति । आहो भुङ्क्ते । उताहो भुङ्क्ते ।

'अनन्तरम्' इति किम् ? शेषे विभाषां वक्ष्यति ।

अनन्तरम्—अविद्यमानम् **अन्तरम्** = व्यवधानम् यस्य तत्, अव्यवहितम् इत्यर्थः । **आहो-उताहो**—विकल्प-सन्देह-प्रश्नव्यञ्जकौ अव्ययौ ।

शेषे विभाषा ॥५०॥

आहो—उताहो, इत्येताभ्यां युक्तं तिङन्तं शेषे विभाषा अनुदात्तं भवति । कश्च शेषः ? यत् अन्यत् अनन्तरात् । आहो देवदत्तः पचति / पचति । उताहो देवदत्तः पठति / पठति ।

आहो···पचति—अत्र आहो-पचत्योर्मध्ये देवदत्त-शब्देन व्यवधानं वर्तते ।

गत्यर्थलोटा लृण्न चेत् कारकं सर्वान्यत् ॥५१॥

निघातप्रतिषेधोऽनुवर्तते । गमिना समानार्थाः गत्यर्थाः । तेषां लोट् । तेन गत्यर्थलोटा युक्तं नानुदात्तं भवति । न चेत्कारकं सर्वान्यद् भवति यत्रैव कारके कर्तरि कर्मणि वा लोट्, यदि तत्रैव लृट्-अपि भवतीत्यर्थः । कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकान्तरम् । आगच्छ देवदत्त ! ग्रामं द्रक्ष्यस्येनम् । आगच्छ देवदत्त ! ग्रामम् ओदनं भोक्ष्यसे । उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते ।

'न चेत्कारकं सर्वान्यत्' इति किम् ? आगच्छ चैत्र ! ग्रामं पित्रा ते भोक्ष्यते ।

गत्यर्थाः—गतिः अर्थो येषां ते । **युक्तम्**—योगः = सम्बन्धः निमित्त-निमित्तिरूपः । **सर्वान्यत्**—सर्वम् अन्यत् **यत्रैव**⋯ ⋯**इत्यर्थः**—लोडन्त-लृडन्तयोर्धात्वोः एकमेव कारकं कर्ता कर्म वा यत्र भवति ।

आगच्छ⋯ ⋯**एनम्**—अत्र एक एव कर्त्ता देवदत्तः ।

उह्यन्ताम्⋯⋯**भोक्ष्यन्ते**—अत्र कर्मवाच्ये लकारे कर्त्ता यद्यपि भिद्यते तथापि **शालयः** 'कर्म' अभिन्न मेवेति सिद्धो निघातः ।

आगच्छ⋯⋯**भोक्ष्यते**—अत्र लोडन्तस्य कर्ता चैत्रः, लृडन्तस्य तु तस्य पिता, इति भिद्यते कारकम् ।

सर्वान्यत्—सर्वग्रहणेन **आगच्छ देवदत्त ! ग्रामम् त्वं चाहं च द्रक्ष्यावः एनम्** इत्यत्रापि निघातप्रतिषेधो भवति ।

लोट् च ॥५२॥

लोडन्तं तिङन्तम् गत्यर्थलोटा युक्तं नानुदात्तं भवति । न चेत् कारकं सर्वान्यत् । लोडन्तयोरेकं यदि भवतीत्यर्थः । आगच्छ देवदत्त ! ग्रामं पश्य । आगम्यतां देवदत्तेन ग्रामो दृश्यताम् । पृथग्योगकरणम् उत्तरार्थम् ।

सूत्रे **च** इति समुच्चयार्थः । **उत्तरार्थम्**—उत्तरः = वक्ष्यमाणः विकल्पः लोटः एव यथा स्यात् ।

विभाषितं सोपसर्गमनुत्तमम् ।५३।।

विभाषितं सोपसर्गम् उत्तमवर्जितं गत्यर्थलोटा युक्तं विभाषितं नानुदात्तं भवति । न चेत् कारकं सर्वान्यत् । आगच्छ चैत्र ! ग्रामं प्रविश । प्रविश । आगच्छ चैत्र ! प्रशाधि / प्रशाधि ।

अनुत्तमं किम् ? आगच्छ चैत्र ! ग्रामं प्रशासानि ।

उत्तमर्जितम्—उत्तमपुरुषे नेदं विभाषितं निघातनिषेधसूत्रं प्रवर्त्तते । तत्र नित्यमेव निघातनिषेधो भवति ।

हन्त च ॥५४॥

'हन्त' इत्यनेन युक्तं लोडन्तं सोपसर्गम् अनुत्तमं विभाषितं नानुदात्तं भवति । हन्त ! प्रविंश / प्रविश । हन्त प्रशाधि / प्रशाधि ।

'निपातैर्यद्यदि 'हन्त……' इति नित्यमेव निघातप्रतिषेधो भवति—हन्त ! प्रभुनजावहै ।

निपातैः……भवति—इदं सूत्रं 'हन्त' योगे नित्यमेव निघातप्रतिषेधं करोति । 'हन्त च' इति सूत्रम् उत्तमपुरुषे न विभाषितं निघातनिषेधं विदधाति। एवम् अनुपसर्गे **हन्त ! कुरु** इत्यत्रापि नित्यमेवनिघातनिषेधो भवति।

आम एकान्तरमामन्त्रितमनन्तिके ॥५५॥

आम उत्तरम् एकपदान्तरितम् आमन्त्रितम् अनन्तिके नानुदात्तं भवति । आं पठसि मैत्रा३ । आं भो मैत्रा३ ।

भो इत्यामन्त्रितान्तमपि 'नामन्त्रिते समानाधिकरणे……' इति विद्यमानवद् भवति ।

अनन्तिके इति किम् ? आं चैत्र !

एकपदान्तरितम्—एकेन पदेन अन्तरितम्=व्यवहितम् । **अनन्तिके**—अन्तिकम्=समीपम् तद्भिन्नं दूरम् इत्यर्थः । दूरे एव सम्बोधन पदस्य टेः प्लुतो भवति ।

भो मैत्रा३—भोस् इत्यस्य सकारस्य रुत्वे कृते, 'भोभगो……' इत्यनेन रुत्वस्य यकारः, 'हलि सर्वेषाम्' इत्यनेन तस्य लोपः । **विद्यमानवत्**—'आमन्त्रिते……' इत्यनेन अविद्यमानवद् भावस्य प्रतिषेधात् । वृत्तौ तु **देवदत्त३** इति लिखितम् ।

यद्धितुपरं छन्दसि ॥५६॥

यत्तिङन्तम् यत्परम, हि परम्, तु परं च; तत् छन्दसि नानुदात्तम् । यत्परम्—गवां गोत्रमुदसृंजो यदंङ्गिरः । हि-परम्—इन्दंवो वामुशन्तिं हि । तु-परम्—आख्यास्यामिं तु ते ।

'निपातैर्यद्यदि......' इत्यनेन निषेधे सिद्धे नियमार्थमुक्तिः— एतैरेव परैर्निषेधो नान्यैः इति । तेनेह भवत्येव निघातः । जाये स्वो रोहावेहि ।

यद्धितुपरम्—यत्-हि-तु इति यद्धितवः परे यस्मात्तत् । **उदसृजः—**उत् √सृज् (विसर्गे) + लङ् → सिप् । **उशन्ति**—√वश् (कान्तौ) + लट् → झि । 'ग्रहिज्या ......' इति सम्प्रसारणम् । **आख्यास्यामि**—आ √ख्या (प्रकथने) + लृट् → मिप् । **रोहावेहि**- रोहाव √रुह् (बीजजन्मनि) + लोट् → वस्, ('आट्' आगमः अन्त्यसकारस्य लोपः) + एहि—आङ् √इण् (गतौ) + लोट् → सिप् → हि । अत्र 'लोट् च' इत्यनेन प्राप्तो निघातो न भवति ।

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥५७॥

एषु परतः अगतेः उत्तरं तिङन्तं नानुदात्तं भवति । मैत्रः पच'ति चन । मैत्रः पच'ति चित् । पच'तीव । पच'ति गोत्रम् । पच'तिब्रुवम् । पच'ति प्रवचनम् ।

गोत्रादयः इहापि कुत्सनाभीक्ष्ण्ययोरेव गृह्यन्ते । तद्धिते— मैत्रः पच'तिकल्पम् । आम्रेडिते-देवदत्तः पच'तिपचति ।

अगतेः—गतिसंज्ञकस्य 'प्र' आद्युपसर्गभिन्नस्य । तेनात्र भवति निघातः **देवदत्तः प्रपचति चन** । **पचतीव**—सर्वत्रोदाहरणेषु 'मैत्रः' इति कर्ता पूर्वं योजनीयः ।

गोत्रादयः......गृह्यन्ते—'तिङो गोत्रादीनि...' (८/१/२७) इत्यत्र प्रति-पादितं यत् कुत्सनाभीक्ष्ण्ययोरेवार्थयोः गोत्रादीनि अनुदात्तानि भवन्ति ।

चादिषु च ॥५८॥

एषु तिङन्तम् अगतेः परं नानुदात्तं भवति । चादयः 'नचवाहाहैवयुक्ते' इत्यत्रोक्ताः इह गृह्यन्ते । मैत्रः पच'ति च पठति च । मैत्रः पच'ति वा पठति वा इत्यादि ।

चादयः......गृह्यन्ते—अत्र 'नचवा.....' इति सूत्रोक्ताः चादयो गृह्यन्ते न 'चादयोऽसत्त्वे' इति गण-पठिताः । **इत्यादयः**—आदि शब्देन सूत्रपठितानां **ह-अह-एव** इत्येतेषां ग्रहणम् । उदाहरणानि क्रमशः—देवदत्तः

पचति ह खादति ह । देवदत्तः पचत्यह खादत्यह । देवदत्तः पचत्येव खादत्येव ।

अगतेः इत्येव—देवदत्तः प्रपचति च प्रखादति च । अत्र 'प्रपचति' इत्यत्र 'चवायोगे प्रथमा' इति वक्ष्यमाणसूत्रेण नानुदात्तत्वम् । 'प्रखादति' इत्यत्र अनुदात्तं भवत्येव ।

चवायोगे प्रथमा ॥५९॥

तिङ्विघातप्रतिषेधोऽनुवर्तते, 'अगतेः' इति न वर्तते । आभ्यां योगे प्रथमा तिङ्विभक्तिः नानुदात्ता भवति । खरांश्च कालयति वीणां च वादयति । खरान् वा कालयति वीणां वा वादयति ।

न वर्तते—'अगतेः' इति पदं पूर्वसूत्रे चकारेणानुकृष्टम् इति अत्र नानुवर्तते । **प्रथमा**—पूर्वोक्तं तिङन्तम् । उत्तरत्र तु भवत्येव निघातः । **कालयति** = प्रेरयति ।

हेति क्षियायाम् ॥६०॥

'ह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायाम् विषये । क्षिया = आचारभेदः धर्मव्यतिक्रमः । स्वयं ह रथेन याती३, उपाध्यायं पदातिं गमयति । स्वयं ह ओदनं भुङ्क्ते, उपाध्यायं सक्तून् पाययति । प्रथमस्य तिङन्तस्य निघात-प्रतिषेधः ।

'क्षियाशीःप्रैषेषु तिङाकांक्षम्' इति प्लुतो भवति ।

धर्मव्यतिक्रमः—शिष्टाचारोल्लंघनम् । **ह**—अनेकार्थमिदम् अव्ययम् अत्र निन्दापरम् । **याती३**—साकांक्षस्य तिङन्तस्य टेः प्लुतो भवति क्षिया-दिष्वर्थेषु गम्येषु । वृत्तौ तु **याति३** इति लिखितम् ।

अहेति विनियोगे च ॥६१॥

'अह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिः नानुदात्ता भवति विनियोगे गम्ये । चकारात् क्षियायां च । नानाप्रयोजनो नियोगो

विनियोगः । त्वम् अह ग्रामं गच्छ । त्वम् अह रथेनारण्यं गच्छ । क्षियायाम्—स्वयम् अह रथेन याती३ उपाध्यायं पदातिं गमयति । पूर्ववत् निघातप्रतिषेधः प्लुतश्च ।

विनियोगः = प्रेषणम् व्यापारणम् इत्यर्थः । **अह**—अव्ययशब्दः विनियोगे प्रैषार्थकः, क्षियायाम् निन्दापरकः ।

चाहलोप एवेत्यवधारणम् ।६२॥

च-अह, एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । 'एव' इत्येतत् अवधारणे । यत्र गम्यते चार्थो न च प्रयुज्यते तत्र लोपो ज्ञेयः ।

'च' लोपे—देवदत्त एव ग्रामं गच्छतु' स(देवदत्तः) एव अरण्यं गच्छतु । ग्रामम् अरण्यं च गच्छतु इत्यर्थः । समानकर्तृके च-लोपः ।

नानाकर्तृके 'अह' लोपः । चैत्र एव ग्रामं गच्छतु, मैत्र एवारण्यं गच्छतु । 'ग्रामं केवलम्, अरण्यं केवलं गच्छतु' । इत्यर्थः ।

समानकर्तृके—समानः = एकः कर्ता यस्मिन् कार्ये सः तस्मिन् । **अवधारणम्**—निश्चयकरणम् ।

चादिलोपे विभाषा ॥६३॥

पूर्वोक्ताश्चादयः । तेषां लोपे प्रथमा तिङविभक्तिर्नानुदात्ता भवति । च-लोपे—शुक्लाः व्रीहयो भवन्ति / भवन्ति । श्वेताः गाः आज्याय दुहन्ति । 'भवन्ति' इत्येतद् विकल्पेन न निहन्यते । वा-लोपे—व्रीहिभिर्यजेत / यजेत । यवैर्यजेत । इत्याद्युदाहार्यम् ।

पूर्वोक्ताः—'नचवाहाहैवयुक्ते' इति सूत्रोक्ताः च-वा-ह-अह-एव, इत्येते । निहन्यते—अनुदात्तो भवति । **शुक्लाः……दुहन्ति**—एते वाक्ये चार्थेन सम्बद्धे ।

वैवावेति चच्छन्दसि ॥६४॥

वै-वाव, इत्याभ्यां युक्ता प्रथमा तिङ् विभक्तिः विभाषा नानुदात्ता भवति छन्दसि । अहंवै देवानाम् आसीत् रात्रिरसुराणामासीत् । अयं वाव हस्त आसीत् । नेतर आसीत् ।

वै—स्फुटार्थे । **वाव**—स्फुटार्थे प्रसिद्धौ च ।

एकान्याभ्यां समर्थाभ्याम् ॥६५॥

आभ्यां युक्ता प्रथमा तिङ्विभक्तिः विभाषा नानुदात्ता भवति छन्दसि । अजामेकां जिन्वति / 'जिन्वति' पक्षे न निहन्यते मध्योदात्तमेतत् । तयोरन्यः पिप्पलं स्वाद्वत्ति । अनश्नन्नन्यो अभिचाकशीति । 'अत्ति' इत्येतत्पक्षे न निहन्यते । आद्युदात्तमेतत् ।

अजामेकाम्—इदं कौमुद्यनुसारम् । वृत्तौ तु **प्रजामेका** इत्युदाहरण रूपम् ।

यद्वृत्तान्नित्यम् ॥६६॥

यदो वृत्तं यद्वृत्तम् । यत्र पदे 'यत्' शब्दो वर्तते । तत्सर्वं यद्वृत्तम् । तस्मात् यद्वृत्तात् उत्तरं तिङन्तं नानुदात्तं भवति नित्यम् । यो भुङ्क्ते । यं भोजयति । येन भुङ्क्ते । यस्मै ददाति ।

वृत्तम् –वर्तते अस्मिन् इति अधिकरणे 'क्त' पदमेव अधिकरणम् । केवलं विभक्त्यन्तं 'यत्' पदम् इह गृह्यते ।

पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥६७॥

पूजनात् काष्ठादिभ्यः पूजितवचनम् अनुदात्तं भवति । काष्ठाध्यापकः । काष्ठाभिरूपकः । दारुणाध्यापकः इत्यादि ।

काष्ठाध्यापकः—'काष्ठ' शब्दो द्वितीयान्तः समस्यते । 'मयूरव्यंसकादयः' इति समासः । काष्ठादयः अद्भुत पर्यायाः इति पूजनार्थकाः ।

अध्यापकश्च पूजितो भवति । इत्यादि—अयुताध्यापकः । भृशाध्यापकः । एवम् अद्भुतघोर-परम-सु-अति इत्यादीनि अध्यापकान्तानि पदानि बोध्यानि ।

❀ (वा०) मलोपश्च । दारुणम् अध्यापकः इत्यत्र 'म' लोपे दारुणाध्यापको भवति ।

सगतिरपि तिङ् ॥६८॥

सगतिः अपि, अगतिः अपि पूजनेभ्यः काष्ठादिभ्यः परं पूजितं तिङन्तम् अनुदात्तं भवति । यत्काष्ठं पचति । यत्काष्ठं प्रपचति ।

'तिङ्ङतिङः' इति निघातस्य 'निपातैर्यद्यदि हन्त......' इति प्रतिषेधे प्राप्ते पुनर्विधानम् । 'सगति' ग्रहणाच्च गतिरपि निहन्यते ।

❀ (वा०) गतिग्रहणेनात्रोपसर्गग्रहणमिष्यते । नेह—यत्काष्ठं शुक्लीभवति ।

यत्काष्ठम्—कौमुद्यां तु **काष्ठाम्** इत्युदाहृतम् । **सगतिः....... निहन्यते**—यथा 'सपुत्रं पितरं भोजय' इति कथनेन पुत्रमपि भोजयति गृहस्थः, तथाऽत्रापि गतेरपि निघातः सिद्धः ।

कुत्सने च सुप्यगोत्रादौ ॥६९॥

'पदात्' इति निवृत्तम् । कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि, अगतिरपि 'तिङ्' अनुदात्तो भवति । पचति मिथ्या । प्रपचति मिथ्या ।

'अगोत्रात्' इति किम् ? पचति गोत्रम् । पचति ब्रुवम् ।

निवृत्तम्—तेन पदस्य आदौ भवति अनुदात्तत्वम् ।

❀ (वा०) क्रियाकुत्सने इति वक्तव्यम् । तेन कर्तुः कुत्सने न भवति—**पचति पूतिः देवदत्तः** । पूतिः = दुर्गन्धिः ।

❀ (वा०) विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम् । पचन्तु पूतिः / पचन्ति पूतिः । प्रपचन्तु पूतिः / प्रपचन्ति पूतिः ।

अयम् उक्तार्थ संग्रह श्लोको भाष्ये दृश्यते—

सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम् ।
पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ॥

मलोपस्योदाहरणम्—**दारुणाध्यापकः** । **अतिङि**—न तिङ् विद्यते इति अतिङ् तस्मिन् । **चानुबन्धः**—सूत्रे चकारः अनुक्तसमुच्चयार्थकः, तेन **पूति** अनुबन्धो भविष्यति । अयं 'पूति' शब्दः तिप् प्रत्ययान्तः तिङन्तः ।

गतिर्गतौ ॥७०॥

गतिः गतौ परतः अनुदात्तो भवति अभ्युद्धरति । समुदानयति । अभि सम्पर्याहरति ।

अभ्युद्धरति—गतिसंज्ञकः प्रातिपदिकस्वरेण अन्तोदात्तो भवति । गतौ परतः तस्यानुदात्तत्वं विधीयते ।

समुदानयति—'आ' परे पूर्वौ अनुदात्तौ । **अभिसम्पर्याहरति**—अभि-सम्-परि इति त्रयोऽप्यनुदात्ताः ।

तिङि चोदात्तवति ॥७१॥

तिङन्ते चोदात्तवति परतो गतिः अनुदात्तो भवति । यत्प्रपचति । यत्प्रकरोति ।

यत्प्रपचति—'यद्वृत्तान्नित्यम्' इति निघातस्य प्रतिषेधे उभयमपि तिङन्तम् उदात्तवत् भवति । अत्र गतिः अनुदात्तो भवति, तिङन्ते च मध्य-स्वरिते ।

प्रपचतितराम् इत्यत्र केषाञ्चित् मते आमन्तेन पदे गतेः समासे गतिः अनुदात्तो न भवति । ये तु 'गतिकारकोपपदानां ······' इति वचनेन सुबुत्पत्तेः प्राक् कृदन्तेनैव समासं स्वीकुर्वन्ति, तेषां मते सूत्रे अनुक्तसमुच्चयार्थकचकारबलेन आमन्तेऽपि निघातो भवत्येव ।

आमन्त्रितं पूर्वमविद्यमानवत् ॥७२॥

आमन्त्रितान्तं पूर्वम् अविद्यमानवद् भवति । तस्मिन् सति यत्कार्यं तन्न भवति । असति यत् तद्भवति ।

कानि पुनः अविद्यमानत्वे प्रयोजनानि ? आमन्त्रित-तिङ्-निघात-युष्मदस्मदादेशाभावाः । देवदत्त ! यज्ञदत्त ! इत्यत्र 'आमन्त्रितस्य पदात्परस्य' इति निघातो न भवति । षाष्ठिकं त्वामन्त्रिताद्युदात्तत्वं भवति ।

देवदत्त ! पचसि, इत्यत्र 'तिङ्ङतिङः' इति निघातो न भवति ।

देवदत्त ! तव ग्रामः स्वम् । देवदत्त ! मम ग्रामः स्वम् । इत्येवमादिषु युष्मद्-अस्मद्-आदेशाः न भवन्ति ।

पूजायाम् अनन्तरप्रतिषेधः प्रयोजनम्—

यावद् देवदत्त ! पचसि, इत्यत्र पूजायां नानन्तरम् इत्येव प्रतिषेधो भवति । इत्याद्युदाहार्यम् ।

'आमन्त्रितम्' इति किम् ? देवदत्तः पचति ।

'पूर्वम्' इति किम् ? देवदत्त इत्येतस्य आमन्त्रिताद्युदात्तत्वे कर्त्तव्ये नाविद्यमानवद् भवति । पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्ते, अन्यनिमित्ते वा तत् अविद्यमानवद् भवति, न तु स्वकार्ये । 'देवदत्त पचसि' इत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव ।

इह—इमं मे गङ्गे यमुने इति 'गङ्गे' शब्दः पूर्वम् आमन्त्रितम्, ततः परस्य 'यमुने' शब्दस्यानुदात्तत्वे कर्त्तव्ये स्वयमविद्यमानवत्त्वात् तन्निमित्तं न भवति । 'मे' शब्दस्य निमित्ताभावं न प्रतिबध्नाति ।

अविद्यमानवत्—अविद्यमानेन तुल्यम् । **षाष्ठिकम्**—षष्ठाध्याये पठितम् 'आमन्त्रितस्य च' इत्यनेन विहितम् । **तव**—'ते' आदेशो न । **मम**—'मे' इति न । **देवदत्तः पचति**—अत्र अविद्यमानत्वाभावेन तिङः अनुदात्तत्वं भवत्येव । **पूर्वत्वम्**...... **भवत्येव**—यत्र आमन्त्रितस्यैव कार्यं तत्र नाविद्यमानवत्त्वम् इति भावः । इह...... **न प्रतिबध्नाति**—'गङ्गे' शब्दस्य 'यमुने' शब्दा-

पेक्षमेव पूर्वत्वम्, अतः तस्यानुदात्तत्वे कर्त्तव्ये निमित्तं न भवति। परं 'मे' शब्दस्तु निमित्तं भवत्येवेति भावः।

नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥७३॥

आमन्त्रिते समानाधिकरणे परतः पूर्वम् आमन्त्रितं सामान्यवचनं नाविद्यमानवद् भवति। किं तर्हि ? विद्यमानवदेव। अग्ने गृहपते। माणवक जटिलाध्यापक। पूर्वस्य विद्यमानवत्त्वात् परम् अनुदात्तमेव भवति।

'समानाधिकरणे' इति किम् ? चैत्र पण्डित मैत्र। अत्र 'पण्डित' शब्दो मैत्र-विशेषणम्, न पूर्वेण समानाधिकरणः।

सामान्यवचनम् इति किम् ? पर्यायेषु मा भूत्—अघ्न्ये देवि सरस्वति इडे काम्ये विहव्ये। पर्यायशब्दाः एते।

समानाधिकरणे—समानाभिधेये। यथा सामान्याग्निवाची 'अग्नि' शब्दः विशेषाभिधायिना गृहपतिना सह युक्तः गार्हपत्यनामके विशेषाग्नौ अवतिष्ठते इति गृहपतिः तेन समानाधिकरणो भवति। **माणवक जटिलाध्यापक !**—अत्र 'जटिल' शब्दो 'माणवक' शब्दापेक्षया विशेषवचनः, 'अध्यापक' शब्दापेक्षया सामान्यवचनः इति द्वौ अपि विद्यमानवदेव भवतः। **पर्यायशब्दाः**—ते न सामान्यवचनाः। सामान्यवचनं विशेषवचनानपेक्षम् इति।

विभाषितं विशेषवचने बहुवचनम् ॥७४॥

विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वम् आमन्त्रितं बहुवचनान्तं विभाषितम् अविद्यमानवद् भवति। देवाः शरण्याः / देवाः शरण्याः। ब्राह्मणाः वैयाकरणाः / ब्राह्मणाः वैयाकरणाः।

'बहुवचनम्' इति किम् ? माणवक जटिल। नित्यम् एतद् विद्यमानवदेव।

सामान्यवचनाधिकारादेव 'विशेषवचने' इति सिद्धे विस्पष्टार्थं पुनर्वचनम्।

सर्वस्यबहुवचनस्यशेषे अहेति चतुर्दश (७४)

इति श्रीमदाचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
अष्टमाध्यायस्य प्रथमः पादः ।

शरण्याः—शरणे साधवः । अविद्यमानवत्त्वपक्षे आद्युदात्तत्वम्, अन्यथा निघातः । एवम् उत्तरत्रापि ।

अष्टमाध्यायस्यास्मिन् प्रथमे पादे सर्वस्य द्वे, वहुवचनस्य वस्नसौ, शेषे विभाषा, इत्येतेभ्य आरम्भ विंशतिः सूत्राणि, अहेति विनियोगे च इत्यत आरभ्य चतुर्दश सूत्राणीति सङ्कलनेन चतुःसप्ततिः (७४) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
अष्टमाध्यायस्य प्रथमः पादः ।

अथाष्टमाध्याये द्वितीयः पादः

पूर्वत्रासिद्धम् ॥१॥

'पूर्वत्रासिद्धम्' इत्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः, 'पूर्वत्रासिद्धम्, इत्येवं तद् वेदितव्यम्। येयं सपादसप्ताध्यायी अनुक्रान्ता, एतस्याम् अयं पादोनोऽध्यायः असिद्धो भवति = असिद्धवद् भवति। सिद्धकार्यं न करोतीत्यर्थः।

तदेतत् असिद्धवचनम् आदेशलक्षणप्रतिषधार्थम्, उत्सर्गलक्षणभावार्थं च।

अस्मा उद्धर। द्वा अत्र। असा आदित्यः। इत्यत्र व्यलोपस्यासिद्धत्वात् 'आद्गुणः' इति, 'अकः सवर्णे दीर्घः' इति च न भवति।

अमुष्मै। अमुष्मात्। अमुष्मिन्। इति उत्वस्यासिद्धत्वात् 'स्मै' आदयो भवन्ति।

शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा।
मतोर्वत्वे झलां जश्त्वे गुडलिण्मान्निदर्शनम्॥

अधिकारः—आ (पर्यन्तम्) अष्टमाध्यायपरिसमाप्तेः इति शेषः। **सपादसप्ताध्यायी**—सप्तानाम् (पूर्वपठितानाम्) अध्यायानाम् समाहारः इति **सप्ताध्यायी** (द्विगुः) **सपादा** = (अष्टमाध्यायस्य) पादेन (प्रथमेन) सहिता। सा चासौ सप्ताध्यायी चेति (विशेषणसमासः) **अनुक्रान्ता—**क्रमेण पठिता। **अस्याम्**—अस्याः दृष्टौ इति। **पादोनः** = पादेन ऊनः अपूर्णः अध्यायः अवशिष्टा 'त्रिपादी' इति भावः।

असिद्धो भवति—तथा इतः उत्तरं त्रिपाद्यामपि पूर्वत्र परस्य असिद्धत्वम्। अर्थात् उत्तर उत्तरो योगः पूर्वत्र पूर्वत्र असिद्धो भवति।

आदेशलक्षणप्रतिषेधार्थम्—आदेशो लक्षणम् = निमित्तं यस्य, तस्य प्रतिषेधार्थम्–**अस्मा उद्धर**—अस्मै + उद्धर ऐकारस्य 'आय्' आदेशः, 'लोपः शाकल्यस्य' इत्यनेन यकारस्य लोपः। तस्य असिद्धत्वात् 'आद्गुणः' इति गुणो न।

'लोपः शाकल्यस्य' इति त्रिपाद्यां पठितम् (८/३/१९) 'आद्गुणः' इति च सपादसप्ताध्याय्याम् अनुक्रान्तम् (६/१/८७) इति गुणशास्त्रस्य' दृष्टौ यलोपशास्त्रम् असिद्धवत्। तेन आकार-उकारयोर्मध्ये लुप्तो यकारः असिद्धवद् भवति।

एवं **द्वा अत्र**—द्वौ + अत्र। **असा आदित्यः**—असौ + आदित्यः। उभयत्र औकारस्य 'आव्' आदेशः, वकारस्य 'लोपः शाकल्यस्य' इत्यनेन लोपः असिद्धो भवति, तेन 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घो न भवति। **व्यलोपः**—वकारस्य, यकारस्य च लोपः।

अमुष्मै इत्यादि—अत्र परत्वात् 'अदसोऽसेर्दादुदोमः' इति उत्वे, अकारान्तत्वाभावात् तल्लक्षणाः स्मै-स्मात्-स्मिन् इति न स्युः। असिद्धे सति अकारान्ताश्रिताः ते भवन्ति।

शुष्किका—'शुषः कः' इत्यस्यासिद्धत्वात् 'उदीचामातः ......' इति पाक्षिकम् इत्वं न। 'प्रत्ययस्थात्......' इति नित्यम् इत्वम्।

शुष्कजङ्घा—अत्रापि 'शुषः कः' इत्यस्यासिद्धत्वात् 'न कोपधायाः' इति पुंवद्भावस्य प्रतिषेधो न।

क्षामिमान्—'क्षायो मः' इत्यस्यासिद्धत्वात् क्षामिन्+मतुपि 'मादुपधायाश्च' इति मकारस्य न वकारः।

औजढत्—ऊढम् आचष्टे इति ऊढ + णिच् + लुङ् च्लेः 'चङ्'। अत्र कृतानां ढत्वादीनाम् असिद्धत्वात् णौ टिलोपस्य स्थानिवद्भावात् 'ह्‌त' इत्यस्य द्वित्वम्। हकारस्य 'कुहोश्चुः' इति झकारः। तस्य जश्त्वेन जकारो भवति।

गुडलिण्मान्—गुडलिह् + मतुप्। अत्र ढत्व-जश्त्वयोः असिद्धत्वात् 'झयः' इत्यनेन मकारस्य न वकारः।

अत्रेदं बोध्यम्—अपवादस्य परस्यापि उत्सर्गे कर्त्तव्ये वचनप्रामाण्यात् न असिद्धत्वम्। तेन द्रोग्धा इत्यत्र घत्वस्यासिद्धत्वात् 'होढः' इति ढत्वं न।

न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥२॥

'न' लोपः पूर्वत्रासिद्धो भवति सुप्-विधौ, स्वर-विधौ, संज्ञाविधौ, तुग्विधौ च कृति। 'विधि' शब्दः प्रत्येकमभिसम्बध्यमानः स्वर-संज्ञा-तुकां विधेयत्वात् तैः कर्मषष्ठीयुक्तैः भावसाधनोऽभिसम्बध्यते। सुपा तु सम्बन्धसामान्यवचनषष्ठ्यन्तेन कर्मसाधनः। तेन सुपः स्थाने यो विधिः, सुपि च परभूते; सर्वोऽसौ सुब्विधिः। सर्वत्र असिद्धत्वं भवति।

सुब्विधौ—राजभिः। तक्षभिः। न-लोपस्यासिद्धत्वात् 'अतो भिस ऐस्' न भवति। राजभ्याम्। 'सुपि च' इति दीर्घत्वम्, राजसु 'बहुवचने झल्येत्, इति एत्त्वं च न भवति।

स्वरविधौ—राजवती। अत्र 'न' लोपस्यासिद्धत्वात् 'अन्तोऽवत्याः' इति न भवति।

संज्ञाविधौ—पञ्च ब्राह्मण्यः। न-लोपस्यासिद्धत्वात् 'ष्णान्ता षट्' इति 'षट्' संज्ञा। तेन 'न षट्-स्वस्रादिभ्यः' इति टापः प्रतिषेधः।

तुग्विधौ—वृत्रहभ्याम्। न-लोपस्यासिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' इति 'तुक्' न।

'विधि' शब्दः ... भवति—अयमर्थः—सुप् च, स्वरश्च, संज्ञा च, तुक् च इत्येतेषां द्वन्द्वः। विधिः भावसाधनः विधानम् इति, कर्मसाधनश्च विधीयते इति। तत्र पूर्वं भावसाधनः परत्र च त्रयः कर्मसाधनाः। विधिश्च विधिश्च विधिश्च विधिश्च इति चतुर्णामपि स्वरूपस्याविशेषात् एकशेषः।

ततः सुप्-स्वर-संज्ञा तुकां विधयः इति षष्ठीसमासः। अन्तरं त्विदम्—शेषे षष्ठी भवति। तत्र सुब्विधौ सम्बन्धलक्षणः शेषः, उत्तरेषु त्रिषु कर्मलक्षणः।

सूत्रे 'कृति' इति पदं तु अनन्तरोक्तेन 'तुक्' इत्यनेनैव सम्बध्यते। ते **बृहच्छत्रम्** इत्यत्र न-लोपे 'छे च' इत्यनेन 'तुक्' भवत्येव।

राजवती—अत्र न-लोपस्यासिद्धत्वात् अन्तोदात्तं न।

न मु ने ॥३॥

'मु' भावो 'ना' भावे कर्त्तव्ये नासिद्धो भवति। किं तर्हि ? सिद्ध एव। अमुना। 'मु' भावस्य असिद्धत्वात् 'घि' लक्षणो 'ना' भावो न स्यात्। कृते तु 'ना' भावे 'मु' भावस्य असिद्धत्वात् 'सुपि च' इति दीर्घत्वं प्राप्नोति, तत् 'सन्निपात लक्षणेन' न भवति।

अथवा योगद्वयमिदम् उभयार्थम् तन्त्रेणोच्चारितम्। अथवा 'ने' परतो यत् प्राप्नोति, तस्मिन् कर्त्तव्ये 'मु' भावो नासिद्धः इत्येष एवात्र सूत्रार्थः। 'ने' तु कर्त्तव्ये 'मु' भावस्य यत् सिद्धत्वं तत् अर्थतः संगृहीतम्। तेनात्र 'मु' भावस्य सिद्धत्वात् 'ना' भावश्च भवति। दीर्घत्वञ्च न भवति।

किञ्च योगविभागः क्रियते—'न' इत्येतावत् अनिष्टे विषये पूर्वत्रासिद्धत्वस्य प्रतिषेधार्थम्। ततः 'मु ने' इति, 'न' इत्यनुवर्तते।

अमुना—अदस् + टा। 'त्यदादीनामः' इति सस्य अत्वे पररूपे च कृते दकारस्य 'मु', तस्य 'शेषो घ्यसखि' इति 'घि' संज्ञायाम्; ततः परस्य 'टा' इत्यस्य 'ना' आदेशः।

सन्निपातलक्षणेन—'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषया 'ना' भावः ह्रस्वस्य विघातं प्रति निमित्तं न भवति।

योगद्वयम् ...उच्चारितम्—'न मु ने' 'न मु ने' इति द्वे सूत्रे स्तः। एकं 'ना' भावे कर्त्तव्ये 'पूर्वत्रासिद्धम्' इत्यनेन मुत्वस्य असिद्धत्वं निषेधति। द्वितीयं ने कृते तस्मिन् परतो यत्प्राप्तं तत्र मुत्वस्य सिद्धत्वं प्रतिपाद्य दीर्घादि निषेधति। इति अर्थद्वयम् एकेनैव सूत्रेण अभिव्यक्तम् महर्षिणा सूत्रकारेण तन्त्रेण = साधारणप्रयत्नेन।

साधारणं भवेत्तन्त्रम् यथा तुल्यकक्षयोः भुञ्जानयोः प्रदीपः। योग-

विभागेनापि अयमेवार्थः सिद्धयति । 'न' इति योगविभागात् एतेषु स्थलेषु पूर्वत्रासिद्धत्वं न । तथा च वार्तिकानि—

❀ (वा०) एकादेशस्वरोऽन्तरङ्गः । वृक्षे + इदम् **वृक्ष इदम्** । 'अय्' आदेशः उदात्तो भवति ।

❀ (वा०) संयोगान्तलोपो रोरुत्वे । **हरिवो मे॑दिनं॑ त्वा** । 'हशि च' इति रोः उत्वम् भवति । अन्यथा लुप्तस्य मतुपो तकारस्य व्यवधानम् आपतेत् ।

❀ (वा०) निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु । **वृक्णः** । **वृक्णवान्** । 'व्रश्चभ्रस्ज ......' इति षत्वं न ।

❀ (वा०) श्चुत्वं धुटि । **रट् श्च्योतति** । √श्च्युतिर् इति सकारादिः पठ्यते । तं मत्वा 'धुट्' प्राप्नोति स न भवति ।

❀ (वा) द्विर्वचने परसवर्णत्वम् । **सयँ्य्यन्ता** । अत्र परसवर्णेन सानुनासिके यथि कृते तस्यासिद्धत्वात् द्विर्वचनं न प्राप्नोति । स भवति ।

विस्तरस्तु द्रष्टव्यः वृत्तौ महाभाष्ये च ।

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ॥४॥

उदात्तयणः, स्वरितयणश्च परस्य अनुदात्तस्य स्वरित आदेशो भवति । उदात्तयणः—कु॒मा॒र्यौ॑ । कु॒मा॒र्यः॑ । उदात्तनिवृत्ति-स्वरेण अयम् ईकारः उदात्तः, तस्य स्थाने यण् आदेशः स उदात्तयण् भवति । तस्मात्परस्य अनुदात्तस्य स्वरितो भवति ।

स्वरितयणः—स॒कृ॒ल्ल्व्या॑शा । ख॒ल॒प्व्या॑शा । श॒कृ॒ल्लूः, खलपूः इति कृत्स्वरेण अन्तोदात्तौ । तयोः 'रोः सुपि' इति यण् आदेशः । स उदात्तयण् ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम् तस्य यण् आदेशः स्वरित यण् । तस्मात् स्वरितयणः परस्य 'आशा' शब्दस्य अनुदात्तस्य आकारस्य स्वरितो भवति ।

उदात्तयणः—उदात्तस्य स्थाने यो 'यण्' तस्मात् । **स्वरितयणः**—स्वरितस्य स्थाने यो 'यण्' तस्यात् । **कुमार्यौ**—कुमारी + औ । अत्र 'औ' 'अनु॒दात्तौ सु॒प्पितौ' इति अनु॒दात्तः, 'कु॒मारी' इति कु॒मार + ङीप् अनु॒दात्तः;

तस्मिन् अकारस्य लोप: इति उदात्त-अकारलोपे ङीप: ईकार: 'अनुदात्तस्य च यत्रोदात्तलोप:' इत्यनेन उदात्त:।

सकृल्ल्व्याशः—सकृत् लुनाति इति सकृल्लू: (क्विप्प्रत्ययान्त: अन्तोदात्त:) तस्मिन् सकृल्लू + ङि सुप्त्वात् अनुदात्त:। ऊकारस्य 'यण्' उदात्त:। तत: पर: अनुदात्त: इकार: स्वरित:। 'आशा' शब्द: 'आशाया अदिगाख्या चेत्' इत्याद्युदात्त: अनेन स्वरितो विधीयते। एवम् खलपू + ङि + आशा =**खलव्याशा**।

एकादेश उदात्तेनोदात्तः ॥५॥

उदात्तेन सहानुदात्तस्य य: एकादेश:, स: उदात्तो भवति।

अ॒ग्नी। वा॒यू। वृ॒क्षौ। प्ल॒क्षौ।

'उदात्तेन' इति किम्? पच॑न्ति। 'ल' सार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयो: अयम् आदेश:।

अग्नी—अग्नि + औ। 'प्रथमयो: पूर्वसवर्ण:' इति दीर्घ:। अग्नि-वायु-वृक्ष-प्लक्षा: अन्तोदात्ता:। 'औ' अनुदात्त:।

पचन्ति—पच् + अ (शप्) + अन्ति। 'अतो गुणे' इति पररूपम्। अत्र शप: अकार: अनुदात्त: स च 'उदात्तादनुदात्तस्य स्वरित:' इति स्वरितो विहित:। पररूपे कर्त्तव्ये स्वरितस्य असिद्धत्वात् अनुदात्तयो: एवायं पररूपादेश: इति स्वरित एवावतिष्ठते।

स्वरितो वाऽनुदात्ते पदादौ ॥६॥

अनुदात्ते पदादौ परत: उदात्तेन सह एकादेश: स्वरितो वा भवति, उदात्तो वा। सु + उत्थित: = सूत्थि॑त: / सू॑त्थित:।

अत्र 'सु' शब्द: 'सु: पूजायाम्' इति कर्मप्रवचनीय: (उदात्त:) तस्य प्रादि-समासे सति अव्ययपूर्वपद प्रकृतिस्वरेण अनुदात्तत्वे शेषम् अनुदात्तम् इति अनुदात्तो पदादौ एकादेशो भवति। वी॑क्षते / वीक्ष॑ते।

प्रादिसमासे—'कुगतिप्रादयः' इति समासः । एवं **वीक्षते**—'वि' निपातस्वरेण आद्युदात्तः तस्मात् परम् 'ईक्षते' इति पदम् अनुदात्तम् । इत्यनुदात्तेन सह अत्र एकादेशः । **स्वरितो वा**—पक्षे उदात्तो भवति ।

न लोपः प्रातिपदिकान्तस्य ॥७॥

प्रातिपदिकस्य यः अन्त्यो नकारः, तस्य लोपो भवति । राजा । राजभ्याम् । राजत्वम् ।

❀ (वा०) अह्नो नलोपप्रतिषेधो वक्तव्यः । अहः । अहोभ्याम् । अहोभिः ।

'अहन्', 'रोः सुपि'–रुत्व–रेफयोः असिद्धत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति 'न' लोपः प्राप्नोति । सावकाशं तदुभयं सम्बुद्धौ हे अहः !

राजा—राजन् + सु उपधादीर्घे, अनुबन्धरहितस्य सस्य लोपे ततो नकारस्य लोपः । **अहः**—अहन् + सु 'स्वमोर्नपुंसकात्' इति लुक् । 'रोः सुपि' इति नकारस्य 'सः' । **अहोभ्याम्** -अत्र 'अहन्' इत्यनेन नकारस्य रुत्वम् 'हशि च' इत्येन उत्वम् ततो गुणः ।

'अहन्' …… प्राप्नोति—'पूर्वत्रासिद्धम्' इत्यनेन इति शेषः ।

समाधत्ते—'अहन्' इत्यस्य आवृत्तिः क्रियते—तत्र 'एकेन 'अहन्' इति स्वरूपम् अन्वाख्यायते । अपरेण च रुत्वम् आदिश्यते इति 'न' लोपे प्राप्ते तद्वारणाय वार्तिकम् आवश्यकम् इति भावः ।

न ङिसम्बुद्ध्योः ॥८॥

ङौ परतः सम्बुद्धौ च नकारलोपो न भवति । आर्द्रे चर्मन् । लोहिते चर्मन् । 'सुपां सुलुक्' इति ङेः लुक् । सम्बद्धौ हे राजन् !

❀ (वा) वा नपुंसकानाम् इति वक्तव्यम् । हे चर्मन् / हे चर्म !

चर्मन्—'सुपां सुलुक्.......' इत्यनेन 'ङि' विभक्तेर्लुक् । अत एव निर्देशात् अत्र 'अप्रत्ययः' इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञायाः प्रतिषेधो न भवति ।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥९॥

मतोः इह कार्यित्वेन उपादानात् सामर्थ्यलब्धं प्रातिपदिकम् । तत् 'मात्' इति मकारावर्णाभ्यां विशेष्यते । 'मकार-अवर्ण-विशिष्टया चोपधया' इत्ययम् अर्थो भवति—

मकारान्तात् मकारोपधाच्च, अवर्णान्तात् अवर्णोपधाच्च उत्तरस्य मतोः 'व' इत्ययम् आदेशो भवति । न तु यवादिभ्यः ।

मकारान्तात्—किंवान् । मकारोपधात्-शमीवान् । अकारान्तात्—वृक्षवान् । अकारोपधात्—यशस्वान् ।

'मादुपधायाश्च' इति किम् ? अग्निमान् ।

'अयवादिभ्यः' इति किम् ? यवमान् । द्राक्षामान् ।

सूत्रे मात्—मश्च अश्च इति समाहारद्वन्द्वः 'मम्' तस्मात् 'मात्' । **मतोः**—'मतुप्' प्रत्ययस्म (मकारस्य) 'व' आदेशः **किंवान्**—किम् अस्य अस्ति किम् + मतुप् ।

यवादिः—आकृतिगणः । **इक्षुमान्** । **मधुमान्** इत्यादि ।

झयः ॥१०॥

झय्-अन्तात् परस्य मतोः मस्य 'व' इत्यादेशः । मरुत्वान् । दृषद्वान् ।

मरुत्वान्—'तसौ मत्वर्थे' इति 'भ' संज्ञया पदत्वाश्रितं 'झलां जशोऽन्ते' इति जश्त्वं न ।

संज्ञायाम् ॥११॥

संज्ञायाम् मतोः यस्य 'व' इत्ययम् आदेशो भवति । अहीवती । कपीवती । मुनीवती ।

अहीवती—अहयः सन्ति अस्याम् इत्यादि चातुरर्थिकः अहि + मतुप् 'नद्यां मतुप्' इत्यनेन। 'शरादीनां च' इति 'अहि' इत्यस्य इकारस्य दीर्घः। 'अहीवती' प्रभृतयः नदीनां संज्ञाः = नामानि सन्ति।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥१२॥

एते शब्दाः संज्ञायां विषये निपात्याः। 'आसन' शब्दस्य 'आसन्दी' भावं निपातयन्ति। आसन्दीवान् ग्रामः। आसनवान् इति केचित्। 'अष्ठीवान्' इति शरीरैकदेशस्य संज्ञा। अस्थिमान् इति अन्यत्र।

चक्रीवान् नाम राजा। चक्रवान् इत्येवान्यत्र।

कक्षीवान् नाम ऋषिः। कक्ष्यावान् इत्येवान्यत्र।

रुमण्वान् नाम पर्वतः। लवणवान् इत्येवान्यत्र।

चर्मण्वती नाम नदी। चर्मवती इत्येवान्यत्र।

निपात्याः—वत्वम् तु 'संज्ञायाम्' इत्यनेनैव सिद्धम्। आदेशाः एव निपात्यन्ते। **आसन्दीवान्** = सोमराजः। **केचित्**—आसनवान् इति प्रयोगम् संज्ञाया अन्यत्र मन्यन्ते। अन्ये पुनः **आसन्दी** शब्दम् आसनार्थं पृथक् मन्यन्ते।

अष्ठीवान्—'अस्थि' शब्दस्य 'अष्ठी' भावः।

रुमण्वान्—केचित् 'रुमन्' इति लवणार्थकं पृथक्शब्दं मत्वा णकारमेव निपातयन्ति।

चर्मण्वती—'चर्मन्' इत्यस्य नलोपाभावो तस्य णत्वं च निपात्यते।

उदन्वानुदधौ च ॥१३॥

उदक-शब्दस्य मतौ 'उदन्' भावो निपात्यते उदधौ अर्थे संज्ञायां च विषये। उदन्वान् नाम ऋषिः यस्य औदन्वतः पुत्रः। उदन्वान् समुद्रः यस्मिन् उदकं धीयते।

औदन्वतः—उदन्वत् + (अपत्यार्थे) अण्। **उदन्वान् समुद्रः**—उदकं धेयम् अस्मिन् इति उदक + मतुप्। उदकस्य 'उदन्'।

राजन्वान् सौराज्ये ॥१४॥

सौराज्ये गम्यमाने 'राजन्वान्' इति निपात्यते । शोभनो राजा यस्मिन् स राजन्वान् देशः । राजन्वती पृथिवी । राजवान् अन्यत्र ।

निपात्यते—'राजन्' इत्यस्य 'न' लोपाभावः । नुट्-आगमो वा । **सौराज्ये**—शोभनो राजा यस्मिन् देशे स सुराजा, तस्य भावः सुराजन् + ष्यञ् । **राजन्वतीमाहुरनेन भूमिम्** । (रघु० षष्ठः सर्गः)

छन्दसीरः ॥१५॥

छन्दसि इवर्णान्तात्, रेफाच्च मतोः मकारस्य 'व' भवति । इवर्णान्तात्–त्रिवती याज्यानुवाक्या भवति । हरिवो मेदिनं त्वा । चेरुरग्निवान् इव ।

रेफान्तात्–गीर्वान् । धूर्वान् । आशीर्वान् ।

हरिवो—हरि + मतुप् अनुबन्ध लोपे मकारस्य वकारे = हरिवत् + सु (सम्बुद्धौ) नुम् सुलोपे संयोगान्तस्य तकारस्य लोपे नकारस्य रुत्वम् । 'हशि च' इति तस्य उत्वम् गुणश्च ।

गीर्वान्—गिर् + मतुप् । वत्वे 'र्वोरुपधाया दीर्घः' इति गिरः इकारस्य दीर्घत्वम् ।

'छन्दसि सर्वे विधयो विकल्प्यन्ते ।' इति क्वचिन्न—**सप्तर्षिमन्तम्** । **ऋतीमान्** ।

अनो नुट् ॥१६॥

अन्नन्तात् उत्तरस्य मतोः नुट्-आगमो भवति छन्दसि विषये । अक्षण्वन्तः कर्णवन्तः सखायः । शीर्षण्वती ।

अक्षण्वन्तः—अक्षि + मतुप् । 'अस्थि ···सक्थ्यक्ष्णामनङुदात्तः' इत्यनेन 'अनङ्' नुटि कृते तस्यासिद्धत्वात् अनङो नकारस्य लोपः । नुटोऽसिद्धत्वात् ततः परस्य मकारस्य वत्वम् । **शीर्षण्वती**—'शीर्षंश्छन्दसि' इति शिरसः शीर्षन् आदेशः ।

नाद् घस्य ॥१७॥

नकारात्परस्य 'घ' संज्ञकस्य 'नुट्' छन्दसि। सुपथिन्तरः। दस्युहन्तमः।

घ-संज्ञकस्य—तरप्तमपौ घः। **सुपथिन्तरः**—शोभनः पन्थाः सुपन्थाः तस्मात् तरप् 'नुट्'। **दस्युहन्तमः**—दस्यून् हतवान् इति दस्यु √हन् + क्विप् = दस्युहन् + तमप्। उभयत्र पूर्वनकारस्य लोपः।

❀ (वा०) भूरिदाव्नस्तुड्वक्तव्यः। **भूरिदावत्तरः**।

❀ (वा०) ईद्रथिनः। **रथीतरः**। रथिन् + तरप् नकारस्य लोपः, इकारस्य 'ईत्वम्'।

कृपो रो लः ॥१८॥

कृपेः धातोः रेफस्य लकार आदेशो भवति। केवलस्य रेफस्य स्थाने लः। ऋकारस्याप्येकदेशविकारद्वारेण लृकारः। कल्प्ता। कल्प्तारौ। कल्प्तारः।

❀ (वा) कृपाकृपणकृपीटकर्पूरादिषु लत्वं नेष्टम्।

केवलस्य—रेफवर्णस्य। 'र' इत्यनेन रकार-श्रुतिः। तेन ऋकारे, लृकारे र्-ल् इति श्रवणेन तदवयवीभूतस्य रकारस्य लकारो भवति। **एकदेशविकारद्वारेण**—द्वारम् = मुखम्, उपायः इत्यर्थः। **कल्प्ता**—√कृपू (सामर्थ्ये) + 'लुट्', 'तृच्' वा।

कृपा—√क्रप (कृपायां गतौ) + अङ् रकारस्य सम्प्रसारणम् ऋकारः = कृप + टाप्। अयमेव धातुः **कृपण-कृपीट-कर्पूरादिष्वपि** बोध्यः।

❀ (वा०) बालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यते इति वक्तव्यम्। **बालः / बारः**। **मूलम् / मूरम्**। **लघु / रघु**। **असुलः / असुरः**। **अलम् / अरम्**। **अङ्गुलिः / अङ्गुरिः**।

उपसर्गस्यायतौ ॥१९॥

अयतौ परे उपसर्ग-रेफस्य लत्वं स्यात्। प्लायते। पलायते।

अयतौ—√अय् (गतौ) इत्यस्य रूपम् 'अयते' तस्मिन् परे । **प्लायते**–प्र + अयते । **पलायते**- परा + अयते । उभयत्र रेफः उपसर्गस्यास्ति, तस्य लकारः । एकेन वर्णेन व्यवधानेऽपि भवति परि + अयते=**पल्ययते** । **निरयणम्**—निस् + अयनम् अत्र सकारस्य रुः, तस्यासिद्धत्वान्न लत्वम् । एवम् **दुरयणम्**—दुस् + अयनम् । **प्रत्ययः**—अत्र अनेकवर्णव्यवधानात् न लत्वम् ।

ग्रो यङि ॥२०॥

√गॄ इत्येतस्य धातोः रेफस्य लः । निजेगिल्यते ।

निजेगिल्यते—√गॄ (निगरणे) + यङ् + लट् । 'ॠत इद्धातोः' इति ॠकारस्य इत्त्वम् द्विर्वचनादि अभ्यासकार्यम् ।

अचि विभाषा ॥२१॥

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा 'ल' आदेशः । निगिरति / निगिलति । निगरणम् / निगलनम् ।

निगरणम्—नि√गॄ + ल्युट् । एवं **निगारकः / निगालकः** ।

परेश्च घाङ्कयोः ॥२२॥

'परि' इत्येतस्य यो रेफः, तस्य घ-अङ्कयोः परयोः विभाषा 'ल' आदेशः । परिघः / पलिघः । पर्यङ्कः / पल्यङ्कः ।

अत्र 'घ' इति स्वरूपस्य ग्रहणम् 'अङ्क' इत्यस्य साहचर्यात् । न तरप्-तमपोः । **परिघः**—परि √हन् + अप् । हन् इत्यस्य 'टि' लोपः, घत्वं च निपात्यते । **पर्यङ्कः**—परिगतः अङ्कः प्रादितत्पुरुषः ।

❀ (वा०) योगे चेति वक्तव्यम् । **परियोगः / पलियोगः** ।

संयोगान्तस्य लोपः ॥२३॥

संयोगान्तस्य पदस्य अन्तस्य लोपो भवति । गोमान् । यवमान् ।

इह श्रेयान् । भूयान् इत्यत्र रुत्वं परमपि असिद्धत्वात्

संयोगान्तस्य लोपं न बाधते । जश्त्वे तु नाप्राप्ते तदारभ्यते इति तस्य बाधकं भवति । यशः । पयः इति ।

दध्यत्र । मध्वत्र—इत्यत्र तु यणादेशस्य बहिरङ्गलक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति ।

गोमान्—गोमत् + सु नुमि कृते गोमन् त् स् इति स्थिते 'हल्ङ्याभ्यः ......' इति सोः स्-लोपे संयोगान्तस्य नकारस्य लोपः, अकारस्य 'अत्वसन्तस्य......' इति दीर्घः ।

असिद्धत्वात्—'पूर्वत्रासिद्धम्' इत्यनेन त्रिपाद्यां पूर्वं प्रति परं शास्त्रम् असिद्धं भवति । **नाप्राप्ते**—प्राप्ते इत्यर्थः । **तस्य**—जश्त्वस्य । **बाधकं भवति**—'रुत्वम्' इति शेषः । **बहिरङ्गलक्षणस्य**—द्विपदाश्रयत्वात् । संयोगान्तलोपस्तु 'दध्य्' इति एकपदाश्रयणात् अन्तरङ्गः ।

रात्सस्य ॥२४॥

संयोगान्तस्य पदस्य रेफादुत्तरस्य सकारस्य लोपो भवति । गोभिरक्षाः ।

सिद्धे सत्यारम्भो नियमार्थः—रात् सस्य एव लोपो नान्यस्य । ऊर्जः क्विप् ऊर्क् ।

मातुः । पितुः इति—'ऋत उत्' इति उत्त्वे कृते रपरत्वे च सति रात् सस्य लोपः ।

गोभिरक्षाः—गोभिः + अक्षा—√क्षर् (सञ्चलने) + लुङ→तिप् तस्य 'हल्ङ्याभ्यः ......' इति लुकि 'अतो ल्रान्तस्य' इति वृद्धिः, सिचः सकारस्य अनेन लोपः ।

ऊर्क्—√ऊर्ज् (बल प्राणनयोः) + क्विप् । **मातुः**—मातृ + ङस् ङकारलोपे **उत्त्वे**—एकादेशे इति शेषः ।

सस्य लोपः—रकारस्य विसर्गश्च ।

धि च ॥२५॥

धकारादौ प्रत्यये परे सस्य लोपो भवति । अलविध्वम् /

अलविढ्वम् । यद्यत्र सकारस्य लोपो न स्यात्; सिचः षत्वे जश्त्वे च 'विभाषेटः' इति मूर्धन्याभावपक्षेऽपि न धकारः श्रूयेत ।

इतः प्रभृति सिचः सकार-लोपः इष्यते । नेह-चकाद्धि पलितं शिरः । तथा पयो धावति इत्येवमादावपि न भवति ।

अलविध्वम्—√लूञ् (छेदने) + लुङ् च्लेः 'सिच्' सकारस्य 'धि च' इत्यनेन लोपः । 'विभाषेटः' इति धकारस्य विभाषा मूर्धन्यादेशो ढकारः—**अलविढ्वम् । न धकारः श्रूयेत**—सिचः सकारस्य 'आदेशप्रत्यययोः' इति षत्वे, 'झलां जश् झशि' इति जश्त्वेन डकारे, धकारस्य ढकारः एव स्यात् ।

इष्यते—अर्थात् 'धि च' इति सूत्रेण सिचः एव सकारस्य लोपः क्रियते नान्यस्य । तेन **चकाद्धि** एवं **पयो धावति** इत्यादिषु न भवति सकार-लोपः । भाष्यकारस्तु अविशेषेण स-लोपम् इच्छति । तस्य मते **चकाधि** इत्येव भवति । समान पदे एव सलोपो विज्ञेयः इति भिन्नपदस्थ **पयो धावति** इत्यत्र न भवति ।

झलो झलि ॥२६॥

झलः उत्तरस्य सकारस्य लोपो भवति झलि । अभित्त । अभित्थाः ।

अयमपि सिचः एव लोपः । तेनेह न—सोमसुत् स्तोता ।

अभित्त—√भिदिर् विदारणे) + लुङ् → त च्लेः सिच् । तकारे परे सिचः सकारस्य लोपः । **अभित्थाः**—लुङ् → थास् ।

सोमसुत् स्तोता—'झलः, सकारस्य, झलि' इति त्रयाणाम् एकपद-स्थत्वस्यैव स्वीकारेण नात्र 'स' लोपस्य प्राप्तिः ।

ह्रस्वादङ्गात् ॥२७॥

ह्रस्वात् अङ्गात् उत्तरस्य सस्य लोपो भवति झलि परतः अकृत । अकृथाः ।

'अङ्गात्' इति किम् । अलाविष्टाम् ।

सिचः एव । नेह—अतिशयेन द्विः द्विष्टराम् ।

अकृत—√कृ + लुङ् → त (आत्मनेपदे) च्लेः सिचः सस्य लोपः।

अलाविष्टाम्—अत्र √लूञ् + लुङ् → तस् → ताम् । च्लेः सिच् तस्य इट् । एवं इट् प्रत्ययस्य आगमः तद् ग्रहणेनैव गृह्यते । तथा च सकारो न ह्रस्वात् अङ्गात् परः, यस्मात्परः स नास्ति अङ्गम् ।

द्विष्टराम्—द्वि + सुच् + आम् (अतिशायने) सकारस्य 'ह्रस्वात्तादौ तद्धिते' इति मूर्धन्यादेशः ।

इट ईटि ॥२८॥

इटः उत्तरस्य सकारस्य लोपः ईटि । अदेवीत् । असेवीत् ।

अदेवीत्—√दिवु (क्रीडाद्यर्थे दिवादिः) + लुङ् → तिप् च्लेः सिच् इट् । 'अस्ति सिचोऽपृक्ते' इति ईट् । स-लोपे दीर्घः । 'नेटि' इति वृद्धिप्रतिषेधः । **असेवीत्**—√षिवु (तन्तु सन्ताने) + लुङ् → तिप् ।

स्कोः संयोगाद्योरन्ते च ॥२९॥

पदान्ते यः संयोगः, झलि परतो वा यः संयोगः तदाद्योः सकार-ककारयोः लोपो भवति । सकारस्य-लस्जेः तग्नः । लग्नवान् । साधुलक् । ककारस्य-तक्षेः तष्टः । तष्टवान् । काष्ठतट् ।

लग्नः—√लस्जी (लज्जायाम्) + क्त । 'ओदितश्च' इति तकारस्य नकारः । सकारस्य लोपे जकारस्य 'चोः कुः' इत्यनेन गकारः । **साधुलक्**—साधु लज्जते इति क्विप् ।

तष्टः—√तक्षू + क्त अत्र क्ष (क्ष) इत्यस्य ककारस्य लोपः । तकारस्य मूर्धन्यः टकारः ।

साधुतट्—साधु तक्षति इति क्विप् ।

चोः कुः ॥३०॥

चवर्गस्य कवर्गादेशो भवति झलि पदान्ते च । पक्ता । पक्तुम् । पक्तव्यम् । ओदनपक् ।

पक्ता—पच् + तृच् । ककारस्य चकारः । पदान्ते-**ओदनपक्** । क्विबन्तमिदम् ।

हो ढः ॥३१॥

हकारस्य 'ढः' स्यात् झलि पदान्ते च सोढा । सोढुम् । सोढव्यम् । जलाषाट् ।

सोढा—√सह + तृच् हकारस्य 'ढ' कृते तृचः तकारस्य धकारः, ष्टुत्वं, 'ढो ढे लोपः; 'सहिवहोरोदवर्णस्य' इत्यकारस्य ओकारः । **जलाषाट्**—'छन्दसि सहः' इति 'ण्विः' 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घः ।

दादेर्धातोर्घः ॥३२॥

दकारादेर्धातोः हस्य 'घः' भवति झलि परतः पदान्ते च । दग्धा । दग्धुम् । दग्धव्यम् ।

'धातोः' इति दादि-समानाधिकरणम् । एतन्न, किर्तार्ह ? तद् विशेषणम्, अवयवषष्ठयन्तम्—धातोः अवयवो यो दादिः शब्दः तदवयवस्य हकारस्य । एवं सति 'अधोक्' इत्यत्रापि घकारः सिद्धो भवति ।

दग्धा—√दह + तृच् । **अधोक्**—√दुह् + लङ् → तिप् । अत्र √दुह् इत्यस्य दकारादित्वम् अट्-आगमेन बाधितम् । अवयवस्वीकारेण तु भवत्येव । अभेदेऽपि व्यपदेशिवद्भावेन 'राहोः शिरः' इतिवत्दादिः अवयवो भवति तेन **दोग्धा** इत्यादि सिद्धचति ।

वा द्रुहमुहष्णुहष्णिहाम् ॥३३॥

एषां हस्य वा 'घः' भवति झलि परतः पदान्ते च । √द्रुह—द्रोग्धा / द्रोढा । मित्रध्रुक् / मित्रध्रुट् ।

√मुह—उन्मोग्धा / उन्मोढा । उन्मुक् / उन्मुट् ।

√ष्णुह—उत्स्नोग्धा / उत्स्नोढा । उत्स्नुक् / उत्स्नुट् ।

√ष्णिह—स्नेग्धा / स्नेढा । स्निक् / स्निट् । दादित्वात् द्रुहेः नित्यं प्राप्तम्, अन्येषाम् अप्राप्तं विकल्प्यते ।

एषाम्—√द्रुह (जिघांसायाम्), √मुह (वैचित्ये), √ष्णुह (उद्गिरणे)

√ष्णिह (प्रीतौ) इति धातूनाम् । द्रोढा–पक्षे 'होढः' इति ढकारः । यङ्लुकि दोध्रुक् / दोध्रुट् ।

न हो धः ॥३४॥

न हो हस्य धो भवति झलि पदान्ते च । नद्धा । नद्धुम् । नद्धव्यम् । उपानत् ।

नद्धा—√णह् (बन्धने) + तृच् । तृचः तकारस्यापि धकारः, तस्मिन् परे 'ह्'स्थानिकस्य धकारस्य जश्त्वेन दकारः **उपानत्**—उप √नह + क्विप्, उपपदसमासः । 'नहि वृति……' इत्यनेन पूर्वपदस्य दीर्घः ।

आहस्थः ॥३५॥

आहो हस्य 'थः' झलि पदान्ते च । इदमात्थ ।

आदेशान्तरकरणम् 'झषस्तथोर्धोऽधः' इत्यस्य निवृत्त्यर्थम् ।

इदमात्थ—इदम् + आत्थ—√ब्रू न् + लट्→सिप्→थल् 'परस्मैपदानां 'णलतुसुस्थल …' इत्यनेन । √ब्रू इत्यस्य 'आह' आदेशः । अनेन सूत्रेण तस्य धकारे कृते 'खरि च' इति तस्य चर्त्वेन तकारः ।

❀(वा०) हृग्रहोर्भश्छन्दसि । सम्भरति । ग्रभीता ।

व्रश्चभ्रस्जसृजयजराजभ्राजच्छशां षः ॥३६॥

व्रश्च–आदीनां छ-शान्तानां च षकार आदेशः झलि पदान्ते च । √व्रश्च–व्रष्टा । व्रष्टुम् । व्रष्टव्यम् । मूलवृट् । एवं √भ्रस्ज–भ्रष्टा । √सृज–स्रष्टा । √मृज–मार्ष्टा । √यज–यष्टा । √राज्–सम्राट् । √भ्राज–विभ्राट् ।

राज--भ्राजोः पदान्तार्थं ग्रहणम् ।

छकारान्ताम्, √प्रच्छ–प्रष्टा । 'च्छ्वोः शूडनुनासिके च' इत्यत्र 'क्ङिति' इत्यनुवर्तते–इति 'छ' ग्रहणम् इह क्रियते ।

शकारान्तानाम्, √लिश्–लेष्टा ।

व्रष्टा—√ओव्रश्चू (छेदने) + तृच् । 'स्कोः संयोगाद्योः······' इति सकार-लोपः । तृचः तकारस्य ष्टुत्वेन टकारः । **मूलवृट्**—'ग्रहिज्या··· ' इति रकारस्य सम्प्रसारणेन ऋकारः । **पदान्तार्थम्**—झलि तु इटा व्यवधानं भवति ।

अनुवर्तते—तेन तत् सूत्रं क्ङित्येव प्रवर्तते । तथा च **पृष्टः** इत्येव सिद्ध्येत **प्रष्टा, प्रष्टुम् प्रष्टव्यम्** इति न सिद्ध्येरन् । **लेष्टा**—√लिश् (अल्पीभावे) + तृच् ।

एकाचो वशो भष् झषन्तस्य स्ध्वोः ॥३७॥

धातोरवयवो य एकाच् झषन्तः, तदवयवस्य वशः स्थाने 'भष्' आदेशो भवति झलि सकारे 'ध्व'-शब्दे च परतः पदान्ते च । √बुध्--भोत्स्यते । अभुध्वम् । √दुह्—धोक्ष्यति । गोधुक् ।

अजर्घाः—गृधेः यङ्लुगन्तस्य लङि सिपि लघूपधगुणे कृते सिपो हल्ङ्याादिलोपे च धातोरवयवस्य एकाचो बशः स्थाने 'भष्'-भावः । ततो धकारस्य जश्त्वम्' 'दश्च' इति रुत्वम्, 'रोरि' इति पूर्वरेफस्य लोपः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घत्वम् ।

गर्दभयतेः अप्रत्ययः--गर्धप् ।

बशः स्थाने भष्—बश्-प्रत्याहारान्तर्गताः चत्वारो वर्णाः ब-ग-ड-द, इति । भष्-प्रत्याहारेऽपि चत्वारः एव भ-घ-ढ-ध, इति । तत्र क्वापि डकारस्य स्थानिनोऽभावात् ढकार आदेशो न भवति । 'स्थानेऽन्तरतमः' इति नियमेन अन्तरतमा आदेशाः भवन्ति । **भोत्स्यते**—अत्र बुधो बकारस्य भकारः । **गोधुक्**—अत्र दुहो दकारस्य धकारः । **अजर्घाः**- गृधेः गकारस्य स्थाने घकारः । **अप्रत्ययः**—यो न श्रूयते क्विप्—आदि ।

अजर्घाः—√गृधु (अभिकांक्षायाम्) + यङ्, द्विर्वचनम्, हलादिः शेषः, 'उरत्' इति ऋकारस्य अकारः, 'गगृधय' 'कुहोश्चुः' इति श्चुत्वम् 'जगृध्य' यङ् लुक् रुक्=जर्गृध् + लङ् → सिप् बशः गकारस्य स्थाने घकारः जर्घृध् जश्त्वादि कार्यम् । तदाह–कारिकया—

गृधेर्यलोपो लङि सेरिलोपो हल्ङ्यादिलोपे रपरे गुणे च ।
भष्भावजश्त्वे च रु-रेफ-रत्वे ढ्रलोपदीर्घे च भवेदजर्घाः ॥

गर्धप्—गर्दभम् आचष्टे इति गर्दभ + णिच् टिलोपे दकारस्य धकारः। ततः क्विप्।

दधस्तथोश्च ॥३८॥

कृतद्विर्वचनो दधातिर्निर्दिश्यते। तस्य झषन्तस्य बशः स्थाने 'भष्' आदेशो भवति तकार-थकारयोः, स्ध्वोश्च परतः। धत्तः। धत्थः। धत्से। धत्स्व। धध्वम्।

वचनसामर्थ्यात् आतो लोपस्य स्थानिवद्भावो न भवति। अभ्यास-जश्त्वस्य चासिद्धत्वम्।

कृत······निर्दिश्यते—न तु √दध (धारणे) इति। **धत्तः**—√डुधाञ् (धारणपोषणयोः) + लट् → तस्।

धत्स्व—√धा + लोट् → थास् → से → स्व। अभ्यास-दकारस्य धकारः। आकारलोपस्य अत्र स्थानिवत्त्वं न भवति अन्यथा √धा इति आकारान्त एव स्यात् न तु झषन्तः। एवम् अभ्यासस्य-जश्त्वमपि न असिद्धं भवति। इत्येत्सर्वम् **वचनसामर्थ्यात्**—सूत्रारम्भबलात् इति बोध्यम्।

झलां जशोऽन्ते ॥३९॥

झलां जशः आदेशाः भवन्ति पदस्यान्ते वर्तमानानाम्। वागत्र। लिडत्र। अग्निचिदत्र।

झलाम्—झ-भ-घ-ढ-घ-ख-फ-छ-ठ-थ-च-ट-त-क-प-श-ष-स-ह, इति वर्णानाम् **जशः**—ज-ब-ग-ड-द इति वर्णाः। प्रत्याहारयोरपि वर्णाभिप्रायकम् बहुवचनम्। **आदेशाः**—अन्तरतमा इति शेषः।

पदस्य अन्ते = अवसाने। 'अन्ते' इत्यस्य अनुवृत्तौ सत्यां पुनः 'अन्त' ग्रहणं 'झलि' इत्येतस्य निवृत्त्यर्थम्।

वागत्र—वाक् + अत्र। ककारस्य अन्तरतमः गकारः। **लिडत्र**—लिट् + अत्र। टकारस्य डकारः। **अग्निचिदत्र**—अग्निचित् + अत्र।

झषस्तथोर्धोऽधः ॥४०॥

झषः परयोः त-थयोः स्थाने धकार आदेशो भवति अदधातेः । लब्धा । लब्धुम् । लब्धव्यम् ।

'अधः' इति किम् ? धत्तः ।

अधः = अदधातेः = √धा इत्येतं वर्जयित्वा । **लब्धा**—√लभ् + ता (तृच्) । अत्र तकारस्य धकारः । एवम् **दोग्धा** । **बोद्धा** इत्यादि तकारस्य धकारे कृते 'झलां जश् झशि' इत्यनेन निमित्तस्थानिकस्य धकारस्य जश्त्वेन दकारः ।

षढोः कः सि ॥४१॥

षकार-ढकारयोः ककार आदेशो भवति सकारे परतः । षकारस्य पिपक्षति । ढकारस्य लेक्ष्यति ।

पिपक्षति—√पिष्लृ (पेषणे) + सन् + लट् → ति । षकारस्य 'कः', ततः परस्य सकारस्य षकारः । क्-ष् संयोगे 'क्षः' ।

लेक्ष्यति—√लिह् (लेहने) + लृट् स्य-आगमः । हकारस्य ढकारे कृते तस्य 'कः' ।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥४२॥

रेफ-दकाराभ्याम् उत्तरस्य निष्ठात-तकारस्य नकार आदेशो भवति । पूर्वदकारस्य च नकारः । रेफान्तात्—आस्तीर्णम् । विस्तीर्णम् । विकीर्णम् । अवपूर्णः ।

दकारान्तात्—भिन्नः । भिन्नवान् । 'र' इत्यत्र श्रुतिसामान्यं नोपादीयते । किं तर्हि ? व्यञ्जनमात्रम् अर्धमात्रात्मकम् । रेफसामान्यनिर्देशेऽपि सति रेफात् परा या अच्-भक्तिः, तद्व्यवधानात् 'कृतः' इत्यत्र नत्वं न भवति ।

आस्तीर्णम्—आ √स्तृञ् (आच्छादने) + क्त । 'ॠत इद्धातोः' इति इत्वम्, 'हलि च' इति दीर्घः । **विकीर्णम्**—वि √कॄ (विक्षेपे) + क्त ।

अवपूर्णः –अव √पूरी (आप्यायने) + क्त। **भिन्नः**– √भिदिर् (विदारणे) + क्त। एवं **भिन्नवान्**– √भिदिर् + क्तवतु ।

व्यञ्जनमात्रम्, अर्धमात्रात्मकम् –तथैव व्याख्यानात् । अर्धमात्रे रकारे स्वीकृते तस्मात् परस्य तकारस्य 'नः' । ऋकारे तु मध्यभागः व्यञ्जनम् पूर्व-उत्तरभागः स्वरः, इति अचो मध्ये वर्तितया **कृतः** इत्यत्र तकारो न रेफात् परः इति तस्य नकारो न भवति। कृतस्य अपत्यं **कार्तिः** इत्यत्र बहिरङ्गत्वेन वृद्धेः तन्निमित्तकस्य च रेफस्य असिद्धत्वात् न तकारस्य नत्वम् ।

संयोगादेरातो धातोर्यण्वतः ॥४३॥

संयोगादिर्यो धातुः आकारान्तो यण्वान् तस्मादुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति। प्रद्राणः । प्रद्राणवान् । ग्लानः । ग्लानवान् ।

'संयोगादेः' इति किम् ? यातः ।

प्रद्राणः–प्र √द्रा (कुत्सायां गतौ) + क्त । 'कृत्यचः' इति णत्वम् । **ग्लानः**–√ग्लै (हर्षक्षये) + क्तः ।

ल्वादिभ्यः ॥४४॥

√लूञ् (छेदने) इत्यतः प्रभृति √वृञ् (वरणे) इति यावत् वृत्करणेन समापिताः धातवो गृह्यन्ते । तेभ्यः उत्तरस्य निष्ठा-तकारस्य नकार आदेशो भवति । लूनः । धूनः । जीनः ।

❀ (वा०) ऋकार-ल्वादिभ्यः 'क्तिन्' निष्ठावद् भवतीति वक्तव्यम् । कीर्णिः । गीर्णिः । लूनिः ।

❀ पूञो विनाशे इति वक्तव्मम् । पूनाः यवाः । विनष्टाः इत्यर्थः ।

जीनः–√ज्या (वयोहानौ) + क्त 'ग्रहिज्या……' इति सम्प्र-सारणम् । **कीर्णिः**–√कॄ + क्तिन् । वार्तिके 'ऋकार' इत्यस्य 'ऋकारान्त' इत्यर्थः ।

❀ दुग्वोर्दीर्घश्चेति वक्तव्यम् । आ √दु (उपतापे)--आदूनः । वि √गु (पुरीषोत्सर्गे)—विगूनः ।

ओदितश्च ॥४५॥

ओकारेतो धातोः उत्तरस्य निष्ठा-तकारस्य नकार आदेशो भवति । √ओलस्जी—लग्नः । लग्नवान् । √ओविजी--विग्नः । विग्नवान् । √ओप्यायी (वृद्धौ)--आपीनः । आपीनवान् ।

स्वादयः ओदितः । षूङ् (प्राणिप्रसवे)—सूनः । सूनवान् ।

√**ओलस्जी** (व्रीडायाम्) **लग्नः**—सस्य लोपः, जकारस्य कुत्वेन गकारः । √ओविजी (भयचलनयोः) ।

आपीनः—'प्यायः पी' इत्यनेन प्यायः 'पी' आदेशः । **स्वादयः**—दिवादिगणे पठिताः √षूङ् (प्राणिप्रसवे) इत्यारभ्य √व्रीङ् (प्रीत्यर्थे) इत्यन्ताः नव धातवः । **ओदितः**--तेन निष्ठा-नत्वं भवति ।

क्षियो दीर्घात् ॥४६॥

क्षियो धातोः दीर्घात् उत्तरस्य निष्ठा-तस्य 'नः' । क्षीणाः क्लेशाः । क्षीणो जाल्मः ।

क्षियः—√क्षि (क्षये, निवास-गत्योश्च) ह्रस्वस्यापि 'इयङ्' आदेशः । **क्षीणाः**—√क्षि + क्त (कर्तरि) 'निष्ठायामण्यदर्थे' इति दीर्घः ।

श्योऽस्पर्शे ॥४७॥

श्यायतेः परस्य निष्ठा-तस्य नः अस्पर्शे अर्थे। शीनं घृतम् । नेह—शीतो वातः ।

शीनम्—√श्यैङ् (गतौ) + क्त । 'द्रवमूर्तिस्पर्शयोः श्यः' इति सम्प्रसारणम् । 'हलः' इति दीर्घः । **शीतो वायुः**—शीतः स्पर्शः यस्य सः इत्यस्मिन्नर्थे 'शीत' शब्दः ।

अञ्चोऽनपादाने ॥४८॥

अञ्चः परस्य निष्ठा—तस्य नः, न चेत् अपादानं तत्र । समक्नौ शकुनिपादौ ।

'अनपादाने' इति किम् ? उदक्तम् उदकम् कूपात् ।

समक्नौ—सम् √अञ्चू (गतिपूजनयोः) + क्त = सङ्क्तौ । 'अनिदिताम्.......' इति न् (ञ्)-लोपः । चकारस्य कुत्वम् । **उदक्तम्**—उद्धृतम् । **व्यक्तम्**–√अञ्चू (व्यक्ति... " इत्यस्य) ।

दिवोऽविजिगीषायाम् ॥४९॥

दिव उत्तरस्य निष्ठा-तस्य नकारादेशो भवति अविजिगीषायाम् अर्थे । आद्यूनः । परिद्यूनः । अन्यत्र द्यूतं वर्तते ।

आद्यूनः = उदरपूरकः आ √दिवु (क्रीडादिषु) + क्त । 'च्छ्वोः शूडनुनासिके च' इत्यनेन वकारस्य 'ऊठ्' । **परिद्यूनः**—परिक्षीणः ।

अविजिगीषा—विजेतुम् इच्छा = विजिगीषा तस्याः अभावः । **द्यूतम्**—द्यूते विजिगीषया अक्षपातनक्रीडा भवति ।

निर्वाणोऽवाते ॥५०॥

निस्-पूर्वात् वातेः उत्तरस्य निष्ठा-तस्य नः । न चेद् वाताधिकरणो वात्यर्थः । निर्वाणोऽग्निः । प्रदीपः ।

'अवाते' इति किम् ? निर्वातो देशः ।

निर्वाणः—निर् √वा (गति-गन्धनयोः) + क्त । **अग्निः / प्रदीपः**—अत्र 'प्रशमन' रूपोऽर्थः । उपशान्तः इत्यर्थः । **वाताधिकरणः** = वातकर्तृकः । वातश्चेत् अभिधेयो न भवतीत्यर्थः । **निर्वातो देशः**—पवनस्य गत्या वर्जितः ।

शुषः कः ॥५१॥

शुषेर्धातोः उत्तरस्य निष्ठा-तस्य ककार आदेशः । शुष्कः । शुष्कवान् ।

शुष्कः—√शुष् (शोषणे) + क्त । इदं तकारस्य ष्टुत्वं बाधते ।

पचो वः ॥५२॥

पचेः परस्य तकारस्य वकारो भवति । **पक्वः** । **पक्ववान्** ।

पक्वः—√डुपचष् (पाके) + क्त। **पक्ववान्**--पक्तवतु चकारस्य कुत्वम् ।

क्षायो मः ॥५३॥

√क्षै धातोः परस्य तस्य 'मः' । क्षामः । क्षामवान् ।

क्षामः—√क्षै (क्षये) + क्त । 'आदेच उपदेशेऽशिति' इत्यनेन ऐकारस्य आत्वम् ।

प्रस्त्योऽन्यतरस्याम् ॥५४॥

प्र-पूर्वात् स्त्यायतेः परस्य निष्ठा-तकारस्य अन्यतरस्यां मकार आदेशो भवति । प्रस्तीमः / प्रस्तीतः । प्रस्तीमवान् / प्रस्तीतवान् ।

यदा मत्वं न भवति, तदा 'संयोगादेरातो धातोर्यण्वतः' इत्यस्य पूर्वत्रासिद्धत्वात् सम्प्रसारणं प्रथमं क्रियते; तत्र कृते निमित्तविघातात् नत्वं न भवति ।

प्रस्तीमः—प्र √स्त्यै (सङ्घात-शब्दयोः) + क्त। 'स्त्यः प्रपूर्वस्य' इति सम्प्रसारणम्, 'हलः' इति दीर्घः ।

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥५५॥

एते निपात्यन्ते, न चेत् उपसर्गात् उत्तरे भवन्ति । फुल्लः—√ञिफला (विशरणे) उत्वम्, इट्-अभावोऽत्र सिद्ध एव । निष्ठातस्य लकारो निपात्यते ।

क्षीबः, कृशः, उल्लाघः क्षीब-कृशिभ्याम्, उत्पूर्वात् लाघेश्च 'क्त' प्रत्ययस्य 'त' लोपः इट्-अभावश्च निपात्यते ।

अनुपसर्गात् किम् ? प्रफुल्लताः सुमनसः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । लाघेः उतः अन्यः उपसर्गः प्रतिषिध्यते ।

❀ (वा०) उत्फुल्लसंफुल्लयोरुपसंख्यानम् । कथं प्रफुल्लः इति दृश्यते । सोऽन्यो धातुः √फुल्ल (विकसने) इति ।

सिद्धः एव—'आदितश्च' इति इट्-प्रतिषेधः, 'उत्परस्यातः' इति उत्वम् । **क्षीब-कृशिभ्याम्**—√क्षीब् (मदे), √कृश् (तनूकरणे) इत्येताभ्याम् । **उत् पूर्वः** √लाघृ (शक्तौ) इति धातोः ।

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ॥५६॥

√नुद–√विद–√उन्दो–√त्रा–√घ्रा–√ह्री, इत्येतेभ्य उत्तरस्य निष्ठा-तस्य अन्यतरस्याम् नकार आदेशः । नुन्नः / नुत्तः । विन्नः / वित्तः । उन्नः / उत्तः । त्राणः / त्रातः । घ्राणः / घ्रातः । ह्रीणः / ह्रीतः ।

√ह्री—इत्येतस्य अप्राप्तम् अन्येषां नित्यं प्राप्तं नत्वं विकल्प्यते ।

√विद (विचारणे) एतस्य ग्रहणम् । उक्तं च—

वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।

विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः ॥

नित्यं प्राप्तं नत्वम्—दकारान्तानां √नुद (प्रेरणे), √विद (विचारणे), √उन्दी (क्लेदने) इत्येतेषां 'रदाभ्याम्·······' इत्यनेन तथा √त्रैङ् (पालने), √घ्रा (गन्धोपादाने) इत्यनयोः 'संयोगादेरातः······' इत्यनेन इति शेषः ।

√विद (विचारणे)—√उन्दी इत्यस्य साहचर्यात् ।

विदितः—नित्यम् इट्-विधानात् । **विन्नः**—'रदाभ्याम् ····' इत्यनेन नित्यं नत्व-विधानात् । **भोगे वित्तः**—'वित्तो भोगप्रत्यययोः' इति नत्वाभावस्य निपातनात् ।

न ध्याख्यापॄमूर्छिमदाम् ॥५७॥

एषां निष्ठा-तस्य न नकारः । ध्यातः । ख्यातः । पूर्त्तः । मूर्तः । मत्तः ।

एषाम्—√ध्यै (चिन्तायाम्) √ख्या (प्रकथने, चक्षिङः ख्याञ् च), √पॄ (पालन-पूरणयोः), √मूर्छा (मोह-समुच्छ्राययोः), मदी (हर्षे) धातूनाम् । आद्ययोः 'संयोगादेः……' इतरेषाम् 'रदाभ्याम्……' इति नित्यं प्राप्तो नकारः प्रतिषिध्यते ।

पूर्तः—√पॄ + क्त । 'उदोष्ठचपूर्वस्य' इति उत्वम् । उकारस्य दीर्घः । **मूर्तः**—√मूर्च्छ + क्त । 'राल्लोपः' इति च्छकारस्य लोपः ।

वित्तो भोगप्रत्यययोः ॥५८॥

'वित्तः' इति विन्देर्लाभार्थात् उत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये । भोगे–वित्तम् अस्य बहु । धनम् इत्यर्थः । धनं हि भुज्यते इति 'भोगः' इत्यभिधीयते ।

प्रत्यये–वित्तोऽयं मनुष्यः । 'प्रतीतः' इत्यर्थः । भोग-प्रत्ययात् अन्यत्र विन्नः ।

विन्देः—√विद्लृ (लाभे) इत्यस्मात् । प्रतीयते इति **प्रत्ययः** ।

भित्तं शकलम् ॥५९॥

'भित्तम्' इति निपात्यते, शकलं चेत्तद् भवति । भित्तं तिष्ठति । भिदि-क्रियायाः विवक्षायां तु 'भिन्नम् 'इत्येव भवति ।

निपात्यते—'रदाभ्याम्……' इत्यनेन नत्वाभावः । **शकलम्**—खण्डः । **भिन्नम्**—अत्र नत्वं भवति । **भिन्नं भित्तमिति** वृत्तिपाठोऽत्र युक्तः ।

ऋणमाधमर्ण्ये ॥६०॥

'ऋ' धातोरुत्तरस्य निष्ठा-तस्य नकारादेशो निपात्यते आधमर्ण्ये विषये ।

अधमः ऋणे इति अधमर्णः तस्य भावः आधमर्ण्यम् । 'उत्तमर्णः' इत्यपि भवति । ऋणं ददाति । ऋणं धारयति ।

'आधमर्ण्ये' इति किम् ? ऋतं वक्ष्यामि नानृतम् ।

ऋणम्—√ऋ (गति-प्रापणयोः) + क्त । **अधमर्णः**—निपातनात् समासः । **उत्तमर्णः**—सूत्रे 'आधमर्ण्यम्' इति कालान्तरदेयविनिमयोपलक्षणार्थः उत्तमः ऋणे इति **उत्तमर्णः** । सोऽपि दत्त्वा प्रतिगृह्णाति इति उत्तमर्णोऽपि प्रयच्छन् ऋणं कालान्तरे यद् देयं तेन विनिमयं करोति ।

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ॥६१॥

एते छन्दसि निपात्यन्ते । नसत्तमञ्जसा । नसन्नम् इति भाषायाम् । निषत्तः । निषण्णः इति भाषायाम् । अनुत्तम् इति उन्देः नञ्पूर्वस्य निपातनम् । अनुत्तमा ते मघवन् । अनुन्नम् । इति भाषायाम् ।

ञित्वरा—प्रतूर्तम् । अन्यत्र प्रतूर्णम् । √सृ—सूर्ता वयम् । सृता वयम् इति भाषायाम् । √गूरी--गूर्ता अमृतस्य । गूर्णम् इति भाषायाम् ।

नसत्तम्, निषत्तम्—नञ्, नि-पूर्वात् √षद्लृ (विशरणादौ) + क्त । नत्वस्याभावो निपात्यते । 'निषत्तम्' इत्यत्र 'सदिरप्रतेः' इत्यनेन सकारस्य षत्वम् । **अनुत्तम्**—नञ् √उन्दी + क्त । 'अनिदिताम्.........' इति न-लोपः । **प्रतूर्तम्**—√ञित्वरा + क्त । 'ज्वरत्वर......' इत्यनेन उपधाया उत्वम् । **सूर्ता**—√सृ (गतौ) + क्त । उत्वं रपरत्वं च निपात्यते । **गूर्ता**—नत्वाभावो निपात्यते ।

क्विन्प्रत्ययस्य कुः ॥६२॥

'क्विन्' प्रत्ययो यस्मात् सः क्विन्प्रत्ययः । तदन्तस्य पदस्य अलोऽन्त्यस्य कवर्ग आदेशो भवति । 'स्पृशोऽनुदके क्विन्' घृतस्पृक् । हलस्पृक् ।

प्रत्ययग्रहणस्यैतत्प्रयोजनम् । बहुव्रीहिविज्ञानार्थम् । 'क्विन्' प्रत्ययो यस्माद्विहितः, तस्मात् अन्यस्मिन् अपि प्रत्यये पदान्तस्य कुत्वं यथा स्यात् । तथा दृग्भ्याम् । दृग्भिः इति क्विप्-अन्तस्यापि दृशेः कुत्वं भवति ।

एवं च सति 'रज्जुसृड्भ्याम्' इत्यत्रापि कुत्वं प्राप्नोति । अथ तु नेष्यते । प्रतिविधानं कर्तव्यम् इति ।

घृतस्पृक्—घृतं स्पृशति इति घृत √स्पृश् + क्विन् 'स्पृशोऽनुदके क्विन्' इत्यनेन । 'सु' विभक्तेः लोपे अन्त्यस्य शकारस्य ककारः ।

दृग्भ्याम्—'त्यदादिषु दृशोऽनालोचने कञ्च' इत्यनेन दृशेः 'क्विन्' विहितः इति अत्र क्विबन्तेऽपि कुत्वम् ।

अथ.......कर्त्तव्यम्—'नशेर्वा' इत्युत्तरसूत्रे 'वा' इत्यस्य अत्रापि योगं मत्वा व्यवस्थित विभाषा आश्रयणीया ।

नशेर्वा ॥६३॥

नशेः परस्य वा कवर्ग आदेशो भवति । सा वै जीवनगाहुतिः / सा॑ वै॒ जी॒व॒नडा॑हुतिः । षत्वे प्राप्ते कुत्वविकल्पः ।

जीवनक् / जीवनड्—आहुतिः—जीव √नश् + क्विप् कुत्वाभावपक्षे 'व्रश्चभ्रस्ज ......' इषि षत्वे तस्य जश्त्वेन डः । 'वाऽवसाने' इत्यनेन विकल्पेन टकारोऽपि **जीवनट्** । जीवनाशहेतुः आहुतिः इत्यर्थः ।

मो नो धातोः ॥६४॥

मकारान्तस्य धातोः पदस्य नकार आदेशो भवति । प्रशान् । प्रतान् । नत्वस्य असिद्धत्वात् न-लोपो न ।

प्रशान्—प्र √शमु (उपशमे) + क्विप् । 'अनुनासिकस्य .....' इति उपधायाः दीर्घः । **असिद्धत्वात्**—'पूर्वत्रासिद्धम्' इत्यनेन ।

म्वोश्च ॥६५॥

मकार-वकारयोश्च परतो मकारान्तस्य धातोः नकार आदेशो भवति । अग॑न्म॒ तम॑सः पा॒रम् / अग॑न्व तम॑सः पारम् । गमेर्लङि 'बहुलं छन्दसि' इति शपो लुक् । जगन्वान् । 'विभाषा गमहन......' इति इट्-आगमस्याभावः । अपदान्तार्थं आरम्भः ।

अगन्म—√गम् + लङ् → मस् । 'स उत्तमस्य' इति सकार-लोपः ।

जगन्वान्—√गम् + लिट् → क्वसु । हल्ङ्याादि-संयोगान्त लोपे च कृते 'सान्तमहतः संयोगस्य' इति दीर्घः, उपधालोपश्च ।

ससजुषो रुः ॥६६॥

सकारान्तस्य पदस्य 'सजुष्' इत्येतस्य 'रुः' आदेशः । सकारान्तस्य—अग्निरत्र । वायुरत्र । सजुषः--सजूर्ऋतुभिः ।

अग्निरत्र—अग्नि + स् (सु) सकारस्य 'रुः' । उकारः 'इत्' **सजूः**—सह जुषते इति √जुष + क्विप् + सु उपपद समासः, सहस्य 'स' रुत्वे कृते 'र्वोरुपधायाः' इति उकारस्य दीर्घः । सजूः = सप्रीतिः ।

अवयाः श्वेतवाः पुरोडाश्च ॥६७॥

एते कृतदीर्घाः सम्बुद्धौ निपात्यन्ते । हे अवयाः । हे श्वेतवाः ! हे पुरोडाः ! चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः ।

अवयाः—अव √यज + ण्विन् । **श्वेतवाः**—श्वेत √वह + ण्विन् । **पुरोडाः**--पुरस् √दाशृ + ण्विन् दकारस्य डकारः । **उक्थशाः**–उक्थ √शस् + ण्विन् ।

सम्बुद्धौ दीर्घार्थम् एते निपात्यन्ते । 'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घत्वम् असम्बुद्धौ भवति ।

अहन् ॥६८॥

'अहन्' इत्येतस्य पदस्य 'रुः' भवति । अहोभ्याम् । अहोभिः । दीर्घाहा निदाघः । 'अहन्' इत्यत्र लाक्षणिकत्वात् 'अहन्' शब्दस्य 'रुः' न भवति ।

❀ (वा०) अह्नो रूपराशिरथन्तरेषूपसंख्यानम् । अहोरूपम् । अहोरात्रम् । अहोरथन्तरम् ।

अहोभ्याम्--अहन् + भ्याम् नकारस्य रु → उकारः, गुणश्च । **दीर्घाहा**--दीर्घाणि अहानि यस्मिन् सः । अत्र दीर्घाहन् इत्यत्र नकारस्य रुत्वे तस्य असिद्धत्वात् 'सर्वनामस्थाने च' इत्यनेन दीर्घः । **अहन्**--√हन्

+ लङ् । **लाक्षणिकत्वात्**--अट्-आगमेन 'अहन्' रूपस्य प्राप्तेः न तु स्वतः । **अहोरूपम्**--'रोऽसुपि' इत्यस्यापवादो रुत्वं भवति । तेन 'हशि च' इति तस्य उत्वे गुणो भवति । 'रोऽसुपि' इति रकारे कृते तु 'अहर्भ्याम्' इति अनिष्टं रूपं स्यात् ।

रोऽसुपि ॥६९॥

'अहन्' इत्येतस्य रेफ आदेशो भवति असुपि परतः । अहर्भुङ्क्ते । अहर्ददाति ।

अहर्ददाति--अत्र 'अहन्' इत्यस्य रुकारे सति 'हशि च' इति तस्य उकारः स्यात् । अत्र लुप्तस्य 'सु' इत्यस्य प्रत्ययलक्षणेन स्थितिः नैवास्ति—अह्नो र-विधौ लुमता लुप्ते प्रत्ययलक्षणं न भवति ।

अम्नरूधरवरित्युभयथा छन्दसि ॥७०॥

अम्नस्-ऊधस्-अवस्, एषां छन्दसि विषये उभयथा 'रुः' वा रेफो वा । अ॒म्न॑ ए॒व / अम्नरेव । ऊध॑ एव / ऊधरेव । अ॒व एव / अवरेव ।

❀(वा०) अहरादीनां पत्यादिषूपसंख्यानम् । अहः पतिः / अहर्पतिः । धूःपतिः / धूर्पतिः ।

विसर्जनीयबाधनार्थम् अत्र पक्षे रेफस्यैव रेफो विधीयते ।

अम्न एव--रु-कृते 'भोभगो···अपूर्वस्य योऽशि' इत्यनेन तस्य यकारः, 'हलि सर्वेषाम्' इति य-लोपः ।

उपसंख्यानम्--उभयथा रुत्वं रेफश्च भवति । **अहः पतिः**--रुत्वे कृते तस्य विसर्गः ।

भुवश्च महाव्याहृतेः ॥७१॥

'भुवस्' इत्येतस्य महाव्याहृतेः छन्दसि विषये उभयथा 'रुः' वा, रेफो वा । भुव इत्यन्तरिक्षम् / भुवरित्यन्तरिक्षम् ।

'भुवस्' इत्यव्ययम् अन्तरिक्षार्थं महाव्याहृतिः ।

'महाव्याहृतेः' इति किम् ? भुवो विश्वेषु सवनेषु यज्ञियः ।

'भुवस्' इति षष्ठयन्तप्रतिरूपकम् अव्ययम् । **भुव** इति--सस्य रुत्वे तस्य यकारः → लोपश्च । **भुवो विश्वस्य**--अत्र 'भुवः' इति छान्दसं तिङन्तं पदम् । **महाव्याहृतिः**--महत् = अन्तरिक्षम्, तस्य व्याहृतिः = उक्तिः ।

वसुस्रंसुध्वंस्वनडुहां दः ॥७२॥

'ससजुषो रुः' इत्यतः 'स' इत्यनुवर्तते । तेन सम्भवाद् व्यभिचाराच्च 'वसुः' एव विशिष्यते । 'स्रंसु-ध्वंसू' अव्यभिचारात् । 'अनडुह्' शब्दः असम्भवाच्च । वस्वन्तस्य पदस्य, 'स्रंसु'-आदीनाञ्च दकार आदेशः । वसु- विद्वद्भ्याम् । विद्वद्भिः । स्रंसु-उखास्रद्भ्याम् । उखास्रद्भ्यः । ध्वंसु--पर्णध्वद्भ्याम् । अनडुह्-अनडुद्भ्याम् ।

रुत्वे नाप्राप्ते इदम् आरभ्यते । 'हो ढः' इत्यस्यापवादः । नुमस्तु विधानसामर्थ्यात् न । अनड्वान् ।

विद्वद्भ्याम्--विद्वस् (√विद्+शतृ → वसु)+भ्याम् । सकारस्य दकारः । उखायाः=स्थाल्याः स्रंसते इति उखा √स्रंस्+क्विप्=उखास्रस्+भ्याम् । पर्णानि ध्वंसते इति पर्णध्वत् । 'अनिदिताम्......' इति न-लोपः ।

विधानसामर्थ्यात्--'सावनडुहः' इत्यनेन 'नुम्' विधीयते तस्य दकारे कृते तद् विधानम् एव व्यर्थं स्यात् ।

तिप्यनस्तेः ॥७३॥

तिपि परतः सान्तस्य पदस्य अनस्तेः दकार आदेशो भवति । अचकाद् भवान् । अन्वशाद् भवान् ।

अचकाद्--√चकासृ (दीप्तौ)+लङ् → तिप् अदादित्वात् शपो लुक् । 'हल्ङ्यादि ..... ' इत्यनेन तिपस्तकारलोपे, सकारस्य दकारः ।

अन्वशाद्--अनु √शासु (अनुशिष्टौ) + लङ् ।

अनस्तेः--√अस् इत्यस्य न । आप एवेदं सलिलं सर्वम् आः--√अस् + लङ् → तिप् अत्र सकारस्य रुत्व विसर्गौ ।

सिपि धातो रुर्वा ॥७४॥

सिपि परे सकारान्तस्य धातोः 'रु' इत्ययम् आदेशो वा भवति, दकारो वा । अचकास्त्वम् / अचकात्त्वम् ।

धातुग्रहणम् उत्तरार्थम् । रु-ग्रहणं च ।

अत्र सकारस्य रुत्वे विसर्गे च कृते, 'विसर्जनीयस्य सः' इति पुनः सकारः । **उत्तरार्थम्**—'दश्च' इत्यत्रानुवृत्त्यर्थम् ।

दश्च ॥७५॥

दकारान्तस्य धातोः पदस्य सिपि परतः 'रुः' वा भवति दकारो वा । अभिनस्त्वम् / अभिनत्त्वम् ।

अभिनस्त्वम्—√भिदिर् (विदारणे) + लङ् → सिप् । 'स' कृते तस्य विसर्गे सति पुनः सकारः । पक्षे **अभिनत्त्वम्**—दकारे कृते 'खरि च' इति तस्य चर्त्वेन तकारः ।

र्वोरुपधाया दीर्घ इकः ॥७६॥

रेफ-वकारान्तस्य धातोः पदस्य उपधायाः इको दीर्घो भवति । गीः । धूः । आशीः । व-ग्रहणम् उत्तरार्थम् ।

अबिभर्भवान् । नेह दीर्घः उपधाग्रहणात् । धातोः इत्येव—अग्निः । वायुः ।

गीः-धूः-आशीः—√गॄ-√धुर्वी-आ √शास् + क्विप् । सौ विभक्तौ 'रकारे' कृते गिर्, धुर्, आशिर् इति स्थितौ उपधायाः दीर्घः ।

उत्तरार्थम्—वकारान्तस्य पदस्य धातोरसम्भवात् ।

हलि च ॥७७॥

हलि च परतो रेफ-वकारान्तस्य धातोः उपधायाः इको दीर्घो भवति । रकारान्तस्य—आस्तीर्णम् । अवगूर्णम् । वकारान्तस्य—दीव्यति । सीव्यति ।

धातोः इत्येव—दिवम् इच्छति दिव्यति । चतुर इच्छति चतुर्यति । इकः इत्येव—भव्यम् । अपदान्तार्थोऽयमारम्भः ।

आस्तीर्णम्—आ √स्तृ + क्त । ऋकारस्य 'ऋत इद् धातोः' इति 'इर्' (रपरे इकारे) कृते अनेन दीर्घः ।

दीव्यति—√दिवु (क्रीडादिषु) + लट् → ति श्यन्-आगमः ।

दिव्यति, चतुर्यति—दिव्-चतुर् इत्येतौ प्रातिपदिकौ ।

भव्यम्—√भू + यत् गुणे कृते दीर्घस्य प्राप्तिः स्यात्, तन्न भवति ।

उपधायां च ॥७८॥

धातोरुपधाभूतौ यौ रेफ-वकारौ हल्परौ तयोः उपधायाः इको दीर्घो भवति । हूर्छति / मूर्छति । तूर्वति ।

विव्यतुः । विव्युः । अत्र यणादेशस्य स्थानिवद्भावात् असिद्धत्वाच्च बहिरङ्गलक्षणत्वेन हल्परौ रेफ-वकारौ न भवतः ।

चतुर्यिता इत्यत्रापि बहिरङ्गलक्षणत्वात् अतो लोपस्य धातोः उपधाभूतो रेफो न भवति ।

प्रतिदीव्ना इत्यत्र तु 'हलि च' इति दीर्घत्वम् । दीर्घविधौ लोपाजादेशस्य स्थानिवद्भावप्रतिषेधात् । 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्येतत्तु नाश्रयितव्यम् ।

'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति जिव्रि-गिर्योः । इत्येवमादिषु दीर्घो न भवति ।

हूर्छति—√हुर्छ कौटिल्ये—लट् → तिप् । **मूर्छति**—√मुर्छा (मोहे) । **तूर्वति**—√तुर्वी (हिंसायाम्) **स्थानिवद्भावात्**—'स्वर-दीर्घ-यलोपेषु लोपाजादेशो न स्थानिवत्' इति परिगणने कृते न स्थानिवद्भावश्चेत् तदाऽपि यण्-आदेशो बहिरङ्गतया दीर्घे कर्त्तव्ये असिद्धो भवति । **नाश्रयितव्यम्**—अस्याः परिभाषाः अनित्यत्वात् ।

उणादयः''''''**न भवति**—अयं भावः, प्रतिलक्ष्यं लक्षणं भवति इति

'प्रतिदीव्ना' इत्यत्र व्युत्पत्तिपक्षः । जिव्रिः इत्यादिषु अव्युत्पत्तिपक्षः आश्रयणीयः ।

न भकुर्छुराम् ॥७९॥

रेफ-वकारान्तस्य भस्य कुरु-छुरु, एतयोश्च दीर्घो न भवति । धुर्यः । कुर्यात् । छुर्यात् ।

रेफवकारान्ताभ्यां भस्य विशेषणं किम् ? प्रतिदीव्ना ।

धुर्यः—धुरं वहति धुर् + यत् । यत्प्रत्यये परे 'धुर्' इत्यस्य 'भ' संज्ञा भवति । **कुर्यात्** —√कृ + विधि लिङ्, तनादित्वात् 'उ' ऋकारस्य गुणे कृते 'अत उत्सार्वधातुके' इत्यनेन उत्वम् । 'ये च' इत्यनेन उकार-लोपः । **छुर्यात्**—√छुर + विधिलिङ् ।

अदसोऽसेर्दादु दो मः ॥८०॥

अदसोऽसकारान्तस्य वर्णस्य दात् उत्तरस्य उवर्णः आदेशो भवति, दकारस्य च मकारः । अमुम् । अमू । अमून् ।

भाव्यमानेनाप्युकारेण सवर्णानां ग्रहणमिष्यते । इति मात्रिकस्य मात्रिको द्विमात्रिकस्य द्विमात्रिकः आदेशो भवति ।

असेः किम् ? अदस्यति ।

असेः—'असि' इत्यत्र इकारः उच्चारणार्थः । अविद्यमानः सकारो यस्य सः, तदन्तस्य वर्णस्येत्यर्थः । **अमुम्-अमू-अमून्**— 'अदस्' शब्दस्य अम्-औट्-शस् विभक्त्यन्तानि पदानि । क्रमशः अदम्-अदौ-अदान् इति स्थितौ दकारस्य मकारः, तस्मात् परेषाम् अ-औ-आ इत्येतेषाम् उ-ऊ-ऊ इत्यादेशाः भवन्ति ।

भाव्यमानेन ...... इष्यते—'ऋत् उत्' इत्यत्र तपरकरणेन ज्ञापितैषा परिभाषा—'भाव्यमानोऽण् सवर्णान् न गृह्णाति' तेन अकारस्य स्थाने उकारः तथा औ-आ, इत्यनयोः स्थाने ऊकारो भवति ।

अदस्यति—अमुम् इच्छति इति अदस् + क्यच् ।

एत ईद्बहुवचने ॥८१॥

अदसो दकारात् उत्तरस्य एकारस्य 'ई' भवति दस्य च

'मः' बहुवचने । अमी । अमीभिः । अमीभ्यः । अमीषाम् । अमीषु ।

सूत्रे **बहुवचने** इति न शब्दस्वरूपार्थकः अपि तु अर्थ-निर्देशोऽयम्—बहूनाम् पदार्थानाम् वचने = उक्तौ । अन्यथा **अमी** इत्यत्र न स्यात् प्रकृति-प्रत्यययोः एकादेशात् । अत्र अदस् + जस् 'त्यदादीनामः' इत्यत्वे कृते दीर्घे च अदा 'जसः शी' इति अदा + ई = अदे → अनेन सूत्रेण दकारस्य मकारे, एकारस्य च ईकारे **अमी** ।

वाक्यस्य टेः प्लुत उदात्तः ॥८२॥

आ पादसमाप्तेः यत् इतः ऊर्ध्वम् अनुक्रमिष्यामः, 'वाक्यस्य टेः, प्लुतः, उदात्तः ।' इत्येवं तद् वेदितव्यम् । वक्ष्यति—'प्रत्यभि-वादेऽशूद्रे' अभिवादये देवदत्तोऽहम् भो ! आयुष्मान् एधि देवदत्ता३ । अग्निचो३त् इति ।

वाक्यस्य टेः अन्त्यस्य अचः इत्यर्थः । 'टेः' इति कथनेन व्यञ्जनान्त-स्यापि भवति **अग्निचो३त्** । वृत्तौ तु **देवदत्त३** तथा **अग्निचि३त्** इति ह्रस्व एव पठितः '३' इत्यनेन प्लुतत्वं ज्ञाप्यते ।

प्रत्यभिवादेऽशूद्रे ॥८३॥

प्रत्यभिवादो नाम यत् अभिवाद्यमानो गुरुः आशिषं प्रयुङ्क्ते । तत्र अशूद्रविषये प्रत्यभिवादे यद् वाक्यं वर्तते, तस्य टेः प्लुतो भवति । स च उदात्तः । अभिवादये देवदत्तोऽहं भोः ! आयुष्मान् एधि देवदत्ता३ । एवं क्षत्र-विशोः ।

'अशूद्रे' इति किम् ? अभिवादये रुषजकोऽहम् । आयुष्मान् एधि रुषजक !

देवदत्ता३—अन्त्यस्य उदात्तत्वे शेषाः अनुदात्ताः । **एधि** = भव √अस् + लोट् → सिप् → हि → धि असः अकारस्य एकारः, सस्य लोपश्च । तदाह—

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।

भरत-शास्त्रे तु प्रत्यभिवादन वाक्ये पृथक् अकारोऽपि अन्ते दर्शितः। **आयुष्मान् भव सौम्य देवदत्त३अ ।**

❀ (वा०) राजन्य-विशां वेति वक्तव्यम् । अभिवादये इन्द्रवर्माऽहं भोः ! आयुष्मान् एधि इन्द्रवर्म३न् / इन्द्रवर्मन् । एवम् प्रत्यभिवादे आयुष्मान् एधि इद्रपालिता३ / इन्द्रपालित ।

❀ (वा०) स्त्रियामपि प्रतिषेधो वक्तव्यः । शूद्रवत् अत्रापि नोदात्तत्वं ज्ञेयम् । अभिवादये गार्ग्यहं भोः ! आयुष्मती भव गार्गि !

दूराद्धूते च ॥८४॥

दूराद्धूते यद् वाक्यम्, तस्य टेः प्लुत उदात्तो भवति । आगच्छ भो माणवक द्॒व॒द॒त्ता३ ।

हूते—आह्वाने = शब्देन सम्बोधने । दूरात् + हूते । 'दूरान्तिकार्थेभ्यो द्वितीया च' इत्यनेन चात्पञ्चमी । अत्र **दूरम्** यावत् शब्दाह्वानं श्रूयते इत्यर्थकम् ।

हूतग्रहणम् अत्र सम्बोधनमात्रोपलक्षणम् तेन यत्राह्वानं नास्ति तत्रापि प्लुतो भवति—पलायस्व देवदत्ता३ ।

हैहेप्रयोगे हैहयोः ॥८५॥

है—हे, इत्येतयोः प्रयोगे दूराद्धूते यत्प्रातिपदिकं वर्तते, तत्र है·हयोः एव प्लुतो भवति । है३देवदत्त । देवदत्त है ३ । हे ३ देवदत्त ! देवदत्त हे ३ ।

है·हयोर्ग्रहणम् अनन्त्ययोः अपि यथा स्यात् ।

है—हे—उभौ सम्बोधनद्योतकौ अव्ययौ स्तः ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥८६॥

ऋकारवर्जितस्य गुरोः अनन्त्यस्यापि, अन्त्यस्यापि 'टेः' एकैकस्य प्लुतो भवति प्राचाम् आचार्याणां मतेन । दे३वदत्त / द॒वि॒दा३त्त / द॒व॒द॒त्ता३ ।

प्लुतो भवति—प्रत्यभिवादे वाक्यस्य सम्बोधनपदस्येति शेषः।

एकैकग्रहणेन—पर्यायेण प्लुतो भवति।

'प्राचाम्' इति ग्रहणं विकल्पार्थम्। सर्वप्लुतस्येति बोध्यम्। तेन 'साहसं न कुर्वाणेन सर्वं एव प्लुतो विभाषा कर्त्तव्यः।' इति सिद्धम् भवति। **साहसम्** = शास्त्रत्यागः अर्थात् अपायहेतुम् अविमृश्य प्रवृत्तिः।

ओमभ्यादाने ॥८७॥

अभ्यादानम् = आरम्भः। तत्र यः 'ओम्' शब्दः, तस्य प्लुतो भवति। ओ३म् अ॒ग्निमी॑ळे पु॒रोहि॑तम्।

अभ्यादाने किम्? ओम् इत्येकाक्षरमुद्गीथमुपासीत।

आरम्भः—स्वाध्यायादेः। **ओम्......उपासीत**—अत्र ओम् इति उपासनायाः कर्मत्वेन प्रयुक्तम्।

ये यज्ञकर्मणि ॥८८॥

'ये' इत्यस्य यज्ञकर्मणि प्लुतो भवति। ये ३ यजामहे। 'यज्ञकर्मणि' इत्युक्तेः स्वाध्यायकाले न।

'ये३ यजामहे' अत्रैवेष्यते। नेह—ये दे॑वा दि॒व्येका॑दश॒ स्थ।

कर्मणि = क्रियायाम्। **स्वाध्यायकालेन**—'ये यजामहे' इति पञ्चाक्षरम् इत्यत्र। **इष्यते**—'प्राचाम्' इत्यनुवृत्तेः, तस्य व्यवस्थितविभाषाऽऽश्रयणात्। **देवाः**—वृत्तौ **देवासः** इति लिखितम्।

प्रणवष्टेः ॥८९॥

यज्ञकर्मणि टेः प्रणव आदेशो भवति।

क एष प्रणवो नाम? पादस्य वा, अर्द्धर्चस्य वा अन्त्यम् अक्षरम् उपसंहृत्य तदाद्यक्षर शेषस्य स्थाने त्रिमात्रम् ओकारम्, ओङ्कारं वा विदधति; तं 'प्रणवम्' इत्याचक्षते। अ॒पां रेतां॑सि जिन्वतो३म्। दे॒वान् जिं॑गाति सु॒म्न॒यो३म्। 'टि' ग्रहणं सर्वादेशार्थम्। व्यञ्जनान्तेष्वन्त्यस्य स्थाने ओकारो मा भूत् इति।

क एष……आचक्षते—व्याकरणशास्त्रे प्रणवस्य परिभाषा न कृता, इति प्रश्नस्यावकाशः । **अक्षरम्**—स्वरः । तस्य शेषः = व्यञ्जनम् यत्र च व्यञ्जनम् अन्त्यं नास्ति तत्र स्वर एवान्त्यो भवति । व्याकरणे 'टि' संज्ञकः इति बोध्यम् । तस्य स्थाने कृतम् ओकारम्, ओङ्कारं वा प्रणवं कथयन्ति विद्वांसः । **जिन्वतो३म्**—√जिवि (प्रीणने) + लट् → तिप् → शतृ = **जिन्वन्** । अत्र 'टेः-अन्' इत्यस्य 'ओम्' आदेशः । **सुम्नयो-३म्**—सुम्न + क्यच् + उ = सुम्नयु + सु = सुम्नयुस् 'उस्' इत्यस्य 'ओम्' ।

याज्यान्तः ॥९०॥

ये याज्यान्तः पठ्यन्ते मन्त्राः, तेषाम् अन्त्यो यः 'टि' स प्लवते यज्ञकर्मणि । स्तोमैर्विधेमाग्नयेँ३ । जिह्वामग्ने चकृषे हव्यवाहाँ३म् ।

अन्तग्रहणं किम् ? याज्या नाम ऋचः वाक्यसमुदायरूपाः । तत्र यावन्ति वाक्यानि, तेषां सर्वेषां 'टेः' प्लुतः प्राप्नोति, सर्वान्त्यस्य चेष्यते ; तदर्थम् अन्तग्रहणम् ।

याज्यान्तः—याज्या-काण्डान्तर्गताः । **प्लवते**—प्लुतो भवति ।

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥९१॥

'ब्रूहि' प्रभृतीनाम् आदेः प्लुतो यज्ञकर्मणि । ब्रूहि—अग्नयेऽनुब्रू३हिं । प्रेष्य—अग्नये गोमयान् प्रे३ष्यं । श्रौषट्—अस्तु श्रौ३षट् । वौषट्—सोमस्याग्ने वीही३वौ३षट् । आवह—अग्निम् आ३वंह ।

छन्दसि सर्वविधिविकल्पः इत्यत्र न भवति—आवंह देवान् यजमानाय ।

श्रौषट्-वौषट्—इति निपातौ । अन्यानि **ब्रूहि-प्रेष्य-आवह**, इति लोट्-मध्यमपुरुषैकवचनान्तानि ।

अग्नीत्प्रेषणे परस्य च ॥९२॥

अग्नीधः प्रेषणे आदेः प्लुतः । तस्मादेव आदेः परस्य च प्लुतो भवति । आ३ श्रा३वय । अत्रैवेष्यते ।

अग्नीत्प्रेषणम्—अग्नीत् = ऋत्विग्विशेषः । तस्य प्रेषणम् = नियोनम् । **इष्यते**—आ३श्रा३वय । ओ३श्रा३वय इति मन्त्रद्वये । तेनेह न—अग्नी॑दुग्नीन् विहर बर्हिः स्तृ॑णाहि ।

विभाषा पृष्टप्रतिवचने हेः ॥९३॥

'हि' शब्दस्य विभाषा प्लुतः पृष्टप्रतिवचने । अकार्षीः कटं चैत्र ! अकार्षं ही३ / अकार्षं हि ।

पृष्टप्रतिवचनम्—पृष्टस्य प्रतिवचनम् = अर्थकथनम् ।

निगृह्यानुयोगे च ॥९४॥

स्वमतात् प्रच्यावनं निग्रहः । अनुयोगः तस्य मतस्य आविष्करणम् । तत्र निगृह्यानुयोगे यद् वाक्यं वर्तते तस्य टेः विभाषा प्लुतः ।

अद्य श्राद्धम् इत्यात्था३ । अद्य श्राद्धम् इत्यात्थ । अद्यामावास्या इत्यात्थ / 'अद्य अमावास्या' इत्येवं वादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते ।

निगृह्य—नि √ग्रह + क्त्वा → ल्यप् । **आविष्करणम्**—प्रकाशनम् । **प्रच्यावनम्** = अपनयनम् । **अद्य……अनुयुज्यते**—पूर्वं वादिनो मतं निराक्रियते, ततः स्वमतेन स वादी सन्तोष्यते ।

आम्रेडितं भर्त्सने ॥९५॥

आम्रेडितं भर्त्सनेऽर्थे प्लवते । चौरचौरा३, बन्धयिष्यामि त्वाम् । द्विरुक्तोपलक्षणार्थम् आम्रेडितग्रहणम् ।

आम्रेडितम्—'वाक्यादेरामन्त्रितस्य' इत्यनेन भर्त्सने द्विर्वचनं भवति तत्र द्वितीयम् आम्रेडितसंज्ञकम् । तस्य प्लुतः ।

अङ्गयुक्तं तिङाकांक्षम् ॥९६॥

'अङ्ग' इत्यनेन युक्तं तिङन्तम् आकांक्षं भर्त्सने प्लवते । अङ्ग कूजा३ । अङ्ग व्याहरा३ । इदानीं ज्ञास्यसि जाल्म ।

'तिङ्' इति किम् ? अङ्ग देवदत्त ! मिथ्या वदसि ।

आकांक्षम्—आकांक्षते = अपेक्षते यः, सः । **अङ्ग कूज३** इति वाक्यम् **इदानी ज्ञास्यसि जाल्म**! इति **अपेक्षते** = कूजन-फलं लप्स्यसे इति भावः । **अङ्ग**—अमर्षेऽर्थे अव्ययम् । प्रत्युदाहरणे तु अनुनयार्थकम् इति ।

विचार्यमाणानाम् ॥९७॥

प्रमाणेन वस्तुतत्त्वपरीक्षणं विचारः । तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति । होतव्यं दीक्षितस्य गृहा३इ / न होत३व्यं । होतव्यम्, न होतव्यम् इति विचार्यते । तिष्ठेद्यूपा३इ । अनुप्रहरेद्यूपा३इ । यूपे तिष्ठेत्, यूपे अनुप्रहरेत् इति विचार्यते ।

विचारः—तदाह कारिकया—

कोटिद्वयस्पृग्विज्ञानं विचार इति कथ्यते ।
विचार्यमाणस्तज्ज्ञानविषयीभूत उच्यते ॥

यत्र इदं कर्त्तव्यं न कर्त्तव्यम् इति परीणणं भवति—तद् विज्ञानं विचारः । **गृहा३इ**—'गृह' इत्यत्र एकारस्य 'एचोऽप्रगृह्यस्य' इत्यनेन पूर्वार्धस्य 'अकारः' उत्तरार्धस्य 'इकारः' । तत्र 'अकारः' प्लुतो भवति । एवं **यूपा३इ** इत्यत्रापि ज्ञेयम् ।

पूर्वं तु भाषायाम् ॥९८॥

भाषायां विषये विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नू३ रज्जुर्नु । लोष्ठो नू३ कपोतो नु ।

भाषायामेव पूर्वम् इति नियमार्थमेतत्सूत्रम् । **पूर्वत्वं** तु प्रयोगापेक्षम् । यत्पूर्वं प्रयुज्यते तस्यैव टेः प्लुतो भवति । अनेन विज्ञायते—पूर्वसूत्रं छन्दसि प्रवर्तते ।

प्रतिश्रवणे च ॥९९॥

प्रतिश्रवणे यद्वाक्यं वर्तते, तस्य टेः प्लुतो भवति । प्रतिश्रवणम् = अभ्युपगमः, प्रतिज्ञानम्; श्रवणाभिमुख्यं च । तत्राविशेषात् सर्वस्य ग्रहणम् । गां मे देहि भोः ! अहं ते ददामी३ । नित्यः शब्दो भवितुमर्हती३ । देवदत्त किमात्थ३ ।

अहं ते ...... इत्यादीनि—त्रीणि वाक्यानि क्रमशः अभ्युपगमस्य, प्रतिज्ञानस्य, प्रतिश्रवणस्यार्थे उदाहरणानि ज्ञेयानि । चकारो 'भाषायाम्' इत्यनुकर्षणार्थः ।

अभ्युपगमः = अङ्गीकारः । **प्रतिज्ञानम्** = प्रतिज्ञा । अहं ते—कौमुद्याम् 'अहम्' इत्यस्य स्थाने 'हन्त' इति लिखितम् ।

वृत्तेः पदमञ्जरी टीकायां **प्रतिज्ञानम्** = प्रार्थितस्य देयत्वेन संवादः इति व्याख्या तथा **गाम् ......अहं ते ददामि** इति वाक्यम् उदाहरणरूपेणोल्लिखितम् । **अभ्युपगमस्योदाहरणं** 'नित्यः शब्दः........' इति तत्र विद्यते ।

अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥१००॥

अनुदात्तः प्लुतो भवति प्रश्नान्ते चाभिपूजिते च । नानेन प्लुतो विधीयते, किन्तु दूराद्धूतादिषु विहितस्य प्लुतस्य आद्युदात्तत्वे प्राप्ते प्रश्नान्ताभिपूजितयोः अनुदात्तत्वं गुणमात्रं विधीयते । अगमा३ः पूर्वान् ग्रामान् । अग्निभूता३इ । पटा३उ ।

'अग्निभूते', 'पटो' इत्येतयोः प्रश्नान्ते वर्तमानयोः अनुदात्तः प्लुतो भवति । 'अगमाः' इत्येवमादीनां तु 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इत्यनेन स्वरितः प्लुतः ।

अभिपूजिते—शोभनः खल्वसि माणवका३ ।

अग्निभूता३इ—'अग्निभूते' इत्यत्र 'ए' इत्यस्य प्लुतविकारः अ + इ । **पटो३उ** । अत्रापि 'पटो' इत्यत्र 'ओ' इत्यस्य प्लुतविकारः अ + उ ।

चिदिति चोपमार्थे प्रयुज्यमाने ॥१०१॥

'चित्' इति च उपमार्थे प्रयुज्यमाने वाक्यस्य टेः अनुदात्तः प्लुतो भवति । अग्निचिद् भाया३त् । राजचिद् भाया३त् ।

अग्निरिव भायात् । राजेव भायात् इत्यर्थः ।

चित् इति—'चित्' शब्दस्य 'प्रयुज्यमाने इति विशेषणम्, न तु 'चित्' शब्दस्य प्लुतः इत्यर्थः । 'चित्' शब्दः उपमार्थः ।

उपरिस्विदासीदिति च ॥१०२॥

'उपरिस्विदासीत्' इत्येतस्य टेः अनुदात्तः प्लुतो भवति । प्लुतोऽप्यनेन विधीयते न गुणमात्रमेव । अधः स्विदासी३त् । उपरिस्विदासी३त् ।

'अधः स्विदासीत्' इत्यत्र 'विचार्यमाणानाम्' इत्युदात्तः प्लुतः । 'उपरि स्विदासीत्' इत्यत्र तु अनेन अनुदात्तः ।

अधः स्विदासीत् उत उपरिस्विदासीत्—अत्रेदं विचार्यते ।

स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु ॥१०३॥

स्वरितः प्लुतो भवति आम्रेडिते परतः असूयादिष्वर्थेषु । 'वाक्यादेरामन्त्रितस्य......' इति द्विर्वचनमुक्तम् । तत्रायं प्लुतविधिः ।

माणवका३माणवक ! अभिरूपका३ अभिरूपक ! रिक्तं ते आभिरूप्यम् इत्यादि ।

माणवका३......आभिरूप्यम्—असूयायाम् इदम् उदाहरणम् ।

सम्मतौ—माणवका'३माणवक ! अभिरूपका'३ अभिरूपक ! शोभनः खल्वसि ।

कोपे—माणवका'३माणवक ! अविनीतका'३ अविनीतक ! इदानीं ज्ञास्यसि जाल्म !

कुत्सने— शाक्तीका'३ शाक्तीक ! याष्टीका'३याष्टीक ! रिक्ता ते शक्तिः । 'वाक्यादेरामन्त्रितस्याऽसूयासम्मतिकुत्सनभर्त्सनेषु' इत्यनेन एष्वर्थेषु द्वित्वं भवति ।

❀ (वा०) असूयादिषु वा-वचनं कर्त्तव्यम् । तेन पक्षे प्लुतरहितः माणवकमाणवक ! इति प्रयोगोऽपि भवति ।

क्षियाशीःप्रैषेषु तिङाकांक्षम् ॥१०४॥

क्षिया = आचारभेदः । आशीः = प्रार्थनाविशेषः । प्रैषः = शब्देन व्यापारणम् । एषु तिङन्तम् आकांक्षं यत्तस्य टेः प्लुतः स्वरितो भवति ।

क्षियायाम्—स्वयं रथेन याति'३ उपाध्यायं पदातिं गमयति । पूर्वमत्र तिङन्तम् उत्तरपदमाकांक्षति इति साकांक्षं भवति ।

आशिषि—सुतांश्च लप्सीष्टा'३ धनं च तात !

प्रैषे—कटं कुरू'३ ग्रामं च गच्छ । यवांश्च लुनीहि'३ सक्तूंश्च पिब ।

आचारभेदः—आचारस्योल्लंघनम् । **व्यापारणम्**—नियोगः । **एषु**—'गम्यमानेषु' इति शेषः ।

अनन्त्यस्यापि प्रश्नाख्यानयोः ॥१०५॥

'पदस्य' इति वर्तते, 'स्वरितम्' इति च । अनन्त्यस्यापि अन्त्यस्यापि पदस्य टेः स्वरितः प्लुतो भवति प्रश्ने च आख्याने च । अगमा'३ः पूर्वा'न् ग्रामा'३न् । अग्निभूता'३इ । पटा'३उ । सर्वेषामेव पदानाम् एष स्वरितः प्लुतः । अन्त्यस्य तु 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' इति अनुदात्तोऽपि पक्षे भवति ।

आख्याने—अगमा'३ः पूर्वा'३न् ग्रामा'३न् भो'३ः ।

सर्वेषामेव... ...**भवति**—एवञ्च प्रश्नान्ते स्वरितानुदात्तयोः प्लुतयोश्च विकल्पो भवति । सूत्रे अपि इत्यस्यात्रैव तात्पर्यम् ।

प्लुतावैच इदुतौ ॥१०६॥

दूराद्धूतादिषु प्लुतो विहितः । तत्रैव एचः प्लुतप्रसङ्गे तदवयवौ इत्-उतौ प्लवेते । ऐ३तिकायन । औ३पगव ।

ऐ३तिकायन—'ऐ' इत्यस्य 'गुरोरनृतोः.........' इत्यनेन प्लुतो विहितः । एवम् **औ३पगव** इत्यत्र 'औ' इत्यस्य प्लुतः । तत्रैषा शङ्का उदेति यत् ऐचौ (ऐ-औ) द्विमात्रौ भवतः, तद्यदि प्लुतो विधीयते तदा तौ (ऐ-औ) त्रिमात्रौ भविष्यतः । वृत्तौ कौमुद्याञ्च समाधानं कृतम् यत् इमौ ऐचौ समाहारवर्णौ तत्र एका मात्रा अवर्णस्य एका च इत्-उतोः । इत्-उतोः प्लुते कृते इमौ चतुर्मात्रौ भवतः अयं समप्रविभागपक्षः । भाष्येऽप्युक्तम्—**इष्यते चतुर्मात्रः प्लुतः** । **औपगवः**—कौमुद्यामपि इदमेवोदाहृतम् । वृत्तौ **औपमन्यव** इत्युक्तम् ।

अत्र **त्रिमात्रौ, सार्धत्रिमात्रौ** वा ऐचौ इत्यपि पक्षद्वयं वर्तते । विस्तरस्तु वृत्तौ द्रष्टव्यः ।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥१०७॥

एचः अप्रगृह्यस्य अदूराद्धूते प्लुतविषये पूर्वस्य अर्धस्य आकार आदेशो भवति, उत्तरस्य त्वर्धस्य इकार-उकारौ आदेशौ भवतः ।

विषयपरिगणनं कर्त्तव्यम्—

❀ (वा०) प्रश्नान्ताभिपूजित-विचार्यमाण-प्रत्यभिवाद-याज्यान्तेष्विति वक्तव्यम् ।

प्रश्नान्ते—अगमा३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ । पटा३उ । इत्यादि ।

परिगणनम्—विवरणम् । **इत्यादि**—अभिपूजिते—भद्रं करोषि माणवका३ **अग्निभूता३इ । पटा३उ** ।

विचार्यमाणे—**होतव्यं दीक्षितस्य गृहा३इ** ।

प्रत्यभिवादे—आयुष्मान् एधि **अग्निभूता३इ । पटा३उ** ।

याज्यान्ते—**स्तोमैर्विधेमाग्नया३इ** । अयम् आकारः यथाविषयम् उदात्तः, अनुदात्तः, स्वरितो वा बोध्यः ।

❀ (वा०) आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः। अ॑ग्ना३इ पत्नी वा३ः।

प्लुतश्चासौ विकारश्च इति प्लुतविकारः। प्लुतव्यपदेशस्तु प्लुतसाहचर्येण इत्-उतोः वेदितव्यः। सूत्रे इदुतो इत्यत्र तपरकरणं मुखसुखार्थम्।

तयोर्य्वावचि संहितायाम् ॥१०८॥

तयोः इत्-उतोः यकार-वकारौ आदेशौ भवतः अचि परतः संहितायां विषये।

'संहितायाम्' इत्येतत् चाधिकृतम्। इत उत्तरं यद् वक्ष्यामः आ–अध्यायपरिसमाप्तेः, 'संहितायाम्' इत्येवं तद् वेदितव्यम्। अग्ना३याशा। पटा३वाशा। अग्ना३यिन्द्रम् पटा३-वुदकम्।

'अचि' इति किम्! अग्ना३इ। पटा३उ।

'संहितायाम्' इति किम्? अग्ना३इ इन्द्रम् पश्य।

इदुतोः असिद्धत्वात् 'इको यणचि' इति न प्राप्नोति इत्ययम् आरम्भः। अथापि तयोः कथञ्चित् सिद्धत्वं स्यात्? एवमपि सवर्णदीर्घनिवृत्त्यर्थं शाकल निवृत्त्यर्थं च वक्तव्यमेतत्। तदिमौ संङ्ग्रहश्लोकौ स्तः—

किन्तु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधौ तु निवर्त्यौं।
इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम्।
तेन तयोश्च न शाकलदीर्घौं यण्स्वरबाधनमेव तु हेतुः।

पूर्वत्राचिषढोः नसत्तैत ईच्चिचदित्यष्टौ (१०८)।

इति श्रीमदाचार्यबलभद्र कृते काशिकावृत्तिसारे
अष्टमाध्यायस्य द्वितीयः पादः।

इत्-उतोः य्वौ=यकार-वकारौ यथासंख्यम् अन्तरतमौ च। **अथापि ...... एतत्**। यदि च सिद्धः प्लुतः स्वरसन्धिषु इति ज्ञापकं सामान्येनाश्रीयते तदा **अना३इ इन्द्रम्** तथा **पटा३उ+उदकम्** इति स्थिते यणं बाधित्वा परत्वाद् दीर्घः स्यात्, **अग्ना३इ+आशा** इत्यत्र च 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति प्रकृतिभावः स्यात्। एतत्सर्वं श्लोकद्वयेनोक्त्वा तदतिरिक्तं हेतुं निर्दिशति—**यण्स्वर**—(स्वरित) निवृत्त्यर्थमपि सूत्रम् आवश्यकम्।

अष्टमाध्यायस्यास्मिन् द्वितीये पादे पूर्वत्रासिद्धम्, अचि विभाषा, षढोः कः सि, नसत्तनिषत्त .....' एत ईद् बहुवचने, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा चिदिति चोपमार्थे प्रयुज्यमाने इत्यत आरभ्य अष्टौ सूत्राणीति संकलनेन अष्टोत्तरशतम् (१०८) सूत्राणि सन्ति।

इति काशिकावृत्तिसार-सुधायां
अष्टमाध्यायस्य द्वितीयः पादः।

अथाष्टमाध्याये तृतीयः पादः

मतुवसो रु सम्बुद्धौ छन्दसि ॥१॥

'पदस्य' इति वर्तते । मत्वन्तस्य, वस्वन्तस्य च पदस्य 'रु' इत्ययमादेशो भवति सम्बुद्धौ परतः छन्दसि । मत्वन्तस्य—इन्द्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा ।

वस्वन्तस्य—मीढ्वस्तोकाय तनयाय मृड ।

❀ (वा०) विभाषा भवद्भगवदघवतामोच्चावस्य । छन्दसि भाषायां च भवद्-भगवद्-अघवत्, इत्येषां विभाषा 'रुः' वक्तव्यः, 'अव' शब्दस्य च ओकारः । हे भोः ! हे भवन् ! हे भगोः ! हे भगवन् । हे अघोः ! हे अघवन् ।

निपातविज्ञानाद्वा सिद्धम् । असम्बुद्धौ अपि दृश्यन्ते । भो देवदत्त–यज्ञदत्तौ ! भो देवदत्तयज्ञदत्तविष्णुमित्राः ! तथा स्त्रियामपि भो ब्राह्मणि !

मरुत्व इह—मरुत् + मतुप् = **मरुत्वत्** नुमि संयोगान्तलोपे **मरुत्वन्** । अत्र नकारस्य 'रु' 'भोभगोः ……' इत्यनेन तस्य यकारः, 'लोपः शाकल्यस्य' इति लोपः । **हरिवो मेदिनं त्वा**—हरि + मतुप् = हरिवत् नुमि **हरिवन्** । नकारस्य रुत्वे तस्य 'हशि च' इत्यनेन उकारः, गुणः ओकारः । **मीढ्वस्तोकाय**—√मिह् (सेचने) + क्वसु = मीढ्वस्—सकारस्य रुः→विसर्गः 'तोकाय' परतः तस्य सकारः । **भोः**—√भा + डवतु = **भवत्**, नुमि तकारलोपे **भवन्** । अत्र नकारस्य 'रु' 'अव' इत्यस्य सर्वस्य ओकारः । रकारस्य विसर्गः । एव **भगोः, अघोः** । भगवत् – अघवत् इत्येतौ मतुप्-प्रत्ययान्तौ ।

निपात…… सिद्धम्—भोस्-भभोस्-अघोस् इति त्रयोऽपि सान्ताः निपाताः स्वीकर्तव्याः। **असम्बुद्धावपि**—प्रथमायाः द्विवचनबहुवचनयोरपि। एकवचनस्यैव 'सम्बुद्धि' संज्ञा भवति।

अत्रानुनासिकः पूर्वस्य तु वा ॥२॥

अधिकारोऽयम्। अत्र यस्य स्थाने 'रुः' विधीयते, ततः पूर्वस्यानुनासिको वा भवति इत्येतत् अधिकृतं वेदितव्यम्। इत उत्तरं यद् वक्ष्यामः तत्र वक्ष्यति--'समः सुटि'। सँस्कर्ता। सँस्कर्तुम्। सँस्कर्त्तव्यम्।

अत्र—'रु' इत्यस्य सन्नियोगे। **सन्नियोगः** = यौगपद्यम्। अर्थात् रुत्व-अनुनासिकयोः सन्नियोगो वर्तते। तु – सूत्रे अयं शब्दो विशेषं दर्शयति–परस्य रुत्वं पूर्वस्य तु अनुनासिकः। **सँस्कर्ता** इत्यादिषु रुत्व-अनुनासिकत्वयोर्विधिः 'समः सुटि' इत्यस्य वृत्तौ वक्ष्यते।

आतोऽटि नित्यम् ॥३॥

अटि परतः रोः पूर्वस्याकारस्य स्थाने नित्यम् अनुनासिक आदेशो भवति। 'दीर्घादटि समानपादे' इति रुत्वं वक्ष्यति, ततः पूर्वस्य आकारस्य अनुनासिक-विकल्पे प्राप्ते नित्यार्थं वचनम्।

देवाँ अच्छादीव्यत्। महाँ इन्द्रो य ओजसा।

अटि—प्रत्याहारे इत्यर्थः। **देवाँ अच्छादीव्यत्**—देवान् > नकारस्य रुः ततः, परस्य आकारस्य 'आँ' 'रु' इत्यस्य 'य', तस्य लोपः। एवं **महाँ इन्द्रो……** इत्यत्रापि।

अनुनासिकात्परोऽनुस्वारः ॥४॥

'अन्य' शब्दोऽत्र अध्याहर्तव्यः। तदपेक्षया चेयम् 'अनुनासिकात्' इति पञ्चमी। अनुनासिकात् अन्यो वर्णः, यो रोः पूर्वः यस्य अनुनासिको न कृतः; ततः परः अनुस्वारः आगमो भवति। वक्ष्यति–'समः सुटि'। सँस्कर्त्ता / संस्कर्त्ता।

अन्य······पञ्चमी—अध्याहारे न कृते 'पर' शब्दापेक्षया पञ्चमी स्वीकारे रोः पूर्वस्मात् अनुनासिकात् परोऽनुस्वारो विज्ञातः स्यात् स च नेष्टः । **आगमः**—न आदेशः तथाव्याख्यानात् ।

समः सुटि ॥५॥

'सम्' इत्येतस्य 'रुः' भवति सुटि परतः । सँस्कर्ता / संस्कर्ता इत्यादि ।

अत्र रोः विसर्जनीये कृते 'वा शरि' इति विसर्जनीयः प्राप्नोति । सा च व्यवस्थितविभाषा द्रष्टव्या । तेन नित्यं सकार एवात्र भवति ।

अस्मिन्नेव सूत्रे सकार आदेशो वा निर्दिश्यते—

'समः स्सुटि' इति द्विसकारको निर्देशः । कश्चिद् आह—

❀ (वा०) संपुंकानां सो वक्तव्यः । 'रु'—विधौ ह्यनिष्ट-प्रसंगः इति । संस्स्कर्ता । पुंस्स्कामा । कांस्स्कान् इति ।

सँस्कर्ता—सम् √कृ + तृच् 'सम्पर्युपेभ्यः करोतौ भूषणे' इति 'सुट्' । समो मकारस्य 'रुः' ततः पूर्वस्य अकारस्य अनुनासिकः सँर् + कर्ता रकारस्य विसर्गः पुनः' विसर्जनीयस्य सः' इति तस्य सकारः । अनुनासिक-त्वाभावपक्षे अकारस्य अनुस्वारागमः **संस्कर्ता** ।

द्विसकारकः—एकः आदेशस्य, द्वितीयः सुटः सकारः । **'संपुंकानाम्** ·········' इति वार्तिकमपि 'वा शरि' इत्यनेन पक्षे विसर्गबाधनार्थम् । **संस्स्कर्ता**—मकारस्य 'सुट्' सकारास्य द्वित्वम् । **पुंस्स्कामा**—पुम्+कामा । **काँस्स्कान्**—कान् + कान् ।

पुमः खय्यम्परे ॥६॥

'पुम्' इत्येतस्य 'रुः' भवति अम्परे खयि परतः । पुँस्कामा / पुंस्कामा । पुँस्पुत्रः / पुंस्पुत्रः ।

अत्र 'विसर्जनीयस्य सः', कुप्वोः ≍क≍ पौ च' इति प्राप्नोति । तस्मादत्र सकार एव आदेशो वक्तव्यः । द्विसकारक-निर्देशपक्षे तु पूर्वस्मादेव सूत्रात् 'स' इत्यनुवर्तते ।

'खयि' इति किम् ? पुंदासः । पुंगमः ।

'अम्परे' इति किम् ? पुंक्षीरम् ।

पुमः—'पुंस्' इत्यस्य सकारलोपे सति अवशिष्टस्य 'पुम्' इत्यस्य षष्ठयन्तं रूपम् । **अम्परे खयि**—अम् (प्रत्याहारः) परो यस्मात् तस्मिन् खयि (प्रत्याहारे) । **पुंस्कामा**—पुंसि कामो यस्याः सा पुम्+कामा, मकारस्य रुः → विसर्गः → सकारः 'सम्पुंकानाम् ·····' इति वार्तिकेन । अथवा मकारस्य सकार एव । ततः पूर्वस्य उकारस्य विकल्पेन अनुनासिक-अनुस्वारौ ।

नश्छव्यप्रशान् ॥७॥

नान्तस्य पदस्य 'प्रशान्'-वर्जितस्य 'रुः' भवति अम्परे छवि परतः । भवाँश्छादयति / भवांश्छादयति ।

छवि—'छव्' प्रत्याहारे । **भवाँश्छादयति**—भवान् + छादयति नकारस्य रुः → सकारः, तस्य श्चुत्वेन शकारः । पूर्वस्य आकारस्यानुनासिकः । पक्षे अनुस्वारश्च **भवांश्छादयति** ।

अप्रशान् किम् ? **प्रशान् छादयति** ।

उभयथर्क्षु ॥८॥

नान्तस्य पदस्य उभयथा ऋक्षु भवति 'रुः' वा नकारो वा अम्परे छवि परतः । तस्मिंस्त्वा दधाति / तस्मिन् त्वा दधाति ।

उभयथा = विकल्पेन । ऋक्षु = ऋक्-मन्त्रेषु । 'स' जाते तस्य-विसर्ग सकारौ ततः पूर्वस्य अनुस्वारः ।

दीर्घादटि समानपादे ॥९॥

दीर्घात् उत्तरस्य नकारस्य वा 'रुः' भवति अटि परतः । स चेत् 'अट्' नकारश्च समानपादे भवतः । 'ऋक्षु' इति प्रकृतत्वात् ऋक्-पाद इह गृह्यते । देवाँ अच्छा दीव्यत् / देवान् अच्छा दीव्यत् ।

समानपादे—समाने = एकस्मिन् । क्वचिदसमानेऽपि छान्दसत्वाद् भवति । अथवा समानः सदृशपर्यायः । यजामहे यज्ञिया इन्द्र देवाँ इलामहे अत्र अट्-नकारौ भिन्नपादस्थौ स्तः । तथापि भवति नकारय 'रुः' ।

देवान् ......– वृत्तौ नात्र विकल्पः कृतः । तत्रोदाहरणम्–आदित्यान् हवामहे ।

नॄन्पे ॥१०॥

'नॄन्' एतस्य नकारस्य 'रुः' भवति पे परतः । नॄँः पाहि / नॄंः पाहि ।

पे—पकारे । **नॄँःपाहि** नॄन् + पाहि नकारस्य रुत्व-विसर्गौ । केचिदत्रापि 'उभयथा' इति अनुवर्त्य विकल्पं मन्यन्ते—**नॄन् पाहि** ।

स्वतवान्पायौ ॥११॥

'स्वतवान्' इत्यस्य 'रुः' भवति पायु-शब्दे परतः । स्वत॑वाँः पा॒युर॑ग्ने ।

स्वतवान्– स्वं तवः = बलं यस्यासौ । 'स्वतवान्' इति प्रथमान्तं पदम् ।

कानाम्रेडिते ॥१२॥

'कान्' इत्येतस्य नकारस्य 'रुः' भवति, आम्रेडिते परतः । कांस्कान् भोजयति ।

अस्य कस्कादिषु पाठः । तेन 'कुप्वोः......' इत्येतन्न ।

'समः सुटि' इत्यतो वा सकारोऽनुवर्तते स एवात्र विधीयते ।

कांस्कान्—किम् + शस् = कान्, तस्य वीप्सायां द्विर्वचनम् कान् + कान् । पूर्वस्य कान्-नकारस्य रुः → विसर्गः → सकारः । **'समः सुटि' ......विधीयते'**—अस्मिन् पक्षे 'संपुंकानां सो वक्तव्यः' इति वार्तिकस्य बलेन **कांस्कान्** इति द्विसकारकं रूपं बोध्यम् ।

ढो ढे लोपः ॥१३॥

ढकारस्य ढकारे परतो लोपो भवति । लीढम् / मीढम् ।

यद्यपि पदाधिकारः, तथापि तस्यासम्भवात् अपदान्तस्य ढकारस्य अयं लोपो विज्ञायते ।

ष्टुत्वस्यात्र सिद्धत्वम् आश्रयाद् द्रष्टव्यम् ।

'श्वलिड् ढौकते' इत्यत्र जश्त्वे कृते कार्यी नास्ति, इति लोपाभावः । न च 'ढ' लोपो जश्त्वापवादो विज्ञातुं शक्यते, तस्य 'लीढ'—आदिः विषयः सम्भवति ।

तत्र हि श्रुतिकृतम् आनन्तर्यम् अस्ति । शास्त्रकृतम् यत् अनानन्तर्यम्, तद् बाध्यते । 'श्वलिड् ढौकते' इत्यत्र तु न श्रुतिकृतं नापि शास्त्रकृतम् आनन्तर्यम् इत्यविषयोऽयं ढलोपस्य ।

लीढम्—√लिह (आस्वादने) + क्त । सन्धिकार्येण लिढ् + ढ इति स्थिते पूर्वढकारस्य अनेन सूत्रेण लोपे लुप्तात् पूर्वस्य इकारस्य दीर्घः । **मीढम्**—√मिह (सेचने) + क्त ।

यद्यपि ...... विज्ञायते—सत्यपि पदाधिकारे सूत्रस्यानर्थक्येन वर्ण-विधिः स्वीक्रियते । 'ढ' वर्णे परतो 'ढ' वर्णस्य लोपो भवति ।

ष्टुत्वस्य ..... द्रष्टव्यम्—परशास्त्रेणापि 'ष्टुना ष्टुः' इत्यनेन कृतो ढकारः सिद्धो भवति ।

कार्यी—स्थानी 'यस्य कार्यं भवति सः' । श्वलिढ् + ढौकते इति दशायां ढकारस्य जश्त्वेन डकारो भवति इति नास्ति कार्यी ढकारः यस्य लोपः क्रियेत । **लीढः** इत्यादौ सावकाशो 'ढ'-लोपो जश्त्वापवादो न भवितुम् अर्हति । **श्रुतिकृतम्**—श्रूयमाणम् । **शास्त्रकृतम्**—सूत्रेण विहितम् ।

रोरि ॥१४॥

रेफे परतो रेफस्य लोपो भवति । नीरक्तम् । दूरक्तम् ।

अपदान्तस्यापि—अजर्घाः ।

नीरक्तम् – निर् + रक्तम् । रकारस्य लोपे 'ढ्रलोपे.......' इत्यनेन लुप्तात् पूर्वस्य इकारस्य दीर्घः । **दूरक्तम्**—दुर् + रक्तम् । सानुबन्धकस्यापि (रोः) रकारस्य लोपो भवति--अग्निर् + रथः = अग्नी रथः । 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषा तु वर्णग्रहणेषु न प्रवर्तते । **अपदान्तस्यापि**--'पदस्य' इत्यधिकारसूत्रे विशेषणे षष्ठी, तेन पदावयवस्यापि रेफस्य लोपो भवति ।

अजर्घाः--(एकाचो ......८।२।३७) इत्यत्र निरूपितम् । एतत् यङ्लुगन्तस्य √गृध् इत्यस्य लङि → सिपि → रूपम् । अत्र 'रो रि' इत्यनेन पदावयवस्य रेफस्य लोपः, ततः पूर्वस्य अकारस्य दीर्घाकारो भवति ।

खरवसानयोर्विसर्जनीयः ॥१५॥

रेफान्तस्य पदस्य खरि परे अवसाने च विसर्जनीय आदेशो भवति । वृक्षश्छादयति । अवसाने—वृक्षः ।

'खर्-अवसानयोः किम् ? अग्निर्नयति । खरि परतः इह नृकुटचां भवः नार्कुटः । नृपतेः अपत्यं नार्पत्यः इत्यत्र वृद्धेः बहिरंगलक्षणत्वात्तदाश्रयस्य रेफस्य 'असिद्धं बहिरङ्गम्......' इत्यसिद्धत्वात् विसर्जनीयो न भवति ।

अत्र **'पदस्य'** इति वर्तते । **अवसाने** इति विषयसप्तमी अवसान विषये यो रेफः तस्य विसर्गः । अथवा बुद्धिपरिकल्पितं वर्णानां पौर्वापर्यं ज्ञेयम् । **वृक्षश्छादयति**—वृक्षस् → र् (रु) + छादयति । रकारस्य विसर्गे कृते पुनः तस्य सकारः, तस्य च श्चुत्वेन शकारः ।

नार्कुटः—नृकुटी + अण् (भवार्थे) वृद्धौ कृतायां रकारस्य विसर्गः प्राप्नोति । **बहिरङ्गलक्षणत्वात्**—तद्धितम् आश्रित्य भवति वृद्धिः इति सा बहिरङ्गा ।

रोः सुपि ॥१६॥

'रु' इत्येतस्य रेफस्य सुपि परतो विसर्जनीय आदेशो भवति । पयस्सु । यशःसु ।

'सुपि' इति सप्तमीबहुवचनं गृह्यते । सिद्धे सत्यारम्भो नियमार्थः–रोः अन्यत्र न । गीर्षु ।

पयस्सु—पयस् + सुप्। सस्य रुः, तस्य रेफस्य अनेन विसर्गः। पुनः 'वा शरि' इत्यनेन तस्य सकारः। पक्षे **पयःसु**। **यशःसु**—पक्षे **यशस्सु**।

सिद्धे सति—'खरवसानयोः……' इत्यनेन। **गीर्षु**—गिर् + सु। 'र्वोरुपधायाः' इत्यनेन इकारस्य दीर्घः, सुपः सस्य षकारः।

भोभगोअघोअपूर्वस्य योऽशि ॥१७॥

भोस् (भोर्)–भगोस् (भगोर)–अघोस् (अघोर्) इत्येवं पूर्वस्य, अवर्णपूर्वस्य च रोः रेफस्य यकार आदेशो भवति अशि परतः। भो अत्र। भगो अत्र। अघो अत्र। क आस्ते / कयास्ते।

भो अत्र—भोस्-इत्यादयः सान्ताः निपाताः। अवसाने सकारस्य रकारः। रकारस्य यकारे कृते 'ओतो गार्ग्यस्य' इत्यनेन नित्यं यकारस्य लोपः।

कयास्ते—कय् आस्ते। 'लोपः शाकल्यस्य' वैकल्पिको 'य्'–लोपः। लोपपक्षे तु **क आस्ते**। लोपस्य असिद्धत्वात् पुनः दीर्घो न। **भो अत्र** इत्यत्र च पूर्वरूपं न भवति।

व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥१८॥

वकार-यकारयोः भो-भगो-अघो-अवर्णपूर्वयोः पदान्तयोः लघुप्रयत्नतरः आदेशो भवति अशि परतः शाकटायनस्य मतेन। भोयत्र / भो अत्र। भगोयत्र / भगो अत्र। अघोयत्र / अघो अत्र। कयास्ते / क आस्ते। अस्मायुद्धर / अस्मा उद्धर।

लघुप्रयत्नतरः—लघुः प्रयत्नः = उच्चारणे स्थान-करणयोः शैथिल्यम्। स्थानम् = तालवादि। **करणम्** = जिह्वामूलादि तयोः उच्चारण-काले शैथिल्यम्। आदेशयोः आन्तरतम्यात् वकारस्य वकारः, यकारस्य च यकारः एव भवति। लघुप्रयत्नतरे यकारे कृते, पक्षे उत्तरसूत्रेण लोपे रूपद्वयं सिद्ध्यति इति शाकटायनग्रहणं पूजार्थम्।

वकारस्योदाहरणम्—**असावादित्यः** / **असा आदित्यः**।

लोपः शाकल्यस्य ॥१९॥

यकार-वकारयोः पदान्तयोः अवर्णपरयोः लोपो भवति

शाकल्यस्य आचार्यस्य मतेन अशि परतः । क आस्ते / कयास्ते । अस्मा उद्धर / अस्मायुद्धर ।

अस्मा उद्धर—अस्मै + उद्धर । ऐकारस्य आय् । य्-लोपाभावे तस्य श्रवणं भवति **अस्मायुद्धर** । लोपस्य असिद्धत्वाद् गुणो न । शाकल्य-ग्रहणं विकल्पार्थम् ।

ओतो गार्ग्यस्य ॥२०॥

ओकारात् उत्तरस्य यकारस्य लोपो भवति गार्ग्यस्य आचार्यस्य मतेन । भो अत्र । भगो इदम् । अघो इदम् ।

नित्यार्थोऽयमारम्भः । गार्ग्यग्रहणं पूजार्थम् । योऽयम् अलघुप्रयत्नस्य विकल्पेन लोपः क्रियते, सोऽनेन निवर्त्यते ।

योऽयम्……निवर्त्यते—लघुप्रयत्नतरस्तु यकारो भवत्येवेत्यर्थः ।

उञि च पदे ॥२१॥

अवर्णपूर्वयोः व्योः पदान्तयोः लोपो भवति उञि च पदे परतः । स॑ उ एकवि॒शंव॒र्तनिः । स उ एकाग्निः ।

पदे इत्येव—तन्त्र उतम् / तन्त्रयुतम् ।

'लोपः शाकल्यस्य' इत्यनेन सिद्धे नियमार्थमिदम्—उञि पदे एव । **उञ्** इति निपातः ञकारानुबन्धसहितः । **स उ**—सस् + उ सकारस्य रुत्वे यकारे च कृते तस्य लोपः । **एकविंशतिः** इति पाठान्तरम् । **तन्त्र उतम्**—तन्त्रे + उतम् √वेञ् + क्त । एकारस्य 'अय्' यकारस्य विकल्पेन लोपः ।

हलि सर्वेषाम् ॥२२॥

ओतः परस्य, अवर्णात्परस्य च पदान्तस्य यकारस्य लोपो भवति सर्वेषां मतेन । भो हसति । वृक्षा हसन्ति इत्यादि ।

ओतः—वृत्तौ भो-भगो-अघो-परस्य इत्युक्तम् । **इत्यादि**—**भगो हसति । अघो याति । वृक्षा हसन्ति**—वृक्षास् (वृक्ष + जस्) हसन्ति । सकारस्य रुत्वे → यकारे च कृते तस्य लोपः । **सर्वेषाम्** = आचार्याणाम् । तेन शाकटायनाचार्यमतेनापि अत्र लघुप्रयत्नतरो न भवति ।

मोऽनुस्वारः ॥२३॥

हलि मस्य अनुस्वारः स्यात् । तं हसति ।

मः = मस्य = पदान्तस्य मकारान्तस्य । **तं हसति**—तम् + हसति । पदान्तस्यैव, तेनात्र न—**गम्यते** ।

नश्चापदान्तस्य झलि ॥२४॥

नस्य, मस्य च अपदान्तस्य अनुदेशो भवति झलि परतः । पयांसि । यशांसि । आक्रंस्यते ।

पयांसि—पयस् + जस् = पयान् + सि । **आक्रंस्यते**—आ क्रम् + स्यते । **अनुदेशः** = अनुस्वार आदेशः । नकार-मकारौ अपदान्तौ स्तः ।

मो राजि समः क्वौ ॥२५॥

समो मकारस्य मकार आदेशो भवति राजतौ क्विप्-प्रत्ययान्ते परतः । सम्राट् । साम्राज्यम् ।

मकारस्य मकारवचनम् अनुस्वारनिवृत्त्यर्थम् ।

साम्राज्यम्-सम् √राज् + क्विप् = सम्राज् तस्य भावः सम्राज् + ष्यञ् । क्विबन्ते एव मकारस्य मकार एव आदेशः क्रियते । अथवा ष्यञ्-प्रत्ययाधिक्येऽपि क्विप्-प्रत्ययान्तो √राज् अस्त्येवेति बोध्यम् ।

हे मपरे वा ॥२६॥

मकारपरे हकारे परतः मकारस्य मकार आदेशो वा भवति । किम् ह्मलयति ? किं ह्मलयति ?

❀(वा०) यवलपरे यवला वा । य-व-लपरे हकारे मकारस्य य-व-ला यथासंख्यं वा भवन्तीति वक्तव्यम् । कियँ ह्यः / किं ह्यः । किवँ ह्वलयति / किं ह्वलयति ? किलँ ह्लादयति / किं ह्लादयति ।

य-व-लाः—आदेशभूताः एते आन्तरतम्यात् सानुनासिकाः एव भवन्ति । किम् + ह्यः = **कियँ् ह्यः** इत्यादि । पक्षे मकारस्य अनुस्वारः । एवं वँ्-लँ् इत्यपि बोध्यौ ।

मपरे—मः = मकारः परो यस्मात् तस्मिन् हे = हकारे । **किं ह्मलयति** (√ह्मल् चलने + णिच् + लट् → तिप्) ।

नपरे न ॥२७॥

नकारपरे हे परतो मकारस्य वा नकार आदेशो भवति । किन् ह्नुते / किं ह्नुते ।

नपरे—नः परो यस्मात् स तस्मिन् । **किन् ह्नुते**—किम् + ह्नुते ।

ङ्णोः कुक्टुक् शरि ॥२८॥

पदान्तयोः ङकार-णकारयोः 'कुक्-टुक्' एतौ आगमौ वा भवतः शरि परतः । प्राङ्क्षष्ठः / प्राङ्षष्ठः । सुगण्ट् षष्ठः । सुगण् षष्ठः ।

पूर्वान्तकरणं 'प्राङ्क् छेते' इत्यत्र छत्वार्थम् । 'शश्छोटि' इति हि पदान्ताज्झयः इति तद् विज्ञायते ।

सूत्रे **ङ्णोः** = ङश्च णश्च इति ङ्णौ तयोः । **कुक्-टुक्**—उकारः उच्चारणार्थः ककारश्च कित् सन् अन्त्यावयवभूतागमार्थः ।

प्राङ्क्षष्ठः—प्राङ् + षष्ठः ङकारस्य कुक् कित्त्वात् अन्ते भवति प्राङ्क् षष्ठः क् + ष् = क्ष ।

पूर्वान्तकरणम्……विज्ञायते—प्राङ् + शेते कुक् आगमे प्राङ्क् + शेते । अत्र पूर्वान्तावयवस्य ककारस्य झय्-प्रत्याहारान्तर्गतत्वात् तस्मात्परस्य शकारस्य छकारो भवति **प्राङ्क्छेते** ।

डः सि धुट् ॥२९॥

पदान्ताद् डकारादुत्तरस्य सकारादेः पदस्य वा धुट्-आगमो भवति । श्वलिट्त्साये / श्वलिट्साये ।

परादिकरणं 'नपदान्ताट्टोरनाम्' इति ष्टुत्व-प्रतिषेधार्थम् ।

डः पञ्चम्यन्तं पदम् डकारात्। सि—सप्तम्यन्तं पदम् 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति 'डः' इत्यत्र पञ्चमीबलेन षष्ठयन्तं प्रकल्प्यते, धुतस्यैव 'तट्' भवति स तु टित्त्वात् आदौ भवति तथा च पदादौ आगमः टकारो न पदान्तः। तथा पदान्तात्परस्य तस्य न ष्टुत्वम्।

नश्च ॥३०॥

नकारात् उत्तरस्य सस्य वा धुट्-आगमो भवति। भवान् त्साये / भवान् साये।

धुटश्चर्त्वस्य चासिद्धत्वात् 'नश्छव्यप्रशान्' इति रुत्वं न।

भवान्त्साये—भवान्+साये सकारस्य धुट् भवान् ध् साये। 'खरि च' इति धकारस्य तकारः, स रुत्व-विधौ असिद्धो भवति इति रुत्वं न।

शि तुक् ॥३१॥

नकारस्य पदान्तस्य शकारे परतो वा तुक्-आगमः। भवाञ्च्छेते। भवाञ्छेते।

पूर्वान्तकरणं छत्वार्थम्। यद्येवं 'कुर्वञ्छेते' इत्यत्र नकारस्यापदान्तत्वात् णत्वं प्राप्नोति। तत्र समाधिम् आहुः—'स्तोः श्चुना श्चुः' इत्यत्र योगविभागः क्रियते—(१) णत्वप्रतिषेधार्थम् 'स्तोः श्चुना' णकारो न भवति। ततः (२) श्चुः।

भवाञ्च्छेते—भवान्+शेते तुकि कृते भवान् त् शेते। 'स्तोः श्चुना श्चुः' इति पूर्वं तकारस्य चकारः, ततः नकारस्यापि ञकारः। 'शश्छोऽटि' इत्यनेन शकारस्य छकारः। पक्षे **भवाञ्छेते**। **कुर्वञ्छेते**—कुर्वन्+शेते इति स्थितौ 'तुक्' तस्य पूर्वान्तावयवत्वात्तस्मात्परस्य शकारस्य छत्वं विधीयते। असति तस्मिन् 'स्तोः श्चुना श्चुः' इति नकारस्य ञकारः। तत्रैव योगविभागात् णत्वनिषेधोऽपि सिद्ध्यति। **समाधिम्**=समाधानम्।

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥३२॥

ह्रस्वात् परो यो 'ङम्' तदन्तात्पदात् उत्तरस्याचो 'ङमुट्' आगमो भवति नित्यम्। प्रत्यङ्ङास्ते। सुगण्णीशः। कुर्वन्नास्ते।

'परमदण्डिना' इत्यत्र 'ङमुट्' न भवति । 'उञि च पदे' इत्यतः सप्तम्यन्तं 'पदे' इत्यनुवर्तते, तेन अजादौ पदे 'ङमुट्' भवति ।

ङम्—प्रत्याहारः । ङ्-ण्-न् इति वर्णानाम् ग्रहणं भवति । **ङमुट्**—ङम् (ङ्-ण्-न्) + उट् इत्यस्य प्रत्येकं योगः ङुट्-णुट्-नुट् । उकारः उच्चारणार्थः, टकारः अचः पूर्वावयवत्वनिर्धारणार्थः । **प्रत्यङ्ङास्ते**—प्रत्यङ् + आस्ते । ङुट्—आगमः । **सुगण्णीशः**—णुट् । **कुर्वन्नास्ते**—नुट् । **परमदण्डिना**—दण्डिन् + आ । 'आ' नास्ति पदम् ।

मय उञो वो वा ॥३३॥

मयः उत्तरस्य उञो वा वकारः आदेशो भवति अचि परतः । शम्वस्तु वेदिः / शमु अस्तु वेदिः । तद्वस्य रेतः / तदु अस्य रेतः ।

प्रगृह्यत्वात् 'उञ्' इत्यस्य प्रकृतिभावे प्राप्ते वकारो विधीयते । तस्य असिद्धत्वात् हलि मोऽनुस्वारो न भवति ।

मयः—'मय्' प्रत्याहारः 'ञमङणनम्' इत्यस्य मकारात् आरभ्य 'कपय्' इत्यस्य 'य्' पर्यन्तानां वर्णानां ग्रहणं भवति । **प्रगृह्यत्वात्**—'उञः' इत्यनेन 'प्रगृह्य' संज्ञा-विधानात् । अतएव यण्-सन्धिना न गतार्थमेतत् ।

विसर्जनीयस्य सः ॥३४॥

विसर्जनीयस्य सकारो भवति खरि परतः । वृक्षश्छादयति ।

वृक्षस् (सु विभक्तिः) + छादयति, सकारस्य रुत्वविसर्गौ वृक्षः छादयति पुनः विसर्गस्य सकारः; श्चुत्वेन शकारश्च = **वृक्षश्छादयति** । ष्टुत्वे कृते **वृक्षष्टीकते** । सकारमात्रस्योदाहरणम्—बालकः + तरति = **बालकस्तरति** ।

शर्परे विसर्जनीयः ॥३५॥

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीय आदेशो भवति । शशः क्षारम् । अद्भिः प्सातम् ।

'न' इति वाच्ये इदं वचनं तद्विकारबाधनार्थम् । जिह्वा-मूलीय-उपध्मानीयौ न भवतः ।

न…… भवतः—विसर्जनीयस्य स्थाने सकारस्य प्रतिषेधे सति परिशेषात् कवर्गे परतो विसर्जनीयस्य ⌣⌢ (जिह्वामूलीयः) पवर्गे च उपध्मानीयः स्यात् ।

वा शरि ॥३६॥

विसर्जनीयस्य शरि परतो वा विसर्जनीयः । वृक्षः शेते / वृक्षश्शेते । वृक्षः षण्डे । वृक्षष्षण्डे । वृक्षः साये / वृक्षस्साये ।

❁ (वा०) खर्परे शरि वा लोपो वक्तव्यः । वृक्षाः स्थातारः / वृक्षा स्थातारः / वृक्षास्स्थातारः ।

वा विसर्जनीयः—पक्षे सकारः **वृक्षस्साये** । तस्य श्चुत्वयोगे शकारः **वृक्षश्शेते,** ष्टुत्वयोगे षकारः **वृक्षष्षण्डे** ।

वा लोपः—पक्षे विसर्ग-सकारौ इति रूपत्रयं बोध्यम् ।

कुप्वोः ⌣⌢ क ⌣⌢ पौ च ॥३७॥

कवर्ग-पवर्गयोः परतो विसर्जनीयस्य क्रमाद् जिह्वामूलीय-उपध्मानीयौ भवतः । चकाराद् विसर्जनीयश्च । वृक्षः ⌣⌢ करोति / वृक्षः करोति । वृक्षः ⌣⌢ खनति / वृक्षः खनति । वृक्षः ⌣⌢ पचति / वृक्षः पचति । वृक्ष ⌣⌢ फलति / वृक्षः फलति ।

जिह्वामूलीयः—कवर्गे परे विसर्गः अर्धविसर्गो भवति ⌣⌢ इत्येतद्रूपः । एवम् पवर्गे परे स एव **उपध्मानीयः** कथ्यते । सूत्रे ⌣⌢ क- ⌣⌢ पौ इत्यत्र क-पौ उच्चारणार्थौ । आदेशौ ⌣⌢ इति रूपौ जिह्वामूलीय-उपध्मानीयौ ।

सोऽपदादौ ॥३८॥

सकार आदेशो भवति विसर्जनोयस्य कुप्वोः अपदाद्योः परतः पाश-कल्प-क-काम्येषु । यशस्पाशम् । पयस्कल्पम् । पयस्कम् । पयस्काम्यति ।

'अपदादौ' इति किम् ? पयः कामयते ।

सूत्रे **अपदादौ** इति 'कुप्वोः' इत्यस्य विशेषणम् । व्यत्ययेन एकवचनं ज्ञेयम् । **यशस्पाशम्**—यशस् + पाशप् 'याप्ये पाशप्' इत्यनेन । **पयस्कल्पम्**—पयस् + कल्पम् 'ईषदसमाप्तौ......' इत्यनेन । **पयस्कम्**—पयस् + कम् 'प्रागिवात्कः' इत्यनेन ।

पयस्काम्यति—'काम्यच्च' इत्यनेन पयस् + काम्यच् = पयस्काम्य + लट् → तिप् । सर्वत्र स् → रु → विसर्गः → सकारः इति क्रमः ।

पयः कामयते—अत्र कामयते इति पृथक् पदम् ककारश्च तस्यादौ वर्तते । **पाश-कल्प-क-काम्येषु**—सम्भवप्रदर्शनम् न परिगणनम् । कौमुद्यां तु पृथग्वार्तिकमुक्तम् ।

❋(वा०) सोऽपदादौ इत्यनव्ययस्य । इह न भवति-प्रातः कल्पम् ।

❋(वा०) रोः एव काम्ये । इह मा भूत्—गीः काम्यति । अत्र रेफस्य विसर्गः ।

इणः षः ॥३९॥

इण उत्तरस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः अपदाद्योः परतः पाश-कल्प-क-काम्येषु । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति ।

अपदादौ इत्येव—सर्पिः करोति ।

सर्पिष्करोति—पूर्वेण सकारे प्राप्ते षकारो विधीयते । इत उत्तरम् इणः परो यो विसर्गः तस्य 'ष' भवति, अन्यत्र 'सः' ।

नमस्पुरसोर्गत्योः ॥४०॥

एतयोः गतिसंज्ञयोः विसर्जनीयस्य सकार आदेशो भवति । नमस्कर्ता । पुरस्कर्ता ।

गत्योः इति किम् ? पूः । पुरौ । पुरः ।

'नमः' इत्यस्य 'साक्षात्प्रभृतीनि च' तथा 'पुरः' इत्यस्य 'पुरोऽव्ययम्' इत्यनेन 'गति' संज्ञा भवति ।

इदुदुपधस्य चाप्रत्ययस्य ॥४१॥

इकार-उकारोपधस्य च अप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः । निष्कृतम् । दुष्कृतम् । बहिष्कृतम् । आविष्कृतम् ।

'अप्रत्ययस्य' किम् ? अग्निः करोति ।

वृत्तौ सम्भव प्रदर्शनं कृतम्—निर्-दुर्-बहिर्-आविस्-चतुर्-प्रादुस् । एषामेव विसर्गस्म षकारो भवति । **चतुष्कपालम्** । **प्रादुष्कृतम्** इत्यपि उदाहरणीये स्तः ।

❀ (वा) पुम्मुहुसोः प्रतिषेधो वक्तव्यः । **पुंस्कामा** । **मुहुस्कामा** ।

तिरसोऽन्यतरस्याम् ॥४२॥

'तिरस्' इत्यस्य अन्यतरस्यां विसर्जनीयस्य सकार आदेशो भवति कुप्वोः परतः । तिरस्कर्ता / तिरः कर्ता ।

'गतेः' इत्येव । नेह—**तिरः कृत्वा** काण्डं गतः । 'तिरस्' इत्यस्य 'तिरोऽन्तर्धौ' इत्यनेन गति-संज्ञा भवति । अत्र तु अन्तर्धिः न विवक्षितेति न गति-संज्ञा ।

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥४३॥

द्विस्-त्रिस्-चतुर्, इत्येषां कृत्वोऽर्थे वर्तमानानां विसर्जनीयस्य षकार आदेशोऽन्यतरस्यां भवति कुप्वोः परतः । द्विष्करोति / द्विः करोति । त्रिष्पचति / त्रिः पचति । चतुष्करोति / चतुः करोति ।

'कृत्वोऽर्थे' इति किम् ? चतुष्कण्टकम् । पूर्वेण नित्यं षत्वं भवति ।

कृत्वोऽर्थः—कृत्वसुचः अर्थः । 'कृत्वसुच्' इति प्रत्ययः क्रियायाः अभ्यावृत्तिगणने बोध्यः । **पूर्वेण**—'इदुदुपधस्य···· ' इत्यनेन ।

इसुसोः सामर्थ्ये ॥४४॥

इस्–उस् इत्येतयोः विसर्जनीयस्य अन्यतरस्यां षकार आदेशो भवति सामर्थ्ये सति कुप्वोः परतः । सर्पिष्करोति / सर्पिः करोति । यजुष्करोति / यजुः करोति ।

'सामर्थ्ये' इति किम् ? तिष्ठतु सर्पिः पिब त्वम् उदकम् । 'सामर्थ्यम्' इह व्यपेक्षा न पुनः एकार्थीभावः, उभयं वा ।

सर्पिः— इस्-प्रत्ययान्तः, **यजुः**—उस्-प्रत्ययान्तः ।

सर्पिष्करोति—सर्पिः साधनं करोति इति साध्यां क्रियाम् अपेक्षते । एवं यजुः अपि ।

व्यपेक्षा—'समर्थः पदविधिः' इति परिभाषाबलेन सामर्थ्ये लब्धे पुनः सामर्थ्य-ग्रहणम् अभीष्टस्य व्यवस्था-लक्षणस्यैव सामर्थ्यस्य परिग्रहाय नैकार्थीभावलक्षणस्य नाप्युभयोः । तेन समासे न भवति । **तिष्ठतु...... उदकम्**—अत्र 'सर्पिः' इत्यस्य 'पिब' इत्यनेन सामर्थ्यं नास्ति व्यपेक्षायाः अन्योऽन्याश्रयसम्बन्धस्य अभावात् । 'पिब' इत्यस्य उदकेन सह व्यपेक्षारूपः सम्बन्धोऽस्ति ।

नित्यं समासेऽनुत्तरपदस्थस्य ॥४५॥

समासे इस्-उसोर्विसर्जनीयस्य अनुत्तरपदस्थस्य नित्यं षकार आदेशो भवति कुप्वोः परतः । सर्पिष्कुण्डिका । धनुष्कपालम् ।

'अनुत्तरपदस्थस्य' इति किम् ? परमसर्पिः कुण्डिका ।

सर्पिष्कुण्डिका—सर्पिषः कुण्डिका इति षष्ठीतत्पुरुषः । **परमसर्पिः कुण्डिका**—अत्र 'सर्पिः' उत्तरपदस्थम् अस्ति ।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥४६॥

अकारात् उत्तरस्य अनव्ययविसर्जनीयस्य समासेऽनुत्तर-पदस्थस्य सकार आदेशो भवति 'कृ'-आदिषु परतः । अयस्कारः ।

पयस्कारः । अयस्कामः । पयस्कामः । अयस्कंसः । अयस्कुम्भः । पयस्पात्रम् । अयस्कुशा । अयस्कर्णी ।

'अतः' इति किम् ? गीःकारः ।

'अनव्ययस्य' इति किम् ? स्वःकारः ।

'समासे' इत्येव । नेह—यशः करोति ।

'अनुत्तरपदस्थस्य' इत्येव । नेह—परमयशःकामः ।

'कुप्वोः ≍क ≍पौ च' इत्यस्यापवादः । √कृ—√कम-इत्येतौ धातू गृह्येते, अन्येषां स्वरूपम् । **अयस्कारः**—अयस् √कृ + अण् । **अयस्कामः**—अयस् √कम + अण् । उभयत्र उपपदसमासः । **अयस्कंसः**—इत्यादयः षष्ठीतत्पुरुषाः । अयसः कंसः = लघुजल-पात्रम् । **अयस्कुम्भः**—अयसो विकारः कुम्भः । मध्यमपदलोपी समासः । कुशा = रज्जुः । **अयस्कर्णी**—अयः इव कर्णौ यस्याः सा ।

अधःशिरसी पदे ॥४७॥

एतयोः विसर्जनीयस्य सकार आदेशो भवति पदे परतः । अधस्पदम् । शिरस्पदम् । मयूरव्यंसकादित्वात्समासः ।

पदे—'पद' शब्दे । स्वरूपग्रहणम् अत्र बोध्यम् । **अधस्पदम्**—पदस्य अधः इति विग्रहः । 'मयूरव्यंसकादयश्च' इति समासः । **शिरस्पदम्**—अत्र षष्ठीतत्पुरुषः ।

कस्कादिषु च ॥४८॥

'कस्कः' इत्येवमादिषु च विसर्जनीयस्य सकारः षकारो वा यथायोगं भवति कुप्वोः परतः । कस्कः । कौतस्कुतः—कुतः आगतः इति अण् । भ्रातुष्पुत्रः । कांस्कान् ।

सर्पिष्कुण्डिका-आदीनां कस्कादिषु पाठः उत्तरपदस्थस्यापि षत्वं यथा स्यात् इति पारायणिका आहुः ।

यथायोगम्—इणः परस्य विसर्गस्य षकारः, अन्यत्र सकारः । **कस्कः**—'कः' इत्यस्य वीप्सायां द्विर्वचनम् कः + कः । **कौतस्कुतः**—कुतः—

किम् + पञ्चम्यास्तसिल् द्वित्वे सति कुतः कुतः + अण् आगतेऽर्थे = पूर्वस्याचो वृद्धिः । **भ्रातुष्पुत्रः**—भ्रातुः + पुत्रः समासे 'ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यनेन षष्ठ्याः अलुक् । एवं **शुनस्कर्णः** । **सद्यस्कालः** इत्यादिः ।

सर्पिष्कुण्डिका—'नित्यं समासेऽनुत्तरपदस्थस्य' इत्यनेन सिद्धे षत्वे पुनः उत्तरपदस्थस्यापि सर्पिषः षत्वार्थम् इति आहुः **पारायणिकाः** – पारायणं द्विविधम्—धातुपारायणम् नामपारायणं च तेन दीव्यन्ति = व्यवहरन्ति ये ते । अर्थात् तेषां मते **परमसर्पिष्कुण्डिका** इति सिद्धः प्रयोगः । भाष्ये वृत्तौ च **परमसर्पिःकुण्डिका** इति प्रत्युदाहरणं दत्तम् । अतः तयोर्नाभिमतः पाठः इति ।

छन्दसि वाऽप्राम्रेडितयोः ॥४९॥

छन्दसि विषये विसर्जनीयस्य वा सकार आदेशो भवति कुप्वोः परतः । 'प्र' शब्दम् आम्रेडितं च वर्जयित्वा । अयस्पात्रम् / अयः पात्रम् । विश्वतस्पात्रम् / विश्वतः पात्रम् ।

अप्राम्रेडितयोः इति किम् ? अग्निः प्र विद्वान् । परुषः परुषस्परि ।

अयस्पात्रम्—अयसः (विकारः) पात्रम् इति षष्ठीतत्पुरुषः ।

कः करत्करतिकृधिकृतेष्वनदितेः ॥५०॥

कः–करत्–करति–कृधि–कृत, इत्येतेषु परतः अनदितेः विसर्जनीयस्य सकार आदेशो भवति छन्दसि विषये । विश्वतस्कः । अयस्करत् । सुपेशस्करति । उरु णस्कृधि । अधस्कृतम् । नेह– अदितिः करत् ।

कः—√कृञ्–लुङ् । **करत्**—√कृञ् + लङ् । **करति**—√कृञ् + लट् । **कृधि**—√कृञ् + लोट् । **कृतम्**—√कृञ् + क्त । **सदस्कृतम्**—सदसि कृतम् । 'सप्तमी' इति योगविभागात् समासः ।

पञ्चम्याः परावध्यर्थे ॥५१॥

पञ्चमी-विसर्जनीयस्य सकार आदेशो भवति परौ परतः

अध्यर्थे । दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवतस्परि । दिवस्परि । महतस्परि ।

नेह—दिबस्पृथिव्याः पर्योज उद्भृतम् ।

परौ—'परि' शब्दे । **अध्यर्थे**—अधिकरणार्थे=उपरि भावार्थे । **दिवस्परि**—'दिवः उपरि' इत्यर्थः । **दिवस्पृथिव्याः**—अत्र 'परि' सर्वतोभावार्थकः ।

पातौ च बहुलम् ॥५२॥

पातौ परतः पञ्चमी-विसर्जनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये । दिवस्पातु । राज्ञस्पातु । न च भवति—

परिषदः पातु ।

पातौ—'पातु' इति लोडन्तानुकरणम् अथवा 'पाति' इति √पा इत्यस्य शितपा निर्देशः ।

षष्ठयाः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥५३॥

एषु परतः षष्ठीविसर्जनीयस्य सकार आदेशो भवति छन्दसि विषये । पति—वाचस्पतिं विश्वकर्माणमूतये । पुत्र—दिवस्पुत्राय सूर्याय । पृष्ठ—दिवस्पृष्ठे धावमानं सुपर्णम् । पार—अगन्म तमसस्पारम् । पद—इडस्पदे समिध्यसे । पयस्—सूर्यं चक्षुर्दिवस्पयः । पोष—रायस्पोषम् ।

'षष्ठ्याः' इति किम् ? मनुः पुत्रेभ्यो दायं व्यभजत् ।

वाचस्पतिम्—'तत्पुरुषे कृति बहुलम्' इति षष्ठ्याः अलुक् । एवं **दिवस्पुत्राय, दिवस्पृष्ठे, तमसस्पारम्, इडस्पदे, दिवस्पयः** तथा **रायस्पोषम्,** इत्येतेषु पूर्वं पदम् 'दिवः' इत्यादि षष्ठ्यन्तमस्ति ।

इडाया वा ॥५४॥

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतः छन्दसि । इडायास्पतिः / इडायाः पतिः ।

एवम् इडायास्पुत्रः / इडायाः पुत्रः इत्यादि ।

अपदान्तस्य मूर्धन्यः ॥५५॥

'अपदान्तस्य' इति, 'मूर्धन्यः' इति चैतद् अधिकृतं वेदितव्यम् आपादसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामः, अपदान्तस्य मूर्धन्यो भवति । वक्ष्यति—'आदेशप्रत्यययोः' सिषेव । सुष्वाप । अग्निषु ।

'अपदान्तस्य' किम् ? अग्निस्तत्र । 'ष' इत्येव सिद्धे मूर्धन्यग्रहणं ढकारार्थम् । अकृढ्वम् । चकृढ्वे ।

मूर्धन्यः—मूर्धनि (स्थाने) भवः मूर्धन् + यत् । 'ऋटुरषाणां' स्थानं मूर्धा इत्येते मूर्धन्याः वर्णाः । आन्तरतम्यात् सकारस्य मूर्धन्यः उभयोः ऊष्मवर्णत्वात् षकारः, अनुप्रदानस्य धकारस्य च घोषवत्त्वात् महाप्राणवत्त्वाच्च मूर्धन्यो ढकारो भवति ।

सहेः साडः सः ॥५६॥

साड्भूतस्य सहेः यः सकारः, तस्य मूर्धन्यादेशो भवति । जलाषाट् । तुराषाट् ।

साड्रूपस्य—√सह इत्यस्य 'ण्वि' प्रत्ययान्तं 'साड्' इति रूपम्, तस्य । **जलाषाड्**—जलं सहते इति जल √सह + ण्वि । उपधायाः वृद्धिः । जलस्यान्त्याकारस्य 'अन्येषामपि दृश्यते' इति दीर्घः ।

इण्कोः ॥५७॥

इत ऊर्ध्वं यद्वक्ष्यामः, 'इणः, कवर्गाच्च' इत्येवं तद्वेदितव्यम् । वक्ष्यति—'आदेशप्रत्यययोः' इति । सिषेव । सुष्वाप । कर्तृषु । गोषु । नौषु । गीर्षु । वाक्षु । त्वक्षु ।

'इण्कोः' इति किम् ? दास्यति ।

इण्कोः—इण् च कुश्च इति द्वन्द्वः एकवद्भावेनैकवचनम् । षष्ठ्यन्तं

रूपम् । अत्र 'इण्' प्रत्याहारः परेण णकारेण स्वीक्रियते, तथैव व्याख्यानात् । कोः उदाहरणे **वाक्षु**—वाक्+सु । तथा **त्वक्षु**—त्वक् + सु ।

नुम्विसर्जनीयशर्व्यवायेऽपि ॥५८॥

नुम्-व्यवाये, विसर्जनीय-व्यवाये तथा शर्-व्यवायेऽपि इण्कोः उत्तरस्य सकारस्य मूर्धन्यादेशो भवति । सर्पींषि । यजूंषि । सर्पिःषु । सर्पिष्षु ।

नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः । तेन निसेर्न भवति—निंस्से । निंस्स्व । अत्र हि नुमा सकारेण च व्यवायः ।

व्यवायः—व्यवधानम् । शर्—प्रत्याहारः श्-ष्-स् इति । नुम्-व्यवायस्योदाहरणम्—**सर्पींषि**—सर्पिस् + जस् नुम्—आगमः । **निंस्से**—√णिसि (चुम्बने) + लट् → थास् → से नुम्-आगमः । अत्र नुम्-शर् इत्युभयस्य व्यवधानमस्ति ।

आदेशप्रत्यययोः ॥५९॥

'आदेश-प्रत्यययोः' इति षष्ठी भेदेन सम्बध्यते । आदेशो यः सकारः, प्रत्ययावयवो यः सकारः, तस्य 'इण्कोः' उत्तरस्य मूर्धन्यादेशो भवति । आदेशस्य तावत्—सिषेच । सुष्वाप । प्रत्ययस्य—अग्निषु ।

भेदेन—विषयभेदेन आदेशेन सह सामानाधिकरण्येन, प्रत्ययेन सह अवयवावयविभावेनेत्यर्थः । तदा अयमर्थः—आदेशो यः ...... प्रत्ययावयवो यः........भवति । **सिषेच**—√षिचिर् (क्षरणे) + लिट् । 'धात्वादेः षः सः' इति षकारस्य सः । तत्र उत्तरस्य सकारस्य अनेन षकारः । **सुष्वाप**—ञिष्वप् (शये) + लिट् ।

अग्निषु—अग्नि + सुप् प्रत्ययावयवस्य सकारस्य षकारः ।

शासिवसिघसीनां च ॥६०॥

एषां च इण्कोः उत्तरस्य सकारस्य मूर्धन्यो भवति । अन्व-

शिषत् । शिष्टः । शिष्टवान् । उषितः । उषितवान् । जक्षतुः । जक्षुः । अनादेशार्थं वचनम् । घसिः यद्यपि आदेशः सकारस्तु आदेशो न भवति ।

'इण्कोः' इत्येव–शास्ति । वसति । जघास ।

अन्वशिषत्—अनु √शास् + लुङ् → तिप् च्लेः अङ् । 'शास इदङ्हलोः' इति आकारस्य 'इत्वम्' सकारस्य च षकारः । **शिष्टः**–√शास् + क्त । **उषितः**—√वस + क्त । वकारस्य सम्प्रसारणम् उकारः । **जक्षतुः**—√अद + लिट् → अतुस् । 'अद' इत्यस्य 'घस्लृ' आदेशः ।

यद्यपि 'घस' इत्यस्य आदेशत्वात् 'आदेशप्रत्यययोः' इत्यनेनैव मूर्धन्यः सिद्धः तथापि 'सकारः' तु नैव आदेशः इति **अनादेशार्थम्** सूत्रम् अस्ति ।

स्तौतिण्योरेव षण्यभ्यासात् ॥६१॥

स्तौतेः ण्यन्तानाञ्च 'षत्व' भूते सनि परतः अभ्यासात् इणः उत्तरस्य सकारस्य मूर्धन्यादेशो भवति । तुष्टूषति । ण्यन्तानाम्–सिषेचयिषति । सुष्वापयिषति ।

सिद्धे सति आरम्भो नियमार्थः–स्तौतिण्योः एव षणि अभ्यासाद् यथा स्यात् । अन्यत्र मा भूत् । सिसिक्षति । सुसूषति ।

एवकारः इष्टतोऽवधारणार्थः । स्तौतिण्योः षण्येव इति विज्ञायमाने 'तुष्टाव' इत्यत्र न स्यात् । इह च स्यादेव–सिसिक्षति ।

स्तौतेः—√ष्टुञ् (स्तुतौ) इत्यस्य । **षत्वभूते**—षत्वं प्राप्ते कृतषत्वे इत्यर्थः । **तुष्टूषति**–√ष्टुञ् + सन् + लट् → ति । अत्र तुकारात् परस्य सकारस्य षत्वम् । एवं ण्यन्तानां √णिच्–√ष्वप् इत्यादीनामपि षणि (कृतसकारे सन्-प्रत्यये) अभ्यासात्परस्य षत्वं बोध्यम् । सनः सकारस्य षकारस्तु 'आदेशप्रत्यययोः' इत्यनेन भवति ।

एवकारः ......इष्टतोऽवधारणम् अस्ति–स्तौतिण्योः एव षणि नान्यस्य । तदभावे स्तौतिण्योः षण्येव इति नियमोऽपि कदाचित् स्यात् । तेन **तुष्टाव** इत्यत्र न स्यात् **सिसिक्षति** इत्यत्र च स्यात् इत्यनिष्टम् आपतेत् ।

सः स्विदिस्वदिसहीनां च ॥६२॥

स्विदि–स्वदि–सहि, एषां ण्यन्तानां षत्वभूते सनि परतः अभ्यासात् उत्तरस्य सकारस्य 'स' आदेशो भवति । सिस्वेदयिषति । सिस्वादयिषति । सिसाहयिषति । सस्य 'स'-वचनं मूर्धन्यप्रतिषेधार्थम् ।

√ञिष्विदा (गात्रप्रक्षरणे)—√ष्वद (आस्वादने) √षह (मर्षणे) इति एते षकारादयः । 'धात्वादेः षः सः' इति षकारस्य सकारो विहितः तथा च एषु प्रयोगेषु 'आदेशप्रत्यययोः' इति षकारे प्राप्ते, सस्य 'स' विधानम् आवश्यकम् ।

प्राक्सितादड्व्यवायेऽपि ॥६३॥

'सेवसित' इति वक्ष्यति । प्राक् सित-संशब्दनात् यान् इतः ऊर्ध्वम् अनुक्रमिष्यामः तत्र अड्-व्यवायेऽपि मूर्धन्यो भवति इत्येवं तद् वेदितव्यम् । वक्ष्यति–'उपसर्गात्सुनोति……'

अभिषुणोति । निषुणोति ।

प्राक् सितसंशब्दनात्—'परिनिविभ्यः सेवसित' इत्यतः प्राक् । **अड्व्यवायेऽपि**—अपिना अव्यवधानेऽपि । **अभिषुणोति**–अव्यवधानस्यैतत् उदाहरणम् । अड्व्यवायस्य–**अभ्यषुणोत्** ।

स्थादिष्वभ्यासेन चाभ्यासस्य ॥६४॥

'स्थासेनयसेधसि……' इति वक्ष्यति । तत्र स्थादिषु प्राक् सित-संशब्दनात् यान् इतः उर्ध्वम् अनुक्रमिष्यामः, तत्र अभ्यासेन व्यवायेऽपि मूर्धन्यो भवति इत्येवं तद् वेदितव्यम् । अभ्याससकारस्य भवति इति च ।

अभ्यासेन व्यवाये—परितष्ठौ ।

अषोपदेशार्थं वचनम्–अभिषिषेणयिषति । परिषिषेणयिषति ।

अवर्णान्ताभ्यासार्थं च–अभितष्ठौ ।

स्थासेन......अनुक्रमिष्यामः—'उपसर्गात्सुनोति......' इत्यत्रस्थ 'स्था' शब्दम् आरभ्य 'परिनि.........सेवसित' इत्यत्रस्थ 'सित' इत्यतः प्राक् ये धातवो निर्दिष्टाः ते ।

परितष्ठौ—परि √स्था + लिट् । अत्र अभ्यास-तकारस्य व्यवधानेऽपि सस्य षकारो भवति । **अभिषिषेणयिषति**—सेनया अभियाति इति अभिसेना + णिच् + सेनि + सन् । अत्र 'सेना' इति नामधातुः न षोपदेशः अत्रापि भवति षत्वम् । एवम् अवर्णान्ताभ्यासेऽपि—**अभितष्ठौ** ।

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसन्जस्वन्जाम् ॥६५॥

एषां सकारस्य उपसर्गस्थनिमित्तात्परस्य षकार आदेशो भवति ।

सुनोति—अभिषुणोति । परिषुणोति । अभ्यषुणोत् ।

सुवति—अभिषुवति । अभ्यषुवत् ।

स्यति—अभिष्यति । अभ्यष्यत् ।

स्तौति—अभिष्टौति । अभ्यष्टौत् ।

स्तोभति—अभिष्टोभते । अभ्यष्टोभत ।

स्था—अभिष्ठाष्यति । अभ्यष्ठास्यत् । अभितष्ठौ ।

सेनय—अभिषेणयति । अभ्यषेणयत् । अभिषिषेणयिषति ।

सेध—अभिषेधयति । अभ्यषेधयत् । अभिषिषेधयिषति ।

सिच—अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषक्षति ।

सन्ज—अभिषजति । अभ्यषजत् । अभिषिषङ्क्षति ।

स्वन्ज—अभिष्वजते । अभ्यष्वजत । अभिषिष्वङ्क्षते । परिषिष्वङ्क्षते ।

'उपसर्गात्' इति किम् ? दधि सिञ्चति । निर्गताः सेचकाः अस्माद् देशात् इति निःसेचको देशः । नायं सिचेः उपसर्गः ।

सुनोति—√षुञ् (अभिषवे) । **सुवति**—√षु (प्रेरणे) **स्यति**—√षो (अन्तकर्मणि) **स्तौति**—√ष्टुञ् (स्तुतौ) । **स्तोभति**—√ष्टुभ (स्तम्भे)। √**स्था**—(गतिनिवृत्तौ) । √**सेनय**—(सेना+णिच्) । **सेध**—√षिध् (गत्याम्), √षिधू (शास्त्रे, माङ्गल्ये च) द्वयोर्ग्रहणम् । **सिच**—√षिचिर् (क्षरणे)। **सन्ज**—√षन्ज (सङ्गे) । **स्वन्ज**—√ष्वन्ज (परिष्वङ्गे) इति धातूनां रूपाणि उदाहृतानि ।

दधि सिञ्चति—'सात्पदाद्योः' इति षत्वप्रतिषेधः । **निःसेचकः**—अत्र √गम् क्रियया निसो योगः, न √सिच् क्रियया । यम्प्रति क्रियायुक्ताः प्रादयः, तम्प्रत्येव गत्युपसर्गसंज्ञाः भवन्ति ।

खदिरप्रतेः ॥६६॥

सदेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति । निषीदति । विषीदति । न्यषीदत् । निषसाद ।

'अप्रतेः' इति किम् ? प्रतिसीदति ।

निषीदति—नि√षद्लृ (विशरणाद्यर्थेषु) + लट् → ति । 'पाघ्राध्मा ......' सूत्रेण सदेः 'सीद' आदेशः । **निषसाद**—√षद्लृ + लिट् → तिप् णल् । 'सदिस्वञ्जोः परस्य लिटि' इत्यनेन प्रतिषेधात् अभ्यासात्परस्य सस्य मूर्धन्यो न ।

स्तन्भेः ॥६७॥

स्तन्भेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति । अभिष्टभ्नाति । परिष्टभ्नाति ।

'अप्रतेः' इति नानुवर्तते प्रतिष्टभ्नाति ।

स्तन्भिः (√स्तम्भु) **सौत्रः**—सूत्रे पठितो धातुः । **अभिष्टभ्नाति**—√स्तन्भ + लट् → तिप् । 'स्तन्भुस्तुन्भु......' इत्यादिना 'श्ना' प्रत्ययः । 'अनिदिताम्' इति नकारस्य लोपः । **प्रतिष्टभ्नाति**—**बाहुप्रतिष्टम्भविवृद्धमन्युः**' (रघुवंश-द्वितीयसर्गे) ।

अवाच्चालम्बनाविदूर्ययोः ॥६८॥

'अव'-उपसर्गादुत्तरस्य स्तम्भेः सकारस्य मूर्धन्यादेशो भवति,

आलम्बने, आविदूर्ये चार्थे । आलम्बनम् = आश्रयः । अविदूरस्य भावः आविदूर्यम् । आलम्बने—अवष्टभ्यास्ते ।

आविदूर्ये—अवष्टब्धा शरत् ।

'आलम्बनाविदूर्ययोः' इति किम् ? अवस्तब्धो वृषलः शीतेन । अनिगर्थ आरम्भः ।

अविदूरम्—न विदूरम् = विप्रकृष्टम् । नातिनिकटम्, नातिदूरम् इत्यर्थः । **अवष्टभ्य**—आश्रित्य । **अवष्टब्धा**—आसन्ना । अव √स्तन्भ + क्त । **अवस्तब्धः** = पीडितः । **अनिगर्थ आरम्भः**—इगन्तत्वाभावेन उपसर्गस्थ-निमित्ताभावेन च पूर्वसूत्रेणाप्राप्तेः ।

वेश्च स्वनो भोजने ॥६९॥

'वेः' उपसर्गात् अवात् चोत्तरस्य भोजनेऽर्थे स्वनतेः मूर्धन्य आदेशो भवति । विष्वणति । व्यष्वणत् । विषष्वाण । अव-ष्वणति । अवाष्वणत् । अवषष्वाण ।

नेह—विस्वनति मृदङ्गः ।

विष्वणति—अत्र भोजनविषयकं स्वननं वर्तते । सशब्दं भुङ्क्ते इत्यर्थः । धातूनाम् अनेकार्थत्वात् अत्र √स्वन भोजन क्रियायां वर्तते । **विस्वनति**—शब्दं करोति । नात्र भोजनार्थः ।

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥७०॥

परि·नि·विभ्यः परेषाम् एषां सस्य मूर्धन्यादेशो भवति ।

√सेव—परिषेवते । पर्यषेवत । परिषिषेविषते ।

√सित—निषितः । विषितः ।

√सय—निषयः । विषयः ।

√सिवु—परिषीव्यति । पर्यषीव्यत् / पर्यसीव्यत् ।

√सह—परिषहते । पर्यषहत / पर्यसहत ।

सुट्—परिष्करोति । पर्यष्करोत् / पर्यस्करोत् ।

√ष्टु—परिष्टौति । पर्यष्टौत् / पर्यस्तौत् ।

√स्वन्ज—परिष्वजते । पर्यष्वजत / पर्यस्वजत ।

स्तु—स्वन्जोर्ग्रहणम् उत्तरार्थम् । '…अड्व्यवायेऽपि' इति विभाषा यथा स्यात् ।

सेव—√षेवृ-√सेवृ (सेवने) इत्युभयोर्ग्रहणम् । **सित**—√षिञ् (बन्धने) + क्त इत्यस्य ग्रहणम् । **सय**—√षिञ् + अच् अस्य ग्रहणम् । **सिवु**—√षिवु (तन्तुसन्ताने) दिवादिः । **सुट्**—'सुट् कात्पूर्वः' इति गृह्यते । **पर्यसीव्यत्**—वक्ष्यमाणेन सूत्रेण अड्व्यवाये विकल्पो भवति । **परि-नि-वि**-व्यस्तेभ्यो भवति न समस्तेभ्यः ।

सिवादीनां वाऽड्व्यवायेऽपि ॥७१॥

सिव-आदीनाम् अड्व्यवायेऽपि परि-नि-विभ्यः उत्तरस्य सकारस्य वा मूर्धन्यादेशो भवति । तथा चैवोदाहृतम् ।

सिवादयः—पूर्वसूत्रे पठिताः 'सिवु-सह-सुट्-स्तु-स्वञ्ज' इति । **उदाहृतम्**—पर्यषीव्यत् / पर्यसीव्यत् इत्यादयः ।

अनुपर्यभिनिविभ्यः स्यन्दतेरप्राणिषु ॥७२॥

अनु-परि-अभि-नि-वि, एभ्यः उत्तरस्य स्यन्दतेः सकारस्य वा मूर्धन्यादेशो भवति अप्राणिषु । अनुष्यन्दते तैलम् / अनुस्यन्दते तैलम् । परिष्यन्दते / परिस्यन्दते । अभिष्यन्दते / अभिस्यन्दते । निष्यन्दते / निस्यन्दते । विष्यन्दते / विस्यन्दते ।

अप्राणिषु किम् ? अनुष्यन्दते मत्स्यः उदधौ । प्राण्यप्राणि-विषये स्यन्दतेरयं षत्वविकल्पो भवति—अनुष्यन्दते मत्स्योदकम् । 'अप्राणिषु' इति पर्युदासोऽयं न प्रसज्य प्रतिषेधः ।

स्यन्दतेः—√स्यन्दू (प्रस्रवणे) आत्मनेपदी । अषोपदेशत्वात् अप्राप्तं षत्वं विकल्पेन विधीयते । **प्राण्यप्राणि……प्रतिषेधः**—पर्युदासे सति प्राण्यप्राणिसमुदायः प्राणिभिन्नः इति द्वयोः संयोगे भवति षत्वम् । प्रसज्य प्रतिषेधार्थे तु प्राणि-गन्धेऽपि न स्यात् ।

वेः स्कन्देरनिष्ठायाम् ॥७३॥

वेः उपसर्गात् उत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यादेशो भवति । न तु निष्ठायाम् । विष्कन्ता / विस्कन्ता । विष्कन्तुम् / विस्कन्तुम् । विष्कन्तव्यम् / विस्कन्तव्यम् ।

'अनिष्ठायाम्' इति किम् ? विस्कन्नः ।

स्कन्देः—√स्कन्दिर् (गति-शोषणयोः) अषोपदेशः । **स्कन्ता**—√स्कन्द + तृच् संयोगान्तस्य दकारस्य लोपः । **अनिष्ठायाम्** इति पर्युदासात् कृत्येव इदं प्रवर्तते । **विस्कन्नः**—स्कन्द + क्त 'अनिदिताम्……' इति नकारस्य लोपे 'रदाभ्याम्……' इति पूर्वदकारस्य क्त-तकारस्य चोभयोः नकारौ भवतः ।

परेश्च ॥७४॥

परेः उपसर्गात् उत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यादेशो भवति । परिष्कन्ता / परिस्कन्ता । परिष्कन्तुम् / परिस्कन्तुम् ।

पृथग्योगकरणात् इदं ज्ञायते—'अनिष्ठायाम्' इति नानुवर्तते । परिष्कण्णः / परिस्कन्नः ।

परिष्कण्णः—परि √स्कन्द + क्त । षकारे कृते पूर्वं नकारस्य 'अट्कुप्वाङ्……'इति णत्वम् । उत्तरनकारस्य ष्टुत्वेन णत्वम् ।

परिस्कन्दः प्राच्यभरतेषु ॥७५॥

'परिस्कन्दः' इति मूर्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । पूर्वेण मूर्धन्यः प्राप्तः, तदभावो निपात्यते । परिस्कन्दः ।

प्राच्यभरतेषु किम् ? पूर्वेण विकल्पः । परिष्कन्दः / परिस्कन्दः ।

परिस्कन्दः—परि √स्कन्द + अच् । **प्राच्यभरतेषु**—प्राच्याः भरताश्च गोत्रवाचिनः शब्दाः ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥७६॥

अनयोः सस्य निस्-नि-वि, एभ्यः उत्तरस्य वा मूर्धन्यादेशो भवति । निःष्फुरति / निःस्फुरति इत्यादि ।

अनयोः√स्फुर–√स्फुल (सञ्चलने) । **निःष्फुरति**—पक्षे विसर्गस्य सकारे तस्य च षकारे **निष्ष्फुरति** । **निस्स्फुरति** इत्यपि । **इत्यादि**—**निष्फुरति / निस्फुरति** । **निष्ष्फुलति** / **निस्स्फुलति** । **विष्फुरति** / **विस्फुरति** ।

वेः स्कभ्नातेर्नित्यम् ॥७७॥

वेः परस्य स्कभ्नातेः सस्य मूर्धन्यादेशो नित्यं भवति । विष्कभ्नाति । विष्कम्भिता ।

√स्कन्भ सौत्रो धातुः अषोपदेशः । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ।

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥७८॥

इण्-अन्तात् अङ्गात् उत्तरेषां षीध्वम्-लुङ्-लिटां यो धकारः, तस्य मूर्धन्यादेशो भवति । च्योषीढ्वम् । प्लोषीढ्वम् । लुङ्—अच्योढ्वम् । अप्लोढ्वम् । लिट्—चकृढ्वे । ववृढ्वे ।

इण्-ग्रहणं कवर्गनिवृत्त्यर्थम्—पक्षीध्वम् ।

च्योषीढ्वम्—√च्युङ् + आशिषि लिङ् सीयुट्-आगमः । **मूर्धन्यः**-ध्वम्-धकारस्य ढकारः । **प्लोषीढ्वम्**—√प्लुङ् + आशीर्लिङ् । **चकृढ्वे**—√कृञ् + लिट् → ध्वम् । **ववृढ्वे**—√वृञ् + लिट् → ध्वम् ।

कवर्गनिवृत्त्यर्थम्—तेन **पक्षीध्वम्**—√पच् + आशिषिलिङ् इत्यत्र धकारस्य ढकारो न ।

विभाषेटः ॥७९॥

इणः उत्तरो य इट्, ततः उत्तरेषां षीध्वम्–लुङ्–लिटां धकारस्य विभाषा मूर्धन्यादेशो भवति । लविषीढ्त्वम् / लवि–

षीध्वम् । लुङ्—अलविढ्वम् / अलविध्वम् । लिट्—लुलविढ्वे / लुलविध्वे ।

अत्र अनुवृत्तम् **'इणः'** इति पदम् **'इटः'** इत्यस्य **'इटः'** इति **'षीध्वम्'—आदीनाम्**, ते च धकारस्य विशेषणानि इति ज्ञेयम् । इटो भक्तत्वेन श्रुतिकृतम् आनन्तर्यम् एवात्र सम्भवति । क्वचित् पूर्वेण प्राप्ते क्वचित् अप्राप्ते विकल्पार्थं सूत्रम् । **लविषीढ्वम्**—√लूञ् (छेदने) + आशिषि लिङ् → ध्वम् । सीयुट्-आगमः ।

समासेऽङ्गुलेः सङ्गः ॥८०॥

अङ्गुलि-शब्दात् उत्तरस्य सङ्ग-सकारस्य मूर्धन्यादेशो भवति समासविषये प्रयोगे । अङ्गुलिषङ्गः ।

समासे किम् ? अङ्गुलेः सङ्गः ।

सूत्रे **सङ्गः** इति षष्ठ्यर्थे प्रथमा । **अङ्गुलिषङ्गः**—अङ्गुलेः सङ्गः इति षष्ठीतत्पुरुषः । एवम् अङ्गुलिषु सङ्गो यस्याः सा अङ्गुलिषङ्गा यवागूः ।

भीरोः स्थानम् ॥८१॥

भीरु-शब्दात् उत्तरस्य स्थान-सकारस्य मूर्धन्यादेशो भवति समासविषये । भीरुष्ठानम् ।

'समासे' इति किम् ? भीरोः स्थानम् ।

भीरुष्ठानम्—मूर्धन्ये जाते तत्संयोगेन थकारस्य ष्टुत्वेन ठकारः ।

अग्नेः स्तुत्स्तोमसोमाः ॥८२॥

अग्नेः उत्तरेषां स्तुत्-स्तोम-सोम, इत्येतेषां सकारस्य मूर्धन्यादेशो भवति समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ ।

❀(वा०) अग्नेर्दीर्घात् सोमस्य 'षः' इष्यते । नेह—अग्नि-सोमौ माणवकौ ।

अग्निष्टुत्—अग्निः स्तूयते यत्र सः क्रतुविशेषः । अग्नि √ष्टु + अधिकरणे क्विप् । मूर्धन्ये कृते ष्टुत्वेन तकारस्य टकारः ।

अग्निष्टोमः—अग्नेः स्तोमः षष्ठीतत्पुरुषः 'अग्निष्टोमः' सोमयागस्य प्रथमा संस्था ।

अग्नीषोमौ—अग्निश्च सोमश्च द्वन्द्वः 'ईदग्नेः सोमवरुणयोः' इति अग्नेः इकारस्य 'ईत्' ।

इदम् ईत्त्वं देवताद्वन्द्वे एव भवति । तेनेह न—**अग्निसोमौ माणवकौ** ।

ज्योतिरायुषः स्तोमः ॥८३॥

ज्योतिस्–आयुस्, आभ्याम् उत्तरस्य स्तोम-सकारस्य मूर्धन्यादेशो भवति समासे । ज्योतिःष्टोमः । आयुःष्टोमः ।

ज्योतिःष्टोमः—ज्योतिषः स्तोमः इति षष्ठी-तत्पुरुषः । 'शर्व्यवायेऽपि' इत्यधिकारात् अत्र षत्वम् । ज्योतिसः सकारस्य रुत्व-विसर्गौ, स्तोम—तकारस्य च ष्टुत्वेन टकारः । 'वा शरि' इति पक्षे सकारस्य, तस्य च षकारः इति **ज्योतिष्ष्टोमः** । एवम् पक्षे **आयुष्ष्टोमः** इत्यचि । वृत्तौ तत्त्वबोधिनी-सहित कौमुद्यां च एकषकारको **ज्योतिष्टोमः**, **आयुष्टोमः** इति चिन्त्यम् ।

मातृपितृभ्यां स्वसा ॥८४॥

मातृ-पितृ, इत्याभ्याम् उत्तरस्य स्वसृ-सकारस्य मूर्धन्यादेशो भवति । मातृष्वसा । पितृष्वसा ।

मातृष्वसा—मातुः स्वसा षष्ठीतत्पुरुषः । एवं **पितृष्वसा** ।

मातुःपितुर्भ्यामन्यतरस्याम् ॥८५॥

मातुः-पितुः, इत्येताभ्याम् उत्तरस्य स्वसृ-सकारस्य अन्यतरस्यां मूर्धन्यादेशो भवति । मातुःष्वसा / मातुःस्वसा । पितुःष्वसा / पितुःस्वसा । मातुः, पितुः इति रेफान्तयोः एव ग्रहणम् । एकदेशविकृतस्यानन्यत्वात् विसर्जनीयान्तात् सकारान्ताच्च षत्वं भवति ।

'समासे' इत्येव । वाक्ये तु मातुःस्वसा इत्येव नित्यं भवति ।

मातुःष्वसा षष्ठीतत्पुरुषे कृते 'विभाषा स्वसृपत्योः' इति षष्ठ्याः अलुक् । **रेफान्तयोः एव**—रेफान्तस्योत्तरपदस्य ग्रहणेन तत्साहचर्यात् । रकारस्य विसर्गे तस्य च पाक्षिके सकारे कृतेऽपि एकदेशविकृतन्यायमाश्रित्य षत्वं भवत्येव । 'वा शरि' इति विकल्पेन पक्षे **मातुष्ष्वसा । मातुस्स्वसा** इति रूपद्वयमधिकं वेद्यम् एवं पितुष्ष्वसा । पितुस्स्वसा ।

अभिनिसः स्तनः शब्दसंज्ञायाम् ॥८६॥

अभि-निस् इत्येतस्मात् उत्तरस्य स्तनः सकारस्य मूर्धन्यादेशो भवति शब्दसंज्ञायां गम्यमानायाम् । अभिनिष्टानो वर्णः । अभिनिष्टानो वर्णः । अभिनिष्टानो विसर्जनीयः ।

'शब्दसंज्ञायाम्' इति किम् ? अभिनिस्स्तनति मृदङ्गः ।

अभि-निस्—उपसर्गसमुदायात् परस्य षत्वं भवति न व्यस्ताभ्याम्, ततः शब्दसंज्ञाया अद्योतनात् । **अभिनिष्टानः** = अभिनिस्स्तन्यते अनेन इति अभि-निस् √स्तन (शब्दे) + घञ् । प्रादिसमासः **अभिनिष्टानः** वर्णमात्रस्य विसर्गस्य च संज्ञा । वृत्तौ विकल्पम् उक्तम् परं कौमुद्याम् एकमेव रूपं मतम् ।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥८७॥

उपसर्गस्य इणः प्रादुस्-शब्दात् चोत्तरस्य यकारपरस्य, अच्परस्य च अस्तेः सकारस्य मूर्धन्यः स्यात् । अभिषन्ति । निषन्ति । प्रादुःषन्ति । अभिष्यात् । प्रादुःष्यात् ।

सूत्रे **यच्परः** · यश्च अच् च यचौ तौ परौ यस्यात्सः √अस् इत्यस्य सकारः इति । **अभिषन्ति**—अभि + सन्ति ।

प्रादुःष्यात्—प्रादुस् + स्यात् विसर्गस्य सत्त्वपक्षे **प्रादुष्ष्यात्** ।

सुविनिदुर्भ्यः सुपिसूतिसमाः ॥८८॥

सु-वि-निर्-दुर्, एभ्यः सूपि-सूति-सम, एषां सस्य मूर्धन्यादेशो भवति ।

सुपि—सुषुप्तः / विषुप्तः । निःषुप्तः / दुःषुप्तः ।

सूति—सूषूतिः / विषूतिः । निःषूति / दुःषूतिः ।

सम—सुषमः / विषमः । निःषमः / दुःषमः ।

सुपेः षत्वं स्वपेर्माभूत् विसुष्वापेति केन न ।

हलादिशेषान्न सुपिः इष्टं पूर्वं प्रसारणम् ।।१।।

स्थादोनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।

अनर्थके विषुषुपुः सुपि भूतो द्विरुच्यते ।।२।।

'पूर्वत्रासिद्धीयमद्वित्वे' इति कृते षत्वे द्विर्वचनम् ।

सुपि—√स्वप् इत्यस्य कृतसम्प्रसारणस्य रूपम् । तेनात्र न **सुस्वापः** । ननु **विसुष्वाप** इत्यत्र केन कथं षत्वम् । अत्र हलादिशेषे कृते सुपिः नास्ति । यदि 'विव्याध' इत्यादि सिद्धये पूर्वविप्रतिषेधेन सम्प्रसारणम् इष्टमस्ति तदनन्तरं हलादिशेषे पकारस्य निवृत्त्या नास्ति 'सुपिः' ।

अथ 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति नियमेन स्थादीनामेव अभ्यासस्य षत्वं प्रवर्तते नान्येषाम् इति **विसुष्वाप** इत्यत्र षत्वं न भवतीति न समाधानम् तस्य नियमस्य प्राक् सितादेव प्रवृत्तेः । 'सुपि' तु सितादुत्तरोऽस्ति ।

अत्र 'अर्थवद् ग्रहणे नानर्थकस्य ग्रहणम्' इति परिभाषा तु नाश्रयितव्या तर्हि **विषुषुपुः** इति न सिद्ध्यति, अत्रापि 'सुपि' अनर्थकः । अतः **विषुषुपुः** इत्यत्र सुपि कृते ततो द्विर्वचनम् इति न दोषः । तथा च वि√स्वप् + लिट्→झि→उस् पूर्वं सम्प्रसारणं सुप् अनेन षत्वम्, तदनन्तरं द्वित्वम् । द्विर्वचने कर्तव्ये षत्वम् असिद्धं न भवति ।

निनदीभ्यां स्नातेः कौशले ।।८९।।

नि-नदीभ्याम् उत्तरस्य स्नातेः सकारस्य मूर्धन्यादेशः कौशले गम्यमाने । निष्णातः कटकरणे । नद्यां स्नातीति नदीष्णः । तत्र प्रवीणः इत्यर्थः । 'सुपि स्थः' इत्यत्र 'सुपि' इति योगविभागात् 'क' प्रत्ययः ।

'कौशले' इति किम् ? निस्नातः । नद्यां स्नातो नदीस्नातः ।

कौशलम् = नैपुण्यम् । **नदीष्णः**—नदी √स्ना + क । **नदीस्नातः**—'सप्तमी शौण्डैः' इत्यत्र 'सप्तमी' इति योगविभागात् समासः ।

सूत्रं प्रतिष्णातम् ॥६०॥

'प्रतिष्णातम्' इति निपात्यते सूत्रं चेत् । प्रतिष्णातं सूत्रम् । शुद्धम् इत्यर्थः ।

प्रतिष्णातम्—प्रति √स्ना + क्त । अन्यत्र **प्रतिस्नातम्** ।

कपिष्ठलो गोत्रे ॥६१॥

'कपिष्ठलः' इति निपात्यते गोत्रविषये । कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः । अन्यत्र कपीनां स्थलं कपिस्थलम् ।

गोत्रम् इह संज्ञाशब्दः प्रवराध्याये पठितः । यत्र आद्यः पुरुषो 'गोत्रम्' उच्यते । **कपिष्ठलः**—कपिः इव स्थलः उपमितसमासः ।

प्रष्ठोऽग्रगामिनि ॥६२॥

'प्रष्ठः' इति निपात्यते अग्रगामिनि । प्रतिष्ठते इति प्रष्ठो गौः । प्रष्ठः अश्वः । अग्रतो गच्छति इत्यर्थः ।

नेह—प्रस्थे हिमवतः पुण्ये । प्रस्थो व्रीहीणाम् ।

प्रष्ठः—प्र √स्था + क । **अग्रगामी** = पुरःसरः ।

वृक्षासनयोर्विष्टरः ॥६३॥

'विष्टरः' इति निपात्यते वृक्षे, आसने चाभिधेये । विष्टरो वृक्षः आसनं वा । नेह—विस्तरः ।

विष्टरः—विस्तीर्यते इति वि √स्तॄञ् (आच्छादने) + अप् । **विस्तरः**—प्रसारः ।

छन्दोनाम्नि च ॥६४॥

छन्दोनाम्नि च 'विष्टारः' इति निपात्यते । वि-पूर्वात्

स्तृणातेः 'छन्दोनाम्नि च' इति 'घञ्' विहितः इति 'विष्टरः' इति प्रकृते 'विष्टारः' इति विज्ञायते। विष्टारपङ्क्तिश्छन्दः। विष्टारो बृहती छन्दः।

छन्दोनाम्नि--अत्र छन्दः = गायत्री प्रभृति न वेदः। तत्र सूत्रे **विष्टारः** इति घञन्तः साध्यते। तेनात्रापि 'विष्टारः' एव निपात्यते।

छन्दोनाम्नि इति किम्? पटस्य विस्तारः।

गवियुधिभ्यां स्थिरः ॥९५॥

गवि-युधि, आभ्यां परस्य स्थिर-सकारस्य मूर्धन्यादेशो भवति। गविष्ठिरः। युधिष्ठिरः। एतस्मादेव ज्ञापकात् 'गो' शब्दात् सप्तम्याः अलुक्।

स्थिरः—√स्था + किरच्। **युधिष्ठिरः**—'संज्ञायाम्' इति सप्तमी-तत्पुरुषः। हलदन्तात् सप्तम्याः संज्ञायाम्' इति सप्तम्याः अलुक्।

विकुशमिपरिभ्यः स्थलम् ॥९६॥

एभ्यः उत्तरस्य स्थल-सकारस्य मूर्धन्यादेशो भवति। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्।

स्थलम्—√स्थल + अच्। **विष्ठलम्**—'कुगति प्रादयः' इति समासः। मूर्धन्ये कृते ष्टुत्वेन थकारस्य ठकारः। **शमिष्ठलम्**—शमीनां स्थलम् इति तत्पुरुषः। 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति शम्याः ईकारस्य ह्रस्वः।

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमे-बर्हिर्दिव्यग्निभ्यः स्थः ॥९७॥

एभ्यः उत्तर'स्थ'शब्द-सकारस्य मूर्धन्यादेशः। अम्बष्ठः। आम्बष्ठः। गोष्ठः। भूमिष्ठः। सव्येष्ठः। आपष्ठः। द्विष्ठः। त्रिष्ठः। कुष्ठः। शेकुष्ठः। शङ्कुष्ठः। अङ्गुष्ठः। मञ्जिष्ठः। पुञ्जिष्ठः परमेष्ठः। बर्हिःष्ठः। दिविष्ठः। अग्निष्ठः।

❀ (वा०) स्थास्थिन्स्थॄणामिति वाच्यम् । सव्येष्ठाः । परमेष्ठी । सव्येष्ठृ सारथिः ।

एभ्यः—अम्ब-आम्ब-गो-भूमि-सव्य-आप (अप)-द्वि-त्रि-कु-शेकु-शङ्कु-अङ्गु-मञ्जि-पुञ्जि-परमे-बर्हिस्-दिवि-अग्नि इति शब्देभ्यः ।

अम्बष्ठः—अम्ब √स्था + क । प्रायः सर्वत्र 'क' प्रत्ययो बोध्यः । **आपष्ठः**—अपष्ठः इत्यत्र 'अन्येषामपि दृश्यते' इति पूर्वाकारस्य दीर्घः । वृत्तौ **अपष्ठः** इति पाठो दृश्यते । **बर्हिःष्ठः**—बर्हिषः सकारस्य रुत्वविसर्गौ । विसर्गस्य सकारपक्षे तस्यापि षत्वम्—**बर्हिष्ष्ठः** इति ।

परमेष्ठी—परमे √स्था + इनि 'परमे स्थः किच्च' इत्यनेन । कित्त्वात् आकारलोपः । सप्तम्याः अलुक् । **सव्येष्ठृ**—सव्ये √स्था + ऋ 'सव्ये स्थश्छन्दसि' इत्यनेन । सौ विभक्तौ **सव्येष्ठा** । **सव्येष्ठाः**—क्विप्-प्रत्ययान्तम् ।

सुषामादिषु च ॥६८॥

सुषामादिषु च सस्य मूर्धन्यादेशः । शोभनं साम अस्य सुषामा । निष्षामा । निष्षेधः । सुषेधः ।

'सु' शब्दस्य कर्मप्रवचनीयत्वाद् निर्-दुरोश्च क्रियान्तर-विषयत्वात् अनुपसर्गत्वे सति पाठोऽयम् 'सेधतेर्गतौ' इति प्रति-षेधबाधनार्थः ।

❀ (वा०) गौरिषक्थः संज्ञायाम् । 'ङ्यापोः संज्ञाछन्दसो-र्बहुलम्' इति पूर्वपदस्य ह्रस्वत्वम् । प्रतिष्णिका । 'प्रतिष्णा' शब्दात् अयं 'कन्' प्रत्ययः ।

दुष्षामा—दुस् = दुर्गतं साम अस्य । सकारस्य रुत्वविसर्गौ । पुनः 'वा शरि' इति सकारे षत्वे च । पक्षे **दुःषामा** ।

निष्षेधः—निर्गतः सेधः इति गति समासः । **क्रियान्तर-विषयत्वात्**—निर्-दुर् इत्युभौ उपसर्गौ √गमि-क्रियां प्रति स्तः, न तु √सिध्-क्रियाम् प्रति इत्येषां पूर्वसूत्रैः अप्राप्तं षत्वं विधीयते । एवं **सुषन्धिः** । **दुष्षन्धिः** । **सुष्ठु** । **दुष्ष्ठु** ।

प्रतिष्णिका--प्रतिस्नाति इति प्रति √स्ना + क = प्रतिष्णा + संज्ञायां कन् 'प्रत्ययस्थात्·····' इति इत्वम् ।

एति संज्ञायामगात् ॥९९॥

एकारपरस्य सकारस्य मूर्धन्यो भवति इण्कोः उत्तरस्य अगकारात् संज्ञायाम् । हरिषेणः । वारिषेणः ।

संज्ञायां किम् ? पृथुसेनः ।

अगात् किम् ? विष्वक्सेनः ।

एति--एकारपरस्य → एकारः परो यस्मात्तस्य । **सेना** इत्यत्र एकारपरः सकारो वर्तते **हरिषेणः**—हरयः = वानराः सेना यस्य सः । **वारिषेणः**—वारिणि सेना यस्य सः । वृत्तौ (पूर्वमुद्रिते ग्रन्थे) कौमुद्याञ्च गणसूत्रमिदम् पाणिनीयाष्टके पठितं वर्तते । **विष्वक्सेनः**—चर्त्वस्यासिद्धत्वाद् गकारः एवात्र बोध्यः ।

नक्षत्राद्वा ॥१००॥

एति संज्ञायाम् अगात् मूर्धन्यो वा भवति । रोहिणीषेणः / रोहिणीसेनः । भरणीषेणः / भरणीसेनः ।

अगात् इत्येव—शतभिषक्सेनः ।

अविहितलक्षणो मूर्धन्यः सुषामादिषु द्रष्टव्यः ।

अविहित·····द्रष्टव्यः—आकृतिगणोऽयम् इति भावः ।

ह्रस्वात्तादौ तद्धिते ॥१०१॥

ह्रस्वात् उत्तरस्य सस्य मूर्धन्यो भवति तकारादौ तद्धिते परतः । तरप्-तमप्-तय-त्व-तल्-तस्-त्यपः ।

तरप्-तमप्-सर्पिष्टरम् । यजुष्टरम् । सर्पिष्टमम् । यजुष्टमम् ।

तय—चतुष्टयम् । त्व-तल्-सर्पिष्ट्वम् । सर्पिष्टा ।

तस्—सर्पिष्टः । त्यप्-आविष्टयो' वर्धते ।

ह्रस्वात् किम् ? गीस्तरा ।

तादौ किम् ? सर्पिस्साद् भवति ।

तद्धिते किम् ? सर्पिस्तरति ।

❀ (वा०) तिङन्तस्य प्रतिषेधः । भिन्द्युस्तराम् ।

तरप् ......त्यपः—एते तकारादयः तद्धितप्रत्ययाः षत्वस्य निमितानि भवन्ति । **चतुष्टयम्**—चतुर् + तयप् रकारस्य-विसर्गः→सकारः→षकारः । **सर्पिष्टा**—सर्पिस् + तल् तलन्तं स्त्रियामेव इति सर्पिष्ट + टाप् । **आविष्टचः**—आविस् + त्यप् 'अव्ययात्त्यप्' इत्यनेन । सर्वत्र षकारे कृते तकारस्य ष्टुत्वं टकारः । **भिन्द्युस्तराम्**—√भिद् + विधिलिङ् → झि → जुस्, यासुट्-आगमः भिन्द्युस् + तरप् + आम् ।

निसस्तपतावनासेवने ॥१०२॥

निसः सकारस्य मूर्धन्यो भवति तपतौ परतः अनासेवने अर्थे । आसेवनम् = पुनः पुनः करणम् । निष्टपति ; सकृत् अग्निं स्पृशति इत्यर्थः ।

'अनासेवने' इति किम् ? निस्तपति । पुनः पुनः अग्निं स्पृशतीत्यर्थः ।

निष्ट॑प्तं॒ रक्षो॒ निष्ट॑प्ता॒ अरा॑तयः । इत्यत्र सदप्यासेवनं न विवक्ष्यते । छान्दसो वा वर्णविकारः ।

निष्टपति—निस् + √तप (धूपसन्तापे) + लट् → ति । निसः सकारस्य रुत्व-विसर्गौ, पुनः सः तस्य षत्वं ष्टुत्वञ्च । वृत्तौ **सुवर्णम्** तथा **स्पृशति** इत्यस्य स्थाने **स्पर्शयति** इति वर्तते । एवं प्रत्युदाहरणेऽपि ।

सदपि ...न विवक्ष्यते—विवक्षैव शास्त्रप्रवृत्तेः कारणमित्यर्थः । कस्याञ्चिद्वेदशाखायां **निस्तप्तम्** इत्येव पाठो दृश्यते । **वर्णविकारः**—छन्दसि व्यत्ययेन सकारस्य स्थाने षकारः प्रयुक्तः इति ।

युष्मत्तत्तक्षुःष्वन्तः पादम् ॥१०३॥

युष्मत्-तत्-ततक्षुस्, इत्येषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति, स चेत्सकारोऽन्तःपादं भवति। पादमध्ये भवति इत्यर्थः। युष्मद्-आदेशाः—त्वम्-त्वा-ते-तव। त्वम्—अग्निष्ट्वं नामासीत्। त्वा—अग्निष्ट्वा वर्धयामसि। ते—अग्निष्टे यजमानाय। तव—अप्स्वंग्ने सधिष्टवं।

तत्—अग्निष्टद्विश्वमापृणाति। ततक्षुस्-द्यावापृथिवी निंष्टतक्षुः।

अन्तःपादम् इति किम्? तदग्निस्तदर्यमा।

युष्मद्—युष्मदः आदेशाः तकारादयो गृह्यन्ते। **ततक्षुः**—√तक्ष—लिट् → उस्। **निष्टतक्षुः**—निस् + ततक्षुः। सर्वत्र षकारे सति तकारस्य ष्टुत्वेन टकारः। **तदग्निस्तदर्यमा**—'अग्निस्' पादस्यान्ते वर्तते।

यजुष्येकेषाम् ॥१०४॥

यजुषि विषये एषु परेषु एकेषाम् आचार्याणां मतेन सकारस्य मूर्धन्यो भवति। अर्चिभिष्ट्वम् / अर्चिभिस्त्वम्। अग्निष्टेऽग्रम्। अर्चिभिष्टतक्षुः। पक्षे न।

यजुषि पादाः न सम्भवन्ति इत्यप्राप्तं षत्वं विधीयते। **एकेषाम्**—विकल्पार्थम्। **पक्षे न**—**अग्निस्तेऽग्रम्**। **अर्चिभिस्ततक्षुः**। एवम् **अग्निष्टत्** / **अग्निस्तत्** इत्यपि।

स्तुतस्तोमयोश्छन्दसि ॥१०५॥

'एकेषाम्' इति वर्तते। अनयोः सस्य वा मूर्धन्यादेशो भवति छन्दसि। नृभिष्ष्टुतस्य / नृभिः स्तुतस्य। गोष्टोमम् / गोस्तोमम्।

नृभिष्ष्टुतस्य—पूर्वस्य सस्यापि षत्वे, तकारस्य ष्टुत्वे द्विषकारकं रूपम्। **नृभिः स्तुतस्य**—'वा शरि' इति पक्षे सकारे तस्य षत्वाभावे द्विसकारकं नृभिस्स्तुतस्य इति।

पूर्वपदात् ॥१०६॥

पूर्वपदस्थान्निमित्तात् उत्तरस्य सकारस्य मूर्धन्यो भवति एकेषां मतेन छन्दसि विषये । द्विषन्धिः / द्विसन्धिः । त्रिषन्धिः / त्रिसन्धिः ।

असमासेऽपि । त्रिःषमृद्धत्वाय / त्रिःसमृद्धत्वाय ।

द्विषन्धिः—द्वयोः सन्धिः इति तत्पुरुषः । **असमासेऽपि**—अत्र 'पूर्वपद' शब्दो व्यवस्थायां वर्तते अस्मात् पूर्वं पदम् इति ।

सुञः ॥१०७॥

'सुञ्' इति निपातो गृह्यते । तस्य पूर्वपदस्थान्निमित्तात् उत्तरस्य सकारस्य मूर्धन्यो भवति छन्दसि । अभी षु णः सखी'-नाम् । ऊर्ध्वं ऊ षु णः । 'इकः सुञि' इति दीर्घः । 'नश्च धातु……' इति णत्वम् ।

निपातः—न √सुञ् इत्यस्य, श्तिपा निर्देशाभावात् । **अभी षु णः**—'षु' इत्यस्य मूर्धन्ये 'नः'–नकारस्य 'नश्च धातुस्थोरुषुभ्यः' इत्यनेन णकारः । **ऊ षु णः**—'इकः सुञि' इत्यनेन उकारस्य दीर्घः ।

सनोतेरनः ॥१०८॥

√षणु (दाने), अस्य धातोः अनकारान्तस्य सकारस्य मूर्धन्यादेशो भवति । गोषाः । नृषाः ।

'अनः' इति किम् ? गोसनिं वाचमुदीरयन् । नियमार्थ-मारम्भः ।

गोषाः—गां सनोति इति गो √षणु + विट् । **गोसनि**—गो √षणु + इन । **नियमार्थम्**—अविद्यमाननकारस्यैव भवति ।

सहेः पृतनर्ताभ्यां च ॥१०९॥

पृतना–ऋत, आभ्यां चोत्तरस्य सहेः सकारस्य मूर्धन्यादेशो भवति । पृतनाषाहम् । ऋताषाहम् ।

पृतनाषाहम्—पृतना √षह (मर्षणे) + ण्वि । **ऋताषाहम्**—ऋत √षह + ण्वि । 'अन्येषामपि दृश्यते' इत्यनेन ऋत-अकारस्य दीर्घः ।

चकारोऽनुक्तसमुच्चयार्थः तेन **ऋतीषहम्** इति सिद्धयति ।

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥११०॥

'पूर्वपदात्……' इति प्राप्तिः प्रतिषिध्यते । रेफपरस्य सकारस्य सृपि-आदीनां च मूर्धन्यो न भवति । रपर—विस्रंसिकायाः काण्डं जुहोति । विस्रब्धः कथयति ।

सृपि—पुरा क्रूरस्य विसृपः । सृजि—वाचो विसर्जनात् ।

स्पृशि—दिविस्पृशम् । स्पृहि—निस्पृहं कथयति ।

सवनादीनाम्—सवनेसवने । सूतेसूते । सवनमुखेसवनमुखे । गोसनिगोसनिम् । अश्वसनिमश्वसनिम् । अनुसवनम्अनुसवनम् । किं स्यति इति किंसंकिंसम् इत्यादि ।

'पूर्वपदात्……' इति प्राप्ते प्रतिषेधः । अश्वसनिग्रहणम् अनिणोऽपि षत्वम् भवतीति, ज्ञापनार्थम् । तेन जलाषाहम् । अश्वसाहम् इत्येतद्द्वयं सिद्धं भवति ।

रपरस्य—रः परो यस्मात् (सकारात्) स रपरः (सकारः), तस्य । **विस्रंसिका, विस्रब्धः**—अत्र 'स्र' रपरोऽस्ति अतः षत्व-निषेधः । **विसृपः**—वि √सृप + क्वसुन् ।

अनुसवनम्अनुसवनम्—वीप्सासां द्वित्वम् । **किंसंकिंसम्**—किम् √षो (अन्तकर्मणि) + क । वीप्सायां द्वित्वम् । एवं **सोमेसोमे** । **मुसलंमुसलम्** इत्यादिषु न षत्वं भवति ।

सात्पदाद्योः ॥१११॥

'सात्' इत्येतस्य पदादेश्च मूर्धन्यादेशो न भवति । अग्निसात् । दधि सिञ्चति ।

अग्निसात्—**अग्नि** + साति 'विभाषा साति कात्स्न्र्ये' इत्यनेन । **दधि सिञ्चति**—'आदेशप्रत्यययोः' इत्यनेन प्राप्तं षत्वं निषिध्यते ।

सिचो यङि ॥११२॥

सिचो धातोः सकारस्य यङि परतो मूर्धन्यादेशो न भवति। परिसेसिच्यते।

'उपसर्गात् सुनोति' इति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते न 'सिचो यङि' इति।

यङि इति किम्? अभिषिषिक्षति।

परिसेसिच्यते—परि √सिच + यङ् + लट्। **उपसर्गात्...... इति**—'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषया 'उपसर्गात्सुनोति.........' इत्यस्य प्राप्तिरेव बाध्यते 'न सिचो यङि' इत्यस्य।

सेधतेर्गतौ ॥११३॥

गतौ वर्तमानस्य सेधतेः सकारस्य मूर्धन्यो न भवति। अभिसेधति। परिसेधति।

गतौ किम्? शिष्यम् अकार्यात् प्रतिषेधति।

अभिसेधति—अभि √षिध (गत्याम्) + लट् → ति। वृत्तौ **अभिसेधयति** = कालयति इत्युदाहृतम्। **प्रतिषेधति**—अत्र 'उपसर्गात्सुनोति......' इत्यनेन षत्वम्।

प्रतिस्तब्धनिस्तब्धौ च ॥११४॥

प्रतिस्तब्भ-निस्तब्ध, एतयोर्मूर्धन्याभावो निपात्यते। 'स्तन्भेः' इति प्राप्तं षत्वं निषिध्यते। प्रतिस्तब्धः। निस्तब्धः।

प्रतिस्तब्धः—प्रति √स्तन्भ + क्त।

सोढः ॥११५॥

सहेः 'सोढ्' भूतस्य सकारस्य मूर्धन्यो न भवति। 'परिनिविभ्यः......' इति प्राप्तो निषिध्यते। परिसोढा। परिसोढुम्। परिसोढव्यम्।

सोढ्-भूतस्य ग्रहणं किमर्थम् ? परिषहते ।

सोढः—सोढ् प्रथमैकवचने 'सोड्' तस्य षष्ठयन्तं रूपम् । **परिसोढा**—परि √सह + लुट् वा तृच् ।

स्तन्भुसिवुसहां चङि ॥११६॥

एषां सस्य मूर्धन्यो न भवति चङि परतः । 'स्तन्भेः' इति, 'परिनिविभ्यः……' इति च प्राप्तो मूर्धन्यः प्रतिषिध्यते । अभ्यतस्तम्भत् । पर्यतस्तम्भत् । पर्यसीषिवत् । न्यसीषिवत् । पर्यसीषहत् । न्यसीषहत् ।

❀ (वा०) स्तन्भुसिवुसहां चङ्युपसर्गात् इति वक्तव्यम् । उपसर्गात् या प्राप्तिः, तस्याः प्रतिषेधो यथा स्यात् । अभ्यासात् या प्राप्तिः, तस्याः प्रतिषेधो मा भूत् । तथा चैवोदाहृतम् ।

अभ्यतस्तम्भत्—अभि √स्तन्भ + णिच् + लुङ् च्लेः 'चङ्' अभ्यासेन व्यवधानेऽपि षत्वं प्राप्तं न भवति । **पर्यसीषिवत्, पर्यसीषहत्**—अत्र अभ्यासादुत्तरस्य सकारस्य षत्वं भवति । पूर्वस्य तु अड् व्यवायेऽपि निषेधः । **उदाहृतम्**—पूर्वत्र निषेधः, उत्तरत्र षत्वम् ।

सुनोतेः स्यसनोः ॥११७॥

सुनोतेः सकारस्य स्ये सनि च परतो मूर्धन्यो न भवति । परिसोष्यति । अभिसोष्यति । पर्यसोष्यत् ।

सनि किम् उदाहरणम् ? अभिसुसूषति । नैतदस्ति प्रयोजनम्, तत्र 'स्तौतिण्योरेव षण्यभ्यासात्' इति नियमात् न भविष्यति । इदं तर्हि-अभिसुसूषते । एतदपि नास्ति 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति नियमात् । इदं तर्हि–अभिसुसूषतेः अप्रत्ययः 'अभिसुसूः' इत्युदाहरणम् । अत्र हि 'सन्' ष-भूतो न भवति इत्यभ्यासात् प्राप्तिरस्ति ।

स्य-सनोः इति किम् ? सुषाव ।

पर्यसोष्यत्—परि √षूञ् अभिषवे + लृङ् । स्य-सकारस्य तु भवत्येव षत्वम् । **स्थादिषु ...... नियमात्...** स्थादीनामेव अभ्यासव्यवधाने भवति, नान्येषाम् इति नियमात् । **अप्रत्ययः**—क्विप् । **अभिसुसूः**—अभिसुसूस् इत्यवस्थायाम् 'आदेशप्रत्यययोः' इत्यनेनाभ्यासात्परस्य षत्वप्राप्तिः ।

सदिस्वञ्ज्योः परस्य लिटि ॥११८॥

एतयोः धात्वोः लिटि परतः परस्य सकारस्य मूर्धन्यो न भवति । अभिषसाद । अभिषस्वजे । परिषस्वजे । स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वम् इच्छन्तीति पक्षेऽनुषङ्गलोपः ।

अभिषसाद—अभि √सद + लिट् । परस्य निषेधः, पूर्वस्य तु भवत्येव षत्वम् । **अनुषङ्गः**—नकारः ।

निव्यभिभ्योऽड्व्यवाये वा छन्दसि ॥११९॥

एतेभ्यः उत्तरस्य सकारस्य अड्-व्यवाये छन्दसि विषये वा मूर्धन्यो न भवति । न्यषीदत् पिता नः / न्यसीदत् पिता नः ।

मतुवसोरुञ्जिचेदुपधस्य स्तौतिण्योर्भीरोर्ह्स्वात्तादावूनविंशतिः (११९) ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
अष्टमाध्यायस्य तृतीयः पादः ।

एभ्यः—नि-वि-अभि, इत्युपसर्गेभ्यः । एवं **व्यषीदत् / व्यसीदत्** । **अभ्यषीदत् / अभ्यसीदत्** इत्यपि प्रयोगाः बोध्याः । सर्वत्र √सद् (षद्लृ) + लङ् → तिप् ।

'सदिष्वञ्ज्योः.....' इति नानुवर्तते । सामान्येन विभाषा षत्वनिषेधकं सूत्रम् । तेन **व्यष्टौत् / व्यस्तौत्** । **अभ्यष्टौत् / अभ्यस्तौत्** इत्यादयः प्रयोगाः सिद्ध्यन्ति ।

अष्टमाध्यायस्यास्मिन् तृतीये पादे मतुवसो रु सम्बुद्धौ छन्दसि, उञि च पदे, इदुदुपधस्य चाप्रत्ययस्य, स्तौतिण्योरेव षण्यभ्यासात्, भीरोः स्थानम्, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा ह्रस्वात्तादौ तद्धिते इत्यत आरभ्य एकोनविंशतिः सूत्राणीति संकलनेन एकोनविंशाधिकं शतं (११९) सूत्राणि सन्ति ।

इयमेव संख्या कौमुदीकारस्यापि सम्मताऽस्ति । मुद्रिते काशिकावृत्ति-ग्रन्थे एति संज्ञायामगात् (९९) तथा नक्षत्राद्वा (१००) इति सूत्रद्वयं गणसूत्र-त्वेनोल्लिखितं वर्तते इति तदनुसारं सूत्रसंख्या सप्तदशाधिकं शतम् (११७) अस्तीत्यन्तरम् ।

इति काशिकावृत्तिसार-सुधायां
अष्टमाध्यायस्य तृतीयः पादः ।

अथाष्टमाध्याये चतुर्थः पादः

रषाभ्यां नो णः समानपदे ॥१॥

रेफ-षकाराभ्यामुत्तरस्य नकारस्य णकार आदेशो भवति, समानपदस्थौ चेत् निमित्त-निमित्तिनौ । आस्तीर्णम् । विस्तीर्णम् । षकारात्—कुष्णाति । 'ष' ग्रहणम् उत्तरार्थम्-ष्टुत्वेनैव सिद्धमेतत् ।

'समानपदे' इति किम् ? अग्निर्नयति । वायुर्नयति ।

❀ (वा०) ऋवर्णाच्चेति वक्तव्यम् । तिसृणाम् । मातृणाम् ।

समानपदस्थौ—समानम् = एकम् । समानं पदम् इति कर्मधारयः तत्र स्थौ = स्थितौ । **निमित्तनिमित्तिनौ**—निमित्तम्-रकारः, षकारश्च । निमित्ती-नकारः । अयम् आशयः—यस्मिन् पदे रेफ-षकारौ तस्मिन्नेव यदि नकारोऽपि वर्तते तदा तस्य णकारो भवति । **आस्तीर्णम्**—आ √स्तृ + क्त । **तिसृणाम्, मातृणाम्**—केचित् आचार्याः ऋकारे रेफस्यार्धमात्रां स्वीकृत्य णत्वविधानम् आहुः ।

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥२॥

अट्-कु-पु-आङ्-नुम्, एतैर्व्यवायेऽपि, अव्यवायेऽपि रेफ-षकाराभ्याम् उत्तरस्य नकारस्य णकारादेशो भवति । अड्-व्यवाये—करणम् । गिरिणा । कुरुणा ।

कवर्ग-व्यवाये—अर्केण । मूर्खेण । गर्गेण । अर्घेण ।

पवर्ग-व्यवसाये-दर्पेण । रेफेण । गर्भेण । चर्मणा ।

आङ्-व्यवाये-पर्याणद्धम् । आङ्-ग्रहणं पद-व्यवायेऽपि प्रतिषेधस्य बाधनार्थम् ।

नुम्--व्यवाये-बृंहणम् । बृंहणीयम् । नुम्-ग्रहणम् अनुस्वारोपलक्षणार्थम् ।

पर्याणद्धम्—परि आ √नह् (बन्धने) + क्त । **आङ्…… बाधनार्थम्**—'आङ्' इति पदम् अस्ति तेन व्यवायेऽपि भवति णत्वम् । **बृंहणम्**—√बृहि (वृद्धौ) + ल्युट् → अन । 'इदितो नुम् धातोः' इति नुम्, तस्य नकारस्य 'नश्चापदान्तस्य झलि' इति अनुस्वारः । **उपलक्षणार्थम्**– यत्रानुस्वारो न भवति तत्र णत्वमपि न—**प्रेन्वनम्** । अनेकैरपि अडादिभिर्व्यवाये भवति णत्वम्—**रामायणम्** ।

पूर्वपदात्संज्ञायामगः ॥३॥

पूर्वपदस्थान्निमित्तात् अगकारात्परस्य नकारस्य णकारादेशो भवति संज्ञायाम् । द्रुणसः । वार्ध्रीणसः ।

अगः किम् ? ऋगयनम् ।

द्रुणसः—द्रुः इव नासिका यस्य सः नासिकायाः 'नस' आदेशः । अत्र रकारः पूर्वपदस्थः । **वार्ध्रीणसः** = मृगविशेषः । एवं **शूर्पणखा** ।

असंज्ञायां तु **शूर्पनखी** ।

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥४॥

एभ्यः उत्तरस्य वन-नकारस्य णकारादेशो भवति संज्ञायाम् । पुरगावणम् इत्यादि ।

सिद्धे सत्यारम्भो नियमार्थः । एभ्य एवोत्तरस्य वन-नकारस्य णत्वम् नान्येभ्यः । नेह—कुबेरवनम् ।

एभ्यः—पुरगा-मिश्रका-सिध्रका-शारिका-कोटरा-अग्रे पूर्वपदेभ्यः । **वनम्**—षष्ठचर्थे प्रथमा । **पुरगावणम्**—पुरगस्य वनम् इति षष्ठी समासः । पुरग वनम् इत्यवस्थायां 'वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम्' इति

पुरग-अकारस्य दीर्घः । एवं **मिश्रकावणम्** । **सिध्रकावणम्** । **शारिकावणम्** । **कोटरावणम्** इत्येतेष्वपि दीर्घो भवति ।

अग्रेवणम्—वनस्याग्रे इति समासे 'राजदन्तादिषु परम्' इत्यनेन 'अग्रे' इत्यस्य पूर्वनिपातः, 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यनेन सप्तम्याः अलुक् ।

सिद्धे—पूर्वेण 'अट्-कु.........' इत्यनेन ।

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ।।५।।

प्रादिभ्य उत्तरस्य वन–नकारस्य संज्ञायाम् असंज्ञायामपि णकारादेशो भवति । प्र–प्रवणे यजते । निर्–निर्वणे प्रतिधीयते । अन्तर्–अन्तर्वणे । शर–शरवणम् । इक्षु–इक्षुवणम् प्लक्ष–प्लक्षवणम् । आम्र–आम्रवणम् । कार्ष्य–कार्ष्यवणम् । खदिर–खदिरवणम् पीयूक्षा–पीयूक्षावणम् ।

प्रवणम्—प्रगतं वनम् । एवं **निर्वणम्**—निर्गतं वनम् इति प्रादिसमासः । **अन्तर्वणम्**—वने इति अव्ययीभावः वनमध्ये । शेषाः **शरवण**–प्रभृतयः षष्ठीतत्पुरुषसमासाः ।

विभाषौषधिवनस्पतिभ्यः ।।६।।

ओषधिवाचि यत्पूर्वपदम्, वनस्पतिवाचि च; तत्स्थान्निमित्तादुत्तरस्य वन-नकारस्य णकारादेशो भवति विभाषा । ओषधिभ्यः—दूर्वावणम् / दूर्वावनम् । मूर्वावणम् / मूर्वावनम् । वनस्पतिभ्यः—शिरीषवणम् / शिरीषवनम् । बदरीवणम् / बदरीवनम् ।

❀(वा०) द्व्यक्षर-त्र्यक्षरेभ्यः एव । नेह–देवदारुवनम् ।

❀(वा०) इरिकादिभ्यः प्रतिषेधो वाच्यः । इरिकावनम् । मिरिकावनम् ।

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।

ओषध्यः फलपाकान्ताः लता गुल्माश्च वीरुधः ॥

इति यद्यपि वृक्ष-वनस्पत्योर्भेदः, इह त्वभेदेन ग्रहणं द्रष्टव्यम् ।

सूत्रे **वनस्पतयः** इति बहुवचनं स्वरूप-निरासार्थम्, तेन ओषधि-वनस्पत्योर्भेदानां ग्रहणं भवति । **दूर्वावणम्**—दूर्वायाः वनम् इति षष्ठी-तत्पुरुषः । एवं सर्वत्र ।

वृक्षवनस्पत्योर्भेदेन **शिरीषवणम्, बदरीवणम्** इति प्रयोगौ न भवितुम् अर्हतः, तयोः वृक्षत्वात् । तथापि इह तयोरभेदेन ग्रहणं भवति । अत्र प्रमाणम् 'लुपि युक्तवद्व्यक्तिवचने' इति सूत्रस्थं '**शिरीषवनम्–वनस्पतित्वं नातिदिश्यते** ।' इति भाष्यमेव ।

पुष्पफलोपगाः—पुष्पं फलं चोपगच्छन्ति = प्राप्नुवन्ति ये । **फलपाकान्ताः**—फलानां पाकेन अन्तः = विनाशः यासां ताः ।

अह्नोऽदन्तात् ॥७॥

'अहन्-शब्दस्य अकारान्तस्य अकारान्तपूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । पूर्वाह्णः । अपराह्णः ।

'अह्नः' इत्यकारान्तग्रहणं किम् ? दीघाह्नी प्रावृट् । अत्र न भवति ।

पूर्वाह्णः—अह्नः पूर्वो भागः इति 'पूर्वापर.........' इति सूत्रेण समासः, टच् समासान्तः 'अह्नोऽह्न एतेभ्यः' इति 'अहन्' शब्दस्य 'अह्न' आदेशः । **दीर्घाह्नी**—दीर्घाणि अहानि यस्यां सा दीर्घाहन् + ङीप् । बहुव्रीहित्वात् न टच् ।

वाहनमाहितात् ॥८॥

आहितवाचि यत्पूर्वपदम् तत्स्थान्निमित्तादुत्तरस्य वाहन-नकारस्य णकारादेशो भवति । इक्षुवाहणम् । दर्भवाहणम् ।

वाहने यत् आरोपितम् उह्यते तत् आहितम् । आहितात् किम ? दाक्षिवाहनम् दाक्षिस्वामिकम् वाहनम् इत्यर्थः । यदा तु दाक्षिः अपि वाह्यत्वेन विवक्ष्यते तदा भवत्येव । दाक्षिवाहणम् ।

आहितम्--वाहने आरोपितं वस्तु । **इक्षुवाहणम्**--इक्षूणां वाहनम् इति षष्ठीतत्पुरुषः ।

पानं देशे ॥९॥

पान-नकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य णकारादेशो भवति देशोभिधीयते चेत् । पीयते इति पानम् 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । क्षीरं पानं येषां ते क्षीरपाणाः उशीनराः । सौवीरपाणाः बाह्लीकाः ।

देशोऽभिधीयते--मनुष्यार्थेऽपि देशाभिधानं गम्यते । तेन यद्यपि क्षीरपाणाः मनुष्याः भवन्ति तथापि तेषाम् अधिकरणात् देशाः अपि तेन शब्देनाभिधीयन्ते । **सौवीरम्** = अम्लद्रवः ।

वा भावकरणयोः ॥१०॥

भावे करणे च पान-नकारस्य पूर्वस्थान्निमित्तादुत्तरस्य वा णकारादेशः । भावे--क्षीरपाणं वर्तते / क्षीरपानम् ।

करणे--क्षीरपाणं पात्रम् / क्षीरपानम् ।

❀(वा०) गिरिनद्यादीनामुपसंख्यानम् गिरिणदी / गिरिनदी । चक्रणदी / चक्रनदी । चक्रणितम्बा / चक्रनितम्बा ।

क्षीरपाणं वर्तते--क्षीरस्य पानम् = पानक्रिया षष्ठीतत्पुरुषः ! **क्षीरपाणं पात्रम्**--पीयते अनेन इति पानम् ।

प्रातिपदिकान्तनुम्विभक्तिषु च ॥११॥

प्रातिपदिकान्ते नुमि विभक्तौ च यो नकारः तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति । प्रातिपदिकान्ते--माषवापिणौ / माषवापिनौ । नुमि--माषवापाणि / माषवापानि । विभक्तौ--माषवापेण / माषवापेन । व्रीहिवापेण / व्रीहिवापेन ।

पूर्वपदाधिकारात् उत्तरपदप्रातिपदिकस्य योऽन्त्यो नकारस्तस्येदं णत्वमिष्यते । गर्गाणां भगिनी गर्गभगिनी ।

❀ (वा०) युवादीनां प्रतिषेधः । आर्ययूना । प्रपक्वानि ।

प्रातिपदिकान्तः—अन्तः = अवयवः । **माषवापिणो**--माषान् वपतः माष + वप् + णिनि (ताच्छील्ये)=माष-वापिन् + औ । **माषवापाणि**–माषान् वपन्ति माष √वप् + अण् = माषवाप + नपुंसके जस् → शि । नुम्-आगमः । अत्र नुमो नकारः । **माषवापेण**--माषवाप + टा → इन गुणः । अत्र विभक्तेर्नकारः । **आर्ययूना**--आर्यश्चासौ युवा च कर्मधारय-समासः आर्ययुवन् + टा ।

एकाजुत्तरपदे णः ॥१२॥

एकाच् उत्तरपदे प्रातिपदिकान्त-नुम् विभक्तिषु पूर्वपदस्था-न्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । प्रातिपदिकान्ते--वृत्रहणौ । नुमि—क्षीरपाणि । विभक्तौ—क्षीरपेण ।

पुनः 'ण'—ग्रहणं विकल्पाधिकारनिवृत्त्यर्थम् ।

बृत्रहणौ--'वृत्रहन्' शब्दः क्विबन्तः उत्तरपदम् 'हन्' एकाच् । एवं **क्षीरपाणि**--क्षीरं पिबति पा + क = 'प' उत्तरपदम् एकाच् ।

कुमति च ॥१३॥

· कवर्गवति उत्तरपदे प्रातिपदिकान्त-नुम्-विभक्तिषु पूर्वपद-स्थान्निमित्तादुत्तरस्य नस्य 'णः' वस्त्रयुगिणौ । वस्त्रयुगाणि । वस्त्रयुगेण ।

वस्त्रयुगिणौ—वस्त्रस्य युगम् अस्यास्ति इति वस्त्रयुग + इनि 'अत इनिठनौ' इत्यनेन = वस्त्रयुगिन् + औ ।

उपसर्गादसमासेऽपि णोपदेशस्य ॥१४॥

उपसर्गस्थान्निमित्तादुत्तरस्य णोपदेशस्य धातोर्नकारस्य णकारादेशः समासेऽप्यसमासेऽपि । प्रणमति । परिणमति । प्रणा-यकः । परिणायकः । प्रणयति ।

प्रणमति, प्रणयति—√णम्–√णीञ् धातू णोपदेशौ । समासस्योदा-हरणम्—**प्रणायकः**—प्रगतः नायकः प्रादि-समासः ।

हिनुमीना ॥१५॥

हिनु-मीना, इत्येतयोः उपसर्गस्थान्निमित्तादुत्तरस्य नस्य 'णः'। प्रहिणोति। प्रहिणुतः। प्रमीणाति। प्रमीणीतः।

हिनु—√हि (गतौ) + श्नु 'स्वादिभ्यः श्नुः' इत्यनेन। **मीना**—√मी (हिंसायाम्) + श्ना 'क्र्यादिभ्यः श्ना' इत्यनेन। **प्रहिणोति**—प्र √हि + लट् → ति 'श्नु' आगमः उकारस्य गुणः। **प्रमीणीतः**—'ई हल्यघोः' इति श्ना-आकारस्य ईकारः। उभयत्रापि 'एकदेशविकृतमनन्यवत्' इति न्यायेन हिनु-मीना इति रूपम् मत्वा नस्य णत्वम्।

आनि लोट् ॥१६॥

'आनि' इत्येतस्य लोट्-आदेशस्य उपसर्गस्थान्निमित्ता-दुत्तरस्य नकारस्य णकारादेशो भवति। प्रवपाणि। प्रभवाणि। प्रयाणि।

प्रवपाणि—प्र √वप् + लोट् → मिप् 'मेर्निः' इत्यनेन 'म' इत्यस्य 'नि' आदेशः 'आडुत्तमस्य पिच्च' इत्यनेन आट्। आ (आट्) + नि = आनि अस्य नकारस्य णः। **प्रभवाणि**—प्र √भू + लोट् → मिप् शेषं पूर्ववत्। **प्रयाणि**—प्र √या (प्रापणे) + लोट् → मिप्।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहति-शाम्यतिचिनोतिदेग्धिषु च ॥१७॥

'नि' इत्येतस्य उपसर्गास्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति। गद—आदिषु परतः।

√गद—प्रणिगदति। परिणिगदति।

√नद्—प्रणिनदति। √पत—प्रणिपतति। √पद—प्रणिपद्यते।

घु—'घु' इति संज्ञा √दा—प्रणिददाति। √धा—प्रणिदधाति।

√मा—प्रणिमिमीते। 'मा' इति मा-मेङोर्ग्रहणम्। प्रणि-मयते।

√स्यति—प्रणिस्यति । √हन्—प्रणिहन्ति ।

√या—प्रणियाति । √वा—प्रणिवाति ।

√द्रा—प्रणिद्राति । √प्सा—प्रणिप्साति ।

√वप—प्रणिवपति । √वह—प्रणिवहति ।

√शम—प्रणिशाम्यति । √चि—प्रणिचिनोति ।

√दिह—प्रणिदेग्धि । परिणिदेग्धि ।

अड्--व्यवायेऽपि णत्वमिष्यते । प्रण्यगदत् इत्यादि ।

घु—'घु' इति संज्ञा ययोस्तौ गृह्येते । **मा**—√माङ् (माने), मेङ् (प्रणिदाने) इत्यनयोर्ग्रहणम् न तु √मीञ् (हिंसायाम्) √डुमिञ् (प्रेक्षणे) √मा (माने) इत्येषाम् । तथैव व्याख्यानात् । व्याख्याने सूत्रकर्तुः इच्छयैव प्रवर्तितव्यम् इति नियमात् ।

स्यति—√षो + श्यन् + लट् → ति 'ओतः श्यनि' इत्यनेन ओकारस्य लोपः । **प्रण्यगदत्**—प्र नि √गद + लङ् → तिप् ।

शेषे विभाषाऽकखादावषान्त उपदेशे ॥१८॥

अककार-खकारादिः अषकारान्त उपदेशे यो धातुः स शेषः । तस्मिन् परतः उपसर्गस्थान्निमित्तादुत्तरस्य नेः नकारस्य विभाषा णकारादेशो भवति । प्रणिपचति / प्रनिपचति ।

अक-खादौ किम् ? प्रनिकरोति । प्रनिखादति ।

अषान्ते किम् ? प्रनिपिनष्टि ।

यो धातुः न ककारादिः न च खकारादिः √कृ-√खाद् आदिः तथा न षकारान्तः √पिष आदिः स धातुः अत्र शेष-पदेन गृह्यते । **प्रनिपचति**—प्र नि √पच + लट् → ति नेः नकारस्य पक्षे णत्वम् न ।

अनितेः ॥१९॥

अनितेः नकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । प्राणिति । पराणिति ।

अनितेः--√अन (प्राणने) धातोः । **प्राणिति**--प्र √अन + लट् → तिप् । एवं **पराणिति**—परा √अन ।

अन्तः ॥२०॥

उपसर्गस्थान्निमित्तादुत्तरस्य अनितेर्नकारस्य पदान्ते वर्तमानस्य णकारादेशो भवति । हे प्राण् । हे पराण् ! 'पदान्तस्य' इति प्रतिषेधापवादोऽयम् ।

अन्तः—अवयवार्थकः 'अन्त' शब्दः । हे प्राण् ! प्राणिति प्र √अन् + क्विप् सम्बोधने रूपम् । **पदान्तस्य**—प्रतिषेधसूत्रं वक्ष्यति ।

उभौ साभ्यासस्य ॥२१॥

साभ्यासस्य अनितेः उपसर्गस्थान्निमित्तात् उत्तरयोः उभयोः नकारयोः णकारादेशो भवति । प्राणिणिषति । प्राणिणत् ।

'पूर्वत्रासिद्धीयमद्विर्वचने' इत्येतस्मिन् सति पूर्वेणैव कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेणापि वचनम् । तत्तु नाश्रयितव्यम् इत्येवमर्थम् इदं सूत्रम् आरभ्यते ।

उभौ—पूर्वस्य नकारस्य व्यवधानेऽपि उत्तरस्य नकारस्य यथा स्यात् इत्येतदर्थम् इदम् सूत्रम् । **प्राणिणिषति**—प्र √अन् + सन् इट् 'नि' शब्दस्य द्वित्वम् । **प्राणिणत्**—प्र √अन् + णिच् + लुङ् ।

पूर्वत्र......आरभ्यते—प्र अन् इस इति स्थिते परत्वात् पूर्वं णत्वे कृते 'णि' इत्यस्य द्वित्वे सूत्रं विनाऽपि **प्राणिणिषति** इति सिद्ध्यति । इदमेव ज्ञापकं यत् 'पूर्वत्रासिद्धीयमद्विवर्चने' इति नात्र प्रवर्तते । तेन **औजढत्** इत्यत्र ढत्वस्य असिद्धत्वात् 'हत्' इत्यस्य द्वित्वं हकारस्य जकारो भवति ।

हन्तेरत्पूर्वस्य ॥२२॥

हन्तेः अकार-पूर्वस्य नकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । प्रहण्यते । परिहण्यते ।

अत्पूर्वस्य किम् ? प्रघ्नन्ति ।

तपरकरणं किम् ? प्राघानि ।

अत्पूर्वस्य—'अत्' पूर्वो यस्यात्तस्य (नकारस्य)। **प्रहण्यते**—प्र √हन् + भावे, कर्मणि वा लट् → ते यक्-आगमः। **प्राघानि**—प्र √हन् + लुङ् च्लेः चिण् 'अत उपधायाः' इति हकाराकारस्य वृद्धिः।

वमोर्वा ॥२३॥

वकार-मकारयोः परतः हन्तेरुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य वा णकारादेशो भवति। प्रहण्वः / प्रहन्वः। प्रहण्मः / प्रहन्मः।

प्रहण्वः—प्र √हन् + लट् → वस्।

अन्तरदेशे ॥२४॥

अन्तर्-शब्दादुत्तरस्य हन्ति-नकारस्य अत्पूर्वस्य णकारादेशो भवति अदेशाभिधाने। अन्तर्हण्यते। अन्तर्हणनम् वर्तते।

'अदेशे' इति किम् ? अन्तर्हननो देशः।

'अन्तर्' इत्यस्य 'अन्तःशब्दस्य आङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या' इत्युपसर्गत्वेन पूर्वेणैव सिद्धे अदेशार्थं सूत्रम्।

अयनं च ॥२५॥

अयन-नकारस्य अन्तः-शब्दादुत्तरस्य णकारादेशो भवति अदेशाभिधाने। अन्तरयणं वर्तते। नेह—अन्तरयनो देशः।

अन्तरयणम्—अन्तर् √अय वा √इण् (गतौ) + ल्युट्। अन्तर्गमनम् इत्यर्थः। इदमपि सूत्रं देशप्रतिषेधार्थम्।

छन्दस्यृदवग्रहात् ॥२६॥

छन्दसि विषये ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य

नकारस्य णकारादेशो भवति । नॄमणाः । पितॄयाणम् । अत्र हि नॄ अमनाः । पितृ अयानम् इति ऋकारः अवगृह्यते ।

अवग्रहग्रहणम् किम् ? अनवगृह्यमाणाद् ऋकारात् मा भूत् ।

ऋदवग्रहात्--अवगृह्यते = विच्छिद्य पठ्यते इति अवग्रहः । ऋत् चासौ अवग्रहश्च इति ऋदवग्रहः तस्मात् । नॄमणाः--संहिताऽधिकारात् संहिताकाले एषां णत्वम्, पदकाले चावग्रहः क्रियते तथा च **अवग्रहात्** = अवगृह्यमाणात् इत्यर्थः क्रियते । पदान्तस्यैव अवग्रहो भवति न अपदान्तस्य । सूत्रे अवग्रहः इत्यस्यार्थः अवग्रहयोग्यः ।

नश्च धातुस्थोरुषुभ्यः ॥२७॥

'नस्' इत्येतस्य धातुस्थान्निमित्तादुत्तरस्य 'उरु'-शब्दात् 'सु'-शब्दाच्चोत्तरस्य नस्य णकारादेशो भवति छन्दसि विषये ।

धातुस्थात्—अग्ने रक्षा णः । उरुशब्दात्—उरु णस्कृधि । सु (षु) शब्दात् अभी षु णः सखीनाम् । ऊर्ध्वं ऊषु णः । अस्मद्-आदेशोऽयं 'नस्' शब्दः ।

नस्—'बहुवचनस्य वस्नसौ' इत्यनेन अस्मदो 'नस्' आदेशः । **सु**—कृतषत्वस्य सुञो निपातस्य ग्रहणम् । **रक्षा णः**—'रक्ष' इति लोट्—मध्यम-पुरुषैकवचने रूपम् । 'द्व्यचोऽतस्तिङः' इत्यनेन अन्त्याकारस्य दीर्घः 'नः' (नस्) नकारस्य णकारः ।

अभीषु णः—अभि + सुञ् 'इकः सुञि' इत्यनेन अभि-इकारस्य दीर्घः, 'सुञः' इत्यनेन सु-सकारस्य षत्वम् ।

ऊषु--उ + सु पूर्ववद्दीर्घषत्वे ।

उपसर्गाद् बहुलम् ॥२८॥

उपसर्गस्थान्निमित्तादुत्तरस्य नसो नकारस्य णकारादेशो भवति बहुलम् । प्रणः शूद्रः । प्रणसः । प्रणो राजा । न च भवति—प्र नो मुञ्चतम् ।

'छन्दसि' इति निवृत्तम् । तेन भाषायामपि—प्रणसं मुखम् ।

प्रणः—सूत्रे उपसर्गग्रहणं प्र-आदीनाम् उपलक्षणम्, अस्मदो 'नस्'। **प्रणसः**—प्रगता नासिका यस्य सः बहुव्रीहिः। नासिकायाः 'नस्' आदेशः, 'उपसर्गाच्च' इत्यनेन 'अच्' समासान्तः। एवं **प्रणसं मुखम्** इत्यपि।

कृत्यचः ॥२९॥

कृत्स्थो यो नकारः अचः उत्तरस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति। अन-मान-अनीयर्-अनि-इनि-निष्ठादेशाः णत्वं प्रयोजयन्ति। अन—प्रयाणम्। मान—प्रयायमाणम्। अनीयर्—प्रयाणीयम्। अनि—अप्रयाणिः। इनि—प्रयायिणौ। निष्ठादेशाः—प्रहीणः। प्रहीणवान्।

अचः इति किम्? प्रभग्नः।

❀ (वा०) कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानम्। निर्विण्णोऽस्मि खलसङ्गेन।

अन……निष्ठादेशः—कृत्प्रत्ययेषु एतेष्वेव अचः उत्तरो नकारः सम्भवति। **अन**—ल्युटः आदेशः। **मान**—मुक्-सहिताः शानच्-कानच्-चानश् प्रत्ययाः। **अनि**—'आक्रोशे नञ्यनिः'। **इनि**—णिनि। **निष्ठादेशः**—यत्र त-वतोः तकारस्य नकारः भवति।

प्रयायमाणम्—प्र √या + कर्मणि लकारः → शानच्। **प्रहीणः**—प्र √ओहाक् (त्यागे) + क्त 'ओदितश्च' इति तकारस्य नकारः। **निर्विण्णः**—निर् √विद् (सत्तायाम्) + क्त। तकारस्य दकारस्य च नकारः। पूर्वनकारस्य अनेन णकारे कृते ष्टुत्वेन परस्यापि णत्वम्।

णेर्विभाषा ॥३०॥

ण्यन्ताद् यो विहितः कृत्, तत्स्थस्य नकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति। प्रयापणम् / प्रयापनम्। परियापणम् / परियापनम्। प्रयाप्यमाणम् / प्रयाप्यमानम्। प्रयापणीयम् / प्रयापनीयम् इत्यादि।

प्रयाप्यमाणम्—ण्यन्तात् प्र √या + णिच् + कर्मणि शानच् 'अर्तिह्री……' इत्यादिना पुक्-आगमः। यका व्यवधानेऽपि भवति।

हलश्चेजुपधात् ॥३१॥

हलादिर्यो धातुः इच्-उपधः, तस्मात्परो यः कृत् तत्स्थस्य नकारस्य अच उत्तरस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशः। प्रकोपणम् / प्रकोपनम्।

हलः किम् ? प्रेहणम्। इजुपधात् किम् ? प्रवपणम्।

इजुपधात्—इच् = इ-उ-ऋ-लृ-ए-ओ-ऐ-औ इति वर्णाः ते उपधायां यस्य, तस्माद् धातोः। **प्रकोपणम्**—प्र √कुप् + ल्युट्।

इजादेः सनुमः ॥३२॥

इजादेः सनुमो हलन्ताद् धातोर्विहितो यः कृत्, तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारः। प्रेङ्खणम्।

नियमार्थ आरम्भः। इजादेरेव सनुमः। प्रमङ्गनम्।

प्रेङ्खणम्—प्र √इखि (गतौ) + ल्युट् इदित्त्वात् नुम्। **आरम्भः**—'कृत्यचः' इत्यनेनैव सिद्धे सति नियमार्थमेतत्। **प्रमङ्गनम्**—प्र √मगि + ल्युट्।

वा निंसनिक्षनिन्दाम् ॥३३॥

उपसर्गस्थान्निमित्तादुत्तरस्य एषां नस्य वा णः। प्रणिंसणम् / प्रनिंसनम्। प्रणिक्षणम् / प्रनिक्षणम्। प्रणिन्दनम् / प्रनिन्दनम्।

एषाम्—√णिसि (चुम्बने)—√णिक्ष (शेषे) √णिदि (कुत्सायाम्) इति। ल्युट्-प्रत्ययान्तानि **प्रणिंसणम्** आदीनि। **प्रनिक्षणम्**—प्रत्ययस्थ-नकारस्य तु नित्यं णकारो भवति।

न भाभूपूकमिगमिप्यायीवेपाम् ॥३४॥

एषां नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थस्य न 'णः'। कृत्यचोऽपवादः। भा-प्रभानम्। भू-प्रभवनम्। पू—

प्रपवनम् । कम — प्रकमनम् । गम–प्रगमनम् । प्यायी–प्रप्यानम् । वेप—प्रवेपनम् ।

प्रभानम्—प्र √भा (दीप्तौ) + ल्युट् । एवं सर्वे प्रयोगाः ल्युट्-प्रत्ययान्ताः ज्ञेयाः ।

प्रपवनम्—प्र √पूञ् (पवने) + ल्युट् ।

अत्र √पूञ् इत्यस्य गहणम् इष्यते । √पूङ् इत्यस्य तु **प्रपवणम्** इति भवति ।

❀ (वा०) ण्यन्तानां भादीनाम् उपसंख्यानम् कर्त्तव्यम् । प्रभापनम् ।

षात्पदान्तात् ॥३५॥

षात्पदान्तादुत्तरस्य नकारस्य णकारादेशो न भवति । निष्पानम् । सर्पिष्पानम् ।

पदे अन्तः पदान्तः इति सप्तमीसमासोऽयम् । तेनेह न निषेधः—सुसर्पिष्केण । सुयजुष्केण ।

निष्पानम्—निः + पानम् 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनेन विसर्गस्य षत्वम् । **सुसर्पिष्केण**—सु-शोभनं सर्पिः अस्य इति बहुव्रीहिः । 'शेषाद्विभाषा' इति कप् । 'इणः षः' इति षत्वम् । नायं षकारः पदे अन्तः ।

नशेः षान्तस्य ॥३६॥

√णश् (अदर्शने) अस्य षकारान्तस्य न णकारादेशः । प्रनष्टः ।

षान्तस्य किम् ? प्रणश्यति ।

'अन्त'-ग्रहणं षान्तभूतपूर्वस्यापि ग्रहणार्थम्—प्रनंक्ष्यति ।

प्रनष्टः—प्र √नश् + क्त 'व्रश्चभ्रस्ज……' इत्यादिना शकारस्य षत्वम् ।

अन्तग्रहणम्……यः सम्प्रति षान्तः, यश्च भूतपूर्वः उभयस्यापि निषेधः । **प्रनंक्ष्यति**—प्र √नश् + लृट् स्य आगमः 'मस्जिनशोर्झलि' इति

नुम्, 'व्रश्चभ्रस्ज······' इति शकारस्य षत्वम्, तस्य 'षढोः कः सि' इत्यनेन ककारः। इत्ययं भवति भूतपूर्वः षान्तः।

पदान्तस्य ॥३७॥

पदान्तस्य नस्य णत्वं न। वृक्षान्। प्लक्षान्। गिरीन्।

वृक्षान्—वृक्ष + शस् 'प्रथमयोः पूर्वं सवर्णः' इति दीर्घः। 'तस्माच्छसो नः पुंसि' इति सकारस्य नकारः।

पदव्यवायेऽपि ॥३८॥

पदेन व्यवधाने सति निमित्त-निमित्तिनोः नकारस्य णकारादेशो न भवति। माषकुम्भवापेन। चतुरंगयोगेन।

❀ (वा०) पदव्यवाये 'अतद्धिते' इति वक्तव्यम्। इह मा भूत्—आर्द्रगोमयेण। शुष्कगोमयेण।

निमित्तनिमित्तिनोः—निमित्तम् रकार-षकारौ, निमित्ती नकारः। एतौ यदि पदेन व्यवहितौ स्तः तदा नकारस्य णकारो न भवति। **आर्द्रगोमयेण**—आर्द्रगोमय+टा→इन, 'मयट्' तद्धितः अतः अत्र 'गो' व्यवधानेऽपि नकारस्य भवति णत्वम्।

क्षुभ्नादिषु च ॥३९॥

'क्षुभ्न' एवमादिषु शब्देषु नकारस्य णकारादेशो न भवति। क्षुभ्नाति। अजादेशस्य स्थानिवद्भावात् इहापि प्रतिषेधो भवति। क्षुभ्नीतः। क्षुभ्नन्ति।

नृतिर्यङि प्रयोजयति। नरीनृत्यते।

❀ (वा०) आचार्यादणत्वं च। आचार्यभोगीनः। आचार्यानी।

❀ (वा०) अविहितलक्षणोणत्व-प्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः।

क्षुभ्नाति—√क्षुभ + लट् → तिप् श्ना-आगमः । 'अट् कुप्वाङ् ……' इत्यनेन प्राप्तस्य णत्वस्य निषेधः । 'क्षुभ्ना' इति स्वरूप ग्रहणम्, तेन **क्षोभणम्** इत्यादौ णत्वं भवत्येव । **क्षुभ्नीतः**—**क्षुभ्नन्ति**—क्रमशः ईत्व-लोपयोः स्थानिवद्भावात् एकदेशविकृतस्यानन्यत्वाद् वा भवति णत्व-निषेधः । एवं **नृनमनः** इत्यपि ।

'पूर्वपदात्संज्ञायामगः' इत्यस्य प्राप्तौ निषेधोऽयं प्रवर्तते । तेन **हरिनन्दनः** । **गिरिनगरम्** । **कर्मारः** । **कुबेर-वनम्** इत्यादीनां सिद्धिर्भवति । **क्षुभ्नादिः आकृतिगणः अविहितलक्षणः**—यस्य णत्व-निषेधः केनापि सूत्रेण न कृतः ।

स्तोः श्चुना श्चुः ॥४०॥

सकार-तवर्गयोः शकार-चवर्गाभ्यां सन्निपाते शकार-चवर्गादेशौ भवतः ।

'स्तोः श्चुना' इति यथासंख्यम् अत्र नेष्यते । सकारस्य शकारेण चवर्गेण च सन्निपाते शकारो भवति। तवर्गस्य च शकारेण चवर्गेण च सन्निपाते चुत्वं भवति । आदेशेषु यथासंख्यम् इष्यते । सकारस्य शकारः, तवर्गस्य चवर्गः । वृक्षश्शेते । प्लक्षश्शेते । वृक्षश्चिनोति । अग्निचिच्छेते । अग्निचिच्चिनोति ।

'स्तोः श्चौ' इति सप्तमीनिर्देशो न कृतः । पूर्वेण परेण च श्चुना सन्निपातेन श्चुत्वं यथा स्यात् इति । यज्ञः । याच्ञा ।

'शात्' इति प्रतिषेधो ज्ञापकः संख्यातानुदेशाभावस्य ।

सन्निपाते—आनन्तर्ये पूर्वेण, परेण वा अव्यवहिते संयोगे । **वृक्षश्शेते**—वृक्षः + शेते 'वा शरि' इति विकल्पेन विसर्गस्य सकारे कृते तस्य शकारः । **अग्निचिच्छेते**—अग्निचित् + शेते । तकारस्य चकारः, शकारस्य च 'शश्छोऽटि' इत्यनेन छकारः । **यज्ञः**—√यज् + नः । **याच्ञा**—√याच् + ना । **संख्यातानुदेशः**—यथासंख्य-व्यवहारः ।

ष्टुना ष्टुः ॥४१॥

सकार-तवर्गयोः षकार-टवर्गाभ्यां योगे षकार-टवर्गौ आदेशौ

भवतः । अत्रापि तथैव संख्यातानुदेशाभावः । वृक्षष्षण्डे। वृक्षष्टीकते । पेष्टव्यम् । कृषीष्ट । अग्निचिट्टीकते ।

वृक्षष्षण्डे—वृक्षः + षण्डे 'वा शरि' इति सकारे कृते तस्य षत्वम् । **वृक्षष्टीकते**—वृक्षः + टीकते 'विसर्जनीयस्य सः' इति सकारे तस्य षत्वम् । **पेष्टव्यम्**—पेष् + तव्यम् । तकारस्य टकारः । **कृषीष्ट**—√कृ + आशिषि लिङ् 'सीयुट्' यलोपे 'सुट् तिथोः' इति सुट्-आगमः तस्य सकारस्य 'आदेशप्रत्यययोः' इति षत्वे कृषीष् + त तद्योगे तकारस्य टकारः ।

न पदान्ताट्टोरनाम् ॥४२॥

पदान्तात् टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति 'नाम्' इत्येतद्वर्जयित्वा । श्वलिट्साये । मधुलिट् तरति ।

अनाम् किम् ? षण्णाम् । अत्यल्पमिदम् उच्यते ।

❀ (वा०) अनाम्-नवति-नगरीणामिति वाच्यम् । षण्णवतिः । षण्णगर्यः ।

श्वलिट्साये—श्वलिट् क्विप्-प्रत्ययान्तः पदान्तः । तस्मात्परस्य सकारस्य न षत्वम् । **अनाम्**—'आम्' इति षष्ठी बहुवचन विभक्तिः, तस्य सनुट्कस्य ग्रहणम् । **षण्णाम्**—षड् + नाम् । अत्र नकारस्य णकारः । **षण्णवतिः**—षडधिका नवतिः । षड् + नवतिः अत्रापि ष्टुत्वं भवति ।

तोः षि ॥४३॥

'न' इति वर्तते । तवर्गस्य षकारे यदुक्तम् तन्न भवति ।

अग्निचित्षण्डे । भवान् षण्डे ।

न—'ष्टुना ष्टुः' इत्यनेन प्राप्तं ष्टुत्वं न । **अग्निचित् षण्डे**—तकारस्य टकारो न ।

शात् ॥४४॥

शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति । विश्नः । प्रश्नः ।

विश्नः—√विच्छ् (गतौ) + नङ् । 'च्छ्वोः शूडनुनासिके च' इत्यनेन च्छकारस्य शकारः । **प्रश्नः**—√प्रच्छ (ज्ञीप्सायाम्) + नङ् ।

यरोऽनुनासिकेऽनुनासिको वा ॥४५॥

यरः पदान्तस्यानुनासिके परे अनुनासिकादेशो वा भवति । वाङ्नयति / वाग्नयति । श्वलिण्नयति / श्वलिड् नयति । त्रिष्टुम्नयति / त्रिष्टुब्नयति ।

❁ (वा०) मयटि नित्यं बाच्यम् । वाङ्मयम् । त्वङ्मयम् ।

वाङ्नयति—वाक् + नयति ककारस्य 'झलां जशोऽन्ते' इत्यनेन गकारे तस्य अनुनासिकादेशः । **मयटि**—वृत्तौ तु 'प्रत्यये भाषायां नित्यवचनं कर्त्तव्यम्' इति वार्तिकस्य स्वरूपमस्ति चिन्मात्रम् इत्यपि तत्रोदाहृतम् ।

अचो रहाभ्यां द्वे ॥४६॥

अच उत्तरौ यौ रेफ-हकारौ ताभ्याम् उत्तरस्य यरो द्वे भवतः । अर्क्कः । ब्रह्म्मा ।

अर्क्कः—√अर्च् + घञ् चकारस्य कुत्वम् = अर्क-ककारस्य द्वित्वम् ।

अनचि च ॥४७॥

अच उत्तरस्य यरो द्वे भवतः अनचि परतः । दद्ध्यत्र । मद्ध्वत्र ।

❁ (वा०) यणो मयो द्वे वाच्ये । उल्क्का । वल्म्मीकः ।

❁ (वा०) अवसाने च यरो द्वे भवतः । वाक्क् / वाक् । त्वक्क् / त्वक् ।

अनचि—अचोऽन्यः अनच्, स परो यस्मात् तस्मिन् हलि परे इत्यर्थः । **दद्ध्यत्र**—दधि + अत्र इकारस्य 'यण्' ततो द्वित्वम् । **उल्क्का**—उल्का इत्यत्र यणो लकारात्परः यर्-ककारोऽस्ति तस्य द्वित्वम् । अत्र केचित् आचार्याः 'मयः' इत्यत्र पञ्चमीं 'यणः' इत्यत्र च षष्ठीं मन्वते तेषां मते दद्ध्ण्यत्र इत्येवोदाहरणम् ।

वाक्क् / वाक्—विकल्पेनात्र द्वित्वं भवति 'यरोऽनुनासिके……'इत्यतः 'वा' इत्यनुवर्तनात् ।

❀(वा०) शरः खयो द्वे भवतः । 'शरः परस्य खयः' इत्यर्थे **स्त्थाली** । **स्त्थाता** इत्युदाहरणे । पूर्वस्य थकारस्य चर्त्वेन तकारः । 'खयः परस्य शरः' इत्यर्थे **वत्स्सः** । **अप्स्सराः** इत्यादि ।

नादिन्याक्रोशे पुत्रस्य ।।४८।।

आदिनि शब्दे परे पुत्र-शब्दस्य न द्वे भवतः आक्रोशे गम्ये । पुत्रादिनी त्वमसि पापे ।

पुत्रादिनी—पुत्रम् अत्तुं शीलम् अस्याः पुत्र √अद् + णिनि । 'अनचि च' इत्यनेन प्राप्तस्य द्वित्वस्य निषेधः ।

❀(वा०) तत्परे चेति वक्तव्यम् । **पुत्रपुत्रादिनी** त्वमसि पापे ।

❀ (वा०) वा हतजग्धयोः । **पुत्त्रहती / पुत्रहती** । **पुत्त्रजग्धी / पुत्रजग्धी** ।

'पापे' इति कथनेन आक्रोशो गम्यते । सत्यकथने तु भवत्येव द्वित्वम् **पुत्त्रादिनी सर्पिणी** ।

खयो द्वितीयाः शरि पौष्करसादेः ।।४८।। (क)

खयो द्वितीयाः भवन्ति पौष्करसादेः आचार्यस्य मतेन । तस्य 'थः' । कस्य 'खः' । पस्य 'फः' । वत्सः / वथ्सः । क्षीरम् / ख्षीरम् । अप्सराः / अफ्सराः ।

पौष्करसादिः—पुष्करे (तीर्थे) सीदति इति पुष्करसत् तस्यापत्यम् पुष्करसत् + इञ् 'बाह्वादिभ्यश्च' इत्यनेन । भाष्ये, वृत्तौ, कौमुद्यां चेदं वार्तिकरूपेणोक्तम् । **खयो** इत्यस्य स्थाने **चयो** इति पाठान्तरं च । पदमञ्जरी कारेण **खयो** इति पाठः उपन्यस्तः । अर्थे तु न भेदः । **खयो द्वितीयाः—ख-फ-छ-ठ-थ** इति वर्गस्य द्वितीयाः वर्णाः । **चयो द्वितीयाः—'चय्'** प्रत्याहारस्य द्वितीयवर्णाः ।

पौष्करसादेर्मते **वथ्सः** अन्येषां मते **वत्सः** इति रूपद्वयं भवति ।

शरोऽचि ॥४९॥

अचि परे शरो द्वे न भवतः । 'अचो रहाभ्यां द्वे' इति प्राप्तः प्रतिषिध्यते । कर्षति । वर्षति ।

कर्षति— √कृष (विलेखने) + लट् → तिप् गुणः । अत्र षकारस्य न द्वित्वम् । एवम् **आदर्शः** इत्यादि ।

त्रिप्रभृतिषु शाकटायनस्य ॥५०॥

'त्रि'-प्रभृतिषु वर्णेषु युक्तेषु शाकटायनस्य आचार्यस्य मतेन द्विर्वचनं न भवति । इन्द्रः । चन्द्रः । उष्ट्रः ।

इन्द्रः इत्यादि—'अनचि च' इत्यनेन द्वित्वं प्राप्तम् । **शाकटायन** इत्यस्याचार्यस्य उल्लेखः पूजार्थम् । नित्यमेवायं द्वित्वप्रतिषेधः ।

सर्वत्र शाकल्यस्य ॥५१॥

शाकल्यस्य आचार्यस्य मतेन सर्वत्रैव द्वित्वं न भवति । अर्कः । ब्रह्मा ।

अर्कः, ब्रह्मा—'अचो रहाभ्यां द्वे' इत्यनेन द्वित्वस्य प्राप्तिः । **शाकल्य-ग्रहणं** पूजार्थम् । विधिः, प्रतिषेधश्च द्वयमपि सूत्रद्वयेन भवति ।

दीर्घादाचार्याणाम् ॥५२॥

दीर्घादुत्तरस्य द्विर्वचनभाजः आचार्याणां मतेन द्विर्वचनं न भवति । दात्रम् । पात्रम् । सूत्रम् । मूत्रम् । गोत्रम् ।

दात्रम् इत्यादि—सर्वत्र 'अनचि च' इत्यनेन द्वित्वप्राप्तिः । **आचार्य-ग्रहणं** पूजार्थम् । नित्य एवायं विधिः ।

झलां जश् झशि ॥५३॥

झलां स्थाने जशो भवन्ति झशि परतः । लब्धा । लब्धुम् । लब्धव्यम् । दोग्धा । दोग्धुम् । दोग्धव्यम् ।

लब्धा—√लभ् + तृच् 'झषस्तथोर्धोऽधः' इति तकारस्य धकारे कृते झशि परतः भकारस्य 'जश्' बकारः । एवं तुमुन्-तव्यत् प्रत्यययोरपि परतः ।

दोग्धा—√दुह् + तृच् = 'दादेर्धातोर्घः' इत्यनेन हकारस्य घकारः, तकारस्य 'झषस्तथोः····' इत्यनेन धकारः । ततः पूर्वस्य घकारस्य 'जश्' गकारः । **झलां जश्** – वर्गस्य प्रथम-द्वितीय चतुर्थ वर्णानां तद्वर्गस्यैव तृतीयो वर्णो भवति ।

अभ्यासे चर्च ॥५४॥

अभ्यासे वर्तमानानां झलां 'चर्' आदेशो भवति । चकारात् जश्त्वं च । चिखनिषति । चिच्छित्सति । टिठकारयिषति । तिष्ठासति । पिफकारयिषति ।

प्रकृतिचरां प्रकृतिचरः–चिचीषति । पिपासति ।

प्रकृतिजशां प्रकृतिजशः–जिजनिषते / बुबुधे ।

चर्······**जश्त्वं च**—वर्गाणां द्वितीयवर्णानां चरः, चतुर्थानां च जशः आन्तरतम्यात् इति बोध्यम् ।

चिखनिषति—√खन् + सन् + लट् → तिप् द्वित्वे 'कुहोश्चुः' इति खकारस्य छकारः तस्यानेन चकारः । जश्त्वस्योदाहरणम् **जिघत्सति**—√अद् + सन् अदः 'घस्लृ' अभ्यासस्य घकारस्य 'कुहोश्चुः' इत्यनेन झकारः तस्यानेन जकारः ।

प्रकृतिचराम्—प्रकृतिरूपाणां चराम्, ये प्रकृत्या चरः तेषाम्; यथा √चर्–√टीक–√तन धातवः तेषां चरः एव न जश्त्वम् । एवं प्रकृतिजशां जशः एव न चर्त्वम् ।

खरि च ॥५५॥

झलां खरि परतः चर आदेशाः भवन्ति । 'जश्' ग्रहणं नानुवर्तते, पूर्वसूत्रे चानुकृष्टत्वात् । भेत्ता । भेत्तुम् / भेत्तव्यम् ।
युयुत्सते । आलिप्सते ।

भेत्ता—(√भिद्+तृच्) इत्यादिषु 'भिद्' इत्यस्य दकारस्य तकारः ।

युयुत्सते—√युध्+सन् धकारस्य तकारः। **आलिप्सते**—आ √लभ्+सन् भकारस्य पकारः।

वाऽवसाने ॥५६॥

अवसाने वर्तमानानां झलां वा चर आदेशाः भवन्ति। वाक् / वाग्। श्वलिट् / श्वलिड्। त्रिष्टुप् / त्रिष्टुब्।

वाक्/वाग्—'झलां जशोऽन्ते' इति नित्यं जश्त्वे प्राप्ते चर्त्वं विधीयते। 'वा' वचनात् पक्षे जश्त्वम् अपि।

अणोऽप्रगृह्यस्यानुनासिकः ॥५७॥

अणः अप्रगृह्यस्य अवसाने वर्तमानस्य वा अनुनासिकः आदेशो भवति। दधिँ / दधि। मधुँ / मधु। कुमारीँ / कुमारी।

'अणः' इति किम्? कर्तृ। हर्तृ।

अप्रगृह्यस्य किम्? अग्नी। वायू।

अणः—अ-इ-उ, एषां ग्रहणं भवति। **दधिँ-मधुँ**—नपुंसके सु-अम् इत्येतयोर्लुक्। **अग्नी-वायू**—'इदूदेद्द्विवचनं प्रगृह्यम्' इत्यनेन 'प्रगृह्य' संज्ञा।

अनुस्वारस्य ययि परसवर्णः ॥५८॥

अनुस्वारस्य ययि परतः परसवर्ण आदेशो भवति। शङ्किता। शङ्कितुम्। उञ्छिता। उञ्छितुम्। कुण्डिता। नन्दिता। कम्पिता।

शङ्किता इत्यादि—क्रमशः √शकि (हिंसायाम्)—√उछि (उञ्छे)—√कुडि (दाहे) √टुनदि (समृद्धौ)—√कपि (चलने) + तृच् प्रत्ययः। इदित्त्वात् नुम् 'श न् क् इता' इत्यवस्थायां 'नश्चापदान्तस्य झलि' इत्यनेन नकारस्य अनुस्वारः तस्यानेन परसवर्णः ङकारः। सर्वत्र ककारादिषु परतः अनुस्वारस्य तद्वर्गस्यैव पञ्चमो वर्णो भवति।

वा पदान्तस्य ॥५९॥

पदान्तस्य अनुस्वारस्य ययि परतो वा परसवर्ण आदेशो भवति।

तङ्कथञ्चित्रपक्षण्डयमानन्नभःस्थम्पुरुषोऽवधीत् ।

तं कथं चित्रपक्षं डयमानं नभःस्थं पुरुषोऽवधीत् ॥

अत्र श्लोकस्योत्तरार्द्धे **तं कथं पक्षं डयमानं नभःस्थं** लिखितानि पदानि अनुस्वारान्तानि । तेषाम् अनुस्वारस्य ककारादिषु परतः क्रमेण ङ्-ञ्-ण्-न्-म् आदेशाः पूर्वार्द्धे कृताः ।

तोर्लि ॥६०॥

तवर्गस्य लकारे परे ल्-वर्ण आदेशो भवति । अग्निचिल्लुनाति । भवाँल्लुनाति ।

अग्निचिल्लुनाति—अग्निचित् + लुनाति । तकारस्य लकारः । **भवाँल्लुनाति** -भवान् + लुनाति । नकारस्य अनुनासिको लकारः ।

उदः स्थास्तम्भोः पूर्वस्य ॥६१॥

उदः उत्तरयोः स्था-स्तम्भ, एतयोः पूर्वसवर्ण आदेशो भवति । स्था–उत्थाता । उत्थातुम् । स्तम्भ–उत्तम्भिता । उत्तम्भितुम् ।

❀ (वा०) उत्पूर्वस्य स्कन्देश्छन्दस्युपसंख्यानम् । अग्ने ! दूरमुत्कन्द ।

❀ (वा०) रोगे चेति वक्तव्यम् । उत्कन्दको नाम रोगः ।

उत्थाता—उद् + स्थाता 'आदेः परस्य' इत्यनेन परस्य आदिभूतस्य महाप्राण-अघोष-प्रयत्नवतः सकारस्य पूर्वसवर्णः थकार एव **'उद् थ् थानम्'** । 'खरि च' इत्यनेन पूर्व थकारस्य तकारः तस्य 'झरो झरि सवर्णे' इत्यनेन लोपः । **उत्कन्द**—उद् + √स्कन्द + लोट् → सिप् शप्–आगमः हि → लुक् । **उत्कन्दकः**—उद् √स्कन्द + ण्वुल् 'रोगाख्यां ण्वुल् बहुलम्' इत्यनेन ।

झयो होऽन्यतरस्याम् ॥६२॥

झयः उत्तरस्य हकारस्य पूर्वसवर्ण आदेशो भवत्यन्य-

तरस्याम् । वाग्घसति / वाग्हसति । श्वलिड्ढसति / श्वलिड् हसति । अग्निचिद्धसति / अग्निचिद् हसति ।

वाग्घसति—वाग् + हसति इत्यादौ हकारस्य सोष्मणः, महाप्राणवतः घोषवतश्च तादृश एव वर्ग-चतुर्थाः वर्णाः घ-झ-ढ-ध-भ भवन्ति । अत्र गकारस्य सवर्णः घकारः । **श्वलिड्ढसति**—अत्र श्वलिड् + हसति इति स्थितौ हकारस्य ढकारादेशो बोध्यः ।

शश्छोऽटि ॥६३॥

झयः उत्तरस्य शकारस्य अटि परतः छकार आदेशो भवति अन्यतरस्याम् । वाक्छेते / वाक्शेते । अग्निचिच्छेते / अग्निचिच्शेते ।

❀ (वा०) छत्वममीति वाच्यम् । तच्छ्लोकेन ।

अग्निचिच्छेते—अग्निचित् + शेते 'स्तोः श्चुना श्चुः' इत्यनेन चितः तकारस्य चकारः, अनेन शकारस्य विकल्पेन छकारः शकारात् परतः अटि 'ए' वर्तते । **तच्छ्लोकेन**–तत् + श्लोकेन । अत्र शकारात् परतो लकारः 'अट्'-प्रत्याहारान्तर्गतो नास्ति अमि कृते तु 'अम्'-प्रत्याहारान्तर्गतोऽस्ति इति तस्य शकारस्य छकारो भवति । वार्तिके **छत्वममीति**—छत्वम् + अमि + इति छेदः ।

'अटि' स्थाने 'अमि' वक्तव्यम् इत्यर्थः ।

हलो यमां यमि लोपः ॥६४॥

हलः उत्तरेषां यमां यमि परतो लोपो भवति वा । 'शय्या' इत्यत्र द्वौ यकारौ, क्रमजः तृतीयः । तत्र मध्यमस्य लोपो वा भवति । शय्या / शय्य्या ।

शय्या—√शीङ् + क्यप् 'संज्ञायां समज……' इत्यनेन । शीङः ईकारस्य 'अयङ् यि क्ङिति' इत्यनेन 'अयङ्' शय् या । पूर्व-यकारस्य 'अनचि च' इत्यनेन द्वित्वम् । अयम् तृतीयः यकारः क्रमजः 'शय् य् या' इति स्थितौ अनेन मध्यमस्य विकल्पेन लोपः । एवम् अदितेः अपत्यम् अदिति ण्य = **आदित्यः** । आदित्यो देवता अस्य इति 'सास्य देवता' इत्यनेन 'ण्य' । अत्र पूर्वम् आदित्यः इत्यत्र 'यणो मयो द्वे वाच्ये' इति वार्तिकेन मयः

परस्य यणो द्वित्वे **आदित्य्यः** । ततो देवतार्थे ण्य प्रत्यये 'यस्येति च' अलोपे तृतीयो यकारः **आदित्य्य्यः** । मध्यमयोर्विकल्पेन लोपः । **आदित्यः / आदित्य्यः** ।

झरो झरि सवर्णे ॥६५॥

हलः उत्तरस्य झरः सवर्णे झरि परतो लोपो भवत्यन्यतरस्याम् । प्रत्तम् / अवत्तम् । इत्यत्र त्रयः तकाराः, क्रमजः चतुर्थः । तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति ।

मरुत्तः इत्यत्र चत्वारः तकाराः क्रमजः पञ्चमः । तत्र मध्यमस्य मध्यमयोः, मध्यमानां वा लोपो भवति । मरुत्-शब्दस्योसंख्यानसामर्थ्यात् 'अच उपसर्गात्तः' इत्यनेन तत्वं भवति ।

प्रत्तम्—प्र √दा + क्त 'अच उपसर्गात्तः इत्यनेन दा–आकारस्य तकारः दकारस्य च चर्त्वेन तकारः 'अनचि च' इत्यनेन पूर्व-तकारस्य द्वित्वेन चत्वारः तकाराः । द्वयोर्लोपे द्वितकारकम्, **प्रत्तम्** एकस्य लोपे त्रितकारकं रूपं भवति । एवम् पक्षे **अवत्तम्** । **मरुत्त्तः**—मरुत् √दा + क्त पूर्वैः त्रिभिः तकारैः सह मरुतः तकारेण योगे सति चतुस्तकारकं रूपम्, 'अनचि च' इत्यनेन द्वित्वे पञ्चतकारकं रूपम् त्रयाणां क्रमेण लोपे **मरुत्तः** इति सिद्धयति । **उपसंख्यानसामर्थ्यात्**—अन्यथा उपसर्गेषु 'मरुत्' इत्यस्य पाठ एव व्यर्थः स्यात् ।

सवर्ण-ग्रहण-सामर्थ्यात् अत्र संख्यातानुदेशो न भवति । तेन **शिण्ढि** । **पिण्ढि** इत्यत्र 'शिण्ड् ढि' 'पिण्ड् ढि' इति स्थितौ ढकारे परतो डकारस्य लोपो भवति ।

उदात्तादनुदात्तस्य स्वरितः ॥६६॥

उदात्तात्परस्य अनुदात्तस्य स्वरितआदेशो भवति । गार्ग्यः । वात्स्यः । पचति । पठति । अस्य स्वरितस्य असिद्धत्वात् 'अनुदात्तं पदमेकवर्जम्' इत्येतन्न प्रवर्तते, तेन उदात्तः, स्वरितश्च द्वावपि श्रूयेते ।

गार्ग्यः, वात्स्यः—गर्ग + यञ्, वत्स + यञ् = 'ञ्नित्यादिर्नित्यम्'

इत्यनेन गार्ग्य-वात्स्यौ आद्युदात्तौ 'अनुदात्तं पदमेकवर्जम्' इत्यनेन शेषौ यकार-अकारौ अनुदात्तौ तयोः स्वरितौ आदेशौ स्तः। **पचति, पठति**—तिप्-शपौ पित्त्वात् अनुदात्तौ पकार-अकारः धातुस्वरेण उदात्तः, ततः परः शप्-अकारः स्वरितः।

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥६७॥

उदात्तोदयस्य, स्वरितोदयस्य चानुदात्तस्य स्वरित आदेशो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। अगार्ग्य-काश्यप-गालवानाम् आचार्याणां मतेन। उदात्तः उदयो यस्यासौ उदात्तोदयः—उदात्तपरः इत्यर्थः। एवं स्वरितोदयः। उदात्तोदयस्तावत्—गार्ग्यस्तत्र। वात्स्यस्तत्र। 'तत्र' शब्दः आद्युदात्तः—तत्र उदात्ते परतः 'गार्ग्य'—शब्दः स्वरितः। तत्परोऽनुदात्तः स्वरितो न भवति।

स्वरितोदयः—गार्ग्यः क्व? वात्स्यः क्व? 'क्व' शब्दः स्वरितः। तत्परोऽनुदात्तः स्वरितो न भवति।

अगार्ग्य—काश्यप—गालवानाम् इति किम्? गार्ग्यस्तत्र। गार्ग्यः क्व? तेषां हि स्वरितो भवत्येव।

'उदात्तस्वरितपरस्य' इत्येव वक्तव्ये 'उदय' ग्रहणं मङ्गलार्थम्। अनेकाचार्याणां सङ्कीर्तनं मङ्गलं पूजार्थं भवति।

तत्र—तद् + त्रल् लित्स्वरेण आद्युदात्तोऽयम्। **क्व**—किम्-अत् 'तित्स्वरितम्' इति 'क्व' स्वरितः।

उदात्त ''' मङ्गलार्थम्—'पर' शब्दस्य समानार्थः 'उदय' शब्दः प्रातिशाख्ये प्रसिद्धः। लाघवात् 'पर' शब्दे एव प्रयोक्तव्ये 'उदय' इत्यस्य अष्टाध्याय्याः अन्ते प्रयोगो मङ्गलार्थः। तथा चोक्तं भाष्ये—

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्ति; आयुष्मत्पुरुषाणि च।'

सूत्रकारेण महर्षिणा पाणिनिना आदौ 'वृद्धिरादैच्' (१-१-१) **वृद्धिः**, मध्ये 'शिवशमरिष्टस्य करे' (४-४-१४३) **शिवम्** तथा अन्ते 'नोदात्तस्वरितोदय……' **उदयः** इति मङ्गलार्थानि पदानि प्रयुक्तानि।

अत्र मङ्गलार्थकस्य उदय-शब्दस्य पाठेन उत्तरसूत्रारभ्योऽपि मङ्गल-पूर्वको भवति। तेन संवृताकारेण दीर्घप्लुतयोर्न ग्रहणम् मात्रिकस्य सर्वगुण-युक्तस्य च ग्रहणं भवति इत्येतस्मादिष्टार्थसिद्धिर्विज्ञेया।

'अनेकाचार्याणाम्.......'—मंगलशब्दम् उच्चार्य गार्ग्य-काश्यप-गालवानाम् प्रतिषेधमुखेन वाचा तदितरेषां च स्फोटायन-शाकटायन-शाकल्य-चाक्रवर्मण-पौष्करसादि प्रभृतीनां विधिमुखेन मनसा नामोच्चार्य सर्वेषाम् पूजा विहिता।

अ अ ॥६८॥

'अ-अ' इति एको विवृतः। अपरः संवृतः क्रियते। अकारो विवृतः संवृतो भवति। वृक्षः। प्लक्षः।

इह शास्त्रे कार्यार्थम् अकारो विवृतः प्रतिज्ञातः। तस्य तथाभूतस्य प्रयोगो मा विज्ञायि इति संवृत-प्रत्यापत्तिरियं क्रियते।

दीर्घ-प्लुतयोश्चानेन विवृताकारेण ग्रहणं नेष्यते। तेन तयोः संवृतो न भवति।

संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते। तेन सर्वगुणः प्रत्यापद्यते। श्रीकृष्णो जयति॥ 卐॥

रषाभ्यामुभौष्टुनाष्टुस्तोर्लि नव॥६९॥

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन
सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण
आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
अष्टमाध्यायस्य चतुर्थः पादः।

सम्पूर्णोऽष्टमाध्यायः।

समाप्तश्चायं ग्रन्थः

३९८५ एतावन्त्यत्र सूत्राणि

श्रीमत्कश्यपवंशपद्मसरसो हंसः प्रशंसाकरः
कंसारातिपरायणो विजयते श्रीरामकृष्णः कृती ।
तत्पुत्रो रघुधीरवीरचरणाम्भोजातसेवी बलः
सारं प्रोद्धृतवान् सुखाय पठतां यः काशिकान्तर्गतम् ॥

अन्वयः—श्रीमत्कश्यपगोत्रपद्मसरसः प्रशंसाकरः हंसः कंसारातिपरायणः कृती श्रीरामकृष्णः विजयते । तत्पुत्रः रघुधीरवीरचरणाम्भोजातसेवी बलः (अस्ति) यः पठतां सुखाय काशिकान्तर्गतं सारं प्रोद्धृतवान् ॥

व्याख्या—आचार्यबलभद्रस्य शिष्यस्योक्तिरियम् प्रतीयते—**श्रीमत्कश्यपगोत्रपद्मसरसः** = **श्रीमत्** शोभाशालि **कश्यपगोत्रम्** एव **पद्मसरः** कमलयुतं सरोवरम्, तस्य **प्रशंसाकरः** शोभावृद्धिकरः **हंसः** इव महापण्डितः **कंसारातिपरायणः** कंसस्य अरातिः = शत्रुः श्रीकृष्णस्तस्य परायणः भक्तः **कृती** पुण्यात्मा **श्रीरामकृष्णः** एतन्नामको विद्वान् **विजयते** सर्वोत्कर्षेण वर्तते । **तत्पुत्रः** तस्य पुत्रः **रघुधीरवीरचरणाम्भोजातसेवी**—रघोः धीरः वीरः वंशजः श्रीरामः तस्य चरणौ अम्भोजातं कमलम् तत् सेवितुं तच्छीलः **बलः** बलभद्रः (अस्ति), यः **पठताम्** विद्यार्थिनां **सुखाय काशिकान्तर्गतम्** काशिकावृत्तिग्रन्थे समाहितं **सारम्** शब्दसिद्धिरूपम् उत्कृष्टम् अंशं **प्रोद्धृतवान्** समचिनोत् । एवम् अनायासेन, अल्पायासेन शब्दव्युत्पत्तिज्ञानम् अस्याध्ययनेन सुकरम् इति प्रदर्शितम् ।

॥ श्रीकृष्णो जयति ॥

वेदर्षिराजर्षियुतेऽब्दे चैत्र्यां गुरुवासरे ।
श्रीरामग्रस्तधीश्चेमां बलभद्रोऽलिखत् स्वयम् ॥

अन्वयः—श्रीरामग्रस्तधीः बलभद्रः (च) इमां वेदर्षिराजर्षियुते अब्दे चैत्र्यां गुरुवासरे स्वयम् अलिखत् ।

व्याख्या—आचार्यबलभद्रस्य कस्यचन शिष्यस्य कथनमिदम्—**श्रीरामग्रस्तधीः** श्रीरामेण ग्रस्ता स्वायत्तीकृता धीः यस्यासौ श्रीरामप्रपन्नबुद्धिः **बलभद्रः** एतन्नामकाचार्यः **इमां** काशिकावृत्तिम् (सारम्) **वेदर्षिराजर्षियुते** (१७७४ संवत्सरे) **चैत्र्यां** चैत्रमासस्य पूर्णिमायां तिथौ **गुरुवासरे स्वयम् अलिखत्** ।

॥ भरताग्रजो विजयताम् ॥

इष्टयुपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥

अन्वयः—इयं काशिका नाम वृत्तिः इष्टयुपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था व्युत्पन्नरूपसिद्धिः (अस्ति) ।

व्याख्या—अयं श्लोकः काशिकावृत्तिग्रन्थस्यान्ते वर्तते । सा इयं वृत्तिः गुणचतुष्टयसम्पन्नाऽस्ति । **इष्टीनाम्** = सूत्रैरसंगृहीतलक्ष्याणाम् **उपसंख्यानम्** = सङ्ग्रहः, गणपाठे प्रामाणिकशब्दनिवेशः, गूढस्य सूत्रार्थस्य विवेचनम्, प्रयोगार्हशब्दसिद्धिप्रकारश्च अस्मिन् ग्रन्थे विराजते ।

एवं काशिकावृत्तिसारं निर्माय प्रसन्नमना आचार्यबलभद्रो भगवतो रामकृष्णयोः गुरोर्धरणीधरस्य च जयोद्घोषं कुरुते श्लोकत्रयेण ।

प्राणायामपरम्पराजितमरुत्सम्मार्जनीमार्जिते
निर्धौते सकलेन्द्रियाहृतिभुवा श्रद्धासुधाधारया ।
सन्तः स्वच्छतरेऽन्तरे कथमहो द्रक्ष्यन्ति शुक्लं ततः
श्रीकृष्णो जयति स्वभावसुभगां बिभ्रत्तनुं राघवः ॥

अन्वयः—अहो सन्तः प्राणायामपरम्पराजितमरुत्सम्मार्जनीमार्जिते सकलेन्द्रियाहृतिभुवा श्रद्धासुधाधारया निर्धौते (मदीये) स्वच्छतरे अन्तरे शुक्लं (परमात्मनो रूपं) कथं द्रक्ष्यन्ति ततः स्वभावसुभगां तनुं बिभ्रत् श्रीकृष्णो राघवः जयति ।

व्याख्या—काशिकावृत्तिसारकर्त्ता वैयाकरणशिरोमणिः आचार्यबलभद्रः ग्रन्थान्ते श्रीरामस्य जयवृद्धिरूपं मङ्गलमाचरन् शिष्यशिक्षायै तन्निबध्नाति—

अहो ! साश्चर्यहर्षस्य विषयः यत् **सन्तः** सदसद्विवेकिनः **प्राणायामपरम्पराजितमरुत्सम्मार्जनीमार्जिते** प्राणायामस्य परम्परया बहुकालं यावत् प्राणायामकरणेन **जितमरुत्सम्मार्जनी** वातसञ्चाररहिता या सम्मार्जनकरणी तया **मार्जिते** सम्यक्शोधिते (तदनन्तरम्) **सकलेन्द्रियाहृतिभुवा** सकलेन्द्रियाणाम् विषयेभ्यः आहृत्या प्रत्याहारेण भुवा जातया **श्रद्धासुधाधारया** श्रद्धा एव सुधाधारा तया **निर्धौते** प्रक्षालिते **स्वच्छतरे** अतिस्वच्छे **अन्तरे** हृदये (विराजमानस्य परमात्मनः) **शुक्लं** श्वेतं स्वरूपम् (एकरूपत्वात्) कथं द्रक्ष्यन्ति । **ततः** इति हेतोः **स्वभावसुभगाम्** स्वभावतः सुभगां-सुन्दरीं तनुं शरीराकृतिं बिभ्रत् **श्रीकृष्णः** श्रिया कृष्णः कृष्णवर्णः **राघवः** श्रीरामः जयति सर्वोत्कर्षेण वर्तते ।

बालक्रीडापूतगोपालवंशः शाम्यत्साधुस्वान्तकासारहंसः ।
मञ्चोदञ्चत्केशनिर्धूतकंसः कृष्णो जीयाद्वृष्णिवंशावतंसः ।।

अन्वयः—बालक्रीडापूतगोपालवंशः शाम्यत्साधुस्वान्तकासारहंसः मञ्चोदञ्चत्केशनिर्धूतकंसः वृष्णिवंशावतंसः कृष्णः जीयात् ।

व्याख्या—भगवतोः श्रीराम-श्रीकृष्णाख्ययोरभेदं दर्शयन् पूर्वं श्रीराम-जयघोषानन्तरमिदानीम् आचार्यबलभद्रः श्रीकृष्णस्य जयं कामयते—

बालक्रीडापूतगोपालवंशः—(व्रजे वसता) बालक्रीडया पूतः गोपालानां नन्दप्रभृतीनां वंशो येन सः, **शाम्यत्साधुस्वान्तकासारहंसः** शाम्यत् शान्तं भवत् यत् साधोः सत्पुरुषस्य स्वान्तं मनः तदेव कासारम् सरोवरं तस्य हंसः शोभाधायकः (साधोः शान्तं मनः श्रीभगवतोऽधिष्ठानेनैव शोभते) **मञ्चोदञ्चत्केशनिर्धूतकंसः** मञ्चे उदञ्चन् उद्गच्छन् केशनिर्धूतः केशेषु गृहीत्वा विनाशितः कंसो येन सः **वृष्णिवंशावतंसः** वृष्णेः तन्नामकस्य वंशस्य अवतंसः शिरोमणिः **श्रीकृष्णः जीयात्** सर्वोत्कर्षेण वर्तेत ।

देवाचार्य इवार्यकार्यकुशलो धैर्यैकधुर्योऽर्यमा
भ्रान्तध्वान्तविनाशनाय जगतामर्यस्य चर्यापरः ।
कार्याकार्यविचार्यवैदिकविधिर्दद्यात् सभार्यः शुभम्
धीरः श्रीधरणीधरो विजयते सत्सूरिवर्यो भुवि ।।

अन्वयः—देवाचार्यः इव आर्यकार्यकुशलः धैर्यैकधुर्यः जगतां भ्रान्त-ध्वान्तविनाशनाय अर्यमा अर्यस्य चर्यापरः कार्याकार्यविचार्यवैदिकविधिः सभार्यः धीरः श्रीधरणीधरः शुभं दद्यात् । (सः) सत्सूरिवर्यः भुवि विजयते ।

व्याख्या—साम्प्रतं श्रीबलभद्रः तदानीन्तनं प्रथितयशसं विद्वद्वर्यं गुरुं धरणीधरं शुभं प्रार्थयते—**देवाचार्यः** बृहस्पतिः इव **आर्यकार्यकुशलः**—शिक्षादाने (अध्यापने) दक्षः **धैर्यैकधुर्यः** दृढगम्भीरमनाः जगतां **भ्रान्तध्वान्त-विनाशनाय**—संसारे भ्रान्तप्राणिनाम् अज्ञानान्धकारस्य हरणे समर्थः **अर्यमा** सूर्यः **अर्यस्य चर्यापरः** सदाचारपरायणः **कार्याकार्यविचार्यवैदिकविधिः** वेदोक्तविधि-निषेधज्ञानवान् **सभार्यः** सपत्नीकः **धीरः श्रीधरणीधरः** एतन्नामको गुरुः **शुभं दद्यात्** । (सः) **सत्सूरिवर्यः** सत्सु सज्जनेषु विद्वत्सु श्रेष्ठः भुवि विजयते ।

अ अ—रूपस्याभेदेऽपि प्रयत्नभेदः । द्वावपि अविभक्तिकौ । विवृतः स्थानी, संवृतः आदेशः । **वृक्षः, प्लक्षः**—अत्र प्रयोगावस्थायाम् अकारः

संवृतः । **विवृतः प्रतिज्ञातः**—तेन 'विवृतम् ऊष्मणां स्वराणाञ्च' इति नियमेन सर्वे स्वराः विवृताः। अकारोऽपि विवृतः सन् सवर्णान् गृह्णाति इति यथा दण्ड + अग्रम् = **दण्डाग्रम्** इत्यत्र सवर्णदीर्घो भवति तथैव दण्ड + आढकम् = **दण्डाढकम्** इत्यत्रापि । **प्रत्यापत्तिः**—पुनः संवृतत्व-गुणप्रतिलम्भः ।

दीर्घ-प्लुतयोः **प्रत्यापद्यते**—यथा विवृतस्य ह्रस्वस्य 'अ' वर्णस्य संवृतः अकारो भवति तथा दीर्घ-प्लुतयोर्न एवञ्च मात्रिकस्य = ह्रस्वस्य सर्वगुणयुक्तस्य = (उदात्त-अनुदात्त-स्वरित भेदेन त्रिविधस्य अनुनासिक-अननुनासिकभेदेन पुनर्द्विविधस्येत्येवं षड्विधस्य) अकारस्यैव तादृशः षड्विधः अकारो भवति । तथा चात्र प्रयोगदशायाम् स्थानी, आदेशश्च उभय-विधोऽप्यकारः षड्विधः इति उभयत्रापि यथासंख्यं भवति तथा च सर्वेष्ट-सिद्धिरिति शम् ।

अष्टमाध्यायस्यास्मिन् चतुर्थे पादे रषाभ्यां नो णः समानपदे, उभौ साभ्यासस्य, ष्टुना ष्टुः इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तोर्लि इत्यत आरभ्य नव सूत्राणीति संकलनेन एकोनसप्ततिः (६९) सूत्राणि सन्ति ।

काशिकावृत्तिसारकारेणाचार्यबलभद्रेण 'खयो द्वितीयाः शरि पौष्क-रसादेः' इति सूत्रम् अधिकं लिखितम् । भाष्ये वृत्तौ कौमुद्यां चेदं वार्तिक-रूपेणोपन्यस्तम्, **खयो** इत्यस्य स्थाने **चयो** इति पाठान्तरं च । तथा च वृत्ति-कौमुदीग्रन्थानुसारं सूत्रसंख्या अष्टषष्टिः (६८) अस्ति । काशिकावृत्ति-सारेऽपि सैव संख्या सम्मता । अधिकं सूत्रम् (४८ क) इति संख्यया निर्दिष्टम् ।

इति सामवेदिविप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन
शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना
विरचितायां काशिकावृत्तिसारसुधायाम्
अष्टमाध्यायस्य चतुर्थः पादः ।

इति काशिकावृत्तिसारस्योत्तरार्धं समाप्तम् ॥

गीतालो येन गीता सहृदयसुखदा यस्य जाता सुजाता
मङ्गल्याफुल्लमल्ल्या व्यरचि सुमनसां मालिका मङ्गलायै ।
आनीता येन मञ्चे सुरपुररमणी चोर्वशी भारतीये
स श्रीलश्चन्द्रभानुः गुरुजनकृपयाऽवाप्तविद्योऽहमस्मि ॥१॥

येन प्रकाशि शोभा सुरभिभरयुता शेखरे जातकानाम्
माधुर्याऽऽपूरि चेयं प्रगुणितकुमुदा कीर्तिमाला खरारेः ।
सम्पाद्याऽमुद्रि दत्तस्य च विरलकृतिर्येन सामानुशिष्टिः
तेन प्रातानि टीका सरलशुचिसुधा काशिकावृत्तिसारे ॥२॥

काशिकावृत्तिसारेऽस्मिन् बलभद्र-कृते सुधा ।
सदा स्वादीयसी भूयात् पठतां मनसो मुदे ॥३॥

अब्देऽर्थपञ्चखधनेन युतेऽथ मासे ज्येष्ठे वलक्षशुभपक्षतिथौ दशम्याम् ।
देवेज्यवासर इयं कृपया गुरूणां पूर्णाऽर्थगौरववती विशदा सुधाऽभूत् ॥४॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
महादेव्यै सुधा सूत्रवृत्तियुक्ता समर्प्यते ॥५॥

अथ काशिकावृत्तिसारस्य

(उत्तरार्द्धस्य)

परिशिष्टानि

॥ श्रीः ॥

परिशिष्टम् १

अष्टाध्यायीसूत्रपाठः

(पञ्चमाध्यायादारभ्य समाप्तिपर्यन्तम्)

पञ्चमोऽध्यायः

प्रथमः पादः

१ प्राक् क्रीताच्छः

२ उगवादिभ्यो यत्

३ कम्बलाच्च संज्ञायाम्

४ विभाषा हविरपूपादिभ्यः

५ तस्मै हितम्

६ शरीरावयवाद्यत्

७ खलयवमाषतिलवृषब्रह्मणश्च

८ अजाविभ्यां थ्यन्

९ आत्मन्विश्वजनभोगोत्तरपदात्खः

१० सर्वपुरुषाभ्यां णढञौ

११ माणवचरकाभ्यां खञ्

१२ तदर्थं विकृतेः प्रकृतौ

१३ छदिरुपधिबलेर्ढञ्

१४ ऋषभोपानहोर्ञ्यः

१५ चर्मणोऽञ्

१६ तदस्य तदस्मिन्स्यादिति

१७ परिखाया ढञ्

१८ प्राग्वतेष्ठञ्

१९ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्

२० असमासे निष्कादिभ्यः

२१ शताच्च ठन्यतावशते

२२ संख्याया अतिशदन्तायाः कन्

२३ वतोरिड्वा

२४ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्

२५ कंसाट्टिठन्

२६ शूर्पादञन्यतरस्याम्

२७ शतमानविंशतिकसहस्रवसनादण्

२८ अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्

२९ विभाषा कार्षापणसहस्राभ्याम्

३० द्वित्रिपूर्वान्निष्कात्

३१ बिस्ताच्च

३२ विंशतिकात्खः

३३ खार्या ईकन्

३४ पणपादमाषशताद्यत्

३५ शाणाद्वा

३६ द्वित्रिपूर्वादण्च (वा०)

३७ तेन क्रीतम्

३८ तस्य निमित्तं संयोगोत्पातौ

३९ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्

४० पुत्राच्छ च

४१ सर्वभूमिपृथिवीभ्यामण्ञौ

४२ तस्येश्वरः

४३ तत्र विदित इति च ।

४४ लोकसर्वलोकाट्ठञ्

४५ तस्य वापः

४६ पात्रात्ष्ठन्

४७ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते

४८ पूरणार्थाट्ठन्

४९ भागाद्यच्च

५० तद्धरतिवहत्यावहति भाराद्वंशादिभ्यः

५१ वस्नद्रव्याभ्यां ठन्कनौ

५२ संभवत्यवहरति पचति

५३ आढकाचितपात्रात्खोऽन्यतरस्याम्

५४ द्विगोः ष्ठंश्च

५५ कुलिजाल्लुक्खौ च

५६ सोऽस्यांशवस्नभृतयः

५७ तदस्य परिमाणम्

५८ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु

५९ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्

६० पञ्चद्दशतौ वर्गे वा

६१ सप्तनोऽञ्छन्दसि

६२ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्

६३ तदर्हति

६४ छेदादिभ्यो नित्यम्

६५ शीर्षच्छेदाद्यच्च

६६ दण्डादिभ्यो यः

६७ छन्दसि च

६८ पात्राद्घंश्च

६९ कडंकरदक्षिणाच्छ च

७० स्थालीबिलात्

७१ यज्ञर्त्विग्भ्यां घखञौ

७२ पारायणतुरायणचान्द्रायणं वर्तयति

७३ संशयमापन्नः

७४ योजनं गच्छति

७५ पथः ष्कन्

७६ पन्थो ण नित्यम्

७७ उत्तरपथेनाहृतं च

७८ कालात्

७९ तेन निर्वृत्तम्

८० तमधीष्टो भृतो भूतो भावी

८१ मासाद्वयसि यत्खञौ

८२ द्विगोर्यप्

८३ षण्मासाण्ण्यच्च

८४ अवयसि ठंश्च

८५ समायाः खः

८६ द्विगोर्वा

८७ रात्र्यहःसंवत्सराच्च

८८ वर्षाल्लुक्च

८९ चित्तवति नित्यम्

९० षष्टिकाः षष्टिरात्रेण पच्यन्ते

९१ वत्सरान्ताच्छश्छन्दसि

९२ संपरिपूर्वात्ख च

९३ तेन परिजय्यलभ्यकार्यसुकरम्

९४ तदस्य ब्रह्मचर्यम्

९५ तस्य च दक्षिणा यज्ञाख्येभ्यः

९६ तत्र च दीयते कार्यं भवत्

९७ व्युष्टादिभ्योऽण्

९८ तेन यथाकथाचहस्ताभ्यां णयतौ

९९ संपादिनि

१०० कर्मवेषाद्यत्

१०१ तस्मै प्रभवति संतापादिभ्यः

१०२ योगाद्यच्च

१०३ कर्मण उकञ्

१०४ समयस्तदस्य प्राप्तम्

१०५ ऋतोरण्

१०६ छन्दसि घस्

१०७ कालाद्यत्

१०८ प्रकृष्टे ठञ्

१०९ प्रयोजनम्

११० विशाखाषाढादण्मन्थदण्डयोः

१११ अनुप्रवचनादिभ्यश्छः

११२ समापनात्सपूर्वपदात्

११३ ऐकागारिकट् चौरे

११४ आकालिकडाद्यन्तवचने

११५ तेन तुल्यं क्रिया चेद्वतिः

११६ तत्र तस्येव

११७ तदर्हम्

११८ उपसर्गाच्छन्दसि धात्वर्थे

११९ तस्य भावस्त्वतलौ

१२० आ च त्वात्

१२१ न नञ्पूर्वात्तत्पुरुषादचतुरसंगत-
लवणवटयुधकतरसलसेभ्यः

१२२ पृथ्वादिभ्य इमनिज्वा

१२३ वर्णदृढादिभ्यः ष्यञ्च

१२४ गुणवचनब्राह्मणादिभ्यः कर्मणि

१२५ स्तेनाद्यन्नलोपश्च

१२६ सख्युर्यः

१२७ कपिज्ञात्योर्ढक्

१२८ पत्यन्तपुरोहितादिभ्यो यक्

१२९ प्राणभृज्जातिवयोवचनोद्गात्रादि-
भ्योऽञ्

१३० हायनान्तयुवादिभ्योऽण्

१३१ इगन्ताच्च लघुपूर्वात्

१३२ योपधाद्गुरूपोत्तमाद्वुञ्

१३३ द्वन्द्वमनोज्ञादिभ्यश्च

१३४ गोत्रचरणाच्छ्लाघात्याकारतदवे-
तेषु

१३५ होत्राभ्यश्छः

१३६ ब्रह्मणस्त्वः

द्वितीयः पादः

१ धान्यानां भवने क्षेत्रे खञ्
२ व्रीहिशाल्योर्ढक्
३ यवयवकषष्टिकाद्यत्
४ विभाषा तिलमाषोमाभङ्गाणुभ्यः
५ सर्वचर्मणः कृतः खखञौ
६ यथामुखसंमुखस्य दर्शनः खः
७ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति
८ आप्रपदं प्राप्नोति
९ अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु
१० परोवरपरंपरपुत्रपौत्रमनुभवति
११ अवारपारात्यन्तानुकामंगामी
१२ समांसमां विजायते
१३ अद्यश्वीनावष्टब्धे
१४ आगवीनः
१५ अनुग्वलंगामी
१६ अध्वनो यत्खौ
१७ अभ्यमित्राच्छ च
१८ गोष्ठात्खञ्भूतपूर्वे
१९ अश्वस्यैकाहगमः
२० शालीनकौपीने अधृष्टाकार्ययोः
२१ व्रातेन जीवति
२२ साप्तपदीनं सख्यम्
२३ हैयंगवीनं संज्ञायाम
२४ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ
२५ पक्षात्तिः
२६ तेन वित्तश्चुञ्चुप्चणपौ
२७ विनञ्भ्यां नानाञौ न सह
२८ वेः शालच्छङ्कटचौ
२९ संप्रोदश्च कटच्
३० अवात्कुटारच्च
३१ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः
३२ नेर्बिडज्बिरीसचौ
३३ इनच्पिटच्चिकचि च
३४ उपाधिभ्यां त्यकन्नासन्नारूढयोः
३५ कर्मणि घटोऽठच्
३६ तदस्य संजातं तारकादिभ्य इतच्
३७ प्रमाणे द्वयसज्दघ्नञ्मात्रचः
३८ पुरुषहस्तिभ्यामण्च
३९ यत्तदेतेभ्यः परिमाणे वतुप्
४० किमिदंभ्यां वो घः
४१ किमः संख्यापरिमाणे डति च
४२ संख्याया अवयवे तयप्
४३ द्वित्रिभ्यां तयस्यायज्वा
४४ उभादुदात्तो नित्यम्
४५ तदस्मिन्नधिकमिति दशान्ताड्डः
४६ शदन्तविंशतेश्च
४७ संख्याया गुणस्य निमाने मयट्
४८ तस्य पूरणे डट्
५० थट् च छन्दसि
५१ षट्कतिकतिपयचतुरां थुक्
५२ बहुपूगगणसङ्घस्य तिथुक्
५३ वतोरिथुक्
५४ द्वेस्तीयः

५५ त्रेः संप्रसारणं च
५६ विंशत्यादिभ्यस्तमडन्यतरस्याम्
५७ नित्यं शतादिमासार्धमाससंवत्सराच्च
५८ षष्ट्यादेश्चासंख्यादेः
५९ मतौ छः सूक्तसाम्नोः
६० अध्यायानुवाकयोर्लुक्
६१ विमुक्तादिभ्योऽण्
६२ गोषदादिभ्यो वुन्
६३ तत्र कुशलः पथः
६४ आकर्षादिभ्यः कन्
६५ धनहिरण्यात्कामे
६६ स्वाङ्गेभ्यः प्रसिते
६७ उदराट्ठगाद्यूने
६८ सस्येन परिजातः
६९ अंशं हारी
७० तन्त्रादचिरापहृते
७१ ब्राह्मणकोष्णिके संज्ञायाम्
७२ शीतोष्णाभ्यां कारिणि
७३ अधिकम्
७४ अनुकाभिकाभीकः कमिता
७५ पार्श्वेनान्विच्छति
७६ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ
७७ तावतिथं ग्रहणमिति लुग्वा
७८ स एषां ग्रामणीः
७९ शृङ्खलमस्य बन्धनं करभे
८० उत्क उन्मनाः
८१ कालप्रयोजनाद्रोगे
८२ तदस्मिन्नन्नं प्राये संज्ञायाम्
८३ कुल्माषादञ्
८४ श्रोत्रियंश्छन्दोऽधीते
८५ श्राद्धमनेन भुक्तमिनिठनौ
८६ पूर्वादिनिः
८७ सपूर्वाच्च
८८ इष्टादिभ्यश्च
८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि
९० अनुपद्यन्वेष्टा
९१ साक्षाद्द्रष्टरि संज्ञायाम्
९२ क्षेत्रियच्परक्षेत्रे चिकित्स्यः
९३ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा
९४ तदस्यास्त्यस्मिन्निति मतुप्
९५ रसादिभ्यश्च
९६ प्राणिस्थादातो लजन्यतरस्याम्
९७ सिध्मादिभ्यश्च
९८ वत्सांसाभ्यां कामबले
९९ फेनादिलच्च
१०० लोमादिपामादिपिच्छादिभ्यः शनेलचः
१०१ प्रज्ञाश्रद्धार्चाभ्यो णः
१०२ तपःसहस्राभ्यां विनीनी
१०३ अण् च
१०४ सिकताशर्कराभ्यां च
१०५ देशे लुबिलचौ च
१०६ दन्त उन्नत उरच्

१०७ ऊषशुषिमुष्कमधो रः
१०८ द्युद्रुभ्यां मः
१०९ केशाद्वोऽन्यतरस्याम्
११० गाण्डयजगात्संज्ञायाम्
१११ काण्डाण्डादीरन्नीरचौ
११२ रजःकृष्यासुतिपरिषदो वलच्
११३ दन्तशिखात्संज्ञायाम्
११४ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जखलगोमिन्मलिनमलीमसाः
११५ अत इनिठनौ
११६ व्रीह्यादिभ्यश्च
११७ तुन्दादिभ्य इलच्च
११८ एकगोपूर्वाट्ठञ्नित्यम्
११९ शतसहस्रान्ताच्च निष्कात्
१२० रूपादाहतप्रशंसयोर्यप्
१२१ अस्मायामेधास्रजो विनिः
१२२ बहुलं छन्दसि
१२३ ऊर्णाया युस्
१२४ वाचो ग्मिनिः
१२५ आलजाटचौ बहुभाषिणि
१२६ स्वामिन्नैश्वर्ये
१२७ अर्श आदिभ्योऽच्
१२८ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः
१२९ वातातीसाराभ्यां कुक्च
१३० वयसि पूरणात्
१३१ सुखादिभ्यश्च
१३२ धर्मशीलवर्णान्ताच्च
१३३ हस्ताज्जातौ
१३४ वर्णाद्ब्रह्मचारिणि
१३५ पुष्करादिभ्यो देशे
१३६ बलादिभ्यो मतुबन्यतरस्याम्
१३७ संज्ञायां मन्माभ्याम्
१३८ कंशंभ्यां बभयुस्तितुतयसः
१३९ तुन्दिवलिवटेर्भः
१४० अहंशुभमोर्युस्

———

तृतीय पादः

१ प्राग्दिशो विभक्तिः
२ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः
३ इदम इश्
४ एतेतौ रथोः
५ एतदोऽन् (एतदोऽश्)
६ सर्वस्य सोऽन्यतरस्यां दि
७ पञ्चम्यास्तसिल्
८ तसेश्च
९ पर्यभिभ्यां च
१० सप्तम्यास्त्रल्
११ इदमो हः
१२ किमोऽत्
१३ वा ह च च्छन्दसि
१४ इतराभ्योऽपि दृश्यन्ते
१५ सर्वैकान्यकियत्तदः काले दा
१६ इदमो र्हिल्
१७ अधुना
१८ दानीं च

१९ तदो दा च
२० तयोर्दार्हिलौ च च्छन्दसि
२१ अनद्यतने र्हिलन्यतरस्याम्
२२ सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः
२३ प्रकारवचने थाल्
२४ इदमस्थमुः
२५ किमश्च
२६ था हेतौ च च्छन्दसि
२७ दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः
२८ दक्षिणोत्तराभ्यामतसुच्
२९ विभाषा परावराभ्याम्
३० अञ्चेर्लुक्
३१ उपर्युपरिष्टात्
३२ पश्चात्
३३ पश्च पश्चा च च्छन्दसि
३४ उत्तराधरदक्षिणादातिः
३५ एनबन्यतरस्यामदूरेऽपञ्चम्याः
३६ दक्षिणादाच्
३७ आहि च दूरे
३८ उत्तराच्च
३९ पूर्वाधरावराणामसिपुरधवश्चैषाम्
४० अस्ताति च
४१ विभाषाऽवरस्य
४२ संख्याया विधार्थे धा
४३ अधिकरणविचाले च
४४ एकाद्धो ध्यमुञन्यतरस्याम्
४५ द्वित्र्योश्च धमुञ्
४६ एधाच्च
४७ याप्ये पाशप्
४८ पूरणाद्भागे तीयादन्
४९ प्रागेकादशभ्योऽच्छन्दसि
५० षष्ठाष्टमाभ्यां ञ च
५१ मानपश्वङ्गयोः कन्लुकौ च
५२ एकादाकिनिच्चासहाये
५३ भूतपूर्वे चरट्
५४ षष्ठ्या रूप्य च
५५ अतिशायने तमबिष्ठनौ
५६ तिङश्च
५७ द्विवचनविभज्योपपदे तरबीयसुनौ
५८ अजादी गुणवचनादेव
५९ तुश्छन्दसि
६० प्रशस्यस्य श्रः
६१ ज्य च
६२ वृद्धस्य च
६३ अन्तिकबाढयोर्नेदसाधौ
६४ युवाल्पयोः कनन्यतरस्याम्
६५ विन्मतोर्लुक्
६६ प्रशंसायां रूपप्
६७ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः
६८ विभाषा सुपो बहुच्पुरस्तात्तु
६९ प्रकारवचने जातीयर्
७० प्रागिवात्कः
७१ अव्ययसर्वनाम्नामकच्प्राक्टेः
७२ कस्य च दः
७३ अज्ञाते
७४ कुत्सिते

७५ संज्ञायां कन्
७६ अनुकम्पायाम्
७७ नीतौ च तद्युक्तात्
७८ बह्वचो मनुष्यनाम्नष्ठज्वा
७९ घनिलचौ च
८० प्राचामुपादेरडज्वुचौ च
८१ जातिनाम्नः कन्
८२ अजिनान्तस्योत्तरपदलोपश्च
८३ ठाजादावूर्ध्वं द्वितीयादचः
८४ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्
८५ अल्पे
८६ ह्रस्वे
८७ संज्ञायां कन्
८८ कुटीशमीशुण्डाभ्यो रः
८९ कुत्वा डुपच्
९० कासूगोणीभ्यां ष्टरच्
९१ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे
९२ किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्
९३ वा बहूनां जातिपरिप्रश्ने डतमच्
९४ एकाच्च प्राचाम्
९५ अवक्षेपणे कन्
९६ इवे प्रतिकृतौ
९७ संज्ञायां च
९८ लुम्मनुष्ये
९९ जीविकार्थे चापण्ये
१०० देवपथादिभ्यश्च
१०१ वस्तेर्ढञ्
१०२ शिलाया ढः
१०३ शाखादिभ्यो यः
१०४ द्रव्यं च भव्ये
१०५ कुशाग्राच्छः
१०६ समासाच्च तद्विषयात्
१०७ शर्करादिभ्योऽण्
१०८ अङ्गुल्यादिभ्यष्ठक्
१०९ एकशालायाष्ठजन्यतरस्याम्
११० कर्कलोहितादीकक्
१११ प्रत्नपूर्वविश्वेमात्थाल्छन्दसि
११२ पूगाञ्ञ्योऽग्रामणीपूर्वात्
११३ व्रातच्फञोरस्त्रियाम्
११४ आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्
११५ वृकाट्टेण्यण्
११६ दामन्यादित्रिगर्तषष्ठाच्छः
११७ पर्श्वादियौधेयादिभ्योऽणञौ
११८ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्
११९ ञ्यादयस्तद्राजाः

चतुर्थः पादः

१ पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च
२ दण्डव्यवसर्गयोश्च
३ स्थूलादिभ्यः प्रकारवचने कन्
४ अनत्यन्तगतौ क्तात्

५ न सामिवचने
६ बृहत्या आच्छादने
७ अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाऽध्युत्तरपदात्खः
८ विभाषाञ्चेरदिक्स्त्रियाम्
९ जात्यन्ताच्छ बन्धुनि
१० स्थानान्ताद्विभाषा सस्थानेनेति चेत्
११ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे
१२ अमु च च्छन्दसि
१३ अनुगादिनष्ठक्
१४ णचः स्त्रियामञ्
१५ अणिनुणः
१६ विसारिणो मत्स्ये
१७ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्
१८ द्वित्रिचतुर्भ्यः सुच्
१९ एकस्य सकृच्च
२० विभाषा बहोर्धाऽविप्रकृष्टकाले
२१ तत्प्रकृतवचने मयट्
२२ समूहवच्च बहुषु
२३ अनन्तावसथेतिहभेषजाञ्ञ्यः
२४ देवतान्तात् तादर्थ्ये यत्
२५ पादार्घाभ्यां च
२६ अतिथेर्ञ्यः
२७ देवात्तल्
२८ अवेः कः
२९ यावादिभ्यः कन्
३० लोहितान्मणौ
३१ वर्णे चानित्ये
३२ रक्ते
३३ कालाच्च
३४ विनयादिभ्यष्ठक्
३५ वाचो व्याहृतार्थायाम्
३६ तद्युक्तात्कर्मणोऽण्
३७ ओषधेरजातौ
३८ प्रज्ञादिभ्यश्च
३९ मृदस्तिकन्
४० सस्नौ प्रशंसायाम्
४१ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि
४२ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्
४३ संख्यैकवचनाच्च वीप्सायाम्
४४ प्रतियोगे पञ्चम्यास्तसिः
४५ अपादाने चाहीयरुहोः
४६ अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः
४७ हीयमानपापयोगाच्च
४८ षष्ठ्या व्याश्रये
४९ रोगाच्चापनयने
५० अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः
५१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च
५२ विभाषा साति कार्त्स्न्ये
५३ अभिविधौ संपदा च
५४ तदधीनवचने
५५ देये त्रा च
५६ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्

५७ अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्
५८ कृञो द्वितीयतृतीयशम्बबीजात्कृषौ
५९ संख्यायाश्च गुणान्तायाः
६० समयाच्च यापनायाम्
६१ सपत्रनिष्पत्रादतिव्यथने
६२ निष्कुलान्निष्कोषणे
६३ सुखप्रियादानुलोम्ये
६४ दुःखात्प्रातिलोम्ये
६५ शूलात्पाके
६६ सत्यादशपथे
६७ मद्रात्परिवापणे
६८ समासान्ताः
६९ न पूजनात्
७० किमः क्षेपे
७१ नञस्तत्पुरुषात्
७२ पथो विभाषा
७३ बहुव्रीहौ संख्येये डजबहुगणात्
७४ ऋक्पूरब्धूः पथामानक्षे
७५ अच्प्रत्यन्ववपूर्वात्सामलोम्नः
७६ अक्ष्णोऽदर्शनात्
७७ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः
७८ ब्रह्महस्तिभ्यां वर्चसः
७९ अवसमन्धेभ्यस्तमसः
८० श्वसो वसीयः श्रेयसः
८१ अन्ववतप्ताद्रहसः
८२ प्रतेरुरसः सप्तमीस्थात्
८३ अनुगवमायामे
८४ द्विस्तावा त्रिस्तावा वेदिः
८५ उपसर्गादध्वनः
८६ तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः
८७ अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः
८८ अह्नोऽह्न एतेभ्यः
८९ न संख्यादेः समाहारे
९० उत्तमैकाभ्यां च
९१ राजाहःसखिभ्यष्टच्
९२ गोरतद्धितलुकि
९३ अग्राख्यायामुरसः
९४ अनोश्मायःसरसां जातिसंज्ञयोः
९५ ग्रामकौटाभ्यां च तक्ष्णः
९६ अतेः शुनः
९७ उपमानादप्राणिषु
९८ उत्तरमृगपूर्वाच्च सक्थ्नः
९९ नावो द्विगोः
१०० अर्धाच्च
१०१ खार्याः प्राचाम्
१०२ द्वित्रिभ्यामञ्जलेः
१०३ अनसंतान्नपुंसकाच्छन्दसि
१०४ ब्रह्मणो जानपदाख्यायाम्
१०५ कुमहद्भ्यामन्यतरस्याम्
१०६ द्वन्द्वाच्चुदषहान्तात्समाहारे
१०७ अव्ययीभावे शरत्प्रभृतिभ्यः
१०८ अनश्च

१०९ नपुंसकादन्यतरस्याम्
११० नदीपौर्णमास्याग्रहायणीभ्यः
१११ झयः
११२ गिरेश्च सेनकस्य
११३ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्
११४ अङ्गुलेर्दारुणि
११५ द्वित्रिभ्यां ष मूर्ध्नः
११६ अप्पूरणीप्रमाण्योः
११७ अन्तर्बहिर्भ्यां च लोम्नः
११८ अञ्नासिकायाः संज्ञायां नसं चास्थूलात्
११९ उपसर्गाच्च
१२० सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः
१२१ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्
१२२ नित्यमसिच्प्रजामेधयोः
१२३ बहुप्रजाश्छन्दसि
१२४ धर्मादनिच्केवलात्
१२५ जम्भा सुहरिततृणसोमेभ्यः
१२६ दक्षिणेर्मा लुब्धयोगे
१२७ इच्कर्मव्यतिहारे
१२८ द्विदण्ड्यादिभ्यश्च
१२९ प्रसंभ्यां जानुनोर्ज्ञुः
१३० ऊर्ध्वाद्विभाषा
१३१ ऊधसोऽनङ्
१३२ धनुषश्च
१३३ वा संज्ञायाम्
१३४ जायाया निङ्
१३५ गन्धस्येदुत्पूतिसुसुरभिभ्यः
१३६ अल्पाख्यायाम्
१३७ उपमानाच्च
१३८ पादस्य लोपोऽहस्त्यादिभ्यः
१३९ कुम्भपदीषु च
१४० संख्यासुपूर्वस्य
१४१ वयसि दन्तस्य दतृ
१४२ छन्दसि च
१४३ स्त्रियां संज्ञायाम्
१४४ विभाषा श्यावारोकाभ्याम्
१४५ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च
१४६ ककुदस्यावस्थायां लोपः
१४७ त्रिककुत्पर्वते
१४८ उद्विभ्यां काकुदस्य
१४९ पूर्णाद्विभाषा
१५० सुहृद्दुर्हृदौ मित्रामित्रयोः
१५१ उरःप्रभृतिभ्यः कप्
१५२ इनः स्त्रियाम्
१५३ नद्यृतश्च
१५४ शेषाद्विभाषा
१५५ न संज्ञायाम्
१५६ ईयसश्च
१५७ वन्दिते भ्रातुः
१५८ ऋतश्छन्दसि
१५९ नाडीतन्त्र्योः स्वाङ्गे
१६० निष्प्रवाणिश्च

———

षष्ठोऽध्यायः

प्रथमः पादः

१ एकाचो द्वे प्रथमस्य
२ अजादेर्द्वितीयस्य
३ न न्द्राः संयोगादयः
४ पूर्वोऽभ्यासः
५ उभे अभ्यस्तम्
६ जक्षित्यादयः षट्
७ तुजादीनां दीर्घोऽभ्यासस्य
८ लिटि धातोरनभ्यासस्य
९ सन्यङोः
१० श्लौ
११ चङि
१२ दाश्वान्साह्वान्मीढ्वांश्च
१३ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे
१४ बन्धुनि बहुव्रीहौ
१५ वचिस्वपियजादीनां किति
१६ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च
१७ लिटयभ्यासस्योभयेषाम्
१८ स्वापेश्चङि
१९ स्वपिस्यमिव्येञां यङि
२० न वशः
२१ चायः की
२२ स्फायः स्फी निष्ठायाम्
२३ स्त्यः प्रपूर्वस्य
२४ द्रवमूर्तिस्पर्शयोः श्यः
२५ प्रतेश्च
२६ विभाषाभ्यवपूर्वस्य
२७ शृतं पाके
२८ प्यायः पी
२९ लिड्यङोश्च
३० विभाषा श्वेः
३१ णौ च संश्चङोः
३२ ह्वः संप्रसारणम्
३३ अभ्यस्तस्य च
३४ बहुलं छन्दसि
३५ चायः की
३६ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्ताः
३७ न संप्रसारणे संप्रसारणम्
३८ लिटि वयो यः
३९ वश्चास्यान्यतरस्यां किति
४० वेञः
४१ ल्यपि च
४२ ज्यश्च
४३ व्यश्च
४४ विभाषा परेः
४५ आदेच उपदेशेऽशिति
४६ न व्यो लिटि
४७ स्फुरतिस्फुलत्योर्घञि
४८ क्रीङ्जीनां णौ
४९ सिध्यतेरपारलौकिके
५० मीनातिमिनोतिदीङां ल्यपि च
५१ विभाषा लीयतेः
५२ खिदेश्छन्दसि
५३ अपगुरो णमुलि

५४ चिस्फुरोर्णौ
५५ प्रजने वीयतेः
५६ बिभेतेर्हेतुभये
५७ नित्यं स्मयतेः
५८ सृजिदृशोर्झल्यमकिति
५९ अनुदात्तस्य चर्दुपधस्यान्तरस्याम्
६० शीर्षंश्छन्दसि
६१ ये च तद्धिते
६२ अचि शीर्षः
६३ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यक-
 ञ्छकन्नुदन्नासञ्छस्प्रभृतिषु
६४ धात्वादेः षः सः
६५ णो नः
६६ लोपो व्योर्वलि
६७ वेरपृक्तस्य
६८ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं
 हल्
६९ एङ्ह्रस्वात्संबुद्धेः
७० शेश्छन्दसि बहुलम्
७१ ह्रस्वस्य पिति कृति तुक्
७२ संहितायाम्
७३ छे च
७४ आङ्माङोश्च
७५ दीर्घात्
७६ पदान्ताद्वा
७७ इको यणचि
७८ एचोऽयवायावः
७९ वान्तो यि प्रत्यये
८० धातोस्तन्निमित्तस्यैव
८१ क्षय्यजय्यौ शक्यार्थे
८२ क्रय्यस्तदर्थे
८३ भय्यप्रवय्ये च च्छन्दसि
८४ एकः पूर्वपरयोः
८५ अन्तादिवच्च
८६ षत्वतुकोरसिद्धः
८७ आद्गुणः
८८ वृद्धिरेचि
८९ एत्येधत्यूठ्सु
९० आटश्च
९१ उपसर्गादृति धातौ
९२ वा सुप्यापिशलेः
९३ औतोम्शसोः
९४ एङि पररूपम्
९५ ओमाङोश्च
९६ उस्यपदान्तात्
९७ अतो गुणे
९८ अव्यक्तानुकरणस्यात इतौ
९९ नाम्रेडितस्यान्त्यस्य तु वा
१०० नित्यमाम्रेडिते डाचि (वा०)
१०१ अकः सवर्णे दीर्घः
१०२ प्रथमयोः पूर्वसवर्णः
१०३ तस्माच्छसो नः पुंसि
१०४ नादिचि
१०५ दीर्घाज्जसि च
१०६ वा छन्दसि
१०७ अमि पूर्वः

१०८ संप्रसारणाच्च

१०९ एङः पदान्तादति

११० ङसिङसोश्च

१११ ऋत उत्

११२ ख्यत्यात्परस्य

११३ अतो रोरप्लुतादप्लुते

११४ हशि च

११५ प्रकृत्यान्तःपादमव्यपरे

११६ अव्यादवद्यादवक्रमुरव्रतायम-
वन्त्ववस्युषु च

११७ यजुष्युरः

११८ आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे-
ऽम्बालेऽम्बिके पूर्वे

११९ अङ्ग इत्यादौ च

१२० अनुदात्ते च कुधपरे

१२१ अवपथासि च

१२२ सर्वत्र विभाषा गोः

१२३ अवङ् स्फोटायनस्य

१२४ इन्द्रे च

१२५ प्लुतप्रगृह्या अचि नित्यम्

१२६ आङोऽनुनासिकश्छन्दसि

१२७ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

१२८ ऋत्यकः

१२९ अप्लुतवदुपस्थिते

१३० ई ३ चाक्रवर्मणस्य

१३१ दिव उत्

१३२ एतत्तदोः सुलोपोऽकोरनञ्समासे
हलि

१३३ स्यश्छन्दसि बहुलम्

१३४ सोऽचि लोपे चेत्पादपूरणम्

१३५ सुट्कात्पूर्वः

१३६ अडभ्यासव्यवायेऽपि (वा०)

१३७ संपर्युपेभ्यः करोतौ भूषणे

१३८ समवाये च

१३९ उपात्प्रतियत्नवैकृतवाक्याध्या-
हारेषु च

१४० किरतौ लवने

१४१ हिंसायां प्रतेश्च

१४२ अपाच्चतुष्पाच्छकुनिष्वालेखने

१४३ कुस्तुम्बुरूणि जातिः

१४४ अपरस्पराः क्रियासातत्ये

१४५ गोष्पदं सेवितासेवितप्रमाणेषु

१४६ आस्पदं प्रतिष्ठायाम्

१४७ आश्चर्यमनित्ये

१४८ वर्चस्केऽवस्करः

१४९ अपस्करो रथाङ्गम्

१५० विष्किरः शकुनी वा

१५१ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे

१५२ प्रतिष्कशश्च कशेः

१५३ प्रस्कण्वहरिश्चन्द्रावृषी

१५४ मस्करमस्करिणौ वेणुपरिव्राज-
कयोः

१५५ कास्तीराजस्तुन्दे नगरे

१५६ कारस्करो वृक्षः (गणसूत्रम्)

१५७ पारस्करप्रभृतीनि च संज्ञायाम्

१५८ अनुदात्तं पदमेकवर्जम्

१५९ कर्षात्वतो घञोऽन्त उदात्तः

१६० उञ्छादीनां च

१६१ अनुदात्तस्य च यत्रोदात्तलोपः

१६२ धातोः

१६३ चितः
१६४ तद्धितस्य
१६५ कितः
१६६ तिसृभ्यो जसः
१६७ चतुरः शसि
१६८ सावेकाचस्तृतीयादिर्विभक्तिः
१६९ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे
१७० अञ्चेश्छन्दस्यसर्वनामस्थानम्
१७१ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः
१७२ अष्टनो दीर्घात्
१७३ शतुरनुमो नद्यजादी
१७४ उदात्तयणो हल्पूर्वात्
१७५ नोङ्धात्वोः
१७६ ह्रस्वनुड्भ्यां मतुप्
१७७ नामन्यतरस्याम्
१७८ ङ्याश्छन्दसि बहुलम्
१७९ षट्त्रिचतुर्भ्यो हलादिः
१८० झल्युपोत्तमम्
१८१ विभाषा भाषायाम्
१८२ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः
१८३ दिवो झल्
१८४ नृ चान्यतरस्याम्
१८५ तित्स्वरितम्
१८६ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः
१८७ आदिः सिचोऽन्यतरस्याम्
१८८ स्वपादिर्हिंसामच्यनिटि
१८९ अभ्यस्तानामादिः
१९० अनुदात्ते च
१९१ सर्वस्य सुपि
१९२ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति
१९३ लिति
१९४ आदिर्णमुल्यन्तरस्याम्
१९५ अचः कर्तृयकि
१९६ थलि च सेटीडन्तो वा
१९७ ञ्नित्यादिर्नित्यम्
१९८ आमन्त्रितस्य च
१९९ पथिमथोः सर्वनामस्थाने
२०० अन्तश्च तवै युगपत्
२०१ क्षयो निवासे
२०२ जयः करणम्
२०३ वृषादीनां च
२०४ संज्ञायामुपमानम्
२०५ निष्ठा च द्व्यजनात्
२०६ शुष्कधृष्टौ
२०७ आशितः कर्ता
२०८ रिक्ते विभाषा
२०९ जुष्टार्पिते च च्छन्दसि
२१० नित्यं मन्त्रे
२११ युष्मदस्मदोर्ङसि
२१२ ङयि च
२१३ यतोऽनावः
२१४ ईडवन्दवृशंसदुहां ण्यतः
२१५ विभाषा वेण्विन्धानयोः
२१६ त्यागरागहासकुहश्वठकथानाम्
२१७ उपोत्तमं रिति

२१८ चङ्यन्यतरस्याम्

२१९ मतोः पूर्वमात्संज्ञायां स्त्रियाम्

२२० अन्तोऽवत्याः

२२१ ईवत्याः

२२२ चौ

२२३ समासस्य

द्वितीयः पादः

१ बहुव्रीहौ प्रकृत्या पूर्वपदम्

२ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः

३ वर्णो वर्णेष्वनेते

४ गाधलवणयोः प्रमाणे

५ दायाद्यं दायादे

६ प्रतिबन्धि चिरकृच्छ्रयोः

७ पदेऽपदेशे

८ निवाते वातत्राणे

९ शारदेऽनार्तवे

१० अध्वर्युकषाययोर्जातौ

११ सदृशप्रतिरूपयोः सादृश्ये

१२ द्विगौ प्रमाणे

१३ गन्तव्यपण्यं वाणिजे

१४ मात्रोपज्ञोपक्रमच्छाये नपुंसके

१५ सुखप्रिययोर्हिते

१६ प्रीतौ च

१७ स्वं स्वामिनि

१८ पत्यावैश्वर्ये

१९ न भूवाक्चिद्दिधिषु

२० वा भुवनम्

२१ आशङ्काबाधनेदीयःसु संभावने

२२ पूर्वे भूतपूर्वे

२३ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये

२४ विस्पष्टादीनि गुणवचनेषु

२५ श्रज्यावमकन्पापवत्सु भावे कर्मधारये

२६ कुमारश्च

२७ आदिः प्रत्येनसि

२८ पूगेष्वन्यतरस्याम्

२९ इगन्तकालकपालभगालशरावेषु द्विगौ

३० बह्वन्यतरस्याम्

३१ दिष्टिवितस्त्योश्च

३२ सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्

३३ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु

३४ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु

३५ संख्या

३६ आचार्योपसर्जनश्चान्तेवासी

३७ कार्तकौजपादयश्च

३८ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु

३९ क्षुल्लकश्च वैश्वदेवे

४० उष्ट्रः सादिवाम्योः

४१ गौः सादसादिसारथिषु

४२ कुरुगार्हपतरिक्तगुर्वसूतजरत्य-
श्लीलदृढरूपापारेवडवातैतिल-
कद्रूः पण्यकम्बलोदासीभाराणां च
४३ चतुर्थी तदर्थे
४४ अर्थे
४५ क्ते च
४६ कर्मधारयेऽनिष्ठा
४७ अहीने द्वितीया
४८ तृतीया कर्मणि
४९ गतिरनन्तरः
५० तादौ च निति कृत्यतौ
५१ तवै चान्तश्च युगपत्
५२ अनिगन्तोऽञ्चतौ वप्रत्यये
५३ न्यधी च
५४ ईषदन्यतरस्याम्
५६ हिरण्यपरिमाणं धने
५७ कतरकतमौ कर्मधारये
५८ आर्यो ब्राह्मणकुमारयोः
५९ राजा च
६० षष्ठी प्रत्येनसि
६१ क्ते नित्यार्थे
६२ ग्रामः शिल्पिनि
६३ राजा च प्रशंसायाम्
६४ आदिरुदात्तः
६५ सप्तमी हारिणौ धर्म्येऽहरणे
६६ युक्ते च
६७ विभाषाध्यक्षे
६८ पापं च शिल्पिनि
६९ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे
७० अङ्गानि मैरेये
७१ भक्ताख्यास्तदर्थेषु
७२ गोबिडालसिंहसैन्धवेषूपमाने
७३ अके जीविकार्थे
७४ प्राचां क्रीडायाम्
७५ अणि नियुक्ते
७६ शिल्पिनि चाकृञः
७७ संज्ञायां च
७८ गोतन्तियवं पाले
७९ णिनि ।
८० उपमानं शब्दार्थप्रकृतावेव
८१ युक्तारोह्यादयश्च
८२ दीर्घकाशतुषभ्राष्ट्रवटं जे
८३ अन्त्यात्पूर्वं बह्वचः
८४ ग्रामेऽनिवसन्तः
८५ घोषादिषु च
८६ छात्र्यादयः शालायाम्
८७ प्रस्थेऽवृद्धमकर्क्यादीनाम्
८८ मालादीनां च
८९ अमहन्नवं नगरेऽनुदीचाम्
९० अर्मे चावर्णं द्व्यच्त्र्यच्
९१ न भूताधिकसंजीवमद्राश्मकज्जलम्
९२ अन्तः
९३ सर्वं गुणकार्त्स्न्ये
९४ संज्ञायां गिरिनिकाययोः
९५ कुमार्यां वयसि
९६ उदकेऽकेवले
९७ द्विगौ क्रतौ
९८ सभायां नपुंसके
९९ पुरे प्राचाम्

१०० अरिष्टगौडपूर्वे च
१०१ न हास्तिनफलकमार्देयाः
१०२ कुसूलकूपकुम्भशालं बिले
१०३ दिक्शब्दा ग्रामजनपदाख्यान-
चानराटेषु
१०४ आचार्योपसर्जनश्चान्तेवासिनि
१०५ उत्तरपदवृद्धौ सर्वं च
१०६ बहुव्रीहौ विश्वं संज्ञायाम्
१०७ उदराश्वेषुषु
१०८ क्षेपे
१०९ नदी बन्धुनि
११० निष्ठोपसर्गपूर्वमन्यतरस्याम्
१११ उत्तरपदादिः
११२ कर्णो वर्णलक्षणात्
११३ संज्ञौपम्ययोश्च
११४ कण्ठपृष्ठग्रीवाजङ्घं च
११५ शृङ्गमवस्थायां च
११६ नञो जरमरमित्रमृताः
११७ सोर्मनसी अलोमोषसी
११८ क्रत्वादयश्च
११९ आद्युदात्तं द्व्यच्छन्दसि
१२० वीरवीर्यौ च
१२१ कूलतीरतूलमूलशालाक्षसममव्य-
यीभावे
१२२ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ
१२३ तत्पुरुषे शालायां नपुंसके
१२४ कन्था च
१२५ आदिश्चिहणादीनाम्
१२६ चेलखेटकटुककाण्डं गर्हायाम्
१२७ चीरमुपमानम्
१२८ पललसूपशाकं मिश्रे
१२९ कूलसूदस्थलकर्षाः संज्ञायाम्
१३० अकर्मधारये राज्यम्
१३१ वर्ग्यादयश्च
१३२ पुत्रः पुम्भ्यः
१३३ नाचार्यराजर्त्विक्संयुक्तज्ञात्या-
ख्येभ्यः
१३४ चूर्णादीन्यप्राणिषष्ठ्याः
१३५ षट् च काण्डादीनि
१३६ कुण्डं वनम्
१३७ प्रकृत्या भगालम्
१३८ शितेर्नित्याबह्वज्बहुव्रीहावभसत्
१३९ गतिकारकोपपदात्कृत्
१४० उभे वनस्पत्यादिषु युगपत्
१४१ देवताद्वन्द्वे च
१४२ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपू-
षमन्थिषु
१४३ अन्तः
१४४ थाथघञ्क्ताजबित्रकाणाम्
१४५ सूपमानात् क्तः
१४६ संज्ञायामनाचितादीनाम्
१४७ प्रवृद्धादीनां च
१४८ कारकाद्दत्तश्रुतयोरेवाशिषि
१४९ इत्थंभूतेन कृतमिति च
१५० अनो भावकर्मवचनः
१५१ मन्क्तिन्व्याख्यानशयनासनस्थान-
याजकादिक्रीताः
१५२ सप्तम्याः पुण्यम्

१५३ ऊनार्थकलहं तृतीयायाः

१५४ मिश्रं चानुपसर्गमसंधौ

१५५ नञो गुणप्रतिषेधे संपाद्यर्हहि-
तालमर्थास्तद्धिताः

१५६ ययतोश्चातदर्थे

१५७ अच्कावशक्तौ

१५८ आक्रोशे च

१५९ संज्ञायाम्

१६० कृत्योकेष्णुच्चार्वादयश्च

१६१ विभाषा तृन्नन्नतीक्ष्णशुचिषु

१६२ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूर-
णयोः क्रियागणने

१६३ संख्यायाः स्तनः

१६४ विभाषा छन्दसि

१६५ संज्ञायां मित्राजिनयोः

१६६ व्यवायिनोऽन्तरम्

१६७ मुखं स्वाङ्गम्

१६८ नाव्ययदिक्शब्दगोमहत्स्थूलमु-
ष्टिपृथुवत्सेभ्यः

१६९ निष्ठोपमानादन्यतरस्याम्

१७० जातिकालसुखादिभ्योऽनाच्छाद-
नात् क्तोऽकृतमितप्रतिपन्नाः

१७१ वा जाते

१७२ नञ्सुभ्याम्

१७३ कपि पूर्वम्

१७४ ह्रस्वान्तेऽन्त्यात्पूर्वम्

१७५ बहोर्नञ्वदुत्तरपदभूम्नि

१७६ न गुणादयोऽवयवाः

१७७ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु

१७८ वनं समासे

१७९ अन्तः

१८० अन्तश्च

१८१ न निविभ्याम्

१८२ परेरभितोभावि मण्डलम्

१८३ प्रादस्वाङ्गं संज्ञायाम्

१८४ निरुदकादीनि च

१८५ अभेर्मुखम्

१८६ अपाच्च

१८७ स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीर-
नामनाम च

१८८ अधेरुपरिस्थम्

१८९ अनोरप्रधानकनीयसी

१९० पुरुषश्चान्वादिष्टः

१९१ अतेरकृत्पदे

१९२ नेरनिधाने

१९३ प्रतेरंश्वादयस्तत्पुरुषे

१९४ उपाद्द्व्यजजिनमगौरादयः

१९५ सोरवक्षेपणे

१९६ विभाषोत्पुच्छे

१९७ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ

१९८ सक्थं चाक्रान्तात्

१९९ परादिश्छन्दसि बहुलम्

तृतीयः पादः

१ अलुगुत्तरपदे

२ पञ्चम्याः स्तोकादिभ्यः
३ ओजःसहोऽम्भस्तमसस्तृतीयायाः
४ मनसः संज्ञायाम्
५ आज्ञायिनि च
६ आत्मनश्च पूरणे (वा०)
७ वैयाकरणाख्यायां चतुर्थ्याः
८ परस्य च
९ हलदन्तात्सप्तम्याः संज्ञायाम्
१० कारनाम्नि च प्राचां हलादौ
११ मध्याद् गुरौ
१२ अमूर्धमस्तकात्स्वाङ्गादकामे
१३ बन्धे च विभाषा
१४ तत्पुरुषे कृति बहुलम्
१५ प्रावृट्शरत्कालदिवां जे
१६ विभाषा वर्षक्षरशरवरात्
१७ घकालतनेषु कालनाम्नः
१८ शयवासवासिष्वकालात्
१९ नेन्सिद्धबध्नातिषु च
२० स्थे च भाषायाम्
२१ षष्ठ्या आक्रोशे
२२ पुत्रेऽन्यतरस्याम्
२३ ऋतो विद्यायोनिसंबन्धेभ्यः
२४ विभाषा स्वसृपत्योः
२५ आनङृतो द्वन्द्वे
२६ देवताद्वन्द्वे च
२७ ईदग्नेः सोमवरुणयोः
२८ इद्वृद्धौ
२९ दिवो द्यावा
३० दिवसश्च पृथिव्याम्
३१ उषासोषसः
३२ मातरपितरावुदीचाम्
३३ पितरामातरा च च्छन्दसि
३४ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्-
समानाधिकरणे स्त्रियामपूरणी-
प्रियादिषु
३५ तसिलादिष्वा कृत्वसुचः
३६ क्यङ्मानिनोश्च
३७ न कोपधायाः
३८ संज्ञापूरण्योश्च
३९ वृद्धिनिमित्तस्य च तद्धितस्यारक्त-
विकारे
४० स्वाङ्गाच्चेतोऽमानिनि
४१ जातेश्च
४२ पुंवत्कर्मधारयजातीयदेशीयेषु
४३ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु
ङ्योऽनेकाचो ह्रस्वः
४४ नद्याः शेषस्यान्यतरस्याम्
४५ उगितश्च
४६ आन्महतः समानाधिकरणजा-
तीययोः
४७ द्व्यष्टनः संख्यायामबहुव्रीह्य-
शीत्योः
४८ त्रेस्त्रयः
४९ विभाषा चत्वारिंशत्प्रभृतौ सर्वे-
षाम्
५० हृदयस्य हृल्लेखयदण्लासेषु
५१ वा शोकष्यञ्रोगेषु
५२ पादस्य पदाज्यातिगोपहतेषु

५३ पद्यत्यतदर्थे
५४ हिमकाषिहतिषु च
५५ ऋचः शे
५६ वा घोषमिश्रशब्देषु
५७ उदकस्योदः संज्ञायाम्
५८ पेषंवासवाहनधिषु च
५९ एकहलादौ पूरयितव्येऽन्यतरस्याम्
६० मन्थौदनसक्तुबिन्दुवज्रभारहार-
वीवधगाहेषु च
६१ इको ह्रस्वोऽङ्यो गालवस्य
६२ एकतद्धिते च
६३ ङ्यापोः संज्ञाछन्दसोर्बहुलम्
६४ त्वे च
६५ इष्टकेषीकाममालानां चिततूलभा-
रिषु
६६ खित्यनव्ययस्य
६७ अरुर्द्विषदजन्तस्य मुम्
६८ इच एकाचोऽम्प्रत्ययवच्च
६९ वाचंयमपुरंदरौ च
७० कारे सत्यागदस्य
७१ श्येनतिलस्य पाते ञे
७२ रात्रेः कृति विभाषा
७३ नलोपो नञः
७४ तस्मान्नुडचि
७५ नभ्राण्नपान्नवेदानासत्यानमुचि-
नकुलनखनपुंसकनक्षत्रनक्रनाकेषु
प्रकृत्या
७६ एकादिश्चैकस्य चादुक्
७७ नगोऽप्राणिष्वन्यतरस्याम्
७८ सहस्य सः संज्ञायाम्
७९ ग्रन्थान्ताधिके च
८० द्वितीये चानुपाख्ये
८१ अव्ययीभावे चाकाले
८२ वोपसर्जनस्य
८३ प्रकृत्याशिष्यगोवत्सहलेषु
८४ समानस्य च्छन्दस्यमूर्धप्रभृत्यु-
दर्केषु
८५ ज्योतिर्जनपदरात्रिनाभिनामगो-
त्ररूपस्थानवर्णवयोवचनबन्धुषु
८६ चरणे ब्रह्मचारिणि
८७ तीर्थे ये
८८ विभाषोदरे
८९ दृग्दृशवतुषु
९० इदंकिमोरीश्की
९१ आ सर्वनाम्नः
९२ विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्र-
त्यये
९३ समः समि
९४ तिरसस्तिर्यलोपे
९५ सहस्य सध्रिः
९६ सध मादस्थयोश्छन्दसि
९७ द्व्यन्तरुपसर्गेभ्योऽप ईत्
९८ ऊदनोर्देशे
९९ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगा-
शीराशास्थास्थितोत्सुकोतिकारकारा-
गच्छेषु
१०० अर्थे विभाषा

१०१ कोः कत्तत्पुरुषेऽचि
१०२ रथवदयोश्च
१०३ तृणे च जातौ
१०४ का पथ्यक्षयोः
१०५ ईषदर्थे
१०६ विभाषा पुरुषे
१०७ कवं चोष्णे
१०८ पथि च च्छन्दसि
१०९ पृषोदरादीनि यथोपदिष्टम्
११० संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ
१११ ढ्रलोपे पूर्वस्य दीर्घोऽणः
११२ सहिवहोरोदवर्णस्य
११३ साढ्यै साढ्वा साढेति निगमे
११४ संहितायाम्
११५ कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य
११६ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ
११७ वनगिर्योः संज्ञायां कोटरकिंशुलुकदीनाम्
११८ वले
११९ मतौ बह्वचोऽनजिरादीनाम्
१२० शरादीनां च
१२१ इको वहेऽपीलोः
१२२ उपसर्गस्य घञ्यमनुष्ये बहुलम्
१२३ इकः काशे
१२४ दस्ति
१२५ अष्टनः संज्ञायाम्
१२६ छन्दसि च
१२७ चितेः कपि
१२८ विश्वस्य वसुराटोः
१२९ नरे संज्ञायाम्
१३० मित्रे चर्षौ
१३१ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ
१३२ ओषधेश्च विभक्तावप्रथमायाम्
१३३ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्
१३४ इकः सुञि
१३५ द्व्यचोऽतस्तिङः
१३६ निपातस्य च
१३७ अन्येषामपि दृश्यते
१३८ चौ
१३९ संप्रसारणस्य

चतुर्थः पादः

१ अङ्गस्य
२ हलः
३ नामि
४ न तिसृचतसृ
५ छन्दस्युभयथा
६ नृ च
७ नोपधायाः

८ सर्वनामस्थाने चासंबुद्धौ
९ वा षपूर्वस्य निगमे
१० सान्तमहतः संयोगस्य
११ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्
१२ इन्हन्पूषार्यम्णां शौ
१३ सौ च
१४ अत्वसन्तस्य चाधातोः
१५ अनुनासिकस्य क्विझलोः क्ङिति
१६ अज्झनगमां सनि
१७ तनोतेर्विभाषा
१८ क्रमश्च क्त्वि
१९ च्छ्वोः शूडनुनासिके च
२० ज्वरत्वरस्रिव्यविमवामुपधायाश्च
२१ राल्लोपः
२२ असिद्धवदत्राभात्
२३ श्नान्नलोपः
२४ अनिदितां हल उपधायाः क्ङिति
२५ दंशसञ्जस्वञ्जां शपि
२६ रञ्जेश्च
२७ घञि च भावकरणयोः
२८ स्यदो जवे
२९ अवोदैधौद्मप्रश्रथहिमश्रथाः
३० नाञ्चेः पूजायाम्
३१ क्त्वि स्कन्दिस्यन्दोः
३२ जान्तनशां विभाषा
३३ भञ्जेश्च चिणि
३४ शास इदङ्हलोः
३५ शा हौ
३६ हन्तेर्जः
३७ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति
३८ वा ल्यपि
३९ न क्तिचि दीर्घश्च
४० गमः क्वौ
४१ विड्वनोरनुनासिकस्यात्
४२ जनसनखनां सञ्झलोः
४३ ये विभाषा
४४ तनोतेर्यकि
४५ सनः क्तिचि लोपश्चास्यान्यतरस्याम्
४६ आर्धधातुके
४७ भ्रस्जो रोपधयो रमन्यतरस्याम्
४८ अतो लोपः
४९ यस्य हलः
५० क्यस्य विभाषा
५१ णेरनिटि
५२ निष्ठायां सेटि
५३ जनिता मन्त्रे
५४ शमिता यज्ञे
५५ अयामन्ताल्वाय्येत्न्विष्णुषु
५६ ल्यपि लघुपूर्वात्
५७ विभाषाऽऽपः
५८ युप्लुवोर्दीर्घश्छन्दसि
५९ क्षियः
६० निष्ठायामण्यदर्थे
६१ वाऽऽक्रोशदैन्ययोः
६२ स्यसिच्सीयुट्तासिषु भावकर्म-

णोरुपदेशेऽज्ज्ञनग्रहदृशां बा चिण्व-
दिट् च
६३ दीङो युडचि क्ङिति
६४ आतो लोप इटि च
६५ ईद्यति
६६ घुमास्थागापाजहातिसां हलि
६७ एर्लिङि
६८ वान्यस्य संयोगादेः
६९ न ल्यपि
७० मयतेरिदन्यतरस्याम्
७१ लुङ्लङ्लृङ्क्ष्वडुदात्तः
७२ आडजादीनाम्
७३ छन्दस्यपि दृश्यते
७४ न माङ्योगे
७५ बहुलं छन्दस्यमाङ्योगेऽपि
७६ इरयो रे
७७ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ
७८ अभ्यासस्यासवर्णे
७९ स्त्रियाः
८० वाऽम्शसोः
८१ इणो यण्
८२ एरनेकाचोऽसंयोगपूर्वस्य
८३ ओः सुपि
८४ वर्षाभ्वश्च
८५ न भूसुधियोः
८६ छन्दस्युभयथा
८७ हुश्नुवोः सार्वधातुके
८८ भुवो वुग्लुङ्लिटोः
८९ ऊदुपधाया गोहः
९० दोषो णौ
९१ वा चित्तविरागे
९२ मितां ह्रस्वः
९३ चिण्णमुलो र्दीर्घोऽन्यतरस्याम्
९४ खचि ह्रस्वः
९५ ह्लादो निष्ठायाम्
९६ छादेर्घेऽद्व्युपसर्गस्य
९७ इस्मन्त्रन्क्विषु च
९८ गमहनजनखनघसां लोपः क्ङित्य-
नङि
९९ तनिपत्योश्छन्दसि
१०० घसिभसोर्हलि च
१०१ हुझल्भ्यो हेर्धिः
१०२ श्रुशृणुपॄकृवृभ्यश्छन्दसि
१०३ अङितश्च
१०४ चिणो लुक्
१०५ अतो हेः
१०६ उतश्च प्रत्ययादसंयोगपूर्वात्
१०७ लोपश्चास्यान्यतरस्यां म्वोः
१०८ नित्यं करोतेः
१०९ ये च
११० अत उत्सार्वधातुके
१११ श्नसोरल्लोपः
११२ श्नाभ्यस्तयोरातः
११३ ई हल्यघोः
११४ इद्दरिद्रस्य
११५ भियोऽन्यतरस्याम्
११६ जहातेश्च
११७ आ च हौ

११८ लोपो यि
११९ ध्वसोरेद्धावभ्यासलोपश्च
१२० अत एकहल्मध्येऽनादेशादेर्लिटि
१२१ थलि च सेटि
१२२ तॄफलभजत्रपश्च
१२३ राधो हिंसायाम्
१२४ वा जॄभ्रमुत्रसाम्
१२५ फणां च सप्तानाम्
१२६ न शसददवादिगुणानाम्
१२७ अर्वणस्त्रसावनञः
१२८ मघवा बहुलम्
१२९ भस्य
१३० पादः पत्
१३१ वसोः संप्रसारणम्
१३२ वाह ऊठ्
१३३ श्वयुवमघोनामतद्धिते
१३४ अल्लोपोऽनः
१३५ षपूर्वहन्धृतराज्ञामणि
१३६ विभाषा ङिश्योः
१३७ न संयोगाद्वमन्तात्
१३८ अचः
१३९ उद ईत्
१४० आतो धातोः
१४१ मन्त्रेष्वाङ्यादेरात्मनः
१४२ ति विंशतेर्डिति
१४३ टेः
१४४ नस्तद्धिते
१४५ अह्नष्टखोरेव
१४६ ओर्गुणः
१४७ ढे लोपोऽकद्र्वाः
१४८ यस्येति च
१४९ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः
१५० हलस्तद्धितस्य
१५१ आपत्यस्य च तद्धितेऽनाति
१५२ क्यच्व्योश्च
१५३ बिल्वकादिभ्यश्छस्य लुक्
१५४ तुरिष्ठेमेयःसु
१५५ टेः
१५६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः
१५७ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्ध-तृप्रदीर्घवृन्दारकाणां प्रस्थस्फव-र्बंहिगर्वर्षित्रब्द्राघिवृन्दाः
१५८ बहोर्लोपो भू च बहोः
१५९ इष्ठस्य यिट् च
१६० ज्यादादीयसः
१६१ र ऋतो हलादेर्लघोः
१६२ विभाषर्जोश्छन्दसि
१६३ प्रकृत्यैकाच्
१६४ इनण्यनपत्ये
१६५ गाथिविदथिकेशिगणिपणिनश्च
१६६ संयोगादिश्च
१६७ अन्
१६८ ये चाभावकर्मणोः
१६९ आत्माध्वानौ खे
१७० न मपूर्वोऽपत्येऽवर्मणः

१७१ ब्राह्मोऽजातौ
१७२ कार्मस्ताच्छील्ये
१७३ औक्षमनपत्ये
१७४ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि
१७५ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि

———

सप्तमोऽध्यायः

प्रथमः पादः

१ युवोरनाकौ
२ आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्
३ झोऽन्तः
४ अदभ्यस्तात्
५ आत्मनेपदेष्वनतः
६ शीङो रुट्
७ वेत्तेर्विभाषा
८ बहुलं छन्दसि
९ अतो भिस ऐस्
१० बहुलं छन्दसि
११ नेदमदसोरकोः
१२ टाङसिङसामिनात्स्याः
१३ ङेर्यः
१४ सर्वनाम्नः स्मै
१५ ङसिङ्योः स्मात्स्मिनौ
१६ पूर्वादिभ्यो नवभ्यो वा
१७ जसः शी
१८ औङ आपः
१९ नपुंसकाच्च
२० जश्शसोः शिः
२१ अष्टाभ्य औश्
२२ षड्भ्यो लुक्
२३ स्वमोर्नपुंसकात्
२४ अतोऽम्
२५ अद्ड्डतरादिभ्यः पञ्चभ्यः
२६ नेतराच्छन्दसि
२७ युष्मदस्मद्भ्यां ङसोऽश्
२८ ङेप्रथमयोरम्
२९ शसो न
३० भ्यसो भ्यम्
३१ पञ्चम्या अत्
३२ एकवचनस्य च
३३ साम आकम्
३४ आत औ णलः
३५ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्
३६ विदेः शतुर्वसुः
३७ समासेऽनञ्पूर्वे क्त्वो ल्यप्
३८ क्त्वापि च्छन्दसि
३९ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः
४० अमो मश्

४१ लोपस्त आत्मनेपदेषु
४२ ध्वमो ध्वात्
४३ यजध्वैनमिति च
४४ तस्य तात्
४५ तप्तनप्तनथनाश्च
४६ इदन्तो मसि
४७ क्त्वो यक्
४८ इष्ट्वीनमिति च
४९ स्नात्व्यादयश्च
५० आज्जसेरसुक्
५१ अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि
५२ आमि सर्वनाम्नः सुट्
५३ त्रेस्त्रयः
५४ ह्रस्वनद्यापो नुट्
५५ षट्चतुर्भ्यश्च
५६ श्रीग्रामण्योश्छन्दसि
५७ गोः पादान्ते
५८ इदितो नुम्धातोः
५९ शे मुचादीनाम्
६० मस्जिनशोर्झलि
६१ रधिजभोरचि
६२ नेट्यलिटि रधेः
६३ रभेरशब्लिटोः
६४ लभेश्च
६५ आङो यि
६६ उपात्प्रशंसायाम्
६७ उपसर्गात्खल्घञोः
६८ न सुदुर्भ्यां केवलाभ्याम्
६९ विभाषा चिण्णमुलोः
७० उगिदचां सर्वनामस्थानेऽधातोः
७१ युजेरसमासे
७२ नपुंसकस्य झलचः
७३ इकोऽचि विभक्तौ
७४ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य
७५ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः
७६ छन्दस्यपि दृश्यते
७७ ई च द्विवचने
७८ नाभ्यस्ताच्छतुः
७९ वा नपुंसकस्य
८० आच्छीनद्योर्नुम्
८१ शप्श्यनोर्नित्यम्
८२ सावनडुहः
८३ दृक्स्ववःस्वतवसां छन्दसि
८४ दिव औत्
८५ पथिमथ्यृभुक्षामात्
८६ इतोऽत्सर्वनामस्थाने
८७ थो न्थः
८८ भस्य टेर्लोपः
८९ पुंसोऽसुङ्
९० गोतो णित्
९१ णलुत्तमो वा
९२ सख्युरसंबुद्धौ
९३ अनङ् सौ
९४ ऋदुशनस्पुरुदंसोनेहसां च
९५ तृज्वत्क्रोष्टुः
९६ स्त्रियां च

९७ विभाषा तृतीयादिष्वचि
९८ चतुरनडुहोरामुदात्तः
९९ अम्संबुद्धौ
१०० ऋत इद्धातोः
१०१ उपधायाश्च
१०२ उदोष्ठ्यपूर्वस्य
१०३ बहुलं छन्दसि

द्वितीयः पादः

१ सिचि वृद्धिः परस्मैपदेषु
२ अतो ल्रान्तस्य
३ वदव्रजहलन्तस्याचः
४ नेटि
५ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्
६ ऊर्णोतेर्विभाषा
७ अतो हलादेर्लघोः
८ नेड्वशि कृति
९ तितुत्रतथसिसुसरकसेषु च
१० एकाच उपदेशेनुदात्तात्
११ श्र्युकः किति
१२ सनि ग्रहगुहोश्च
१३ कृसुभृवृस्तुद्रुस्रुश्रुवो लिटि
१४ श्वीदितो निष्ठायाम्
१५ यस्य विभाषा
१६ आदितश्च
१७ विभाषा भावादिकर्मणोः
१८ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु
१९ धृषिशसी वैयात्ये
२० दृढः स्थूलबलयोः
२१ प्रभौ परिवृढः
२२ कृच्छ्रगहनयोः कषः
२३ घुषिरविशब्दने
२४ अर्देः संनिविभ्यः
२५ अभेश्चाविदूर्ये
२६ णेरध्ययने वृत्तम्
२७ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः
२८ रुष्यमत्वरसंघुषास्वनाम्
२९ हृषेर्लोमसु
३० अपचितश्च
३१ ह्रु ह्वरेश्छन्दसि
३२ अपरिह्वृताश्च
३३ सोमे ह्वरितः
३४ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरुत्रीरुज्वलितिक्षरितिक्षमितिवमित्यमितीति च
३५ आर्धधातुकस्येड्वलादेः
३६ स्नुक्रमोरनात्मनेपदनिमित्ते
३७ ग्रहोऽलिटि दीर्घः
३८ वृतो वा
३९ न लिङि

४० सिचि च परस्मैपदेषु
४१ इट् सनि वा
४२ लिङ्सिचोरात्मनेपदेषु
४३ ऋतश्च संयोगादेः
४४ स्वरतिसूतिसूयतिधूञूदितो वा
४५ रधादिभ्यश्च
४६ निरः कुषः
४७ इण्निष्ठायाम्
४८ तीषसहलुभरुषरिषः
४९ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्
५० क्लिशः क्त्वानिष्ठयोः
५१ पूङश्च
५२ वसतिक्षुधोरिट्
५३ अञ्चेः पूजायाम्
५४ लुभो विमोहने
५५ जॄव्रश्च्योः क्त्वि
५६ उदितो वा
५७ सेऽसिचि कृतचृतच्छृदतृदनृतः
५८ गमेरिट् परस्मैपदेषु
५९ न वृद्भ्यश्चतुर्भ्यः
६० तासि च क्लृपः
६१ अबस्तास्वत्थल्यनिटो नित्यम्
२६ उपदेशेऽत्वतः
६३ ऋतो भारद्वाजस्य
६४ बभूथाततन्थजगृम्भववर्थेति निगमे
६५ विभाषा सृजिदृशोः
६६ इडत्त्यर्तिव्ययतीनाम्
६७ वस्वेकाजाद्घसाम्
६८ विभाषा गमहनविदविशाम्
६९ सनिससनिवांसम्
७० ऋद्धनोः स्ये
७१ अञ्जेः सिचि
७२ स्तुसुधूञ्भ्यः परस्मैपदेषु
७३ यमरमनमातां सक्च
७४ स्मिपूङ्रञ्ज्वशां सनि
७५ किरश्च पञ्चभ्यः
७६ रुदादिभ्यः सार्वधातुके
७७ ईशः से
७८ ईडजनोर्ध्वे च
७९ लिङः सलोपोऽनन्त्यस्य
८० अतो येयः
८१ आतो ङितः
८२ आने मुक्
८३ ईदासः
८४ अष्टन आ विभक्तौ
८५ रायो हलि
८६ युष्मदस्मदोरनादेशे
८७ द्वितीयायां च
८८ प्रथमायाश्च द्विवचने भाषायाम्
८९ योऽचि
९० शेषे लोपः
९१ मपर्यन्तस्य
९२ युवावौ द्विवचने

९३ यूयवयी जसि
९४ त्वाहौ सौ
९५ तुभ्यमह्यौ ङयि
९६ तवममौ ङसि
९७ त्वमावेकवचने
९८ प्रत्ययोत्तरपदयोश्च
९९ त्रिचतुरोः स्त्रियां तिसृचतसृ
१०० अचि र ऋतः
१०१ जराया जरसन्यतरस्याम्
१०२ त्यदादीनामः
१०३ किमः कः
१०४ कु तिहोः
१०५ क्वाति
१०६ तदोः सः सावनन्त्ययोः
१०७ अदस औ सुलोपश्च
१०८ इदमो मः
१०९ दश्च
११० यः सौ
१११ इदोऽय् पुंसि
११२ अनाप्यकः
११३ हलि लोपः
११४ मृजेर्वृद्धिः
११५ अचो ञ्णिति
११६ अत उपधायाः
११७ तद्धितेष्वचामादेः
११८ किति च

———

तृतीयः पादः

१ देविकाशिंशपादित्यवाड्दीर्घसत्र-श्रेयसामात्
२ केकयमित्रयुप्रलयानां यादेरियः
३ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्
४ द्वारादीनां च
५ न्यग्रोधस्य च केवलस्य
६ न कर्मव्यतिहारे
७ स्वागतादीनां च
८ श्वादेरिञि
९ पदान्तस्यान्यतरस्याम्
१० उत्तरपदस्य
११ अवयवादृतोः
१२ सुसर्वार्धाज्जनपदस्य
१३ दिशोऽमद्राणाम्
१४ प्राचां ग्रामनगराणाम्
१५ संख्यायाः संवत्सरसंख्यस्य च
१६ वर्षस्याभविष्यति
१७ परिमाणान्तस्यासंज्ञाशाणयोः
१८ जे प्रोष्ठपदानाम्
१९ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च
२० अनुशतिकादीनां च
२१ देवताद्वन्द्वे च
२२ नेन्द्रस्य परस्य
२३ दीर्घाच्च वरुणस्य
२४ प्राचां नगरान्ते

२५ जङ्गलधेनुवलजान्तस्य विभाषित-मुत्तरम्
२६ अर्धात्परिमाणस्य पूर्वस्य तु वा
२७ नातः परस्य
२८ प्रवाहणस्य ढे
२९ तत्प्रत्ययस्य च
३० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्
३१ यथातथायथापुरयोः पर्यायेण
३२ हनस्तोऽचिण्णलोः
३३ आतो युक्चिण्कृतोः
३४ नोदात्तोपदेशस्य मान्तस्यानाचमेः
३५ जनिवध्योश्च
३६ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ
३७ शाच्छासाह्वाव्यावेपां युक्
३८ वो विधूनने जुक्
३९ लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने
४० भियो हेतुभये षुक्
४१ स्फायो वः
४२ शदेरगतौ तः
४३ रुहः पोऽन्यतरस्याम्
४४ प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः
४५ न यासयोः
४६ उदीचामातः स्थाने यकपूर्वायाः
४७ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि
४८ अभाषितपुंस्काच्च
४९ आदाचार्याणाम्
५० ठस्येकः
५१ इसुसुक्तान्तात्कः
५२ चजोः कु घिण्यतोः
५३ न्यङ्क्वादीनां च
५४ हो हन्तेर्ञ्णिन्नेषु
५५ अभ्यासाच्च
५६ हेरचङि
५७ सन्लिटोर्जेः
५८ विभाषा चेः
५९ न क्वादेः
६० अजिव्रज्योश्च
६१ भुजन्युब्जौ पाण्युपतापयोः
६२ प्रयाजानुयाजौ यज्ञाङ्गे
६३ वञ्चेर्गतौ
६४ ओक उचः के
६५ ण्य आवश्यके
६६ यजयाचरुचप्रवचर्चश्च
६७ वचोऽशब्दसंज्ञायाम्
६८ प्रयोज्यनियोज्यौ शक्यार्थे
६९ भोज्यं भक्ष्ये
७० घोर्लोपो लेटि वा
७१ ओतः श्यनि
७२ क्सस्याचि
७३ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये
७४ शमामष्टानां दीर्घः श्यनि
७५ ष्ठिवुक्लमुचमां शिति

७६ क्रमः परस्मैपदेषु
७७ इषुगमियमां छः
७८ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः
७९ ज्ञाजनोर्जा
८० प्वादीनां ह्रस्वः
८१ मीनातेर्निगमे
८२ मिदेर्गुणः
८३ जुसि च
८४ सार्वधातुकार्धधातुकयोः
८५ जाग्रोऽविचिण्णल्ङित्सु
८६ पुगन्तलघूपधस्य च
८७ नाभ्यस्तस्याचि पिति सार्वधातुके
८८ भूसुवोस्तिङि
८९ उतो वृद्धिर्लुकि हलि
९० ऊर्णोतेर्विभाषा
९१ गुणोऽपृक्ते
९२ तृणह इम्
९३ ब्रुव ईट्
९४ यङो वा
९५ तुरुस्तुशम्यमः सार्वधातुके
९६ अस्तिसिचोऽपृक्ते
९७ बहुलं छन्दसि
९८ रुदश्च पञ्चभ्यः
९९ अड्गार्ग्यगालवयोः
१०० अदः सर्वेषाम्
१०१ अतो दीर्घो यञि
१०२ सुपि च
१०३ बहुवचने झल्येत्
१०४ ओसि च
१०५ आङि चापः
१०६ संबुद्धौ च
१०७ अम्बार्थनद्योर्ह्रस्वः
१०८ ह्रस्वस्य गुणः
१०९ जसि च
११० ऋतो ङिसर्वनामस्थानयोः
१११ घेर्ङिति
११२ आण्नद्याः
११३ याडापः
११४ सर्वनाम्नः स्याड्ढ्रस्वश्च
११५ विभाषाद्वितीयातृतीयाभ्याम्
११६ ङेराम्नद्याम्नीभ्यः
११७ इदुद्भ्याम्
११८ औत्
११९ अच्च घेः
१२० आङो नास्त्रियाम्

चतुर्थः पादः

१ णौ चङ्युपधाया ह्रस्वः
२ नाग्लोपिशास्वृदिताम्
३ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्

४ लोपः पिबतेरीच्चाभ्यासस्य
५ तिष्ठतेरित्
६ जिघ्रतेर्वा
७ उर्ऋत्
८ नित्यं छन्दसि
९ दयतेर्दिगि लिटि
१० ऋतश्च संयोगादेर्गुणः
११ ऋच्छत्यृताम्
१२ शॄदॄप्रां ह्रस्वो वा
१३ केऽणः
१४ न कपि
१५ आपोऽन्यतरस्याम्
१६ ऋदृशोऽङि गुणः
१७ अस्यतेस्थुक्
१८ श्वयतेरः
१९ पतः पुम्
२० वच उम्
२१ शीङः सार्वधातुके गुणः
२२ अयङ्यि क्ङिति
२३ उपसर्गाद्ध्रस्व ऊहतेः
२४ एतेर्लिङि
२५ अकृत्सार्वधातुकयोर्दीर्घः
२६ च्वौ च
२७ रीङ् ऋतः
२८ रिङ् शयग्लिङ्क्षु
२९ गुणोऽर्तिसंयोगाद्योः
३० यङि च
३१ ई घ्राध्मोः
३२ अस्य च्वौ
३३ क्यचि च
३४ अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु
३५ न च्छन्दस्यपुत्रस्य
३६ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति
३७ अश्वाघस्यात्
३८ देवसुम्नयोर्यजुषि काठके
३९ कव्यध्वरपृतनस्यर्चि लोपः
४० द्यतिस्यतिमास्थामित्ति किति
४१ शाच्छोरन्यतरस्याम्
४२ दधातेर्हिः
४३ जहातेश्च क्त्वि
४४ विभाषा छन्दसि
४५ सुधितवसुधितनेमधितधिष्वधिषीय च
४६ दो दद्घोः
४७ अच उपसर्गात्तः
४८ अपो भि
४९ सः स्यार्धधातुके
५० तासस्त्योर्लोपः
५१ रि च
५२ ह एति
५३ यीवर्णयोर्दीधीवेव्योः
५४ सनि मीमाघुरभलभशकपतपदामच इस्
५५ आप्ज्ञप्यृधामीत्
५६ दम्भ इच्च
५७ मुचोऽकर्मकस्य गुणो वा
५८ अत्र लोपोऽभ्यासस्य

५९ ह्रस्वः
६० हलादिः शेषः
६१ शर्पूर्वाः खयः
६२ कुहोश्चुः
६३ न कवतेर्यङि
६४ कृषेश्छन्दसि
६५ दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च
६६ उरत्
६७ द्युतिस्वाप्योः संप्रसारणम्
६८ व्यथो लिटि
६९ दीर्घ इणः किति
७० अत आदेः
७१ तस्मान्नुड् द्विहलः
७२ अश्नोतेश्च
७३ भवतेरः
७४ ससूवेति निगमे
७५ निजां त्रयाणां गुणः श्लौ
७६ भृञामित्
७७ अर्तिपिपर्त्योश्च
७८ बहुलं छन्दसि
७९ सन्यतः
८० ओः पुयण्ज्यपरे
८१ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा
८२ गुणो यङ्लुकोः
८३ दीर्घोऽकितः
८४ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्
८५ नुगतोऽनुनासिकान्तस्य
८६ जपजभदहदशभञ्जपशां च
८७ चरफलोश्च
८८ उत्परस्यातः
८९ ति च
९० रीगृदुपधस्य च
९१ रुग्रिकौ च लुकि
९२ ऋतश्च
९३ सन्वल्लघुनि चङ्परेऽनग्लोपे
९४ दीर्घो लघोः
९५ अत्स्मृदृत्वरप्रथम्रदस्तृस्पृशाम्
९६ विभाषा वेष्टिचेष्ट्योः
९७ ई च गणः

अष्टमोऽध्यायः

प्रथमः पादः

१ सर्वस्य द्वे
२ तस्य परमाम्रेडितम्
३ अनुदात्तं च
४ नित्यवीप्सयोः
५ परेर्वर्जने

६ प्रसमुपोदः पादपूरणे
७ उपर्यध्यधसः सामीप्ये
८ वाक्यादेरामन्त्रितस्यासूयासंमति-
कोपकुत्सनभर्त्सनेषु
९ एकं बहुव्रीहिवत्
१० आबाधे च
११ कर्मधारयवदुत्तरेषु
१२ प्रकारे गुणवचनस्य
१३ अकृच्छ्रे प्रियसुखयोरन्यतर-
स्याम्
१४ यथास्वे यथायथम्
१५ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण-
यज्ञपात्रप्रयोगाभिव्यक्तिषु
१६ पदस्य
१७ पदात्
१८ अनुदात्तं सर्वमपादादौ
१९ आमन्त्रितस्य च
२० युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया-
स्थयोर्वांनावौ
२१ बहुवचनस्य वस्नसौ
२२ तेमयावेकवचनस्य
२३ त्वामौ द्वितीयायाः
२४ न चवाहाहैवयुक्ते
२५ पश्यार्थैश्चानालोचने
२६ सपूर्वायाः प्रथमाया विभाषा
२७ तिङो गोत्रादीनि कुत्सनाभी-
क्ष्ण्ययोः
२८ तिङ्ङतिङः
२९ न लुट्
३० निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्क-
च्चिद्यत्रयुक्तम्
३१ नह प्रत्यारम्भे
३२ सत्यं प्रश्ने
३३ अङ्गात्प्रातिलोम्ये
३४ हि च
३५ छन्दस्यनेकमपि साकाङ्क्षम्
३६ यावद्यथाभ्याम्
३७ पूजायां नानन्तरम्
३८ उपसर्गव्यपेतं च
३९ तुपश्यपश्यताहैः पूजायाम्
४० अहो च
४१ शेषे विभाषा
४२ पुरा च परीप्सायाम्
४३ नन्वित्यनुज्ञैषणायाम्
४४ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषि-
द्धम्
४५ लोपे विभाषा
४६ एहिमन्ये प्रहासे लृट्
४७ जात्वपूर्वम्
४८ किंवृत्तं च चिदुत्तरम्
४९ आहो उताहो चानन्तरम्
५० शेषे विभाषा
५१ गत्यर्थलोटा लृण्न चेत्कारकं
सर्वान्यत्
५२ लोट् च
५३ विभाषितं सोपसर्गमनुत्तमम्
५४ हन्त च
५५ आम एकान्तरमामन्त्रितमनन्तिके

५६ यद्धितुपरं छन्दसि
५७ चनचिदिवगोत्रादितद्धिताम्रेडिते-
ष्वगतेः
५८ चादिषु च
५९ चवायोगे प्रथमा
६० हेति क्षियायाम्
६१ अहेति विनियोगे च
६२ चाहलोप एवेत्यवधारणम
६३ चादिलोपे विभाषा
६४ वैवावेति च च्छन्दसि
६५ एकान्याभ्यां समर्थाभ्याम्
६६ यद्वृत्तान्नित्यम्
६७ पूजनात्पूजितमनुदात्तं काष्ठा-
दिभ्यः
६८ सगतिरपि तिङ्
६९ कुत्सने च सुप्यगोत्रादौ
७० गतिर्गतौ
७१ तिङि चोदात्तवति
७२ आमन्त्रितं पूर्वमविद्यमानवत्
७३ नामन्त्रिते समानाधिकरणे सामा-
न्यवचनम्
७४ विभाषितं विशेषवचने (बहु-
वचनम्)

द्वितीयः पादः

१ पूर्वत्रासिद्धम्
२ नलोपः सुप्स्वरसंज्ञातुग्विधिषु
कृति
३ न मु ने
४ उदात्तस्वरितयोर्यणः स्वरितोऽनु-
दात्तस्य
५ एकादेश उदात्तेनोदात्तः
६ स्वरितो वानुदात्ते पदादौ
७ नलोपः प्रातिपदिकान्तस्य
८ न ङिसंबुद्ध्योः
९ मादुपधायाश्च मतोर्वोऽयवादिभ्यः
१० झयः
११ संज्ञायाम्
१२ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीव-
द्रुमण्वच्चर्मण्वती
१३ उदन्वानुदधौ च
१४ राजन्वान्सौराज्ये
१५ छन्दसीरः
१६ अनो नुट्
१७ नाद्घस्य
१८ कृपो रो लः
१९ उपसर्गस्यायतौ
२० ग्रो यङि
२१ अचि विभाषा
२२ परेश्च घाङ्कयोः
२३ संयोगान्तस्य लोपः
२४ रात्सस्य
२५ धि च
२६ झलो झलि
२७ ह्रस्वादङ्गात्

२८ इट ईटि
२९ स्कोः संयोगाद्योरन्ते च
३० चोः कुः
३१ हो ढः
३२ दादेर्धातोर्घः
३३ वा द्रुहमुहष्णुहष्णिहाम्
३४ नहो धः
३५ आहः स्थः
३६ व्रश्चभ्रस्जसृजमृजयजराजभ्राज-
च्छशां षः
३७ एकाचो बशो भष्झषन्तस्य
स्ध्वोः
३८ दधस्तथोश्च
३९ झलां जशोऽन्ते
४० झषस्तथोर्धोऽधः
४१ षढोः कः सि
४२ रदाभ्यां निष्ठातो नः पूर्वस्य च दः
४३ संयोगादेरातो धातोर्यण्वतः
४४ ल्वादिभ्यः
४५ ओदितश्च
४६ क्षियो दीर्घात्
४७ श्योऽस्पर्शे
४८ अञ्चोऽनपादाने
४९ दिवोऽविजिगीषायाम्
५० निर्वाणोऽवाते
५१ शुषः कः
५२ पचो वः
५३ क्षायो मः
५४ प्रस्त्योऽन्यतरस्याम्
५५ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः
५६ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतर-
स्याम्
५७ न ध्याख्यापॄमूर्च्छिमदाम्
५८ वित्तो भोगप्रत्ययोः
५९ भित्तं शकलम्
६० ऋणमाधमर्ण्ये
६१ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि
छन्दसि
६२ क्विन्प्रत्ययस्य कुः
६३ नशेर्वा
६४ मो नो धातोः
६५ म्वोश्च
६६ ससजुषो रुः
६७ अवयाः श्वेतवाः पुरोडाश्च
६८ अहन्
६९ रोऽसुपि
७० अम्नरूधरवरित्युभयथा छन्दसि
७१ भुवश्च महाव्याहृतेः
७२ वसुस्रंसुध्वंस्वनडुहां दः
७३ तिप्यनस्तेः
७४ सिपि धातो रुर्वा
७५ दश्च
७६ र्वोरुपधाया दीर्घ इकः
७७ हलि च
७८ उपधायां च

७९ न भकुर्छुराम्
८० अदसोऽसेदादु दो मः
८१ एत ईद्बहुवचने
८२ वाक्यस्य टेः प्लुत उदात्तः
८३ प्रत्यभिवादेऽशूद्रे
८४ दूराद्धूते च
८५ हैहेप्रयोगे हैहयोः
८६ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्
८७ ओमभ्यादाने
८८ ये यज्ञकर्मणि
८९ प्रणवष्टेः
९० याज्यान्तः
९१ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः
९२ अग्नीत्प्रेषणे परस्य च
९३ विभाषा पृष्टप्रतिवचने हेः
९४ निगृह्यानुयोगे च
९५ आम्रेडितं भर्त्सने
९६ अङ्गयुक्तं तिङाकाङ्क्षम्
९७ विचार्यमाणानाम्
९८ पूर्वं तु भाषायाम्
९९ प्रतिश्रवणे च
१०० अनुदात्तं प्रश्नान्ताभिपूजितयोः
१०१ चिदिति चोपमार्थे प्रयुज्यमाने
१०२ उपरिस्विदासीदिति च
१०३ स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु
१०४ क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्
१०५ अनन्त्यस्यापि प्रश्नाख्यानयोः
१०६ प्लुतावैच इदुतौ
१०७ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ
१०८ तयोर्य्वावचि संहितायाम्

तृतीयः पादः

१ मतुवसो रु संबुद्धौ छन्दसि
२ अत्रानुनासिकः पूर्वस्य तु वा
३ आतोऽटि नित्यम्
४ अनुनासिकात्परोऽनुस्वारः
५ समः सुटि
६ पुमः खय्यम्परे
७ नश्छव्यप्रशान्
८ उभयथर्क्षु
९ दीर्घादटि समानपादे
१० नॄन्पे
११ स्वतवान्पायौ
१२ कानाम्रेडिते
१३ ढो ढे लोपः
१४ रो रि
१५ खरवसानयोर्विसर्जनीयः
१६ रोः सुपि
१७ भोभगोअघोअपूर्वस्य योऽशि
१८ व्योर्लघुप्रयत्नतरः शाकटायनस्य

१९ लोपः शाकल्यस्य
२० ओतो गार्ग्यस्य
२१ उञि च पदे
२२ हलि सर्वेषाम्
२३ मोऽनुस्वारः
२४ नश्चापदान्तस्य झलि
२५ मो राजि समः क्वौ
२६ हे मपरे वा
२७ नपरे नः
२८ ङ्णोः कुक्टुक्शरि
२९ डः सि धुट्
३० नश्च
३१ शि तुक्
३२ ङमो ह्रस्वादचि ङमुण्नित्यम्
३३ मय उञो वो वा
३४ विसर्जनीयस्य सः
३५ शर्परे विसर्जनीयः
३६ वा शरि
३७ कुप्वोः ≍क≍पौ च
३८ सोऽपदादौ
३९ इणः षः
४० नमस्पुरसोर्गत्योः
४१ इदुदुपधस्य चाप्रत्ययस्य
४२ तिरसोऽन्यतरस्याम्
४३ द्विस्त्रिश्चतुरिति कृत्वोऽर्थे
४४ इसुसोः सामर्थ्ये
४५ नित्यं समासेऽनुत्तरपदस्थस्य
४६ अत≍ः कृकमिकंसकुम्भपात्रकुशा-
कर्णीष्वनव्ययस्य

४७ अधःशिरसी पदे
४८ कस्कादिषु च
४९ छन्दसि वाऽप्राम्रेडितयोः
५० कःकरत्करतिकृधिकृतेष्वनदितेः
५१ पञ्चम्याः परावध्यर्थे
५२ पातौ च बहुलम्
५३ षष्ठ्याः पतिपुत्रपृष्ठपारपदपय-
स्पोषेषु
५४ इडाया वा
५५ अपदान्तस्य मूर्धन्यः
५६ सहेः साडः सः
५७ इण्कोः
५८ नुम्विसर्जनीयशर्व्यवायेऽपि
५९ आदेशप्रत्यययोः
६० शासिवसिघसीनां च
६१ स्तौतिण्योरेव षण्यभ्यासात्
६२ सः स्विदिस्वदिसहीनां च
६३ प्राक्सितादड्व्यवायेऽपि
६४ स्थादिष्वभ्यासेन चाभ्यासस्य
६५ उपसर्गात्सुनोतिसुवतिस्यतिस्तौ-
तिस्तोभतिस्थासेनयसेधसिचसञ्ज-
स्वञ्जाम्
६६ सदिरप्रतेः
६७ स्तन्भेः
६८ अवाच्चालम्बनाविदूर्ययोः
६९ वेश्च स्वनो भोजने
७० परिनिविभ्यः सेवसितसयसिवुस-
हसुट्स्तुस्वञ्जाम्
७१ सिवादीनां वाड्व्यवायेऽपि

७२ अनुविपर्यभिनिभ्यः स्यन्दतेर-
प्राणिषु
७३ वेः स्कन्देरनिष्ठायाम्
७४ परेश्च
७५ परिस्कन्दः प्राच्यभरतेषु
७६ स्फुरतिस्फुलत्योर्निर्निविभ्यः
७७ वेः स्कभ्नातेर्नित्यम्
७८ इणः षीध्वंलुङ्लिटां धोऽङ्गात्
७९ विभाषेटः
८० समासेऽङ्गुलेः सङ्गः
८१ भीरोः स्थानम्
८२ अग्नेः स्तुत्स्तोमसोमाः
८३ ज्योतिरायुषः स्तोमः
८४ मातृपितृभ्यां स्वसा
८५ मातुःपितुर्भ्यामन्यतरस्याम्
८६ अभिनिसः स्तनः शब्दसंज्ञायाम्
८७ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः
८८ सुविनिर्दुर्भ्यः सुपिसूतिसमाः
८९ निनदीभ्यां स्नातेः कौशले
९० सूत्रं प्रतिष्णातम्
९१ कपिष्ठलो गोत्रे
९२ प्रष्ठोऽग्रगामिनि
९३ वृक्षासनयोर्विष्टरः
९४ छन्दोनाम्नि च
९५ गवियुधिभ्यां स्थिरः
९६ विकुशमिपरिभ्यः स्थलम्
९७ अम्बाम्बगोभूमिसव्यापद्वित्रिकु-
शेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमे-
बर्हिर्दिव्याग्निभ्यः स्थः

९८ सुषामादिषु च
९९ एति संज्ञायामगात् (गणसूत्रम्)
१०० नक्षत्राद्वा (गणसूत्रम्)
१०१ ह्रस्वात्तादौ तद्धिते
१०२ निसस्तपतावनासेवने
१०३ युष्मत्तत्ततक्षुष्वन्तःपादम्
१०४ यजुष्येकेषाम्
१०५ स्तुतस्तोमयोश्छन्दसि
१०६ पूर्वपदात्
१०७ सुञः
१०८ सनोतेरनः
१०९ सहेः पृतनर्ताभ्यां च
११० न रपरसृपिसृजिस्पृशिस्पृहिस-
वनादीनाम्
१११ सात्पदाद्योः
११२ सिचो यङि
११३ सेधतेर्गतौ
११४ प्रतिस्तब्धनिस्तब्धौ च
११५ सो ढः
११६ स्तम्भुसिवुसहां चङि
११७ सुनोतेः स्यसनोः
११८ सदेः परस्य लिटि
११९ निव्यभिभ्योऽड्व्यवाये वा
च्छन्दसि

चतुर्थः पादः

१ रषाभ्यां नो णः समानपदे

२ अट्कुप्वाङ्नुम्व्यवायेऽपि
३ पूर्वपदात्संज्ञायामगः
४ वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः
५ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि
६ विभाषौषधिवनस्पतिभ्यः
७ अह्नोऽदन्तात्
८ वाहनमाहितात्
९ पानं देशे
१० वा भावकरणयोः
११ प्रातिपदिकान्तनुम्विभक्तिषु च
१२ एकाजुत्तरपदे णः
१३ कुमति च
१४ उपसर्गादसमासेऽपि णोपदेशस्य
१५ हिनुमीना
१६ आनि लोट्
१७ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च
१८ शेषे विभाषाऽकखादावषान्त उपदेशे
१९ अनितेः
२० अन्तः
२१ उभौ साभ्यासस्य
२२ हन्तेरत्पूर्वस्य
२३ वमोर्वा
२४ अन्तरदेशे
२५ अयनं च
२६ छन्दस्यृदवग्रहात्
२७ नश्च धातुस्थोरुषुभ्यः
२८ उपसर्गाद्बहुलम्
२९ कृत्यचः
३० णेर्विभाषा
३१ हलश्चेजुपधात्
३२ इजादेः सनुमः
३३ वा निंसनिक्षनिन्दाम्
३४ न भाभूपूकमिगमिप्यायीवेपाम्
३५ षात्पदान्तात्
३६ नशेः षान्तस्य
३७ पदान्तस्य
३८ पदव्यवायेऽपि
३९ क्षुभ्नादिषु च
४० स्तोः श्चुना श्चुः
४१ ष्टुना ष्टुः
४२ न पदान्ताट्टोरनाम्
४३ तोः षि
४४ शात्
४५ यरोऽनुनासिकेऽनुनासिको वा
४६ अचो रहाभ्यां द्वे
४७ अनचि च
४८ नादिन्याक्रोशे पुत्रस्य
४९ शरोऽचि
५० त्रिप्रभृतिषु शाकटायनस्य
५१ सर्वत्र शाकल्यस्य
५२ दीर्घादाचार्याणाम्
५३ झलां जश् झशि
५४ अभ्यासे चर्च

५५ खरि च

५६ वाऽवसाने

५७ अणोऽप्रगृह्यस्यानुनासिकः

५८ अनुस्वारस्य ययि परसवर्णः

५९ वा पदान्तस्य

६० तोर्लि

६१ उदः स्थास्तम्भोः पूर्वस्य

६२ झयो होऽन्यतरस्याम्

६३ शश्छोऽटि

६४ हलो यमां यमि लोपः

६५ झरो झरि सवर्णे

६६ उदात्तादनुदात्तस्य स्वरितः

६७ नोदात्तस्वरितोदयमगार्ग्यकाश्यप-
गालवानाम्

६८ अ अ

—— ——

परिशिष्टम्–२

अकारादिक्रमेण-अष्टाध्यायीसूत्राणाम्

(पञ्चम-षष्ठ-सप्तमाष्टमाध्यायानाम्)

अनुक्रमणिका–२

कौमुदीसूत्राङ्कः	सूत्रम्
२१२	आदेशप्रत्यययोः ८।३।५९
६९	आद्गुणः ६।१।८७
३८५३	आद्युदात्तं द्व्यच्छ० ६।२।११९
९२१	आनङ् ऋतो द्वन्द्वे ६।३।२५
२२३१	आनि लोट् ८।४।१६
३१०१	आने मुक् ७।२।८२
८०७	आन्महतः समाना० ६।३।४६
१०८२	आपत्यस्य च तद्धि० ६।४।१५१
३५२१	आपो जुषाणो वृ० ६।१।११८
८९२	आपोऽन्यतरस्याम् ७।४।१५
२६१९	आप्ज्ञप्यृधामीत् ७।४।५५
१८०९	आप्रपदं प्राप्नोति ५।२।८
२१४५	आबाधे च ८।१।१०
३९६२	आम एकान्तरमाम० ८।१।५५
४१२	आमन्त्रितं पूर्वमवि० ८।१।७२
३६५३	आमन्त्रितस्य च ६।१।१९८
३६५४	आमन्त्रितस्य च ८।१।१९
२१७	आमि सर्वनाम्नः सुट् ७।१।५२
३६१४	आम्रेडितं भर्त्सने ८।२।९५
४७५	आयनेयीनीयियः फ० ७।१।२
२०६७	आयुधजजीविसंघा० ५।३।११४
२१८४	आर्धधातुकस्येड्वला० ७।२।३५
२३०७	आर्धधातुके ६।४।४६
३७९२	आर्यो ब्राह्मणकुमा० ६।२।५८
१६८१	आर्हादगोपुच्छसं० ५।१।१९
१९३१	आलजाटचौ बहु० ५।२।१२५
३७५५	आशङ्काबाधनेदीय० ६।२।२१

कौमुदीसूत्राङ्कः	सूत्रम्
३९९५	आशितः कर्ता ६।१।२०७
१०६२	आश्चर्यमनित्ये ६।१।१४७
१९००	आसन्दीवदष्ठीवच्च० ८।२।१२
४३०	आ सर्वनाम्नः ६।३।९१
१०६०	आस्पदं प्रतिष्ठा० ६।१।१४६
२४५१	आहस्थः ८।२।३५
१९८६	आहि च दूरे ५।३।३७
३९५६	आहो उताहो चान० ८।१।४९
१०४५	इकः काशे ६।३।१२३
३५३६	इकः सुञि ६।३।१३४
३२०	इकोऽचि विभक्तौ ७।१।७३
४७	इको यणचि ६।१।७७
१०४३	इको वहेऽपीलोः ६।३।१२१
९१	इकोऽसवर्णे शाक० ६।१।१२७
९९९	इको ह्रस्वोऽङ्यो गा० ६।३।६१
३७६३	इगन्तकालकपाल० ६।२।२९
१७९६	इगन्ताच्च लघुपूर्वात् ५।१।१३१
२९९४	इच एकाचोऽम्प्रत्य० ६।३।६८
८६६	इच्कर्मव्यतिहारे ५।४।१२
२८३८	इजादेः सनुमः ८।४।१२
२२६६	इट ईटि ८।२।२८
२६२५	इट् सनि वा ७।२।४१
२३८४	इडत्यर्तिव्ययतीनाम् ७।२।६६
३६३९	इडाया वा ८।३।५४
१५३	इणः षः ८।३।३९
२२४७	इणः षीध्वंलुङ्लिटां० ८।३।७८

कौमुदीसूत्राङ्कः	सूत्रम्
२४५५	इणो यण् ६।४।८१
२११	इण्कोः ८।३।५७
३०४५	इण्निष्ठायाम् ७।२।४७
१९६३	इतराभ्योऽपि दृश्यन्ते ५।३।१४
३६६	इतोऽत्सर्वनामस्थाने ७।१।८६
३८८३	इत्थंभूतेन कृतमि० ६।२।१४९
१०१८	इदंकिमोरीश्की ६।३।९०
३५६८	इदन्तो मसि ७।१।४६
१९४९	इदम इश् ५।३।३
१९७२	इदमस्थमुः ५।३।२४
३४३	इदमो मः ७।२।१०८
१९६५	इदमोर्हिल् ५।३।१६
१९५८	इदमो हः ५।३।११
२२६२	इदितो नुम्धातोः ७।१।५८
१५५	इदुदुपधस्य चाप्रत्य० ८।३।४१
२९७	इदुद्भ्याम् ७।३।११७
३३४	इदोऽय् पुंसि ७।२।१११
२४८२	इद्दरिद्रस्य ६।४।१४४
९२५	इद्वृद्धौ ६।३।२८
८९०	इनः स्त्रियाम् ५।४।१५२
१८३४	इनच्पिटच्चिकचि च ५।२।३३
१२४५	इनण्यनपत्ये ६।४।१६४
१८९३	इन्द्रियमिन्द्रलिङ्गमि० ५।२।९३
८९	इन्द्रे च ६।१।१२४
३५६	इन्हन्पूषार्यम्णां शौ ६।४।१२
३५४७	इरयोरे ६।४।७६
२०५१	इवे प्रतिकृतौ ५।३।९६
२४००	इषुगमियमां छः ७।३।७७
१००६	इष्टकेषीकामा० ६।३।६५
१८८८	इष्टादिभ्यश्च ५।२।८८
३५७०	इष्ट्वीनमिति च ७।१।४८
२०१८	इष्ठस्य यिट् च ६।४।१५९
१२२१	इसुसुक्तान्तात्कः ७।३।५१
१५८	इसुसोः सामर्थ्ये ८।३।४४
२९८५	इस्मन्त्रन्क्विषु च ६।४।९७
२६४८	ई घ्राध्मोः ७।४।३१
२५७३	ई च गणः ७।४।९७
३५७६	ई च द्विवचने ७।१।७७
९९	ई३ चाक्रवर्मणस्य ६।१।१३०
२४४०	ईडजनोर्ध्वे च ७।२।७८
३७०२	ईडवन्दवृशंसदु० ६।१।२१४
९२३	ईदग्नेः सोमवरुणयोः ६।३।२७
३१०४	ईदासः ७।२।८३
२८४३	ईद्यति ६।४।६५
८९१	ईयसश्च ५।४।१५६
३७०७	ईवत्याः ६।१।२२१
२४३९	ईशः से ७।२।७७
३७८८	ईषदन्यतरस्याम् ६।२।५४
१०३१	ईषदर्थे ६।३।१०५
२०२२	ईषदसमाप्तौ कल्पब्० ५।३।६७
२४९७	ई हल्यघोः ६।४।११३
१६६२	उगवादिभ्यो यत् ५।१।२
९८७	उगितश्च ६।३।४५
३६१	उगिदचां सर्वनाम० ७।१।७०
१७०	उञि च पदे ८।३।२१
३६८१	उञ्छादीनां च ६।१।१६०

कौमुदीसूत्राङ्कः	सूत्रम्
१८४५	उभादुदात्तो नित्यम् ५।२।४४
४२६	उभे अभ्यस्तम् ६।१।५
३८७४	उभे वनस्पत्यादि० ६।२।१४०
२६०६	उभौ साभ्यासस्य ८।४।२१
८८६	उरःप्रभृतिभ्यः कप् ५।४।१५१
२२४४	उरत् ७।४।६६
२५६७	उर्ऋत् ७।४।७
६२८	उषासोषसः ६।३।३१
३७७४	उष्ट्रः सादिवाम्योः ६।२।४०
२२१४	उस्यपदान्तात् ६।१।९६
३७१७	ऊडिदंपदाद्यप्पु० ६।१।१७१
६४२	ऊदनोर्देशे ६।३।६८
२३६४	ऊदुपधाया गोहः ६।४।८९
४८३	ऊधसोऽनङ् ५।४।१३१
३८८७	ऊनार्थकलहं तृती० ६।२।१५३
१९२९	ऊर्णाया युस् ५।२।१२३
२४४९	ऊर्णोतेर्विभाषा ७।२।६
२४४५	ऊर्णोतेर्विभाषा ७।३।९०
८६९	ऊर्ध्वाद्विभाषा ५।४।१३०
१९१४	ऊषसुषिमुष्कमधो० ५।२।१०७
९४०	ऋक्पूरब्धूःपथामानक्षे ५।४।७४
९९३	ऋचः शे ६।३।५५
३५३५	ऋचितनुघमक्षुत० ६।३।१३३
२३८३	ऋच्छत्यृताम् ७।४।११
२०४३	ऋणमाधमर्ण्ये ८।२।६०
२७९	ऋत उत् ६।१।१११
२६५३	ऋतश्च ७।४।९२
२५२६	ऋतश्च संयोगादेः ७।२।४३
२३७९	ऋतश्च संयोगादेर्गुणः ७।४।१०
३५०८	ऋतश्छन्दसि ५।४।१५८
२७५	ऋतो ङिसर्वनाम० ७।४।११०
२२९६	ऋतो भारद्वाजस्य ७।२।६३
१७६९	ऋतोरण् ५।१।१०५
९८१	ऋतो विद्यायोनिसंब० ६।३।२३
९२	ऋत्यकः ६।१।१२८
३५५६	ऋत्व्यवास्त्व्यवा० ६।४।१७५
२७६	ऋदुशनस्पुरुदंसोऽने० ७।१।९४
२४०६	ऋदृशोऽङि गुणः ७।४।१६
२३६६	ऋद्धनोः स्ये ७।२।७०
१६७६	ऋषभोपानहोर्ञ्यः ५।१।१४
२३९०	ऋत इद्धातोः ७।१।१००
६८	एकः पूर्वपरयोः ६।१।८४
१९२५	एकगोपूर्वाट्ठञ्नि० ५।२।११८
१०००	एकतद्धिते च ६।३।६२
२१४४	एकं बहुव्रीहिवत् ८।१।९
३९६	एकवचनस्य च ७।१।३२
२०६०	एकशालायाष्ठज० ५।३।१४९
२०८७	एकस्य सकृच्च ५।४।१९
९९७	एकहलादौ पूरयित० ६।३।५१
२२४६	एकाच उपदेशेऽनु० ७।२।१०
२१७५	एकाचो द्वे प्रथमस्य ६।१।१
३२६	एकाचो बशो भष्झ० ८।२।३७
२०४९	एकाच्च प्राचाम् ५।३।९४

कौमुदीसूत्राङ्कः	सूत्रम्
६८२	झयः ५।४।१११
१८६८	झयः ८।२।१०
११९	झयो होऽन्यतरस्याम् ८।४।६२
७१	झरो झरि सवर्णे ८।४।६५
८४	झलां जशोऽन्ते ८।२।३९
५२	झलां जश्झशि ८।४।५३
२२८१	झलो झलि ८।२।२६
३६८३	झल्युपोत्तमम् ६।१।१८०
२२८०	झषस्तथोर्धोऽधः ८।२।४०
२१६९	झोऽन्तः ७।१।३
३६८६	ञ्नित्यादिर्नित्यम् ६।१।१९७
२०७२	ञ्यादयस्तद्राजाः ५।३।११९
२०१	टाङसिङसामि० ७।१।१२
३१६	टेः ६।४।१४३
१७८६	टेः ६।४।१५५
११७०	ठस्येकः ७।३।५०
२०३५	ठाजादावूर्ध्वं द्विती० ५।३।८३
१३१	डः सि धुट् ८।३।२९
११४२	ढे लोपोऽकद्र्वाः ६।४।१४७
२३३५	ढो ढे लोपः ८।३।१३
१७४	ढ्रलोपे पूर्वस्य० ६।३।१११
३२१६	णचः स्त्रियामञ् ५।४।१४
२२८३	णलुत्तमो वा ७।१।९१
३८१३	णिनि ६।२।७९
३०६६	णेरध्ययने वृत्तम् ७।२।२६
२३१३	णेरनिटि ६।४।५१
२८३६	णेर्विभाषा ८।४।३०
२२८६	णो नः ६।१।६५
२३१४	णौ चङ्युपधाया ह्रस्वः ७।४।१
२५७९	णौ च संश्चङोः ६।१।३१
२८८१	ण्य आवश्यके ७।३।६५
७८६	तत्पुरुषस्याङ्गुलेः० ५।४।८६
९७२	तत्पुरुषे कृति ब० ६।३।१४
३७३६	तत्पुरुषे तुल्यार्थतृती० ६।२।२
३८५७	तत्पुरुषे शालायां० ६।२।१२३
२०८९	तत्प्रकृतवचने मयट् ५।४।२१
११३०	तत्प्रत्ययस्य च ७।३।२९
१८६३	तत्र कुशलः पथः ५।२।६३
१७६०	तत्र च दीयते कार्यं० ५।१।९६
१७७९	तत्र तस्येव ५।१।११६
१७०९	तत्र विदित इति च ५।१।४३
१८०८	तत्सर्वादेः पथ्यङ्ग० ५।२।७
२१२५	तदधीनवचने ५।४।५४
१६७४	तदर्थं विकृतेः प्रकृतौ ५।१।१२
१७२८	तदर्हति ५।१।६३
१७८०	तदर्हम् ५।१।११७
१८४६	तदस्मिन्नधिकमि० ५।२।४५
१८८२	तदस्मिन्नन्नं प्राये० ५।२।८२
१७१३	तदस्मिन्वृद्ध्यायला० ५।१।४७
१६७८	तदस्य तस्मिन्स्यादिति ५।१।१६
१७२३	तदस्य परिमाणम् ५।१।५७
१७५८	तदस्य ब्रह्मचर्यम् ५।१।९४
१८३७	तदस्य संजातं तार० ५।२।३६
१८९४	तदस्यास्त्यस्मिन्निति० ५।२।९४

कौमुदीसूत्राङ्कः	सूत्रम्
३५२	न ङिसंबुद्ध्योः ८।२।८
४०८	न चवाहाहैवयुक्ते ८।१।२४
३५८८	न च्छन्दस्यपुत्रस्य ७।४।३५
१४६०	नञः शुचीश्वरक्षेत्र० ७।३।३०
९५६	नञस्तत्पुरुषात् ५।४।७१
३८८९	नञो गुणप्रतिषेधे० ६।२।१५५
३८५०	नञो जरमरमि० ६।२।११६
८६१	नञ्दुःसुभ्यो हलि० ५।४।१२१
३९०६	नञ्सुभ्याम् ६।२।१७२
३००	न तिसृचतसृ ६।४।४
१८३२	नते नासिकायाः सं० ५।२।३१
६८१	नदीपौर्णमास्याग्र० ५।४।११०
३८४३	नदी बन्धुनि ६।२।१०९
९८६	नद्याः शेषस्यान्य० ६।३।४४
८३३	नद्यृतश्च ५।४।१५३
३०४०	न ध्याख्यापॄमूर्च्छि० ८।२।५७
१७८३	न नञ्पूर्वात्तत्पुरु० ५।१।१२१
३९१५	न निविभ्याम् ६।२।१८१
२४४६	न न्द्राः संयोगादयः ६।१।३
३९५०	नन्वित्यनुज्ञैषणा० ८।१।४३
११४	न पदान्ताट्टोरनाम् ८।४।४२
१२९	नपरे नः ८।३।२७
३१४	नपुंसकस्य झलचः ७।१।७२
३१०	नपुंसकाच्च ७।१।१९
६८०	नपुंसकादन्यतरस्याम् ५।४।१०९
९५४	न पूजनात् ५।४।६९
१६२९	न भकुर्छुराम् ८।२।७९
२८४०	न भाभूपूकमिगमि० ८।४।३४

कौमुदीसूत्राङ्कः	सूत्रम्
३८२५	न भूताधिकसंजीव० ६।२।९१
३७५३	न भूवाक्चिद्दिधिषु ६।२।१९
२७३	न भूसुधियोः ६।४।८५
७५९	न भ्राणनपान्नवेदाना० ६।३।७५
११५७	न मपूर्वोऽपत्येऽव० ६।४।१७०
१५४	नमस्पुरसोर्गत्योः ८।३।४०
२२२८	न माङ्योगे ६।४।७४
४३९	न मु ने ८।२।३
४६४	न यासयोः ७।३।४५
१०९८	न य्वाभ्यां पदान्ता० ७।३।३
३१६८	न रपरसृपिसृजि० ८।३।११०
१०४८	नरे संज्ञायाम् ६।३।१२९
२५२९	न लिङि ७।२।३९
३९३६	न लुट् ८।१।२९
२३६	नलोपः प्रातिपदि० ८।२।७
३५३	नलोपः सुप्स्वर० ८।२।२
७५७	नलोपो नञः ६।३।७३
३३३५	न ल्यपि ६।४।६९
२६४६	न वशः ६।१।२०
२३४८	न वृद्भ्यश्चतुर्भ्यः ७।१।५९
२४१६	न व्यो लिटि ६।१।४६
२२६३	न शसददवादि० ६।४।१२६
२५१८	नशेः षान्तस्य ८।४।३६
४३१	नशेर्वा ८।२।६३
१३२	नश्च ८।३।३०
३६४९	नश्च धातुस्थो० ८।४।२७
१२३	नश्चापदान्तस्य झ० ८।३।२४

कौमुदीसूत्राङ्कः सूत्रम्

कौमुदीसूत्राङ्कः सूत्रम्

कौमुदीसूत्राङ्कः	सूत्रम्
३७४१	पदेऽपदेशे ६।२।७
२२८	पद्दन्नोमास्हृन्निशस० ६।१।६३
९९१	पद्यत्यतदर्थे ६।३।५३
१७४०	पन्थो ण नित्यम् ५।१।७६
९६५	परस्य च ६।३।८
३९३३	परादिश्छन्दसि० ६।२।१९९
१६७९	परिखाया ढञ् ५।१।१७
२२७५	परिनिविभ्यः सेव० ८।३।७०
३७६७	परिप्रत्युपापावर्ज्य० ६।२।३३
१६८३	परिमाणान्तस्यासं० ७।३।१७
३०२६	परिस्कन्दः प्राच्यभ० ८।३।७५
३९१६	परेरभितोभावि० ६।२।१८२
२१४१	परेर्वर्जने ८।१।५
२३९९	परेश्च ८।३।७४
३२६२	परेश्च घाङ्कयोः ८।२।२२
१८११	परोवरपरंपरपुत्रपौ० ५।२।१०
१९५६	पर्यभिभ्यां च ५।३।९
२०७०	पर्श्वादियौधेयादि० ५।३।११७
३८६२	पललसूपशाकं मिश्रे ६।२।१२८
३५०१	पश्चपश्चा च च्छन्दसि ५।३।३३
१९८२	पश्चात् ५।३।३२
४०९	पश्यार्थैश्चानालोचने ८।१।२५
२३६०	पाघ्राध्मास्थाम्नादा० ७।३।७८
३६३७	पातौ च बहुलम् ८।३।५२
१७१२	पात्राट्ठन् ५।१।४६
१७३२	पात्राद्घंश्च ५।१।६८
४१४	पादः पत् ६।४।१३०

कौमुदीसूत्राङ्कः	सूत्रम्
२०७३	पादशतस्य संख्यादे० ५।४।१
९९०	पादस्य पदाज्याति० ६।३।५२
८७७	पादस्य लोपोऽह० ५।४।१३८
२०९३	पादार्घाभ्यां च ५।४।२५
१०५३	पानं देशे ८।४।९
३८०२	पापं च शिल्पिनि ६।२।६८
१०७१	पारस्करप्रभृतीनि० ६।१।१५७
१७३६	पारायणतुरायणचा० ५।१।७२
१८७५	पार्श्वेनान्विच्छति ५।२।७५
३५२८	पितरामातरा च च्छ० ६।३।३३
७४६	पुंवत्कर्मधारयजाती० ६।३।४२
४३६	पुंसोऽसुङ् ७।१।८९
२१८९	पुगन्तलघूपधस्य च ७।३।८६
३८६६	पुत्रः पुम्भ्यः ६।२।१३२
१७०६	पुत्राच्छ च ५।१।४०
९८०	पुत्रेऽन्यतरस्याम् ६।३।२२
१३९	पुमः खय्यम्परे ८।३।६
३९४९	पुरा च परीप्सायाम् ८।१।४२
३९२४	पुरुषश्चान्वादिष्टः ६।२।१९०
१८३९	पुरुषहस्तिभ्यामण्च ५।२।३८
३८३३	पुरे प्राचाम् ६।२।९९
१९४१	पुष्करादिभ्यो देशे ५।२।१३५
२०६६	पूगाञ्ञ्योऽग्रा० ५।३।११२
३७६२	पूगेष्वन्यतरस्याम् ६।२।२८
३०५०	पूङश्च ७।२।५१
३९७४	पूजनात्पूजितमनु० ८।१।६७
३९४४	पूजायां नानन्तरम् ८।१।३७

कौमुदीसूत्राङ्कः	सूत्रम्
१५०	शर्परे विसर्जनीयः ८।३।३५
२२५९	शर्पूर्वाः खयः ७।४।६१
१२०	शश्छोऽटि ८।४।६३
३९१	शसो न ७।१।२९
२०५८	शाखादिभ्यो यः ५।३।१०३
२५८१	शाच्छासाह्वाव्यावे० ७।३।३७
३०७५	शाच्छोरन्यतरस्याम् ७।४।४१
१७००	शाणाद्वा ५।१।३५
११२	शात् ८।४।४४
३७४३	शारदेऽनार्तवे ६।२।९
१८२१	शालीनकौपीने अ० ५।२।२०
२४८६	शास इदङ्हलोः ६।४।३४
२४१०	शासिवसिघसीनां० ८।३।६०
२२८७	शा हौ ६।४।३५
१३३	शि तुक् ८।३।३१
३८७२	शितेर्नित्याबह्वज्ब० ६।२।१३८
२०५७	शिलाया ढः ५।३।१०२
३८१०	शिल्पिनि चाकृञः ६।२।७६
२४४१	शीङः सार्वधातुके० ७।४।२१
२४४२	शीङो रुट् ७।१।६
१८७२	शीतोष्णाभ्यां कारिणि ५।२।७२
३५१४	शीर्षंश्छन्दसि ६।१।६०
१७३०	शीर्षच्छेदाद्यच्च ५।१।६५
३०३०	शुषः कः ८।२।५१
३६९४	शुष्कधृष्टौ ६।१।२०६

कौमुदीसूत्राङ्कः	सूत्रम्
१६९१	शूर्पादञन्यतरस्याम् ५।१।२६
२१३६	शूलात्पाके ५।४।६५
१८७९	शृङ्खलमस्य बन्ध० ५।२।७९
३८४९	शृङ्गमवस्थायां च ६।२।११५
३०६७	शृतं पाके ६।१।२७
२४९५	शृदृप्रां ह्रस्वो वा ७।४।१२
२५४२	शे मुचादीनाम् ७।१।५९
२०३८	शेवलसुपरिविशाल० ५।३।८४
३५१६	शेश्छन्दसि बहुलम् ६।१।७०
८९१	शेषाद्विभाषा ५।४।१५४
३८१	शेषे लोपः ७।२।९०
३९४८	शेषे विभाषा ८।१।४१
३९५७	शेषे विभाषा ८।१।५०
२२३२	शेषे विभाषाकखा० ८।४।१८
२४६९	श्नसोरल्लोपः ६।४।१११
२५४४	श्नान्नलोपः ६।४।२३
२४८३	श्नाभ्यस्तयोरातः ६।४।११२
१२६८	श्येनतिलस्य पाते० ६।३।७१
३०२१	श्योऽस्पर्शे ८।२।४७
३७५९	श्रज्यावमकन्पाप० ६।२।२५
१८८५	श्राद्धमनेन भुक्त० ५।२।८५
३५७३	ग्रामश्रीण्योश्छ० ७।१।५६
३५५१	श्रुशृणुपॄकृवृ० ६।४।१०२
१८८४	श्रोत्रियंश्छन्दो० ५।२।८४
२३८१	श्र्युकः किति ७।४।११
२४९०	श्लौ ६।१।१०

कौमुदीसूत्राङ्कः	सूत्रम्
२४२१	श्वयतेरः ७।४।१८
३६२	श्वयुवमघोनामत० ६।४।१३३
९४८	श्वसोवसीयः श्रे० ५।४।८०
१५६०	श्वादेरिञि ७।३।८
३०३९	श्वीदितो निष्ठायाम् ७।२।१४
१८५१	षट्कतिकतिपय० ५।२।५१
३८९९	षट् च काण्डादीनि ६।२।१३५
३३८	षट्चतुर्भ्यश्च ७।१।५५
३७२५	षट्त्रिचतुर्भ्यो० ६।१।१७९
२६१	षड्भ्यो लुक् ७।१।२२
२९५	षढोः कः सि ८।२।४१
१७४७	षण्मासाण्ण्यच्च ५।१।८३
३३३३	षत्वतुकोरसिद्धः ६।१।८६
११६०	षपूर्वहन्धृत० ६।४।१३५
१७५६	षष्टिकाः षष्टिरा० ५।१।९०
१८५८	षष्ट्यादेश्चासंख्यादेः ५।२।५८
१९९६	षष्ठाष्टमाभ्यां ञ च ५।३।५०
३७९४	षष्ठी प्रत्येनसि ६।२।६०
९७९	षष्ठ्या आक्रोशे ६।३।२१
३६३८	षष्ठ्याः पतिपुत्रपृ० ८।३।५३
२०००	षष्ठ्या रूप्य च ५।३।५४
२११५	षष्ठ्या व्याश्रय ५।४।४८
३३१०	षात्पदान्तात् ८।४।३५
११३	ष्टुना ष्टुः ८।४।४१
२३२०	ष्ठिवुक्लमुचमां शि० ७।३।७५
१००३	ष्यङः संप्रसारणम्० ६।१।१३

कौमुदीसूत्राङ्कः	सूत्रम्
१८७८	स एषां ग्रामणीः ५।२।७८
२३४२	सः स्यार्धधातुके ७।४।४९
२६२८	सः स्विदिस्वदिस० ८।३।६२
११५६	संयोगादिश्च ६।४।१६६
३०१७	संयोगादेरातो धा० ८।२।४३
५४	संयोगान्तस्य लो० ८।२।२३
१७३७	संशयमापन्नः ५।१।७३
१४५	संहितायाम् ६।१।७२
१०३५	संहितायाम् ६।३।११४
३९३२	सक्थं चाक्रां० ६।२।१९८
२५३	सख्युरसंबुद्धौ ७।१।९२
१७९१	सख्युर्यः ५।१।१२६
३९७५	सगतिरपि तिङ् ८।१।६८
३७६९	संख्या ६।२।३५
१६८७	संख्याया अति० ५।१।२२
१८४३	संख्याया अवयवे० ५।२।४२
२०८५	संख्यायाः क्रिया० ५।४।१७
१७५२	संख्यायाः संवत्सर० ७।३।१५
१७२४	संख्यायाः संज्ञासंघ० ५।१।५८
३८९७	संख्यायाः स्तनः ६।२।१६३
१८४८	संख्याया गुणस्य० ५।२।४७
१९८८	संख्याया विधार्थे० ५।३।४२
२१३०	संख्यायाश्च गुणा० ५।४।५९
२३८	संख्याविसायपूर्व० ६।३।११०
८७९	संख्यासुपूर्वस्य ५।४।१४०
२११०	संख्यैकवचना० ५।४।४३
८३९	संज्ञापूरण्योश्च ६।३।३८
३८९३	संज्ञायाम् ६।२।१५९

कौमुदीसूत्राङ्कः	सूत्रम्

परिशिष्टम्-३

(अथोत्तरार्धे) गणपाठः

पञ्चमोऽध्यायः

१६६२ उगवादिभ्यो यत् ५।१।२।। गो हविस् अक्षर विष बर्हिस् अष्टका स्वदा युग मेधा स्रुच् । नाभि नभं च । शुनः संप्रसारणं वा च दीर्घत्वं, तत्संनियोगेन चान्तोदात्तत्वम् । ऊधसोऽनङ् च कूप खद दर खर असुर अध्वन् (अध्वन) क्षर वेद बीज दीस (दीप्त) इति गवादिः ।।१४४।।

१६६४ विभाषा हविरपूपादिभ्यः ५।१।४।। अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक इर्गल । अर्गल । अन्नविकारेभ्यश्च । यूप स्थूणा दीप अश्व पत्र ।। इत्यपूपादिः ।।१४५।।

१६८२ असमासे निष्कादिभ्यः ५।१।२० ।। निष्क पण पाद माष वाह द्रोण षष्टि ।।इति निष्कादिः ।।१४६।।

१७०५ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५।१।५०।। अश्व अश्मन् गण ऊर्णा (उर्म) उमा भङ्गा (गङ्गा) वर्षा वसु ।। इत्यश्वादिः ।।१४७।।

१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ५।१।५०।। वंश कुटज बल्वज मूल स्थूणा (स्थूण) अक्ष अश्मन् अश्व श्लक्ष्ण इक्षु खट्वा ।। इति वंशादिः ।।१४८।।

१७२६ छेदादिभ्यो नित्यम् ५।१।।६४।। छेद भेद द्रोह दोह नर्ति (नर्त) कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष । विराग विरङ्गं च ।।इति छेदादिः ।।१४९।।

१७३१ दण्डादिभ्यो यत् ५।१।६६।। दण्ड मुसल मधुपर्क कशा अर्ध मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग ।।इति दण्डादिः ।।१५०।।

१७५८ ॐ महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् ॐ ५।१।९४ ॥ महानाम्नी आदित्यव्रत गोदान ॥ इति महानाम्न्यादिः ॥१५१॥

१७६१ ॐ अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः ॐ ५।१।९४॥ अवान्तरदीक्षा तिलव्रत देवव्रत ॥ इत्यवान्तरदीक्षादिः ॥१५२॥

१७६१ व्युष्टादिभ्योऽण् ५।१।९७॥ व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम संघात ॥ इति व्युष्टादिः ॥१५३॥ अग्निपदादिभ्य उपसंख्यानम् अग्निपद (पीलुमूल) प्रवास उपवास ॥ इत्यग्निपदादिराकृतिगणः ॥१५४॥

१७६५ तस्मैप्रभवति संतापादिभ्यः ५।१।१०१॥ संताप संनाह संग्राम संयोग संपराय संवेशन संपेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघास संवेष संवास संमोदन सक्तु । मांसौदनाद्विगृहीतादपि ॥ इति संतापादिः ॥१५५॥

१७६८ ॐ तदप्रकरणे उपवस्त्रादिभ्य उपवसंख्यानम् ॐ ५।१।१०५॥ उपवस्तृ प्राशितृ चूडा श्रद्धा ॥ इत्युपवस्त्रादिः ॥१५६॥

१७७४ अनुप्रवचनादिभ्यश्छः ५।१।१११॥ अनुप्रवचन उत्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण ॥ इत्यनुप्रवचनादिः ॥१५७॥

१७७४ ॐ स्वर्गादिभ्यो यद्वक्तव्यः ॐ ५।१।१११॥ स्वर्ग यशस् आयुस् काम धन ॥ इति स्वर्गादिः ॥१५८॥

२७६ ॐ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ॐ ५।१।१११॥ पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन ॥ इति पुण्याहवाचनादिः ॥१५९॥

१७८४ पृथ्वादिभ्य इमनिज्वा ५।१।१२२॥ पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु ॥ इति पृथ्वादिः ॥१६०॥

१७८७ वर्णदृढादिभ्यः ष्यञ्च ५।१।१२३॥ दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ट लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर । वेर्यातलातमतिर्मनःशारदानाम् समो मतिमनसोः । जवन ॥ इति दृढादिः ॥१६१॥

१७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च ५।१।१२४॥ ब्राह्मण वाडव माणव ।

अर्हतो नुम्च । चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निश्न बालिश अलस दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात । सर्ववेदादिभ्यः स्वार्थे । चतुर्वेदस्योभयपदवृद्धिश्च । शौटीर ।। आकृति-गणोऽयम् ।। इति ब्राह्मणादिः ।।१६२।।

१७८९ ❀ चतुर्वेदादिभ्य उभयपदवृद्धिश्च ❀ ५।१।१२४।। चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर संनिधि समीप उपमा सुख तदर्थ इतिह मणिक ।। इति चतुर्वेदादिः ।।१६३।।

१७९३ पत्यन्तपुरोहितादिभ्यो यक् ५।१।१२८।। पुरोहित । राजासे । ग्रामिक पिण्डिक सुहित वालमन्द (बाल मन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शिलिक सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुत्रिक अविक छत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्तिक सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाक्कर नागर चूडिक ।। इति पुरोहितादिः ।।१६४।।

१७९४ प्राणभृज्जातिवयोवचनोत्रादिभ्योऽञ् ५।१। २९।। उदगातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू सुभग मन्त्रे ।। इत्युद्गात्रादिः ।।१६५।।

१७९५ हायनान्तयुवादिभ्योऽण् ५।१।१३०।। युवन् स्थविर होतृ यजमान । पुरुषासे । भ्रातृ कुतुक श्रमण (श्रवण) कटुक कमण्डलु कुस्त्री सुस्त्री दुःस्त्री सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सब्रह्मचारिन् अनृशंस । हृदयासे । कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ । श्रोत्रियस्य यलोपश्च ।। इति युवादिः ।।१६६।।

१७९८ द्वन्द्वमनोज्ञादिभ्यश्च ५।१।१३३।। मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्वदेव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल ग्रामड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल अवश्यपुत्र अमुष्यपुत्र अमुष्यकुल सारपुत्र शतपुत्र ।। इति मनोज्ञादिः ।।१६७।।

१८२५ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ५।२।२४।। (१) पीलु कर्कन्धू (कर्कन्धु) शमी करीर वल (कुवल) बदर अश्वत्थ खदिर ।। इति पील्वादिः ।।१६८।। (२) कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ ।। इति कर्णादिः ।।१६९।।

१८३७ तदस्य संजातं तारकादिभ्य इतच् ५।२।३६।। तारका पुष्प कर्णक

मञ्जरी ऋजीप क्षण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक (स्वक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्णक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध् सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल बकुल श्वभ्र आराल कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज । गर्भाद-प्राणिनि ।। इति तारकादिराकृतिगणः ।।१७० ।

१८६१ विमुक्तादिभ्योऽण् ५।२।६१।। विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पत्नीवत् वसुमत् महीयस् सत्वत् बर्हवत् दशर्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् ।। इति विमुक्तादिः ।।१७१।।

१८६२ गोषदादिभ्यो वुन् ५।२।६२।। गोषद (गोषद्) इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः । कृष्णोऽस्याखरेष्ठः देवीधिया (देवीधि) रक्षोहण युञ्जान अञ्जन प्रसूत प्रतूर्त कृशानु (कृशाकु) ।। इति गोषदादिः । १७२।।

१८६४ आकर्षादिभ्यः कन् ५।२।६४।। आकर्ष (आकष) त्सरु पिशाच पिचण्ड अशनि अश्मन् निचय चय विजय जय आचय नय पाद दीप ह्रद ह्राद ह्लाद गद्गद शकुनि ।। इत्याकर्षादिः ।। १७३।।

१८८८ इष्टादिभ्यश्च ५।२।८८।। इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित ।। इतीष्टादिः ।।१७४।।

१८९५ रसादिभ्यश्च ५।२।९५।। रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव । गुणात् एकाचः ।। इति रसादिः ।।१७५।।

१९०४ सिध्मादिभ्यश्च ५।२।९७।। सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव पांसु पार्श्व पर्शु हनु सक्तु मास (मांस) पार्ष्णिधमन्योर्दीर्घश्च । वातदन्त-बलललाटानामूङ् च । जटाघटाकटाकालाः क्षेपे । पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीतश्याम पिङ्ग पित्त पुष्क पृथु मृदु मञ्जु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धारा वर्ष्मन् पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड । क्षुद्रजन्तूपतापयोश्च ।। इति सिध्मादिः ।।१७६।।

१६०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः ५।२।१००।। (१) लोमन् रोमन् बभ्रु हरि गिरि कर्क कपि मुनि तरु ।। इति लोमादिः ।।१७७।। (२) पामन् वामन् वेमन् हेमन् श्लेष्मन् (कद्रू) बलि सामन् ऊष्मन् कृमि । अङ्गात्कल्याणे । शाकीपलालीदद्रूणां ह्रस्वत्वं च । विष्वगित्युत्तरपदलोपश्चाकृतसंधेः लक्ष्म्या अच्च ।। इति पामादि ।।१७८।। (३) पिच्छा उरस् ध्रुवक ध्रुवक । जटाघटाकालाः क्षेपे । वर्ण उदक पङ्क प्रज्ञा ।। इति पिच्छादिः ।।१७९।।

१६१० ॐ ज्योत्स्नादिभ्य उपसंख्यानम् ॐ ५।२।१०३।। ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका ।। इति ज्योत्स्नादिः ।।१८०।।

१६२३ व्रीह्यादिभ्यश्च ५।२।११६।। व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी । शीर्षान्नञः ।। इति व्रीह्यादिः ।।१८१।।

१६२४ तुन्दादिभ्य इलच्च ।५।२।११७।। तुन्द उदर पिचण्ड यव व्रीहि । स्वाङ्गाद्विवृद्धौ ।। इति तुन्दादिः ।।१८२।।

१६३३ अर्शआदिभ्योऽच् ५।२।१२७।। अर्शस् उरस् तुन्द चतुर कलित जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण । स्वाङ्गाद्धीनात् । वर्णात् ।। इत्यर्शआदिराकृतिगणः ।।१८३।।

१६३७ सुखादिभ्यश्च ५।२।१३१।। सुख दुःख तृप्त (तृप्र) कृच्छ्र अस्र (आश्र) आस्र अलीक कठिण सोढ प्रतीप शील हल । माला क्षेपे । कृपण प्रणाय (प्रणय) दल कक्ष ।। इति सुखादिः ।।१८४।।

१६४१ पुष्करादिभ्यो देशे ५।२।१३५।। पुष्कर पद्म उत्पल तमालकुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास (प्रवास) हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल कल्लोल पयस् ।। इति पुष्करादिः ।।१८५।।

१६४२ बलादिभ्यो मतुबन्यतरस्याम् ५।२।१३६।। बल उत्साह उद्भास उद्वास उद्दास शिखा कुल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध ।। इति बलादिः ।।१८६।।

१६६३ ॐ दृशिग्रहणाद्भवदादियोग एव ॐ ५।३।१४।। भवान् दीर्घायुः देवानांप्रियः आयुष्मान् ।। इति भवदादिः ।।१८७।।

२०५५ देवपथादिभ्यश्च ५।३।१००।। देवपथ (हंसपथ वारिपथ रथपथ) स्थल-

पथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वामरज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य ।। इति देवपथादिराकृतिगणः ।।१८८।।

२०२८ शाखादिभ्यो यः ५।३।१०३।। शाखा मुख जघन शृङ्ग मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र (शाण) शरण ।। इति शाखादिः ।।१८९।।

२०६२ शर्करादिभ्योऽण् ५।३।१०७।। शर्करा कपालिका कपाटिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन् गोपुच्छ नराची नकुल सिकता ।। इति शर्करादिः ।।१९०।।

२०६६ अङ्गुल्यादिभ्यष्ठक् ५।३।१०८।। अङ्गुली भरुज बभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश ।। इत्यङ्गुल्यादिः ।।१९१।।

२०६९ दामन्यादित्रिगर्तषष्ठाच्छः ५।३।११६।। दामनी औलपि वैजवापि औदकि औदङ्कि अच्युतन्ति (आच्युतन्ति) अच्युतदन्ति आच्युतदन्ति) शाकुन्तकि आकिदन्ति (आक्तिदन्ति) औडवि काकदन्तकि शात्रुंतपि सार्वसेनि बिन्दु वैन्दवि तुलभ मौञ्जायन काकन्दि सावित्रीपुत्र ।।इति दामन्यादिः ।। १९२।।

२०७० पर्श्वादियौधेयादिभ्योऽणञौ ५।३।११७।। (१) पशु असुर रक्षस् वाह्लीक वयस वसु मरुत् सत्वत् दशार्ह पिशाच अशनि कार्षापण ।। इति पर्श्वादि ।।१९३।। (२) यौधेय कौशेय शौक्रेय शांभ्रेय धार्तेय वार्तेय ज्वावाणेय त्रिगर्त भरत उशीनर ।। इति यौधेयादिः ।।१९४ ।

२०७५ स्थूलादिभ्यः प्रकारवचने कन् ५।४।३।। स्थूल अणु माषेषु (माष इषु) कृष्ण तिलेषु । यव व्रीहिषु इक्षु तिल । पाद्यकालावदातसुरायाम् । गोमूत्र आच्छादने । सुराया अहौ । जीर्णशालिषु । पत्रमूल समस्तो व्यस्तश्च । कुमारीपुत्र कुमारीश्वशुर मणि ।। इति स्थूलादिः ।।१९५।।

२०९७ यावादिभ्यः कन् ५।४।२९।। याव मणि अस्थि तालु जानु सान्द्र पीत स्तम्ब । ऋता उष्णशीते । पशौ लूनविपाते । अणु निपुणे । पुत्र कृत्रिमे । स्नात वेदसमाप्तौ । शून्य रिक्ते । दान कुत्सिते । तनु सूत्रे । इयसश्च । ज्ञात अज्ञात । (कुमारीक्रीडनकानि च) ।। इति यावादि ।। १९६ ।।

२१०२ विनयादिभ्यष्ठक् ५।४।३४।। विनय समय । उपायो ह्रस्वत्वं च । संप्रति संगति कथंचित् अकस्मात् समाचार उपचार समाय (समयाचार) व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय ।। इति विनयादिः ।। १९७।।

२१०६ प्रज्ञादिभ्यश्च ५।४।३८।। प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस्

विदन् षोडन् विद्या मनस् । श्रोत्र शरीरे । जुह्वत् । कृष्ण मृगे । चिकीर्षत् । चोर शत्रु योध चक्षुस् वसु एनस् मरुत् कुञ्च सत्वत् दशार्ह वयस् (व्याकृत) असुर रक्षस् पिशाच अशनि कार्षापणा देवता बन्धु ॥ इति प्रज्ञादिः ॥ १९८॥

२१११ ❀ आद्यादिभ्य उपसंख्यानम् ❀ ५।४।४४॥ आदि मध्य अन्त पृष्ठ पार्श्व ॥ इत्याद्यादिराकृतिगणः ।१९९॥

८७७ अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७॥ शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विद् सद् दृश् विश् चतुर् त्यद् तद् यद् एतद् कियत् । जराया जरस् च । प्रतिपरसमनुभ्योऽक्ष्णः । पथिन् ॥ इति शरदादिः ॥२००॥

८६७ द्विदण्डचादिभ्यश्च ५।४।१२८॥ द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति भाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदी प्रोष्ठपदी आच्यपदी (आढचपदी) सपदि निकुच्यकर्णि संहतपुच्छि अन्तेवासी ॥ इति द्विदण्डचादिः ॥२०१॥

८७७ पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८॥ हस्तिन् कुद्दाल अश्व कशिक कुरुत कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महिला दासी गणिका कुसूल ॥ इति हस्त्यादिः ॥२०२॥

८७८ कुम्भपदीषु च ५।४।१३९ ॥ कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोणपद) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी ॥ इति कुम्भपद्यादिः ॥२०३॥

८७९ उरःप्रभृतिभ्यः कप् ५।४।१५१॥ उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः अर्थान्नञः ॥ इत्युरःप्रभृतयः ॥२०४॥

॥ इति पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः

७६ ※ शकन्ध्वादिषु पररूपं वाच्यम् ※ ६।१।९४।। शकन्धुः कर्कन्धुः कुलटा । सीमन्तः केशवेशे । हलीषा मनीषा लाङ्गलीषा पतञ्जलिः । सारङ्गः पशुपक्षिणोः ।। इति शकन्ध्वादिः ।।२०५।।

१०७१ पारस्करप्रभृतीनि च संज्ञायाम् ६।१।१५७।। पारस्करो देशः कारस्करो वृक्षः । रथस्या (रथस्था) नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । प्रात्तुम्पतौ गवि कर्तरि ।। इति पारस्करादिः ।।२०६।।

३६८१ उञ्छादीनां च ६।१।१६०।। उञ्छ म्लेच्छ जञ्ज तल्प (जल्प) जप वध । युग कालविशेषे रथाद्युपकरणे च । गरो दूष्ये (गरो डूष्ये) अवन्तः वेदवेगवेष्टबन्धाः करणे । स्तुद्रुवश्छन्दसि । वर्तनि स्तोत्रे । श्वभ्रे दरः साम्वतापौ भावगर्हायाम् । उत्तमशश्वत्तमौ सर्वत्र । भक्षमन्थभोगमन्थाः देहाः ।। इत्यञ्छादिः ।।२०७।।

३६९१ वृषादीनां च ६।१।२०३।। वृषः जनः ज्वरः ग्रहः हयः मयः गयः तायः तयः चयः अमः वेदः सूदः अंशः गुहा । शमरणौ संज्ञायां संनतौ भावकर्मणोः । मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः ।। इति वृषादिराकृतिगणः ।। अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ।।२०८।।

३७५८ विस्पष्टादीनि गुणवचनेषु ६।२।२४।। विस्पष्ट विचित्र विचित्त व्यक्त संपन्न पटु पण्डित कुशल चपल निपुण ।। इति विस्पष्टादिः ।।२०९।।

३७७१ कार्तकौजपादयश्च ।६।२।३७।। कार्तकौजपौ सावर्णिमाण्डकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवाधूलेयाः शाकलशुनेकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौद्गपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये ।। इति कार्तकौजपादिः ।।२१०।।

३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलोदासीभाराणां च ६।२।४२।। दासीभारः देवहूतिः देवभीतिः देवलातिः वसुनीतिः (वसूनितिः) औषधिः चन्द्रमाः ।। इति दासीभारादिराकृतिगणः ।।२११।।

३८१५ युक्तारोह्यादयश्च ६।२।८१।। युक्तारोही आनतरोही आगतयोधी

आगतवञ्ची आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनीभर्ता ग्रामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकशितिपाद् । पात्रेसमितादयश्च इति युक्तारोह्यादिराकृतिगणः ॥२१२॥

३८१९ घोषादिषु च ६।२।८५॥ घोष घट (कट) वल्लभ ह्रद बदरी पिङ्गल (पिङ्गली) पिशङ्ग माला रक्षा शाला (वृट्) कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि प्रेक्षाक (प्रेक्षा) ॥ इति घोषादिः ॥२१३॥

३८२० छात्र्यादयः शालायाम् ६।२।८६॥ छात्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमी ॥ इति छात्र्यादिः ॥२१४॥

३८२१ प्रस्थेऽवृद्धमकर्क्यादीनाम् ६।२॥८७॥ कर्कि (कर्की) मघ्नी मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुवल (कवल) बदरी ॥ इति कर्क्यादिः ॥२१५॥

३८२२ मालादीनां च ६।२।८८॥ माला शाला शोणा (शोण) द्राक्षा स्राष्ट्र क्षामा काञ्ची एक काम ॥ इति मालादिः ॥२१६॥

३८५२ क्रत्वादयश्च ६।२।११८॥ क्रतु दृशीक प्रतीक प्रतूर्ति हव्य भव्य भग । इति क्रत्वादिः ॥२१७॥

३८५९ आदिश्चिहणादीनाम् ६।२।१२५॥ चिहण मदुर मद्गुर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण ॥इति चिहणादिः ॥२१८॥

३८६५ वर्ग्यादयश्च ६।२।१३१॥ दिगादिषु वर्ग्यादयस्त एव दन्ताः । इति वर्ग्यादयः ॥२१८॥

३८६८ चूर्णादीन्यप्राणिषष्ठ्याः ६।२।१३४॥ चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल ॥ इति चूर्णादिः ॥२२०॥

३८६९ षट् च काण्डादीनि ६।२।१३५॥ काण्ड चीर पलल सूप शाक कूल इति काण्डादिः ॥

३८७४ उभे वनस्पत्यादिषु युगपत् ६।२।१४०॥ वनस्पतिः बृहस्पतिः शचीपतिः तनूनपात् नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्युः ॥ इति वनस्पत्यादिः ॥२२१॥

३८८० संज्ञायामनाचितादीनाम् ६।२।१४६॥ आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्राश्लिष्ट उपहित उपस्थित संहितागवि ॥ इत्याचितादिः ॥२२२॥

३८८१ प्रवृद्धादीनां च ६।२।१४७।। प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुता सूष्णवः । आकर्षे अवहितः । अवहितो भोगेषु । खट्वारूढः । कविशस्तः ।। इति प्रवृद्धादिः ।।२२३।। आकृतिगणोऽयम् ।। तेन । प्रवृद्धं यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादि ।।

३८८८ कृत्योकेष्णुचवार्वादयश्च ६।२।१६०।। चारु साधु यौधिक (यौघकि) अनङ्गमेजय वदान्य अकस्मात् वर्तमानवर्धमानत्वरमाणध्रियमाणक्रियमाणराचमानशोभमानाः संज्ञायाम् । विकारसदृशे । व्यस्तमस्ते । गृहपति । गृहपतिक । राजाह्लोश्छन्दसि ।। इति चार्वादिः ।।२२४।।

३८९० न गुणादयोऽवयवाः ६।२।१७६।। गुण अक्षर अध्याय सूक्त छन्दोमान ।। इति गुणादिराकृतिगणः ।।२२५।।

३८९८ निरुदकादीनि च ६।२।१८४।। निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः ।। इति निरुदकादिराकृतिगणः ।।२२६।।

३८२७ प्रतेरंश्वादयस्तत्पुरुषे ६।२।१९३।। अंशु जन (राजन्) उष्ट्र खेटक अजिर आर्द्रा श्रवण कृत्तिका अर्धपुर ।। इत्यश्वादिः ।।२२७।।

३८२८ उपाद्द्व्यजजिनमगौरादयः ६।२।१९४।। गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद ।। इति गौरादिः ।।२२८।।

६२९ ॐ त्रिचक्रादीनां छन्दस्युपसंख्यानम् ॐ ६।२।१९९।। त्रिचक्र त्रिवृत् त्रिवङ्कुर ।। इति त्रिचक्रादिराकृतिगणः ।।२२९।।

८३१ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६।३।३४।। प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा (स्वा) कान्ता (क्षान्ता) समा चपला दुहिता वामा अबला तनया ।। इति प्रियादिः ।।२३०।।

८३६ तसिलादिष्वाकृत्वसुचः ६।३।३५।। तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दार्हिल् तिल् थ्यन् ।। इति तसिलादयः ।।२३१।।

८३६ ॐ कुक्कुटयादीनामण्डादिषु ॐ ६।३।४२।। कुक्कुटी मृगी काकी ।। अण्ड पद शाव भ्रकुंस भ्रूकुटी ।। इति कुक्कुटयादिरण्डादिश्च ।।२३२।।२३३।।

१०३४ पृषोदरादीनि यथोपदिष्टम् ६।३।१०९।। पृषोदर पृषोत्थान

बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर ।। इति पृषोदरादिराकृतिगणः ।।२३४।।

१०३८ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ६।३।११७।। (१) कोटर मिश्रक सिध्रक पुरग सारिक (शारिक)। इतिकोटरादिः ।।२३५।। (२) किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट ।। इति किंशुलुकादिः ।।२३६।।

१०४१ मतौ बह्वोऽनजिरादीनाम् ६।३।११९।। अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक ।। इत्यजिरादिः ।।२३७।।

१०४२ शरादीनां च ६।३।१२०। शर वंश धूम अहि कपि मणि मुनि शुचि हनु ।। इति शरादिः ।।२३८।।

१०४३ ॐ अपील्वादीनामिति वक्तव्यम् ॐ ६।३।१२१।। पीलु दारु रुचि चारु गम् कम् ।। इति पील्वादिः ।।२३९।।

१३११ बिल्वकादिभ्यश्छस्य लुक् ६।४।१५३।। बिल्वक वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत क्रुञ्चा तक्षन् ।। नडाद्यन्तर्गणोबिल्वादिः ।। छविधानार्थ ये नडादयस्ते यदा छसंनियोगे कृतकुगागमास्ते बिल्वकादयः ।।२४०।। ।

।। इति षष्ठोऽध्यायः ।।

———

सप्तमोऽध्यायः

३५७१ स्नात्व्यादयश्च ७।१।४९।। स्नात्वी । पीत्वी ।। इति स्नात्व्यादिराकृतिगणः ।।२४१।।

१३८६ द्वारादीनां च ७।३।४।। द्वार स्वर स्वग्राम स्वाध्याय व्यल्कश स्वस्ति स्वर् स्फ्यकृत् स्वादु मृदु श्वस् श्वन् स्व ।। इति द्वारादिः ।।२४२।।

१५४९ स्वागतादीनां च ७।३।७।। स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड व्यवहार स्वपति स्वपिति ।। इति स्वागतादिः ।।२४३।।

१४३८ अनुशतिकादीनां च ७।३।२०।। अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य (अस्यहत्य) अस्यहेति वध्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री । राजपुरुषात्ष्यञि । सूत्रनड ।। इत्यनुशतिकादिराकृतिगणोऽयम् ।२४४।। तेन । अभिगम अधिभूत अधिदेव चतुर्विद्या इत्यादयोऽप्यन्ये विज्ञेयाः ।।

४६४ ❀ क्षिपकादीनां चोपसंख्यानम् ❀ ७।६।४५।। क्षिपका ध्रुवका चरका सेवका करका चटका अवका लहका अलका कन्यका ध्रुवका एडका ।। इति क्षिपकादिराकृतिगणः ।।२४५।।

१८६४ न्यङ्क्वादीनां च ७।३।५३।। न्यङ्कु मद्गु भृगु दूरेपाक बलेपाक क्षणेपाक दूरेपाका फलेपाका दूरेपाकु फलपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक । संज्ञायां मेघनिदाघावदाघार्घाः न्यग्रोध वीरुत ।। इति न्यङ्क्वादिः ।।२४६।।

१५७१ ❀ कणादीनां चेति वक्तव्यम् ❀ कण रण भण श्रण लुप हेठ

१५८३ व्हायि वाणि (चाणि) लोटि (लोठि) लोपि ।। इति कणादिः ।।२४७।।

।। इति सप्तमोऽध्यायः ।।

अष्टमोऽध्यायः

३६३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।१।२७।। गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्ययन प्रपञ्च प्राय न्याय प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ (भूयिष्ट) वानाम ।। इति गोत्रादिः ।।२४८।।

३६७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ८।१।६७।। काष्ठ दारुण अमातापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति ।। इति काष्ठादिः ।। २४९।।

१८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८।२।९।। यव दल्मि ऊर्मि (उर्मि)

भूमि कृमि कुञ्चा वशा द्राक्षा ध्राक्षा ध्रजि ध्वजि ध्वजि निजि सिजि सञ्जि हरित् ककुद् मरुत् गरुत् इक्षुद्रु मधु ।। इति यवादिराकृतिगणः ।।२५०।।

२३५० ※ कपिलकादीनां संज्ञाच्छन्दसोर्वेति वाच्यम् ※ ।८।२।१८। कपिलक तिविलीक लोमानि पांसुल कल्प शुक्ल कपिलिका तर्पिलिका तर्पिलि ।। आकृतिगणोऽयम् । इति कपिलकादिः ।।२५१।।

१७१ ※ अहरादीनां पत्यादिषु वा रेफः ।। ※ ८।२।७०।।१ अहर् गीर् धुर् ।। इत्यहरादिः ।।२५१।। २ पति गण पुत्र ।। इति पत्यादिः ।।२५२।।

१४४ कस्कादिषु च ८।३।४८।। कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः साद्यस्कः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् बहिष्पलम् (बर्हिष्पलम्) यजुष्पात्रम् अयस्कान्तः तमस्काण्डः अयस्काण्डः मेदस्पिण्डः भास्करः अहस्करः ।। इति कस्कादिराकृतिगणः ।।२५३।।

१०२२ सुषामादिषु च ८।३।९८।। सुषामा निःषामा दुःषामा । सुषेधः निषेधः (निःषेधः) दुःषेधः सुषंधिः निःषंधिः दुःषंधिः सुष्ठु दुष्ठु । गौरिषक्थः संज्ञायाम् । प्रतिष्णिका जलाषाहम् (जलाषाडम्) नौषेचनम् दुन्दुभिषेवणम् (दुन्दुभिषेचनम्) । एति संज्ञायामगात् । नक्षत्राद्वा । हरिषेण, रोहिणीषेणः ।। इति सुषामादिराकृतिगणः ।।२५४।।

३१६८ न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ८।३।११०।। सवने सवने । सूते सूते । सोमे सोमे । सवनमुखे सवनमुखे । किंसं किंसम् (किंसः किंसः) अनुसवनमनुसवनम् । गोसनिं गोसनिम् । अश्वसनिमश्वसनिम् । पाठान्तरम् सवने सवने । सवनमुखे सवनमुखे । अनुसवनमनुसवनम् । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे सोमे । सुते सुते । संवत्सरे संवत्सरे । बिसं बिसम् । किसं किसम् । मुसलं मुसलम् । गोसनिम् अश्वनिम् ।। इति सवनादिः ।।२५५।।

१०५१ ※ इरकादिभ्यः प्रतिषेधो वक्तव्यः ※ ८।४।६।। इरिका मिरिका तिमिरा ।। इतीरिकादिराकृतिगणः ।।२५६।।

१०५६ ※ वाप्रकरणे गिरिनद्यादीनां वोपसंख्यानम् ८।४।१०।। गिरिनदी गिरिनख गिरिनद्ध गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्यमान माषोन आर्गयन ।। इति गिरिनद्यादिराकृतिगणः ।।२५७।।

१०५५ ※ युवादेर्न ※ युवन् पक्व अहन् ।। इति युवादिः ।। (आर्ययूना क्षत्रिययूना प्रपक्वानि दीर्घाह्नी) आकृतिगणोऽयम् ।।

७६१ क्षुभ्नादिषु च ८।४।३६॥ क्षुभ्ना नृगमन नन्दिन् नन्दन नगर। एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति। हरिनन्दो हरिनन्दनः गिरिनगरम्। नृतिर्यङि प्रयोजयन्ति। नरीनृत्यते। नर्तन गहन नन्दन निवेश निवास अग्नि अनूप। एतान्युत्तरपदानि प्रयोजयन्ति। परिनर्तनम् परिगहनम् परिनन्दनम् शरनिवेशः शरनिवासः शराग्निः दर्भानूपः। आचार्यादणत्वं च। आचार्यभोगीनः ॥ आकृतिगणोऽयम् ॥ पाठान्तम्॥ क्षुभ्ना तृप्नु नृनमन नरनगर नन्दन। यङ्नृती। गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन। इरिकादीनि वनोत्तरपदानि संज्ञायाम्। इरिका तिमिर समीर कुबेर हरि कर्मार॥ इति क्षुभ्नादिः॥ २५८॥ इत्यष्टमोऽध्यायः॥

॥ इति श्रीपाणिनिमुनिप्रणीतो गणपाठः समाप्तः॥

परिशिष्टम्-४

अथ काशिकावृत्तिसारसुधान्तर्गत-वार्तिकादीनां सूची

सूत्राङ्कः	
१-१-४७	मस्जेरन्त्यात्पूर्वम्० ।
७२	समासप्रत्ययविधौ० ।
	उभिद्वर्ण० ।
	यस्मिन्विधिः० ।
१-२-५८	संख्याप्रयोगे० ।
५९	सविशेषणस्य प्रतिषेधः ।
	युष्मदि गुरावेकेषाम् ।
७२	त्यदादीनां मिथो यत्० ।
७३	अनेकशफेषु० ।
१-३-१६	परस्पराच्चेष्टिः० ।
१७	यदागमाः० ।
२० (सुधा) २७	स्वाङ्गकर्मकात्० ।
२८ सुधा	,, ,,
२५	उपाद्देवपूजा० ।
३०	उपसर्गात्० ।

सूत्राङ्कः	
१-४-१३	तदादिवचनम्० ।
२४ (सुधा)	जुगुप्साविराम० ।
३२	क्रिययाऽपीति० ।
५२ (सुधा)	नी-वह् धात्वोः० ।
	आदिखाद्योर्न० ।
	भक्षेरहिंसार्थस्य न० ।
५३ (सुधा)	अभिवादिदृशोः० ।
६५	अन्तःशब्दस्य० ।
२-१-२ (सुधा)	सुबन्तस्य पराङ्गवद्० ।
,,	अव्ययानां० ।
२३	श्रितादिषु० ।
३१	पूर्वादिषु० ।
३६ (सुधा)	अर्थेन नित्यसमास वचनम्० ।
३७	भयभीत० ।
५९	श्रेण्यादिषु० ।
६० (सुधा)	कृतापकृता० ।

सूत्राङ्कः

(सुधा) समानाधिकरण० ।

२-२-३ (सुधा) तृतीयशब्दस्यापीष्यते० ।

६ (सुधा) नञो न लोपः० ।

७ गुणवचनेनेति० ।

८ कृद्योगा षष्ठी० ।

९ (सुधा) तत्स्थैर्गुणैः० ।

१० प्रतिपदविधाना० ।

१८ प्रादयो गताद्यर्थे० ।

अत्यादयः क्रान्ताद्यर्थे० ।

अवादयः क्रुष्टाद्यर्थे० ।

पर्यादयो ग्लानाद्यर्थे० ।

निरादयः क्रान्ताद्यर्थे० ।

(सुधा) इवेन सह समासो० ।

२४ समानाधिकरणानाम्० ।

अव्ययानाम्० ।

(सुधा) सप्तम्युपमान० ।

३३ (सुधा) बहुष्वनियमः० ।

२-२-३४ (सुधा) अभ्यर्हितञ्च० ।

,, लघ्वक्षरं पूर्वम्० ।

२-३-२ (सुधा) उभसर्वतसोः० ।

अभितः परितः० ।

१३ चतुर्थीविधाने० ।

उत्पातेन ज्ञापिते च० ।

सूत्राङ्कः

१७ यदेतदप्राणिषु० ।

२७ (सुधा) निमित्तपर्याय प्रयोगे० ।

२८ यतश्चाध्व० ।

२९ (सुधा) अधिकरणे च० ।

३६ क्तस्येन्विषयस्य० ।

(सुधा) साध्वसाधुप्रयोगे च० ।

निमित्तात्कर्मयोगे० ।

२-४-१२ फलसेना० ।

१७ अकारान्तोत्तर० ।

वा टाबन्तः ।

अनो न लोपश्च० ।

पात्रादेर्न ।

१८ पुण्यसुदिनाभ्यामह्नः० ।

पथः संख्याऽव्ययादेः० ।

क्रियाऽव्यय० ।

२३ पर्यायस्यैवेष्यते ।

२६ द्विगुप्राप्ता० ।

४५ इण्वदिक० ।

५४ कशादिरप्यय० ।

वर्जने निषेधः० ।

असनयोश्च० ।

५६ (सुधा) क्यपि न भवति ।

७७ गापोर्ग्रहणे० ।

८४ सप्तम्याः समृद्धि० ।

३-१-५ एभ्यः क्रमात्० ।

सूत्राङ्कः

७　आशङ्कायाम्० ।
　इच्छासन्नन्तात्० ।
८　मान्ताव्ययप्रतिषेधः ।
१०　अधिकरणाच्चेति० ।
११　ओजसोऽप्सरसोः० ।
१५　तपसः परस्मैपदं च ।
१६　घेनाच्च० ।
१७ (सुधा) सुदिनदुर्दिन० ।
२०　पुच्छादुदसने० ।
२२　सूचिसूत्रि० ।
२५　अर्थवेद० ।
२६　तत्करोति० ।
　आख्यानात्० ।
३६　ऊर्णोतेश्च० ।
४४　कृषस्पृश० ।
४८　कमेरुपसंख्यानम् ।
८६ (सुधा) यक्-चिणोः० ।
१३८　एवादिषु० ।
१४०　तनोतेः० ।
१४५　नृतिखनि० ।
३-२-५　आलस्यसुख० ।
　'क' प्रकरणे मूल० ।
८　सुरांशीध्वोः० ।
　बहुलं छन्दसि ।
९　अच्प्रकरणे० ।
१३　हस्तिसूचकयोः० ।
१५ (सुधा) पार्श्वादिषु० ।
　उत्तानादिषु० ।

सूत्राङ्कः

　गिरौ डश्छन्दसि ।
२१ (सुधा) किं यत्तद्० ।
२४　व्रीहिवत्सयोः० ।
२८　वातशुनी० ।
२९　स्तने धेटः ।
　नासिकायाम्० ।
३८　खच्प्रकरणे० ।
　विहायसो विह च ।
　खच्च डिद्वा वाच्यः० ।
　डे च विहायसो० ।
४१　भगे च दारे० ।
४८　सर्वत्रपन्नयोः० ।
　उरसो लोपश्च ।
　सुदुरोरधिकरणे० ।
　निरो देशे ।
　ड-प्रकरणे अन्येष्वपि० ।
४९　दारावाहनो० ।
　चारौ वा ।
　कर्मणि समि च ।
५५　राजघ उपसंख्यानम् ।
६०　समानान्ययोश्च० ।
　दृशेः क्सश्च० ।
७८　साधुकारिणि च ।
　ब्रह्मणि वधः ।
८६ (सुधा) कुत्सित ग्रहणं० ।
१०२　आदिकर्मणि० ।
१११ (सुधा) परोक्षे च लोक० ।
११५　अत्यन्ता० ।

सूत्राङ्कः

१३५ (सुधा) तृन्विधा० ।
नयतेः पुक्च ।
त्विषेर्देवतायाम्० ।
क्षदेश्च नियुक्ते ।
१७१ (सुधा) उत्सर्गश्छन्दसि० ।
भाषायां धाञ्० ।
सासहि० ।
१७२ धृषेश्चेति वाच्यम् ।
१७८ किरन्वचि० ।
द्युतिगमि० ।
जुहोतेर्दीर्घश्च ।
ध्यायतेः सम्प्रसारणं च० ।
१८० डु प्रकरणे० ।
३-३-३ (सुधा) अनद्यतन उपसंख्यानम् ।
१७ (सुधा) व्याधि० ।
२१ (सुधा) शॄ वायुवर्णनिवृतेषु ।
३५ (सुधा) छन्दसि निपूर्वात्० ।
५६ अभिविधौ० ।
९४ ग्लाम्लाज्या० ।
(सुधा) सम्पदादिभ्यः० ।
१०१ परिचर्यापरिसर्या० ।
जागर्तेरकारो वा ।
१०७ (सुधा) घट्टिवन्दि० ।
इषेरनिच्छार्थस्य ।

सूत्राङ्कः

१२५ डो वाच्यः० ।
१३० शासियुधि० ।
१४७ (सुधा) जातुयदोर्लिङ्० ।
१५७ (सुधा) कामप्रवेदने० ।
३-४-२१ व्यादाय स्वपिति० ।
८६ हिन्योरुत्व० ।
४-१-४ सुधा) शूद्राच्चामहत्० ।
६ धातोरुगितो न ।
अञ्चतेश्चोपसंख्यानम् ।
७ वनो न हशः ।
१५ नञ्स्नञीकक्० ।
१६ अपत्यग्रहणं कर्त्तव्यम् ।
२० वयस्य चरमे० ।
२७ हायनान्ताद्वयसि ।
३५ दासाच्छन्दसि ।
३९ पिशङ्गाच्च ।
असितपलितयोः प्रतिषेधः ।
छन्दसि क्नम् इत्येके ।
भाषायामपीत्येके ।
४२ नीलादोषधौ० ।
४४ खरुसंयोगोपधान्न ।
४५ इतः प्राण्यङ्गात् ।
कृदिकारादक्तिनः ।
सर्वतोऽक्तिन्नर्थात्० ।

सूत्राङ्कः

४८ गोपालिकादीनां० ।
सूर्याद्देवतायां० ।
४९ हिमारण्ययोर्महत्त्वे ।
यवाद्दोषे ।
यवनाल्लिप्याम् ।
उपाध्याय० ।
आचार्यादणत्वञ्च ।
५२ जातान्तान्न ।
पाणिगृहीती० ।
अबहुनञ्० ।
५३ (सुधा) बहुलं संज्ञाछन्दसोः ।
५५ कबरमणि० ।
उपमानात्० ।
६३ हयगवय० ।
६६ अप्राणिजाते ।
६८ श्वशुरस्यो० ।
७० सहितसहाभ्यां० ।
७१ गुग्गुलुमधु० ।
७३ (सुधा) नृनरयोर्वृद्धिश्च ।
८५ (सुधा) यमाच्च ।
पृथिव्या ञाञौ ।
देवस्य यञञौ ।
बहिषष्टिलोपश्च ।
ईकक्च ।
स्थाम्नोऽकारः ।
लोम्नोऽपत्ये बहुषु ।
सर्वत्र गोरजादि० ।
९७ व्यासवरुड० ।

सूत्राङ्कः

९९ (सुधा) शलङ्कु शलङ्कं च ।
१२० (सुधा) अण् क्रुञ्चा० ।
१२८ चटकाच्चेति वाच्यम् ।
स्त्र्यपत्ये लुग्वाच्यः ।
१३७ राज्ञोऽपत्ये० ।
१५६ (सुधा) त्यदादीनां वा फिञ् ।
१५८ (सुधा) चर्मिवर्मिणोर्नलोपश्च ।
१६८ क्षत्रियसमानशब्दात्० ।
१७१ पाण्डोर्जनपदात्० ।
१७५ कम्बोजादिभ्यो लुग्वचनं० ।
४-२-२ पराभ्यामणपि ।
नील्या अन् ।
(सुधा) पीतात्कन्० ।
हरिद्रामहार० ।
८ सर्वत्राग्निकलिभ्यां० ।
३५ (सुधा) ठञ्प्रकरणे० ।
३६ पितृमातृभ्याम्० ।
ताभ्यां पितरि० ।
अवेर्दुग्धे० ।
तिलान्निष्फलात्० ।
३८ (सुधा) गुणादिभ्यो ग्रामच्० ।
३९ वृद्धाच्चेति० ।
(सुधा) प्रकृत्याऽके० ।
४० गणिकाया यञ् वक्तव्यः ।
४२ पृष्ठादुपसंख्यानम् ।

सूत्राङ्कः

अह्नः खः क्रतौ ।

पर्श्वा णस् वक्तव्यः ।

वातादूलः ।

४३ गजाच्चेति वक्तव्यम् ।

४५ (सुधा) क्षुद्रकमालवात्

सेनासंज्ञायाम् ।

५१ (सुधा) खलादिभ्य इनिः ।

कमलादिभ्य. खण्डच् ।

नरकरि० ।

पूर्वादिभ्यः काण्डः ।

६० सूत्रान्तात्० ।

(सुधा) विद्या च नाङ्ग-

क्षत्र० ।

आख्याना० ।

सर्वादेर्द्विगोश्च लः ।

८७ महिषाच्चेति

वक्तव्यम् ।

९१ (सुधा) क्रुञ्चाया ह्रस्व-

त्वञ्च ।

तक्षन्नलोपश्च ।

९३ विगृहीतादपीष्यते ।

विपरीताच्च ।

१०४ त्यप् नेर्ध्रुवे ।

(सुधा) निसो गते ।

११६ वा नामधेयस्य० ।

(सुधा) आपदादिपूर्व० ।

१२९ (सुधा) पथ्यध्याय० ।

वा गोमयेषु ।

सूत्राङ्कः

१३८ कुग् जनस्य परस्य

च ।

देवस्येति वाच्यम् ।

स्वस्य च ।

मध्यमध्यमं० ।

१४१ अनेकान्तग्रहणे० ।

४-३-४ सपूर्वाट्ठञ् वक्तव्यः ।

८ आदेश्चेति वक्तव्यम् ।

अवोऽधसोर्लोपश्च ।

१६ (सुधा) संवत्सरात्फलपर्वणोः ।

२३ (सुधा) प्रगस्य छन्दसि

गलं पश्च ।

अग्रपश्चाड्डिमच् ।

अन्ताच्चेति वक्त-

व्यम् ।

३४ लुक्प्रकरणे० ।

५३ (सुधा) उदकात्संज्ञायाम् ।

५८ (सुधा) बहिर्देवपञ्च० ।

चतुर्मासात्० ।

६० ऊर्ध्वदेहाच्च ।

लोकोत्तरपदाच्च ।

जनपरयोरीयः कुक्च ।

(सुधा) मध्यशब्दादीय० ।

मध्यो मध्यं० ।

८७ (सुधा) लुबाख्यायिका० ।

८८ (सुधा) द्वन्द्वे देवासुरा० ।

१०८ नान्तस्य टिलोपे० ।

१२१ (सुधा) रथ सीताहलेभ्यो० ।

सूत्राङ्कः		सूत्राङ्कः	
१२३ (सुधा)	पत्राद्वाह्ये ।		काकिण्याश्च ।
१२५ (सुधा)	वैरे देवासुरादिभ्यः० ।	३५ (सुधा)	शताच्चेति वक्तव्यम् ।
१२६	चरणाद्धर्माम्नाययोरिष्यते ।	३८	तस्य निमित्त प्रकरणे० ।
१२७	घोषग्रहणम्० ।	७१ (सुधा)	यज्ञर्त्विग्भ्याम्० ।
१३४	अश्मनो विकारे० ।	७४	क्रोशशतयोजनशत० ।
१५२	तालाद्धनुषि ।	७७ (सुधा)	आहृतप्रकरणे० ।
१६६	फलपाकशुषां लुबिष्टः० ।		अजपथशंकुपथाभ्याम्० ।
	पुष्पमूलेषु बहुलम् ।		मधुकमरिचयोरण्० ।
४-४-१	तदाहेति० ।	८४ (सुधा)	महानाम्न्यादिभ्यः० ।
	पृच्छतो० ।		तच्चरति ।
	गच्छतो० ।		चातुर्मास्याण्यो० ।
१७ (सुधा)	पादः पच्च ।		संज्ञायामण् वक्तव्यः ।
२०	भावप्रत्ययान्तात्० ।	१०५	तदस्य प्रकरणे० ।
३० (सुधा)	वृद्धवृंधुषि० ।	११० (सुधा)	चूडादिभ्य उपसंख्यानम् ।
४१	अधर्माच्च वाच्यम् ।	१११ (सुधा)	स्वर्गादिभ्यो यत्० ।
४८ (सुधा)	नराच्चेति वक्तव्यम् ।		पुण्याहवाचनादिभ्यो० ।
१२८ (सुधा)	लुगकारेकार० ।	११४ (सुधा)	आकालाट् ठंश्च ।
१४० (सुधा)	अक्षर समूहे० ।	१२४	चातुर्वर्ण्यादीनां० ।
	वसुशव्दादपि० ।		सर्ववेदादिभ्यः० ।
५-१-१०	सर्वस्य वा वचनम् ।	१२६	दूतवणिग्भ्यां च ।
	पुरुषाद् वधविकार० ।	१२८ (सुधा)	राजासे ।
३०	बहुनिष्काच्चेति वक्तव्यम् ।	१२९ (सुधा)	सुभगं मन्त्रे ।
३३	केवलाच्च० ।	१३० (सुधा)	पुरुषादसे ।
			हृदयादसे ।

सूत्राङ्कः		सूत्राङ्कः	
	तदन्ताच्चेति० ।		कुमारीक्रीडनकानि ।
५-३-२	बहुग्रहणे० ।	३१	लोहितालिलङ्ग० ।
२२	द्युश्चोभयशब्दात् ।	३४	उपायाद्ध्रस्वत्वं च ।
३२	अर्धोत्तरपदस्य च ।	३६ (सुधा)	अण्-प्रकरणे० ।
४५ (सुधा)	घमुन्नन्तात्स्वार्थे० ।	४२	बह्वल्पार्थान्० ।
७१	तूष्णीमः काम् वाच्यः ।	४४	तसि प्रकरणे० ।
	शीले कः मलोपश्च ।	६७	भद्राच्च ।
८३	अनजादौ वा लोपः ।	६९	स्वतिभ्यामेव
	चतुर्थादच० ।	(सुधा)	प्राग्बहुव्रीहि० ।
	लोपः पूर्वपदस्य च ।	६३	अत्र प्रकरणे० ।
	विनापि प्रत्ययेन ।	७५	कृष्णोदक्० ।
(सुधा)	उवर्णात्ल इलस्य च ।		भूमेरपि० ।
	एकाक्षरपूर्वपदानाम्० ।		अन्यत्रापि दृश्यते ।
८४ (सुधा)	शेवलादीनां० ।	७७	त्र्युपाभ्यां चतुर० ।
११८ (सुधा)	गोत्रप्रत्ययस्य० ।	७८	पल्यराजभ्यां च ।
५।४।३	चञ्चद्बृहतोः० ।	१०३ (सुधा)	अनसन्तान्नपुंसकात्० ।
२५ (सुधा)	नवस्य नू० ।	११६	प्रधानपूरणीग्रहणम्० ।
	नश्च पुराणे प्रात् ।		नेतुर्नक्षत्र उपसंख्यानम् ।
	भागरूप० ।	११८	खुरखुराभ्यां नस्० ।
२९ (सुधा)	ऋतावुष्णशीते ।		वेर्ग्रो वक्तव्यः ।
	अणु निपुणे ।	१३१	ऊधसोऽनङ् अत्र० ।
	पुत्र कृत्रिमे ।	१५१ (सुधा)	अर्थान्नञः ।
	स्नात वेदसमाप्तौ ।	६।१।३	वकारस्याप्ययम्० ।
	शून्य रिक्ते ।		यपरस्य रेफस्य न० ।
	तनु सूत्रे ।		ईर्ष्यतेस्तृतीयस्य० ।
	ईयसश्च ।		कण्ड्वादीनां तृतीयस्यैकाचः ।

सूत्राङ्कः

९१ (सुधा) आद्युदात्त०
१६५ (सुधा) ऋषिप्रतिषेधो मित्रे ।
१६९ (सुधा) अन्तोदात्तप्रकरणे० ।
पूर्वपदान्तोदात्तप्रकरणे० ।
पूर्वपदाद्युदात्तप्रकरणे० ।
६।३।२ (सुधा) ब्राह्मणाच्छंसिन० ।
३ अञ्जस उपसंख्यानम्० ।
पुंसानुजो जनुषान्ध० ।
हृद्द्युभ्यां ङेरुप० ।
११ अन्ताच्चेति० ।
१८ अपो योनियन्मतुषु० ।
२१ वाग्दिक्पश्यद्भ्यो० ।
आमुष्यायणादीनां च ।
(सुधा) देवानाम्प्रियः ।
(सुधा) शेपपुच्छलाङ्गूलेषु० ।
(सुधा) दिवश्च दासे० ।
२६ (सुधा) उभयत्र वायो:० ।
३५ शास बहुलपार्थस्य० ।
त्वतलोर्गुणवचनस्य० ।
भस्याढे तद्धिते० ।
भवतष्ठक्छसो:० ।
३७ कोपधप्रतिषेधे ।
४१ औपसंख्यानिकस्य० ।
४२ कुक्कुटयादीनाम्० ।

सूत्राङ्कः

(सुधा) पुंवद्भावाद्० ।
४४ कृन्नद्याः प्रतिषेधः ।
४५ (सुधा) पुंवद्भावोऽन्यत्र० ।
४६ (सुधा) महदात्वे० ।
अष्टनः कपाले० ।
गवि च युक्ते० ।
४७ प्राक्शतादित्येव ।
५३ पद्भाव इके० ।
५६ निष्के चेति वाच्यम् ।
५७ संज्ञायामुत्तरपदस्य० ।
६१ भ्रकुंसादीनाम्० ।
७० गिलेऽगिलस्य मुम्० ।
(सुधा) गिलगिले चेति० ।
अस्तु इत्यस्यापि० ।
धेनोर्भव्यायाम् मुम् ।
लं कस्य पृणे मुम् ।
इत्येनभ्याशस्य ।
उष्णभद्रयोः करणे ।
७३ नञः क्षेपे० ।
८६ दृक्षे च वक्तव्यम् ।
क्स प्रत्यययोरपि० ।
९० दृक्षे चेति० ।
९१ दृक्षे च० ।
९० आद्रिसध्र्यो० ।
(सुधा) छन्दसि स्त्रियाम्० ।
९७ देवयजने० ।
ईत्वमनवर्णादिति० ।
१०९ (सुधा) दिवशब्दस्योत्तरस्य० ।

सूत्राङ्कः

षष उत्वम् ।

धासु वा ।

१२२ सादकारयोः

कृत्रिमे० ।

१२६ गवि च युक्ते० ।

१३७ (सुधा) शुनो दन्त० ।

६।४।१६ गमेरिङादेशस्येति० ।

२२ वुग्युटा० ।

२४ रञ्जेर्णौ मृगरमण० ।

घिनुणि चोप-

संख्यानम् ।

रजनरजकरजः० ।

३४ क्वौ च शास

इत्वम् ।

(सुधा) क्विप् प्रत्यये० ।

४० गमादीनां वाच्यम् ।

ऊ च गमादीनाम्० ।

४८ वृद्धिदीर्घाभ्याम्० ।

८२ गतिकारकाभ्याम्० ।

८४ पुनर्भ्वश्च० ।

कारापूर्वस्यापीष्यते ।

१०६ (सुधा) उतश्च प्रत्यया-

च्छन्दो० ।

११४ दरिद्रातेरार्धधातुके० ।

अद्यतन्यां वेति

वाच्यम् ।

सूत्राङ्कः

१२० दम्भेरेत्वं वाच्यम् ।

(सुधा) नशिमन्यो० ।

१२२ श्रन्थश्च ।

१३१ सुधा) वसुग्रहणे० ।

१३३ (सुधा) श्वादीनामेतत्० ।

१४१ (सुधा) आङोऽन्यत्रापि

दृश्यते ।

१४४ (सुधा) नान्तस्य टिलोपे० ।

अश्मनो विकार० ।

चर्मणः कोश० ।

शुनः सङ्कोच० ।

१४५ अह्नः समूहे० ।

१४८ औङः श्यां०

१४९ मत्स्यस्य ङ्याम् ।

सूर्यागस्त्ययोश्छे च० ।

तिष्यपुष्ययोर्न० ।

१५३ (सुधा) क्रुञ्चा ह्रस्वत्वं च ।

१५५ णाविष्ठवत्० ।

१६३ (सुधा) प्रकृत्याऽके ।

७।१।१९ (सुधा) श्यां प्रतिषेधो

वाच्यः ।

२१ (सुधा) तदन्तग्रहणम्० ।

२६ (सुधा) एकतराद्धि० ।

३९ (सुधा) सुपां सुपो० ।

तिङां तिङो० ।

इयाडियाजी-

सूत्राङ्कः

कारणाम् ।

आङ्याजयारां च० ।

४८ पीत्वीनं सोमम्० ।

५१ अश्ववृषयो० ।

क्षीरलवणयो० ।

सर्वप्रातिपदिकानां० ।

५३ स्त्रीणामित्यपि० ।

५९ तुम्फादीनाम्० ।

७२ बर्हजि प्रतिषेधो वाच्यः ।

८४ उशनसः सम्बुद्धावपि० ।

८७ तृज्वद्भावात्० ।

८८ तदन्तविधिरत्रेष्यते ।

अनडुहः स्त्रियां वा० ।

१०० लाक्षणिकस्यापि० ।

१०२ इत्वोत्वाभ्याम्० ।

७।२।९ त्रितुत्रेत्या० ।

११ (सुधा) वाच्य ऊर्णोतेर्णु० ।

१३ (सुधा) क्रमोऽसुट्० ।

२९ तुट्यर्थस्य० ।

३० (सुधा) वितनि नित्यम्० ।

४८ तनिपतिदरिद्राणाम्० ।

५८ आत्मनेपदेन० ।

६८ दृशेश्चेति वक्तव्यम् ।

७८ ईशेरपिध्वे परे० ।

९९ (सुधा) तिसृभावे० ।

१०२ द्विपर्यन्तानामिष्यते ।

सूत्राङ्कः

(सुधा) संज्ञोपसर्जनीभूतास्तु० ।

१०७ (सुधा) औत्वप्रतिषेधः ।

७।३।८ इकारग्रहणं कार्यम् ।

३४ अनाचमिकमि० ।

३७ पातेर्णौ लुक्० ।

धूञ्-प्रीञोर्नुग्० ।

४४ मामकनरकयो० ।

त्यक्त्यपोश्च० ।

४५ प्रतिषेधे त्यकन० ।

आशिषि च० ।

उत्तरपदलोपे० ।

क्षिपकादीनाम्० ।

तारका ज्योतिषि ।

वर्णका तान्तवे ।

अष्टका पितृदैवत्ये ।

सूतकादीनां वा० ।

(सुधा) पावकादीनाम्० ।

४६ धात्वन्तय-कोस्तु निष्यम् ।

८६ आहो भुवश्चेण् नेष्यते ।

१०७ डलकवतीनाम्० ।

छन्दसि वेति वाच्यम् ।

मातृणां मातच्० ।

१०९ जसादिषु छन्दसि वा० ।

७।४।१ (सुधा) उपधाह्रस्वत्वे० ।

९ दिग्यादेशे० ।

१० संयोगोपध० ।

सूत्राङ्कः

३० अर्तेः अटचर्य० ।
हन्तेर्हिंसायां यङि० ।
३५ (सुधा) अपुत्रादीनामिति० ।
४१ (सुधा) श्यतेरित्वम्० ।
५४ (सुधा) सनि राधो० ।
५९ अभ्यासस्यानचि ।
६१ खर्पूर्वाः खयः इति० ।
८५ पदान्तवच्च० ।
९० रीगृत्वतो वाच्यम् ।
८।१।५ असमासे वा ।
१२ आनुपूर्व्ये० ।
कर्मव्यतिहारे० ।
स्त्रीक्लीबयोरम्० ।
(सुधा) स्वार्थेऽवधार्यमाणे० ।
१९ (सुधा) समानवाक्ये० ।
२६ अन्वादेशे० ।
२७ (सुधा) वा नाम ।
६७ (सुधा) मलोपश्च ।
६९ (सुधा) क्रियाकुत्सने० ।
विभाषितं चापि० ।
८।२।३ (सुधा) एकादेश० ।
संयोगान्तलोपो० ।
निष्ठादेशः० ।
श्चुत्वं धुटि ।
द्विर्वचने पर० ।
७ अह्नो न लोप० ।
८ वा नपुंसकानाम्० ।
१७ (सुधा) भूरिदाव्नः० ।

सूत्राङ्कः

ईद्रथिनः ।
१८ कृपाकृपण० ।
(सुधा) बालमूल० ।
२२ (सुधा) योगे चेति० ।
३५ (सुधा) हृग्रहोर्भश्छन्दसि ।
४४ ऋकारल्वादिभ्यः० ।
पूञो विनाशे० ।
(सुधा) दुग्वोर्दीर्घश्च० ।
५५ उत्फुल्लसम्फुल्लयोः० ।
६८ अह्नो रूपराशि० ।
७० अहरादीनाम्० ।
८३ (सुधा) राजन्य विशां च० ।
स्त्रियामपि० ।
१०३ (सुधा) असूयादिषु वा० ।
१०७ प्रश्नान्ताभिपूजित० ।
(सुधा) आमन्त्रिते छन्दसि० ।
८।३।१ विभाषा भवद्० ।
५ सम्पुंकानाम्० ।
२६ यवलपरे० ।
३६ खर्परे शरि० ।
३८ (सुधा) सोऽपदादौ० ।
रोः एव काम्ये ।
४१ (सुधा) पुम्मुहुसोः० ।
८२ अग्नेर्दीर्घात्० ।
९७ स्थास्थिन्० ।
९८ गौरिषक्थः संज्ञायाम् ।
१०१ तिङन्तस्य प्रतिषेधः ।
११६ स्तन्भुसिवुसहां० ।

सूत्राङ्कः		सूत्राङ्कः	
८।४।१	ऋवर्णाच्चेति० ।	४२	अनाम् नवति० ।
६	द्व्यक्षर० ।	४५	मयटि नित्यं वाच्यम् ।
	इरिकादिभ्यः० ।	४७	यणो मयो द्वे वाच्ये ।
१०	गिरिनद्यादीनाम्० ।		अवसाने च यरो० ।
११	युवादीनां प्रतिषेधः ।	(सुधा)	शरः खयो द्वे भवतः ।
२९	कृत्स्थस्य णत्वे० ।	४८ (सुधा)	तत्परे चेति वक्तव्यम् ।
३४ (सुधा)	ण्यन्तानां भादीनाम्० ।		वा इतजग्धयोः ।
३८	पदव्यवाये० ।	६१	उत्पूर्वस्य स्कन्देः ।
३९	आचार्यादणत्वं च ।		रोगे चेति वक्तव्यम् ।
	अविहितलक्षणो० ।	६३	छत्वममीति वाच्यम् ।

———

आत्माष्टकम्

पाणिन्यष्टके व्याख्या काशिकावृत्तिनामिका ।
श्री वामन-जयादित्यकृता काश्यां विराजते ॥१॥

ग्राम एकडलाऽऽख्याते यमुनातीरवर्तिनि ।
काशिकावृत्तिसारोऽयं बलभद्रेण निर्मितः ॥२॥

विद्याचणः कश्यपगोत्रविप्रो दुर्गाप्रसादोऽपि किलात्र जातः ।
तन्नन्दनो नन्दकिशोरनामा देवीसहायश्च तदात्मजोऽभूत् ॥३॥

गौरीदत्तः सुतस्तस्य गौरीचरणपूजकः ।
राजीवलोचनस्तस्य पुत्रो मम पितामहः ॥४॥

राजीवलोचनस्यासीद् बालकराम आत्मजः ।
संस्कृताकादमीसंस्था-सत्कृतः श्रोत्रियोऽभवत् ॥५॥

पुत्रो बालकरामस्य शिवादेव्याश्च गर्भजः ।
चन्द्रभानुरहं ज्येष्ठः शब्दब्रह्मसमर्चकः ॥६॥

मिश्रो गयाप्रसादोऽथ मामकीनः पितामहः ।
त्रिपाठी रामचन्द्रश्च द्विवेदी रामशङ्करः ॥७॥

मुख्या मे गुरवो येषां कृपयैवाहमाप्तवान् ।
सम्मानपत्रं विद्वत्त्वे प्रत्तं राष्ट्रपतेः करात् ॥८॥

शुद्धिपत्रम्

पृष्ठम्		अशुद्धरूपम्	शुद्धरूपम्
४	सुधा	आत्मान्	आत्मन्
५	वृत्ति	प्रत्यय	प्रत्ययः
६	सुधा	पारखेयी	परिखेयी
१४	वृत्ति	सार्व	सार्व-
२७	सुधा	बहुचान्तो	बहुवचनान्तो
३६	सुधा	उचित	उचितस्य
३८	वृत्ति	पातिपदिक	प्रातिपदिक
५३	सुधा	चतुर	चतुर्
६५	सूत्र	दिनः	दिनिः
७०	सुधा	इकास्य	ईकारस्य
७१	वृत्ति	सहस्त्री	सहस्री
९४	सूत्र	एकाद	एकाद्
९८	सुधा	प्रचति	पचति
११५	सूत्र	दणौ	दणो
१२२	सूत्र	चतुर्भ्या	चतुर्भ्यः
१४२	सूत्र	अह्ला	अह्लो
१५१	वृत्ति	रस्त	रस्य
१५४	सूत्र (संख्या)	१३४४	१३४
१५५	सूत्र (संख्या)	११४	१४१
१६०	वृत्ति (संख्या)	१७०	१६०
१९०	वार्तिक	ऱृ	ऋ
२३३	ग्रन्थ-भाग	प्रथमः	द्वितीयः
२५२	वृत्ति	परमत्वँ	परमत्वं
२६०	सुधा	सुषमः, सौषमिः	सुशमः, सौशमिः
२६८	वृत्ति	श्तान्त	क्तान्त
२९५	वृत्ति	नसिल	तसिल
३०७	सूत्र	ङ्याषोः	ङ्यापोः
३११	सूत्र	नषा	नपा

पृष्ठम्		अशुद्धरूपम्	शुद्धरूपम्
३१९	वार्तिक	कदभावे	कद्भावे
३२५	वृत्ति	मधूवती	मधूवती
३३३	सुधा	चतसृणम्	चतसृणाम्
३३४	सूत्र	त्वष्ट्ट	त्वष्टृ
३६३	सुधा	प्रवर्तते कुरु	प्रवर्तते । कुरु
३५८	वृत्ति	ओकारो	औकारो
३९०	सुधा	बाधयित्वा	बाधित्वा
४०६	सुधा	किञ्चत्	किञ्चित्
४१९	सुधा	यण्	गुण
४४७	सुधा	वतिजज्ञिषे	व्यतिजज्ञिषे
४५४	सुधा	जरस	जरसा
४५६	सुधा	साकच्चाद्	साकच्काद्
४७१	सुधा	हनो	हन
४८८	वृत्ति	ब्रव	ब्रूव
५०५	सूत्र	ऋच्छयृताम्	ऋच्छत्यृताम्
५०९	वार्तिक	शूणोर्ती	शूर्णोती
५३२	सुधा	प्रारब्धम्	प्रारब्धः
५४५	—	फा० ६५	फा० ६९
६२४	सूत्र	न	नः
६९०	श्लोक २	प्रकाशि	प्राकाशि

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥